MSS No. 132 Subject Religion

Name of MSS Sānkarabhāsya

Author – –

Period – – Folios 367

Script Sanskrit Source M/S Pirthipal Singh, Amritsar

Missing Folios 225, 242, 324

काशीनाथस्य

८५५

1895

I

XI

भाम.
च. अ.
१

ॐ श्रीगणेशाय नमः ॐ यज्ज्ञानाज्जीवतो मुक्तिरुत्क्रान्तिगतिवर्जिता । लभ्यते तत्परं ब्रह्म रामनामास्मि निर्भयं ॥ १ ॥ आवृत्तिरसकृ
दुपदेशात् साधनानि रूप्य फलं निरूप्यतेऽस्मिन्नध्याये योऽहं तु फलभावसङ्गतिमाह तृतीय इति फले प्रसङ्गेनोत्क्रान्तिरर्चिरादि
मार्गश्च विचार्यत इत्याह प्रसङ्गेति एवं साक्षादेव श्रुत्युक्तं संन्यासादिसाधनं चिन्तितं सम्प्रति फलार्थोपतिगम्यमानं त्यादिक
मवान्तराधिकरणम् आकिं त्यजेतदारभ्य जीवन्मुक्तिस्ततो द्वितीयपादे उत्क्रान्तिस्तृतीये अर्चिरादिमार्गः सगुणस्य चतुर्थे निर्गुण
स्य तुर्ये ज्ञानोपासनयोः फलनिर्णय इति पादार्थविवेकः आद्याधिकरणस्य श्रवणादिसाधनविषयमन्तर्विद्धे ध्यानदर्श
नान्तसाधनमाह आत्मा वा इति आत्मेत्यतो साधनफलविचारात्मकत्वात् अवधिकरणानां श्रुतिशास्त्राध्यायसङ्गतयः उक्तास्तु

श्रीगणेशाय नमः आवृत्तिरसकृदुपदेशात् १ तृतीयेऽध्याये परापरविद्यासु साधनाश्रयो विचारः प्रायेणात्यगात्
अथेह चतुर्थे फलाश्रयो आगमिष्यति प्रसङ्गागतं चान्यदपि किञ्चिद्विचिन्तयिष्यते प्रथमं तावद्यत्कृतिभिः श्चिदयिकरण
साधनाश्रयविचारशेषमेवानुसरामः आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः तमेव धीरो वि
ज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः सोऽन्वेष्टव्यः स विजिज्ञासितव्य इति चैवमादिश्रवणेषु संशयः किं सकृत्प्रत्ययः कर्तव्य आहोस्विदा
वृत्त्येति किं तावत्प्राप्तम् सकृत्प्रत्ययः स्यात् प्रयाजादिवत्तावता शास्त्रस्य कृतार्थत्वात् अश्रूयमाणायां ह्यावृत्तौ क्रियमाणायाम
शास्त्रार्थः कृतो भवेत् ननु सकृदुपदेशा उदाहृताः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्येवमादयः एवमपि यावदुक्तं मावर्तयेत्
सकृच्छ्रवणं सकृन्मननं सकृन्निदिध्यासनं चेति नान्यतिरिक्तं सकृदुपदेशेषु तु वेद उपासीतेत्येवमादिषु नावृत्तिरिति एवं प्राप्ते ब्रूमः
प्रत्ययावृत्तिः कर्तव्या कुतः असकृदुपदेशात् श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्येवंजातीयको ह्यसकृदुपदेशः प्रत्ययावृ
त्तिं सूचयति ननु उक्तं यावदुक्तमेवावर्तयेत नाधिकमिति न दर्शनपर्यवसितत्वादेषां दर्शनपर्यवसानानि हि श्रवणादी

तत्त्यादार्थं स्तवं धानतत्त्वादृसंगतिः नात्र विशेषाभावे वचनवणादावावृत्तिविशेषो नास्तीति दृष्टान्तलक्षणावान्तरसंगत्या एवं पक्षमा
ह किं तावदिति अत्र एवं पक्षे श्रवणादेः प्रयाजवददृष्टार्थत्वात् सकृदनुष्ठाने फलसिद्धौ तत्त्ववज्ज्ञानवद्दृष्टार्थत्वाद्यावत्फलमावृत्ति
रिति भेदः असकृदुपदेशात्यथा साधनावृत्तौ शास्त्रस्य तात्पर्यमिति शङ्कते ननु सकृदिति श्रवणादीनां समुच्चयसिद्ध्यर्थत्वेना
सकृदुक्तेरन्यथा उपपत्तेर्नावृत्तौ तात्पर्यमित्याह एवमपीति सगुणसाक्षात्कारसाधनेष्वुपासनावृत्तिमाह सकृदिति यद्यपि सकृ
दुपदेशादावृत्तिस्तत्र च यारस्यन्तरस्य च कृत्वेनान्यथासिद्धः तथापि दृष्टसामर्थ्यकल्पनानुपपत्तेः श्रवणादे रावृत्तिद्वारा सा
क्षात्कारफलस्य दृष्टादौ दृष्टत्वाद सकृदावृत्तिरितिलक्षयति दृष्टार्थत्वादिति न्यायानुग्रहादित्याह न दर्शनपर्यवसान

राम
१

ध्यानस्य त्वाहं तेर्वेदोपासीतेति पाठे स्तुतत्वात्केवलार्थीकत्वमित्याह अपि चेति अस्य पाणिशब्दस्याहंतिवाचित्वेन यापि वे
देति पष्ठ्या केवदनेषु हे श्रहे षुकपुमान्नतिसिद्धिरित्यत आह विद्युपास्त्याश्चेति शब्दयोरेकार्थत्वस्य दाहरंति क्वचित्तिस
रेकाग्रहृदतस्माणतावरेकादत्यापि यः कश्चिद्वेदान्तफलं सर्वमंत भवतीतन्त्र कोऽयमर्यात्कष्टत्वेन रेकत्रक्रम इति हे संप्रति
हे साक्षर वचनत चत्वारि क्रगत्वो वाचनुज्ञानस्काति हेभवपनारेकविदिक्षा देवतानामनशाधिमस्यामपदिशत्यर्थः एवं सगुण
निर्गुणसाक्षात्कारसाधनध्यानस्यावृत्तिः श्रौताचार्यसिद्धा चदृष्टार्थत्वाल्लवणमननयालसकृदुपदेशादर्थसिद्धेर्वावृ
त्तिरिति विशेषः आदित्यस्यैकस्यैवाहीयस्य पायुपासनान्नमत्वमनकण्ठत्रासीति कौषीतकि पुत्रमुवाचात स्त्वं नयाः

अपि चोपासनं निदिध्यासनं चेत्यं तर्णीतावृत्तिगुणैव क्रियामभिधीयते तथाहि लोके गुरुमुपास्ते राजानमुपास्तइ
ति च यस्तात्पर्यगणं गुर्वादीननुवर्तते स एवमुच्यते तथाध्यायति प्रोषितनाथा पतिमिति यानिरंतरस्मरणा पतिं प्र
ति सोत्कण्ठा सैवमभिधीयते विद्युपास्त्याश्च वेदान्तेष्वव्यतिरेकेण प्रयोगो दृश्यते क्वचिद्विदिनोपक्रम्योपासिनो
पसंहरति यथा यस्तद्वेद यत्स वेद स मयैतदुक्त इत्यत्रानु मएतां भगवो देवतां शाधि यां देवतामुपास्स इति क्वचिच्चो
पासिनोपक्रम्य विदिनोपसंहरति यथा मनो ब्रह्मेत्युपासीतेत्यत्र भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य
एवं वेदेति तस्मात्सकृदुपदेशेषु ख्यावृत्तिसिद्धिरस्कृदुपदेशस्त्वावृत्तेः सूचकः लिंगाच्च ४ लिंगमपि प्रत्ययावृ
त्तिं प्रत्याययति तथा ह्युद्गीथविज्ञानं प्रकृत्यादित्य उद्गीथ एष प्रणव इत्यैकपुत्रतादोषेणापोद्य रश्मींस्त्वं पर्यावर्तयादि
ति रश्मिबहुत्वविज्ञानं बहुपुत्रतायै विधत्सिद्धवत् प्रत्ययावृत्तिं दर्शयति तस्मात्सामान्यात्सर्वप्रत्ययेष्वावृत्तिसिद्धिः अ
त्राह भवतु नाम साध्यफलेषु प्रत्ययेष्वावृत्तिः तेषां वृत्तिसाध्यस्यातिशयस्य संभवात् यस्तु परब्रह्मविषयः
नित्यशुद्धबुद्धमुक्तस्वभावमेवात्मभूतं परं ब्रह्म समर्पयतीति तत्र का वृत्त्या उचब्रह्मात्मत्वप्रतीतिरनुपपन्ने त्याह

सांख्याः किंतु वहन्तत्र पर्मीनादित्यं च पर्यावर्तयतात्यपृगार्थतेयस्त्वत्यर्थः न लोपस्कादस अत्र पर्यावर्तयति शब्दस्तिहवर्तुः
यध्यानस्यावृत्तिरुक्तातनो ध्यानत्वसामान्यात्फलपर्यवसिततत्त्वसामान्याद्वा लिंगात्सर्वस्य श्रवणमननध्यानेष्वावृत्तिसिद्धिरि
त्याह लिंगाच्चेति एवं तावत्सगुणनिर्गुणसाक्षात्कारसाधनेष्वावृत्तिरुक्ता न च सगुणध्यानादेरावृत्तिमंगीकृत्य नि
र्गुणश्रवणादिष्वावृत्तिमाक्षिपति अत्राहेत्यादिना यो का निर्गुणसाक्षात्कारजननशङ्केन वा अयं सकृत्कृतुनवा

[illegible]

गं

[illegible]

पात॰
वि॰प्र॰
२

अशक्तस्यावृत्त्यावपि फलानुपपत्तिरित्याह नेति यद्यापीति सतो शक्तस्य युक्तेः साहित्याच्छ्रुत्वा वपीत्यर्थः वाक्ययुक्तिभ्यां परोक्षज्ञा
नेजाते पि परोक्षज्ञानार्थमावृत्तिरिति शंकते अथापीत्यादिना तयोः परोक्षज्ञाने हेतुत्वस्वाभाव्याद्वावृत्त्यावपि न साक्षात्कारः स्यादि
ति परिहरति नासहादपीति तयोः साक्षात्कारसामर्थ्ये यदि वा प्रोक्तज्ञानसामर्थ्यमभयाप्यावृत्त्यनुपेक्षेत्याह नस्यादिति प्रमाण
वैचित्र्यादप्यावृत्त्यनियममित्याह नचेति प्रमेयस्याने परोक्षत्वाच्च न प्रत्याह द्विविधोधिकारी स्यात्कश्चिज्जन्मांतराभ्यासान्निरस्तस

नचतावपि तदनुपपत्तेः यदि हि तत्त्वमसीत्येवंजातीयकं वाक्यं सकृच्छ्रूयमाणं ब्रह्मात्मत्वं प्रतीतिं नोत्पादयेत् ततस्तदेवा
वर्त्यमानमसत्यादयिष्यतीति का प्रत्याशास्यात् अथोच्यते न केवलं वाक्यं कंचिदर्थं साक्षात्कर्तुं शक्नोति ततो युक्त्यपेक्षं वाक्यम
नुभावयिष्यतीति ब्रह्मात्मत्वमिति तथाप्यावृत्त्यानर्थक्यमेव सापि हि युक्तिः सकृत्प्रवृत्तैव स्वमर्थमनुभावयिष्यति अथा
प्युच्यते युक्त्या वाक्येन च सामान्यविषयमेव विज्ञानं क्रियते न विशेषविषयं यथास्ति हृदये शूलमित्यतो वाक्याद्गात्रकं
पादिलिंगाच्च शूलसद्भावसामान्यमेव परः प्रतिपद्यते न विशेषमनुभवति यथा स एव शूली विशेषानुभवश्चाविद्या
यानिवर्तकस्तत्स्मादर्थाश्चावृत्तिरिति चेन्नासकृदपि तावन्मात्रे क्रियमाणे विशेषविज्ञानोत्संभवात् न हि सकृत्प्रयुक्ताभ्यां
शास्त्रयुक्तिभ्यां न नवगतो विशेषः शतकृत्वोपि प्रयुज्यमानाभ्यामवगंतुं शक्यते तस्माद् यदि यदि शास्त्रयुक्तिभ्यां विशे
षः प्रतिपाद्येत यदि वा सामान्यमेवोभयथाप्यावृत्त्यनुपयोगः नच सकृत्प्रयुक्ते शा
स्त्रयुक्ती कस्यचिदप्यनुभवं नोत्पादयत इति शक्यते नियंतुं विचित्रप्रज्ञत्वात्प्रतिपत्तॄणाम् अपि चानेकांशोपेते लौकिके प
दार्थे सामान्यविशेषवत्यनेकेनावधानेन नैकमंशमवधारयन्त्यपरेण परमिति स्याद्यदभ्यासोपयोगः यथा दीर्घप्रपाठकग्रहणा
दिषु न तु निर्विशेषे ब्रह्मणि सामान्यरहिते चैतन्यमात्रात्मके प्रमोत्पत्तावभ्यासापेक्षा युक्तेति अत्रोच्यते भवेदावृत्त्यानर्थक्यं
तं प्रत्ययस्तत्त्वमसीति सकृदुक्तमेव ब्रह्मात्मत्वमनुभवितुं शक्नुयात् यस्तु न शक्नोति तं प्रत्युपयुज्यत एवावृत्तिः यथा हि छांदो
ग्ये तत्त्वमसि श्वेतकेतो इत्युपदिश्य पुनः पुनः श्रुतिरेवमेव सा भगवान् विज्ञापयत्विति पुनः पुनः परिचोद्यमानस्तत्तदाशंकाकारणं निराकृ
त्य तत्त्वमसीत्येवासकृदुपदिशति तथा च श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यादिदर्शितम् ननु सकृच्छ्रुतं चेत्तत्त्वम
सि वाक्यं स्वमर्थमनुभावयितुं न शक्नोति ततः आवर्त्यमानमपि नैव शक्ष्यतीति नैष दोषः न हि दृष्टेनुपपन्नं नाम

मस्ताऽसंभावनादिप्रतिबंधः कश्चित्प्रतिबंधवानिति तत्राद्ये प्रत्यावृत्तेरानर्थक्यमिष्टं द्वितीयस्य तु प्रतिबंधनिरासाय तदपेक्षेति समा
धत्ते अत्रोच्यत इति आद्यं प्रतिबंधनिरासार्थत्वे लिंगमाह तथा हीति यथा षड्जादिस्वरभेदसाक्षात्कारशक्त्रमपि श्रोत्रमभ्यासमपेक्ष

राम
२

नत्वंपदलक्ष्यार्थस्यदुर्बोधत्वादज्ञानप्रयुक्तसंशयविपर्ययादिप्रतिबंधसंभवात्तन्निरासायआत्मव्यतिरिक्तेतिवाच्यलक्ष्यविवेकपूर्वकमाह
अपिचेत्यादिना यदुक्तमनेनमात्रात्मेयस्मात्तत्वानर्थक्यमितितत्राह यद्यपीति आरोपितनापनिरासायनमेदेहोनिद्रिमित्यभ्या
सोयुक्तइत्यर्थः वाक्यार्थज्ञानसंनिकृष्टमभ्यासनियमः प्रमाणज्ञानस्याभ्यासायोगाज्ज्ञानिनः श्रवणादिनियमोयोगाच्चेत्य

अपिचतत्वमसीत्येतद्वाक्यंतत्पदार्थस्यतत्पदार्थभावमाचष्टे तत्पदेनचप्रकृतंसद्ब्रह्मोक्तिजगतोजन्मादिकारण
मभिधीयतेसत्यंज्ञानमानंदंब्रह्मविज्ञानमानंदंब्रह्मादृष्टंदृष्टृअविज्ञातंविज्ञातृअजमजरममरमस्थूलमनण्वह्रस्व
मदीर्घमित्यादिशास्त्रप्रसिद्धंतत्राजादिशब्दैर्जन्मादयोभावविकाराःनिवर्तिताः अस्थूलादिशब्दैःस्थौल्यादयो
द्रव्यधर्माः विज्ञानादिशब्दैश्चैतन्यप्रकाशात्मकत्वमुक्तमेषव्यावृत्तसर्वसंसारधर्मकोनुभवात्मकोब्रह्मसंज्ञकः
तत्पदार्थोवेदान्ताभियुक्तानांप्रसिद्धस्तथात्वंपदार्थोपिप्रत्यगात्माश्रोतृदेहादारभ्यप्रत्यगात्मतयासंभाव्यमानआ
चैतन्यपर्यंततत्वेनावधारितः तत्रयेषामेतौपदार्थौज्ञानसंशयविपर्ययप्रतिबद्धौतेषांतत्वमसीत्येतद्वाक्यंस्वार्थप्रमा
णोत्पादयितुंशक्नोतिपदार्थपूर्वकत्वाद्वाक्यार्थस्येत्यतस्तान्प्रत्येष्टव्यः पदार्थविवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः
यद्यपिचप्रतिपत्तव्यआत्मानिरंशस्तथाप्यध्यारोपितोस्मिन्बहुशाखदेहेंद्रियमनोबुद्धिविषयवेदनादिलक्षणेनेके
नावधानेनैकमंशमपोहतिअपरेणापरमितियुज्यतेतत्रक्रमवतीप्रतिपत्तिः तत्तुपूर्वरूपमेवात्मप्रतिपत्तेःयेषांपु
नर्निपुणमतीनांनाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयःप्रतिबंधोस्तितेशक्नुवंतिसकृदुक्तमेवतत्वमसिवा
क्यार्थमनुभवितुमितितान्प्रत्यावृत्त्यानर्थक्यमिष्टमेवसकृदुक्तैवहिआत्मनोदुःखित्वप्रतिपत्तिरविद्यांनिवर्तय
तीतिनात्रकश्चिदपिक्रमोभ्युपगम्यते सत्यमेवंयुज्यतेयदिकस्यचिदेवंप्रतिपत्तिर्भवेत् बलवतीह्यात्मनोदुःखि
त्वादिप्रतिपत्तिरतोनदुःखित्वाद्यभावंकश्चित्प्रतिपद्यतइतिचेत् नदेहाद्यभिमानवद्दुःखित्वाद्यभिमानस्यमिथ्याभि
मानत्वोपपत्तेः प्रत्यक्षेहिदेहेछिद्यमानेदह्यमानेवाहंछिद्येदह्येइतिचमिथ्याभिमानोदृष्टस्तथाबाह्यतरेष्वपिपुत्र
मित्रादिषुसंतप्यमानेष्वहमेवसंतप्येइत्यध्यारोपोदृष्टस्तथादुःखित्वाद्यभिमानोपिस्याद्देहादिवदेवचैतन्याद्बहिरु
पलभ्यमानत्वाद्दुःखित्वादीनांसुषुप्त्यादिषुचाननुवृत्तेश्चैतन्यस्यसुषुप्तेप्यनुवृत्तिमामनंतियद्वैतन्नपश्यतिपश्य

तत्राह तत्वंविज्ञानात्प्रागेवश्रवणादिव्यापारनियमेनक्रियतइत्यर्थः अपिकेषांचित्तमसकृन्मनुवदतियेषामितिअपिकेषांक
तेसत्यमितिदुःखित्वप्रत्यक्षत्वविरोधाशंकांदेहव्यतिरिक्तेनीत्यर्थः प्रत्यक्षत्वान्यानितत्वाद्विरोधइत्याह नेत्यादिना दुःखादयो
देहधर्माःदृश्यत्वात्देहादिवत्तेनाप्यात्मस्वरूपाआत्मनिमिथ्याप्रत्ययनत्वाद्व्यतिरेकेणचैतन्यवदित्यर्थः ॥ ॥

निर्दुःखविदात्मनिर्दुःखादिधियोऽभ्यांतित्वाहष्यार्थानुभवो न विरुध्यत इत्याह तस्मादिति अनुभवे जाते ध्यानस्मायनुष्ठानं किं न स्यादि॰
त्यत आह नैवमिति रतिकामः आत्मकामतया न्यत्रविषयतृष्णात्यागः तेन संतोषः आत्मानंदानुभव इति भेदः नन्वात्ततो नियोगा॰
त्प्रवृत्तिर्वाच्या तया च नियुक्तोऽस्त्वहं रकर्तात्मधीर्न स्यादित्यत आह तत्रापीति आत्मानमभ्युपगमेऽप्यकर्ताहमित्यनुभवात्मच्याव्युत्थस्या
वा नियोगान्न प्रवर्तयेऽहं ज्ञो दोषादित्यर्थः कथं तर्हि मे प्रवृत्तिरित्यत आह यत्त्विति अप्रवृत्तिभावादसंभावनादिनेत्यर्थः शिष्यबु
द्ध्यनुसारेण श्रोतव्यादिवचोभिः प्रधानसिद्ध्यर्थमात्मत्यादौ प्रवर्तयेदित्यर्थः आत्मेति एवं च ध्यानोद्देशात्त्विति कृत्ता नामन्यजीवातव

तस्मात्सर्वदुःखविमुक्तोऽस्म्येकचैतन्यात्मकोऽहमित्येष आत्मानुभवो नैवं वृत्तात्मनमनुभवतः किं विदन्यत्कृत्यमवशिष्यते
तथा च श्रुतिः किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इत्यात्मविदः कर्तव्याभावं दर्शयति स्मृतिरपि यस्त्वात्मर॰
तिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यत इति यस्तु नैषोऽनुभवो जातो नैव जायते तस्याप्यनु
भवार्थ एवात्माभ्युपगमः तत्रापि नन्वमसीति वाक्यार्थात्मच्यावृत्तो प्रवर्तयेत्तर्हि वर्ण्यातानायकं नन्महाद्वयं तो नियुक्तो
स्य चास्मिंस्त्रयपि कृतोऽहं कर्ता मये दंक नेत्यामिरूपव प्रत्ययविपरीतप्रत्यय उत्पद्यते यस्तु स्वयमेव मंदमतिः प्रतिभाना
त्वेवाक्यार्थं न जहासेन सोऽतस्मिन्नेव वाक्यार्थस्थिरीकार आत्मन्यादिवाचाभ्युपेयते न तस्मात्परब्रह्मविषयेऽपि प्रत्ययत
दुपायोपदेशो भवतीति सिद्धिः आत्मन्यधिकरण आत्मेति लघवगच्छेदित्याह यति च ३ यः शास्त्रोक्तविशेषणः परमात्मा
सकिमहमिति निगृहीतव्यः किं चामदन्य इत्येतद्विचारयति कथं पुरात्मशब्दे प्रत्यगात्मविषयेऽस्य मागौणत्वपायः उच्यते
अयमात्मशब्दो मुख्यः शक्यतेऽभ्युपगंतुं संसारिजीवेश्वरयोर्भेदसंभवेदत्र न चाद्वगौणमभ्युपगंतव्यमिति मन्यते किं॰
तावत्प्राप्त नाहमिति प्राप्तं न ह्यपहतपाप्मत्वादिगुणो विपरीतगुणत्वेन शक्यते गृहीतुं विपरीतगुणो वापहतपाप्मत्वादि
नेनापहतपाप्मादिगुणः परमेश्वरः तद्विपरीतगुणस्तु शारीरः ईश्वरस्य संसारित्वे ईश्वराभावप्रसंगात्ततः शास्त्रा
नर्थक्यमेव संसारिणोऽपीश्वरात्मत्वेऽधिकार्यभावाच्छास्त्रानर्थक्यमेव प्रत्यक्षादिविरोधश्च ॥

ज्ञानार्थं ध्यानाह सत्रिकाले किमहं ब्रह्मेति ध्यातव्यं उत मत्स्वामीश्वर इत्यैक्याभेदमानाभ्यां संशयमाह य इति शास्त्रादेव प्रतीतत
त्वादावयमात्मा ब्रह्मेत्यादिश्रोतिभिरैक्यनिर्णयात्संशयमाक्षिपति कथमिति भेदस्यापत्यन्तप्रहाद्धेदः प्रत्यक्षादिप्रावल्यमाल
य संशयं नु साह उच्यत इति अभेदश्रुतीनां गौणत्वमुख्यत्व उभयत्र फलं पूर्वपक्षे प्रत्यक्षादिविरोधपरिहाराद्द्वितीयाध्याय
संगतलक्ष्याध्यायेतरस्य ते रवि रुद्धानिश्चयस्य समाधानं तरंगत्वादिह संगतिः विरुद्धयोरैक्यादृष्टेरसिद्धिरित्याह नाहमिति किं च किमीश्वरस्य जी
वमात्रत्वमेकजीवेश्वरमात्रत्वं वेति विकल्पक्रमेणाह यपति ईश्वरस्य चेत्यादिना ॥ ॥ ः ः ॥

एकत्वश्रुतिप्रामाण्याभेदध्यानं कार्यमिति शंकते अन्यत्वेपीति एकत्वध्यानं मा भूदिष्टमेव एवं त्वं तु नास्तीत्याह काममिति अभे-
दश्रुतीनां फलवदर्थावबोधतात्पर्यप्रामाण्ययोगाद्भेदश्रुतीनां कल्पितभेदानुवादित्वात्स्वतस्त्वादरोपितद्वैधयत्वाद्वैतयोरिव विरुद्धयो-
र्मिथ्यात्वान्न रव्यमेकमिति सिद्धान्तयति एवमित्यादिना ईश्वरस्य जीवत्वं न प्रतिपाद्यते न ईश्वराभावः स्यात्किं तु जीवे ईश्वरत्व
नैवमधिकार्यभावः एकत्वप्रबोधात्प्रागधिकारीभेदांगीकारादित्याह यत्तु नन्वित्यादिना वेदसत्यत्वे अद्वैतहानिः शंकते अन्य

अन्यत्वेपि तादात्म्यदर्शनेनोपास्यत्वं कर्तव्यं प्रतिमादिष्विव विष्ण्वादिदर्शनमिति चेत् काममेवं भवतु न तु संसारिणो मुख्या-
त्मत्वमीश्वरस्य तत्र न मायाप्रपंचमेवं आत्मेत्यग्रे आत्मत्वेन परमेश्वरः प्रतिपत्तव्यः तथा हि परमेश्वरश्रुतौ जाबाला आ-
त्मत्वेनैवेममुपगच्छन्ति त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसि देवत इति तथान्येपि अहं ब्रह्मास्मीत्येवमादय आत्मत्वो-
पगमार्थास्तथा ग्राहयन्ति वाक्यात्मत्वेनैवेश्वरं वेदान्तवाक्यानि एतत्ते आत्मा तत्त्वमसि आत्मानं तत्त्वमसीत्येवमादी-
नि यत्तु प्रतीकदर्शनमिदं विष्णुप्रतिमान्यायेन भविष्यतीति तदयुक्तं गौणत्वप्रसंगाद्वाक्यवैरूप्याच्च यत्र हि प्रतीकदृ-
ष्टिरभिप्रेयते सकृदेव तत्र वचनं भवति यथा मनो ब्रह्मेत्यादित्यो ब्रह्मेत्यादि इह पुनस्त्वमहमस्म्यहं च त्वमसीत्याह तः प्रतीक-
श्रुतिवैरूप्याद्भेददृष्ट्यपवादाच्च तथा हि यथान्यां देवतामुपास्तेन्योसावन्योहमस्मीति न स वेद मृत्योः स मृत्युमाप्नोति य
इह नानेव पश्यति सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेदेति एवमाद्या भूयसी श्रुतिर्भेददृष्टिमपवदति यत्तूक्तं विरुद्धगुण-
योरन्योन्यात्मत्वसंभव इति नायं दोषो विरुद्धगुणतायामिथ्यात्वोपपत्तेः यत्पुनरुक्तमीश्वराभावप्रसंग इति तदसच्छा-
स्त्रप्रामाण्यादनभ्युपगमाच्च न हीश्वरस्य संसार्यात्मत्वं प्रतिपाद्यत इत्यभ्युपगच्छामः किं तर्हि संसारित्वापोहेनेश्व-
रात्मत्वं प्रतिपादयिषितमिति एवं सत्यद्वैतेश्वरस्यापहतपाप्मत्वादिगुणता विपरीतगुणता त्वित-
रस्य मिथ्येति व्यवतिष्ठते यदप्युक्तमधिकार्यभावः प्रत्यक्षादिविरोधश्चेति तदप्यसत्प्राक्प्रबोधात्संसारित्वाभ्युपग-
मात्तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्य यत्र त्वस्य सर्वमात्मैवाभूदित्यादिना हि प्रबोधे प्रत्यक्षाद्यभावं दर्शय-
ति प्रत्यक्षाद्यभावे श्रुतेरप्यभावप्रसंग इति चेत् नैष दोषः अत्र पितापिता भवतीत्युपक्रम्य वेदा अवेदा इति वचनादिष्यत एवास्माभिः श्रु-

त्याद्यभाव इति वर्णाध्युक्तमस्वरयोरभावादुपलब्ध्योर्नित्ययोरारोपो वाच्यः तथा चारोपितक्रमस्वरविशिष्टवर्णात्मकवे-
दस्य मिथ्यात्वं ह्रस्वदीर्घादिना सत्यत्वाग्रहत्वविया विजृम्भत इति वेदसत्यत्वाभावेन दोष इत्याह नेति अविषयमात्रत्वेप-
ति कस्येति प्रत्यलिंगेन तत्त्वस्यैव न सा सिद्धत्वादाद्यंतेऽपानुपपत्तिरित्याह यत्त्वमिति अज्ञानमस्त्यात्मन्या देहादिभा

भाम·
च·प्र·
६

सर्वज्ञामित्रेमयिकथमज्ञानमितिशंकते नन्विति अभेदज्ञानात्प्रा ग्भिन्नात्मत्वेनेवाज्ञानाश्रयत्वमनुभवसिद्धं ज्ञानस्यापलाप
योगाच्चाज्ञानेत्वनिर्वाच्यसत्वस्याबाधान्नाश्रयापेक्षेत्याह यथेवमिति अनिर्वाच्यत्वेन दोषान्तरमपिनिरस्तमित्याह यापीति नप्रती
केनहिसः इमयच्चा ध्यानसंभवात्सेशयः यथाब्रह्मण्यभेदसत्वादहंग्रहउक्तः एवंप्रतीकेष्वपिब्रह्मविकारत्वाज्जीवाभिन्नब्रह्मा
भिन्नत्वाज्जीवाभेदसत्वेनाहंग्रहः कार्य इतिदृष्टान्तेनपूर्वपक्षः अत्रप्रतीकोपासीनामहंग्रहोपास्तिभिरविशेषः सिद्धांतेतु
विशेषसिद्धिरितिफलं एतदारभ्याधिकरणत्रयस्यप्रासंगिकीपादसंगतिः ब्रह्मध्यानप्रसंगागतत्वादितिविवेकः किंप्रती
केष्वात्मत्वानुभवबलादहंग्रहः उतवस्तुतोजीवाभेदसत्वान्नाद्य इत्याह नहिसइति ननु भवतीत्यर्थः द्वितीयमप्यसिद्धा
नन्वहमीश्वरएवोक्तः श्रुत्या चिदेवप्रतिबुद्धात्मनास्तिकस्यचिदप्रबोधः योपिदोषचोद्यतेकेश्चिदविषयाकिलात्मनः
सद्वितीयत्वादहंनानुपपत्तिरितिसोप्येतेनप्रत्युक्तस्तस्मादात्मेत्येवस्थेमनोदधीतआत्मैवाधिकरणं नप्रतीकेनहि
सः ४ मनोब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशोब्रह्मेतिब्रह्मादित्योब्रह्मेत्यादिषुः सयोनामब्रह्मेत्युपास्तइत्येव
मादिषुप्रतीकोपासनेषुसंशयः किंतेष्वात्मग्रहःकर्तव्योनवेतिकिंतावत्प्राप्तंतेष्वात्मग्रहएवयुक्तःकस्माद्ब्रह्मणःश्रु
तिष्वात्मत्वेनप्रसिद्धत्वात्प्रतीकानामपिब्रह्मविकारत्वाद्ब्रह्मत्वेसत्यात्मत्वोपपत्तेरित्येवंप्राप्तेब्रूमः नप्रतीकेष्वात्ममतिं
बध्नीयात् नहिसउपासकःप्रतीकानिव्यस्तान्यात्मत्वेनाकलयेत् यत्पुनर्ब्रह्मविकारत्वात्प्रतीकानांब्रह्मत्वंततश्चात्मत्वमि
तितदसत्प्रतीकाभावप्रसंगात् विकारस्वरूपोपमर्देनहिनामादिजातस्यब्रह्मत्वमेवाश्रितंभवतिस्वरूपोपमर्देचनामा
दीनांकुतःप्रतीकत्वमात्मग्रहोवा नचब्रह्मणआत्मत्वाद्ब्रह्मदृष्ट्युपदेशेष्वात्मदृष्टिः कल्प्याकर्तृत्वाद्यनिराकरणात्
कर्तृत्वादिसर्वसंसारधर्मनिराकरणेनहिब्रह्मणःआत्मत्वोपदेशस्तदनिराकरणेनचोपासनविधानमतश्चोपासकस्य
प्रतीकैःसमत्वादात्मग्रहोनोपपद्यते नहिरुचकस्वस्तिकयोरितरेतरात्मत्वमस्तिसुवर्णात्मत्वेनेवतुब्रह्मात्मनैकत्वेप्र
पद्यते यत्तुनेत्यादिनाविकारस्यब्रह्मणःस्वरूपैकायोगाद्बाधेनैवाच्यंप्रतीकबाधेचोपास्तिविधिर्नस्यादित्यर्थः किंचकर्तृ
त्वाद्यबाधेनोपास्तिविधिप्रवृत्तेर्वाच्याबाधनदयोगात्याचबाधस्तत्वब्रह्मैक्यज्ञानद्वाराप्रतीकेष्वहंग्रहोपास्तिकल्प
नानयुक्ताबाधविरोधादित्याह नचब्रह्मणइति अतोजीवप्रतीकयोःस्वरूपभेदादहंग्रहेविध्यश्रवणाच्चनाहंग्रहइति
फलितमाह अतश्चेति यथारुचकस्वस्तिकयोःसुवर्णात्मनैक्येपिमिथोनैक्यंतथाजीवप्रतीकयोर्ब्रह्मात्मनैक्येपिभेदः
सत्यायदिचधर्मीव्यतिरेकेणतयोरभावनिश्चयाहस्वैकात्तदासनोच्छेदइत्युक्तमित्यर्थः ॥ ॥

राम
६

ब्रह्मदृष्टिरुत्कर्षात् एकविषयत्वं संगतिः प्रश्नपूर्वकं संशयबीजमाह उक्तेत्यादिना सामानाधिकरण्यं श्रुतेस्तत्र तावत्स्वरूपैक्यं
ब्रह्मविकारयोर्गवाश्वयोरिवाभेदायोगात् नापि प्रकृतिविकारभावनिबन्धनं वाक्यस्य विकारबाधेन ब्रह्मपरत्वापातात् न चेष्टाप-
त्तिः नाम ब्रह्मेत्युपासीतेति विधिश्रुतिविरोधात्परिमितनामग्रहणानर्थक्यापातनाच्च ब्रह्मपरत्वे सर्वं ब्रह्मेति वक्तव्यत्वादतः परि-

ब्रह्मदृष्टिरुत्कर्षात् ५ तेष्वेवोदाहरणेष्वन्याः संशयः किमादित्यादिदृष्टयो ब्रह्मण्यध्यसितव्याः किं वा ब्रह्मदृष्टिरादि-
त्यादिष्विति कुतः संशयः सामानाधिकरण्योपकारणानवधारणात् अत्र हि ब्रह्मशब्दस्यादित्यादिशब्दैः समानाधिकर-
ण्यमुपलभ्यते आदित्यो ब्रह्म प्राणो ब्रह्म विद्युद्ब्रह्मेत्यादिसमानविभक्तिनिर्देशात् न चात्राञ्जसं सामानाधिकरण्यम-
वकल्पते अर्थान्तरवचनत्वाद्ब्रह्मादित्यादिशब्दानां नहि भवति गौरश्व इति सामानाधिकरण्यं ननु प्रकृतिविकारभा-
वाद्ब्रह्मादित्यादीनां मृच्छरावादिवत्सामानाधिकरण्यं स्यान्नेत्युच्यते विकारविलये हि प्रकृतिसामानाधिकरण्यात्स्या-
त्ततश्च प्रतीकाभावप्रसंगमवोचाम परमात्मवाक्यं चेदं तदानीं स्यात् ततश्चोपासनाधिकारो बाध्येत परिमितविका-
रोपादानं च व्यर्थं तस्माद्ब्रह्मणोऽग्निर्वैश्वानर इत्यादिवदन्यत्रान्यदृष्ट्यध्यासे सति क्व किं दृष्टिरध्यसितामिति संशयः त-
त्रानियमो नियमकारिणः शास्त्रस्याभावादित्येवं प्राप्ते अथवादित्यादिदृष्टय एव ब्रह्मणि कर्तव्या इत्येवं प्राप्ते
एवं ह्यादित्यादिदृष्टिभिर्ब्रह्मोपासितं भवति ब्रह्मोपासनं च फलवदिति शास्त्रमर्यादा तस्मान्न ब्रह्मदृष्टिरादि-
त्यादिष्विति प्राप्ते ब्रूमः ब्रह्मदृष्टिरेवादित्यादिषु स्यादिति कस्मात् उत्कर्षात् एवमुत्कर्षेणादित्यादयो दृष्टा भवन्त्युत्कृ-
ष्टदृष्टेस्तेष्वध्यासात् तथा च लौकिको न्यायोऽनुगतो भवति उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यसितव्येति लौकिको न्यायः यथा
राजदृष्टिः क्षत्तरि सा चानुगन्तव्या विपर्यये प्रत्यवायप्रसंगात् नहि क्षत्तृदृष्टिपरिगृहीतो राजा निकर्षं नीयमा-
नः श्रेयसे स्यात् ननु शास्त्रप्रामाण्यादनाशंकनीयोऽत्र प्रत्यवायप्रसंगो न च लौकिकेन न्यायेन शास्त्रीया दृष्टि-
र्नियन्तुं युक्तेत्यत्रोच्यते निर्धारिते शास्त्रार्थ एतदेवं स्यात् संदिग्धे तु तस्मिंस्तन्निर्णयं प्रति लौकिकेन न्यायेन शास्त्री-
याद्दृष्टिर्नियन्तुं युक्तेत्यत्रोच्यते निर्धारिते शास्त्रार्थ एतदेवं स्या) त्स न्यायः आश्रीयमाणो न विरुध्यते न चोत्कृष्ट-
दृष्ट्याध्यासे शास्त्रार्थोऽवधार्यमाणो निकृष्टदृष्टिमध्यस्यन्प्रत्यवेयादिति श्लिष्यते

शेषादध्यास एव सामानाधिकरण्यका-
रणमध्यासे च नियामकाभावात्संशय इत्यर्थः उत्कृष्टनिकृष्टयोरुत्कृष्टमप्युपास्यं फलवत्त्वादिति न्यायो नियामक इत्यरूचे

अत्र विकारदृष्टिभिर्ब्रह्मोपास्तिसिद्धिः फलं सिद्धं तेन विकारदृष्ट्या ब्रह्मण उपासने निकर्षप्राप्तौ सत्यां फलवत्त्वासिद्धेर्वैकार्य
एवोत्कर्षे ब्रह्मदृष्ट्योपास्या इति फले च किं च लौकिकन्यायाविरुद्धार्थो ग्राह्यः प्रत्यवायप्रसंगात् किं च प्रथमश्रुतानामादित्या
दिपदानामसंजातविरोधितया मुख्यार्थग्राहोऽन्याय्यः ब्रह्मशब्दश्च दृष्टिलक्षणया ग्राह्यः न प्राचादित्यादयो ब्रह्मदृष्ट्योपा

प्राथम्याच्चादित्यादिशब्दानां मुख्यार्थत्वमविरोधाद्गृहीतव्यं तैः स्वार्थप्रतीतिभिरवरुद्धायां बुद्धौ पश्चादवतरतो ब्रह्मश
ब्दस्य मुख्यया वृत्त्या सामानाधिकरण्यासंभवाद्ब्रह्मदृष्टिविधानार्थतैवावतिष्ठते इतिपरत्वादपि ब्रह्मशब्द
स्यैष एवार्थो न्याय्यः तथा हि ब्रह्मेत्यादेशः ब्रह्मेत्युपासीत ब्रह्मेत्युपास्त इति सर्वत्रेतिपरं ब्रह्मशब्दमुच्चारयति श्र
द्धास्त्वादित्यादिशब्दान् ततश्च यथा शुक्तिकां रजतमिति प्रत्येति इत्यत्र शुक्तिवचन एव शुक्तिकाशब्दो रजतश
ब्दस्तु रजतप्रतीतिलक्षणार्थः प्रत्येत्येव हि केवलं रजतमिति न तु तत्र रजतमस्ति एवमत्राप्यादित्यादीन्ब्रह्मेति
प्रतीयादिति गम्यते वाक्यशेषोऽपि च द्वितीयानिर्देशेनादित्यादीनेवोपास्तिक्रियया व्याप्यमानान्दर्शयति स
य एतदेवं विद्वानादित्यं ब्रह्मेत्युपास्ते यो वाचं ब्रह्मेत्युपास्ते यः संकल्पं ब्रह्मेत्युपास्त इति च यत्तूक्तं ब्रह्मोपा
सनमेवात्रादरणीयं फलवत्त्वायेति तदयुक्तमुक्तेन न्यायेनादित्यादीनामेवोपास्यत्वावगमात् फलं त्वतिथ्या
द्युपासनेऽपि ब्रह्मैव दास्यति सर्वाध्यक्षत्वात् वर्णितं चैतत्फलमत उपपत्तेरित्यत्र ईदृशं चात्र ब्रह्मण उपास्यत्वं य
त्प्रतीकेषु तद्दृष्ट्याध्यारोपणं प्रतिमादिष्विव विष्ण्वादीनां ब्रह्मदृष्ट्यधिकरणं आदित्यादिमतयश्चाङ्ग उपपत्तेः ६ य एव
वासौ तपति तमुद्गीथमुपासीत लोकेषु पञ्चविधं सामोपासीत वाचि सप्तविधं सामोपासीत इयमेवर्गग्निः
सामेत्येवमादिष्वङ्गावबद्धेषु संशयः किमादित्यादिषूद्गीथादिदृष्टयो विधीयन्ते किं वोद्गीथादिष्वेवादि
त्यादिदृष्टय इति

स्यादित्येव वाक्यादित्याह प्राथम्याच्चेति ब्रह्मशब्दस्यैव दृष्ट्यर्थत्वे हेत्वंतरमाह इतिपरत्वादिति इतिशब्दः संस्कारः स्व
मभिव्याहृतं क्रियात्वलक्षकाद इति लोकप्रसिद्धिरित्यर्थः द्वितीयाश्रुतेश्चादित्यादीनामेवोपास्तिकर्मत्वमित्याह वा
क्यशेषोऽपीति उक्तमेवोपास्यमिति न्यायमनुक्तमनुवदति यत्तूक्तमिति द्वितीयेति श्रुतिर्भालौकिकन्यायश्चोक्तन्या
यवादेत्याह तदिति ब्रह्मणोऽनुपासने कथं फलदातृत्वं तत्राह फलं त्विति किं च यद्दृष्ट्याविकारस्योत्कर्षस्तस्य ब्रह्मणो विशेषणा

राम
५

०थिव्यग्न्यंतरिक्षादित्यद्युसंज्ञेषु लोकेषु हिंकारप्रस्तावोद्गीथप्रतिहारनिधनेषु पंचविधं साम तैरेवादिभिस्तु पद्रवइति भक्तिद्वया
धिकैः सप्तभिः सामेति भेदः अत्र विशेषाज्ञानात्संशयः एवंविधत्कर्षानवधारणान्नियमइतिदृष्टांतेन सर्वपक्षमाह नत्रेति
सिद्धरूपादित्यादिभ्यः कर्मरूपोद्गीथादीनां फलसन्निकर्षेणोत्कर्षाद्ब्रह्मवद्दृष्टोपासनात्नियम इतिदृष्टांतेन सुरल्य एवंपक्षमाह ।
अथवेति ततस्तत्सिद्धिरेव सर्वोत्तरपक्षफलमेतव्य किंचानेनोपवादगदृष्टिरित्यनेनेष्वगवाच्यमप्रयोगालिंगमाह तथा
चेयमिति तदेतदग्न्यारूढं सामेत्यत्र पृथिवीरूपायामृच्यध्यूढमुपरिस्थितमित्यर्थः अथ चिसामवत्पृथिव्यामग्निदर्शयतेत्र

तस्मान्नियमः नियमकारणाभावादिति प्राप्तेनसर्वत्र ब्रह्मणइवकुस्यचित्कर्षविशेषोवधार्यते ब्रह्महिसमस्तजगत्कार ।
णत्वाद्यपहतपाप्मत्वादिगुणयोगाच्चादित्यादिभ्य उत्कृष्टमिति शक्यतेवधारयितुं न त्वादित्योद्गीथादीनां विकारण ।
त्वाविशेषात्किंचिदुत्कर्षविशेषोवधारणेकारणमस्ति अथवा नियमेनोद्गीथादिमतय आदित्यादिष्वध्यस्येरन्क र्मा
त्मकत्वादुद्गीथादीनां कर्मणश्च फलप्राप्ति प्रसिद्धेरुद्गीथादिमतिभिरुपास्यमाना आदित्यादयः कर्मात्मका ।
सन्तः फलहेतवो भविष्यंति तथा चेयमेवर्गग्निः सामेत्यत्र तदेतदेतस्यामृच्यध्यूढं सामेत्यृक्शब्देन पृथिवी निर्दिश
तिसामशब्देनाग्निं तच्च पृथिव्याग्न्योरृक्सामदृष्टिचिकीर्षायामवकल्पते नत्वृक्सामयोः पृथिव्यग्निदृष्टिचिकीर्षायामि
तु क्षितेहिराजदृष्टिकरणाद्राजशब्द उपचर्यतेनराजनितत्शब्दः अपिचलोकेषु पंचविधं सामोपासीतेत्यधिकरणनि
र्देशाल्लोकेषुसामाध्यसितव्यमिति प्रतीयते एतद्गायत्रं प्राणेषुप्रोतमिति च तद्वत् दर्शयति प्रथमनिर्दिष्टेषु चादित्यादि
षु चरमनिर्दिष्टं ब्रह्माध्यस्तमादित्योब्रह्मेत्यादेशइत्यादिषु प्रथमनिर्दिष्टपृथिव्यादयश्चरमनिर्दिष्टाहिंकारादयः पृथि
वीहिंकार इत्यादिश्रुतस्तस्मात् नेतोपादित्यादिषूद्गीथमतिर्निक्षेप्तव्येति एवं प्राप्ते ब्रूमः आदित्यादिमतय एवांगेषूद्गीथा ।
दिषुप्रक्षेप्तव्या न तु क्व उपपत्तेः उपपद्यते ह्येवमपूर्वसन्निकर्षादादित्यादिमतिभिः संस्क्रियमाणेषूद्गीथादिषु कर्मसमृ
द्धिर्यदेवविद्ययाकरोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति च विद्यायाः कर्मसमृद्धिहेतुत्वं दर्शयति ॥

तः सामप्रत्पृथिव्यावर्गाग्निः सामेति ध्यानं विहितं तत्र यदिऋक्सामात्मकयोः कर्मांगयोः पृथिव्यग्निदृष्टिः स्यात्तदा पृथिव्यग्न्योर्ऋ
क्सामपदप्रयोगो न स्यादित्यत्र दृष्टांतमाह ततरीति अन्तः प्रयोगान्यथानुपपत्त्या पृथिव्यग्न्योर्ऋक्सामदृष्टिरित्यर्थः विषयत
मम्याचैवमेवेत्याह अपिचेति गायत्रं तज्जुसाम किंच सर्वोधिकरणसिद्धांतन्यायेनाप्येवमित्याह प्रथमेति अनेनगवद्यांगाण्ये
पास्यानीतिसिद्धांतयति एवमिति उपास्तीनोहिकर्मसमृद्धिः अयनेसाचताभिरंगेषु संस्क्रियमाणेषूपपद्यते अंगानांस
मृद्धौ तत्फलप्रकृतकर्मापूर्वजनकत्वादित्यर्थः ॥

यात्त-
च॰प्र॰
६

तत्रयत्रोपास्तीनां प्रकृतकर्मसंबन्धस्तत्र फलांगद्वारापेतं फलं स्फुरं तेन तत्र फलोपपत्तये ग्रंगानामुपास्यत्वं भवतु न तदनपेत्तलोकादि
दिफलेषु तूपासनेषु कथमुपास्यत्वं वक्तुं शक्यते भवत्विति यथास्वं तत्र पत्तफलस्यापि गोदोहनस्यांगद्वारापेत्तस्यैव फलमि
ष्टं तद्वल्लोकादिफलेषूपासनेष्वपि कर्मांगद्वारैव फलकल्पना युक्ता कर्माधिकृतस्यैवांगाश्रितोपासनेष्वधिकारादतो गानामेवो
पास्यत्वमिति समाधत्ते तेष्वपीति उक्तवानवधारणाद्विनियमस्त्वयुक्त इति निरस्यति फलात्मेति उपक्रमबलाच्चांगस्योपास्यमित्याह
अपि चेति रसतमत्वादिगुणायुपदेशव्यानमित्यर्थः द्वितीयपूर्वपत्तं दूषयति यत्तूक्तमित्यादिना कर्मभूयेऽकर्मात्मकत्वं प्राप्याप
यः सिद्धादित्यादयस्तनाकर्मांगोद्देशोऽकर्मत्वहानिः स्यादित्यत आह आदित्यादिभावेनेति प्रयोगानुपपत्तिमुक्तां निरस्यति न

भवतु कर्मसमृद्धिफलेष्वेवं सत्यनेन फलेषु तत्कथंय एतदेवंविद्वांल्लोकेषु पंचविधं सामोपास्त इत्यादिषु तेष्वप्यधिकृ
ताधिकारात्प्रकृतापूर्वसंनिकर्षाच्च फलकल्पना युक्ता गोदोहनादिनियमवत् फलात्मकत्वाच्चादित्यादीनामृङ्गी
याद्भ्यः कर्मात्मकेभ्य उत्कर्षोपपत्तिः आदित्यादिप्राप्तिलक्षणं हि कर्मफलं शिष्यते श्रुतिषु अपि च इमित्येतद
त्तरमुद्गीथमेवोपासीत रसतमत्वेन तस्यैवात्तरस्योपव्याख्यानं भवतीति चोद्गीथमेवोपास्यत्वेनोपक्रम्यादित्यादिमतीर्वि
दधाति यत्तूक्तमुद्गीथादिमतिभिरुपास्यमाना आदित्यादयः कर्मभूयं भूत्वा फलं करिष्यन्तीति तदयुक्तं स्वयमेवो
पासनस्य कर्मत्वात् फलवत्त्वोपपत्तेः आदित्यादिभावेनापि च दृश्यमानानामृङ्गीथादीनां कर्मात्मकत्वानपायात् त
देतदेतस्यामृच्यध्यूढं सामेति लौकिक एष पृथिव्यग्न्योः प्रकृत्सामशब्दप्रयोगः लक्षणया पायांसमवत्त्रिक
ष्टेनविनवास्यार्थसंबंधेन प्रवर्तते तत्र यथ ऋक्सामयोः पृथिव्यग्निदृष्टिविकीर्णात्तथापि प्रसिद्धयोर्ऋक्सामयो
र्भेदेनानुकीर्तनात्पृथिव्यग्न्योः स्तत्रिधानात्तयोरेव ऋक्सामशब्दप्रयोगः ऋक्सामशब्दप्रयोगः ऋक्साम
तवधादिति निर्दिश्यते ॥

देतदिति लक्षणां बीजं संबंधमाह लक्षणा चेति गंगायां घोष इत्यत्र सन्निकृष्टसंयोगसंबंधेन तीरलक्षणा आनिर्माण
वक्र इत्यत्राग्निरिति एषु चित्त्वादिगुणवत्त्वरूपपरंपरासंबंधेन लक्षणा इहापि तथा वाच्य ऋक्सामयोः पृथिव्यग्निदृष्टिपत्ते
पि ऋक्सामपदाभ्यां स्ववाच्यार्थद्रष्टव्यतारव्यपरंपरासंबंधेन पृथिव्याग्निलक्षणायुक्तेत्यर्थः ननु प्रतीकवाचिपदस्याध्ये
येर्थे लक्षणानुपपत्ताः द्वात्तरपदस्याराजन्यप्रयोगादिति शंकते नैवेति न पापि ऋक्सामसंबंधात्पृथिव्यग्न्योरेवतस्यामृ
च्यध्यूढं सामेत्येष ऋक्सामपदप्रयोग इत्यन्वयः ननु तत्र व्याख्यायं पवक्तुं न तेनगृह्णातेत आह प्रसिद्धयोरिति तस्यामृच्यध्य
ढं सामेति मुख्ययोः प्रयुक्तेस्तदेतदेतस्यामित्यत्रापि तयोग्रहे पुनरुक्तिः स्यादत आह प्रतीकाभेददृष्ट्या पृथिव्यग्न्याः प्रतीक

पृथिव्याग्न्यादिनामभेदेव प्रतीकपदप्रयोगः ।

राम
६

तर्हि तत्शब्दोपि राजनिमित्तादित्यत आह तत्रेति स्थितप्रयोगस्य निमित्तं किमपि वाच्यं न तन्निमित्तमस्तीति प्रयोगस्यापाय इति
भावः तत्र स्त्रतः तस्य कार्यं पर्यचर्यादि यदा राज्ञेव करोति तदा तत्र शब्दो राजन्यप्यस्तीत्यत्तरार्थः अग्रगादावेव पृथिव्यादिदृष्टि
रित्यत्र हेतुं तत्रेत्याह इयमिति सतस्माल्लोकानामुपास्यत्वमुक्तं निरस्यति न चालोकेष्विति साम्नामनालोकाननुपासीतेति हि तौ
यात्तमस्यां भेगस्तयाकार्यस्ततो वरं लोकानामना साम्नोपासीतेति तत्समी माच भेगद्रूत्यर्थः एतेनेति एकविभक्तिभंगलाघवेन प्राणा
नतानायत्र साम्नोपास्यमिति व्याख्यानमित्यर्थः ननु विभक्तिसाम्येकस्य निर्णायकत्वमाह यत्रापीति साम्नउपासनस्याधिष्ठपंचस्य

तत्र शब्दोपि हिंकारादिभ्यस्त्रिकारणाद्राजानमुपसर्पन्तं निवारयितुं पार्यते इयमेव गर्भाग्निरिति च यथा तत्रन्या समस्त एव पृ
थिवीत्वमवधारयति पृथिव्यास्त्वेकवधार्यमाणे द्यग्नेरवेत्यत्तरन्यासः स्यात् य एवं विद्वान्साम गायतीति चांगास्त्र
यमेव विज्ञानमुपसंहरतीति पृथिव्यास्त्रियं न चालोकेषु पंचविधं साम्नोपासीतेति यद्यपि सप्तमी निर्दिष्टा लोकास्तथापि
साम्नन्यविषयत्वेनाध्यासस्य तन्मद्वितीयानिर्देशेन साम्नउपास्यत्वावगमात् साम्नि हि लोकेषु अध्यस्यमानेषु साम लोकात्मनोपा
सितं भवति अन्यथा पुनर्लोकाः साम्नात्मनोपासिताः स्युः एतेनैव न्यायेन प्राणेषु प्रान्तमित्यादि व्याख्यातं यत्रापि ति
स्याद्वितीयानिर्देशो यथा खल्वमुमादित्यं सप्तविधं साम्नोपासीतेति तत्रापि समस्तस्य खलु साम्नउपासनं साधिति तु प
चविधस्यापस्तन विधस्येति साम्न एवोपास्यत्वोपक्रमानात्मानि त्रेवादित्याध्यासः एतस्मादेव च साम्नउपास्यत्वाव
गमात्पृथिवी हिंकार इत्यादिनिर्देशविपर्यये पि हिंकारादिष्वेव पृथिव्यादिदृष्टिः तस्मादनेगात्र्याश्रयादित्यादि
मत्तयोगे स्फटी यादिषु हिप्येरनिति सिद्धं आदित्यादिमत्यधिकरणं आत्मोतः संभवात् कर्मांगसंबद्धेषु ताव
दुपासनेषु कर्मतंत्रत्वान्नासनादिचिंता नापि सम्यग्दर्शने वस्तुतंत्रत्वाज्ज्ञानस्येतरेषु तूपासनेषु किमनियमेन
तिष्ठन्नासीनः शयानो वा प्रवर्तेत उत नियमेनासीन एवेति चिंतयति ॥

पृथिवी हिंकार इत्यादिना हिंकारादिपंचावयवस्य साम्न उपासनमुक्तमिति तत्पंचविधस्योपासनमित्युपसंहृत्या पर्थेति सप्त
विधस्य साम्नउपासनं पक्रंस्य प्रपंचितमतः साम्नएवोपास्यत्वमित्यर्थः यदुक्तं प्राधान्यात्पृथिव्यादेरुपास्यत्वमिति तत्रा
ह एतस्मादेवेति यद्यपि हिंकारोद्देशेन पृथिवीत्वविधेरुद्देश्यस्य प्रथममनिर्देशो वाचस्तथापि कृत्न्यायबलाद्गुणपोपा

शा॰भा॰
च॰ प्र॰
७

कर्मणा उत्थितेनोपविष्टेन वानेकधानुसन्दर्शनात्संशये कर्माङ्गाश्रितोपासनानामासननियमानपेक्षणमनुष्ठानप्रकारमुक्त्वा
त्वहृदङ्गानाश्रितोपासनेष्वासननियममयं प्रत्यपादयते तत्रेति आसनाभ्यासासिद्धिः सिद्धौ तत्र मनोदेहयोर्भिन्नत्वेपि देह-
चाञ्चल्ये मनसोनवस्थानसामान्यभवसिद्धत्वान्मनोव्यापारे उपासने शुद्धेहस्थैर्यमासननियमापेक्षेति फलभेदः तिष्ठत इत्यि-
चाचल्ये मनसोनवस्थानमात्रभवसिद्धत्वान्मनोव्यापार उपासनं ध्यानाच्च तत्रैव श्रौतदृष्टान्तमाह अचलत्वं चेति
तस्य किं च ध्यानात् आसीनाएवस्युः ध्यायतिशब्दाह्वं तावत्कादिवदित्याह स्मरन्ति चेति यत्रेति तेष्ववाङ्गानाश्रितोपासनेषु प्राचादिदिशो नीर्थादि-
वाक्यस्य शरीरस्य चासनस्य स्मरणान्निनमनइत्याह

तत्र मानसत्वादुपासनस्यानियमः शरीरस्थितेरित्येवं प्राप्ते ब्रवीति आसीन एवोपासीतेति कुतः संभवात् उपासनं ना-
मसमानप्रत्ययप्रवाहकरणं न च तद्गच्छतो धावतो वा संभवति गत्यादीनां चित्तविक्षेपकत्वात् तिष्ठतोपि देहधारणे
व्यापृतं मनो न सूक्ष्मवस्तुनिरीक्षणक्षमं भवति शयानस्याप्यकस्मादेव निद्रयाभिभूयेत आसीनस्य त्वेवंजातीयको
भूयान्दोषः सुपरिहार इति संभवति तस्योपासनं ध्यानाच्च ७ अपि च ध्यायत्यर्थ एषः यत्समानप्रत्ययप्रवाहकर-
णं ध्यायतिश्च प्रशिथिलाङ्गचेष्टेषु प्रतिष्ठितदृष्टिष्वेकविषयाक्षिप्तचित्तेषूपचर्यमाणो दृश्यते ध्यायति व-
को ध्यायति प्रोषितं बन्धुमिति आसीनश्चानायासो भवति तस्मादप्यासीनकर्मोपासनं अचलत्वं चापेक्ष्य अपि च
ध्यायतीव पृथिवीत्यत्र पृथिव्यादिषु चलनत्वमेवापेक्ष्य ध्यायतिवादो भवति तच्च लिङ्गमुपासनस्यासीनकर्मत्वे
स्मरन्ति च ९ स्मरन्तिपि च शिष्टा उपासनाङ्गत्वेनासनं शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मन इत्यादिनायत एव पद्मकादीना-
मासनविशेषाणामुपदेशो योगशास्त्रे यत्रैकाग्रता तत्राविशेषात् १० दिग्देशकालेषु संशयः किमस्ति कश्चित्रियमो ना-
स्ति वेति प्रायेण वैदिकेष्वारम्भेषु दिग्गादिनियमदर्शनात्स्यादिहापि कश्चिन्नियम इति यस्य मतिस्तं प्रत्याह दिग्देशकाले-
ष्वर्थलक्षण एव नियमः यत्रैवास्य दिशि देशे काले वा मनसः सौकर्येणैकाग्रता भवति तत्रैवोपासीत प्राचीदिक्-

पूर्वाह्णप्राचीनप्रवणादिवद्विशेषाश्रवणात् एकाग्रता हीष्टा सा यत्रैव सिध्यति तत्रैवोपासीतेति
देशादिकाले नियमोस्ति न न वेत्युभयथासंभवात्संशयः एकविषयत्वं संगतिरुपास्तीनां विहितत्वाद्यभावादिवद्दिग्गादिनियम
इति पूर्वपक्षः अत्र दिगादिषु आदरः फलसिद्धान्ते त्वनादरः ध्येयचित्तैकाग्र्यस्य प्राधान्यात् यानादि तु देशादि प्रहरो वितन्त्वादिति विवेकः
अर्थलक्षण एवेति एकाग्र्यफललिङ्गक एवेत्यर्थः प्राचीनप्रवणप्राग्देशोनिम्नस्थलेष्वेवदेवयज्ञादितिवदत्र दिगादिविशेषो न श्रु-

राम
७

विशेषाश्रवणमसिद्धमिति शंकते नन्विशेषमपीति शर्कराः सूक्ष्मपाषाणाः जलाश्रयवर्जनं शीतनिवृत्यर्थं चक्षुःपीड
नोमशकः वाचनिके समदेशादिनियमे संगीकृते सति तत्काल्प्रविरुद्धशुद्धदेशादिगतेषु देशादिगतेषु प्राचीनप्रवणत्वादिष्वना
दरइति सहृद्भावेन सूत्रकृदुपदिशाति देशाद्याग्रहे चित्तवृत्तेर्यातु माधिभंगः स्यात्तमाभूदिति आप्रायणात्तव्यवहितेतासम
वधमाह आवृत्तिरिति अनियोज्यब्रह्मण्यात्मत्वप्रतिपत्तिर्यस्मिन्विड्षयद्यत्यर्थः अहंग्रहोपासनेष्वनुष्ठानसौभयपार्हदृष्टसंश

नन्विशेषमपि केचिदामनंति समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः मनोनुकूले न तु चक्षुः
पीडने गुहानिवाताश्रयणे प्रयोजयेदिति यत्र च तत्सत्यमस्यैवजातीयको नियमः सतिते तस्मिन्सति विशेष
नियमइति सूत्रद्वयाचार्य आचष्टे मनोनुकूल इति च यत्र क्रूतियत्रैकाग्रता तत्रैवेत्यनेदेवदर्शयति एकाग्रताधिकर
णे आप्रायणात्तत्रापिहिदृष्टम् ४।१।१२ आवृत्तिः सर्वोपासनेष्वादर्तव्येति स्थितमाद्येधिकरणे तत्र यानि तावत्सम्यग्दर्शनार्थ
न्युपासनानि तान्यवघातादिवत्कार्यपर्यवसानानीति ज्ञानमेवैषामावृत्तिपरिमाणं नहि सम्यग्दर्शने कार्ये निष्पन्ने यत्नां
तरं किंचिच्छासितुं शक्यं अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः शास्त्रस्याविषयत्वात् यानि पुनरभ्युदयफलानि तेषाम्वि
तां किं कियंतं चित्कालं प्रत्ययमावृत्योपरमेत उत यावज्जीवमावर्तयेदिति किं तावत्प्राप्तं कियंतं चित्कालं प्रत्यय
म्युत्सृजेत आवृत्तिविशिष्टस्योपासनशब्दार्थस्य कृतत्वादिति एवं प्राप्ते ब्रूमः आप्रायणादेवावर्तयेत्प्रत्यय
वृत्तादृष्टफलप्राप्तेः कर्माण्यपि हि जन्मांतरोपभोग्यफलमारभ्यमाणानि तदनुरूपभावनाविज्ञानं प्रायणे
कालेऽक्षिपंति सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति यच्चित्तस्तेनैव प्राणमायाति प्राणस्तेजसा युक्
तः सहात्मना यथासंकल्पितं लोकं नयतीति चैवमादिश्रुतिभ्यः तृणजलूकानिदर्शनाच्च

यमाह यानि पुनरिति यथादिगादिनियमस्याविधेरनादरस्तद्वन्मरणानुपात्यावृत्तेः अविधानादनियमइति प्राप्तेः पूर्वप
क्षः मरणपर्यंतमावृत्तिरिति सिद्धांतयति एवमिति उपालीतां कर्मणां चान्यकाले प्रारब्धफलस्फूर्तिद्वारा फलहे
तुत्वे मानमाह सविज्ञान इति भावनामयं विज्ञानं फलस्फुरणं तेन सहितः सविज्ञानः स्फुरितं फलं सविज्ञानमित्यर्थः
यस्मिंल्लोके चित्तं संकल्पोऽस्येति यच्चित्तः स्तेन संकल्पितेन लोकेन सह फलस्फूर्त्यनंतरं मनः प्राणे लीयत इति यावत्तेज
उदानस्त्वात्मा जीवः जलूकादृष्टांतश्रुतेश्च भाविफलस्फूर्तिरस्तीत्यर्थः ॥ श्रीरामाय नमः ॥

शा॰त॰
च॰ प्र॰
८

अस्ति दर्शनं तत्फलं विज्ञानं कर्मणामिवादृष्टद्वारोपात्तीनां ततः कुतः आमरणमावृत्तिरित्यत आह प्रत्ययावृत्तिरित्युपात्ति।
प्रत्ययानां धारावाहिकत्वं यास्वरूपानिवृत्तिरेवांत्यविज्ञानं त्वदृष्टद्वारकमन्यदपेक्षितं सर्वभावानामेव समानज्ञा
तीयद्वारानपेक्षतया प्रत्ययानां प्रत्ययान्तरापेक्षायोगात्कर्मणां तु दृष्टद्वारान्यथा फलत्वानुपपत्तेः अदृष्टद्वारकल्पने
ति भावः अंत्यध्यानं सदुपासक एतत्त्रयमन्तिमस्य च्युतमसीति मंत्रत्रयं मरणकालेपि स्मरेदित्यर्थः यथोपासकानां या
जीवकर्तव्यमस्ति न तथात्मविदामिति कर्मतत्फलदानां जीवन्मुक्तिमाह तदधिगमइति ज्ञानसाधनेषु पतत्वाधिका

प्रत्ययावृत्तिनेस्वरूपावृत्तिं कृत्वा किमन्यत्प्रायणकालभाविभावनाविज्ञानमपेक्षेरन् तस्माद्ये प्रतिपत्तव्यफल।
भावनात्मकाः प्रत्ययास्तेषामाप्रायणमावृत्तिः तथा च स्मृतिः स यावद्यन्तं यमस्माल्लोकात्प्रैतीति प्रायणकाले।
पि प्रत्ययावृत्तिं दर्शयति यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरं तं तमेवैति कौंतेय सदा तद्भा
व भावित इति प्रायणकाले मनसाचलेनेति च सैन्तवेलायामेतत्त्रयं प्रतिपद्येतेति च मरणवेलायामपिक
र्तव्यशेषं श्रावयति आप्रायणाद्धि करणं तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ११ गत
स्तृतीयशेषः अथेदानीं ब्रह्मविद्याफलं प्रति चिंता प्रतीयते ब्रह्माधिगमे सति तद्विपरीतं फलं दुरितं क्षीयते
न वेति संशयः किं तावत्प्राप्तं फलार्थत्वात्कर्मणः फलमदत्त्वा न संभाव्यते क्षयः फलदायिनी ह्यस्य शा
क्तिः श्रुत्याः समधिगता यदि तदंतरेणैव फलोपभोगमपवृज्येत श्रुतिः कदर्थिता स्यात् स्मरंति च न हि कर्म क्षी
यत इति नत्वेवं सति प्रायश्चित्तोपदेशोनर्थकः प्राप्नोति नैष दोषः प्रायश्चित्तानां नैमित्तिकत्वोपप
त्तेः गृहदाहेष्ट्यादिवत्

र्थफलाध्यायेपि साधनविचारः कृतः संप्रति फलाध्यायस्य फलचिंता क्रियते इत्याह गतमिति कर्मणां फलानंत्यशास्त्रा
त्ता अनन्तायत्वशास्त्राच्च संशयः एवं पक्षे ज्ञानिनोपसंचितपापभोगानंतरं मुक्तिः सिद्धांते तु ज्ञानसमकालं पापनाश
ज्जीवन्मुक्तिरिति फलेनाहिंसादिन्यायादि विशेषः अत्र [illegible] दृष्टस्य दुःखदायिनी शक्तिरधिगता नानामुक्ते क्षीयते कर्मे
ति च स्मरंति अतः फलान्तमेव पापनमध्येनस्पत्तीति पूर्वपक्षः ननु तर्हि तत्राशार्थप्रायश्चित्तविधिर्नस्यादिति चे
न्न यथा आहिताग्नेर्गृहदाहे निमित्ते सति अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदितीष्टिविधिस्तद्वदोषनिमित्तमात्रे

[illegible]
राम
८

ननु विषमउपन्यासः युक्तेष्ट्वदाहस्य सिद्धत्वादयोग्यत्वाच्च फलत्यागनिमित्तमात्रत्वे दोषवान् प्रायश्चित्तं कुर्यादित्यत्र नमलिनः स्या
यादिनैव दोषपदस्य निवृत्तिद्वारा फलपुरत्वसंभवान्नेरति ब्रह्महत्यां योऽश्वमेधेन यजत इति प्रायश्चित्तानां पापनिवृत्तिश्रुतेश्च प्रयुक्तं प्रा
यश्चित्तस्य नैमित्तिकत्वमित्यत आह अपि चेति ज्ञानस्य दोषनाशार्थं तया विधानं नास्ति क्षीयन्ते चास्य कर्माणीत्यादेर्ज्ञानस्तावकमा
त्रत्वादित्यर्थः कर्मभोगानन्तरं देशकालान्तरे मोक्षो भविष्यति शास्त्रप्रामाण्यादित्याह नेत्युच्यत इति ज्ञानोत्कर्षः कर्मक्षयस्य एवं

अपि च प्रायश्चित्तानां दोषसंयोगेन विधानाद् वेदपि दोषक्षपणार्थता न त्वेवं ब्रह्मविद्यायां विधानमस्ति ननु न भ्युपगममा
त्रेण ब्रह्मविदः कर्मक्षयेन तत्फलस्यावश्यंभोक्तव्यत्वादनिर्मोक्षः स्यात् नेत्युच्यते देशकालनिमित्तापेक्षो मोक्षः कर्मफलवद् भ
विष्यतीति तस्मात्तद्वत् ब्रह्माधिगमे दुरितनिवृत्तिरिति एवं प्राप्ते ब्रूमः तदधिगम उत्तरपूर्वयोरघयोरश्लेषवि
नाशौ भवतः उत्तरस्याश्लेषः पूर्वस्य विनाशः कस्मात् तद्व्यपदेशात् तथा हि ब्रह्मविद्याप्रक्रियायां संभाव्यमानसंबन्धस्यागा
मिनो दुरितस्यानभिसंबन्धं विदुषो व्यपदिशति यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापकर्म न श्लिष्यत
इति तथा विनाशमपि पूर्वोपचितस्य दुरितस्य व्यपदिशति तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः
प्रदूयन्त इति अयमपरः कर्मक्षयव्यपदेशो भवति भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन्दृ
ष्टे परावरे इति यदुक्तमनुपभुक्तफलस्य कर्मणः क्षयकल्पनायां शास्त्रं कदर्थितं स्यादिति नैष दोषः नहि वयं कर्मणः
फलदायिनीं शक्तिमपजानीमहे विद्यत एव सा सा तु विद्यादिना कारणान्तरेण प्रतिबध्यत इति वदामः शक्तिसद्भावमात्रे
च शास्त्रं व्याप्रियते न प्रतिबन्धाप्रतिबन्धयोरपि नहि कर्म क्षीयत इत्येतदपि स्मरणमौत्सर्गिकं न भोगादृते कर्म क्षीयत इति तद
र्थत्वादिष्यत एव च प्रायश्चित्तादिना तस्य क्षयः सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदे
त्यादिश्रुतिस्मृतिभ्यः यत्तूक्तं नैमित्तिकानि प्रायश्चित्तानि भविष्यन्तीति तदसत् दोषसंयोगेन चोद्यमानानामेषां दोष
निघातफलसंभवे फलान्तरकल्पनानोपपत्तेः यत्पुनरेतदुक्तं न प्रायश्चित्तवद्दोषक्षयोद्देशेन विद्याविधानमस्तीत्यत्र
ब्रूमः सगुणासु तावद्विद्यासु विद्यत एव विधानं तासु च वाक्यशेषे ऐश्वर्यप्राप्तिः पापनिवृत्तिश्च विद्यावत उच्यते तयोश्
चाविवक्षाकारणं नास्तीत्यतः पाप्मप्रहाणपूर्वकैश्वर्यप्राप्तिस्तासां फलमिति निश्चीयते निर्गुणायां तु विद्यायां यद्यपि वि

त्वान्मानान्तरविरुद्धत्वाच्च तत्परानेकवाक्यानां स्तावकत्वायोगान्नास्तित्वमिति सिद्धान्तयति एवमित्यादिना पापक्रियातोऽस
वीनुत्पत्तिरश्लेषः सत एव ब्रह्मविद्यायां व्यपदेशमुक्त्वा निर्गुणेऽपि तमाह अयमपर इति परोक्तं दूषयति यदुक्तमित्यादिना
विधिनिषेधशास्त्रं नाभुक्तं क्षीयत इत्यादिस्मृतिश्च कर्मणः फलशक्तौ प्रमाणम् अतः प्रायश्चित्तशास्त्राणां गौणीकारे शास्त्र

भामती
च.प्र.
१९

तत्त्वज्ञानमात्मनः शेषदुरितनाशकं तन्मलाध्यासबाधकत्वात्स्वप्नदुरितमलकर्तृत्वाध्यासबाधकजाग्रद्बोधवदित्याह तथापीति ।
श्रुतार्थमेव युक्त्या द्रढयति अश्लेषइति मलाध्यासानुवृत्तेः पापस्याश्लेषः तन्नाशानङ्गीनाशाद्युत्पत्त्यर्थः अध्यासाभावे विद्वदनुभ ।
वमाह एवंवेति मोक्षशास्त्रबलाच्च ज्ञानात्कर्मक्षयसिद्धिरित्याह एवमेवेति ज्ञानात्कर्मक्षये सत्येवेत्यर्थः मोक्षस्य कर्मफलसा

तथाप्यकर्तात्मत्वबोधात्कर्मप्रदाहप्रसिद्धिः अश्लेषइति चागामिषु कर्मसु कर्तृत्वमेव न प्रतिपद्यते ब्रह्मविदिति दर्शयति
अतिक्रान्तेषु तु यद्यपि मिथ्याज्ञानात्कर्तृत्वं प्रतिपद्यत एव तथापि विद्यासामर्थ्यान्मिथ्याज्ञाननिवृत्तेस्तान्यपि प्रविलीयन्त इत्या
ह विनाशइति एवंसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि त्रिष्वपि कालेष्वकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि नेतः पूर्वमपि कर्ता भोक्ता
वाहमासं नेदानीं नापि भविष्यत्काल इति ब्रह्मविदवगच्छति एवमेव च मोक्ष उपपद्यते अन्यथा ह्यनादिकालप्रवृत्ता ।
नां कर्मणां क्षयाभावे मोक्षाभावः स्यात् न च देशकालनिमित्तापेक्षो मोक्षः कर्मफलवद्भवितुमर्हति अनित्यत्वप्रसंगात्परोक्ष
त्वानुपपत्तेश्च ज्ञानफलस्य तस्माद्ब्रह्माधिगमे दुरितक्षय इति स्थितं ब्रह्माधिगमाधिकः इतरस्याप्येवमसंश्लेषः पाते तु ॥
पूर्वस्मिन्नधिकरणे बन्धहेतोरघस्य स्वाभाविकस्याश्लेषविनाशौ ज्ञाननिमित्तौ शास्त्रव्यपदेशान्निरूपितौ धर्मस्य पुनः ।
शास्त्रीयत्वाच्छास्त्रीयेण ज्ञानेनाविरोध इत्याशङ्क्य तन्निराकरणाय पूर्वाधिकरणन्यायातिदेशः क्रिय
त इतरस्यापि पुण्यस्य कर्मणः एवमघवदश्लेषो विनाशश्च ज्ञानवतो भवतः कुतः तस्यापि स्वफलहेतुत्वेन ज्ञानफल
प्रतिबन्धित्वप्रसंगात् उभे उ हैवैष एते तरतीत्यादिश्रुतिषु च दुष्कृतवत्सुकृतस्यापि प्रणाशव्यपदेशात् अकर्त्रात्मत्वबोधनिमित्त
स्य कर्मक्षयस्य सुकृतदुष्कृतयोस्तुल्यत्वात् क्षीयन्ते चास्य कर्माणीति चाविशेषश्रुतेः यत्रापि केवल एव पाप्मशब्दः प
ठ्यते तत्रापि तेनैव पुण्यमप्याकलितमिति द्रष्टव्यं ज्ञानफलापेक्षया निकृष्टफलत्वात् अस्ति च श्रुतौ पुण्येऽपि पाप्म
शब्दः नैनं सेतुमहोरात्रे तरत इत्यत्र सह दुष्कृतेन सुकृतमप्यनुक्रम्य सर्वे पाप्मानोऽतो निवर्तन्त इत्यविशेषेणैव प्रकृते पुण्ये
पाप्मशब्दप्रयोगात् पाते त्विति तुशब्दोऽवधारणार्थः एवं धर्माधर्मयोर्बन्धहेत्वोर्विद्यासामर्थ्यादश्लेषविनाशसिद्धेरवश्यं
भाविनी विदुषः शरीरपाते मुक्तिरित्यवधारयति अतिदेशोऽपि अनारब्धकार्ये एव तु पूर्वे तदवधेः १३ ॥

प्रसक्तं निरस्यति न चेति इतरस्यापीत्यतिदेशत्वात्संगमयति पेक्षा ज्ञानात्पुण्यं क्षीयते न वेति एवं वा संदेहे ज्ञानं न पुण्यनाश ।
कं शास्त्रीयत्वात्पुण्यवदिति प्राप्ते अतिदेशं व्याचष्टे धर्मस्येत्यादिना ज्ञानं पुण्यनाशकं तन्मूलाविद्यायातित्वादिति
त्वादिति न्यायोपेतागमबाधितमनुमानमिति भावः ननु क्षीयते चेत्यविशेषश्रुतिः पापविषया सर्वे पाप्मानं तरतीति विशे
षश्रुतेरित्यत आह यत्रापि केवल इति पापपुण्ययोः पराधिकरणद्वयस्य फलमाह पाप इति अनारब्धकार्ये एव तु ॥ ॥

राम
१९

यदेव विद्ययेति हि उक्तमित्यादिकं विद्यु यन्तु यज्ञीव्यस वीजं संशयमुक्त्वा पूर्वपक्षमाह विद्यातं युक्तमेवेति पूर्वपक्ष कर्माङ्गोपास्तिहीनकर्मणो
ज्ञानार्थत्वासिद्धिः सिद्धान्ते तत्सिद्धिरिति भेदः भवतु विद्याविशिष्टस्य कर्मणो ज्ञानं प्रति शीघ्रकारीत्वाख्यः कश्चिदतिशयो विद्यासामर्थ्यान्नैता

यदेव विद्ययेति हि १६ समधिगतमेतदनन्तराधिकरणे नित्यमग्निहोत्रादिकर्म मुमुक्षुणा मोक्षप्रयोजनोद्देशेन कृतमुपात्तदुरित ॥
क्षयहेतुत्वद्वारेण सत्त्वशुद्धिकारणतां प्रतिपद्यमानं मोक्षप्रयोजने ब्रह्माधिगमनिमित्तत्वेन ब्रह्मविद्यया सहैककार्यं भवतीति
तत्राग्निहोत्रादिकर्माङ्गव्यपाश्रयविद्यासंयुक्तं केवलं वास्ति य एवं विद्वान्यजति य एवं विद्वाञ्जुहोति य एवं विद्वान्शंसति य एवं
विद्वान्गायति तस्मादेवंविदमेव ब्रह्माणं कुर्वीत नानेवंविदं तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदेत्यादिवचनेभ्यो विद्यासंयुक्तं
केवलमसंयुक्तमप्यस्ति तत्रेदं विचार्यते किं विद्यासंयुक्तमेवाग्निहोत्रादिकं कर्म मुमुक्षोर्विद्याहेतुत्वेन तया सहैककार्यत्वं प्रति
पद्यते न केवलं उत विद्यासंयुक्तं केवलं वाविशेषेणेति कुतः संशयः तमेतमात्मानं यज्ञेन विविदिषन्तीति यज्ञादीनामविशेषे
णात्मवेदनाङ्गत्वेन श्रवणाद्विद्यासंयुक्तस्य चाग्निहोत्रादेर्विशिष्टत्वावगमादिति तावत्प्राप्तं विद्यासंयुक्तमेव कर्माग्निहोत्राद्यात्म
विद्याशेषत्वं प्रतिपद्यते न विद्याहीनं विद्योपेतस्य तस्य विशिष्टत्वावगमाद्धि यो विदीनाय दहरवज्जुहोति तद्दहः पुनर्जन्मे
पुजयेताव विद्वानित्यादिश्रुतिभ्यः बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जयेत्यादिस्मृतिभ्य
श्चेति एवं प्राप्ते प्रति पद्यते यदेव विद्ययेत्यस्मिन्नेतत्र विद्यासंयुक्तं कर्माग्निहोत्रादिकं विद्याहीनात्कर्मणोऽग्निहोत्रादेर्विशिष्टं वि
द्वानिव ब्राह्मणो विद्याहीनाद्ब्राह्मणात्तथापि नात्यन्तमनपेक्षं विद्याहीनं कर्माग्निहोत्रादिकं कस्मात्तमेवात्मानं यज्ञेन विविदिष
न्तीत्यविशेषेणाग्निहोत्रादेर्विद्याहेतुत्वेन श्रुतत्वात् ननु विद्यासंयुक्तस्याग्निहोत्रादेर्विद्याहीनाद्विशिष्टत्वावगमाद्विद्यावि
हीनमग्निहोत्राद्यात्मविद्याहेतुत्वेनानपेक्षमेव नियुक्तं नैतदेवं विद्यासहायस्याग्निहोत्रादेर्विद्यानिमित्तेन सामर्थ्यातिशयेन योगा
दात्मज्ञानं प्रति कश्चित्कारणत्वातिशयो भविष्यति न तथा विद्याहीनस्येति युक्तं कल्पयितुं न तु यज्ञेन विविदिषन्तीत्यविशेष
णात्मज्ञानाङ्गत्वेन श्रुतस्याग्निहोत्रादेरनङ्गत्वं शक्यमभ्युपगन्तुं तथा हि श्रुतिर्यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्य
वत्तरं भवतीति विद्यासंयुक्तस्य कर्मणोऽग्निहोत्रादेर्वीर्यवत्तरत्वाभिधानेन स्वकार्यं प्रति कंचिदतिशयं ब्रुवाणा विद्याविहीनस्यापि
स्वप्रयोजनं प्रति वीर्यवत्त्वं दर्शयति कर्मणश्च वीर्यवत्त्वं तद्यत्स्वप्रयोजनसाधनप्रसहत्वं तस्माद्विद्यासंयुक्तं नित्यमग्निहो
त्रादि विद्याविहीनं चोभयमपि मुमुक्षुणा मोक्षप्रयोजनोद्देशेनेह जन्मनि जन्मान्तरे च प्राग्ज्ञानोत्पत्तेः कृतं यत्तद्यथासामर्थ्यं ब्र
ह्माधिगमप्रतिबन्धकारणोपात्तदुरितक्षयहेतुत्वद्वारेण ब्रह्माधिगमकारणत्वं प्रतिपद्यमानं श्रवणमनननिदिध्यासनश्रद्धातात्पर्या
द्यन्तरङ्गकारणापेक्षं ब्रह्मविद्यया सहैककार्यं भवतीति स्थितम् ॥

वताकेवलस्यैव व्यर्थ्यं विविदिषाश्रुतिविरोधात् न च तत्र श्रुतो यज्ञादिशब्दानां विद्योपेतकर्मपरतया संकोचो युक्तः हि यतो यदेव विद्ययेति

केवलस्यापि विद्यावत्त्वं ज्ञानसाधनत्वेन सिद्धं तदितराधिकं शेषं

भोगेन त्वितरे क्षपयित्वा संपद्यते तत्त्वविदश्च विषयासक्तिः आरब्धक्षयानंतरं संसरतु तन्नेति निमित्ताभावाभ्यां संशये सिद्धां
तनुपक्रमते अनारब्धेति अनारब्धकर्मणो क्षयोक्त्वा आरब्धस्य कुर्यं क्षय इत्याकांक्षायामस्योत्थानात्संगतिः पूर्वपक्षे वि
देहकैवल्यासिद्धिः सिद्धांते तत्सिद्धिरिति भेदः देहपातोत्तरमपि तत्त्वविदः संसारयोग्यत्वात् यथा देहपातात्पूर्वमित्यना
रब्धाधिकरणदृष्टांतेन पूर्वपक्षमाह नन्विति भोगनिमित्तकर्माभावाद्देवत्सिद्धिः यत्तु संचितं कर्मांतरं तत्र निमित्त

भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते १९ अनारब्धकार्ययोः पुण्यपापयोर्विद्यासामर्थ्यात्क्षय उक्तः इतरे त्वारब्ध
कार्ये पुण्यपापे उपभोगेन क्षपयित्वा ब्रह्म संपद्यते तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति ब्र
ह्मैव सन्ब्रह्माप्येतीति चैवमादिश्रुतिभ्यः ननु सत्यपि सम्यग्दर्शने यथा प्राग्देहपाताद्भेददर्शनं द्विचंद्र
दर्शनन्यायेनानुवृत्तं एवं पश्चादप्यनुवर्तेत न निमित्ताभावात् उपभोगशेषक्षपणं हि तत्रानुवृत्तिनिमित्तं
न च तादृशमत्र किंचिदस्ति नन्वपरः कर्माशयोऽभिनवमुपभोगमारप्स्यते न तस्य दग्धबीजत्वात् मिथ्याज्ञा
नावष्टंभं हि कर्मांतरं देहपाते उपभोगांतरमारभेत तच्च मिथ्याज्ञानं सम्यग्ज्ञानेन दग्धमित्यतः साध्वेत
दारब्धकार्यक्षये विदुषः कैवल्यमवश्यं भवतीति भोगाधिकरणं इति शारीरकमीमांसाभाष्ये शंकरभग
वत्पादकृतौ चतुर्थाध्यायस्य प्रथमः पादः ॥१॥

फलस्य दग्धमूलत्वात् अविद्याद्यो हि क्लेशाः कर्मणस्तत्फलस्य च मूलं तदुक्तं योगशास्त्रे क्लेशमूलः कर्माशयः
सति मूले तद्विपाक इति तच्च मूलं ज्ञानाग्निना दग्धमिति कुतः पुनः संसारस्तस्माद्देहपाते कैवल्यमिति सिद्धं ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभगवत्पादभाष्यरत्नप्रभायां चतुर्थस्याध्यायस्य प्रथमः पादः ॥१॥

उक्तकर्मत्वं विषयीकृत्य क्षीयन्ते चेत्यविशेषश्रुतेस्तस्य तावदेव चिरमिति श्रुतेश्च संशयमाह पूर्ववदिति जीवन्मुक्तस्य सिद्धि
लिङ्गं हि श्रुतेस्तूभयत्र फलं पूर्ववत्सिद्धान्तन्यायेन स्वपक्षप्राप्तौ उक्तोऽस्त्वगतः कर्मक्षतिः प्रारब्धान्यकर्मविषये तदपवादं सिद्धा
न्तयति एवमिति तावदिति शब्दोऽवधिवाचकः प्रारब्धं यावन्न विमुच्यते तावानेव विलम्बः तन्मोक्षे ब्रह्मसंपद्यत इति श्रुत्यर्थः द

पूर्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधारितः स किमविशेषेणारब्धकार्ययोरनार
ब्धकार्ययोश्च भवति उत विशेषेणानारब्धकार्ययोरेवेति विचार्यते तत्र उभयोरेव हैवैष एतेन तरतीत्येवमादिश्रुति
ष्वविशेषश्रवणात् विशेषेणैव क्षय इति एवं प्राप्ते प्रत्याह अनारब्धकार्य एव त्विति अप्रवृत्तफले एव पूर्वे जन्मा
न्तरसंचिते अस्मिन्नपि च जन्मनि प्राग्ज्ञानोत्पत्तेः संचिते सुकृतदुष्कृते ज्ञानाधिगमात्क्षीयेते न त्वारब्धकार्ये सामिभु
क्तफले याभ्यामेतद्ब्रह्मज्ञानायतनं जन्म निर्मितं कुत एतत् तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति शरीरपातावधिक
रणात् क्षेमप्राप्तेः इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावाज्ज्ञानप्राप्त्यनन्तरमेव क्षेमं स्यात्तत्र शरीरपातप्रतीक्षां नाचक्षीत ननु वस्तुबलेनैवायमकर्त्रात्मबोधः कर्माणि क्षपयन्कथं कानिचित्क्षपयेत्का
नि चोपेक्षेत न हि समानेऽग्निबीजसंपर्के केषांचिद्बीजशक्तिः क्षीयते केषांचिन्न क्षीयत इति शक्यमङ्गीकर्तुमि
ति उच्यते न तावदनाश्रित्यारब्धकार्यं कर्माशयं ज्ञानोत्पत्तिरुपपद्यते आश्रिते च तस्मिन्कुलालचक्रवत्प्रवृ
त्तवेगस्यान्तराले प्रतिबन्धासंभवाद्भवति वेगक्षयप्रतिपालनम् अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माण्यु
च्छिनत्ति बाधितमपि तु मिथ्याज्ञानं द्विचन्द्रज्ञानवत्संस्कारवशात्कंचित्कालमनुवर्तत एव अपि च नैवात्र विव
दितव्यं ब्रह्मविदः कंचित्कालं शरीरं ध्रियते न वा ध्रियत इति कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधार
णं चापरेण प्रतिक्षेप्तुं शक्येत श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्देशेनैतदेव निरुच्यते तस्मादनारब्ध
कार्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात्क्षय इति निर्णयः अनारब्धकार्याधिकः ॥ ॥

इत्पा तावधि लिङ्गात्तत्वविदां याज्ञवल्क्यादीनां देहधारणश्रुतिस्मृतिलिङ्गाच्च प्रारब्धकर्मणस्तत्वज्ञानं प्रजिहेत्वेतोऽस्येनो
पजीव्यत्वाच्च प्राबल्यसिद्धेस्तस्मात्तिवद्धं तत्वज्ञानेनास्तिद्ध्यर्थं अविपाशं विक्षेपशक्त्यारब्धं विद्यायावरकाविद्यांशं ना
शयतीत्याह उच्यते न तावदिति विक्षेपकाविद्यालेश एव संस्कारः शिष्यान्प्रति जीवन्मुक्तोऽस्त्वानुभवमाह अपि

ग्या·न्वा·
च·प्र·
१०

अग्निहोत्रादि तु नित्यनैमित्तिकं कर्म ज्ञानान्नश्यति न वेति संदेहे उभे पुण्यपापे नश्यतीति विशेषक्षेत्रेन नश्यतीत्याशंक्योत्तरस्यापीत्य
तिदेशस्य नित्यायतिरिक्तकाम्यपुण्यविषयत्वेनापवादं सिद्धान्तयति प्राप्तस्यापीत्यादिना अश्लेषपदे ज्ञानार्थे नित्यायन
स्यानाशसिद्धिः पंकप्रक्षालनन्यायात सिद्धा नैतत् ज्ञानोत्पत्त्यर्थत्वात्तत्सिद्धिरिति विवेकः अत्र भाष्ये ज्ञानकर्मणोस्तादात्म्यादेककार्यत्वे पर

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् १६ प्राप्तस्यापि श्लेषविनाशयोरश्लेषविनाशयोरिति दिक्षुः सोऽतिदेशः सर्वपुण्यविषयः प्रा
प्तः प्रतिषिध्यते अग्निहोत्रादि नित्यं तु शब्दस्य आशंकापनयन इति यत्त्रि संकर्म वैदिकमग्निहोत्रादि तत्कार्यायैव भव
ति ज्ञानस्य यत्कार्यं तदेवास्यापि कार्यमित्यर्थः कुतः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेनेत्यादिद
र्शनात् ननु ज्ञानकर्मणोर्विलक्षणकार्यत्वात्कार्यैकत्वानुपपत्तिः नैष दोषः ज्वरमरणकार्ययोरपि दधिविषयोर्गु
डमंत्रसंयुक्तयोस्तृप्तिपुष्टिकार्यदर्शनात् तद्वत्कर्मणोऽपि ज्ञानसंयुक्तस्य मोक्षकार्योपपत्तेः ननु नारभ्यो मोक्षः कथम
स्य कर्मकार्यत्वमुच्यते आरादुपकारकत्वात्कर्मणो ज्ञानस्य वृद्धिप्रापकत्वं कर्मणां ज्ञानमोक्षकारणमित्युपचर्यते
अत एवातिक्रान्तविषयमेतत्कार्यैकत्वाभिधानं न हि ब्रह्मविद आगामि अग्निहोत्रादिसंभवति अनियोज्यब्रह्मा
त्मत्वप्रतिपत्तेः शास्त्रस्याविषयत्वात् सगुणासु तु विद्यासु कर्तृत्वानतिवृत्तेः संभवत्यागाम्यग्निहोत्रादित
स्यापि निरभिसंधिनः कार्यान्तराभावाद्विद्यासंगत्युपपत्तिः किं विषयं पुनरिदमश्लेषविनाशवचनं किंविषयं
वा विनियोगवचनमेकेषां शाखिनां तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामित्यत इदमुत्त
रमुच्यते अतोऽन्यापि ह्येकेषामुभयोः १५ अतोऽग्निहोत्रादेर्नित्यात्कर्मणोऽन्यापि ह्यस्ति साधुकृत्या फलमभिसंधा
य क्रियते तस्याप्येष विनियोग उक्त एकेषां शाखिनां सुहृदः साधुकृत्यामुपयन्तीति तस्या एवेदमश्लेषवचनं ल
विनाशवचनं इत्यपि गमितः स्यात्प्रवृत्तम्लेषश्रुति तथाजातीयकस्य काम्यस्य कर्मणो विद्यां प्रत्यनुपकारकत्वे
त्वे संप्रतिपत्तिर्जैमिन्यो जैमिनिबादरायणयोराचार्ययोः अग्निहोत्राधिकरणं ॥

मन्तेनोक्ता सा चान्यार्पेयर्थीभ्यां मोक्षहेतुत्वं स्वमतमुक्तमिति मंतव्यं अत एवेति ज्ञानार्थं कर्मणो भावात्सर्वकर्मविषयमित्यर्थः
निर्गुणविद्यायां कर्मसाहित्यं तत्तोस्ति प्रतिभोजनस्य लाभवेलेनेवदर्शितं तमतिसगुणविद्यापरत्वेन तत्त्रुसोजस्यमाह सगुणा
स्विति उत्तरसूत्रार्थं गृह्णाति किमित्यादिना यस्मार व्यादन्यकाम्यं पुण्यं पापं च तद्देवोक्तं उत्तरसूत्रे द्विषन्तो साधारणमाजानीयेके

मंजनयति स्वयं च ज्ञानान्नश्यतीति भावः

रा·म·
१०

ॐ श्रीगणेशाय नमः ॥ वाङ्मनसि दर्शनाच्छब्दाच्च ॥ ज्ञानफलोक्त्यनंतरमुपासनफलं ब्रह्मलोकस्थैवक्तव्यं तच्चार्चिरादिमार्गप्राप्ये
मार्गप्राप्तिश्चोत्क्रांतिसाध्या तस्माद्दुपास्तिफलात्प्रागुत्क्रांतिपादस्यास्याध्यायस्य संगतिः पूर्वं चास्य पूर्वपादांते निर्गुणज्ञानफलोक्ता
नंतरं वक्तव्योपास्तिफलेनात्तित्वादिन्याह अथेति ज्ञानेन हि वो पासकस्याप्युत्क्रांतिर्नेत्यत आह समानेति विद्वानुपासकः तस्मान्
पासकउत्क्रांतिरस्ति अज्ञत्वादिति वक्तुमित्यर्थः प्रियतोस्य पुरुषाणास्येत्यर्थः वाक्कादशकरणे नद्रुमोलयभानात्तत्पाय: एवंप
तैकरणानां स्वरूपलयान्न मात्रसंक्रांतिः सिद्धांतेन संसारसिद्धिः अन्न पादाने मनसि वाचित्तवलयायोगेनव्यापारमात्रापपामी

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ अथापरास्तु फलप्राप्तये देवयानेपंथानमवतारयिष्यन्प्रथमं तावद्यथाशास्त्रमुत्क्रांतिक्र
ममन्वाचष्टे समाना हि विद्वदविदुषोरुत्क्रांतिरिति वक्ष्यति अस्ति प्रायणविषया श्रुतिः अस्य सोम्य पुरुषस्य प्रयतो
वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामिति किमिह वाच एव वृत्तिर्मनसि संपद्यत उ
त वाग्वृत्तेरिति विषयः तत्र वागेव तावन्मनसि संपद्यत इति प्राप्ते न ह्याहि श्रुतिरनुगृहीता भवतीतरथा लक्षणा
स्यात् श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न लक्षणा तस्माद्वाच एवायं मनसि प्रलय इत्येवं प्राप्ते ब्रूमः वाग्वृत्तिर्म
नसि संपद्यत इति कथं वाग्वृत्तिरिति व्याख्यायते यावता वाङ्मनसीत्येवाचार्यो पठति सत्यमेतत् पठिष्यति तु परस्ताद
विभागो वचनादिति तस्मादत्र वृत्त्युपशममात्रं विवक्षितमिति गम्यते तत्त्वप्रविलयविवक्षायां तु सर्वत्रैवाविभाग
साम्यात्किं परत्रैव विशिष्यादविभाग इति तस्मादत्र वृत्त्युपसंहारविवक्षायां वाग्वृत्तिः पूर्वमुपसंह्रियते मनोवृत्तावव
स्थितायामित्यर्थः कस्मात् दर्शनात् दृश्यते हि वाग्वृत्तेः पूर्वोपसंहारो मनोवृत्तौ विद्यमानायां न तु वाच एव वृ
त्तिमत्या मनस्युपसंहारः केनचिदपि दृष्टुं शक्यते ननु श्रुतिसामर्थ्याद्वाच एवायं मनस्यप्ययो युक्त इत्युक्तं नेत्याह
अतत्प्रकृतित्वात् यस्य हि यत उत्पत्तिस्तस्य तत्र प्रलयो न्याय्यः मृदीव शरावस्य न च मनसो वागुत्पद्यत इति किंचन
प्रमाणमस्ति वृत्त्युद्भवाभिभवौ त्वप्रकृतिसंश्रयावपि दृश्येते पार्थिवेभ्यो हीन्धनेभ्यस्तैजसस्याग्नेर्वृत्तिरुद्भवति ॥
त्यप्सु चोपशाम्यति कथं तर्हि अस्मिन्पक्षे शब्दो वाङ्मनसि संपद्यत इत्यत आह शब्दाच्चेति शब्दोऽप्यस्मिन्पक्षेऽस्मिन्नेव कल्प
ते वृत्तिमतो भेदोपचारादित्यर्थः

दितिविवेकः सूत्रे वृत्तिपदाध्याहारः कथमिति शंकते कथमिति उत्तरत्र हि सूत्रकृता तद्विद इंद्रियाणां स्वरूपलयं वक्ष्यति तद्बलादि
हाध्याहार उच्यते अत्रापीन्द्रियलयसाम्ये वृत्त्यमाणविशेषानुपयोगादिति समाध्यर्थः प्रकृतावेव विकारलय इति न्यायविरुद्धार्थ(
श्रुतिरपि न व्रजतीति सिद्धांतयति अतत्प्रकृतित्वादिति न्यायस्य निरवकाशत्वाद्बलीयस्त्वं शब्दस्य तु श्रुतिर्वाग्गिति तु स्यात् लक्षणया

वाग्वृत्तिमनसिलयाधिकरणं ॥

शा.न.
च.दि.
१२

वाच्युक्तं न्यायं चक्षुरादिष्वतिदिशति अत एवेति उपशांतदेहोल्मुकस्मादुक्तमरणादूर्ध्वं पुनर्भवं प्रतिपद्यंत इत्यर्थः इंद्रिय
णां वृत्तस्य प्रतिस्थस्य वृत्तिपक्षयोपपत्तेः सर्वेन्द्रियवृत्तिलयश्रुतेश्च दृष्टत्वाद्वाङ्मनसीति पृथक्कथनं किमर्थमित्यत आह स
र्वेषां करणानामिति तन्मनः प्राण उत्तरात् वाक्क्रमादर्थक्रमस्याधिकरणक्रमात्प्रतिन्यायाभ्यासः प्रायः एवं प्रबलन्याय

अत एव च सर्वाण्यनु २ तस्मादुपशांततेजाः पुनर्भवमिंद्रियैर्मनसि संपद्यमानैरित्यत्राविशेषेण सर्वेषामिंद्रिया
णां मनसि संपत्तिः श्रूयते तत्रापि तत एव वाच इव चक्षुरादीनामपि सन्निधिकमनुस्थितेऽवस्थिते वृत्तिलोपदर्शना
त्तत्प्रलयासंभवाच्च वृत्त्युपपत्तेश्च ग्रहणिद्वारेणैव सर्वाणीन्द्रियाणि मनोनुवर्तंते सर्वेषां करणानां मनस्युपसंहारावि
शेषे सति वाचः पृथग्ग्रहणं वाङ्मनसि संपद्यत इत्युदाहरणानुरोधेन वाङ्मनोधिकरणे तन्मनः प्राण उत्तरात्
३ समधिगतमेतद्वाङ्मनसि संपद्यत इत्यत्र वृत्तिसंपत्तिर्व्यवस्थितेति अथ उत्तरवाक्ये मनः प्राण इति किमत्रापि
वृत्तिसंपत्तिरिति विचिकित्सायां वृत्तिमत्संपत्तिरेवात्रेति प्राप्ते अत्यानुग्रहात्तत्प्रकृतित्वोपपत्तेश्च तथा ह्यन्नमयं
यहि सोम्य मन आपोमयः प्राण इत्यन्नयोनिं मन आमनंत्यब्योनिं च प्राणमापश्चान्नमसृजंतेति श्रुतेः अत एव
मनः प्राणे प्रलीयते अन्ने हि मन आपश्च प्राणः प्रकृतिविकाराभेदादित्येवं प्राप्ते ब्रूमः तदप्यागृहीतवाह्ये
न्द्रियवृत्ति मनोवृत्तिद्वारेणैव प्राणे प्रलीयत इत्युत्तराद्वाक्यादवगंतव्यं तथाहि सुषुप्सोर्मुमूर्षोश्च प्राणवृत्तौ परि
स्पंदात्मिकायामवस्थितायां मनोवृत्तीनामुपशमो दृश्यते न च मनसः स्वरूपाप्ययः प्राणे संभवति अतत्प्रकृतित्वात्
ननु दर्शितं मनसः प्राणप्रकृतित्वं नैतत्सारं नहीदृशेन प्राणाडिकेन तत्प्रकृतित्वेन मनसः प्राणे संपत्तुमर्हति एवमपि

प्राणः क्वचित्तस्मिन्
विपद्येत इ.म.

पि द्रतामुच्चान्नमयत्वं प्राणभावपरिणतानामपां मनो जायत इति किंचन प्रमाणमस्ति तस्मान्न मनसः प्राणे
स्वरूपाप्ययः वृत्त्यप्ययेपि तु वृत्तिविकल्पते वृत्तिवृत्तिमतोरभेदोपचारादिति दर्शितं सोध्यक्षे तदुपगमादिभ्यः ४

विरोधाभावनिरूपणेन बोधः कवइ इत्यत्र लक्षप्राणस्यान्नात्मकमनःप्रकृतित्वेन प्रकृतौ विकारलय इति न्यायानुग्रहान्न मनः प्र
तिवाप्येति एवं पूर्वपक्षफलं पूर्ववत् श्रौतीवाध्यतेति विवेकः सिद्धांतस्तु वचनयोः प्रकृतिविकृतिभावेपि न तद्विकारयोः प्राण
मनसोर्लक्षाद्वाविहिमनद्वययोरपि तद्भावप्रसंगात्तान्यायविरोधात्स्वर्ववत्प्रतिवाध्येति विवेकः आगृहीतावाह्येन्द्रिय
वृत्तमायेन तत्र तथा लीनेन्द्रियवृत्तिकं मनोपि वृत्तिलयेनैव प्राणे लीयत इत्यर्थः एवमपीति प्राणस्याविकारत्वपक्षेपी
त्यर्थः तस्मादिति प्राणस्य साक्षान्मनःप्रकृतिकत्वाभावान्मनसः वृत्तिलक्षयतीत्यर्थः सोध्यक्षे तदुपगमादिभ्यः

राम
१२

उक्तन्यायसिद्धं प्राणस्यापि वृत्तिलयं पञ्च जीवप्राणास्तेजसीति श्रुतेरुपगमनादिश्रुत्यन्तरमाश्रित्य जीवेऽलये विनाप्युपगमनादि संभव
इति एवं पक्षयति स्थितमित्यादिना अग्नेस्तेजःशब्दस्य मुख्यत्वसिद्धौ तेन तद्भूतोपहितजीवलक्षकत्वमिति मत्वा तत्र योजय
ति सप्राकृत इत्यादिना ज्ञानकर्मवासनोपाधिक इत्यर्थः तेजोवृत्ति प्राणानामुपगमनानुगमनावस्थानमभिमुख इति हेतु
त्वर्थः यथा पामराणां वै तद्राजानं प्रत्यायन्त्युपगच्छन्ति एवमेव परलोकं गमिष्यन्तं जीवं सर्वे प्राणा अभिमुख्येन यान्तीत्युपगमः श्रुतःक्रा
मन्तमित्यनुगमनं श्रुतं जीवे प्राणावस्थानमितिमाह सविज्ञान इति जीवस्य प्राणमध्ये फलावगमाय हि विज्ञानसाहित्यमन्त्यानु

स्थितमेतद्यस्य यतोत्पत्तिस्तस्य तस्मिन्नुत्तिलयो न स्वरूपमलय इतीदानीं प्राणास्तेजसीत्यत्र चिंत्यते किं यथाश्रुति प्राणा
स्य तेजस्येवाहत्युपसंहारः किंवा देहेन्द्रियपञ्जराध्यक्षो जीव इति तत्र श्रुतेरनतिशङ्कत्वात्प्राणस्य तेजस्येवसंपत्तिस्यात् अ
श्रुतवल्पनायाश्चान्याय्यत्वादिति एवं प्राप्ते ब्रूमः सोऽध्यक्ष इति सप्राकृतः प्राणाध्यक्षो विद्याकर्मपूर्वप्रज्ञोपाधिको वि
ज्ञानात्मा तत्र तिष्ठते तत्प्रधानात्तत्तिर्भवतीत्यर्थः कुतः तदुपगमादिभ्यः एवमेवममात्मानमन्तकाले सर्वे प्राणा अभिस
मायन्ति यत्रैतदूर्ध्वोच्छासी भवतीति हि श्रुत्यन्तरमध्यक्षोपगामिनः सर्वान्प्राणान्विशेषेण दर्शयति तमुत्क्रामन्तं प्राणोऽनूत्क्रा
मतीति पञ्चवत्तेः प्राणस्याध्यक्षानुगामितां दर्शयति तदनुवृत्तितां चेतरेषां प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामती
ति सविज्ञानो भवतीति चाध्यक्षस्यान्तर्विज्ञानवत्त्वप्रदर्शनेन तस्मिन्नपीतकरणग्रामस्य प्राणस्यावस्थानं गमयति
ननु प्राणस्तेजसीति श्रूयते कथं प्राणाध्यक्षे इत्याधिकावापः क्रियते नैव दोषः अध्यक्षप्रधानत्वादुत्क्रमणादिव्य
वहारस्य श्रुत्यन्तरगतस्यापि च विशेषस्यापेक्षणीयत्वात् कथं तर्हि प्राणस्तेजसीति श्रुतिरित्यत आह भूते
षु तच्छ्रुतेः स प्राणसंपृक्तोऽध्यक्षस्तेजःसहचरितेषु भूतेषु देहबीजभूतेषु सूक्ष्मेष्ववतिष्ठत इत्यवगन्तव्यं प्रा
णस्तेजसीत्यतः श्रुतेः ननु चेयं श्रुतिः प्राणस्य तेजसि स्थितिं दर्शयति न प्राणसंपृक्तस्याध्यक्षस्य नैष दोषः
सोऽध्यक्ष इत्यध्यक्षस्याप्यन्तरालेऽउपसंख्यातत्वात्

स्य प्राणसहितकरणानां जीवे स्थितिर्भातीत्यर्थः यद्यपि प्राणस्य तेजस्यव्यवधानेन लयः श्रुतस्तथापि भूयःश्रुत्यनुग्रहा
य प्राणेन जीवे लीयते जीवद्वारा च तद्वृत्तौ पाधिषु तेजआदिभूतेष्विति श्रुत्यर्थः स्फुटीकरणं यत्तेजो महणमिति तद्येत हीति न
चलयं विनापि जीवं प्रत्युपगमनादि संभवात्तेजः श्रुतिमुख्यार्थत्वं तिवा च्य जीवप्राणस्य प्राणस्य सन्निधीपारत्वे न स्थितेरेवाऽल
यता दिति भावः भूतेषु जीवस्थितिं किं वला श्याख्यायत इत्याशंक्य सोऽध्यक्ष इति सूत्रोदाहृतश्रुतिबलादित्याह नन्विति।

सूत्र

शा.भा.
च. द्वि.
१३

प्राणस्य जीवद्वारा भूतमात्रेषु हृष्टान्तमाह योपिद्गीति स्थूलदेहारम्भाय पंचीकृतभूतान्यावश्यकानीति देहस्य विकरणत्वाख्यानाः स्तस्मान्मी
यते इतिमात्राः परिच्छिन्नाः प्राज्ञात्मादविनाशित्वाद्देशाधीनां पंचानां भूतानां सूक्ष्मभागा इति यावत् जीवस्य भूताश्रयत्वे कर्माश्रयत्वस्य
निवृत्तिरित्याशंक्य कर्मनिमित्तत्वेनाश्रयः भूतानि तदेहोपादानत्वेनेत्युभयमविरुद्धमित्याह ननु वेत्यादिना तो याज्ञवल्क्यातं भागो
यज्ञीवाधारस्य च तत्तत्कर्मेति श्रुतेर्वचनं एवं वाक्येन्द्रियाणां मनसि प्रयमात्रमिति लयफलाभावात् तो मनोवृत्तेः प्राणलयः प्राणस्य तेजोप

योपि हि तत्प्राणमेत्युपगतात् सुराः पादलिप्तं ग्रंजति तो पित्तप्रातायाट लिप्तं यातीति शक्यते वदितं तस्मात्प्राणस्तेज
सीत प्राणस्य प्रत्यक्षस्य तेजः सह चरितेत्युभ त्वात् तस्य तेजः सहचरितेत्युभतत्त्वमुच्यते यावत्तेकमेव न
तः श्रूयते प्राणस्तेजसीत्यत आह नैकस्मिन्दर्शयतो हि हि नैकस्मिन्नेव तेजसि शरीरान्तरस्य प्रसावेला याजीवा ननिष्टते
कार्यस्य शरीरस्यानेकात्मकत्वदर्शनाद्दर्शयत श्रुतमर्थं प्रतिवचने आपः पुरुषवचस इति तदाख्यात आत्मकत्वात्
यस्मादित्यक्तिस्तोत्र तेन मर्त्यं दर्शयतः स्मृतिः पृथ्वीमयः अप्मयो वायुः मय आकाशमयस्तेजोमय इत्यादि
प्राणो मा आत्रविनाशित्वाद्देशाधीनत्वात्तत्र यास्तत्राः नाभिः सार्द्धमिदं सर्वं सम्भवत्यनर्थं एव हत्वा ननु चापसद्दत्ते
वागादि पारीरान्तरप्रसावेलायां कायस्तापुरुषो भवतीत्युपक्रम्य श्रूयते तत्कर्माश्रयतो निरूपयतीत्याह ननु वचनैः कर्म
हेवतत्र वचनस्य हृदयत्वम् एवं सत्येव प्राच्यते तत्र कर्मप्रयुक्तस्य ग्रहातिग्रहसंज्ञकस्येन्द्रियविषयमात्मकस्यैव वधनस्य प्रवृत्ति
रिति कर्माश्रयतोक्ता इत्युनर्भूतोपादानादेहान्तरोत्पत्तिरिति भूताश्रयत्वमप्रणेसाशब्दाद्दपि तत्र प्राधान्यमात्रं कर्म
णः प्रदर्शितं तेन तत्त्व आप्यत्वं तवादिते तस्मादविरोधः आप्यत्वादिकरणं समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ७
मेयमुक्तेति किं विद्वदविदुषोः समाना किं वा विशेषवतीति विशयाना नां विशेषवतीति तावत्प्राप्तं भूतान्याश्रयविशिष्ट
स्यापुनर्भवाय च भूतान्याश्रयेतेन च विदुषः पुनर्भवः तस्मात् विद्वात्मत्वं हि विद्वान ब्रह्मस्मृतइति स्थितिः तस्माद्वि
दुष एवेयमुक्तेति ननु विद्याप्रकरणे समाम्नाता विदुष एवेषा भवेत्तत्स्वापादिवर्णयाप्रमाणोक्तेनेन न्यायाहियमेन
पुरुषः स्वपितिनामाशिपिपासतिनामपिपासतिनामेति चसर्वप्राणिसाधारणा एव पाकादयोत्तरन्नेक्तैस्तेविद्या प्र
करणे पिपादयिषितवस्तुप्रतिपादनानुगुण्येनानत्तविदुषो विशेषवत्तो विधित्स्यते एवमियमुत्क्रान्तिर्महाजन
गतेवान्तुकीर्त्यते यस्यां परस्यां देवतायां पुरुषस्य प्रयतस्तेजः संपद्यते सआत्मा तत्त्वमसीत्येतत्प्रतिपादयितुं प्रतिषिद्धा

हितजीवलयः इत्युत्क्रान्तिव्यवस्थोक्ता सा च सर्वप्राणि तुल्येत्याह समाना चानुपोष्य पुरुषस्य प्रयतो वाङ्मनसीत्य विशेषश्रुतेर्वि
ययास्तत्व सम्भूतइति श्रुतेः असंशयमाह सेयमिति विशयानानां सेदिहानानामित्यर्थः एवं पूर्वसत्रगणब्रह्मविदस्तं वा प्रि
त्वमुत्क्रान्तेर्विशेषः साध्यते तेनोत्क्रान्तस्य उपासकोमुक्तिमश्नुतइति फले सिद्धान्ते तत्क्रान्तो ब्रह्मलोकभागीति फलभेदः एवं

वेषां विदुषः न तस्य प्राणा उत्क्रामन्तीति तस्मादविद्वद्विषयमेवेति ॥

यदत्माक्षिप्य समाधत्ते ननु विद्येत्यादिना

राम
१३

विषयासत्त्वमिति आत्तिनिर्गुणब्रह्मविषयानन्तस्य प्राणा उत्क्रामन्तीति प्रतिषेधोपि तद्विषयः अतः सगुणविदोपजस्य चोत्क्रान्तिरिति
सिद्धान्त इति एवमिति स्मृतिमार्गस्य सोपक्रमो विंशः आसिस्ततः प्राक् नाडीद्वारोत्क्रान्तिसल्यानन्तरपासको न धर्मः नाडीद्वारादिमार्गप्रा
प्नोति नान्य इति विशेषः यत्तु दहरोपासकस्यामृतत्वं तत्तत्र यथार्थमापत्त्रस्मृतत्वमेतीति तदापेक्षिकमेव न स्वरूपं कामकामयत इत्यसो
सुसकल्पादेव समुत्तिष्ठतीति भागश्रवणादित्याह अनुपोष्य चेदमिति ऊषदाह इति धातोरिदं रूपं पर्वोदाह नोत्क्रान्तिवाक्यं
वैयं

एवं प्राप्ते ब्रूमः समाना चैषोत्क्रान्तिर्वाङ्मनसीत्याद्या विद्वदविदुषोरासृत्युपक्रमात् भवितुमर्हति अविशेषश्रवणात् अवि
द्वान् देहबीजभूतानि भूतसूक्ष्माण्याश्रित्य कर्मप्रयुक्तो देहग्रहणमनुभवितुं संसरति विद्वांस्तु ज्ञानप्रकाशितं मोक्ष
नाडीद्वारमाश्रयते तदेतदासृत्युपक्रमादित्युक्तं अमृतत्वं त्विह विदुषा प्राप्तव्यं न च तद्देशान्तरायत्तं तत्र कुतो भूताश्रय
त्वं सृत्युपक्रमो वेति तत्रोच्यते अनुपोष्य चेदं अदग्ध्वात्यन्तमविद्यादीन्क्लेशानपरविद्यासामर्थ्यादापेक्षिकममृतत्वं
प्रेप्सते संभवति तत्र सृत्युपक्रमो भूताश्रयत्वं च नहि निराश्रयाणां प्राणानां गतिरुपपद्यते तस्माददोषः तदापीतेः
संसारव्यपदेशात् ७ तेजः परस्यां देवतायामित्यत्र प्रकरणसामर्थ्यात् यथाप्रकृतं तेजः साध्यक्षं सप्राणं सकरणं
ग्रामं भूतानां सहितं प्रयतः पुंसः परस्यां देवतायां संपद्यत इत्येतदुक्तं भवति कीदृशी पुनरियं संपत्तिः स्यादिति चिं
त्यते तत्रात्यन्तिक एव तावत्स्वरूपप्रविलय इति प्राप्तं तत्प्रकृतित्वोपपत्तेः सर्वस्य हि जनिमतो वस्तुजातस्य प्रकृतिः
परा देवतेति प्रतिष्ठितं तस्मादात्यन्तिकीयमविभागापत्तिरित्येवं प्राप्ते ब्रूमः तत्तेज आदिभूतसूक्ष्मं श्रोत्रादिकरणाश्र
यभूतमापीतेः आ संसारमोक्षात् सम्यग्ज्ञाननिमित्तादवतिष्ठते योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः स्थाणुमन्येनु
संयन्ति यथाकर्म यथाश्रुतमित्यादिसंसारव्यपदेशात् अन्यथाहि सर्वः प्रायणसमय एवोपाधिप्रत्यस्तमयादत्यन्तं ब्रह्म संप
द्येत तत्र विधिशास्त्रमनर्थकं स्यात् विद्याशास्त्रं च मिथ्याज्ञाननिमित्तश्च बन्धो न सम्यग्ज्ञानादृते विस्रंसितुमर्हतीति तस्मा
त्प्रकृतित्वेपि सर्वभूतप्रलयवत् बीजभावावशेष एवासौ संपत्तिरिति ॥ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ८ तच्चेतरभूत
सहितं तेजो जीवस्यास्माच्छरीरात्प्रवसत आश्रयभूतं स्वरूपतः परिमाणतश्च सूक्ष्मं भवितुमर्हतीति तथाहि नाडी
निः क्रमणश्रवणादिभ्योऽस्य सौक्ष्म्यमुपलभ्यते तत्र तनुत्वात्संचारोपपत्तिः स्वच्छत्वाच्चाप्रतीघातोपपत्तिः अत एव च देहान्निर्ग ॥

यो व्याख्यातस्तस्य लिङ्गाश्रयत्वं च भूतानां किमात्यन्तिकोऽयं प्रलय उतानात्यन्तिक इति लयस्योभयथा दर्शनात् संशयमाह कीदृशी
पुनरियमिति एवं प्रापेक्षिकममृतत्वमित्युक्तं तदयुक्तमित्याक्षेपात् संगतिः एवं पक्षे सतत्र ब्रह्मसिद्धिः सिद्धान्ते कर्मविद्याशा
स्त्रबलात्सावशेषलयसिद्धिरिति विवेकः ननु लिङ्गात्मकस्य तेजसः कथं सूक्ष्मत्वं न नाडीद्वारा गतिः अतो लोकेन चिन्मन्न प्रतिघातो

लिंगसद्भावेचोस्यलिंगकानुमानमाह अस्यैवचेति प्रतिषेधादितिचेन्न शारीरात् एवमनुपोष्यतिपदेतद्यथाशेषल्केणस्यनिर्ड
णज्ञानिनउत्क्रान्त्याद्यभावःस्वविनस्यात्प्रतिपत्तमाधानाद्यवहितेनास्यसंगतिरित्याह अस्यत्वेचेति सकामस्यसंसारोक्तेन
तरंनिष्कामस्यतदक्तिप्रकरणाद्यायशब्दःआत्मकामत्वादातकामःआप्तपरमानंदअतोनिष्कामःअनभिव्यक्तोतरवासना
लकुकामस्यत्यक्तत्वादकामःयत्रवहिष्कामरहितइहशोयोकामयमानस्तस्यत्यन्वयःज्ञानिनउत्क्रांतिरस्तिनवेतिपंचमी
षष्ठीश्रुतिभ्यांसंदेहसिद्धांतिशंकानिरासपूर्वपक्षयति नेत्यादिना काएवअतोनावतस्यसितस्वनास्वप्रक्षेतज्ञानिनपरा

अस्यैवचोपपत्तेरेषऊष्मा ११ अस्यैवस्वस्यशारीरस्यैषऊष्मायतेतस्मिञ्छरीरेसंस्पर्शेनोष्मिमानेविज्ञानेति तथाहिमृतावस्थाया
मवस्थितेपिदेहेविद्यमानेष्वपिचरूपादिषुदेहगुणेषुनोष्मोपलभ्यतेजीवदवस्थायांतूपलभ्यतइत्यतउपपद्यतेप्रसिद्धशरीर
व्यतिरिक्तशारीरव्यपाश्रयएवैषऊष्मेतितथाचश्रुतिरूष्मपवजीविष्यन्शीतोमरिष्यन्निति तस्माराधिकरणे प्रतिषेधादि
तिचेन्नशारीरात् १२ अस्यत्वेवानुपोष्यत्यतोविशेषणादात्मनिकस्त्वेतत्वगत्युत्क्रान्त्योरभावोस्युपगतःतत्रापिकेनचित्का
रणेनोत्क्रांतिमाशंक्यप्रतिषेधतिअथाकामयमानोयोकामोनिष्काम आप्तकाम आत्मकामोभवति नतस्यप्राणाउ
त्क्रामंतिब्रह्मैवसन्ब्रह्माप्येतितःपरविद्याविषयात्प्रतिषेधाच्चपरब्रह्मविदोदेहात्प्राणानामुत्क्रांतिरस्तीतिचेन्न नेत्यु
च्यतेयतःशारीरादात्मनःएषउत्क्रांतिप्रतिषेधःप्राणानानपशारीरात्कथमवगम्यतेनतस्मात्प्राणाउत्क्रामंतीतिशास्त्रा
न्तरीपंचमीप्रयोगात्संबंधविशेषप्रापकस्याप्यतेतस्मादितिचप्राधान्यादभ्युदयमनेःश्रेयसाधिकृतोदेहीवध्यतेनदेहःनत
स्माद्विवक्षितोजीवात्प्राणाउत्क्रामंतिसहैवतेनसंभवतीत्यर्थःसप्राणस्तचप्रवसतोभवतिउत्क्रांतिदेहादितिसैवप्रा
प्नेप्रत्युच्यतेस्पष्टोह्येकेषां १३ नैतदस्तियदुक्तंपरब्रह्मविदोपिदेहादस्त्युत्क्रांतिप्रतिषेधस्यदेहपादानत्वादितियतोदेहा
पादानएवोत्क्रांतिप्रतिषेधएकेषांसमाम्नातृणांस्पष्टउपलभ्यतेतथाहि आर्तभागप्रश्नेयत्रायंपुरुषोम्रियतेउदस्मात्
प्राणाउत्क्रामंत्याहोनेतीत्यत्रनेतिहोवाचयाज्ञवल्क्यइत्यनुत्क्रांतिपक्षंपरिगृह्यनतर्हिअयमनुत्क्रांतेषुप्राणेषुम्रियतइत्यस्यामा
शंकायामत्रैवसमवनीयंतेइतिप्रविलयंप्राणानांप्रतिज्ञायतस्मिद्ध्येसउच्छ्वयत्याध्मायत्याध्मातोमृतःशेतइतिसशब्दपरा
मृष्टस्यप्रकृतस्योत्क्रान्त्यवधेरुच्छ्वयनादीनितसमामतेतिदेहस्यचैतानिस्युर्देहिनःतस्मात्प्रत्यक्तस्मात्प्राणाउत्क्रामंतिअत्रे
वसमवनीयंतइतिचामभेदोपचारेणदेहापादानस्यैवोत्क्रमणस्यप्रतिषेधोयद्यपिप्राधान्याद्देहिनइतिव्याख्येयपंचमी
स्पष्टस्तेवंधसामान्यनुकूलंतन्नमाध्यंदिनशाखायांतस्मादित्यपादानत्वरूपविशेषउक्तोप्रासस्यचजीवात्प्राणोत्क्रांतिप्रतिषेधोभाति
नदेहान्तच्छेदेनदेहस्यानुकूलस्याज्ञानिनोप्युत्क्रांतिरस्तीतिविज्ञानवेद्यमिति पूर्वपक्षफलसिद्धांतेतस्मादित्यकामाद सस्पष्टोही
ति अत्रपुरुषशब्दवाचादेहएवास्मादित्यत्रान्त्यवधिरुच्यतेसशब्दपरामृष्टस्यप्रकृतस्यपुरुषस्योच्छ्वयनादिधर्मकस्यजीवत्वायोगादि
त्यर्थःउच्छ्वयतिवासवायुपूरणाद्वर्धतेआध्मायतिआर्द्रभेरीवच्छब्दंकरोतीत्यर्थःएषापंचमीपाठस्तथायद्यपिदेहिनःप्रधानत्वात्यि

इदानीं क्रमप्राप्तमुदाहरणमाह येषांतु षष्ठीपाठ इति संबंधविशेषाकांक्षायां भोक्तृप्राणानां भोगोपकरणत्वविशेषो वोत्रैव प्राण
मयो मनोमय इति एवं अस्मात्क्षेत्रज्ञाः न शारवान्तस्य मध्यन्दिनत्व प्राज्ञजीवात्क्रांतरप्राप्ताः प्रतिषेधा योगादतो विद्वत्संबंधि प्रा
णानामुत्क्रांत्यपादानत्वायां चतुष्टोवा मूर्ध्नो वेत्युक्तदेहप्रदेशा एव प्राज्ञाः न पाचाय मर्थः तस्य विदुषो भोगोपकरणात्मकाः प्रा
णा देहप्रदेशाभ्यो नोत्क्रामंतीति एवं च प्राणोत्क्रांतिनिषेधार्थत्वं वाक्यस्येति चेत्तत्र अपि चेति स्पष्टं तस्यगात्मभावेनभूतापरप

येषांतु षष्ठीपाठस्तेषां विद्वत्संबंधित्युत्क्रांतिनिषिध्यत इति प्राणोत्क्रांतिप्रतिषेधार्थत्वादस्य वाक्यस्य देहापादानत्वं साम
र्थ्यसिद्धं भवति देहादुत्क्रांतिः प्राप्तानदेहिनः अपि च चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामंतं प्राणोनु
त्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीत्येवमविद्वद्विषये सप्रपंचमुत्क्रमणं संसारगमनं च दर्शयित्वा इति
नु कामयमान इत्युपसंहृत्याविद्वत्कथाकामयमान इति व्यपदिश्य विद्वांसं यदि तद्विषयेप्युत्क्रांतिमेव प्रापयेदसम
जस एव व्यपदेशः स्यात् तस्माद्विद्वद्विषये प्राप्तयोगत्युत्क्रांत्योर्विद्वद्विषये प्रतिषेध इत्येवमेव व्याख्येयं व्यपदेशा
र्थवत्त्वाय न च ब्रह्मविदः सर्वगतब्रह्मात्मभूतस्य प्रक्षीणकामकर्मण उत्क्रांतिर्गतिर्वा उपपद्यते निमित्ताभावात् अ
त्र ब्रह्म समश्नुत इति चैवंजातीयकाः श्रुतयो गत्युत्क्रांत्योरभावं सूचयंति स्पष्टो ह्येकेषां १४ स्पष्टो ह्येकेषामुत्क्रा
त्यभावः सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः देवा अपि मार्गे मुह्यंत्यपदस्य पदैषिण इति ननु गतिरपि ब्रह्मविदः
सर्वगतब्रह्मात्मभूतस्य स्मर्यते शुकः किल वैयासकिर्मुमुक्षुरादित्यमंडलमभिप्रतस्थे पित्रा चानुगम्याहूतो भो
इति प्रतिशुश्रावेति न शरीरस्यैवायं योगबलेन विशिष्टदेशप्राप्तिपूर्वकः शरीरोत्सर्ग इति द्रष्टव्यं सर्वभूतदृश्यत्वा
द्युपन्यासात् न ह्यशरीरं गच्छंतं सर्वभूतानि द्रष्टुं शक्नुयुः तथा च तत्रैवोपसंहृतं शुकस्तु मारुताच्छीघ्रां गतिं कृत्वांतरि
क्षगः दर्शयित्वा प्रभावं स्वं सर्वभूतगतोभवदिति तस्मादभावः परब्रह्मविदो गत्युत्क्रांत्योः गतिश्रुतीनां विषयमुपरि
ष्टाद्व्याख्यास्यामः गत्युत्क्रांतिप्रतिषेधाधिकरणं

ननु अपदस्य प्राप्यपदरहितस्य पदैषिणो देवा अपि मार्गे मुह्यंतीति मार्गे नजानंतीति तदभावादित्यस्मिति योजनास्य तंतरविरोध
प्रोक्तेन ननु गतिरपीति तत्रगणविशेषावलंबेन या गतिं परिहरति न शरीरस्यैतेत्यनेन तन्न हि नयोर्धमापन्नमनस्त्वमेति सएवे
नान्त ब्रह्मगमयतीत्यादि श्रुतीनां का गतिस्तत्राह गतीति ॥ ॥ ॥

तानि परे तथा ह्याह सर्वत्र गतिनिषेधेन विदुषः कलानां प्राणादीनामत्रैव लय उक्तः तत्रोपजीव्यसत्किं जन्यकालात्मप्रकृतिषु पृथिव्यादिषु स्वाऽ
न्यपरमात्मनीति श्रुतिद्वयदर्शनात्संशयः कार्यः तत्र साक्षात्प्रकृतौ विकारलयस्य न्यायानुगृहीततया गताः कला इति श्रुत्या एवं प्राप्तमव
दन्नाहो सिद्धान्तमाह तानीति यथायथः समस्तं प्राप्य प्रलीयन्ते एवमस्य परिद्रष्टुः सर्वत्र ब्रह्मसुत इमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्य कलि
दन्नादो सिद्धान्तमाह तानीति यथायथः प्राणादीनि द्वितीयावक्तुर्वचनस्य स्वरूपतः पृथिव्या
ताः पुरुषमेव जीवे प्राप्य लयं गच्छन्तीत्यर्थः मनः प्राणादिकारणानि पञ्चदशात्मप्रतिष्ठा इति द्वितीयावक्तुर्वचनस्य प्रकृतिषु विलीयन्ता
यामित्यर्थः वस्तुगत्या विद्वद्दृष्ट्या परमात्मनि कलाप्रलयोऽपि लोकदृष्ट्या प्रतिष्ठास्थलयोक्तिरविरुद्धा तयाच कलानां प्रकृतिषु विलीयन्ता
यामित्यर्थः वस्तुगत्या विद्वद्दृष्ट्या परमात्मनि कलालयेऽपि लोकदृष्ट्या प्रतिष्ठास्थलयोक्तिरविरुद्धा अविभागो वचनात् उक्तलयमपजीव्य लयस्य द्वैधादर्शनात्संशयमाह सपुनरिति स
मिः सह पुरुषे लीयन्त इति श्रुतिद्वयतात्पर्यः अविभागो वचनात्

तानि परे तथा ह्याह १५ तानि पुनः प्राणशब्दोदितानीन्द्रियाणि भूतानि च परब्रह्मविदस्तस्मिन्नेव परस्मिन्नात्मनि प्रलीयन्ते कस्मात्
तथा ह्याह श्रुतिः एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्तीति तन्मात्राः पञ्चदश प्राणेन्द्रियाणि इति
विद्वद्विषये चापरा श्रुतिः परस्मिन्नात्मनोऽन्यत्रापि कलानां प्रलयमाह न सा खलु व्यवहारापेक्षया पार्थिवाद्याः कलाः पृथिव्यादीरेव स
विद्वद्विषये चापरा श्रुतिः परेत्पत्ति पाक्षतस्थकलाजातं परब्रह्मविदो ब्रह्मैव तेषु प्रयन्ति इति तस्माद्दोषः परेण पार्थिवक
मक्तेर्विषये नीतिं नीतावत विद्वन्मतिपत्स्ये पात्रक्रान्तकलाजातं परब्रह्मविदो ब्रह्मैव संपद्यत इति तस्माददोषः परेत्पथिकार
मकृतौ विषयनीतिनीतरान्विद्वन्मतिपत्स्येत्तयाक्रान्तकलाजातपरब्रह्मविदो ब्रह्मैव संपद्यत इति तत्र प्रलय
तो अविभागो वचनात् १६ स पुनर्विदुषः कलाप्रलयः किमितरेषामिव सावशेषो भवति आहोस्विन्निरवशेष इति तत्र प्रलय
सामान्याच्छक्त्यवशेषतापसक्तौ ब्रवीत्यविभागापत्तिरेवेति कुतः वचनात् पाद्विकलाप्रलयमुक्त्वाऽक्रमिषेत्वासां नामरू
पे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवतीत्यविद्यानिमित्तानां च कलानां न विद्यानिमित्तप्रलये सावशेषतोपपत्तिस्तस्मात्
विभागापत्तिरेवेति तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया १७
तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया
विभागापत्तिरेवेति तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् अहर्विद्व
समाप्तः प्रसङ्गिकी परविद्यागताविचारः संप्रतीत्य परविद्याविषयामेव चिन्तामनुवर्तयति समानाचासृत्युपक्रमादित्युक्तं विद्वद
स्वतोऽन्तिविनिश्चय कृतमिदानीं मृत्युपक्रमं दर्शयति तस्यापसंहृतेन वागादिकलायस्योच्चिक्रमिषतो विज्ञानात्मनः अोकः आ
यतनं हृदयं सम्पत्तालजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीति श्रुतेः तदग्रप्रज्वलनपूर्विका चक्षुरादिस्थाना
पादानाचोत्क्रान्तिः श्रूयते तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निःक्रामति चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीर
देशेभ्य इति सा किमनियमेन विद्वदविदुषोर्भवति अथास्ति कश्चिद्विदुषो विशेषनियम इति विचिकित्सायां श्रुत्यविशेषाद
नियमेन प्राप्ते ब्रवीमि अस्तु समानमापद्यतेऽपि परश्च विदुषोऽपि हृदयाग्रप्रद्योतनं तत्प्रद्योतितद्वारत्वं च तथापि
नियमेन भवितुमर्हति किं तु सुषुम्ना तत्र मूर्धस्थानमेव तदुक्तम् ...
कलिसिद्धिः सत्तात्सिद्धिः श्रूयते समभयत्रफलम्भवशेषोऽमलङ्कारणे शकात्मनास्थितिः पुनर्जन्मयोगेऽपि यावत्कलालयः सावशेषः कलालय
स्त्वात्तद्भूमिवदिति पूर्वपक्षः विमतो निरवशेषः विद्याकृतत्वाद्रज्ज्वां विद्यया सर्पलयवदिति पुरुषं प्राप्यास्तं गच्छन्तीति ब्रवीतीति नाम
रूपे प्रकाशात्मके विभिद्येते इत्यर्थः तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्याच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया विष
यमाहृत्य सम्यग्ज्ञानिलेजोमात्राश्चेन्द्रियाणि तस्य हृदयस्याग्रनाड्यां स्व नस्य ज्वलनं भाविफलस्फुरणं प्रद्योतो द्योतनं ... भवति नियमस्त्व

पादानां पादांते
वाद्या ...
सर्वा पाठविषये ... विद्याविषयकालविनियोगकालत्रयं योगस्य ... नियमेन

विद्याविषयैकविधित्वाद्धार्दानुगृहीतः शताधिकया ... सहस्रैकस्य ...

नियमानुपपत्तिः
यम
१५

वचनादविभागवदनियम इति प्राप्ते सिद्धांतयति आचष्ट इति येन केन चिन्मार्गेण निर्गतस्यापि ब्रह्मलोकप्राप्तौ विद्याशेषत्वेन मार्गो
नस्स्यादिति विधिः केवलाहदयार्थत्वस्यादतोन्वयः स्यात्तेनैव मार्गेण गमनं युक्तमिति भावः हार्दब्रह्मविषड नानाविधा अन्या नाड्यो नेषामिः
त्यर्थः सुषुम्नाख्या नाडी हृदयान्निर्गतादत्तिणतालुकंठांतनासिकामध्यमित्यहारायसहस्रं प्राप्तोसत्यैरश्मिभिरेकीकृता ब्रह्मलोकमा
गडपसकस्ते तिस्यते रश्म्यनुसारी सकारणशोधनपूर्वकमपातकस्य रश्म्यनुसारित्वविषयमाह आत्तोमादिना अथ प्रारब्धांतेपूर्व

आचष्टे समाने पि विद्वदविदुषोर्हृदयाग्रप्रद्योतनेन तत्प्रकाशितद्वारत्वे च मूर्धस्थानादेव विद्वान्निःक्रामति स्थानांतरेभ्यस्त्वित
रे कुतः विद्यासामर्थ्यात् यदि विद्वानपीतरवद्यतः कुतश्चिदेदेशादुत्क्रामेत्तर्हि उत्तमलोकं लभेत तत्र अर्थिकैव विद्यास्या
त तत्र के ष गत्यनुस्मृतियोगाच्च विद्याशेषभूतत्वाच्च मूर्धन्यनाडीसंबद्धागतिरनुशीलयितव्या विद्याविशेषयुक्तिहीनाया तः
सैलतैयवप्रतिष्ठन इति युक्तं तस्माद्धृदयालयेन ब्रह्मणस्सुपासितेनानुगृहीतस्तद्भावसमापन्नो विद्वान्मूर्धन्यैव शतादि
कयाहृतिरिक्तयैक्यशतनमा नाड्या निःक्रामति इतराभिरितरेत याहि हार्दविद्याप्रक्रमस्तत्समामनति शतं चैका च हृदयस्य नाड्या
स्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंतीति विद्यासामर्थ्याधिकरणं रश्म्यनु
सारी १७ अस्ति हार्दविद्याश्रयं यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्मेत्युपक्रम्य विहितानन्तरं किं प्रायामुच्यते एतस्य हृ
दयस्य नाड्य इत्युपक्रम्य सप्रपंचं नाडीरश्मिसंबंधमुक्त्वोक्तं अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमा
क्रमत इति पुनरुक्तं तयोर्ध्वमायन्नमृतत्वमेतीति तस्माच्छतादिकया नाड्या निःक्रामन् रश्मिरनुसारी निःक्रामतीति गम्य
ते तत्किमविशेषेणैवाहर्निशं प्रियमाणस्य रश्म्यनुसारित्वमाहोस्विदहन्येवेति संशयस्तत्र अविशेषश्रवणादविशेषेणैवता
वद्रश्म्यनुसारीति प्रतिज्ञायते निशि नेति चेन्न संबंधस्य यावद्देहभावित्वाद्दर्शयति च १८ अस्ति अहनि नाडीरश्मिसंबंध इ
त्यहनि मृतस्य स्याद्रश्म्यनुसारित्वं रात्रौ प्रेतस्य तस्या नाडीरश्मिसंबंधविच्छेदादिति चेन्न नाडीरश्मिसंबंधस्य यावद्देहभा
वित्वाद्यावद्देहभावो हि शिराकिरणसंपर्कः दर्शयति चैतमर्थं श्रुतिः अमुष्मादादित्यात्प्रतायंते ता आसु नाडीषु सृप्ता
आभ्यो नाडीभ्यः प्रतायंते तेमुष्मिन्नादित्ये सृप्ता इति निदाघसमये च निशास्वपि करणानुवृत्तिरुपलभ्यते प्रतापादिकार्यद

उत्क्रमणाय यास्यादयतप्यापतैरेव नाडीसंबद्धैरश्मिभिरुत्क्रामतीत्यर्थः अत्र संबंधस्य कालविशेषाश्रवणादौरश्म्याभावाच्च सं
शयमाहः तत्किमिति पर्वांनाडीसंबद्धरश्मीनाम त्रोपजीव्यत्वात्सगतिः पूर्वपक्षे रात्रौ मृतस्य रश्मिप्राप्त्यर्थं सूर्योदयप्रतीक्षास्ति
सिद्धांते नास्तीति मत्वा सिद्धांतं प्रतिजानीते अविशेषेणेति पूर्वपक्षबीजमुपन्यस्य दूषयति निशीत्यादिना शिरा नाड्यः
प्रतायंते विस्तृता भवंति सृप्ताः संबद्धाः कृतसंबंधस्य रात्रौ सत्त्वे युक्तिमाह निदाघेति ॥ रामायनमः

भा॰ ब्र॰
१६

नहि देहं वर्त्तमाने रात्रिदोषोऽस्योपलब्धिः स्यादित्यत आह लोकेति सविता रश्म्युपहर्दधातीति धारणाभिधाने लोकरश्म्यनुवृत्त्यभिप्रायमेवास्य
र्थः किं च दिवा मीम्स्तस्य रश्मियोगे वितेवाधमतिः स्यातदा रश्मिस्फ नेर्दिवा म्लेनविषयनयामकौ चः स्याद्बधे गत्यभावे च विद्यायामप्रव
त्तिः स्यात्त्व च प्रतीत्यर्थं गितिरिति वाच्यं यस्मादयासाग्देहदाहेमतीत्ता वेद्यव्याघातादप्रतीत्ताश्रुतिविरोधाच्च नत्स्मा यदा कदा
चित्स्तत्स्य रश्मिप्राप्त्यात्मकं टेत्तु लोकप्राप्तिरितिसिद्धं एवं दक्षिणायने मृतो विद्वान्विद्याफलं प्राप्नोति नवेति विद्याया नित्यवत्फ
लत्वात्कृतराजयणप्रासाद्यं पीत्वाच्च सदेहं परवोक्तेर्हेतत्वेनातिदिशति अतश्चायनेऽपि दक्षिणे सर्वपक्षमाणं प्रवेप वन्माणश्याफल
इति उत्तरायणेत्यादिना अज्ञानानन्तरायमेदेवाम्मरणचैतत्प्रशस्तमित्यभिज्ञाभिवदनं तु पाचारपरिपालनार्थं भीष्मस्य प्रतीक्षायान्तस्मा ।

लोकानुवृत्ते स्तर्दुर्लभत्वं म्रत्वं नरजनी पुष्पोशिरेष्विवर्दुर्दिने चहरे चैतद्वाप्रविदधातीतिचैतदेवदर्शयति यदि चराम्रामे तो विनैव रश्म
नसारेणार्धं आक्रमेतरश्म्यनन्तरानर्थकं भवेन्न दर्शितद्विशाच्या भिधीयते योग्या मेतिसरश्मीन्यप्रत्यर्थं अक्रमतेयल्लरात्रो सोनयेत्पै
वेतिश्रयत्नविद्वानपि रात्रिपरायणापरार्धमात्रेणार्थं आक्रमितपाक्षिकफलाविपत्यप्रवृत्तिरेव न स्यात्स्यान्स्तम्य कलानियमाद्या
पितावृप्रस्तो हरागमनदीसे न अहरागमेऽप्यस्य कदाचिद्रश्मिसंबंधाद्दशरीरे स्यात्तावत्कादि सपक्षान्तयावद्दिप्युन्मनस्तावदादि
त्यं गच्छतीति च श्रुतिरन्दरीत्तांदर्शयतितस्मान्नदविशेषेण वेदरात्रिंदिवं रश्म्यनुसारित्वे रश्मिपरिकरणा अतश्चायनेऽपि दक्षिणे २०
अत एव चोदितत्त्वानुपपत्तेरपाक्षिकफलत्वाच्च विद्याया अनियतकालत्वाच्च मृत्योर्दक्षिणायनेऽपि म्रियमाणो विद्वान्प्राप्नोत्येव विद्या
फलं उत्तरायणमरणप्राशस्त्यप्रसिद्धेर्भीष्मस्य प्रतीक्षादर्शनादावर्यमाणपक्षायायान्षड्दे उत्तिमासाणस्त्यातिति च श्रुतेरपेक्षितव्यमुत्तराय
णमितीमामाशंकामनेन सूत्रेणापनुदति वाहिकात्त्वल्लिंगादिति ननु च यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः प्रयाता यान्ति तं काल
वक्ष्यामि भरतर्षभेति कालप्रधानेत्युपक्रम्याहरादिकालविशेषः स्मृतावनावृत्तये नियमतः कृपवराचोदक्षिणायने च प्रयाणेनावृत्तिर्या
याहिदिति स्म चोच्यते योगिनः प्रति च स्मर्यते स्मार्ते चैते २१ योगिनः प्रति चायमहरादिकालविनियोगोऽनावृत्तये स्मर्यते स्मार्ते चैते योगसां
ख्ये न श्रौते अतो विषयभेदात्प्रमाणविशेषाच्च नास्य स्मार्तस्य कालविनियोगस्य श्रौतेषु विज्ञानेष्ववतारः ननु अग्निर्ज्योतिरहः शुक्लः षण्मा
सा उत्तरायणं धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनमिति च श्रौतावेतौ देवयानपितृयाणौ प्रत्यभिज्ञायेते स्मृतावपि कालप्रजानाद्विरो
धः स्मार्तस्य परिहार उक्तः यदा पुनः स्मृतावप्यग्न्याद्या देवताएवातिवाहिका गृह्यन्ते तदा न कश्चिद्विरोध इति इति श्रीशंकरभगवत्पादकृतौ

सा नीतिनिश्रुतिस्तत्रायणादेवतापरेतिवक्ष्यते तथा च देवतायाः सदा सत्त्वाद्विद्यायाद्दक्षिणायनकालेऽपि तत्प्राप्तिरविरुद्धेति भावः स्मृतिव ।
लात्कापि नेत्याशिरलप्राधान्यशंकेत ननु चेति श्रौतदहराद्युपासकस्यास्मातिः कालानपेक्षो कास्मार्तयोगिनां तु कालापेक्षा स्मृतावुच्यत इ
त्यविरोधमाह योगिन इति योगी दहराद्युपासक एव स्मृत्युक्तेः किं न स्यादित्यत आह स्मार्ते चेति भगवदाराधनबुद्ध्यानुष्ठितं कर्म योगः
अनाश्रितः कर्मफलं कार्यं कर्म करोति यः स संन्यासी च योगी चेति स्मृतेः धारणा एवं कोऽकर्तृत्वानुभवः सांख्यं इंद्रियाणींद्रियार्थेषु वर्त्तंत इ
ति धारयन्निति स्मृतेः ननु स्मार्तस्मृत्यो भिन्नार्थत्वमयुक्तं प्रत्यभिज्ञाविरोधादिति शंकते नन्वग्निरिति कालाग्रहणप्रत्यभिज्ञायां चेत्स्वमतेऽप
दितु श्रौतार्थे प्रत्यभिज्ञयाकालशब्दाद्देवतापरत्वं टीकायामेवातिसमाधेयं स्याद्विद्यासामर्थ्यात्सर्वदेवदिह्मगतमस्मद्पासकफलप्राप्तिरितिसिद्धं

राम
१६

ॐ श्रीगणेशाय नमः॥ एवमुत्क्रान्तिं निरूप्य तत्साध्यं मार्गं गन्तव्यं च निरूपयितुं पादमारभते अर्चिरादिना तत्प्रथितेः॥ तत्तान्त्
वादरूपं वैकल्पिकं च ज्ञानाधिकरणस्य विषयं मार्गमाह आस्तीति विरजा विरजसः निष्पापा इत्यर्थः श्रुतिविप्रतिपत्त्या संशयः
सर्वे यदा कदाचिदस्तु तस्यापि फलप्राप्तिरुक्तान द्वयेन केनचित् मार्गेण गन्तव्यमिति पूर्वपक्षफलविकल्पः सिद्धान्ते मार्गैक्य
मिति विवेकः उपासनाभेदात् छेदप्यन्वेन ध्येयानां मार्गाणां भेदः एवकाराच्च किंच मार्गभेदे सत्यस्मादयं मार्गस्त्वरया प्रापक

अर्चिरादिना तत्प्रथितेः॥ १॥ आरहस्य पक्षमात्तमानोत्क्रान्तिरित्युक्तं सति तस्मात्तंत्रनैकविधाश्रयेते नाडीरश्मिसं
वर्धनेन काश्रयन्ते रेवरश्मिभिरूर्ध्वमाक्रमत इति अर्चिरादिकेकान्तर्चिरभिसंभवत्यर्चिषोहरिति सय एतदेव यानप
थानमापद्याग्निलोकमागच्छतीत्यन्या यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छतीत्यपरा सूर्यद्वारेण ते विरजाः प्रया
न्तीति चपरा तत्र संशयः किं परस्परभिन्ना एताः सृतयः किंचैकैवानेकविशेषणेति तत्र प्राप्तं तावद्भिन्ना एवैताः सृतय
इति भिन्नप्रकरणत्वात् भिन्नोपासनशेषत्वाच्चापि चार्थे तेरेव रश्मिभिरेत्येवधारणमर्चिरादिपक्षं तामुपरुध्यते तत्त्वात्
वनेचपीअन्तस्या वृत्तिर्येन्नतत्सावदादित्यं गच्छतीति न समस्तत्यान्यभिन्नापवेतेष्यान इति एवं प्राप्ते सिद्धान्तः अर्चि
रादिनेति सर्वोऽपि ब्रह्मप्रेप्सुरर्चिरादिनैवाध्वना रंहतीति प्रतिजानीमहे कुतः तत्प्रथितेः प्रथितो ह्येष मार्गः सर्वेषां विदुषां
तथा हि पञ्चाग्निविद्याप्रकरणे ये चामी अरण्ये श्रद्धा सत्यमुपासत इति विद्यान्तरशीलिनामर्चिरादिका सृतिः श्राव्यते
स्यादेतद्यासनका विहिता कैव तेनाऽस्ति युक्तमर्चिरादिकोपतिष्ठते यास्तत्त्वया आव्यते तास्तु किमित्यर्चिरादिप्राप्तये आणिभि
तत्त्रोच्यते भवेदेतदेवं यद्यन्यतमा भिन्ना एवैताः सृतयः स्युः एकैव त्वेषा सृतिरनेकविशेषणा ब्रह्मलोकप्रतिपादनी क
चित्केनचिद्विशेषणेनोपलक्षितेति वदामः सर्वेषु एकदेशप्रत्यभिज्ञानादितरेतरविशेषणविशेष्यभावोपपत्तेः प्रक
रणभेदेऽपि हि विद्यैकत्वे भवत्येकत्रेतरत्र विशेषणोपसंहारवदेतदपि विशेषणानामुपसंहारः विद्याभेदेऽपि गन्तव्याभे
दात् प्रत्यभिज्ञानाद्वर्त्मनाभेदाच्च गतिभेद एव तथा हि ते एषु ब्रह्मलोकेषु पराः परावतो वसन्ति तस्मिन्वसन्ति शाश्वती
समाः या ब्रह्मणो जितिर्या व्युष्टिस्तां जितिं जयति तां व्युष्टिं व्यश्नुते तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्तीति च तत्र
इत्युक्तं न मार्गैक्यमित्यर्थः उपासनाभेदेऽप्युपास्यब्रह्मैक्यवन्मार्गैक्यमविरुद्धमिति सिद्धान्त इति एवमिति तस्य मार्गस्य प्रसिद्धत्वा
दिति हेत्वर्थः ये चेत्यविशेषश्रुतिरश्रुतगतीनि विद्याविषयेति मार्गभेदपक्षे ते स्यादित्यादिति एकस्यैव मार्गस्यानेकान्यस्मादीनि विशेष
णानीत्युक्ते ताचवात्त्रमार्गभेदः प्रतिभिज्ञानादेति समासार्थः [illegible] विशेषणानि तथा हीति पावनादीनां पुत्रो हिरण्यगर्भस्य परादीर्घाः समाः

तदैवैकं फलं ब्रह्मलोकप्राप्तिलक्षणं प्रदृश्यते॥

संयत्सतान्वसन्तीति कार्यब्रह्मणो याजितिः सर्वत्र जयः व्युष्टिर्व्याप्तिः तोलयं तदुत्वर्थः

एवं गंतव्यैकत्ववत्तत्प्रभिज्ञायां मार्गैक्यमिति स्मृयात्प्रकरणभेदोऽप्रयोजक इत्युक्तं संप्रत्येवकारत्वरावचनयोर्गतिमाह यन्नित्यादिना रात्र्याश्च
रश्म्यभावाद्दिवैवोरश्म्ययोगश्चोत्तत्रिरात्रार्थमेवकारेणानन्याश्रितत्यर्थः यथालौकिकमार्गविलंबसत्त्वार्चिरादौ नेति त्वरावचनो
पपत्तिरित्यर्थः मार्गैक्ये लिंगमाह अपि चेति स्मृत्यभमार्गवाक्यस्त्येतत्त्वनीयस्यावोक्तिनसादितिभावः उत्तरमार्गैक्यमपि चिरादिनेति विशेष
यत्वेतेदेवत्वव्यवधारणमर्चिरादिपाश्रयणेनसादितिनेषदोषः रश्मिमात्रिपरत्वादस्तनत्वेक एव शब्दो रश्मीस्त्रायस्मिन्महै
त्वर्चिरादौ स्वस्मावैते तत्सादृश्यमित्येवमेव प्रत्यायमवधार्यत इति द्रष्टव्यं त्वरावचनं त्वर्चिराद्यपेक्षया यापि गत्यानरापेक्षयाति
प्राप्यत्वात्त्रोपपद्यते यथानिमिषमात्रेणात्रागम्यत इति अपि चाग्रे तयोः पथोर्नकत्तरेणचनेतिमार्गद्वयमेत्युक्तानाकृ
केणैत्तनीयस्थानमाचक्षाणः पितृयानव्यतिरिक्तमेकमेव देवयानमर्चिरादिपर्वाणं पंथानं प्रत्ययति भूयांस इर्चिरादि
क्तोमार्गपर्वाणपल्पीयासितव्यत्रभूयसांचान्तरणेनाल्पीयसांनयनं त्वायामित्यतोप्पर्चिरादिनान्तस्याधितिरित्युक्ते
अर्चिराद्यधिकरणं वायुमब्दादविशेषविशेषाभ्याम् ३ केनपुनः सन्निवेषाविशेषेणगतिविशेषणेनामितरविशेषणविपो
व्यभावइतिनदेवेतत्सहृदयत्वाचार्योग्रथयति स एतं देवयानं पंथानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स
इंद्रलोकं स प्रजापतिलोकं स ब्रह्मलोकमिति कौषीतकिनादेवयानः पंथा पठ्यते तत्रार्चिरग्निलोकशब्दौ नादेकार्थी ज्व
लनवचनत्वादितिनात्रसन्निवेशक्रमः कश्चिदन्वेष्यः वायुस्त्वर्चिरादौ वर्त्मनि निश्रूतः कतमस्मिन्स्थाने सन्निवेशयित
व्यः तद्द्योतनेऽर्चिरादिमेवामित्सम्भवत्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षड्दङ्ङेति मासांस्तान्मासेभ्यः सं
वत्सरं संवत्सरादादित्यमित्यत्र संवत्सरात्परमादित्यादर्वाचं वायुमभिसंभवति कस्मात् अविशेषविशेषाभ्यां तथाहि स वायु
लोकमित्यविशेषोपदिष्टस्य वायोः अन्यत्र विशेषोऽदृश्यते यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र वि
जिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छतीत्येतस्मादादित्याद्वायोः पूर्वत्वदर्शनाद्विशेषाद्वायु

णौकोहेतुरित्यतआह भूयांसीति उक्तं मार्गस्यैकत्वमुपजीव्य पर्वक्रममाह वायुमब्दात् अर्चिरादिष्यस्मादयमनेनेत्यति
क्रमेणविशेषणविशेष्यभावइत्यनन्याधिकरणस्यतात्पर्यमन्यविषयमाह स एतमिति आग्नेन्तरं पठिते वायुर्विषयः
सकिमर्चिरात्मकोऽग्नेरनंतरंउतसंवत्सरात्परः इति पाठाद्वल्यमाणविशेषश्रुतेश्च संशये सिद्धांतमेवोपक्रमते उच्यत
इति पुरुषस्थपासकोऽस्माल्लोकाद्देहात्प्रैति निर्गच्छति तस्मै प्राप्ताय पुरुषाय स वायुस्तत्र स्वात्मानि विजिहीते छिद्रं करोतीति
तेन वायुदत्तेन रथचक्रछिद्रतुल्येनद्वारेणोर्ध्वमादित्यं गच्छतीति श्रुत्यर्थः ॥ ॥ ॥

सूत्रे तेनेत्यव वायुविशेषितम्:

इदानीमेवंप्रश्नमाह कस्मात्पुनरिति पाठबलादर्चिषोनंतरो वायुरित्यर्थः कौषीतकीनां पाठमात्रेण क्रमविशेषवाची कश्चिच्छब्दोस्ति
कौषीतकीनां तेनेत्यर्थमिति च शब्दाभावात्क्रमनिश्चयात्पाठबाध इति सिद्धान्तार्थः अस्त्वर्चिरादिमार्गे छान्दोग्यस्य संवत्सरपाठाद्वायोरप्य-
सत्त्वं वाजिश्रुतिस्थेन तु संवत्सरसाकांक्षतेः कथमब्दात्परो वायुरित्यत आह वाजेति तर्हि देवलोकाद्वायुमिति तत्र सादित्यन्तु आ-
ह वायुमब्दादिति तिष्ठति संवत्सरस्य मासावयवित्वान्मासानन्तर्यं संवत्सरापरो देवलोकस्ततः परो वायुर्वायोः पर आदित्य इति क्र-
निर्दयक्रमो निष्पन्नस्तेनेति तत्र याक्षत्यावायोरादित्य एवं त्वावगमादिति तत्रेन वायुपदं देवलोकपर्यवकवायुपरमिति स्थिते

कस्मात्पुनरग्नेः परत्वदर्शनाद्विशेषाद्दर्चिषोनंतरं वायुर्न निवेश्यते नेत्याशंक्य विशेषदर्शित्वदासुः नन्वदाहतन्नाश्रं।
तिः स एवं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकमित्युच्यते केवलो न पाठः पौर्वापर्यं एव स्थितो ना-
त्र क्रमवचनः कश्चिच्छब्दोस्ति पदार्थोपदर्शनमात्रं ह्यत्र क्रियते एतं चेन चागच्छतीति न पुनर्वायुमहेते नरपय
त्मात्रे एणाल्लिङ्गेणोर्ध्वमाक्रम्यादित्यमागच्छतीत्यवगम्यते क्रमस्तस्मात्स क्रमविशेषविशेषाभ्यामिति वाजसने-
यिनस्तु मासेभ्यो देवलोकाद्दादित्यमिति समामनंति तत्रादित्यानंतर्याद्देवलोकाद्वादित्यमिति तमामनंति त आदि-
त्यानंतर्याद्देवलोकाद्वायुमभिसमवेयुः वायुमब्दादिति छान्दोग्यश्रुत्यपेक्षया छान्दोग्यवाजसनेयकयोस्त्वेके-
त्र देवलोको न विपन्ने परत्र संवत्सरस्त्र्यंक्षतिद्वयमन्यपाडुभावप्रभयत्र ग्रथितव्यौ तत्रापि मासात्संवत्सरः प्र-
वीपश्च मो देवलोक इति विवेक्तव्यं तडितोधि वरुणः संबंधात् ३ आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतमित्यस्याः विद्यु-
त उपरि श्रात्स वरुणलोकमित्ययं वरुणः संबध्यत अस्ति हि संबंधो विद्युद्वरुणयोः यदा हि विशाला विद्युतस्तीव्रस्तन-
यित्नुनिर्घोषा जीमूतोदरेषु प्रनृत्यंति अथ आपः प्रपतंति विद्योतते स्तनयति वर्षिष्यति वा इति च ब्राह्मणम् अपां चाधि-
पतिर्वरुण इति श्रुतिस्मृतिप्रसिद्धिः वरुणाच्चाधीन्द्रप्रजापती स्थानांतराभावात्पाठसामर्थ्याच्चागंतुकत्वादपि वरु-

एवं कौषीतकिभिरग्न्यनंतरं पठितस्य वायोः स्थानमब्दाद्वायुं पुनरनंतरं पठितस्य वरुणस्यार्चिरादिमार्गे स्थानमाह तडितोधि वरु-
णः संबंधात् पठितो वरुणादिर्मार्गपरत्वेन संबध्यते न वेति संदेहे चिंता हि रित्यादि पंचम्याऽर्चिरादीनां क्रमेण मार्गपर्वतता
यावद्गत्वा द्वायोरिव स्थानविशेषश्रुत्यभावादलब्धस्थानो वरुणादिर्न संबध्यत इति प्राप्ते सिद्धान्तमाह आदित्यादिति ।
अपां विद्युत्कार्यत्वेन संबंधमानमाह विद्योतते इति वरुणस्योपर्युपरि विद्युत्संबंधागंतुकानामन्ते निवेश इति न्यायाच्च
विद्युदनंतर्ये सति यथापाठमिंद्रप्रजापत्योः क्रम इत्यर्थः ॥ ॥ ॥ ॥

शात-
चं·त·
२८

एवमर्चिरादीनां क्रमं निरूप्य स्वरूपं निरूपयति आतिवाहिकास्तल्लिंगात् इति निर्देशताम्या लोकशब्दात्तेन स्वलिंगाच्च संशयः ।
अयपत्तद्वयं रवं पत्तः अर्चिरादयो विद्युदन्ताः स्वचेतनानेतार आमानवपुरुषेणेनात्र सह पठितत्वादिति सिद्धांतयति एवमित्या ।
दिना यथा स्तुत्यमानवस्यात्त नेतृत्वं नार्चिरादीनामिति वाक्ये तद्वचनमिति पुरुषस्यामानवत्वेन तत्त्वे चेतनभयपरत्वे वा स्वभेदः
स्यादतोर्चिरादिपदैर्नेतार एवमानवाः प्रक्रान्ताः प्रकरणबलाद्विद्युदन्तेन रमानवस्य नेतुः प्राप्तेः प्रकरणप्राप्तमनेतृत्वानुवादेना ।

आतिवाहिकास्तल्लिंगात् ४ तेष्वेवार्चिरादिषु संशयः किमेतानि मार्गचिह्नान्युत भोगभूमय उत नेतारो गच्छतामिति तत्र मार्गलक्षणभूता अर्चिरादय इति तावत्प्राप्तं तत्स्वरूपत्वादुपदेशस्य यथा हि लोके कश्चिद्ग्रामं नगरं वा प्रतिष्ठासमानोनुशिष्यते गच्छेतस्त्वममुं गिरिं ततो न्यग्रोधं ततो नदीं ततो नगरं वा प्राप्स्यसीति एवमिहाप्यर्चिषोहरहः आपूर्यमाणपक्षमित्याह अथवा भोगभूमय इति प्राप्तं तथा हि लोकशब्देनाग्न्यादीननुबध्नात्यग्निलोकमागच्छतीत्यादि लोकशब्दश्च प्राणिनां भोगायतनेषु भाष्यते मनुष्यलोकः पितृलोको देवलोक इति तथा च ब्राह्मणमहोरात्रेषु ते लोकेषु सज्जन्त इत्यादि तस्मान्नातिवाहिका अर्चिरादयो चेतनत्वादप्येषामातिवाहिकत्वानुपपत्तिश्चेतना हि लोके राजनियुक्ताः पुरुषा दुर्गेषु मार्गेष्वतिवाहयन्तीति एवं प्राप्ते ब्रूमः आतिवाहिका एवैते भवितुमर्हन्ति कुतः तल्लिंगात् तथा हि चंद्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान्ब्रह्म गमयतीति सिद्धवद्गमयितृत्वं दर्शयति तद्वचनं तद्विषयमेवोपक्षीणमिति चेन्न प्राप्तमानवत्वनिवृत्तिपरत्वाद्विशेषणस्य यद्यर्चिरादिषु पुरुषा गमयितार आप्तास्ते च मानवास्ततो युक्तं तन्निवृत्त्यर्थं पुरुषविशेषणममानव इति ननु लिंगमात्रमगमकं न्यायाभावान्नैष दोषः उभयव्यामोहात्तत्सिद्धेः ५ एतावदर्चिरादिमार्गास्ते देहवियोगात्संपिंडितकरणग्रामा इत्यस्वतन्त्रा अर्चिरादीनामप्यचेतनत्वादस्वातंत्र्यमित्यतोर्चिराद्यभिमानिनश्चेतना देवताविशेषा अतियात्रायां नियुक्ता इति गम्यते लोकेपि हि मत्तमूर्छितादयः संपिंडितकरणाः परप्रयुक्तवर्त्मानो भवन्ति ॥ ॥

मानवत्वमेकमेव प्रतिपाद्यत इति वक्तव्यमित्याह नेतितेन प्रकरणानंगीकारे त्वमानवः पुरुषो गमयतीति वाक्यं सिद्धेत
अमानवत्ववचनस्याप्यप्राप्तेरिति भावः नेतृत्वानुवादलिंगस्यानुग्राहकन्यायपरं सूत्रं गृह्णाति नन्विति यद्यनेत
तोचेतना एवार्चिरादयः तर्हि मार्गगन्तृ ह्योरुभयोरपि व्यामोहाद्गन्तॄ हृद्धिगतिर्न स्यादतः स्वयंप्रयत्नस्य चेतनान्त
रेणेति लौकिकन्यायानुग्रहात्तत्सिद्धेर्नेतृत्वसिद्धेः लिंगं न्यायोपेतमिति सूत्रार्थः

राम
२८

पूर्वपक्षं दूषयति अनवस्थितत्वादित्यादिना अर्चिरहरादीनामस्थिरत्वाद्द्वारादौ मत्सत्त्वप्रतीत्या नालोकं कृत्वा चान मार्गचिह्नत्वं
भोगपत्वं वा देवतात्वे त्वस्थिरत्वदोषो नास्तीत्यर्थः यत्तु पदे शस्यास्या चिह्नत्वे भातीति तत्राह अर्चिषोऽहरिति चिह्नत्वेनेत्यत्व
तं प्रायाश्च वाक्याणां सांनिर्णयमित्याह अपि चेति यदुक्तं लोकशब्दाद्भोगपत्वमिति तत्रेत्याह तस्यापि डिते निस्त्रांतरं गच्छतीति कथं

अनवस्थितत्वाद् ध्वर्चिरादीनां न मार्गलक्षणत्वोपपत्तिः नहि रात्रौ प्रेतस्याहःस्वरूपाभिसंभव उपपद्यते न च प्रतिपा
लमनसीतुं शक्यं पुरस्तात् ध्रुवत्वादेवतात्मनां तु चैषां भवति यच्चार्चिरादिशब्दतां चैषामर्चिराद्यभिमाना उपपद्यते अ
र्चिषोऽहरित्यादि निर्देशस्त्वातिवाहिकत्वेपि न विरुध्यते अर्चिषा हेतुनाहरभिसंभवति अह्ना हेतुना आपूर्यमाणपक्ष
मिति तथा च लोके प्रसिद्धेष्वप्यातिवाहिकेष्वेवंजातीयक उपदेशो दृश्यते गच्छ त्वमितो बलवर्माणं ततो जयसिंहं ततः कृष्णगु
प्तमिति अपि चोपक्रमे तेऽर्चिषमभिसंभवन्तीति संबंधमात्रमुक्तं न संबंधविशेषः कश्चित् उपसंहारे तु स एतान्ब्रह्म गमय
तीति संबंधविशेषोऽतिवाह्यातिवाहकलक्षण उक्तः तेन स एवोपक्रमेऽपीति निर्धार्यते संपिंडितकरणत्वादेव च गन्तॄणां न
तत्र भोगसंभवः लोकशब्दस्त्वनुपभुंजानेष्वपि गन्तृषु गमयितुं शक्यते अन्येषां तल्लोकवासिनां भोगभूमित्वात् ततोऽग्निस्वा
मिकं लोकं प्राप्तोऽग्निनातिवाह्यते वायुस्वामिकं प्राप्तो वायुनेति योजयितव्यं कथं पुनरातिवाहिकत्वपक्षे वरुणादिषु तत्संभ
वः विद्युतो ह्यधि वरुणादय उपक्षिप्ताः विद्युतस्त्वनन्तरमाब्रह्मप्राप्तेरमानवस्यैव पुरुषस्य गमयितृत्वं श्रुतमित्यत उत्तरं पठ
ति वैद्युतेनैव ततस्तच्छ्रुतेः ६ ततो विद्युदभिसंभवनादूर्ध्वं विद्युदनन्तरवर्तिनैवामानवेन पुरुषेण वरुणलोकादिष्वतिवाह्यमाना
ब्रह्मलोकं गच्छन्तीत्यवगन्तव्यं तान्वैद्युतात्पुरुषोऽमानव एत्य ब्रह्मलोकं गमयतीति तस्यैव गमयितृत्वश्रुतेः वरुणादयस्तु त
स्यैवाप्रतिबंधकरणेन साहाय्यानुष्ठानेन वा केनचिदनुग्राहका इत्यवगन्तव्यं तस्मात्साधूक्तमातिवाहिका देवतात्मानोऽर्चिरा
दय इति कार्यं बादरिरस्य गत्युपपत्तेः ७ स एतान्ब्रह्म गमयतीत्यत्र विचिकित्स्यते किं कार्यमपरं ब्रह्म गमयत्याहोस्वित्प
रमेवाविकृतं मुख्यं ब्रह्मेति कुतः संशयः ब्रह्मशब्दप्रयोगाद्गतिश्रुतेश्च तत्र कार्यमेव सगुणं ब्रह्म एतान्गमयत्यमान
वः पुरुष इति बादरिराचार्यो मन्यते कुतः अस्य गत्युपपत्तेः अस्य कार्यब्रह्मणो गन्तव्यत्वमुपपद्यते प्रदेशवत्त्वात् न तु पर
स्मिन्ब्रह्मणि गन्तृत्वं गन्तव्यत्वं गतिर्वाऽवकल्पते सर्वगतत्वात्प्रत्यगात्मत्वाच्च गन्तॄणां

पुनरिति अमानवो विद्युल्लोकमागतो वैद्युतस्तेनेत्यर्थः अतो नात्तु वैद्युतालोकादित्यर्थः अत्यावरुणादीनां नेतृत्वाभावे पुनरा
हकत्वेन मार्गान्तःस्थानीव इति भावः एवं मार्गं निरूप्य गन्तव्यं चिंतयति कार्यं बादरिरिति परब्रह्म गन्तव्यमिति पूर्वपक्षे मार्गस्य सार्थ
नाकार्यब्रह्मेति सिद्धान्ते भोगार्थत्वमित्याशयः पूर्वसिद्धान्तमाह न कार्यमेवेति सर्वगतस्यापि प्रदेशान्तरविशिष्टत्वेनाकाशस्य गन्तव्यत्वं दृष्टं

ब्रह्मलोके स्थिति बहुवचनेलोकशब्दार्थाः समस्तीश्रुति निर्गुणत्वस्य परस्यासंभवात्तत्राचन परंगंतमसिनाह विशेषित
त्वाच्चेति परब्रह्मणोभोगपत्तेर्वा पच्चारादेशालोकश्रुतिरित्यर्थः नपुनः एकब्रह्मशब्देनकारणवाचिनाकार्यं लक्ष्यते ग
तव्यत्वस्याप्ययोगात् बहुवचनाद्यनेकश्रुत्यनुग्रहाय नचानादितिलिंगात्परस्यगंतव्यतावगमस्तस्यालिंगसान्यथासिद्धे

विशेषत्वाच्च ८ ब्रह्मलोकानां मध्ये तेषु ब्रह्मलोकेषु पराः परावतो वसंतीति च श्रुत्यंतरे विशेषितत्वात्का
र्यब्रह्मविषयैव गतिरिति गम्यते नहि बहुवचनेन विशेषणेन परस्मिन्ब्रह्मण्यवकल्पते कार्यावस्थाभेदोपप
त्तेः संभवति बहुवचनं लोकश्रुतिरपि विकारगोचरायामेव सन्निवेशविशिष्टायां भोगभूमावांजसी गौ(
णी तत्वत्र ब्रह्मैव लोक एष सम्राडित्यादिष्वधिकरणाधिकरणतया निर्देशोपि परस्मिन्ब्रह्मण्यनांजसः स्यात् त
स्मात्कार्यविषयेपि ब्रह्मशब्दो नोपपद्यते समन्वये समस्तस्य जगतो जन्मादिकारणं ब्रह्मेति स्थापितमि
त्यत्रोच्यते सामीप्यात्तु तद्व्यपदेशः ९ तुशब्द आशंकाव्यावृत्त्यर्थः परब्रह्मसामीप्यादपरस्य ब्रह्मणस्त(
स्मिन्नपि ब्रह्मशब्दप्रयोगो न विरुध्यते परमेव ब्रह्म विशुद्धोपाधिसंबंधात्क्वचिद्विकारधर्मैर्मनोमयत्वादिभि(
रुपासनायोपदिश्यमानमपरमिति स्थितिः ननु कार्यप्राप्तावनावृत्तिश्रवणं न घटते नहि परस्माद्ब्र(
ह्मणोन्यत्र क्वचिन्नित्यता संभवति दर्शयति च देवयानेन पथा प्रस्थितानामनावृत्तिमेतेन प्रतिपद्यमाना इ
मं मानवमावर्तं नावर्तन्ते इति तेषामिह न पुनरावृत्तिरस्तीति तयोर्ध्वमायन्नमृतत्वमेतीति चेदत्र ब्रूमः कार्यात्ययत
दध्यक्षेण सहातः परमभिधानात् १० कार्यब्रह्मलोकप्रलयप्रत्युपस्थिते तत्रैवोत्पन्नसम्यग्दर्शिनः स
न्तस्तदध्यक्षेण हिरण्यगर्भेण सहातः परं परिशुद्धं विष्णोः परमं पदं प्रतिपद्यन्त इतीत्थं क्रममुक्तिरनावृत्त्यादि
श्रुत्यभिधानेभ्योभ्युपगन्तव्या नेतरजसैव गतिपूर्विका परप्राप्तिः संभवतीत्युपपादितं स्मृतेश्च ११ स्मृतिरप्येतम
र्थमनुजानाति ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति तस्मात्कार्यब्रह्म
विषया गतिः श्रूयते इति सिद्धांतः

रितिभावः प्रतिसंचरे महाप्रलये तस्मिन्प्राप्ते परस्य हिरण्यगर्भस्यान्ते समष्टिलिंगशरीररूपविकारावसाने ब्रह्मलोकनिवा(
सिनः कृतात्मानः शुद्धधियस्तत्रोत्पन्नसम्यग्दर्शिनः सर्वे ब्रह्मणा मुच्यमानेन सह परं पदं प्रविशंतीति योजना ॥ ॥

एवं सिद्धान्तमुक्त्वा तेन निरस्तं पूर्वपक्षमाह कं पुनरित्यादिना दहरविद्यायां कठवल्लीषु परब्रह्मप्रकरणे च तत्पोर्थमापन्निति गतिदर्शिता
एवं ब्रह्मशब्दस्य मुख्यत्वलिङ्गाभ्यां प्रकरणाच्च परविषयागतिरिति कं सम्प्रति प्रजापतेः सभां वेश्म प्रपद्य इति श्रुत्या मिश्रोपासकस्य मरणकाले
एवं ब्रह्म शब्दस्य स्वत्वलिङ्गाभ्यां प्रकरणाच्च परविषयागतिरिति शङ्का निरस्यति न च कार्ये इति परस्य प्रकृतत्वात् यशः पदस्य परमात्मनामत्वप्रसिद्धेश्च
कार्यप्राप्तिसंकल्पस्याभेदेन परं गतत्वमिति शङ्कां निरस्यति न च कार्य इति परस्य प्रकृतत्वात् यशः पदस्य परमात्मनामत्वप्रसिद्धेश्च
णः पदं नाम्नो क्रियया आत्मा ब्रह्मणो नाम हं भगवाञ्छित यशो राज्ञां यशो विशां यशः इति सर्वात्मत्वलिङ्गाच्च परप्राप्तिसंकल्प एवाप्रमि
न चार्थः अस्त्वेवं समप्रतिपत्तीच्छा परब्रह्मविषया तथापि सा कुयंगतिः एवं कास्यादित्यत आह सा चेति तत्र च ब्रह्मलोके विद्यहीनेर
पराजिता पुरस्तिब्रह्मणो हिरण्यगर्भस्य तेनैव प्रभुणा विमितं निर्मितं हिरण्मयं वेश्मास्तीति तत्प्रतिपत्ते विद्वानिति दहरविद्यायाम्

कं पुनः पूर्वपक्षमाशङ्क्यायं सिद्धान्तः प्रतिष्ठापितः कार्यं बादरिरित्यादिनेति सद्यदानीं सूत्रैरेवोपपद्यते परं जैमिनिर्मुख्य
त्वात् १२ जैमिनिराचार्यः तत्तान्ब्रह्म गमयतीति मन्यते कुतो मुख्यत्वात् परं हि ब्रह्मशब्दस्य मुख्यमालम्बनं गौणमपरं
मुख्ये गौणयोरसंप्रत्ययो भवति दर्शनाच्च १३ तयोर्ध्वमायन्नमृतत्वमेतीति च गतिपूर्वकममृतत्वं दर्शयति अमृत
तत्त्वं च परस्मिन्ब्रह्मण्युपपद्यते न कार्ये विनाशित्वात्कार्यस्य अथ यत्रान्यत्पश्यति तदल्पं तन्मर्त्यमिति प्रवचनात्पर
विषयैव च गतिः कठवल्लीषु पद्यते न हि तत्र विद्यान्तरप्रक्रमोऽस्ति अन्यत्र धर्मादिति परस्यैव ब्रह्मणः प्रक्रान्तत्वात् इति
वचनं कार्यप्रतिपत्त्यभिसन्धिः १४ अपि च प्रजापतेः सभां वेश्म प्रपद्य इति नायं कार्यविषयः प्रतिपत्त्यभिसन्धिः नामरूपयोर्नि
र्वहिता ते यदन्तरा तद्ब्रह्मेति कार्यविलक्षणस्य परस्यैव ब्रह्मणः प्रकृतत्वात् यशोऽहं भवामि ब्राह्मणानामिति सर्वात्मत्वेनोपक्र
मात् तस्य प्रतिमास्ति यस्य नाम महद्यश इति च परस्यैव ब्रह्मणो यशो नामत्वप्रसिद्धेः सा चेयं वेश्मप्रतिपत्तिः गतिः एवं
कार्याद्दहरविद्यायामदिनानं दपराजितां पूर्वं ब्रह्मणः प्रभुविमितं हिरण्मयमित्युक्ते पदे एवं च गतस्य पर्यन्तमार्गापेक्षता
सीयते तस्मात्परब्रह्मविषया गतिश्रुतय इति पक्षान्तरं तावेतौ द्वौ पक्षावाचार्येण सूत्रितौ गत्युपपत्त्यादिभिरेकोऽमुख्य
त्वादिभिः परेऽमार्गत्युपपत्त्यादयः प्रभवन्ति मुख्यत्वादीनामाभासत्वात् मुख्यत्वादयो गत्युपपत्त्यादीनि त्वाप्रवत्सिद्धान्तोऽव्या
ख्यातो द्वितीयः पूर्वपक्षः न ह्यसत्यपि संभवे मुख्यस्यैवार्थस्य ग्रहणमिति कश्चिद्राज्ञापयिता विद्यते ॥

तु एवं कार्यावेश्मप्राप्तिरुक्ता तेन परब्रह्मण्यपि वेश्मप्रतिपत्तिशब्दसामान्याद्गतिपूर्वकत्वं तस्याः सिद्ध्यतीत्यर्थः किं च पदं गतावितिधातोः
पाठाद्वेश्मप्रपद्य इत्यत्र मार्गापेक्षाभातीत्याह पदरपीति एवं पक्षमुपसंहरति तस्मादिति अथ पूर्वसिद्धान्तपक्षः इति टीकार्तमुपन्न
मेतेनाविति ब्रह्मशब्दस्य मुख्यत्वादिहेतूनामाभासत्वं स्फुटयति नहीति गन्तव्यत्वस्य ब्रह्मलोकेष्विति बहुवचनादेः संकल्पादेव
धादिदिव्यभोगश्रुतेश्च परब्रह्मण्यसंभवान्मुख्यार्थत्यागइत्यर्थः यद्यप्येतद्देसत्यकामपरं चापरं ब्रह्म तत्त्वादिश्रुतिषु प्रयोगसाम्या
द्ब्रह्मशब्दः भयत्रकुत्र तयामुख्य एव तथापि स एव परस्मिन्नवयवार्थस्य निरतिशयमहत्त्वस्य लाभात्परब्रह्मण्यमुख्यत्वं योगी

रामत
चन्द्र
२०

यद्रूपं कठवल्लीषु प्रकरणबलाद्गतिपरविषयेति तत्राह परेति यथा विद्यासंबद्धसगुणात्मन्यर्थे नदसंबद्धनाऽन्तरकीर्तनेन
या परविद्यास्तुत्यर्थं प्रकरणे परविद्याश्रयगतिकीर्तनं युज्यते गतिं विनापि हि परविद्यानिरतिशयफलात्तस्यास्तु परविद्याफलगति
साध्यमेतर्भवतीति निस्तु तिलाभादिप्र्यर्थः यदप्युक्तं प्राप्तिसंकल्पोपि प्रकृतपरविषय इति तत्रेत्याह प्रजापतेरिति प्रजापतिः
संभवे प्रपत्स्य इति सगात्मकवाक्येन च करणवाध्येयपोह मिति तवात्मन उपासनार्थम परब्रह्मण्युपपद्यत इत्यर्थः स्व
पतनश्लाघापरमतेह बयाते केचिदित्यादिना सर्वगतस्य स्वात्मभूतस्यापि ब्रह्मणः संसारदेशाद्देशांतरेण तत्कालात्कालांत

परविद्याप्रकरणेपि च तत्तत्तदर्थविद्यांतराश्रयगत्यन्तकीर्तनमुपपद्यते विषगंत्या उत्क्रमणीभवतीतिवत् प्रजापतेः
संभावेस्मप्रपद्य इति तद्वाक्यविच्छेदेन कार्येपि प्रतिपत्त्यभिसंधिर्न विरुध्यते सगुणोपि च ब्रह्मणि सर्वात्मत्वसंकी
र्तनेन सर्वकर्मा सर्वकाम इत्यादिवदवकल्पते तस्मात्परविषया एव गतिश्रुतयः कश्चित्तु नः पर्वाणि रवपत्तस्ताणिभव
मुतराणि सिद्धान्ततस्त्राणीत्येतां व्यवस्थामनुरुध्यमानाः परविषया एव गतिश्रुतीः प्रतिष्ठापयंती तदनुपपन्नं गंतव
त्वानुपपत्तेर्ब्रह्मणः यत्सर्वगतं सर्वांतरं सर्वात्मकं च परब्रह्म आकाशवत्सर्वगतश्च नित्य इत्यादि यस्मात्साक्षादपरोक्षाद्ब्रह्म यश्चा
त्मा सर्वांतरः आत्मैवेदं सर्वं ब्रह्मैवेदं विश्वमिदं वरिष्ठं इत्यादिश्रुतिनिर्धारितविशेषणस्य गंतव्यता न कदाचिदुपप
द्यते नहि गतमेव गम्यते अन्योन्यस्य हि अन्यज्जिगमिषितं लोके नवत्वलोके गतस्यापि गंतव्यता देशांतरविशिष्टस्य इष्टा
यथा पृथिवीस्थ एव पृथिवीदेशांतरद्वारेण गच्छति तथा तत्त्वेपि बाल
स कालांतरविशिष्टं वार्धकं स्वात्मभूतमेव गंतव्यं तद्ब्रह्मणोपि सर्वशक्तियुक्तत्वात्कथंचिद्गंतव्यतास्यादिति चेन्न
प्रतिषिद्धसर्वविशेषणत्वाद्ब्रह्मणः निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं अस्थूलमनण्वह्रस्वमदीर्घं स वा एष महा
न् अजः आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म स एष नेति नेत्यात्मा इत्यादिश्रुतिस्मृतिन्यायेभ्यो न देशकालादि
विशेषयोगः परमात्मनि कल्पयितुं शक्यते येन प्रदेशावस्थान्तरयोगेनास्य गंतव्यता स्यात् भूवयसोस्तु प्रदेशावे

रेण विशिष्टतया गंतव्यत्वं स्यादिति पृथिवीवयोदृष्टान्ताभ्यां शंकते नन्विति यत्तद्वित्तैवस्मामतत्वमनन्यत्वमवस्यात तद्बनोरभे
दाढात्म्भूतत्वे ननु पृथ्वीभूवयसोः प्रामयोरपि देशांतरकालांतरविशिष्टत्वेन गंतव्यत्वेन योगे तत्भिन्नत्वाद्ब्रह्मणस्तु गत्रमि
त्रसकर्यंगंतव्यत्वमाह सर्वं प्राक्षीति यामामाभः स्तानगंतव्यापश्चगंतव्यं देशांतरं तत्वप्रामसिति उक्तः प्रामस्यगंतव्यानावय
मोपि कालांतरेभिव्यक्तिमात्रेन गंतव्यत्वमिति वस्तुगतिरंगीकृत्य विशिष्टभूवयसोर्गंतव्यता परब्रह्मणो देशकालवै
शिष्ट्याभावात्तकथंचिदपि गंतव्यतेत्याह नेत्यादिना अनादिमन्यस्त्रं ब्रह्मेत्याद्या स्मृतिः इत्यविशेषस्पष्टशिकल्पि
तत्वाद्गात्मनो निर्विशेषतेतिन्यायः ॥ ॥ ॥

समगणमेव ब्रह्मलक्षणात्मापेक्षया परं गंतव्यं निर्विशेषं तन्नास्त्येवेति शंकते जगदुत्पत्तीति किं निर्विशेषस्यास्तित्वं मानाभावात्सविशेषश्रुतिविरोधा
द्वानाय इत्याह नेति द्वितीये शंकते उत्पत्त्यादीति सविशेषश्रुतीनां निर्विशेषत्वात्तद्विरोध इत्याह नेति निर्विशेषश्रुतीनामेव सविशेष
श्रुतिशेषत्वं किं न स्यादित्याह कस्मादिति नासामर्थ्यफलवत्त्वेन निराकांक्षत्वाच्छेषिणा विशेषश्रुतीनामफलत्वात्तद्विरोध्यवि
शेषसमर्पणादिद्वारेण शेषत्वं फलवत्सन्निधावफलं तदंगमितिन्यायादित्याह उच्यत इत्यादिना न केवलं न्यायाच्छेषता किंतु श्रु
त्याह प्रत्यस्तमितेति तत्रानलकारणब्रह्मणपतत्स्यगं जगदात्मककार्यमस्तन्नमितिपक्रमेणेनस्पृगेन सन्मूलमन्विच्छेत्युपसंहारस्तत एव ज्ञे

जगदुत्पत्तिस्थितिप्रलयहेतुत्वश्रुतिरनेकशक्तित्वं ब्रह्मण इति चेन्न विशेषनिराकरणश्रुतीनामनन्यार्थत्वात् उत्पत्त्यादिश्रु
तीनामपि समानमनन्यार्थत्वमिति चेन्न तासामेकत्वप्रतिपादनपरत्वान्मृदादिदृष्टांतैर्हि सतो ब्रह्मण एकस्य सत्यत्वं वि
कारस्य चानृतत्वं प्रतिपादयच्छ्रुतं नोत्पत्त्यादिपरं भवितुमर्हतीति कस्मात्पुनरुत्पत्त्यादिश्रुतीनां विशेषनिराकरणश्रुतिशे
षत्वं न पुनरस्तीतरशेषत्वमितरासामिति उच्यते विशेषनिराकरणश्रुतीनां निराकांक्षार्थत्वात् न ह्यात्मन एकत्वम
नुपपत्तनित्यत्वशुद्धत्वाद्यवगतौ सत्यां भूयः काचिदाकांक्षा प्रजायते पुरुषार्थसमाप्तिबुद्ध्युपपत्तेः तत्र को मोहः कः
शोक एकत्वमनुपश्यतः अभयं वै जनक प्राप्तोसि विद्वान्न बिभेति कुतश्चन एतं ह वाव न तपति किमहं साधु नाकरवं कि
मह पापमकरवं इत्यादिश्रुतिभ्यः तथैव च विदुषां तुष्ट्यनुभवादिदर्शनाद्विकारानृताभिसंधापवादाच्च मृत्योः स मृत्यु
माप्नोति य इह नानेव पश्यतीति अतो न विशेषनिराकरणश्रुतीनामन्यशेषत्वमवगंतुं शक्यं नैवमुत्पत्त्यादिश्रुतीनां
निराकांक्षार्थप्रतिपादनसामर्थ्यमस्ति प्रत्यक्षतस्तु तासामन्यार्थत्वं समनुगम्यते तथाहि तन्मेन शुंगमुत्पतितं सोम्य
विजानीहि नेदममूलं भविष्यतीत्युपन्यस्योदर्के सत एवैकस्य जगन्मूलस्य विज्ञेयत्वं दर्शयति यतो वा इमानि भूतानि
जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति च एवमुत्पत्त्यादिश्रुतीनामैकात्म्यावगमपर
त्वान्नानेकशक्तियोगो ब्रह्मणो ततश्च गंतव्यत्वानुपपत्तिः न तस्य प्राणा उत्क्रामंति ब्रह्मैव सन्ब्रह्माप्येतीति च परस्मिन्ब्रह्मणि
गतिं निवारयति तद्व्याख्यातं स एषोऽस्मिन्नेकेषामित्यत्र गतिकल्पनायां च गंता जीवो गंतव्यस्य ब्रह्मणोऽवयवो विकारोऽन्यो वा तत

यतत्समस्तव्यादोग्येपनत्यानेतिरीयकेपि जगज्जन्माद्यनुवादेन ब्रह्मण एव ज्ञेयत्वं दर्शितमतः स्पष्टिश्रुतीनां श्रुत्यैव निर्विशेषः
पीशेषताभातीत्यर्थः एवं ब्रह्मणो निर्विशेषत्वात्तद्गंतव्यतेति फलितमाह एवमिति स्पष्टनिषेधाच्च परस्य न गंतव्यतेत्याह न तस्ये
ति एवं गंतव्यालोचनया गतिं निरस्य गंत्रालोचनयापि तां निरस्यति गतिकल्पनायां चेत्यादिना भेदाभेदे

ननु तत्राभेदकल्पः किं निरवयवत्वे सति भागकल्पनेति कल्पनयेकिंद्रूपमिति एक्वति एयवमिति कल्पद्वयेपि दोषांतरमाह वि
कारावयवत्वपक्षयोश्चेति विकारस्त्वयवरूपजीववैशिष्ट्यत्रह्मणः स्थिरत्वाज्जीवानां गत्यागती न स्यातां न ह्यचला तिष्ठल
पाषाणस्य पार्मेद्रूपाषाणावयवयोश्चवलनमस्तीत्यर्थः अस्माकं त्वज्ञानात्कल्पितापाधिभिर्गत्यागतिर्विभ्रम इतिभावः त्वती

अस्तं ततात्नात्स्यगमनानुपपत्तेः यद्यवं ततः किं स्यात्तदुच्यते यद्येकदेशास्तेनैकदेशिनो नित्यप्राप्तत्वात्र पुनर्ब्रह्म
गमनमुपपद्यते एकदेशैकदेशित्वकल्पनाच ब्रह्मणो नुपपन्ना निरवयवत्वप्रसिद्धेः विकारपक्षे येन तल्ये विका
रेणापि विकारिणो नित्यप्राप्तत्वात् नहि घटो मृदात्मतां परित्यज्यावतिष्ठते परित्यागे वाभावप्राप्तेः विकारावयवप
क्षयोश्च तद्वतः स्थिरत्वाद्ब्रह्मणः संसारगमनमप्यनवक्लृप्तं अथान्य एव जीवो ब्रह्मणः सोणुर्व्यापी मध्यमपरि
माणो भवितुमर्हतीति व्यापित्वे गमनानुपपत्तिर्मध्यमपरिमाणत्वे चानित्यत्वप्रसंगोणुत्वे कृत्स्नशरीरवेदनानुपपत्तिः
प्रतिषिद्धे चाणुत्वमध्यमपरिमाणत्वे विस्तरेण पुरस्तात्परस्माच्चान्यत्वे जीवस्य तत्त्वमसीत्यादिशास्त्रबाधप्रसंगः विकाराव
यवपक्षयोरपि समानो यं दोषः विकारावयवयोस्तद्वतो नन्यत्वाददोष एव इति चेत् त्र मस्वैकत्वानुपपत्तेः सर्वेष्वेव
तेषु पक्षेष्वनिर्मोक्षप्रसंगः संसाराविलत्वानिवृत्तेः निवृत्तौ वा स्वरूपनाशप्रसंगात् ब्रह्मात्मानभ्युपगमाच्च यत्तु केश्चिज्ज
ल्प्यते नित्यानि नैमित्तिकानि कर्माण्यनुष्ठीयन्ते प्रत्यवायानुत्पत्तये काम्यानि प्रतिषिद्धानि च परिहृयन्ते स्वर्गनरका
नवाप्तये सांप्रतदेहोपभोग्यानि च कर्माण्युपभोगेनैव क्षीयन्ते इत्यतो वर्तमानदेहपाते देहांतरप्रतिसंधान
कारणाभावात्स्वरूपावस्थानलक्षणं कैवल्यं विनापि ब्रह्मात्मतया एवं वृत्तस्य सेत्स्यतीति तदसत्प्रमाणाभावात्र ह्येत
च्छास्त्रेण केनचित्प्रतिपादितं मोक्षार्थी इत्थं समाचरेदिति स्वमनीषया त्वेतत्तर्कितं यस्मात्कर्मनिमित्तः संसा
रस्तस्मान्निमित्ताभावान्न भविष्यतीति

यकल्पमनुपपत्तिकल्पानुपपत्ति अर्थेत्यादिना अभेदश्रुतिविरोधरूपो दोषममतास्तीति भेदाभेदवाद्याह विकारावयोरितिः
कि एकत्वमप्यविकल्पाद्रूपपत्ति ... ने ति किं पक्षत्रयमपि युक्तं संसारित्वस्य तात्त्विकजीवस्वभावस्य नाशो जी
भिन्नयोरभेदाभ्युपगमः विरोधादिति परिहरति नेति किंपक्षत्रयमपि ... जीवस्य तात्त्विकरूपमंगीकृतं यदस्य संसारनाशोपि न न श्येदित्याह
वस्वरूपनाशप्रसंगान्नचास्माभिर्विक्त्वया ब्रह्मात्मत्वे जीवस्य तात्त्विकरूपमंगीकृतं यदस्य संसारनाशोपि न नश्येदित्याह
सर्वेष्विति ननु किं ब्रह्मत्वेन संसाराभावः किं लमोक्षः स च कर्माभावमात्रेण सेत्स्यतीति कर्मजडानामत आह यन्निर
स्यति यत्त्वित्यादिना तदिति एवं ब्रह्मैवमात्मत्वे हेतुरित्यस्मिन्नर्थे मानाभावादित्यर्थः ॥ ॥ ॥

तर्क एवमानुमित्यत आह नैवं तर्कप्रतिष्ठितमिति ननु तत्वापेतं तर्कमात्रमेकस्मिं जन्मन्यनेकविरुद्धफलानां कर्मणां भोगायोगादस्याव
शिष्टं कर्म जन्मान्तरस्य निमित्तमित्याशङ्क्य तत्र मानमाह कर्मशेषसद्भावसिद्धिरिति संततानारब्धफलानि पुण्यपापानि तेषां नित्या
प्रनष्टानेन त्वयान्तु जन्मान्तरमिति शङ्कते स्यादेतदिति पापपुण्यस्य न नाशः अविरोधादन्यथातिप्रसंगात्प्रस्तापि सर्वा
त्मना पुण्यपापत्वमाने नास्तीति संचितपुण्यपापाभ्यां जन्मान्तरहेतुरित्याह तत्रेत्यादिना क्रियमाणनित्यादिनापि जन्मसञ्चित

न चैतत्तर्कयितुं शक्यते निमित्ताभावस्य दुर्ज्ञानत्वाद् दृष्टं हि कर्मणां जात्यन्तरसंचितानामिष्टानिष्टविपाकानामेकैकस्य जन्मनः संभा
व्यते तेषां विरुद्धफलानां युगपदुपभोगासंभवात् क्वानिचिल्लब्धावसराणि देहजन्मनिमित्तानि कानिचिद्देशकालनि
मित्तप्रतीक्षाणि सन्त्यप्यतस्तेषामविशिष्टानां तत्प्रत्येनोपभोगेन क्षपणासंभवात् यथा वर्णितनिजसामग्रीवशेन मान
देहपाते देहान्तरनिमित्ताभावः शक्यते निश्चेतुं कर्मशेषसद्भावसिद्धिश्च तद्य इह रमणीयचरणा इत्यतः शेषेणेत्यादि
श्रुतिस्मृतिभ्यः स्यादेतत् नित्येनैवमिति काम्यानि तानि प्रत्यवायकारीणि भविष्यन्तीति तत्र विरोधाभावात् सति हि विरोधे
तेषां तेषां क्षयभावो भवति न च जन्मान्तरसंचितानां सुकृतानां नित्येनैवमिति केरसि विरोधः शुद्धिरूपत्वाविशेषा
त् दुरितानां त्वशुद्धिरूपत्वात् अस्ति विरोध भवतु तत्क्षपणं न तु भावनाद्देहान्तरनिमित्ताभावसिद्धिः सुकृतनिमित्तत्वो
पपत्तेः दुरितस्यापि पोषतत्क्षपणानवगमात् न च नित्येनैवमिति काम्यानुष्ठानात्मसमवायानुत्पत्तिर्मा भूत् पुनः फलान्त
रोत्पत्तिरिति प्रमाणमस्ति फलान्तरस्यापनुत्यादिनः संभवात् स्मृतिश्चापस्तम्बः तद्यथाम्रे निमित्ते फलार्थे कृ
यां गन्धावनुत्पद्यत एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते इति न चासति सम्यग्दर्शने सर्वात्मना काम्यप्रतिषिद्धवर्ज
नेन जन्मप्रायणान्तराले केनचित्प्रतिज्ञातुं शक्यं सत्यपि पुनाम पि सत्त्वमात्मत्वे कर्तृत्वपराधदर्शनात् सपापिनव्याप्त
भवति तथापि निमित्ताभावस्य दुर्ज्ञानत्वमेव न चानभ्युपगम्यमाने ज्ञानगम्ये ब्रह्मात्मत्वे कर्तृत्वभोक्तृत्वस्वभाव
स्यात्मनः कैवल्यमाकांक्षितुं शक्यमग्न्यौष्ण्यवत्स्वभावस्यापरिहार्यत्वात् स्यादेतत् कर्तृत्वभोक्तृत्वकार्यमनर्थो
न तच्छक्तिस्तेन शक्यावस्थानेपि कार्यपरिहारादुपपन्नो मोक्ष इति ॥

त्कर्मणामपि त्स्लोकादन्यविशेषश्रुतेः स्मृतेश्चेत्याह न च नित्येति प्रत्यवायनिरासार्थे नित्याद्याचारे सत्यनपेक्षात्फलान्त
रनिष्पत्तिरुत्पद्यत इत्यत्र दृष्टान्तः तद्यथेति निमित्तेऽआरोपितेऽसतीत्यर्थः न चापि काम्यादिकर्मसत्तानिश्चयो नास्तीत्यत आह सं
सारायत्तं त्वयेति तेन विना देहपाते मोक्ष एवेति निश्चयाल्लाभात्त्वनुपलक्तिरिति भावः ब्रह्माभिन्नस्य जीवस्य कर्तृत्वा
दिस्वभावस्य मोक्षो नोपपन्न इत्याह न चेति कर्तृत्वादिरूपं कार्यं न स्वभावः किन्तु तच्छक्तिरिति शङ्कते स्यादेतदिति ॥

शात०
चं०
२२

कार्यगम्यायाः शक्तेः कार्यसामर्थ्यात्तादात्म्यमुक्तं अतः शक्तिमत्त्वेन तद्विषयस्य कार्यस्यादृष्टदेशकालादिनिमित्तानां चा०
त्मना शक्तिद्वाराऽनित्यत्वं वक्तव्यं तस्मात्तत्स्यादिति परिहरति तत्त्वमसीत्यादिना मोक्षसिद्ध्यर्थं जीवस्य ब्रह्मत्वांगीकारे संसा
रानुपपत्तिमाशंक्याज्ञानादुपपद्यते इति सदृष्टान्तं स्मारयति यस्मादित्यादिना प्रासंगिकं परिहृत्य परमप्रकृतमनुसरति

तत्त्वे न शक्तिसत्त्वे कार्यप्रसवप्रसंगदुर्निवार्यत्वात् अथापि स्यान्न केवला शक्तिः कार्यमारभते अनपेक्ष्यान्यानि
निमित्तानि अतएकाकिनी सा स्थिता अपि नापराध्यतीति तच्च न निमित्तानामपि शक्तिलक्षणेन संबंधेन नित्यसं
बद्धत्वात् स्यात्कार्यस्य स्वभावसामान्यमत्तत्त्वाविद्यागम्यायां ब्रह्मात्मतायां नकथंचन मोक्षप्रत्याशास्ति सुतिश्च
नान्यः पंथा विद्यतेऽयनायेति ज्ञानादन्यं मोक्षमार्गं वारयति यस्मादन्यत्वेऽपि जीवस्य व्यवहारलोपप्रसंगः प्रत्यक्षादि
प्रमाणाप्रमाणं तिरितिचेन्न प्राग्बोधात्सर्वव्यवहारस्य तदुपपत्तेः शास्त्रं च यत्र हि द्वैतमिव भवति तदितर इतरं पश्य
तीत्यादिना प्रबुद्धविषये प्रत्यक्षादिव्यवहारमुक्त्वा पुनः प्रबुद्धविषये यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्या
दिना तदभावं दर्शयति तदेवं परब्रह्मविदोगत्यादिविज्ञानस्य बाधितत्वात्कथंचन गतिरुपपादयितुं शक्या०
किंविषयः पुनर्गतिश्रुत इत्युच्यते सगुणविषयाभविष्यतीति तथाहि क्वचित्पञ्चाग्निविद्याप्रकृत्य गतिरुच्यते क्व
चित्पर्यंकविद्यायां विद्वान्नरविद्यायामपि ब्रह्मप्रकृत्य गतिरुच्यते यथा प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति अथ
यदिदमस्मिन् ब्रह्मपुरे दहरं पुंडरीकं वेश्मेति चतत्रापि वामनीत्वादिभिः सत्यकामादिभिश्च गुणैः सगुणस्यैवोपास्यत्वा
त्संभवति गतिर्न क्वचित्परब्रह्मविषया गतिः आवृत्ते यथा गतिप्रतिषेधः आवितो न तस्य प्राणा उत्क्रामंतीति ब्रह्म
विदाप्नोति परमित्यादिषु तत्सत्यप्याप्नोतेर्गत्यर्थत्वे वर्णितेन न्यायेन देशांतर प्राप्त्यसंभवात्स्वरूपप्रतिपत्तिरेवेयम
विद्याध्यारोपितनामरूपविलयापेक्षयाभिधीयते ब्रह्मैव सन्ब्रह्माप्येतीत्यादिवद्वदिति द्रष्टव्यं अपि च परविषयात्
निर्वाख्यायमाना प्ररोचनाय वा स्यात् अनुचिंतनाय वा तत्र प्ररोचनातावद्ब्रह्मविदो न गत्युच्यते स्वसंवेद्येन नि
हितेन विद्यासमर्पितेन स्वास्थ्येनतत्सिद्धेर्न च नित्यसिद्धे निःश्रेयसे निवेदितस्य साध्यफलस्य विज्ञानस्य गत्यनुचिंतने०
कोविदुपेक्षोपपद्यते तस्मादपरविषया गतिः तत्र परापरब्रह्मविवेकावधारणेन परस्मिन्ब्रह्मणि विनिनाना गतिश्रुतयः

रति तदेवमिति तत्र परविद्यायामप्याप्नोतिपदेन गतिः श्रुतेत्याह ब्रह्मविदाप्नोतीतीति वै फलाद्गतेर्न परविषयत्वमित्या
ह अपि चेति अनुचिंतन पक्षं प्रत्याह न च नित्यसिद्धेति कथं तर्हि केषुचित्परविषयत्वेन गतेरुक्तमित्याशंकाभ्यांत्येत्याह तत्रपरापरेति

राम
२५

अथ सर्वं कं परापरब्रह्मविभागं वदन्न परब्रह्मणि गतेरर्थवत्त्वमाह किं हे इत्यादिना व्यापिजीवस्य कथं गतिस्तत्राह सर्वगतत्वे
पीति एवमतत्क्रतुन्यायं निरूप्य गन्तृन्निर्धारयति अप्रतीकालम्बनात् स एतान्ब्रह्म गमयतीत्यविशेषश्रुतेस्तत्क्रतुन्यायाच्च संशयमा
ह इदमिति अनियमाधिकरणे तत्त्वविदोऽन्यत्र सर्वोपासकानां मार्गो पसंहार उक्त इदानीमप्रतीकोपासकानामेव मार्गो न सर्वे

किं हे ब्रह्मणी परम परं चेति वाढं हे एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकार इत्यादिदर्शनात् किं पुनः परं ब्रह्म किमपरमित्युच्य
ते यत्राविद्याकृतनामरूपादिविशेषप्रतिषेधादस्थूलादिशब्दैर्ब्रह्मोपदिश्यते तत्परं तदेव यत्र नामरूपादिविशेषेण केन
चिद्विशिष्टमुपासनायोपदिश्यते मनोमयः प्राणशरीरो भारूप इत्यादिशब्दैस्तदपरं ननु ब्रह्माद्वितीयश्रुतिरूपरुध्य
ते नाविद्याकृतनामरूपोपाधिकतया परिहृतत्वात्तस्य चापरब्रह्मोपासनस्य तत्सन्निधौ श्रूयमाणं स यदि पितृलोककामो भ
वतीत्यादि जगदैश्वर्यलक्षणं संसारगोचरमेव फलं भवत्यनिवर्तितत्वादविद्यायास्तस्य च देशविशेषावबद्धत्वात्तस्य
र्थं गमनमविरुद्धं सर्वगतत्वेऽपि चात्मन आकाशस्येव घटादिगमने बुद्ध्याद्युपाध्यधिगमने गमनप्रसिद्धिरित्यवादिष्म त
द्गुणसारत्वादित्यत्र तस्मात्कार्यवादरिरित्येष एव स्थितः पक्षः परं जैमिनिरित्ययं पक्षान्तरप्रतिभानमात्रप्रदर्शनं प्रज्ञा
विकाशनायेति इदं चात्र अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च सूत्रं स्थितमेतत्कार्यविषयाद्ग
तिर्न परविषयेति इदमिदानीं सन्दिह्यते किं सर्वान्विकारालम्बनानविशेषेणामानवः पुरुषः प्रापयति ब्रह्मलोकमुत कां
श्चिदेवेति किं तावत्प्राप्तं सर्वेषामेवैषां विदुषामन्यत्र परस्माद्ब्रह्मणो गतिः स्यात्तथा ह्यनियमः सर्वेषामित्यत्राविशेषेणैव
षा विद्यान्तरेष्ववतारितेत्येवं प्राप्ते प्रत्याह अप्रतीकालम्बनानिति प्रतीकालम्बनान्वर्जयित्वा सर्वानन्यान्विकारालम्बना
न्नयति ब्रह्मलोकमिति बादरायण आचार्यो मन्यते न ह्येवमुभयथाभावाभ्युपगमे कश्चिद्दोषोऽस्ति अनियमन्यायस्य प्र

॥ तीकव्यतिरिक्तेष्वप्युपासनेषूपपत्तेः तत्क्रतुश्चास्योभयथाभावस्य समर्थको हेतुर्द्रष्टव्यः यो हि ब्रह्मक्रतुः स ब्राह्ममैश्व
र्यमासीदेदिति श्लिष्यते यथायथोपासते तदेव भवतीति श्रुतेर्न तु प्रतीकेषु ब्रह्मक्रतुत्वमस्ति प्रतीकप्रधानत्वादुपासनस्य ननु च
ब्रह्मक्रतुरपि ब्रह्म गच्छतीति श्रुतेर्यथा पञ्चाग्निविद्यायां स एतान्ब्रह्म गमयतीति भवतु यत्रैवमाहत्यवाद उपल
भ्यते तदभावे त्वौत्सर्गिकेन तत्क्रतुन्यायेन ब्रह्मक्रतूनामेव तत्प्राप्तिर्नेतरेषामिति गम्यते ॥ १ ॥

पो विकारोपासकानामित्युभयथाभावोक्तौ पूर्वोक्तविरोधः स्यात्तस्मादुपासकमात्रस्योत्तरमार्गसिद्धिरिति पूर्वपक्षफ
लमिद्धान्ते तूभयथाभावसिद्धिः अदोषादित्यत्र पदच्छेदः अविरोधादित्यर्थः अनियमः सर्वेषामिति सूत्रे सर्वशब्दस्य प्रतीको

अप्रतीकालम्बनाधिकरणम् ॥

पात्र·
व·र·
९३

यद्यपि प्रतीकध्यायिनां पितृयाणात्तृतीयस्थानयोरप्रवेशादर्चिरादिमार्गो वाच्यस्तथापि तेषां विद्युत्पर्यन्तमेव गमनम
स्तन ब्रह्मप्राप्तिर्ब्रह्मक्रतुत्वाभावाद्यो यत्ध्यायति स तत्प्राप्नोतीति हि तत्क्रतुन्यायः अफलः प्रतीकेषु वचनान्नामादिषु ध्येये
षु ब्रह्मणो गुणत्वात् ब्रह्मध्यायित्वमस्त्यस्त्यतस्तन्न्यायस्य पंचाग्निविद्यायामिवाहत्यवादात्यत्र वचनाद्वाधः इष्ट इति सूत्रा

विशेषं च दर्शयति नामादिषु प्रतीकोपासनेषु पूर्वस्मात्पूर्वस्मात्फलविशेषमुत्तरस्मिन्नुपासने दर्शयति
यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवतीति वाग्वाव नाम्नो भूयसी यावद्वाचो गतं तत्रास्य यथाकाम
चारो भवतीति मनो वाव वाचो भूय इत्यादिना स चायं फलविशेषः प्रतीकतंत्रत्वादुपासनानामुपप
द्यते ब्रह्मतंत्रत्वे तु ब्रह्मणोऽविशिष्टत्वात्कथं फलविशेषः स्यात्तस्मान्न प्रतीकालंबनानामितरैस्तुल्यफलत्व
मिति ॥ इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छंकरभगवत्पादकृतौ चतुर्थाध्यायस्य तृतीयः पादः ॥३॥

भाष्यार्थः किंच प्रतीकतारतम्येन फलतारतम्यश्रुतेर्न प्रतीकध्यायिनां ब्रह्मप्राप्तिरित्याह विशेषं चेति तस्मा
द्दत्तनि वचनं ब्रह्मध्यायिन एव ब्रह्मगंतार इति सिद्धं ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदा
नंदभगवत्कृतौ भाष्यरत्नप्रभायां चतुर्थाध्यायस्य तृतीयः ध्यायः ॥३॥ ॥ रामाय नमः ॥

राम
९३

ॐ श्रीगणेशाय नमः एवं पादे ब्रह्मोपासकानां कार्यप्राप्तिक्रमं संप्रति तेषामैश्वर्यविशेषं ब्रह्मलौकिकं पादेऽस्मिन्नवधार्य प्रपंचयि
ष्यन्नादावभिहितं परविद्याप्राप्यनिर्विशेषब्रह्मभावमाह संपद्याविर्भावः निर्गुणविद्याफलवाक्यमुदाहृत्य स्वशब्दस्य स्वीया-
गंतुकरूपस्वात्मरूपवाचित्वाभ्यां संशयमाह एवमिति एवं पद्यते मोक्षस्य स्वर्गादविशेषः सिद्धान्ते विशेष इति फलं तत्र मोक्षस्या-
गंतुकः फलत्वात्स्वर्गवदिति न्यायोपेतयाभिनिष्पद्यत इति श्रुत्या पूर्वपक्षमाह किमित्यादिना स्वशब्दश्रुतिबाधितो न्यायः अभिनिष्प

संपद्याविर्भावः स्वेन शब्दात् १ एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्प-
द्यत इति श्रूयते तत्र संशयः किं देवलोकाद्युपभोगस्थानेष्विवागंतुकेन केनचिद्विशेषेणाभिनिष्पद्यत आहोस्विदात्ममा-
त्रेणेति किं तावत्प्राप्तं स्थानांतरेष्विवागंतुकेन केनचिद्विशेषरूपेणाभिनिष्पत्तिः स्यान्मोक्षस्यापि फलत्वप्रसिद्धेः अभि-
पद्यत इति चोत्पत्तिपर्यायत्वात् स्वरूपमात्रेण चेदभिनिष्पत्तिः पूर्वास्वप्यवस्थासु स्वरूपानपायाद्विभाव्येत तस्माद्विशेषेण
केनचिदभिनिष्पद्यत इति एवं प्राप्ते ब्रूमः केवलेनैवात्मनाविर्भवति न धर्मांतरेणेति कुतः स्वेन रूपेणाभिनिष्पद्यत इ-
ति स्वशब्दादन्यथा हि स्वशब्देन विशेषणमनवकॢप्तं स्यात् नन्वात्मीयाभिप्रायः स्वशब्दो भविष्यति न तस्यावचनी-
यत्वात् येनैव हि केनचिद्रूपेणाभिनिष्पद्यते तस्यैवात्मीयत्वोपपत्तेः स्वेनेति विशेषणमनर्थकं स्यात् आत्मवचनतायां त्वर्थव-
त्त्वे केवलेनैवात्मरूपेणाभिनिष्पद्यते नागंतुकेनापररूपेणापीति कः पुनर्विशेषः पूर्वावस्थास्विह च स्वरूपानपायसाम्ये
सतीत्यत आह मुक्तः प्रतिज्ञानात् २ योऽत्राभिनिष्पद्यते यस्मात्स मुक्तः सर्वबंधविनिर्मुक्तः शुद्धेनैवात्मनावतिष्ठते पूर्वत्र
त्ववस्थात्रयकलुषितेनात्मना इत्ययं विशेषः कथं पुनरवगम्यते मु-
क्तोऽयमिदानीं भवतीति प्रतिज्ञानादित्याह तथा हि एतं त्वेव ते भूयोऽनुव्याख्यास्यामीत्यवस्थात्रयदोषविहीनमात्मानं
व्याख्येयत्वेन प्रतिज्ञाय अशरीरं वाव संतं न प्रियाप्रिये स्पृशत इति चोपन्यस्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः
पुरुष इति चोपसंहरति तथाख्यायिकोपक्रमेऽपि य आत्मापहतपाप्मेत्यादिमुक्तात्मविषयमेव प्रतिज्ञातं फलत्वप्रसिद्धिरपि
मोक्षस्य बंधनिवृत्तिमात्रापेक्षा नापूर्वोपजननापेक्षा यदप्यभिनिष्पद्यत इत्युत्पत्तिपर्यायत्वं तदपि पूर्वावस्थापेक्षया यथा रोगनि-
वृत्तावरोगोऽभिनिष्पद्यत इति तद्वत् तस्माददोषः आत्मा प्रकरणात् ३ कथं पुनर्मुक्त इत्युच्यते यावता परं ज्योतिरुपसंपद्यते

ति श्रुत्या साक्षात्कारवत्त्वमभिप्रायो बंधध्वंसजन्मनोपचारिकं वेति मत्वा सिद्धांतयति एवमिति मोक्षस्य फलत्वेन प्राप्तमागंतुकत्वं निरा-
सार्थः स्वशब्दश्रुतिमुक्तं स्वीयवाचित्वेनानर्थकानुवादः स्यादित्यर्थः स्वं स्वरूपं गृह्णाति कः पुनरिति जाग्रदादिस्थानेऽपि देहधर्मवत्त्वमव-
तिष्ठते नत्विह केनचिदपि च पुत्रादिना शोकोदितो भवति स शुभो नान्यविशेषाज्ञानादिति एष द्वेति वधदपायात्कलुषितेनात्मनातिष्ठतीति मो

कार्यमेव रयिति कार्यज्योतिःशब्दमित्यर्थः कार्यं प्राप्तोपि कृतः किं तस्यात्मिना आह न चाद्येति अविभागेन दृष्टत्वात् स्वरूपस्थितं मुक्त
स्य जीवस्य वा द्विविधा दाहु स्वमेदाभेदसंशये सत्यत्यमेदपूर्वपक्षमक्षासिद्धांतमाह इतियस्मेति ब्राह्मेण जैमिनि उक्तं ब्रह्मस्वरूपमुप
जीव्यतं किं तत्वेन सर्वज्ञत्वादिधर्मेण युक्तं स्तिष्ठति उत धर्मस्य पाणस्त्वं गावद्धत्यंता सत्वाच्चिन्मात्रात्मनातिष्ठति किं वा वस्तुतः चिन्मात्रो

कार्यमोरचरमेवेने आवयन्नि ज्योतिःशब्दस्तीति केज्योतिषि विरुद्धत्वात् न चात्र तत्त्वतो विकारविषयात्कश्चिन्मुक्तो भवि
तुमर्हति विकारस्या तत्व प्रसिद्धेरितितेषयो पायनत्रात्मेवात्र ज्योतिः शब्देन विधते प्रकरणात् य आत्मा पहतपाप्मा वि
जरो विमृत्यु रितिहि प्रकृते परस्मिन्नात्मनि नाकस्माद्धाति कज्योतिः शब्देनोत्तु प्रकृतहाना प्रकृतप्रक्रियाप्रसंगत् ज्योतिः
शब्दस्यात्मन्यपि दृश्यते तद्देवाज्योतिषांज्योति रितिप्रपंचितं च तत् ज्योतिर्दर्शनादित्यत्र अविभागेन दृष्टत्वात् ४ परं ज्यो
तिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यते यः स किं परस्मादात्मनः पृथग्भवत्युताविभागेनैवावतिष्ठत इति वीक्षायां सत
त्र पर्यंतोत्यधिकरणाधिकतत्वनिर्देशात् ज्योतिरुपसंपद्य इति च कर्तृकर्मनिर्देशात् भेदेनैवावस्थानमिति पक्षमन्ति तं प्रत्यु
च्यते अविभक्त एव परेणात्मना मुक्तो वतिष्ठते कुतः दृष्टत्वात् तथाहि तत्त्वमसि अहं ब्रह्मास्मि यत्र नान्यत्पश्यति
ननु न्दृष्टितीयमस्ति न तोन्यदि विभक्तं पश्यादित्येवमादीनि वाक्यान्यविभागेनैव परमात्मानं दर्शयन्ति यथा दर्शनमेव
फलयुक्तं तन्कालत्वयाद् यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमेति च
एवमादीनि मुक्तस्वरूपनिरूपणपराणि वाक्यान्यविभागमेव दर्शयन्ति नद्यादिसमुद्रादिनिदर्शनानि च भेदनिर्देशास्त्वभेदेप्यु
पचर्यन्ते सभगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति आत्मरतिरात्मक्रीड इति च एवमादिदर्शनात् ब्राह्मेण जैमिनि
रुपन्यासादिभ्यः परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इत्युक्तं तत्र स्वेन रूपेणेति अधुनाऽनेन विशे
षवुभुत्सायामभिधीयते स्वमस्य रूपं ब्रह्म अपहतपाप्मत्वादि सत्यसंकल्पत्वावसानं तथा सर्वज्ञत्वं सर्वेश्वरत्वं च
तेन स्वेन रूपेणाभिनिष्पद्यत इति जैमिनिराचार्यो मन्यते कुतः उपन्यासादिभ्यः तथा हि य आ
त्मापहतपाप्मेत्यादिना सत्यकामः सत्यसंकल्प इत्येवमंतेनोपन्यासेनैवमात्मकतामात्मनो बोधयति तथा स
तत्र पर्येति जक्षत्क्रीडन्रममाण इत्यैश्वर्यरूपमावेदयति तस्य सर्वेषु लोकेषु कामचारो भवतीति च सर्वज्ञः सर्वे

पि जीवानां तस्यैव हार्दस्याकल्पितसर्वज्ञत्वादिमानितिकृत्वा निविप्रतिपत्तेः संशये सत्यायं पूर्वपक्षमाह अधुनेत्यादिना
तत्तत्त्वतत्सिद्धिरेवफलं दृष्टव्यमिसान्वेष्टव्य इति विध्यर्थ उद्देशो य आत्मेत्यादिरूपन्यासः वाक्यार्थः आदिपदाद्विधिव्यपदे
शग्रहः तत्राज्ञानज्ञापको विधिरित्याह तथा सत्तत्रेति सर्वज्ञत्वादिव्यपदेशाश्रयेहि नोद्देशः विध्यभावात्रापि विधिः

सत्यत्वादिधर्माणां सत्यत्वं स्वरूपत्वं नासत्यत्वमाह चितितन्मात्रेणेति चितिश्चैतन्यं शब्दज्ञानानुपाती विकल्पो सत्यत्वं प्रयुक्तं
न्ना अस्त्येतावता सत्यत्वं इति यावत् असत्वभावरूपधर्माणाम् असत्वभावधर्माणां न सत्यत्वमित्याशङ्क्यते तेषामप्यौपाधिकत्वाद् सत्वमित्याह
सत्यकामेति चिन्मात्रे मुक्ते जक्षणादिस्फूर्तिः कथं तत्राह अत एवेति सर्वधर्मनिषेधादेवेत्यर्थः धर्माणां सत्यत्वमसत्वं नासत्वं चे
ति पक्षद्वयमयुक्तम् अद्वैतस्फूर्तीनां सर्वज्ञात्वादिस्फूर्तिव्यवहारयोरबाधापातादतस्तृतीयपक्षः श्रेयानिति सिद्धान्तयति
एवमपीति अत्र केचिन्मन्यन्ते अखण्डचिन्मात्रज्ञानान्मुक्तस्याज्ञानाभावात् कुतस्त्याज्ञानिकधर्मयोग इति स्यं बोधनीयाः य

चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ६ यद्यप्यपहतपाप्मत्वादयो भेदेनैव धर्मा निर्दिश्यन्ते तथापि शब्द
विकल्पजा एवैते पाप्मादिनिवृत्तिमात्रं हि तत्र गम्यते चैतन्यमेव त्वस्यात्मनः स्वरूपमिति तन्मात्रेणाभिनिष्पत्तिर्युक्ता तथा
च श्रुतिः एवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेत्येवं जातीयकाश्चैतं हृदयो न भविष्यति सत्यकामत्वाद
वस्तुयपि वस्तुस्वरूपेणाऽऽधर्माऽऽ च्युतैः सत्याः कामा अस्येति न चाप्युपाधिसंबन्धानतात्तेषां न चैतन्यवत्स्वरूपत्सं
वोनैकाकारत्वप्रतिषेधात्प्रतिषिद्धं हि ब्रह्मणो नैकारत्वं न स्थानतोऽपि परस्योभयलिङ्गमित्यत्र अत एव जक्षणादिसं
कीर्तनमपि दुःखाभावमात्राभिप्रायं स्तुत्यर्थमात्मरतिरित्यादिवत् न हि मुख्यान्येव रतिक्रीडामिथुनान्यात्मनि मितानि
पातंसं तेव णीयि तेद्वितीयविषयत्वात्तेषां तस्मान्निरस्ताशेषप्रपञ्चेन प्रसन्नेनाव्यपदेश्येन बोधात्मनाभिनिष्पद्य
त इत्यौडुलोमिराचार्यो मन्यते एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ७ एवमपि पारमार्थिकचैतन्यमात्रस्वरू
पाभ्युपगमेऽपि व्यवहारापेक्षया पूर्वस्याप्युपन्यासादिभ्योऽवगतस्य ब्राह्मस्यैश्वर्यरूपस्याप्रत्याख्यानादविरो
धं बादरायण आचार्यो मन्यते
ईश्वरधर्मास्त एव विदान्मलिमुक्तेर्जीवान्तरैश्वर्यवद्भूयन्त इति न च मल्लादिविषैकाङ्गात्राशक्ता जीवान्तरमिति वाच्यं न वयं
तत्राशेऽजीवान्तरस्य व्यवहारं ब्रूमः किं तर्हि तद्दर्शनात्तेनात्ताऽपारव्याध्यात्मिकशरीरद्वयाभिमानिनो मुक्तावंशान्तरोपाधिका जीव
वाद्यवहर्तार इति वदामः तर्हि नानाविद्यापत्तिरेवमुक्ते नानाविद्ये यत्तेऽ जीवभेदस्यावश्यकत्वादिति चेन्न प्रकृतिनानात्वप्र
तिजीवं प्रपञ्चभेद इत्यादिप्रामाणिकानेकार्थगौरवादिति सर्वं ब्रह्मसंमतं रकाविद्यापक्ष एव श्रेयान् अंशभेदेन
वर्धमस्तिव्यवस्थेति संक्षेपः ॥ ॥ ॥ ॥ ॥

शा॰ब्र॰
वृ॰वृ॰
२५

एवं परविद्याफलमुक्तमिदानीमपरविद्याफलं प्रपंचयति संकल्पादेव तु तच्छ्रुतेः एवकारस्यायोगान्ययोगव्यवच्छेदसाधा
रणत्वात्तत्रायः ब्रह्मलोकं गतस्योपासकस्य संकल्पो यत्नांतरसापेक्षः भोगसामग्रीसंकल्पत्वादस्मदादिसंकल्पवत् न चै
वकारविरोधः संकल्पेन तत्सामग्र्या अयोगव्यवच्छेदेन सौलभ्यार्थत्वात् यत्नानंगीकारे भोगस्यासिद्धेश्चेति एवं पदार्थः
अन्यलोकगतानुसरणफलसिद्धांतेन विद्याबलेन संकल्पस्यैव भोगपुष्कलत्वसिद्धिरिति भेदः किंच यदि भोगसंकल्पा

संकल्पादेव तु तच्छ्रुतेः ८ हार्दविद्यायामाम्नायते स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठं
तीत्यादि तत्र संशयः किं संकल्प एव केवलः पित्रादिसमुत्थाने हेतुरुत निमित्तांतरसहित इति तत्र सत्यपि संक
ल्पादेवेति श्रवणे लोकवन्निमित्तांतरापेक्षता युक्ता यथा लोके अस्मदादीनां संकल्पाद्गमनादिभ्यश्च हेतुभ्यः
पित्रादिसंपत्तिर्भवति एवमुक्तस्यापि स्यादेवं हि दृष्टविपरीतं न कल्पितं भविष्यतीति संकल्पादेवेति तु राज्ञ इव
संकल्पितार्थसिद्धिकरीं साधनांतरसामग्रीं सुलभामपेक्ष्योच्यते न च संकल्पमात्रसमुत्थानाः पित्रादयो मनो
रथविजृंभितवच्चंचलत्वात्पुष्कलं भोगं समर्पयितुं पर्याप्ताः स्युरिति एवं प्राप्ते ब्रूमः संकल्पादेव तु केवला
त्पित्रादिसमुत्थानमिति कुतः तच्छ्रुतेः संकल्पादेवास्य पितरः समुत्तिष्ठंतीत्यादिका हि श्रुतिर्निमित्तांतरापे
क्षायां पीड्येत निमित्तांतरमपि तु यदि संकल्पानुविधाय्येव स्यादस्तु न तु प्रयत्नांतरसंपादनीयं निमित्तांतरमितीष्य
ते प्राक्संपत्तेर्वंध्यसंकल्पत्वप्रसंगात् न च श्रुत्यवगम्येऽर्थे लोकवदिति सामान्यतो दृष्टं संकल्पबलादेव चैषां
यावत्प्रयोजनं स्थैर्योपपत्तिः प्राकृतसंकल्पविलक्षणत्वान्मुक्तसंकल्पस्य अत एव चानन्याधिपतिः ९
अत एव चावंध्यसंकल्पत्वादनन्याधिपतिर्विद्वान्भवति नास्यान्योऽधिपतिर्भवतीत्यर्थः न हि प्राकृतोऽपि संबल
यन्नन्यस्वामिकत्वमात्मनः स्वामिनः संकल्पयति श्रुतिश्चैतद्दर्शयति अथ य इहात्मानमनुविद्य व्रजंत्येतांश्च
सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीति ॥

नेतरमपि यत्नांतरसाध्यनिमित्तापेक्षा स्यान्नहि निमित्तप्राप्तेः प्राग्जातसंकल्पस्य वंध्यत्वं स्याद्योगे विलंबान्ततः सत्यसं
कल्पश्रुतेर्न यत्नांतरसाध्यनिमित्तापेक्षेत्याह निमित्तांतरमिति नन्वीश्वराधीनस्य विदुषः कथं संकल्पमात्राद्भोग
सिद्धिरत आह अत एवेति ईश्वरधर्मा एव विदुषाविर्भूता इति न संकल्पभंग इति भावः ॥ ॥

ब्रम
२५

एवकारश्चमनसैतिविशेषणेनान्ययोगव्यवच्छेदाद्देहाद्यभावइतिपूर्वपक्षइति अभावंबादरिराहह्येवं अत्रापिवादि॰
विवादान्तराणयः तत्रदेहादयोनसन्त्येवेतिचपक्षद्वयंपूर्वपक्षःकालभेदेनेच्छयासन्तिचेतिसिद्धान्तपक्षोद्रष्टव्यःफ॰
लेननतन्नच्छन्तेसर्वत्रोक्तमितिविवेकः द्वादशाहवदिति यथैवंविद्वांसः सत्रमुपयन्तीत्युपायिचोदनागम्यत्वमतो द्वादशा

अभावंबादरिराहह्येवं १० संकल्पादेवास्यपितरः समुत्तिष्ठन्तीत्यादिश्रुतिः मनस्तावत्संकल्पसाधनंसिद्धं शरी
रेन्द्रियाणिपुनःप्राप्तैश्वर्यस्यविदुषः सन्तिनवासन्तीतिसमीक्ष्यतेतत्रबादरिस्तावदाचार्यः शरीरसेन्द्रियाणां चा
भावंमहीयमानस्यविदुषोमन्यते कस्मादेवंह्याहाम्नायोमनसैतान्कामान्पश्यन्रमतेयएतेब्रह्मलोके
इति यदिमनसाशरीरेन्द्रियैश्चविहरेत्तमनसेतिविशेषणंनस्यात्तस्मादभावःशरीरेन्द्रियाणांमोक्षे भाव
जैमिनिर्विकल्पामननात् ११ जैमिनिस्त्वाचार्योमनोवच्छरीरस्यापिसेन्द्रियस्यभावंमुक्तंप्रतिमन्यते यतःसए
कधाभवतित्रिधाभवतीत्यादिनानेकधाभावविकल्पमामनति नह्यनेकविधताविनाशरीरभेदेनाञ्जसीस्यात् य
द्यपिनिर्गुणायांभूमविद्यायामयमनेकधाभावविकल्पःपठ्यतेतथापिविद्यमानमेवेदंसगुणावस्थाया
मैश्वर्यंभूमविद्यास्तुतयेसंकीर्त्यतइत्यतःसगुणविद्याफलभावेनोपतिष्ठतइत्युच्यते द्वादशाहवदुभय
विधंबादरायणोऽतः १२ बादरायणःपुनराचार्योऽतएवोभयश्रुतिलिङ्गदर्शनादुभयविधत्वंसाधुमन्यते य
दासशरीरे तां तदाशरीरइति सत्यसंकल्पत्वात्संकल्पवैचित्र्याच्च द्वादशाहवद्यथाद्वादशाहःसत्रमहीन
श्च भवति उभयश्रुतिलिङ्गदर्शनादेवमिदमपीति तन्वभावेसंध्यवदुपपत्तेः १३ यदातनोःसेन्द्रिय
स्यशरीरस्याभावस्तदा यथासंध्येस्थानेशरीरेन्द्रियविषयेष्वविद्यमानेष्वप्युपलब्धिमात्राएवपित्रादि
कामाभवेत्येवंमोक्षेऽपिस्युरेवमेतदुपपद्यते भावेजाग्रद्वत् १४ भावेपुनस्तनोर्यथाजागरितेविद्यमाना
एवपित्रादिकामाःभवेत्येवंमुक्तस्याप्युपपद्यते प्रदीपवदावेशस्तथाहिदर्शयति १५ ॥ ॥

हसत्रत्वंआसतेतिचोपयन्तीतिवाचोदितत्वंसत्रलक्षणमितिस्थितेः तथाद्वादशाहेनप्रजाकामंयाजयेदितिय
तीचोदनान्नियतकर्तृकत्वाभावेनाहीनत्वादिचद्वादशाहेऽहीनत्वंचेत्यर्थः ॥ प्रदीपवदावेशः ॥ रामायनमः ॥

पातं·
वा·वा·
२६

संकल्पमात्राविर्भिन्नदेहान्प्रजीवयते एभमयाह दर्शनात्तं प्रायमाह भावमिस्त्रनादिलिंगशरीरस्यैकस्मिन्नेवशरीरेभा
वाविर्भितानेकदेहेषु भोगासिद्धिः सर्वपत्तफलसिद्धानेतात्सिद्धिरिति मत्वास्त्रं व्याचष्टे यथेत्यादिना सएकधात्रिधा
पंचधेत्यादिस्मृत्या विद्वषएवानेकधाभावहुक्तः विद्वांस्तु नदेहानापिचिन्मात्रलिंगोपहितात्मनचतस्यलिंगभेद
विनानेकत्वं संभवति अतः स्मृतिबलादेकस्यैवानादिलिंगस्यानेकदेहेषु प्रवेशेन भेदएवद्रष्टव्यः यथापिस्तलप्र
दीपस्यवर्त्यंतरेस्वत्वप्रदीपानांचात्यंतभेदोक्तिलिंगस्यत्तदेहभेदेनतोभेदोनस्वतःस्वतोलिंगभेदेतदुपहितजी
वभेदादनुसंधानानुपपत्तेः आगंतुकानेकलिंगस्य चावसत्कायवादापाताच्चन चापिप्रदीपत्वजात्यैकेनव्या

भावं जैमिनिर्विकल्पामननादित्यत्र सशरीरत्वं मुक्तस्योक्तंतत्र त्रिधाभावादिष्वनेकशरीरसर्गेकिंनिरात्म
कानिशरीराणिदारुयंत्राणीवसृज्यंते किंवासात्मकान्यस्मदादिशरीरवदितिवीक्षातत्र चात्मनमनसोर्भेदानुप
पत्तेरेकेन शरीरेणयोगाच्छिरराणिनिरात्मकानीत्येवंप्राप्तेभणितप्रदीपवदावेशइति यथाप्रदीपएको
नेकप्रदीपभावमापद्यतेविकारशक्तियोगादेवमेकापिसन्विद्वानैश्वर्ययोगादनेकभावमापद्यसर्वाणिश
रीराण्याविशतिकुतः तथाहि दर्शयति शास्त्रमेकस्यानेकभावं सएकधाभवति त्रिधापंचधासप्तधानवधे
त्यादि नैतदाहयं त्रोयमाभ्युपगमेवकल्पतेनापिजीवांतरावेशो तच्चनिरात्मकानांशरीराणांप्रवृत्तिः संभवति
यपात्ममनसोर्भेदानुपपत्तेरनेकशरीरयोगासंभवइतिनैषदोषः एकमनोवर्तीनिसमनस्कान्येवा
पराणिशरीराणिसत्यसंकल्पत्वात्स्रक्ष्यतिहएषु चतेषुपाधिभेदादात्मनोपिभेदेनाधिष्ठातृत्वंयोक्ष्यते
एषैवचयोगशास्त्रेषुयोगिनामनेकशरीरयोगप्रक्रिया

॥ त्विष्येकपारोपाहृष्टांतदार्ष्टांतिकयोः साम्यंडएव्यं तथाचप्रधाप्रदीपोनेकवर्तिषु प्रविशति एवं विद्यायोगबलाद्विद
॥ लिंगस्यव्यापित्वादनेकदेहेषु युगपदावेशइतिसूत्रार्थः विदुषोनेकधात्वं अतमन्यथानन्तदतइत्याह नैतदितिदु
त अस्वात्मकत्वमित्याहनतु चनिरात्मकानामिति यदनादिमनएकदेहस्थं तदनुसारीणिदेहांतरस्थानिमनांसिभवंति
तदवस्थानां तन्नियम्यत्वं संभवादिति अत्रयोगशास्त्रसंमतिमाह एषैवेति निर्माणचित्तान्यस्मितामात्रात्प्रवृत्तिभेदेप्र
योजकं चित्तमेकमनेकेषामितिहिभगवत्पतंजलिनासूत्रितं योगिनोभिमानमात्रान्निर्माणचित्तानि निर्माणदेहेषु भवं

प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषां

राम
२६

ऽन्तरस्यावस्थावर्णनं शोकानाह कथं पुनरिति सलिलवत्सलिलः स्वच्छ इत्यर्थः न तु तद्द्वितीयमस्तीति किंचित्सुषुप्तिमुग्धिकृत्येष्वंक्ते
तत्केन कमित्यादि क्वचिन्नवेदीति प्रकृतेषु एवं विशेषविज्ञानाभाववचनं सुषुप्तिमरणान्यतरापेक्षं सगुणोपासकस्य भोगोक्तौ न विरु
ध्यते भिन्नविषयत्वादित्याह स्वाप्ययेति तत्रैव श्रुतौ तदधिकारवशात्सुषुप्त्यादिप्रकरणबलादुक्तवचनानामन्यतरापेक्षत्वमा
विष्कृतं हि यतस्ततोऽवगम्यत इत्यर्थः अत्र तत्त्वस्यानादिवासनाक्लिष्टविषये यत्र सुषुप्तमरतिविषयमिति विभागः जगद्व्यापारव

कथं पुनर्मुक्तस्यानेकशरीरावेशादिलक्षणमैश्वर्यमभ्युपगम्यते यावता तत्केन कं विजानीयात् न तु तद्द्वितीयमस्ति ततो
ऽन्यद्विभक्तं यद्विजानीयात् सलिल एको द्रष्टाद्वैतो भवतीत्येवंजातीयका श्रुतिर्विशेषविज्ञानं वारयतीत्यत उत्तरं पठ
ति स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि १६ स्वाप्ययः सुषुप्तं स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षत इति श्रु
तेः सम्पत्तिः कैवल्यं ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेस्तयोरन्यतरामवस्थामपेक्ष्यैतद्विशेषसंज्ञाभाववचनं क्वचित्
सुषुप्तावस्थामपेक्ष्योच्यते क्वचित्कैवल्यावस्थाकथनमवगम्यते एतत्तत्रैव तदधिकारवशादाविष्कृतमनेन भोगाभि
भ्यः समन्त्यायतान्यवानुविनश्यतीति प्रेत्य संज्ञास्तीत्यतः सर्वमाप्नोति सर्वमात्मनः [illegible] कामं कामयते तेन के
वल सर्वं पश्यतीत्यादिश्रुतिभ्यः सगुणविद्याविपाकस्थानं त्वेतत्स्वर्गादिवदवस्थान्तरं यत्रैतदैश्वर्यमुपवर्ण्यते त
स्माददोषः जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च १७ ये सगुणब्रह्मोपासनात्सहैव मनसेश्वरसायुज्यं व्र
जन्ति किं तेषां निरवग्रहमैश्वर्यं भवत्याहोस्वित्सावग्रहमिति संशयः किं तावत्प्राप्तं निरङ्कुशमेवैषामैश्वर्यं भवि
तुमर्हति आप्नोति स्वाराज्यं सर्वेऽस्मै देवा बलिमावहन्ति तेषां सर्वेषु लोकेषु कामचारो भवतीत्यादिश्रुतिभ्यः इ
त्येवं प्राप्ते पठति जगद्व्यापारवर्जमिति जगदुत्पत्त्यादिव्यापारं वर्जयित्वान्यदणिमाद्यात्मकमैश्वर्यं मुक्तानां भवि
तुमर्हति जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वरस्य कुतस्तस्य तत्र प्रकृतत्वादसन्निहितत्वाच्चेतरेषां पर एवेश्वरो जगद्व्या
पारेऽधिकृतस्तमेव प्रकृत्योत्पत्त्याद्युपदेशात्

जग्मे संकल्पादेवेत्यादिनोक्तैश्वर्यस्य जगत्सृष्ट्यादिव्यतिरिक्तविषयत्वेनात्रापवादात्संगतिः उभयथादर्शनात्संशयः ईश्व
रनानात्वमेवं पक्षफलं सिद्धान्ते त्वविद्यायोगिनामीश्वरनियमत्वादेकस्य नित्यसिद्धस्येश्वरस्यैव जगत्कर्तृत्वसिद्धिरिति विवेकः
प्रलयोत्सर्गसमये यस्येक्षणपूर्वकं कर्तृत्वं श्रुतौ प्रकृतं तस्यैव नियतत्वादिजगद्व्यापारः न सोपासकानां देहं विनेन्द्रियाणां संभवति

पातंज० च० च० २७

किंचेश्वरस्य नित्यसिद्धत्वाच्छ्रुतेस्तदधिगमत्वाच्च जगत्स्रष्टृत्वं युक्तं न तत्प्रसादलब्धसिद्धानां जीवानामित्याह नित्य
शब्दनिबंधनत्वाच्चेति किंच विदुषां समप्राधान्ये मिथो विरोधः एकं प्रत्यन्ये पारतंत्र्ये त्वेक एवेश्वर इत्याह समनस्क
त्वादिति अधिकारे नियोजयत्वादित्यादी नित्याधिकारिकः सत्वासौ मंडलस्थश्च तस्य प्राप्तत्वोक्तेरित्यर्थः मनसस्त्वमिति स

नित्यशब्दनिबंधनत्वाच्च तदन्वेषणविजिज्ञासनप्रबंधकत्वितरेषामणिमाद्यैश्वर्यं श्रूयते तेनासन्निहितत्वात्तेज
गद्व्यापारे समनस्कत्वादेव चैतेषामनेकमत्यैकस्य चित्तस्थित्यभिप्रायः कस्यचित्संहाराभिप्राय इत्येवं विरोधो
पि कदाचित्स्यात्तस्य कस्यचित्संकल्पमन्यस्य संकल्पस्य विरोधः समर्थ्यान्ततः परमेश्वराकूतेनैवेति तत्त्वमेवेतरेषामि
ति व्यवतिष्ठते प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमंडलस्थोक्तेः १८ अथ यदुक्तमाप्नोति स्वाराज्यमित्यादि
प्रत्यक्षोपदेशान्निरवग्रहमैश्वर्यं विदुषां न्याय्यमिति तत्परिहर्तव्यं अत्रोच्यते नायं दोषः आधिकारिकमं
डलस्थोक्तेः आधिकारिको यः सवितृमंडलादिषु विशेषायतनेष्ववस्थितः परमेश्वरस्तदायत्तैव इयं स्वाराज्यप्रा
प्तिरुच्यते यत्कारणमनंतरमाप्नोति मनसस्पतिमित्याह यो हि सर्वमनसां पतिः पूर्वसिद्ध ईश्वरस्तं प्राप्नोतीति
उक्तं भवति तदनुसारेणैव चानंतरं वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिश्च भवतीत्याह एवमन्यत्रा
पि यथासंभवं नित्यसिद्धेश्वरायत्तमेवेतरेषामैश्वर्यं योजयितव्यं विकारावर्ति च तथा हि स्थितिमाह १९ विका
रावर्त्यपि च नित्यमुक्तं परमेश्वररूपमस्ति न केवलं विकारमात्रगोचरं सवितृमंडलाद्यधिष्ठानं तथा ह्यस्य द्वि
रूपां स्थितिमाहाम्नाय तावानस्य महिमा ततो ज्यायांश्च पूरुषः पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीत्ये
वमादिः न च तन्निर्विकाररूपमिति तदालंबनाः प्राप्नुवंतीति शक्यं वक्तुं अकृतक्रतुत्वात्तेषामतश्च यथैव द्विरू
पे परमेश्वरे निर्गुणं रूपमनवाप्य सगुण एवावतिष्ठंते एवं सगुणेऽपि निरवग्रहमैश्वर्यमनवाप्य तावदै

र्यं मंडलांतस्य परमात्मानस्सवितुर्वरेण्यं धियो यो नः प्रचोदयादिति श्रुतेः तथा च यदि सर्वनिरंकुशं स्वाराज्यमुक्तं स्यात्
प्राप्तानां न स्याद्यतो भोगस्वाराज्येन जगज्जन्मादिषु स्थितिभावः वाक्यानिर्दिकमपीश्वराधीनमित्याह तदनुसारेणेति
उक्तन्याय कामचारादिवाक्यपतिदि पाति एवमिति जगद्व्यापारवर्ज्यमित्यर्थः तदुपासनिष्टत्वात्संकल्पसिद्धा
दिवदित्याशंक्योपास्यस्य निर्गुणस्वरूपे व्यभिचारमाह विकारावर्त्यपि चेति ॥ रामायनमः ॥

निर्गुणस्वरूपे प्रमाणमाह दर्शयतश्चेति यथा ज्ञानाभावान्निर्गुणत्वप्रसंगस्तथा ध्यानाभावाज्जगत्त्व एतत्त्वादिन प्राप्यते ध्यानाभा
वस्त्वविधुभावादिति भावः तस्य पातकके ब्रह्मलोकगतमाह हिरण्यगर्भः मया खल्विमाम्नापोऽभ्यन्तरूपामीयते स्नेह्यते न वा
पसौ लोकोऽस्त्वेतो कलत्तणभ्रम्पर्घः अत्यन्तरमाह यथेति भोगसाम्यदर्शनाय पत्यर्थः तेनोऽद्वय शक्त्यप्यर्थः सलोकतामपी
त्यन्वयः सायुज्यस्थानदेहत्वं क्रमेणान्यक्रिर्वा शास्त्रसमाप्तिं सूचयन्नकारं रजकारे रजयति भगवानिति भगवत्त्वसर्वज्ञत्व

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥२०॥ दर्शयतश्च विकारावर्तित्वं परस्य ज्योतिषः श्रुतिस्मृती न तत्र सूर्यो भाति न चंद्रतार
केनेमा विद्युतो भांति कुतोऽयमग्निरिति न तद्भासयते सूर्यो न शशांको न पावक इति च तदेवं विकारावर्तित्वं परस्य ज्यो
तिषः प्रसिद्धमित्यभिप्रायः भोगमात्रसाम्यलिंगाच्च ॥२१॥ इतश्च न निरंकुशं विकारालंबनानामैश्वर्यं यस्माद्भोगमात्रमेवैषा
मनादिसिद्धेनेश्वरेण समानमिति श्रूयते तमाहापो वै खलु मीयन्ते लोकोऽसाविति यथैतां देवतां सर्वाणि भूता
न्यवंति एवं हैवंविदं सर्वाणि भूतान्यवंति तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयतीत्यादिभेदव्यपदेशलिंगे
भ्यो ननु एवं सातिशयत्वादंतवत्त्वमैश्वर्यस्य स्यात्ततश्चैषामावृत्तिः प्रसज्यतेति अतउत्तरं भगवान्बादरायण
आचार्यः पठति अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥२२॥ नाडीरश्मिसमन्विते नार्चिरादिपर्वणा देवयानेन ये
पायेन ब्रह्मलोकं शास्त्रोक्तविशेषणं गच्छन्ति यस्मिन्नरश्च ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि यस्मिन्नैरं
सं मदीयं सरो यस्मिन्नश्वत्थः सोमसवनो यस्मिन्नपराजिता पूर्ब्रह्मणो यस्मिंश्च प्रभुविमितं हिरण्मयं वेश्म यश्चा
नेकधा मंत्रार्थवादादिप्रदेशेषु प्रपंच्यते ते प्राप्य न चंद्रलोकादिव भुक्तभोगा आवर्तन्ते कुतः तेषामूर्ध्वमायन्नमृतत्व
मेतीत्यादिशब्देभ्यो एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तत इत्या

सच्छारीरकभाष्याणामाचार्ये [illegible] यनादाचार्यत्वं बादरायणपदेन बादरिकाश्रमवासो नारायण नित्यसर्वज्ञस्य परमगुरोर्नारायण
स्य प्रसादयोग्यतानन्तस्मृतीनां [illegible] निरवद्यतां द्योतयति सगुणविद्यायाः सातिशयफलत्वेपि ततो निर्गुणविद्याना
वृत्तिरित्याह अनावृत्तिः [illegible] ब्रह्मलोकं गच्छन्ति ते प्राप्य नावर्तन्ते इति तत्र वेधः लोके विशिनष्टि यस्मिन्नेति इतो
स्मान्पृथ्वीलोकात्तृतीयस्यां दिवि यो ब्रह्मलोकस्तस्मिन्नरइति एप इति चार्णवौ [illegible] धाम्नः [illegible] परसत्रम
॥ ॥ ॥ ॥ ॥
मदीयं मदकरं [illegible] तत्त्वानः [illegible] सन्नवधी

शा॰
व॰ च॰
१८

यद्यपि तेषामिह न पुनरावृत्तिरित्युक्तं तत्र इमं मानवमिति च श्रुतिषु इहेमामिति विशेषणादस्मिन्कल्पे ब्रह्मलोकं गतानां कल्पान्तरे आ-
वृत्तिर्भातीति तथापि स्वविद्याफलत्वेन चार्चिरादिमार्गेण ब्रह्मचर्यादिसाधनैर्ये गतास्तेषां तत्त्वज्ञाननियमाभावादा-
वृत्तिः स्यात्तथापि ये तु दहरादौ स्वविद्यया गतास्तेषां सगुणविद्याफलत्वेऽपि निरवग्रहैश्वर्यानुग्रहलब्धात्मज्ञानान्मुक्ति-
नियमात् स्वाभिप्रेत्याह अनावृत्तिरिति ननु तत्र सूत्रकृता सगुणविदामेवानावृत्तिः क्रममुक्तेर्न निर्गुणविदां तत्र को-
ऽनावृत्तिशङ्का तेषामावृत्तिशङ्काभावादित्याह सम्यगिति तदाश्रयणेनेति सगुणविदामावृत्तिप्रसङ्गेऽस्य सम्यग्दर्शि-
नामाश्रयणेनैवानावृत्तिः सिद्धेत्यन्तः स्वत एव सम्यग्दर्शिनामावृत्तिशङ्का नेति किमर्थं वाच्यमित्यर्थः यत्राध्याये
मासित्रपदमात्रस्याभ्यासो दर्शित इह सूत्रस्य वाभ्यासाच्छास्त्रसमाप्तिं द्योतयन्नित्याह अनावृत्तिः शब्दादिति

अनेन वत्वेऽपि त्वैश्वर्यस्य यथानावृत्तिस्तथा वर्णितं कार्यात्ययेन तदध्यक्षेण सहातः परमित्यत्र सम्यग्दर्शनविध्व-
स्ततमसां तु नित्यसिद्धनिर्वाणपरायणानां सिद्धैवानावृत्तिः तदाश्रयणेनैव हि सगुणशरणानामप्यनावृ-
त्तिसिद्धिरिति अनावृत्तिः शब्दादनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥ इति
श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छङ्करभगवत्पादकृतौ चतुर्थस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

एवं समन्वयोक्त्या ब्रह्मात्मैकत्वस्य वेदान्तप्रमाणकत्वमवधारितं वाक्यार्थज्ञाने स्मृतितर्कादिसर्वप्रकारविरोधः परिहृ-
तः साधनसंपत्तिप्रदर्शिता नत्वा हि विवेकादिसाधनसंपन्नस्य श्रवणाद्याहुतिनिरस्तसमस्तप्रतिबन्धस्याखण्डात्म-
सेवा धात्मसकलबन्धध्वंसे सत्याविर्भूतनिष्फलेकानन्तस्वप्रकाशचिदानन्दात्मना वस्थानमिति सिद्धं नानाविधग्र-
न्थजातवीत्यसमग्रयामति शारीरकस्य भाष्यस्य कृता व्याख्या सतां मुदे १ अन्तर्यामी जगतां साक्षी सर्वकर्ता रघू-
द्वहः अहोऽत्र दोषाशोकायास्यादेशोषस्तेवेति शास्तनात २ वक्तस्पत्तोत्रमयार्पये करतलयुगलेकोत्तमाभोदयाच्छी-
तो कोदण्डदीक्षामयवरयुक्तानां वीत्यरामागतं रामः सत्याः कस्यादितीयं ह्यक्तनमननाभाष्यरत्नप्रभाख्यावाल्मानेदैकलव्यायुवर-
चरणाम्भोजयुग्मं प्रपन्ना ३ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोपालसरस्वतीपूज्यपादशिष्यश्रीगोविन्दानन्द-
भगवत्कृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां चतुर्थस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं

श्रीः संवत् १८ [illegible] लिखितं [illegible]

राम
१८

तर्हि सत्यपि ज्ञाने मुक्तौ विलंबो वा किं न स्यादित्यत आह नन्विति वा यद्यपि हि प्रतिबंधादीपोत्पत्तिविलंबेपुनस्त्वेतन मोक्षे निश्चिति
विलंबादर्शनात् सति ज्ञाने नाज्ञाननिवृत्तौ विलंब इति भावः किंच कर्मणामुपासनानां च गुणभेदेन तारतम्यात्फल-
तारतम्यमुक्तं निर्गुणविद्यायास्त्वेकरूपत्वात्फलैकरूप्यमित्याह विद्याभेदेत्यादिना स्वर्गलोकस्य चित्रगुणविदइ

ननु मुक्तौ कश्चिदतिशयसंभवोऽस्ति विद्याभेदाभावादपि तत्फलविषयमाभावः कर्मफलवत्तु हि मुक्तिसाध-
नभूताया विद्यायाः कर्मणामिव भेदोऽस्तीति सगुणास्वेव विद्यास्तु मनोमयः प्राणशरीर इत्याद्यासु गुणावा-
पोद्वापवशाद्भेदोपपत्तेस्तत्रापि यथा पूर्व फलनियमः कर्मफलवत्तथा च लिंगदर्शनं ते
यथा यथोपासते तदेव भवतीति नैवं निर्गुणाभावात्तथा च स्मृतिर्न हि गतिरधिकास्ति कस्यचित्सति
हि गुणे प्रवदंत्यतुल्यतामिति तदवस्थावधृतेः तदवस्थावधृतेरिति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योत-
यति ॥ इति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यविरचिते शारीरकमीमांसाभाष्ये श्रीशंकरभग-
वत्पादकृतौ तृतीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥ ॥ श्री ॥

त्यर्थः तस्माद्विद्यासमकालैव मुक्तिरिति सिद्धं ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंद
भगवत्कृतौ शारीरकव्याख्यायां भाष्यरत्नप्रभायां तृतीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥ ॥ श्री ॥ श्री
यज्ज्ञानाज्जीवतो मुक्तिरुत्क्रांतिगतिवर्जितः लभ्यते तत्परं ब्रह्म रामनामास्मि निर्भयः ॥ २ ॥ रामायनमः ॥

मुक्तिरत्र विषयः तस्यां विद्यातो विशेषनियमोस्ति न वेति फलसोभयथासंभवात्संशये पूर्वपक्षमाह यथेति मुक्तिः सविशेषा
फलत्वाद्धि द्यावदन्तःकर्मसाध्यान्मुक्तिरिति फले सिद्धान्ते तु निर्विशेषत्वावधारणाच्छ्रुतिबाधितमनुमानमतो ज्ञानैकव्यगाम्यमु-
क्तिरिति फलं किंच श्रवणादितारतम्याद्धि विद्यायां कश्चिदतिशयमंगीकृत्य विद्यालभ्यमुक्तौ नातिशय इत्याह अपिचेति विद्यासा
धनमिति ननु ब्रह्मणो नित्यसिद्धत्वाद्विद्यानिवर्त्यत्वे स्वानुभवे तापत्तेः अनन्यत्वे चासाध्यत्वात्किं विद्याफलमित्यत आह तद्धी
ति विद्यया वाक्यजत्वेन ब्रह्मानंद एव मुख्यं फलमभिव्यक्तिरविद्यानिवृत्तिरानंदस्वरूपस्फूर्तिप्रतिबंधकाभावतया विद्यया साध्यते
मा च निर्वाच्येति न हेतापत्तिरन्यैतसाब्रह्मानन्देत्याद्यः न च साध्यत्वानुपपत्तेस्तत्र विद्यावैयर्थ्यमिति वाच्यं यदभावे यदभाव:

यथा मुमुक्षोर्विद्यासाधनावलंबिनः साधनवीर्यविशेषाद्विद्यालक्षणे फले ऐहिकामुष्मिकफलत्वकृतो विशेषप्र
तिनियमो दृष्टः एवं मुक्तिलक्षणेप्युत्कर्षापकर्षकृतः कश्चिद्विशेषप्रतिनियमः स्यादित्याशंक्याह एवं मुक्तिफला
नियम इति न खलु मुक्तिफले कश्चिदेवंभूतो विशेषप्रतिनियम आशंकितव्यः कुतः तदवस्थावधृतेः मुक्त्यवस्था
हि सर्ववेदान्तेष्वेकरूपैवावधार्यते ब्रह्मैव हि मुक्त्यवस्था न च ब्रह्मणोनेकाकारयोगोस्त्येकलिंगत्वावधारणादस्थू
लमनण्वेव नेति नेत्यात्मा यत्र नान्यत्पश्यति ब्रह्मैवेदममृतं पुरस्तादिदं सर्वं यदयमात्मा स वा एष महानज आ
त्माजरोमरोमृतोभयो ब्रह्म यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतिभ्यः अपि च विद्यासाधनं
स्ववीर्यविशेषात्स्वफल एव विद्यायां कंचिदतिशयमासंजयेन्न विद्याफले मुक्तौ तद्ध्यसाध्यं नित्यसिद्धस्वभावमेव विद्यया
धिगम्यत इत्यसकृदवादिष्म न च तस्यामप्युत्कर्षनिकर्षात्मकोतिशय उपपद्यते निकृष्टाया विद्यात्वाभावादु
त्कृष्टैव हि विद्या भवति तस्मात्तस्यां चिराचिरोत्पत्तिरूपोतिशयो भवन्भवेत् ॥ ॥ ॥

दभावे यदभाव॥ स्त तत्साध्यमिति तत्तानात्सर्वो लोकः प्रवर्तते तथा च विद्याया अभावे ब्रह्मस्वरूपमुक्तेरभावोऽनर्थरूपाश्र
विद्यैवास्ति अतः सा एवं मुक्तिर्नास्तीति व्यवहारविषयत्वेन मुक्त्यभावत्वात्तया च विद्यां विना मुक्तिर्नास्तीति निश्चयाद्विद्या
मपादयते विद्योदये च स्वतः सिद्धनित्यब्रह्मानन्दस्वप्रकाशब्रह्मानंदात्मनावतिष्ठते इत्यनवद्यं संप्रति विद्यायामति-
शयांगीकारं तज्जयति नचेति एकरूपे विषये प्रामाण्योत्तारतम्यानुपपत्तेरित्यर्थः कथं तर्हि पूर्वाधिकर-
णे विद्याया विशेष उक्तस्तत्राह तस्मादिति सत्यामपि सामग्र्यां ज्ञाने विलंब उक्तो न तारतम्यमित्यर्थः ॥

शुद्धिद्वारा यज्ञादिभिः श्रवणादिभुत्पत्तिदृष्ट्या हेतुत्वाविपाविलंबो न युक्तः इत्यतो च विलंबः अतः श्रवणादेर्विद्याहेतुत्वमसिद्धमिति
एवं परं फलप्रतिबंधकसद्भावेपि हेतुत्वसिद्धिरिति सिद्धान्ते फलं मत्वाचित्राद्विवदनियतफलश्रवणादिकमिति सिद्धान्तय
ति एवमिति ननु प्रारब्धकर्मविशेषेण श्रवणादिफलप्रतिबंधः किमिति क्रियते श्रवणादेर्नैव कर्मविपाकः किं न स्यादित्यत
आह उपस्थितविपाचकदेशादिकं कोहम् एवमित्यत आह) तेन चेति देशादिमहिम्ना कर्माणि विपच्यन्त इत्यर्थः तेन श्रवणादिकं मे
वर्तते किमिति न विपच्यते तत्राह यतिचेति विपाचकत्वफलोन्मुखत्वहेतुत्वं ननु तर्हि श्रवणादिविपाचकदेशादिकं कीदृशमित्य

एवं प्राप्ते वदामः ऐहिकं विद्याजन्म भवत्यसति प्रस्तुतप्रतिबंध इत्येतदुक्तं भवति यदा प्रक्रांतस्य विद्यासाधनस्य कश्चित्
प्रतिबंधो न क्रियते उपस्थितविपाकेन कर्मान्तरेण तदैहैव विद्या विपच्यते यदा तु खलु तत्प्रतिबंधः क्रियते तदामुत्रेति
उपस्थितविपाकत्वं च कर्मणां देशकालनिमित्तोपनिपाताद्भवति यानि चैकस्य कर्मणो विपाककानि निमित्तानि तान्येवा
न्यस्यापीति न नियंतुं शक्यते यतो विरुद्धफलान्यपि कर्माणि भवंति शास्त्रं तु एतस्य कर्मण इदं फलमित्येतावति पर्यव
सितं न देशकालनिमित्तविशेषमपि संकीर्तयति साधनवीर्यविशेषात्त्वतीन्द्रियाकस्यचिच्छक्तिराविर्भवन्ति तत्प्रति
बद्धा परस्य तिष्ठंति न चाविशेषेण विद्यायामभिसंधिर्नोत्र यत इहामुत्र वा मे विद्या जायतामिति अभिसंधेर्निरंकु
शत्वात् तत्र श्रवणादिद्वारेणापि विद्योत्पद्यमाना प्रतिबंधक्षयापेक्षत्वैवोत्पद्यते तथा च श्रुतिर्दुर्बोधत्वमात्मनोऽद
र्शयति श्रवणायापि बहुभिर्यो न लभ्यः शृण्वंतोपि बहवो यं न विद्युः आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता
कुशलानुशिष्ट इति गर्भस्थ एव च वामदेवः प्रतिपेदे ब्रह्मभावमिति वदंती जन्मांतरसंचितात्साधनाज्जन्मांतरे विद्योत्प
त्तिं दर्शयति नहि गर्भस्थस्यैव ऐहिकं किंचित्साधनं संभाव्यते स्मृतावपि अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छतीति अर्जुनेन
पृष्टो भगवान्वासुदेवो नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छतीत्युक्त्वा पुनस्तस्य पुण्यलोकप्राप्तिं साधुकुले संभू
तिं चाभिधायानंतरं तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकमित्याद्यनेकजन्मसंसिद्धस्ततो याति परां गतिमित्यनेन एतदेव

तत्राह शास्त्रमपीति फलबलाद्देशादिज्ञानमिति भावः तथापि कर्मणोऽस्य श्रवणादेः प्रतिबंधो न वैपरीत्यमित्यत्र कोहेतोरित्याह साध
नेति प्रतिबंधकत्वशक्तिरपि फलबलाज्ज्ञातव्येति भावः प्रतिबंधकसद्भावे श्रौतस्मार्ते च लिंगमाह तथा चेत्यादिना स्पष्टं श्रुतौ यं न विद्यु
रित्युक्तेः प्रतिबंधसिद्धिरात्मनायुपावहनापास्य यं अद्भुतवक्तेप्सि देवमवतीति एवं लब्धा सा तत्ताकश्चवान्योऽन्ये तेनाशास्त्र
र्यः कुशलेनाचार्येणानुशिष्टोऽपीत्यर्थः असति प्रारब्धकर्मप्रतिबंधे श्रवणादिनैहैव विद्योदयः यज्ञादिभिः तत्पापप्रतिबंध
स्य निरस्तत्वात् तनितं भोग न तन्निरासादमत्र इति विद्याया ऐहिकामुष्मिकत्वविशेषनियम उक्तस्तद्वत्फलेपि मोक्षे कश्चिद्वत्क

र्वं एते विद्यांगत्वेऽस्य त्वादेः पुनरुक्तं सिद्धान्ते भावस्तु दूरे वेति फले पूर्वत्र मौनशब्दस्य ज्ञानातिशये ध्याने प्रसिद्धत्वाद्ध्यानं विधेयमित्युक्तं
तद्दृष्टान्त्येन बाल्यस्य कामचारादौ प्रसिद्धत्वाद्विधिग्रहणमित्याह किं तावदिति कामतश्चरणवदनभक्षणानि यस्य स कामचारवाद
भक्षस्तेनेत्यर्थः यथोपपादयिष्यामः भवन्नत्रादियस्तत्र भावस्तत्त्ववाल्यविधिवलात्पातित्यं शास्त्रमन्यविषयमिति भावः यस्त्वावि
ज्ञानवान्भवत्यमनस्कः सदाशुचिः न स तत्पदमाप्नोति संसारं चाधिगच्छतीत्यादिशौचभित्त्वादिति यमविधिशास्त्रविरुद्धस्य
भावस्तु आख्यबाल्यस्य विधित्संभवान्न यथेष्टचेष्टाविधिरिति सिद्धान्तयति एवमिति प्रधानविरोधित्वाच्च न तद्विधिरित्या

किं तावत्प्राप्तं कामचारवादभक्षता यथोपपादमूत्रपुरीषत्वं च प्रसिद्धतरं लोके बाल्यमिति तन्न दृष्टान्तायुक्तं ननु प
तितत्वादिदोषप्राप्तेर्नायुक्तं कामचारयत्नाश्रयणं न विधावतः तत्त्वमसि नाव चनेसामर्थ्याद्दोषनिवृत्तेः पशुहिंसादिव
वेति एवं प्राप्ते अभिधीयते न वचनसाम्येन तत्समभवादविरुद्धे ह्यन्यासिन्बालक्षणव्याभिलप्यलभ्यमानेन विध्यन्तरव्यावृ
त्तकल्पनायुक्ता: प्रधानोपकारायवाग्विधीयते ज्ञानाभासस्य प्रधानाभिहत्यतो नामतुष्टेयेन च तत्कुलाया बालचर्याया
मङ्गीक्रियमाणायां ज्ञानाभासः संभाव्यते तस्मादान्तरभावविशेषो बालस्यापरूढेन्द्रियत्वादिरिह बाल्यमाश्रीयते
तदाह अनाविः कुर्वन्निति ज्ञानाध्ययनधार्मिकत्वादिभिरात्मानमविख्यापयन्दम्भदर्पादिरहितो भवेद्यथा बालः
प्ररूढेन्द्रियतया न परेषामात्मानमाविः करोतीहत्तेन तद्देवे ह्यस्य वाक्यस्य प्रधानोपकार्यार्थानुगममुपपद्यते तथा च
यं स्मृतिकारैः यन्न सन्तं न चासन्तं नाश्रुतं न बहुश्रुतं न सुवृत्तं न दुर्वृत्तं वेद कश्चित्स ब्राह्मणः गूढधर्माश्रितो विद्वानज्ञातचरितं
चरेत् अन्धवज्जडवच्चापि मूकवच्च महीं चरेत् अव्यक्तलिंगोव्यक्ताचार इति चैवमादि ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्द
र्शनात् पर सर्वापेक्षा यज्ञादिश्रुतेरित्यत्र आरभ्या चावचविद्यासाधनमवधारितं तत्फलं विद्यासिद्धान्ती किमिहैव जन्मनि
सिद्ध्यति उत कदाचिदमुत्रापीति चिन्तितेन किं तावत्प्राप्तमिह वेति किं कारणम् श्रवणादिपूर्विका हि विद्या न च कश्चिदमु
त्र मे विद्या जायतामित्यभिसंधाय श्रवणादिषु प्रवर्तते समान एव तु जन्मन्यभिसंधाय प्रवर्तमाना दृश्यन्ते यज्ञादी
न्यपि श्रवणादिद्वारेणैव विद्यां जनयन्ति प्रमाणजन्यत्वाद्विद्यायाः तस्मादैहिकमेव विद्याजन्मेति ॥ ॥

इह प्रधानेति भावस्तु देहेन्द्रियोपकारकत्वेनान्वयादनाविष्कुर्वन्नवेदिति बाल्यविध्यर्थ इति सूत्रयोजना ऐहिकमपि तं त्यागादि
बाल्यान्ते साधनजातमुक्त्वा तस्याध्याविद्याजन्म विचार्यते इति संगतिं वदन्साधनस्य द्विधा फलसंभवात्संशयमाह सर्वत्यादिनो
कार्यरीतिर्वैदिकफलत्वनियमः श्रवणादीनामित्येवं पक्षमाह किं तावदिति नन्वामुष्मिकफलकयज्ञादिसाध्य
विद्यायाः कथमैहिकत्वनियमस्तत्राह यज्ञादीन्यपीति ॥

स्तुत्यार्थ तात्तात्कारसाधत्वेन थ्यानादेः यज्ञादौ लोकतःप्राप्तिशंकात्वान्नियमविधिमाह नन्वित्यादिना ननु ब्रह्मविद्यापरेकत्वे कथं तत्तां प्रमिति चेत्तत्फलकलत्वपरत्वात्कोविधिविदित्याह विध्यादिवदिति प्रधानतात्मभ्यागपर्यन्तो विधितत्रप्रधानः क्रतुर्विध्यादिस्त एवा विध्यंतरमित्युच्यते इत्यर्थः एतत्स्तत्रभाष्यभावानभिज्ञाः संन्यासाश्रमधर्मश्रवणादौ विधिर्नास्तीति दंति विदो यत्प्राप्तिमात्रमपेक्ष तेनत्त्वभेददर्शनानुप्रावल्यादर्शितमिति संप्रदाय तात्तावतेनानंतरं कुटे वेस्थितोब्रह्मलोकप्राप्तिर्नतु चतुर्न रावतंत इत्युपसंहा रात्संन्यासो नास्तीति शंकार्थः आयासविशिष्टकर्मवाङ्मत्याद्वहिणोपसंहारः कतोन संन्यासाभावादिति समाध्यर्थः संन्यासे

ननु सति विद्यात्वे प्राप्तोत्ये वतत्राति शयः किं मौनविधिनेत्यत आह पक्षेणेति एतदुक्तं भवति यस्मिन्पक्षे भेददर्शनप्राव ल्यात्र प्राप्नोति तस्मिन्नपूर्वविधिरिति विध्यादिवद्यथा दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्येवं जातीयके विध्यादौ सहका रित्वेनाग्न्यन्वाधानादिकमंगजातं विधीयत एवमविधिप्रधाने प्यस्मिन्विद्यावाक्ये मौनविधिरित्यर्थः एवं बाल्यादि विशिष्टे केवल्याश्रमे श्रुतिमति विद्यमाने कस्माच्छांदोग्ये गृहिणोपसंहारो भिसमावृत्त्यकुटुंबे इत्यनेन उपसंह रस्तद्विषयमादरं दर्शयतीत्यनन्तरं पठति कृत्स्नभावात्तु गृहिणोपसंहारः ४८ तु शब्दो विशेषणार्थः कृत्स्ने भावो ह्यस्य विशेष्यते बहुलायासानि हि बहुत्वाश्रमकर्माणि यज्ञादीनि तं प्रतिकर्तव्यत योपदिष्टान्याश्रमान्तरकर्मा णि च यथासंभवमहिंसेंद्रियसंयमादीनि तस्य विद्यंते तस्माद्गृहमेधिनोपसंहारो न विरुध्यते मौनवदितरेषामप्युपदेशा त् ४९ यथा मौनं गार्हस्थ्यं चेत्याश्रमौ श्रुतिमंतावेवमितरावपि वानप्रस्थगुरुकुलवासौ दर्शिता हि पुरस्ताच्छ्रुतिः

चा तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीय इत्याद्यातस्माच्चतुर्णामप्याश्रमाणामुपदेशाविशेषात्तुल्यवद्विकल्पस मुच्चयाभ्यां प्रतिपत्तिरितरेषामितीत्थं योराश्रमयोर्बहुवचनं वृत्तिभेदापेक्षयान्तेष्वान्तभेदापेक्षया वेति द्रष्टव्यं अ नाविष्कुर्वन्नन्वयात् ५० तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदिति बाल्यमनुष्ठेयतया श्रूयते तत्र बाल्यस्य भावः कर्म वा बाल्यमिति तद्धि न सतिबालभावस्य वयोवशेषस्येच्छया संपादयितुमशिवक्यत्वाद्यथोपपादं नत्र गुरीषत्वादिबालचरितमतर्गताभावविशुद्धिरप्रहृष्टेंद्रियत्वं दंभादिरहितत्वं वा बाल्यं स्यादिति संशयः ॥

गार्हस्थ्यहृदयमत्रकृतोक्तं ततोन्यदाश्रमद्वयं नास्तीति कस्य चिद्भ्रमः स्यात्तं निरस्यति मौनवदिति आश्रमद्वयवदित्यर्थः इतरयोरपीति वाच्ये बहुत्वं स्वांतरभेदमपेक्ष्य तच्चास्माभिः प्राग्दर्शितः अनाविष्कुर्वन्नन्वयात् तत्र बाल्यविषये तं हितस्य भावार्थत्वात्सभवात्कर्मार्थतं गृहीत्वा तिष्ठेन्नित्यादिकमिणोप्रहृष्टेंद्रियत्वादिरूपभावस्थेष्टे बालकर्मत्वाविशेषा

सहकार्यंतरविधिः स्यात्सर्वं ब्राह्मणं आत्मानं विदित्वा सम्यगभिज्ञाचर्यं चरंति तस्माद्यत्नतोऽपि ब्राह्मणं आपातज्ञानरूपं पण्डा तद्वान्पंडि
तस्तस्य भावः पांडित्यं श्रवणं तन्निर्विद्य निःशेषं कृत्वा बाल्येन लब्धबालेन श्रवणजन्यज्ञानस्य बलभावेन मननेनासंभावनानिरासेन बालस्य भावे
न वा स्थातुमिच्छेत्तद्वितत्वेन स्थातुमिच्छेदेवं मननं श्रवणं कृत्वा ध्यानं तदनंतरं निर्विद्य ध्यानस्य न कृत्स्नादेव समौनं मौनादन्यद्बाल्यपांडित्यद्वय
मौनं च निर्विद्य ध्यानस्य न लब्धा अथ ज्ञानसामग्रीपाकल्यानंतरं ब्रह्माहमिति साक्षात्कारवान्ब्राह्मणो भवतीत्यर्थः मौनशब्दस्य सिद्धरू
पे पारिव्राज्ये नैव च ध्याने प्रयोगात्तथापि यः यथा तद्वक्तृत्वादिवाक्यशेषोडशीयायुपासनस्यापि ज्योतिर्णायस्तद्वद्य ब्राह्मण
इति विधिहीनवाक्यशेषान्मौनस्य विधेयत्वनिश्चय इति पूर्वपक्षमाह नविधीयत इति अत्र ध्यानस्यानन्यस्यानेन सिद्धो नेत्वनुस्य

सहकार्यंतरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ४७ तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पांडित्यं
च निर्विद्याथ मुनिरमौनं च निर्विद्याथ ब्राह्मण इति बृहदारण्यके श्रूयते तत्र संशयो मौनं विधीयते न वेति नविधीयत इति तावत्प्रा
प्तं बाल्येन तिष्ठासेदित्यत्रैव विधिरेव सतत्वात्तत्र हायमनतिरिक्तत्र विधायकाविभक्तिरुपलभ्यते तस्मादयमनुवादः युक्तः कु
तः प्राप्तिरिति चेत् मुनिपंडितशब्दयोर्ज्ञानार्थत्वात् पांडित्यं निर्विद्येत्येव प्राप्तं मौनमपि चामौनं च निर्विद्याथ ब्राह्मण इत्यत्र तावत्
न ब्राह्मणत्वं विधीयते प्रागेव प्राप्तत्वात् तस्मादथ ब्राह्मण इति प्रशंसावादस्तथैवाथ मुनिरित्यपि भवितुमर्हति समाननिर्देशा
त्वादिति एवं प्राप्ते ब्रूमः सहकार्यंतरविधिरिति विद्यासहकारिणो मौनस्य बाल्यपांडित्यवद्विध्याश्रयत्वं युक्तं अपूर्वत्वात् ननु
पांडित्यशब्देनैव मौनस्यावगतत्वमुक्तं नैष दोषः मुनिशब्दस्य ज्ञानातिशयार्थत्वान्मननान्मुनिरिति च व्युत्पत्तिसंभवात् मुनी
नामप्यहं व्यास इति च प्रयोगदर्शनात् ननु मुनिशब्द उत्तमाश्रमवचनोऽपि श्रूयते गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थमित्यत्र
न वाल्मीकीमुनिः इत्यादिषु व्यभिचारदर्शनात् इतराश्रमसंनिधानात् पारिशेष्यात्तत उत्तमाश्रमोपादानं ज्ञानप्रधा
नाद्युत्तमाश्रमस्य तस्माद्बाल्यपांडित्यापेक्षया तृतीयमिदं मौनं ज्ञानातिशयरूपं विधीयते यत्तु बाल्यस्यैव विधिप्रधानत्वं सामनि
ति तथाप्यपूर्वत्वान्मौनस्य विधेयत्वमाश्रीयते मुनिः स्यादिति निर्वेदनीयत्वनिर्देशादपि मौनस्य बाल्यपांडित्यवद्वि
धेयत्वाश्रयणं तद्वतो विद्यावतः संन्यासिनः कथं विद्यावतः संन्यासिन इत्यवगम्यते तदधिकारादात्मानं विदित्वा पुत्राद्येष

णामिति फलं यदि मौनं पारिव्राज्यं तदा वाक्यांतरप्राप्तमनत्वपि बाल्यविधिप्रशंसार्थं यदि ज्ञानं तदा पांडित्यशब्दात्प्राप्तमिति पूर्व
पक्षप्रयोजनं मुनिशब्दात् ज्ञानातिशयः प्रतीयते न सज्ज्ञानमात्रं वाचि पांडित्यशब्दात्प्राप्तिर्नास्ति मुनिशब्दः परिव्राड्वाचकः वाल्मी
क्यादिषु प्रयुज्यमानत्वात् तस्मादपूर्वं मौनं नर एवं त्वाद्विधिकल्पनेति सिद्धांतयति एवमित्यादिना आपातत्वप्रयोगस्यैर्गतिमाह इ
तराश्रमेति किं चामौनं च निर्विद्येति श्रवणमननवदनुष्ठेयत्वोक्तेर्मौनस्य विधीयत इत्याह निर्वेदनीयत्वेति न तत्र पूर्वापराणि
धानेवाक्यभेदे दोषः इत्यवधारणादिति त्वाद्वाक्यभेदस्येतिभावः कस्य ध्याने विधीयत इत्यत्राह तद्वत इति आत्मानं विदित्वेति

बहिरुभयथापि कृतप्रायश्चित्तैस्तैः सह कृतं श्रवणादि कृज्ज्ञानसाधनं न वेति संदेहे नैष्ठिकत्वात्साधनमिति प्राप्ते प्रायश्चित्तात्फलो
कृतेऽपि स्वाध्यत्वे पत्रशुद्ध्यभावान्न साधनमिति सिद्धान्तयति बहिर्यति तत्राभाष्यं स्वामिनः फलश्रुतेः आर्त्विज्यं पाल्लेऽभयक
त्तकर्तृत्वं संभवात्तेष्वयः यः कृतप्रायश्चित्तः स सव्यवहार्यः उत्सर्गस्य निंदाति प्रायस्त्वात् नैष्ठिकादि स्वबाधवयोपदेशकर्तृता
तत्र प्रायश्चित्तस्य कर्तृत्वमुत्सर्गस्य कर्तृः फलश्रुत्याबाध इति पूर्वपक्षमाह किमिति अत्र कर्तृत्वं भोक्तृत्वयोरेकाधिकरण्यं
फलसिद्धान्तेऽत्वग्नायश्चित्ताः स्वत्विक्क्त्यकाः स्मृपुपासनायाः यजमानगामिस्वं तत्र फलाः किमुत वान्यः सति एव न ह्यविषयायाः स्वामि
गामिनिति फलेविवेकावस्थातः पादसंगतिः हिंकारप्रस्तावोद्गीथप्रतिहारनिधानाख्यपंचप्रकारे सामन्नि दृष्टिध्यानवर्षे

बहिस्तूभयथापि स्मृतेराचाराच्च ४३ यद्यपि नैष्ठिकाद्यश्रमेभ्यः प्रच्यवनं महापातकं यदि वोपपातकमुभयथापि
शिष्टैर्बहिः कर्तव्याः आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महा इति आरूढ
पतितं विप्रं मंडलाच्च विनिःसृतं उद्बद्धं कृमिदष्टं च स्पृष्ट्वा चान्द्रायणं चरेदिति चैवमादि निंदातिशयस्तेभ्यः शिष्टा
चाराच्च न हि यज्ञाध्ययनविवाहादीनि तैः सहाचरंति शिष्टाः स्वामिनः फलश्रुतेरित्यात्रेयः ४४ अंगेषूपासनेषु सं
शयः किं तानि यजमानकर्माण्याहोस्वित् ऋत्विक्कर्माणीति किं तावत्प्राप्तं यजमानकर्माणीति कुतः फलश्रुतेः फलं
हि श्रूयते वर्षति हास्मै वर्षयति ह य एतदेवं विद्वान्वृष्टौ पंचविधं सामोपास्त इत्यादि तच्च स्वामिगामि न्याय्यं तस्मिं
न्प्रयोगे फलस्य कर्तृत्वात्तदधिकारित्वाच्चैवंजातीयकस्य फलं च कर्तृपासनानां श्रूयते वर्षति हास्मै य एतदुपासते
इति ननु चेद्विजातिफलेऽप्यन्यस्वायजमानायवापकाम इत्यादिनेत्यगायतीति न तस्य वाचनिकत्वात् तस्मात्स्वामि
न एव फलवत्सूपासनेषु कर्तृत्वमित्यात्रेय आचार्यो मन्यते आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ४५ नैतदस्ति
स्वकर्मण्युपासनानि स्युर्ऋत्विक्कर्माण्येतानि स्युरित्यौडुलोमिराचार्यो मन्यते किं कारणं तस्मै हि साङ्गाय कर्मणे ऋत्विक्
परिक्रीयते तत्प्रयोगान्तःपातीनि चाङ्गोपासनान्यधिकाराविलानि तस्मात् गोदोहनादिनियमवदृत्विग्भिर्निर्वर्त्य
रन् तथा च तत्र हवको दाल्भ्यो विदांचकार स ह नैमिषीयानामुद्गाता बभूव स ह स्मैभ्यः कामानागायति इति ऋत्विक्
कर्तृकत्वं दर्शयति फलश्रुतेस्तु न दोषः परार्थत्वादृत्विजो न्यत्र वचनात्फलसंबंधानुपपत्तेः श्रुतेश्च ४६ यां वै कां चन यज्ञे
ऋत्विज आशिषमाशासत इति यजमानायैव तामाशासत इति होवाच तस्मादु हैवंविदुद्गाता ब्रूयात्कं ते काममागायानी
त्यादिः फलमिति अन्यथेः श्रुते फलस्वामित्वेन नेति किं तस्मादित्यत आह नत्वेति यथा सांग कर्तृत्वं धिकृताधिकारत्वाद्गो दोहनस्य फ
लं फलं कर्तृत्वधिकारिगतं नेह दृष्टौ पासनस्यापि फलं तत्कृतमेवेत्यर्थः अस्तु तस्य फलेन कर्तृकर्तृत्वं स्यात् किं तस्मादित्यत आह फलं चेति
यद्यप्ययजमानगामि फलमिति तस्यापवादः शंकते नन्विति श्रुतेनेन साधयतीत्यर्थः यजमानफलसिद्ध्यर्थत्वं सति वाधकवचने सिद्धे
ति तिसमाध्यर्थः तस्मात्फलभोक्तृत्वा दित्यर्थः उपासनमार्त्विज्यमृत्विक्कर्तृकमित्यत्र श्रौतलिंगमाह तथा चेति नैमिषीयाख्यसत्रे प्राणदृष्ट्या

राम
७१

अकृतप्रायश्चित्तस्य कर्मजातेहेतुर्न भवतीति फलेसिद्धौ तेन भवतीति भेदः यथोपनयनकाले होमो लौकिकाग्नावेव कार्यः दारासंबं
धोत्तरकालविहिताधानस्य संप्रत्यमासकालत्वेनाहवनीयाभावात् तद्वदवकीर्णिनो ब्रह्मचारिणः प्रायश्चित्तपशुर्गर्दभो लौकिका
ग्नौ होतव्य इत्यधिकारलक्षणे षष्ठाध्याये निर्णीतं प्रायश्चित्तमाधिकारिकं तदुपकुर्वाणस्यैव न नैष्ठिकस्येति प्राभ्रमसिद्धान्तयति उप
पूर्वमिति उपपदं एवं यस्य पातकस्य न तदुपपातकमित्यर्थः प्रायश्चित्तं न पश्यामीति दर्शनाभावस्ततः प्रायश्चित्ताभावपरत्वकल्प
यित्वा तस्मलक्ष्मनिकल्पनात्प्रागेव स्मृतसमाधारणस्मृत्या प्रायश्चित्तसद्भावसिद्धेः कल्पनेनादेतिकुमस्मृतिविरोधादिति भावः
प्रायश्चित्तस्य भावाभावप्रतिष्ठौ समवेत्य विभाव्य प्रसिद्धेः स्मृतिनलत्वादादन्तेवमेव सम्यसमतिमाह तदुक्तमिति पवमयस्मृतौ
यवयवशब्दं केचिद्दीर्घं म्लेच्छप्रयुञ्जते केचिद्देशविशेषे प्रियङ्गुषु अतः कस्य चरुः कार्य इति संदेहे स्वतियोगसाम्यात्समानत्वाविक
ल्पेन प्रतिपत्तिस्यादिति प्राप्ते सिद्धान्तः शास्त्रस्थत्वात् प्रतिपत्तिः शास्त्रनिमित्तत्वाद्धर्मादिज्ञानस्यतेनार्याचयदाम्नातोऽपधयोऽस्ता।

उपपन्नं मापित्वे केभावमशनवत्तदुक्तं ४८ आपिन्वक आचार्या उपपातकमेवैतदितिमन्यन्ते यत्रैष्ठिकस्य गुरुदारादि
भोगस्तत्र ब्रह्मचर्यविपर्ययेन तन्महापातकं भवति गुरुतल्पादिषु महापातकेष्वपरिगणनात्तस्मादुपकुर्वाणक
वन्नैष्ठिकस्यापि प्रायश्चित्तस्य भावमिच्छन्ति ब्रह्मचारित्वाविशेषादवकीर्णित्वाविशेषाच्चाशनवद्यथा ब्रह्मचारि
णो मधुमांसाशने व्रतलोपः पुनःसंस्कारश्चैवमिति येहि प्रायश्चित्तस्याभावमिच्छन्ति तेषामनमूलमुपलभ्यते येनभा
वमिच्छन्ति तेषां ब्रह्मचार्यवकीर्णी येन दविशेषश्रवणमूलेनैतन्नाद्य वा पुरुषान्तरः तदुक्तं प्रमाणलक्षणे समाविप्रतिपत्तिः
साच्छास्त्रस्याकाततेत्रिमितत्वादिति प्रायश्चित्ताभावस्मरणं त्वेवं न जियन्तगौरवात्प्रादनायमिति व्याख्यातव्यं एवमित्त्व
वैखानसयोरपि वानप्रस्थयोर्दोषाभेदे कृच्छ्रे द्वादशरात्रे चरित्वा महाकक्षं वर्धयेद्वनस्थवानप्रस्थवत्सोमवद्धिं वंजस्त्र शा।
स्त्रसंस्कारत्येव मादिप्रायश्चित्तस्मरणमनुसर्तव्यं ॥

उपायनस्यासम्भवत्वात्तत्राप्यहानिलक्षणंबीजत्वमितिशंकातावशरणपापयोःफलतःस्वीकारात्मकस्योपायनेहानिंविनानुपपत्तेःसल
क्षणंनिर्णीनकमितिपरिहरति यद्यपीत्यादिना यद्यप्यत्रश्रुतमोडुवरत्वादिकंकुशादेर्निर्णायकंतत्रयेदमुपायनविधूननस्यहा
नत्वनिश्चायकमित्याह कोविदपीति विधूननंनम्रत्वंकिमितिनोच्यतेतत्राह नवेति तत्यापिहानेकपत्वत्वत्तेतदृत्याशंकासस्त्व
मेवधारिताह अस्वमेवेति अनुपपत्तिमेवथालक्षणंबीजरूपावृत्कालत्तकपदंनिर्दिशति अश्वइवेति विधूयेतिपदंदृष्टा
नेहानपर्यंतदार्ष्टांतिकेपिहानलत्तकमित्यत्यर्थः यद्वाहानवाचकमेवाल्लनचधत्केपनइतिधातुपाठविरोधस्तस्योपलक्षणंचे
त्यादिमाह अनेकेति शाखान्तरस्थमुपायनेविधूननस्यहानत्वनिश्चायकमित्यत्रजैमिनिसूत्रंतदुक्तमितिगृहीतेश्चेत्याख्या

यद्यपीदंपरकीययोःसुकृतदुष्कृतयोःपरैरुपायनंनांजसंसंभाव्यतेतथापितत्कीर्तनानातावत्तदानुगुण्येनहानमेवविधूननं
नामेतिनिर्णीतुंशक्यंतत्कविदपिचेदविधूननसंनिधावुपायनंश्रूयमाणंकुशाछंदस्तुत्युपगानवद्विधूननस्यश्रुत्यासर्वत्रा
पत्तमुणसार्वत्रिकंनिर्णायकारणंसंपद्यते नचचालनेध्वजाग्रवत्सुकृतदुष्कृतयोर्मुख्यंसंभवति अद्रव्यत्वात् अश्वइवरो
रोमाणिविधूनन्त्यजन्तुजनःसहैवतनरोमाणिपिजीर्णानिशातयति अश्वइवरोमाणिविधूयपापमितिचब्राह्मण
अनेकार्थत्वाद्धातूनामाधुधातूनामस्मरणविरोधःतदुक्तमितिव्याख्यातं सांपरायेतर्तव्याभावात्तथाह्यन्ये ॥२८॥ देवयानेन
पथापर्यंकस्थंब्रह्माभिप्रास्थितस्तस्याध्वनिसुकृतदुष्कृतयोर्वियोगंकौषीतकिनःपर्यंकविद्यायामामनंति सएतंदेवया
नंपंथानमासाद्याग्निलोकमागच्छतीत्युपक्रम्यसआगच्छतिविरजांनदींतांमनसैवात्येतितत्सुकृतदुष्कृतेविधुनुतइ
ति तत्किंयथाश्रुतमध्वन्येववियोगवचनंप्रतिपत्तव्यमाहोस्विदादावेवदेहादपसर्पणइतिविचारणायांश्रुतिप्रामा
ण्यात् यथाश्रुतंप्रतिपत्तिप्रसक्तावपठति सांपरायइति सांपरायेगमनएवदेहादपसर्पणइदंविद्यासामर्थ्यात्सुकृतदुष्कृत
हानंभवतीतिप्रतिजानीते हेतुंव्याचष्टे तर्तव्याभावादिति नहिविदुषःसंपरेतस्यविद्ययाब्रह्मप्रेप्सतोंतरालेसुकृतदुः
कृताभ्यांकिंचित्प्राप्तव्यमस्ति यदर्थंकतिचित्क्षणान्यक्षीणेतेकल्प्येयातां विद्याविरुद्धफलत्वात्तुविद्यासामर्थ्येनतयोःक्षयः
तमित्यर्थः एवंविधूननस्यहानित्वसिद्धेःकेवलहानावुपायनोपसंहारइतिसिद्धं सांपरायेत्यवधनिर्णयार्थमार्गेपूर्वोक्तविधूननस्यहा
नत्वमुपजीव्यहानस्यनदीतरणानंतर्यश्रुतेःअश्वइवरोमाणीत्यादावदेहत्यागात्मकालत्वश्रुतेश्चसंशयमाह तत्किमिति ब्रह्मलोकं
मार्गमध्येविरजाख्यनदींमनसात्येतितत्सुकृतदुष्कृतेइत्यत्रतदितिसर्वनामश्रुत्यातेनत्ययथेतयासत्त्वेविहितनदीतरणासकमेहानिरि
त्वोक्तेरर्धेयेकर्मत्वायइतिपूर्वपक्षः तत्रविद्यापाकमेत्यइतत्वासिद्धिःफलपूर्वपक्षेसिद्धांतेतनसिद्धिरितिमत्वासिद्धांतमाहि
सांपरायइति मरणात्प्रागित्यर्थः संपरेतस्यज्ञस्यकंचित्कालेकर्मसत्त्वेफलाभावाद्देवयानमार्गप्रवेशायोगाच्चादावेवत्यइत्यर्थः

भा० न०
प्र० र०
४२

एवं द्रुह्विकल्पपरिहारायमित्रशाखाव्यवस्थयोरप्येकवाक्यतां जैमिनिसंमतेत्याह तद्वक्तिमिति ज्योतिष्टोमप्रकरणे दीक्षितो न जुहोतीति श्रुतं
यावज्जीवमग्निहोत्रं जुहुयादिति चान्यत्र श्रुतं तत्र यदि न दीक्षितवाक्यं होमप्रतिषेधकं स्यात् तदा कृत्वर्थत्वान्निषेधान्त्र यावज्जीव
विधिना होमावानुष्ठेय इति विकल्पः स्यात्तथाप्यस्यापि तु यावज्जीववाक्यं प्रति न दीक्षितवाक्यस्य शेषत्वान्नकारस्तत्र पर्युदासार्थ
कः स्यात् दीक्षितान्यल्लक्षकः स्यात्ततो होमप्रतिषेधस्तस्माददीक्षितेन यावज्जीवं जुहुयादित्येकवाक्यतेति नदीक्षिताधिकरणसिद्धांत
सूत्रार्थः अत्र भगवत्पादैः सूत्रमेव पठितमित्यस्तु पर्युदासाधिकरणसिद्धान्तस्तत्र अपितु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधी
नामेकदेशः स्यादिति स्थितमत्रार्थतः पठितमित्युक्तं तच्चिंत्यमत्रार्थस्तु यज्ञमात्रे ये यजामह इति प्रयोक्तव्यमिति श्रुतं नानुया
जेषु येयजामहं करोतीत्यपि श्रुतं तत्र नकारस्य निषेधकत्वे अतिरात्रे षोडशिग्रहणाग्रहणयोरिवानुयाजेषु यजत्वाविशेषात्त्र
यानुयाजं निषेधात्तत्र यागव्यमिति विकल्पः स्यात्तस्मान्याय्यत्वाय येयजामह विधेर्वानुयाजवाक्यमेकदेशः स्यान्नपर्युदासत्वाविधि
वाक्यशेषः स्यादिति यावता चानुयाजभिन्नेषु यागेषु येयजामह इति प्रोक्तव्यमित्येकवाक्यतेति वर्णिकांतरमाह अथवेति एवं ४६

तदुक्तंहादशलक्षणं अपि वाक्यशेषत्वादितरपर्युदासः स्यात्प्रतिषेधविकल्पः स्यादिति अथवेतास्वविधूननमिति
यते तत्तत्र ऐणेनाश्विनेयेन व्यं किमनेन विधूननवचनेन तत्कृतं तदुःखतया हानिरभिधीयते किंवा यंतरमिति तत्र चेवमापाद्य
ते तव्यहाने विधूननमभिधीयते धूञ् कंपने इति स्मरणात् ध्वयते ध्वजाग्राणीति च वायुना चालनमात्रेषु ध्वजाग्रेषु प्रयोगदर्श
नात्तस्माच्चालनं विधूननमभिधीयते चालनं च सुकृतदुष्कृतयोः केचित्कालफलप्रतिबंधनादित्येवं प्राप्ये प्रतिवक्ष्यहा
नावेवास्य विधूननशब्दो वर्तितुमर्हति उपायनशब्दशेषत्वात् नहि परपरिग्रहभूतयोः सुकृतदुष्कृतयोरग्रहणेऽपरे
णोपायनं संभवति

अविधूननेन कर्महानिरिति सिद्धं वक्ष्यत्युपायनोपसंहारप्रकृते अत्र सैव साध्यते इति भेदः उभयत्र लक्षणासाम्यात्संशयमाह
किमिति धूननस्य हि फलद्वयमस्य रोमादिषु दृष्टं एवं सभावाच्युतेरन्यत्र संक्रांतिरूपे इति तत्र संक्रांतिरूपहानिलक्षणया
किंवा च्युतिरिति संशयः पूर्वः तत्र विधूननशब्दस्य कंपने मुख्यार्थ इति तावत्सर्वसंमतं न चामूर्तयोः सुकृतदुष्कृतयोर्न संभवति
अतस्तत्पार्श्वे स्वभावः फलदातृत्वशक्तिस्तत्र चालनं विपयाप्रतिबंधाच्युतिः सा लक्षणीया न हानिरन्यत्र संक्रांत्य
योगात्यसापेक्षत्वाच्चेति एवं पूर्वपक्षे सिद्धांतयति हानावेवेति यदि च्युतिमात्रं लक्ष्येत तदा पर्यंती त्यनन्विता स्यात्तत्र च यत्र
धूनोते रुपायनशब्दसान्निध्यं तत्र हानिर्लक्ष्यते न केवलधूनोतेः हानिस्थानित्र विशेषः सेवकादीनल्पकर्मसंक्रांतिरिति
नाम भवतीति वाच्यं केवलधूनोतेरपि मुख्यार्थासंभवेनान्यत्र लक्ष्यतया बुद्धिस्थहानिलक्षणाया एव युक्तत्वादिति भावः ॥

विद्याविज्ञानात्मकपादेस्तुतिविचारस्यकासंगतिरित्यतआह तस्मादिति शाखांतरस्योविशेषः शाखांतरेपिग्राह्यः तत्रदृष्टांत
नाह कुशेतिकुशाउद्गात्रणांस्तोत्रगणनार्थाः शलाकादारुमय्यः औदुंबर्यएवानस्पत्याः वनस्पत्यमहानृत्तावनस्पतिःतन्म
भवाःस्यताअथभजापद्यमापातेमोस्त्वेतियजमानप्रार्थनाअत्रताइतिस्त्रीलिंगनिर्देशादौदुंबर्यइतिभाष्याच्चशलाका
त्मकपाशावस्यस्तोत्रंतमतंग्राह्मविषयस्यनस्तोत्रंतमस्त्रोकुशामिसन्तुशासनात्छंदोहइत्येतत्व्याचष्टे यथाचेति नवान्तराणिछंद
सिश्राहवाणयन्यानिदृष्टानितेषांकचिच्छंदोभिस्तवतंइत्यत्राविशेषप्राप्तौपौंगिवाक्याद्विशेषग्रहइत्यर्थः स्तुतिगुणेति
यथेति अतिरात्रषोडशिनाग्रहस्यगान्भजंस्तोत्रंकदेतिछंदोगादीनामांकानामन्दयस्यसमयाविशेषस्यषोडशिनस्तोत्रमित्याच॥

तस्मात् गुणोपसंहारविचारप्रसंगेनस्तुत्युपसंहारप्रकारंदर्शनार्थमिदंसूत्रं कुर्याद्वेदंस्तुत्युपगानवदितुमोपादा
नेतयथाभाल्लविनांकुशावानस्पत्यास्यतामापातेत्येतस्मिन्निगमेकुशानामविशेषेणवनस्पतियोनि[illegible]
त्वश्रवणेशाट्यायनिनामौदुंबराइतिविशेषवचनादौदुंबर्यःकुशाआश्रीयंते यथाकचिद्वासूरंछंदसामविशे
षेणपौर्वापर्यप्रसंगेदेवच्छंदोभिर्ण्वाणिनिपांपाम्नातानाम्नीयते यथाचषोडशिस्तोत्रकेषांचित्कालाविशेषप्रा
तौसमयाध्युषितेस्तर्यस्तुत्पाचं अन्तेःकालविशेषप्रतीतिः यथैवचाविशेषेणोपगानमात्रंकेचित्समामनंति
विशेषेनभाल्लविनः यथैतेषुकुशादिषुश्रुत्यंतरगतविशेषान्वयःएवंहानावपुपायनान्वयइत्यर्थः श्रुत्यंत
रकृतंहिविशेषंश्रुत्यंतरेणाप्युपगच्छेतःसर्वत्रैवविकल्पःस्यात्तस्यचानाप्यःसत्यांगतौ ॥ ॥

ने धी

श्रुतेःकालविशेषग्रहणंइत्यर्थः ऋचोयतइत्याचार्यःउपगानंविभजते यथेति ऋत्विजउपगायंतीत्यविशेषश्रुतेर्नाध्वर्युरुपगा
यतीतिश्रुत्यंतरगताद्ध्वर्युभिन्नाऋत्विजउपगायंतीत्यर्थः नतुकुशादिवाक्यानामपिकिमितिविशेषश्रुत्यंतरेकुवाक्यानामुप
गम्यतेतत्राह श्रुत्यंतरकृतंहीतिसामान्यविशेषयोरेकवाक्यतारूपायांगतौसत्यांवाक्यभेदकल्पनानाध्वर्युरितिनिषेधाद्वि
शेषश्रुतेश्चाध्वर्युरुपगायतेनोपगायतीतिचेत्सर्वत्रविकल्पानपुत्तेः व्रीहियवयोस्त्वगत्याविकल्पआश्रितइत्यर्थः विक
ल्पस्यानन्याय्यत्वमष्टदोषदुष्टत्वात्तथाहियदिव्रीहिवाक्यमाश्रीयते तदायववाक्यस्येष्टप्रामाण्यपरित्यागअनिष्टप्रामाण्य
स्वीकारः कदाचिद्यववाक्याश्रयणोत्पन्नप्रामाण्यपरित्यागःस्वीकृतप्रामाण्यपरित्यागश्चैतेकस्मिन्यववाक्येचत्वारोदोषाभवंति

स्वी

एवंविकल्पितवाक्योपगानैकदेशे ॥

किंचयथामंत्रकर्मणामनात्मरूपकत्वाद्धियास्वरूपसंहारउक्तः नयापरेहपादानंविनापिहानसंभवेनोपादानस्यानावश्यकत्वा
त्प्राप्तिरिति हृष्टांतसंगत्यात्मसिद्धान्तयति हानोत्विमादिना उपायनशब्दस्यशेषत्वाद्धानशब्देनापत्तिनत्वादिति तत्रार्थः
स्वरोमहृष्टांतेनविधूतयोः पुण्यपापयोः परत्रावस्थानतापेक्षत्वात्परेहपादानंवाच्यमितिभावः विपाभेदगुणानुपसंहारइतिव्यवस्थानं
हानविषयानस्तुतिः विषयेत्याह तदुच्यतइति मन्यतेस्तत्रकारइत्यर्थः ननश्रुतहानार्थवादेनापिस्तुतिसिद्धौकिमर्थमुपायना
र्थवादस्यानीयतेतत्राह स्तुतिप्रकर्षलाभायेति नन्वर्थवादस्यविधिनासंबंधः प्रसिद्धोनार्थवादांतरेणेत्यतआह प्रसिद्धाचेति
देवाभलाकाद्यस्यर्थः हमेनतणाविरयोरेकवाक्यचर्तवः यज्ञस्यपुरुषरूपकल्पनायांसिद्धयत्वायत्रिष्टुभोभवतइत्युक्तेवहुचब्राह्मणे
तत्रत्रिष्टुभोस्कुद्वोमात्रत्वात्कथमिद्धियत्वकल्पनेत्याकांक्षायांयजुर्वाक्यसंवायतइत्यर्थः नन्वनूतयोः पुण्यपापयोरुपादान
हानोत्विति हानौत्वेनसांकेवलायामपिश्रयमाणायामुपायनेसन्निपतितमर्हतीतिनच्छेषत्वात् हानशब्दशेषोह्युपायनशब्दः
नमधिगतःकौषीतकिरहस्यतस्मादन्यत्रकेवलहानश्रवणेपुपायनानुवृत्तिःयदुक्तमश्रवणाद्धियांतरगोचरत्वादनाव
श्यकत्वाच्चासन्निपातइति तदुच्यते भवेदेषाव्यवस्थाकिंतुश्रनुष्ठेयंकिंचिदत्रश्रूतमन्यत्रैनिनोप्यननत्विहहानमनुपाए
नेवानुष्ठेयंत्वतुसंकीर्त्यतेविपाप्मत्वयोःसंकीर्तनेदृश्यमहाभागाविपायत्तत्सामर्थ्यादस्यविदुषःसकृतदुष्कृते
संसारकारणभूतेविधूयेतेनेवास्यसुकृतदुष्कृतेनिविप्रोनेइतिस्तुत्यर्थंवास्मिन्संकीर्तनेहानानंतरभावित्वेनोपायनस्यकवि
श्रुतत्वादन्यत्रापिहानश्रुत्वावुपायनमत्रापिहानश्रुत्वावुपायनानुवृत्तिंमन्यते स्तुतिप्रकर्षलाभायप्रसिद्धाचार्थवादांतरापे
क्षार्थवादांतरप्रवृत्तिः एकविंशोवाइतोसावादित्यइत्येवमादिषुकथंहीहैकविंशतादित्यस्याभिधीयतेतानपेक्ष्यमाणेऽर्थवादे
द्वेद्वादशमासाःपंचर्तवस्त्रयइमेलोकाअसावादित्यएकविंशइत्यस्मिन् तथात्रिष्टुभौभवतःसेंद्रियत्वायेत्येवमादिवादे
इंद्रियंवैत्रिष्टुभावित्येवमापर्यवसानरापेक्षत्वादृष्टपते स्तुत्यर्थत्वाच्चासौपायनवादस्यकथमन्यदीयेनदुष्कृतेनान्येन
पेयेतेइतिनातीवाभिनिवेष्टव्यं उपायनशब्दशेषत्वादितिचशब्दसमुच्चारयन् स्तुत्यर्थामेवहानावुपायनानुवृत्तिंसूचयति
स्याभंभवादनुपसंहारइत्यत्राह स्तुत्यर्थत्वाच्चेति विहत्रिष्टुपोरेवतपोफलपरेमासंवेतिविपाप्मत्वमर्थ्योदित्युपयंतिपदेनोच्यतेइत्यर्थः न
त्वन्यानिष्टकर्मणोन्यत्रफलसंचारःकेष्टं नवचनबलादितिचेन्नफलमुपयंतीत्यस्य गतेः नचयथापुत्रकृतेनश्राद्धस्यपितृषुफलंतथा
त्रेतिवाच्यंयस्यफलमदिष्टयत्कर्मविहितंतस्यतत्फलमितित्यायेनपितृणांतत्र प्रीणनकृतकर्मणोविधिकरणफलत्वेपिविदुषःकर्म
कालेनुद्दिष्टव्यधिकरणफलायोगात्किंचविदुषोदेहपातेकर्मणांनत्वायावज्जीवविहृतस्यैवकस्यहेषिणोवाफलंस्यादित्यतआह नानीवा
मितिवेष्टव्यमिति विहृत्सेवाहेषाभ्यांविहृत्रिष्टुपुण्यपापफललेपपुण्यपापेसेवकहेषिणोर्जायेतेजातयोःफलतःस्वीकारादुपायन
मितिपरिहारस्यतत्वलभत्वादनात्रहइत्यर्थः उपायनादेःस्तुतित्वेलिंगमाह उपायनेनिउपायनविवक्षायामुपायनस्यैवोपसंहा

तथा कर्मणामिति कर्मणां विद्योपकारत्वेनाभिः सहैकफलत्वे च सत्यानं किं विद्यात्वीत्यर्थः अपि चेत्यकार्थं न नत्तर्हि वेधादिवाक्यानामुप
निषद्भिः सहपाठस्य का गतिस्तत्राह आरण्येति तस्माद्वेधादिमंत्रकर्मणां विद्यास्वनुपसंहार इति सिद्धं हानौ तु यथाश्वो रजांसि
क्तानि जीर्णरोमाणि त्यक्त्वा निर्मलो भवति तथाहमपि पापं विधूय कृतात्मा निर्मलीकृतचित्तः सन् यथा राहुग्रस्तश्चन्द्रो राहुमुखात्
मुच्य स्वच्छो भवति तथा शरीरं धूत्वा त्यक्त्वा देहाभिमानान्मुक्तः सन् कृतकृत्यः ब्रह्मात्मकं लोकमभिसंपद्ये इत्यर्थः य

तथा कर्मणामपि प्रवर्ग्यादीनामन्यत्र विनियुक्तानां न विद्याशेषत्वोपपत्तिः न ह्येषां विद्याभिः सहैकार्थ्यं किंचिदस्ति वाजपेये
न बृहस्पतिसवस्येव विनियोगान्तरं वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति अपि चैकोयं प्रवर्ग्यः सकृदुत्पन्नो बलीय
सा प्रमाणेनान्यत्र विनियुक्तो न दुर्बलेन प्रमाणेनान्यत्रापि विनियोगमर्हति अगृह्यमाणविशेषत्वे हि प्रमाणयोरेतदेवं स्या
त् न तु बलवदबलवतोः प्रमाणयोरगृह्यमाणविशेषता संभवति बलवदबलवत्वविशेषादेव तस्मादेवंजातीयकानां मन्त्रा
णां वा न संनिधिमात्रेण विद्याशेषत्वमाशंकितव्यं आरण्यानुवचनादिधर्मसामान्यात्तु संनिधिपाठ इति सिद्धं हानौ
तूपायनशब्दशेषत्वात्कुशाछन्दस्तुत्युपगानवत्तदुक्तं २६ अस्ति ताण्डिनां श्रुतिः अश्व इव रोमाणि विधूय पापं चन्द्र इव राहो
र्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीति तथाथर्वणिकानां तथा विद्वान्पुण्यपापे विधूय
निरंजनः परमं साम्यमुपैतीति तथा शाट्यायनिनः पठंति तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामि
ति तथैव कौषीतकिनः तत्सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतमिति तदिह क्वचित्सु
रप्रियैश्च
कृतदुष्कृतयोर्हानं श्रूयते क्वचित्तयोरेव विभागेन प्रियैरप्रियैश्चोपायनं क्वचिदुभयमपि हानमुपायनं च यत्रोभयं श्रूयते
तत्र तावन्न किंचिद्वक्तव्यमस्ति यत्राप्युपायनमेव श्रूयते न हानं तत्राप्यर्थादेव हानं संनिपतति अन्यैरात्मीययोः सुकृतदुष्कृ
सुकृतदु
तयोरुपेयमानयोरावश्यकत्वात् हानस्य यत्र तु हानमेव श्रूयते नोपायनं तत्रोपायनं संनिपतेत् हानवेति विचिकित्सायाम
ये
श्रवणादसंनिपातो विद्यान्तरगोचरत्वाच्च शाखान्तरीयश्रवणस्य अपि चात्मकर्तृकं सुकृतदुष्कृतयोर्हानं परकर्तृकं चो
पायनं तयोरसत्यावश्यकभावे कथं हानेनोपायनमाक्षिप्येत तस्मादसंनिपातो हानावुपायनस्येत्यस्यां प्राप्तौ पठति

यथा नद्यः समुद्रं प्राप्य नामरूपे त्यजंति तथा विद्वानित्यर्थः निरंजनः शुद्धः साम्यं ब्रह्मणा सम्यग्जनस्य विद्वेषः दोषेण धनं तेन विपावलेन।
सुकृतदुष्कृते त्यजतीत्यर्थः उपायनं ग्रहणं तस्य त्यागपूर्वकत्वादनयोः क्रमयोर्ग्रहणयोगात्त्यागोपादानयोरिति यत्र त्याग एव श्रू
तः तत्र हानोपायनयोः सहभावस्यावश्यकत्वानावश्यकत्वाभ्यां संशयमाह यत्र त्विति अत्र एवं पूर्वपक्षे तत्प्रकर्षसिद्धिः सिद्धान्ते
तत्सिद्धिरिति फलं यद्यपि ताण्ड्यश्रवणाश्रुत्यानिर्गुणविद्यार्थयोः कर्महानमेव श्रुतं नोपायनं तथापि कौषीतकिश्रुतोपायक
स्य हानस्य सगुणब्रह्मविद्यायामुपायनेनाक्षेपे त्रोपसंहृते विमिताशंक्य विद्याभेदान्नोपसंहार इत्याह विद्यान्तरेति ॥

अपमाशयः एकत्र विनियुक्तस्य निराकांक्षत्वादन्यत्र विनियोगो विरुद्ध एवं परं तु विनियोजकप्रमाणयोः समबलत्वे न्यायतः विनियो-
गत्यागयोगाद्गत्याकांक्षोत्थापनेन विनियुक्तो विनियोगः स्वीक्रियते यथा खादिरो यूपो भवति खादिरं वीर्यकामस्य यूपं कुर्या-
दिति वाक्याभ्यां क्रतौ विनियुक्तस्य खादिरत्वस्य वीर्यफले विनियोगः यत्र प्रमाणयोः फलकल्पत्वेन न स्वीक्रियते प्रबले प्रमाणेन दु-
र्बलविनियोगबाधात् यथा कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे इत्यस्या ऋचः ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति तत्र तृतीयाविभक्तिश्रुत्या नि-
रपेक्षया गार्हपत्योपस्थाने शेषत्वबोधिके ऐन्द्रप्रकाशनसामर्थ्यरूपलिंगप्रमाणसिद्धयोन्तु बाध्यते लिंगं हि न साक्षाच्छेषत्वं
बोधयति किं त्विन्द्रप्रकाशनमात्रं करोतीति तेन च लिंगेनानेन मन्त्रेणेन्द्र उपस्थापयितव्य इति श्रुतिः कल्पनीया तत्र शेषत्वबो-
धश्रुतिव्यवधानेन शेषत्वबोधकलिंगजन्यतया स्वार्थबोधकश्रुत्या बाध्यते यथा लिंगेन वाक्यं बाध्यं यथा स्योनं ते सदनं कृणो-
मि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति मन्त्रभागयोः प्रत्येकं सदनकरणपुरोडाश-
सादने च तत्प्रकाशनसामर्थ्यलिंगेन श्रुतिद्वारा विनियोगे सति मिलितानामेकवाक्यत्वबोध्यते तस्य कृत्स्नस्यापि मन्त्रस्य सदनकरणप्रकाशन-
सामर्थ्यं पुरोडाशासादनप्रकाशनसामर्थ्यं च लिंगं कल्पयित्वा श्रुतिकल्पनया भवत्यत्र कृत्स्नमन्त्रविनियोगबोधने द्वाभ्यां लिंगश्रुति-
भ्यां व्यवधानेन श्रुत्येकव्यवहितेन लिंगाद्दुर्बलत्वात् न च सामर्थ्येन कल्प्यामिति वाच्यं असमर्थस्य विनियोगायोगात् अत एव वा-
गपदस्य हीरवबोधविनियोगलक्षणारूपसामर्थ्यं कल्प्यते तथा वाक्येन प्रकरणं बाध्यं यथा साद्यप्रकरणाम्नाते द्वादशोपसत्ता-
द्वादशाहीनस्य तस्येति वाक्येनाहीनांगत्वबोधकेन प्रकरणप्राप्तसाद्यांगत्वबाधादुत्कर्षः प्रधानस्यांगाकांक्षारूपप्रकरणेन
सांगप्रधानवाक्यैकवाक्यत्वसामर्थ्यश्रुतिभिः कल्प्यमानाभिः स्वार्थविनियोगप्रमितौ व्यवधानेनागतसामर्थ्यश्रुत्योर्द्वयोः क-
ल्प्यकवाक्याद्दुर्बलत्वात् तथा प्रकरणेन सन्निधिर्बाध्यः यथा राजसूयप्रकरणेन तदंतर्गताभिषेचनीयाख्यसोमयागविशे-
षसन्निधिपाठप्राप्तस्य शुनःशेपोपाख्यानादेरभिषेचनीयशेषत्वबाधनात् कृत्स्नराजसूयशेषत्वमापादितं सन्निधेः प्र-
करणादिकल्पनेन सप्रकरणाद्दुर्बलत्वात् तथा सन्निधिना समाख्या बाध्यते यथा हि पौरोडाशिकसमाख्याके कांडे
आग्नेयपुरोडाशादिकर्मणां कर्मणां मन्त्राणामाम्नानात्तत्रैव दधिपयोरूपसान्नाय्यसन्निधौ आम्नातं शुन्धध्वं दैव्याय कर्मणे इति मन्त्र-
आम्नानात्तत्रैव समाख्याबलेनास्य मन्त्रस्य पुरोडाशपात्रशुन्धने शेषत्वं प्राप्तं सन्निधिना सान्नाय्यपात्रशुन्धने शेषत्वमापाद्यते पुरो-
डाशस्तत्र विधिकांडे पौरोडाशिकमिति योगरूपसमाख्या या कांडान्तर्गतमन्त्रस्य पुरोडाशशेषत्वबोधसामान्यबोधकत्वेऽपि शेषशेषिभा-
वरूपविनियोगबोधकत्वे सन्निध्यापेक्षत्वेन दुर्बलत्वादिति एवं विरोधे सति श्रुतिर्बाधिकैव समाख्या बाध्यैव मध्य-
स्थानां तु चतुर्णां पूर्वबाध्यत्वं परबाधकत्वं चेति श्रुतिलिंगसूत्रार्थः तस्माल्लिंगादिनान्यत्र विनियुक्तानां मन्त्राणां दुर्बल-
सन्निधिना न विपर्यासविनियोग इति सिद्धं ॥

नं

वयुपेकेनवाकेनप्रकरणांतरस्यव्रहस्पतिसवस्यप्रत्यभिज्ञानमंगत्वविधानं च कर्तुमयुक्तं वाक्यभेदप्रसंगात् ज्योमासानग्निहोत्रवत्कर्मांतरमेववृह
हस्पतिवाख्यमंगांतयाविधीयत इति न विनियुक्तस्य विनियोग इति भेदः ॥ तत्रव्रहस्पतिहुतस्यापि पृथानित्याग्निहोत्रसाम्यमेव प्रकरणां
वीग्यतसत्तासान्निमग्निहोत्रं जुहोतीति नाम्ना प्रत्यभिज्ञायमानदर्शपूर्णमासविकृतिप्रावाज्यभागोपजतीन्योकस्मिन्वाक्ये प्रकृतिस्याज्य
भागयोः पदेन प्रत्यभिज्ञानं तथात्रापि व्रहस्पतिसवपदेन प्रत्यभिज्ञानेन वाक्येनांगतविधानं किं न स्यात् न च साध्यभावार्थविधायकात्वा
तप्रतंत्रता न पदेन सिद्धकर्मप्रत्यभिज्ञानं नामेति वाच्यं सिद्धस्याप्यगतया पुनः साध्यत्वसंभवेन्यथासिद्धाख्यातस्यैवप्रसिद्धार्थक
नामपारतंत्र्योपपत्तेः नैवं सति तिकुंडपायिनामयने मासमग्निहोत्रं जुहोतीत्यस्यापि तद्धर्मस्यैव विधिः स्यादिति वाच्यं इष्टत्वात् च पर्वत्रविरोधे तत्र
त्रस्यवलीयस्त्वात् सर्वत्र चस्य त्वंनेभाकनाभेदनात्पर्याच तस्मादेकस्येव व्रहस्पतिनामकस्य धात्वर्थस्य ब्रह्मवर्चसे विनियुक्तस्य

नैषामुपसंहारो विद्यास्विति कस्मात् वेदार्थपर्यभेदात् हृदयं प्रविध्येत्येवं जातीयकानां हि मंत्राणां येषां हृदयवेधादयोभिन्ना
अनभिसंवद्धास्ते उपनिषद्कार्माभिर्विद्याभिः तेषां तामिः संगतत्वामर्थोस्ति न तु हृदयस्योपासनेप्युपयोगात् इद्वारको
पासना संवंध उपपन्नस्तः नेत्युच्यते हृदयमात्रसंकीर्तनस्यैवमनुपयोगात् कथंचिदुत्प्रेक्ष्येत न चैतास्वृहृदयमन्त्रमेवार्थः हृ
दयं प्रविध्य धमनीः प्रवृज्येत्येवंजातीयको हि न सकलो मंत्रार्थो विद्याभिरभिसंवध्यते अभिचारविषयो ह्येषां च तस्मादभि
चारिकेण कर्मणा सर्वं प्रविध्येत्यस्य मंत्रस्याभिसंवंधः तथा देवसवितः प्रसुव यज्ञमित्यस्य यज्ञप्रसवलिंगत्वाद्यज्ञेन कर्म
णा संवंधः तद्विशेषसंवंधस्तु प्रमाणांतरादवसातव्यः एवमन्येषामपि मंत्राणां केषांचिल्लिंगेन केषांचिद्वचनेन केषांचि
त्प्रमाणांतरेणेत्येवमर्थांतरेषु विनियुक्तानां रहस्यपठितानामपि सतां न सन्निधिमात्रेण विद्याशेषत्वोपपत्तिः उक्तो हि
सन्निधिः श्रुत्यादिभ्यो दुर्बलः प्रथमे तंत्रे श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्वल्यमर्थविप्रकर्षादित्य

पि वाजपेयांगतया विनियोगदृष्टत्वभवत्पादतात्पर्यमस्ति च विनियुक्तस्य विनियोगे सर्वसंमतमुदाहरणं खादिरत्वादिकं तस्य क्रतोर्वि
नियुक्तस्य वीर्यादिफलेपि विनियोगात् तथात्र कर्मणामन्यत्र विनियुक्तानां विद्याशेषत्वमिति प्राप्ते सिद्धांतयति नैषामित्यादिना
विद्यासु हृदयादिसंवंधेपि वेधाद्यर्थानामसंवंधाद्यर्थानामसंवंधात्तत्र मंत्रार्थानामभिचारादिसंवंधलिंगेन सन्निधेर्वलीयस्त्वा
अभिचारादावेव मंत्राणां विनियोग इत्यर्थः देवसवितः प्रसुवेति प्रदक्षिणमग्निं पर्युक्षेदिति वाक्यादग्निपर्युक्षणे सावित्रं जुहोति
कर्मणः पुरस्तात्सवने सवने जुहोतीति वाक्याद्वाजपेयकर्मविशेषसंवंधोस्य मंत्रस्येत्याह तद्विशेषेति उक्तन्यायमेवान्यत्रा
दिष्वतिदिशति एवमन्येषामिति प्रमाणांतरं प्रकरणादिकं ननु लिंगादिभिरन्यत्र विनियुक्तानामपि सन्निधिना विद्यास्वपि विनि
योगोस्त्वविरोधादित्युक्ते तत्राह दुर्वलो हीति समवाये समानविषयत्वे द्वयोर्विरोधे परस्य दौर्वल्यमुक्तं ततः अर्थविप्रकर्षात् स्वार्थ
वोधने परस्परं व्यवधानेन प्रवृत्तेरित्यर्थः ॥

मंत्रादिषुतदुपनिबद्धविधाशेषत्वे प्रमाणाभावाभावाभ्यां शंकयनाह किमिति फलं सर्ववत् ननुतेषां शेषत्वे मानाभावात्रोपसंहार इति शंकते नन्वेषामिति मंत्रादूपत्तन्तद्विधाशेषाः फलपद्धिपासन्निहितत्वात् तैत्तिरीयकगतपुरुषयज्ञवदितिसमाधत्ते वाढमिति तथापिदृष्टान्तसंगतिः सिद्धान्तिपद्ते तत्रिविधे व्यप्यबाधकमाह नहीति अफलमंत्रादीनां फलवद्विद्याशेषत्वबोधनं तानि धेरर्थवत्त्वतत्संभवेतत्पकस्मात् दर्थस्यन्यत्वेनासौ तत्रिपिरायपत्त नहियुक्तंइत्यर्थः तत्पाठेनवत्कस्मात् इत्तेविनासावधीनाश्र यितेनहियुक्तंइत्यर्थः ननुमंत्राणांविद्यासमवेतार्थप्रकाशनसामर्थ्याभावानविद्याशेषत्वमितिशंकते नन्विति पुरुषाद्युपत दामवर्णाप्रचरंतीतिवाक्येनप्रवर्ग्यस्यकृतपायित्वस्य तस्याग्निष्टोमादेस्तत्तत्तद्वाक्येनस्वर्गायर्थत्वमतोनविद्यार्थत्वमित्या

किमिमे सर्वे प्रविध्यादयो मंत्राः प्रवर्ग्यादीनिचकर्माणि विद्यासूपसंह्रियेरन् किंवानुपसंह्रियेरन्निति मीमांसमहे किं तावन्नः प्रतिभाति उपसंहारएवैषां विद्यास्विति कुतः विद्याप्रधानानामुपनिषद्ग्रन्थानां समीपेपाठात् नन्वे षां विद्यार्थतयाविधानेनोपलभामहे वाढमनुपलभमानाअपितूनमास्यामहे सन्निधिसामर्थ्यात् नहिसन् निधेरर्थवत्त्वेसंभवत्यकस्मात् सावनाश्रयितुंयुक्तः ननुनेषांमंत्राणांविद्याविषयंकिंचित्सामर्थ्यं पश्यामः नि कथं चप्रवर्ग्यादीनिकर्माण्यन्यार्थत्वेनैवविनियुक्तानितिविद्यार्थत्वेनापिमहि नैषदोषः सामर्थ्यं तावन्मंत्रा णांविद्याविषयमपिकिंचिच्छक्यंकल्पयितुंहृदयादिसंकीर्तनात् हृदयादीनिहिप्रायेणोपासनेष्वायतन नादिभावेनोपदिष्टानितद्वारेणहृदयंप्रविध्येत्येवंजातीयकानांमंत्राणामुपात्तनागतंदृष्टश्चोपासनेष्वपि मंत्रप्रयोगः भः प्रपद्येमुनामुनेत्यादिनथाप्रवर्ग्यादीनांकर्मणामप्यत्रापिविनियुक्तानांसतनामविरुद्धो।
विद्यासुविनियोगः वाजपेयइव बृहस्पतिसवस्येव मासंक्रमः॥

हृ कथं चेति मंत्राणांविद्यासमवेतहृदयनाम्नादिप्रकाशकत्वमस्तीत्याह नैषइति उपास्तिषुमंत्रप्रयोगःक्वापिन दृष्टइत्यत आह दृष्टश्चेति पुत्रस्यदीर्घायुष्ट्वार्थछान्दोग्येत्रैलोक्यसंकोशात्मनोपासितस्यात्मनश्चपितुरर्थेप्रार्थनामंत्रः मनेतिपुत्रस्यत्रिर्नामगृह्णातिअमुनापुत्रेणास्तहभूरितीमंलोकमनेचप्रपद्येनमेपुत्रविधोगःस्यादित्यर्थः तत्रहाको नान्यत्रविनियुक्तानामपिकर्मणांसन्निधिनाविद्यासुविनियोगोनविरुध्यतइत्यत्रदृष्टान्तमाह वाजपेयइति ब्रह्मवर्चं ते सकामाबृहस्पतिसवेनयजेतेतिवाक्येनब्रह्मवर्चसफलेविनियुक्तस्यापिबृहस्पतिसवस्यतिसबृहस्पवाजपेयेनेष्ट्वाबृह स्पतिसवेनयजेतिवाजपेयप्रकरणस्थवाक्येनवाजपेयांगत्तयाविनियोगवदविरोधइत्यर्थः ॥ ॥
ते

पन्मरणं तेदेवमभयोयद्मनेतदुपसदइतितितिरिश्रुतोसारूपभातीत्यतश्राह यद्यपिकिंचिदिति गजाम्बयोस्तुनष्यानसारूप्यादिदंसाह
यानैकप्रयोजकमित्यर्थः किंचछांदोग्यपुरूषयज्ञयोरैक्यश्रजमग्नतुभेदइतिवैरूप्यात्तरमाह नचेति यद्यपिनिषादस्यपतिन्यायेनसामा
नाधिकरण्यषष्ठ्योर्मुख्यत्वेनषष्ठ्यप्रसिद्धैक्यकल्पनागौरवान्तत्सामानाधिकरण्येनतिभेदोक्तेऽपिकस्यैवयजमानत्वयजमानत्वविरोधादात्मविदोयायज्ञः
प्रसिद्धत्वस्येतिवैय्याधिकरण्येनैवयुक्तं किंचविदुषोवैयधिकरण्यरूपविशेषाणांविदुषःनवादेनविद्वद्गे्ऽगसपर्द्वैथावेकवाक्यत्वाप्रतीयतेनस्या
तत्वाविशेष्यस्यागानाचष्टयर्विधिवादिनस्तवदाक्यभेददोषःस्यादित्यर्थः किंचतत्यादिभ्योऽन्यासपवान्यरेचयदिंजितन्यासम्हत्मा
तवेत्सर्वमिदंजगदित्यवेतमात्मानंज्ञात्वाभ्योनन्सतुमपयातिविद्वानितिसन्यासस्ताध्यामोक्षविद्याप्रस्तात्प्राजापत्यान्नवाकेडपदिः

यद्यपिकिंचित्मरणावभृथत्वादिसामान्यंतद्वलीयस्त्वाभ्पवैलेत्तएपुनाभिभूयमानेनप्रत्यभिज्ञानत्वमं नचैतेतिरी
यकेपुरूषस्ययज्ञत्वेश्रयतोविदुषोयज्ञेस्यतिनचेतसमानाधिकरण्यषष्ठ्योविद्वानेवयोयज्ञत्वस्यति नहिपुरूषस्यमुख्यायज्ञ
त्वेमत्विव्यधिकरणत्वेनषष्ठ्योविदुषोवायोयत्वस्येति भवतिहिपुरूषस्यमुख्योयज्ञसंवधःसत्यात्रगतोनस्याथाप्राप्रोय
नवोनभोक्तःआत्मायजमानइतिचयजमानत्वेपुरूषस्यनिवृत्त्यैयधिकरण्येनैवास्ययज्ञसंवधंदर्शयति अपिचतस्यैवविः
दुषइतिसिद्धवदनुवादश्रुतोसन्यापुरूषस्ययज्ञभावश्रात्मदीनायजमानभावप्रतिपितानानस्यवाक्यभेदःस्यात् अपिचसम
न्यासामान्यविद्यापुरस्ताडुपदिष्टपनेनतस्यवविदुषप्रत्यनुक्रमणापपणतःप्रवेशघश्रामन्वायोनस्यतत्रद्वतिप्रतीमः नपा
वैकमेवफलमुभयोरप्यन्यावकयारूपलभामहेब्रह्मणोमहिमानमाप्नोतीतितद्योचानन्नपोषःपुरूषःविद्याप्नाय्प्राइरभि
मेष्टिफलाइस्तेपघाहषोडशवर्षशतंजीवतीतियपवेवेदेतिसमभिव्याहारात् नस्माच्छारवान्तराधीतानामपुरूषविद्याधर्मा
णामाशीर्मन्त्रादीनामप्राप्तिस्तैत्तिरीयके वेधाद्यर्थभेदात् ॥५॥ अस्त्याथर्वणिकानामुपनिषदारंभेमन्त्रसमाम्नायः सर्वप्रविध्यहृ
दयंप्रविध्यधमनीःप्रवृज्यशिरोऽभिप्रवृज्यत्रेधाविष्टत्तइत्यादिःताण्डिनांदेवसवितःप्रसुवयज्ञमित्यादिःशाट्यायनानांस्वेताश्वो
हरितनीलोसीत्यादिःकठानांतैत्तिरीयाणांचशंनोमित्रःशंवरुणइत्यादिर्वाजसनेयिनांतुपनिषदारंभेप्रवर्ग्यब्राह्मणपठ्य
तेदेवाहवैसत्त्रंनिषेदुरित्यादिकौषीतकिनामप्यग्निष्टोमवैब्रह्मवाअग्निष्टोमोब्रह्मैवतदहर्ब्रह्मणैवतेब्रह्मोपयन्तितेऽमृतत्व

यणांतेतत्रानवाक्येनस्यैवंविदुषप्रयत्नकामविद्यानुवादेनप्रशंसार्थत्वेननच्छेषतयायज्ञसंपत्तिःक्रियतेफलेकाम्यते:छंदोगानांतु
स्वतंत्रविद्याविधिरिताह अपिचसर्वंन्यासमितितिविंताफलमाह तस्मादिति वेधाद्यर्थभेदात् देवतामभिचारकर्माप्रार्थ्यते स
र्वमिति हेदेवतेमद्रिपोः सर्वमंगंप्रविध्यविधारयविशेषतश्चहृदयंभिंधिधमनीःशिराःप्रवृज्यशिरश्चाभितोनाशयएवंत्रिधा
विप्रकीर्णविष्टोभवेत्तमेवयुरित्यर्थः हेदेवसवितःयज्ञंतत्सुतेचुप्रसवनिवेदंयत्स्यार्थःउच्चैःश्रवाःश्वेतोश्वोयस्यंदइसत्त्वंहरितनमणि
वर्णोलोसीत्यर्थः नोस्माकंशंसुखकरोभवत्वित्यर्थः अग्निष्टोमोब्रह्मवसयस्मिन्नहनिक्रियतेतदपिब्रह्मतस्मायएतदहःसाध्यं
कर्मोपयन्त्यनुतिष्ठन्तितेब्रह्मणैवसाधनेनब्रह्मोपयन्तितेचक्रमेणामृतत्वमाप्नुवन्तीतियोजना ॥ रामनमः ॥

स्यामविशिष्टभेदान्नामोर्ध्वस्यावसंभृत्यादिगुणविशिष्टस्यत्र स्मृतेः शांडिल्यादिविद्योक्तगुणविशिष्टब्रह्मणः स्वशिष्योभेदेन रूपभेदा
त्संभृत्यादीनां नोपसंहार इत्युक्तन्यायान्निर्देशात्वादस्य नसंगत्यापपत्त्यापर्यंकोसीत्युक्तौ यपरोवरीयस्त्वादिगुणोपास्तीर्दहरेण सम स्वाना
प्राप्तिर्भिद्यते नचैकस्मिन्नपि ब्रह्मणि विद्याभेदायपत्तेः ब्रह्मप्रत्यभिज्ञानगुणप्रायिकेत्याह परोवरीयस्त्वादिवदिति नसाम्यंभ
त्यादिगुणविशिष्टविद्यान्तरविधिरिति सिद्धं पुरुषविद्यायां छांदोग्यस्थविद्यामाह आस्तीति पुरुषोवावयज्ञस्तस्ययानि चतुर्विंशति
वर्षाणि तत्प्रातःसवनं मध्यानि चत्वारिंशत् वर्षाणि तन्माध्यंदिनं सवनं तत्र यो यान्यष्टाचत्वारिंशद्वर्षाणि तत्तृतीयसवनमिति
यज्ञत्वाम्नायेसवनत्रयकल्पितं तस्य यदशिशिषति यत्पिपासति यन्न रमते तादीक्षा अथ यदश्नाति यत्पिबति यद्रमते तदुपसदः अथ
यद्धसति यज्जक्षति यन्मैथुनं चरति तानि स्तुतशस्त्राणि अथ यत्तपो दानार्जवमहिंसा सत्यवचनमिति ता अस्य दक्षिणा मरणमेवावभृथ इत्यादिरूपा मेप्राण
परोवरीयस्त्वादिवदिति हृद्दर्शनात् तस्या हीर्य संभृत्यादीनां शांडिल्यविद्यादिष्वनुपसंहार इति पुरुषविद्यायामिव चेतरेषामनाम्ना
त २८ आलिंगिता दीनां वैगिनां चर इत्यत्र ब्रह्मणो पुरुषविद्यायां पुरुषो यज्ञः कल्पितः तदीयमायुस्त्रेधा विभज्य सवनत्रयं क
ल्पितमशिशिषादीनि च दीक्षादिभावेन कल्पितान्यन्ये च धर्मास्तत्र समधिगताश्चाशीर्मन्त्रप्रयोगादयः तैत्तिरीयका अपि
कंचित्पुरुषयज्ञं कल्पयंति तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नीत्येतेनानुवाकेन तन्नसंशयः किमितरत्रो
क्ताः पुरुषयज्ञस्य धर्मास्तैत्तिरीयके उपसंहर्तव्याः किंवानोपसंहर्तव्या इति पुरुषयज्ञत्वाविशेषादुपसंहार प्राप्ताः
वाचष्टे नोपसंहर्तव्या इति कस्मात् तद्रूपप्रत्यभिज्ञाभावात् तदाहाचार्यः पुरुषविद्यायामिवेति यथैकेषां शाखिनां
ताण्डिनां पैंगिनां च पुरुषविद्यायामाम्नानं नैवमितरेषां तैत्तिरीयकाणामाम्नानमस्ति तेषां हीतरविलक्षणमेव यज्ञ
संपादनं दृश्यते पत्नीयजमानवेदवेदिबर्हिर्यूपाज्यपश्वृत्विगाद्यनुक्रमणात् यदपि सवनसंपादनं तदपि तर
विलक्षणमेव यत्सायं प्रातर्मध्यंदिनं च तानि सवनानीति
इदं सवनत्रयं यावदायुरन्ते सतेनत्या शीः अक्षितमसि अच्युतमसि प्राणसंशितमसीति मन्त्रत्रयप्रयोगः षोडशाधिकशतवर्षजीव
नफलमिति दर्शितं तस्यापाद्यं यदाख्यातं स पुरुषविद्यामाह तैत्तिरीयकास्तु तस्यैवंविदुषो यज्ञस्येति षष्ठ्याः सामानाधिकरण्य
वैयधिकरण्यानिश्चयात्संशयमाह तत्रेति उपसंहारानुपसंहारावेवफले पुरुषासाधारणगुणप्रत्यभिज्ञानाभावात्संभृ
त्यादौ विद्याभेद उक्तः इह तु साधारणावस्था गुणविशिष्टपुरुषयज्ञरूपकप्रत्यभिज्ञानाद्धि एका इतिप्राप्ते उदाहरणेन प्राप्ते
सिद्धान्तपति नोपसंहर्तव्या इति तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शि
खा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीदित्यादि
वैलक्षण्यात्र रूपैकत्वं प्रत्यभिज्ञेत्यर्थः वेदः कुशमुष्टिः शमयिता दमो दक्षिणात्पन्नत्वयः किंचच्छांदोग्ये त्रिधाविभक्तायुषः सवन

संभृतिद्युव्याप्त्यपि चातः ब्रह्मैव ज्येष्ठं कारणं येषां तानि ब्रह्मज्येष्ठानि शिलोपसृष्टां दसः वीर्याणि पराक्रमविशेषा आकाशोत्पादनादयः ता
नि च वीर्याणि संभृतानि निर्विघ्नं संस्थापितानि सर्वं नियुतः कार्यविप्रकर्तृत्वात् तच्च ज्येष्ठं ब्रह्माग्रे देवायुः तेजसः प्रागेव दिवं स्वर्गमाततान
व्याप्तवत् तदा सर्वव्यापकमित्यर्थः सर्वस्याप्यस्य संस्थानहेतुत्वमिति वाक्यशेषस्य गुणाः प्रभृतिपदग्राह्याः खिलेष्विति विधिनिषेधशून्य
वाक्येष्वित्यर्थः ब्रह्मसंबंधाद्धि प्राप्तेदं भावाद्ब्रह्म तत्पक्षं तस्योपायमाह नास्त्विति अनारभ्याधीतब्रह्मविभूतीनां ब्रह्मसंबंधे तत्सर्वब्रह्मविद्यासु प्राप्त्य
मित्यतो नादुपसंहार इति पक्षः सिद्धान्तमाह नत्वेतेनेति संभृति द्युव्याप्त्यादिषु संभृती विद्यमानदपि स्वेनैवोपसंहर्तव्यमुपनिषदि व

२३

संभृतिद्युव्याप्त्यपि चातः २३ ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततानेत्येवं राणायनीयानां खिलेषु वीर्यसंभृ
तिद्युनिवेशप्रभृतयो ब्रह्मणो विभूतयः पठ्यन्ते तेषामेव चोपनिषदि शाण्डिल्यविद्याप्रभृतयो ब्रह्मविद्याः पठ्यन्ते तासु ब्रह्मवि
द्यासु ता ब्रह्मविभूतय उपसंह्रियेरन्न वेति विचारणायां ब्रह्मसंबंधादुपसंहारप्राप्तावेवं पठति संभृतिद्युव्याप्तिप्रभृतयो विभूतयः
शाण्डिल्यविद्याप्रभृतिषु नोपसंहर्तव्याः अत एव चायतनविशेषयोगात् तथाहि शाण्डिल्यविद्यायां हृदयायतनत्वं ब्रह्मण उक्तं
म५ एष म आत्मान्तर्हृदय इति तद्वदेव दहरविद्यायामपि दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नन्तराकाश इति उपकोसलविद्याया
न्त्वक्ष्यायतनत्वं य एषोऽक्षिणि पुरुषो दृश्यत इत्येवं तत्र तत्र तदाध्यात्मिकमायतनमेतासु विद्यासु प्रतीयते आधिदैवि
क्यस्त्वेता विभूतयः संभृतिद्युव्याप्तिप्रभृतयः तासां कुत एतासु प्राप्तिः ननु एतास्वप्याधिदैविक्यो विभूतयः श्रूयन्ते ज्यायान्
दिवो ज्यायानेभ्यो लोकेभ्यः एष उ एव भामनीः एष हि सर्वेषु लोकेषु भाति यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आ
काश उभे अस्मिन्द्यावापृथिवी अन्तरेव समाहिते इत्येवमाद्याः सन्ति चान्या आयतनविशेषहीना अपि ब्रह्मविद्याः
३५ षोडशकलाद्याः तत्पनैवेतत् न प्राप्य विद्यते विशेषः संभृत्याद्यनुपसंहारहेतुः समानगुणाम्नानेन हि प्रत्युपस्थापि
तासु विप्रकृष्टदेशास्वपि विद्यासु विप्रकृष्टदेशा गुणा उपसंह्रियेरन्निति युक्तं संभृत्यादयस्तु शाण्डिल्यादिवाक्यगोचरा
श्च गुणाः परस्परव्यावृत्तस्वरूपत्वान्न प्रदेशान्तरवर्तिविद्याप्रत्युपस्थापनक्षमाः न च ब्रह्मसंबंधमात्रेण प्रदेशान्त
रवर्तिविद्याप्रत्युपस्थापनमुच्यते विद्याभेदेऽपि तदुपपत्तेः एकमपि ब्रह्म विभूतिभेदैरनेकधाऽनेकधोपास्यत इति स्थि

व्यवस्थापकविशेषयोगादिति तत्र योजना आध्यात्मिकायतनविशेषयुक्तविद्यास्वाधिदैविकविभूतीनां प्रत्यभिज्ञानहेत्वभावान्न
प्राप्तिरित्युक्तेऽहेतुः पाकतेः नन्त्विनास्त्विति आधिदैवकत्वसाम्यादाध्यात्मिकायतनहीनत्वसाम्याद्वा नन्विद्यासु संभृत्यादीनां प्रा
प्तिरिति शंकार्थः उक्तहेतुद्वयं न गुणप्रापकमाधिदैविकविद्यानां शाण्डिल्यदहरादीनामायतनहीनविद्यानां च विद्योगगुणसांक
र्यप्रसंगात् तस्मात्कचित्प्रयत्नसमानगुणविशिष्टोपास्यरूपैकविद्येकमावरूढगुणप्राप्तिहेतुस्तदभावान्न प्राप्तिरिति परिहरति स

पादः ३ः ३८

र्वे एव तेषु श्रुतिस्थानं नाम तद्वयात्तष्ठानं सिद्धं ते यथा कृत्स्ने ककनामानुष्ठानमिति फलेदृष्टान्तं संगत्या सर्वं एतत्रं व्याचष्टे यथेति यथा
विधेकवाक्यतोपसंहार उक्तः एवमन्यत्राप्येकविद्यायामुपसंहारो भवितुमर्हतीत्यर्थः सत्यब्रह्मेत्युपक्रमाभेदः सत्यावत्तावत्यादित्यपुरु
षाक्ष्योन्यस्मिन्गतिष्टितो आदित्यरूपमीनाचक्षुर्चक्षुरूपस्थादित्यप्रत्येष्टानादितिविति पक्रपाठोऽसिद्धः तेस्तु षपावृत्ताभ्यां
विधेकवाक्यसिद्धिः विधेकोऽपि किंस्यात्तत्राह कथमिति विधेकोऽपि स्थानभेदादुपनिषद्भेदे सकरः स्यादित्याशंक्य दृष्टान्तेन परिहरति
पार्होति नाम्नैकवानाम सकृच्चुक्तः तथा चाक्षिस्थो हरितिनामवान्सत्यब्रह्मत्वादादित्यस्थवदिति प्राप्ते सिद्धान्तसूत्रं योजयु

यथा शाण्डिल्यविद्यायां विभागेनाप्यधीतायामुपसंहार उक्तः एवमन्यत्राप्येवंजातीयके विषये भवितुमर्हति एकविद्याभि
संबंधात् एकाहीय सत्यविद्याधिदैवमध्यात्मं चाधीता उपक्रमाभेदात् व्यतिषक्तपाठाच्च कथं यस्यामितो धर्मस्तस्यामेव न
स्यात् यो यथा वा पिकश्चिद्देवनुगमनादिराचार्यः स्वार्थोदितः स ग्रामगते अरण्यगतेऽपि तद्वदेव भवति तस्मादुभयोरप्युपनिष
दोरुभयत्र प्राप्तिरित्येवं प्राप्ते प्रतिविधत्ते न वा विशेषात् २१ नवेत्युभयोरुभयत्र प्राप्तिः कस्माद्विशेषात् उपासनस्थान
विशेषोपादानविधान्नियमादित्यर्थः कथं स्थानविशेषोपादानं इत्युच्यते य एष एतस्मिन्मण्डले पुरुष इति ह्याधिदैविकं पुरुष
प्रकृत्य तस्योपनिषदहरिति श्रावयति योऽयं दक्षिणेऽक्षन्पुरुष इति चाध्यात्मिकं पुरुषं प्रकृत्य तस्योपनिषदहमिति तस्मिन्निवे
तस्मिन्निहिता लक्षणेन संबंधेनामतस्मादायतनविशेषव्यपाश्रयेणैवेते उपनिषदावुपदिश्येते कुत उभयोरुभयत्र प्राप्तिः नन्वे
क एवायमधिदैवतमध्यात्मं च पुरुषः एकस्यैव सत्यस्य ब्रह्मण आयतनद्वयप्रतिपादनात् सत्यमेवमेतत् एकस्यापि तव
स्थाविशेषोपादानेनैवोपनिषद्विशेषोपदेशात् तदवस्थस्यैव सा भवितुमर्हति अस्ति चायं दृष्टान्तः सत्यप्याचार्यस्व
रूपानपाये यदाचार्यस्यासीनस्यानुवर्तनमुक्तं न तत्तिष्ठतो भवति यच्चास्य तिष्ठत उक्तं न तदासीनस्येति ग्रामारण्ययोस्त्वा
चार्यत्वस्वरूपानपायात् तत्स्वरूपानुबद्धस्य च धर्मस्य ग्रामारण्यकृतविशेषाभावादुभयत्रतुल्यवदुपवद्दृष्टान्तः तस्मादेव
स्थानयोरुपनिषदोः दर्शयति च २२ अपि चैवंजातीयकानां धर्माणां व्यवस्थितिलिंगदर्शनं भवति तस्मिन्नस्यैतस्य तदेवरू
पं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति कथमस्य लिंगत्वं तदुच्यते अक्ष्यादित्यस्थानभेदभिन्नान्धर्मान्नान्यो
न्यस्मिन्ननुपसंहार्यान्पश्यन्नतिदेशेनादित्यपुरुषगतान्रूपादीनक्षिपुरुष उपसंहरति न स्वेन तस्य तदेवरूपमित्यादिना त

ति नन्विति नाम्नोरुपास्तिस्थानविशिष्टसंबंधित्वादित्यर्थः तस्योपनिषदहरहमिति च वाक्ये हेयेन तच्छ्रवणपरामृष्टयोः सन्निहितस्था
नविशिष्टयोः पुरुषयोर्नामसंबंधपरत्वोपसंहारानुमानं बाध्यमिति भावः विशेष्यैकत्रामतत्कारं नाम्नां स्थानभेदनाविशिष्टपु
रुषभेदान्नाम्नामव्यवस्थामाह नन्वित्यादिना विशिष्टसंबंधदृष्टान्तमाह अस्तीति मतिदृष्टान्तस्य स्वरूपसंबंधित्वाद्विशिष्टधर्मप्रत्यक्षं
तेदृष्टान्तत्वं नास्तीत्याह ग्रामेति उक्तमेव वस्य यामनिदेशाल्लिंगमित्याह दर्शयति चेति विधेर्वा देवोपसंहारसिद्धावातिदेशो

राम ३८

यथाग्निहोत्रवाक्ये कर्मगुणविधिः दध्नाजुहोतीतिवाक्ये गुणविधिस्तथात्राप्युत्तानविद्याभेदइत्याशंक्याह नचाप्येकमिति उक्तगुणानां पुन
रुक्तिर्न प्यासाद्वितोभ्यासात्तद्विद्याभेदः प्रयाजभेदवदिति भावः उक्तगुणोक्तिर्नन्वल्पाकृतिपरगुणविशिष्टोपास्याभेदप्रत्यभिज्ञा
नार्थत्वाद्नन्तउपास्यरूपाभेदाद्द्विश्चशाखास्विवसमानप्रायाणयानपिवचैकमितिसिद्धान्तस्तत्रैवाजयुक्ति यथेति तोत्रस्प्रकारीण्य
वैश्वानरविद्यातः यत्र बहवो गुणाः श्रुतास्तत्र प्रधानविधिरन्यत्र तदनुवादेन गुणविधिरिति स्थायाद्विर्हस्य प्रधानविधिरुत्तरत्र
गुणविधिरिति भावः सर्वथाप्येवमन्यत्रापि समहत्तत्रयेन्यद्वायाकाशात्मकं सत्यपरोक्षभूतात्मकं हिरण्यगर्भाख्यं ब्रह्मोपक्रम्य

नचावैकमाम्नानेविद्याविधौर्थमपरं गुणविधानार्थमितिविभागः संभवतितदा ह्यतिरिक्ताएववरग्गाइनेत्रेतरत्रवान्ना
येरन्तसमानाः समानाश्चापितत्पराम्नायतेमनोमयत्वादयस्तस्मात्राम्नोन्यगुणापसंहारइत्येवंप्राप्तेभ्रमः प्रत्यभिज्ञात्
प्रारब्धाहविधेकत्वगुणापसंहारश्चभवति एवंएकस्यामपिशाखायामविदितमहेतुपास्याभेदात्तदेवहि ब्रह्म मनोमयत्वादि
गुणकमुभयत्राप्युपास्यमभिज्ञत्यभिजानीमः उपास्यरूपविद्यायाः नचरूपाभेदविद्याभेदमध्यवसातुंशक्नुमः नापिवि
द्याभेदेगुणव्यवस्था ननुपौनरुक्त्यप्रसंगाद्विद्याभेदोध्यवसितः नेत्युच्यतेअर्थविभागोपपत्तेः एकस्याम्नानंविद्यावि
धानार्थमपरंगुणविधानार्थमितिनकिंचिन्नोपपद्यते नन्वेवंसतियद्पठितमाग्निरहस्येतदेवहहधारण्यकेपठि
तव्यंसत्परसंविद्याने सादियदृपठितेमनोमयत्वादिनन्नपठितव्यंनेषदोषः तद्बलेनेवप्रदेशान्तरपठितविद्याप्रत्य
भिज्ञानात्समानगुणाम्नानेनहिविप्रकृष्टदेशपठितशाण्डिल्यविद्याप्रत्यभिज्ञायतेतस्मात्शानत्वाद्गुणपदिश्यते अन्यथाहिक
थंतस्यामनोमयत्वादिगुणविधिर्भिधीयतेअपिचाप्रामाण्यापादेशानार्थवतिवाक्येसजातेगामाशपरामर्शस्यनित्यानुवादनया
गुणपदप्रमाणत्वान्तेनतद्बलेनप्रत्यभिज्ञोपपद्यतेतेशाकन्ते तस्मादत्रसमानायामपिशाखायांविधेकत्वगुणापसंहारश्चेत्युप
पन्नं सर्वथाप्येवमन्यत्रापि २०॥ बृहदारण्यकेसत्यब्रह्मन्यपत्रेमनयनेतस्तत्यमसोतसआदित्योयएषएतस्मिन्मंड
लेपुरुषोयश्चायंदक्षिणेक्षन्पुरुषइतितस्यैवसत्यस्यब्रह्मणोधिदैवतमध्यात्मंचायतनविशेषमुपदिश्यव्याहृति
पारीरत्वंचसंपाद्यद्वउपनिषदावुपदिश्यतेतस्योपनिषदहरितिअधिदैवतंतस्योपनिषदहमित्यध्यात्मं तत्रसंशयः कि
मविभागेनैवोभेप्युपनिषदावुभयत्रानुसंधातव्येउतविभागेनैकाधिदैवतमेकाध्यात्ममिति तत्रसूत्रेणैवोपक्रम

तेउक्तेयत्सत्यंतत्सयोसावादित्यः किंमंडलेनतत्स्थानेपुरुषः करणात्मकः सएवाध्यात्ममक्षिस्थानस्थइत्युपदिश्यतस्मात्
विदिताधिराभुवइति वहसदितिपादाविति व्याहृतिरूपशरीरमुक्त्वाह उपनिषदौरहस्यदैवतानामनुपदिश्यतेनतस्योदितमंड
लस्यसाहरितिनामप्रकोपाकत्वात्तस्याहमितिनामप्रत्यत्वादिनौदनामहद्येविषयस्तत्रनामिनः सत्याख्यस्यब्रह्मण
एकत्वात्स्थानभेदोक्तेश्चसमसायमाह नवेति ॥

छान्दो. टी. ३७

इत्याचमनमत्र न विधेयमित्याह अपि चेति अनग्नमनन्तं इत्यत्र वासस्त्वध्यानमपि न विधेयं दोषस्य स्यादिति पांक्ते न वि-
ति उभयोरप्यनुवादत्वे वैकल्यादेवमपेक्षानुवादेनैके विधेयमन्यच्च विधेयं वा सोध्यानमेव वासः कार्यं स्यान्न प्राप्तत्वस्य व्याख्याना-
ति द एवं वक्तात्तु समाधानार्थः एवंवेदेति स्तुत्या प्राप्तमित्यर्थः आचामेदिति न विधिः किं तु विस्रष्टरूपोऽस्य यद्व्याख्यायिति वृद्धत्वा-
धइत्यत्र लिंगमाह अत एवेति तस्मादेवंविद्दाशिष्यन्नाचामेदशित्वा चाचामेदिति वाक्यस्या विधित्वे काण्वेरपठनं लिंग-
मित्यर्थः नर्हि पाठवलान्माध्यंदिने आचमनविधिः काण्वे ध्यानविधिरिति कस्यचिन्मतं निराकरोति यापीति समान एवं चामेदाव

अपि चाचामेतीति वर्तमानापदेशित्वान्नायं प्राप्तो विधिरिति नमः ननु मतमेतदित्यपि तस्मान्नेवर्तमानापदेशित्वं मत्यमेव तत् अवश्य विधेयत्वस्य तु रस्मिन्वासःकार्यख्यानात् अपो वासःसंकल्पनमेवात्र एवं विधीयते नाचमनं एवंव
हि न दितृयपपाद्वितेयदपुक्तं विसृष्टाचाचमने विधिविभक्तिरिति तदपि पूर्ववत्त्वेनैवाचमनस्य प्रस्तुतं अत एवाच-
मनस्याविधित्वान्नुवादत्वमेवतदनमनतमुक्तं वैतामन्यन्तइत्यमेवकाण्वापर्यवसानाम नेति तस्मादेवंविदित्यादि तस्मा-
न्माध्यंदिनानामपि पाठे आचमनानुवादेनैव वित्वमेव प्रकृतं प्राणवासोवित्त्वविधीयत इति प्रतिपत्तव्यं यो प्ययमभ्यु-
पगमः क्वचिदाचमनविधीयते क्वचिद्वासोविज्ञानमिति सोपि न साधुः आपो वासइत्यादि कायाद्वाक्यप्रवृत्तेः
सर्वत्रैकरूप्यात् तस्माद्वासोविज्ञानमेवेह विधीयते नाचमनमिति न्याय्या समान एवं चामेदात् ॥ १९ ॥ वाजसनेयि-
शाखायामग्निरहस्ये शांडिल्यनामांकिता विद्या विज्ञाता तत्र गुणाः श्रूयन्ते स आत्मानमुपासीत मनोमयं प्राणशरीरं
भारूपमित्येवमादयः तस्यामेव शाखायां बृहदारण्यके पुनः पठ्यते मनोमयोऽयं पुरुषो भाःसत्यस्तस्मिन्नन्तर्हृदये यथा
व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किं चेति तत्र संशयः किमियमेका वि-
द्याग्निरहस्यबृहदारण्यकयोर्गुणोपसंहारश्चेति उत द्वे इमे विद्ये गुणानुपसंहारश्चेति किं तावत्प्राप्तं विद्याभेदो गुणा-
व्यवस्था चेति कुतः पौनरुक्त्यप्रसंगात् भिन्नासु हि शाखासु अध्येतृवेदितृभेदात्पौनरुक्त्यपरिहारमालोच्य विद्यै-
कत्वमध्यवसाय एकत्राभिहितानां गुणानामितरत्रोपसंहार उपपद्यते प्राणसंवादादिष्विव उक्तं एकस्यां पुनः शाखायामध्येतृवेदि-

शांडिल्येन न दृष्टानन्नाम्नांकिता अंतर्हृदये व्रीह्यादिवत्स्वरूपं निर्दिष्टमित्यर्थः अभ्यासप्रत्यभिज्ञानाभ्यां संशयमाह तत्रेति गुणा-
नुपसंहारोपपत्तिरिति पूर्वपक्षफलं रूपं तत्राचमनानुवादेनानग्नताध्यानविधिरिति उक्तं इह त्वेकशाखायां विप्रकृष्टदेशस्थयोर्वा-
क्ययोरेकस्यविधित्वमन्यस्यानुवादत्वमित्यपनिश्चय्याद्वयोरपि विद्याविधित्वमिति प्रत्यवस्थानेन पूर्वपक्षयति किं तावदिति
यत्तु न रुक्तेने हि पौनरुक्त्यमिति तन्न्याय्यं अमिश्रपंचाग्न्यादि विद्यासु प्रत्यभिज्ञानादिशाक्य शाखाभेदे पुनरुक्तिरस्तीत्येतदित्युक्तत्वादाह भि-

न ६

पा ५

राम ३७

उभयविधानेवाक्यभेदः स्यादिति तच्चापत्त्यांतरमाह अथवेति प्रशस्तं हीदमाचमनं यस्मादनेन प्राणमनग्नं मन्यंत इति स्तुतिः प्रसिद्धानुवादेनाप्रसि
द्धविधेयमिति न्यायेन सिद्धांत इति एवमिति प्रयतस्य प्रयतत्वे तो भावः प्रायत्यं स्वहृत्स्तदर्थमित्यर्थः स्मृत्याभ्युद्धर्थं कार्यत्वेन विहितं सक
लकर्मांगत्वेन याग्नमाचमनानुवादेनापूर्वमनग्नताध्यानमेव विधीयते इति तत्रार्थः स्मार्तमाचमनमनूद्यानानात्र पतेर्किंत्वनया श्रुत्या विहित
स्यत्यानूद्यत इति शंकते नचेति श्रुतिस्मृत्योरनयोर्नमूलमूलीभावः भिन्नविषयत्वादिति आचमनानंतरं विधिमुपेत्य मलमलित्व

अथ पुनराचमनमेव विधीयेत विस्पष्टा हि तस्य विधिविभक्तिः स्यादेवंविदशिष्यन्नाचामेदशित्वाचाचामेदिति न त्वेतस्यैव स्तुत्यर्थमन
ग्नतासंकीर्तनमिति एवं प्राप्ते ब्रूमः नाचमनस्य विधेयत्वमुपपद्यते कार्याख्यानात् प्राप्तमेव हीदं कार्यत्वेनाचमनं प्रायत्या
र्थं स्मृतिप्रसिद्धमन्वाख्यायते ननु चेयं श्रुतिस्तस्याः स्मृतेर्मूलं स्यात् नेत्युच्यते विषयनानात्वात् सामान्यविषया हि स्मृतिः
पुरुषमात्रसंबद्धं प्रायत्यार्थमाचमनं प्रापयति श्रुतिस्तु प्राणविद्याप्रकरणपठिता तद्विषयमेवाचमनं विदधती विद
ध्यात् न च भिन्नविषययोः श्रुतिस्मृत्योर्मूलमूलीभावोऽवकल्पते न चेयं श्रुतिः प्राणविद्यासंयोगि अपूर्वमाचमनं विधा
स्यतीति शक्यमाश्रयितुं पूर्वस्यैव पुरुषमात्रसंयोगिन आचमनस्येह प्रत्यभिज्ञायमानत्वात् अत एव च नोभयविधान
मुभयविधाने च वाक्यं भिद्येत तस्मात्प्राप्तमेवाशिशिषतामशितवतां चोभयत आचमनमनूद्य यत्तदाचमनमनग्नं कु
र्वंतो मन्यंत इति प्राणस्यानग्नताकरणसंकल्पोऽनेन वाक्येनाचमनीयास्वप्सु प्राणविद्यासंबंधित्वेनापूर्व उपदिश्यते न
चायमनग्नतावादः आचमनस्तुत्यर्थ इति न्याय्यं आचमनस्याविधेयत्वात् स्वयं चानग्नतासंकल्पस्य विधेयत्वप्रतीतेः न
[illegible] वैतत्येकस्याचमनस्योभयार्थताभ्युपगता भवति प्रायत्यार्थता परिधानार्थता चेति क्रियांतरत्वाभ्युपगमात् क्रिया ह्येषा
चमनं नाम प्रायत्यार्थं पुरुषस्याभ्युपगम्यते तदीयासु त्वप्सु वासःसंकल्पनं नाम क्रियांतरमेव परिधानार्थं प्राणस्या
भ्युपगम्यत इत्यनवद्यं अपि च यदिदं किंचाश्वभ्य आ कृमिभ्य आ कीटपतंगेभ्यस्तत्तेऽन्नमिति न तावत्सर्वान्नाभ्यव
हारश्चोद्यत इति शक्यते वक्तुं अशब्दत्वादशक्यत्वाच्च सर्वं तु प्राणस्यान्नमितीयमन्नदृष्टिश्चोद्यते तत्साहचर्याच्चापो वास
इत्यत्रापि नापामाचमनं चोद्यते प्रसिद्धास्वेवाचमनीयास्वप्सु परिधानदृष्टिश्चोद्यत इति युक्तं न ह्यर्धवैशसं भवति ॥ ॥

निरस्तं संप्रति विधिं दर्शयितुं सिद्धं कृत्वाह नचेयं श्रुतिरिति अत एवेति आचमनविध्यभावादेवेत्यर्थः अप्सु प्राणवासस्त्वध्यानाख्यः संकल्प ॥
ः प्राणविद्यांगत्वेन विधीयत इत्याह तस्मादिति स्वयं चेति अप एवं त्वादित्यर्थः स्मृत्या यो विनियुक्तस्याचमनस्य प्राणाच्छादनार्थत्वं वि ॥
द्धमित्याशंक्याह नचैवं सतीति आचमनस्याच्छादनार्थत्वमसिद्धमित्यर्थः किं च यथा सर्वं वाक्ये प्राणस्यान्नध्यानमेव विहितं त ॥
थात्र वासोध्यानं विधीयते अन्यथाचमनविधौ सर्वान्नध्यानविधिहानं त्रक्रियाविधिरित्यर्द्धवैशसं स्यादित्याह अपि चेति भक्षये ॥

वाक्ये क्रियाविधिरित्यर्थः ॥

ति शब्दाभावाच्छब्दायत्तस्य सर्वस्य मनुष्येणोपात्तकेन भोक्तुमशक्यत्वाच्चेत्यर्थः

वा॰
वार्त्ति॰
टी॰
३६

तदेकमेवतत्त्ववधारणं अनेन जीवात्मनेति सदेवतानां कर्तृको जीवस्यात्मशब्देन परामर्शः स एव जीवः सता संपन्नो भवतीति कथनं भयप
वमा भगवन् विज्ञापयत्विति परिचोदनोत्तरं इति पदेन सता अयुज्यते न जातिमात्रे केवलं वा विशते प्रत्ययान्तत्वात् न यथा चोपक्र
मे सता आत्मसमानत्वात् आकाशं आश्रयत्वात् का त्वाया वा कपोषा दात्मेतिनिष्ठी यतइत्याह नेचातितच्छुक्ल साम्ना नात्मसाधार
णमनुपत्ताकृतत्त्वेपि नालं आकाशपदवत्सत्ति दृष्टव्यक्त्वा वा विन्त्वाद्युक्तिश्च वाधा योगपाचिदानेवेति न वाजिळ्छंदोगयो रुप
क्रमवैषम्यमित्याह तच्छुक्लेति वैषम्यमप्यप्याह आम्नातेति वाजिवाक्ये त्वमर्थस्य तत्पदार्थपूर्यन्तस्य लक्षस्य प्रतिपाद
नेच्छांदोग्यवाक्ये तु तत्पदार्थस्य त्वमर्थपर्यन्तस्य प्रतिपादनमिति प्रकारभेदेपि वाक्यार्थैक्ये का मिति फलितमाह तस्मादि
ति कार्याख्यानादेवं तेन मन्त्र किं गृह्यत इति प्राणेन पृष्टा वागादयऽचुः यदिदं किं चाश्वभ्यः तत्ते अन्नमापो वासइति सर्वप्राणि
भिर्भुज्यमानं यदिदं प्रसिद्धं अश्वादिपर्यन्तमन्नं तत्प्राणस्यान्नं वासः आपे आच्छादनमित्युपात्तके नाचमनीयमित्यर्थः शाखाद्वये
नचात्रोपक्रमतंत्रतोपन्यासोन्याय्यः नह्युपक्रमस्यात्मत्वसंकीर्तनमनात्मत्वसंकीर्तनेवास्ति सामान्योपक्रमश्च न वाक्य
शेषगतेन विशेषेण न विरुद्धे न विशेषाकांक्षित्वात् सामान्यस्य तच्छुक्लाप्यापि च पूर्यालोच्यमानो न सख्या सम
नोन्यः समवति अन्तोन्यस्य वल्लज्ञानस्यारंभणशब्दादिभ्यान्ततत्वोपपत्तेः आम्नातेन वैषम्यमपिनावश्यमर्थवैषम्य
मावहति आहरपात्रेपात्र माहरेत्यादिष्वर्थसाम्येपि च तद्दर्शनात् तस्मादेवजातीयके प्रतिपादनप्रकारभेदे
पि प्रतिपाद्यार्थाभेदइति सिद्धं कार्याख्यानादपूर्वं १८छंदोगा वाजसनेयिनश्च प्राणसंवादे श्वादिमर्यादं प्राणस्या
न्नमाम्नायन्तस्यै वापो वास आमनन्ति अनंतरं च छंदोगा आमनन्ति तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परि
दधतीति वाजसनेयिनस्त्वामनन्ति तद्विद्वांसः श्रोत्रियाः अशिष्यन्त आचामन्त्यशित्वा चाचामन्ति एतमेव तदनमनग्नं कु
र्वन्तो मन्यन्ते तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुतइति तत्राचमनमनग्नताचिंत
नं च प्राणस्य प्रतीयते तत्किमुभयमपि विधीयत उताचमनमेवोत उतानग्नताचिंतनमेवेति विचार्यते किं तावत्प्राप्तमुभय
मपि विधीयत इति कुतः उभयस्याप्यवगम्यमानत्वादुभयमपि चैतदपूर्वत्वाद्विधार्हम् ॥

यदि शिष्यः प्रकृति मत्वा विशेषप्रकृति भेदमाह अनंतरं चेति तस्मादन्नं प्राणवस्त्रत्वादपि वंत्वोश्चानं कुर्वतः श्रोत्रियपरंतत्वं
निकिं तदभोजनात्पूर्वमूर्ध्वं चाचामंतीति यत्तदद्भि प्राणस्य परिदधत्याच्छादयन्तीत्यर्थः एवं तत्राचमनस्य विधिनीषु प्राणवासस्त्व
त्वचिंतनरूपमनग्नताध्यानं कार्यमिति भावः ततस्मादित्यत्र कार्यमयतः एवं विद्वान् शिष्यन्नाचामेदथ चाचामेत् एतमेवानप्रा
णं तेनाचमनेनाचमनेनानग्नमाच्छादितं कुर्वन्तो मन्यन्ते चिंतयन्ति तस्मादेवंविदिदानींतनोप्युपासकः एवं कुर्यादिति वाक्यत्रयस्या
र्थः अत्रोभयारण्यपूर्वत्वात्संशयमाह तत्किमिति संदिग्धस्तदुपक्रमस्य वाक्यशेषानुग्रिणिप्रयदाचामन्तीति पदस्य वि
धित्वसंदेह आचमेदिति वाक्यशेषाद्विधित्वनिर्णयइति द्रष्टान्तसंगत्या पूर्वपक्षमाह किं तावदिति तानसाधनोपा
सनानांविधिविचारात्पादसंगतिर्विधावुपरोधे पत्नी प्राणविद्यांगत्वेनापूर्वाचमनविधितमन्यन्तो पतत्त्वं नन्विमितिफलेसिद्धांत

क्रमस्य व्याख्यानेन गौण उपसंहारस्य स्पष्टत्वान्नापादसंगतिरिति मत्वा एवमाख्यान्तरमाह अपूर्वेति उदर्कः उपसंहारः स च उक्तः स्यादेतत् मनसा आत्म
त्यात्मरूपायेत्याह तत्रेति एवं प्रत्ययमतानाम् आत्मा ब्रह्मात्मत्वमपदुपास्तिः छान्दोग्यवाजिश्रुतौ निर्गुणविषयेति भेदान्नियोगगुणानुपसं
हारः सिद्धान्ते मयत्रगुणविषयकाद्युपसंहारः इति फलभेदः परानो जानो शक्तिग्रहात्स छन्दोगानां जातिवाचीत्युपक्रमस्य नि
श्चितत्वात् सजातिविरोध्युपक्रमबलेन तादात्म्योपदेशः संपतिपरतयानपद्युति मुख्य पक्षे निष्कर्षः एवं त्र वाक्यैकार्थ्याद्विक्षिप
रेवं तत्काविषयक मुक्ते इहतमदात्मशब्दाभ्यां जात्यात्मवाचिभ्यामुपक्रममभेदाद्धेतोः कमभेदस्ति विद्याभेद इति प्रत्युदाहरणसंग॥

पृ ८७

अपरायोजना आत्मगृहीतिरितरवदुत्तरात् वाजसनेयके कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष
इत्यात्मशब्देनोपक्रम्य स वा एष महानज आत्मा सर्वस्य वशी इत्यादिना प्रतिपादनेन ब्रह्मात्मतामवधारयति तथा ह्युपसंहरति स वा एष
महानज आत्मा जरोऽमरोऽमृतोऽभयो ब्रह्मेति छान्दोग्ये तु सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यन्तरेणात्मपदमुप
क्रम्य उदर्के आत्मा तत्त्वमसीति तादात्म्यमुपदिशति तत्र संशयः तुल्यार्थत्वं किमनयोराम्नानयोः स्यात् अतुल्यार्थत्वं वेति
अतुल्यार्थत्वमिति तावत्प्राप्तम् अतुल्यत्वाद् आम्नायोः न ह्याम्नानवैषम्ये सत्यर्थसाम्यं युक्तं प्रतिपत्तुम् आम्नानं तु वैषम्याद्
र्थपरिग्रहः स्यात् वाजसनेयके चात्मशब्देनोपक्रमात् तादात्म्योपदेशो गम्यते छान्दोग्ये तूपक्रमविपर्ययादुपदेश
विपर्ययः ननु छान्दोग्यानामप्युदर्के तादात्म्योपदेश उक्तः सत्यम् उक्तः उपक्रमे तत्त्वादुपसंहारस्य तादा
त्म्यसंपत्तिः सेति मन्यते तथा प्राप्ते अभिधीयते आत्मगृहीतिः सदेव सोम्येदमग्र आसीदित्यत्र छान्दोग्यानामपि भवितु
मर्हति इतरवत् यथा कतम आत्मेत्यत्र वाजसनेयिनामात्मगृहीतिः तथैव कस्मात् उत्तरात् तादात्म्योपदेशात्
अन्वयादिति चेत् स्यादवधारणात् उपक्रमान्वयादुपक्रमे चात्मशब्दस्याश्रवणाभावान्नात्मगृहीतिः स्यात् कः पाठ्याहा
र इति चेत् अभिधीयते स्यादवधारणादिति भवेदुपपन्ना ह्यात्मगृहीतिः अवधारणात् तथा हि येनाश्रुतं श्रुतं भवत्य
मतं मतमविज्ञातं विज्ञातमिति एकविज्ञानेन सर्वविज्ञानमवधार्य तत्संपिपादयिषया सदेव सोम्येत्याह तच्चात्मग्र
हीतो सत्यां संपद्यते अन्यथा हि योऽयं मुख्य आत्मा स न विज्ञात इति नैव सर्वविज्ञानं संपद्येत तथा प्रागुत्पत्तेरेकत्वाव
धारणाज्जीवस्य चात्मशब्देन परामर्शः स्वापावस्थायां च तत्स्वभावसंपत्तिकथने परिचोदनापूर्वकं च पुनः पुनस्तत्त्व

तिः न चात्मशब्दो जातिवाचकः आत्मव्यक्तेरेकत्वाज्जात्यभावात् किं तु सर्वान्तरवस्तुवाचकः कल्पितजातिवाचित्वेऽप्युपक्र
मभेदः स्फुट एव सतामात्मत्वयोर्भेदादिति मन्तव्यमिति सिद्धान्तयति तथेत्यादिना उपक्रमान्वयादिति उपक्रमाधीनत्वादु
पसंहारस्येत्यर्थः तच्चावधारणं सत्यदेनात्मगृहीतो सत्यामुपपद्यत इत्याह तच्चेति ॥ ॥ राम ॥ राम ॥

शा.व.
२.२.
३५

आत्मशब्दस्य चिदात्मनि निरवग्रहे बाधकाभावादुत्तरस्येक्षणादेरनुकूलत्वात्परमात्मग्रहणमिति सिद्धांतयति एवं प्राप्त इति महाभू
तसृष्टिपूर्वकं लोकानसृज्यतेति श्रुतेर्व्याख्येयेति अन्वयादिति आत्मा वा इदमेक एवाग्र आसीत् प्रज्ञानं ब्रह्मेति चोपक्रमो
पसंहारस्यात्मब्रह्मश्रुतिभ्यामेकत्वावधारणात्तेक्षणादिलिंगस्य लोकसृष्ट्यादिलिंगस्यात्मब्रह्मग्राह्यमिति भावः

एवं प्राप्ते ब्रूमः परएवात्मेहात्मशब्देन गृह्यते इतरवत् यथेतरेषु सृष्टिश्रवणेषु तस्माद्वा एतस्मादात्मन आकाशः
संभूत इत्येवमादिषु परस्यात्मनो ग्रहणं यथा च तरस्मिंल्लौकिकात्मशब्दप्रयोगे प्रत्यगात्मैव मुख्य आत्मशब्देन गृह्य
ते तथेहापि भवितुमर्हति यत्रात्मैवेदमग्र आसीदित्येवमादौ पुरुषविध इत्येवमादि विशेषणांतरं श्रूयते भवेत्तत्र वि
शेषणवत आत्मनो ग्रहणं अत्र पुनः परमात्मग्रहणानुगुणमेव विशेषणमुत्तरमुपलभ्यते स ईक्षत लोकान्नु सृजा इति
स इमाँल्लोकानसृजतेत्येवमादि तस्मात्तस्यैव ग्रहणमिति न्याय्यं अन्वयादिति चेत्स्यादवधारणात् १२ वाक्यान्वयदर्श
नात्र परमात्मग्रहणमिति पुनर्यदुक्तं तत्परिहर्तव्यमित्यत्रोच्यते स्यादवधारणादिति भवेदुपपन्नं परमात्मनो ग्रहणं
स्यादवधारणात् परमात्मग्रहणे हि प्रागुत्पत्तेरात्मैकत्वावधारणमांजसमवकल्पते अन्यथा ह्यनांजसं तत्परिकल्प्येत
लोकसृष्टिवचनं तु श्रुत्यंतरप्रसिद्धमहाभूतसृष्ट्यनंतरमिति योजयिष्यामि यथा तत्तेजोऽसृजतेत्यत्र श्रुत्यंतरप्रसिद्धवियदा   तु.रूऋत्वेनतष्ट४
युसृष्ट्यनंतरं तेजसः सृष्टिर्योजिता एवमिहापि श्रुत्यंतरप्रसिद्धो हि समानविषयो विशेषः श्रुत्यंतरेषूपसंहर्तव्यो भवति योऽप्ययं
मा॰ व्यापारविशेषानुगमः इत्यभ्यो गामानयदित्यादि सोऽपि विवक्षितार्थावधारणानुगुण्येनैव ग्रहीतव्यः न ह्ययं सकलः क
इ॰ थाप्रबंधो विवक्षित इति शक्यते वक्तुं तत्प्रतिपत्तौ पुरुषार्थाभावात् ब्रह्मात्मत्वं त्विह विवक्षितं तथा ह्यंभःप्रभृतीनां
लोकानां लोकपालानां चाग्न्यादीनां सृष्टिं शिष्ट्वा करणानि करणायतनं च शरीरमुपदिश्य स एव स्रष्टा कथं न्विदं मदृते
स्यादिति वीक्ष्येदं शरीरं प्रविवेशेति दर्शयति स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यतेति पुनश्च यदि वाचाभि
व्याहृतं यदि प्राणेनाभिप्राणितमित्येवमादिना करणव्यापारविवेचनपूर्वकं अथ कोऽहमिति वीक्ष्य स एतमेव पुरुषं
ब्रह्म ततममपश्यदिति ब्रह्मात्मत्वदर्शनमवधारयति तथोपरिष्टादेष ब्रह्मैष इंद्र इत्यादिना समस्तं भेदजातं सह महाभू
त्रेश्रलाने॰ तैरनुक्रम्य सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्मेति ब्रह्मात्मत्वदर्शनमेवावधारयति त
स्मादिहात्मगृहीतिरित्यनपवादं

स परमेश्वर एतमेव सीमानं मूर्ध्नः केशविभागावसानं विदार्य छिद्रं कृत्वा तमात्मा ब्रह्मरंध्राख्यया द्वारा लिंगविशिष्टः प्रविश्या
नितरां मां विना यद्वागादिभिः स्वस्वव्यापारः कृतः तद्यत्तदाहं क इति पदार्थं विचार्य स्वयमेतमेव शोधितमात्मानं ब्रह्म
ततमं व्याप्ततममपश्यत् तकारलोपः छांदसः प्रज्ञा चिदात्मा नेत्रं नीयतेऽनेनेति नियामकं यस्य तत्प्रज्ञानेत्रं चिदात्मनियं

॥ ऐतरेयोपनिषद्भाष्यटीका ॥

राम
३५

आत्मगृहीतीति मिषञ्चलल्लोकानाह अंभइति अंभःस्वर्गः मरिचयोंतरिक्षलोकः मरोमर्त्यलोकः आपःपाताललोकइत्यर्थः आत्मशब्द
स्य ब्रह्मणि स्त्रात्मनि च प्रयोगात्तेपायमाह तत्रेति अत्र पूर्वपक्षे वाक्यस्य सूत्रोपात्तिपरत्वात्तस्यैव ब्रह्मधर्माणामानंदादीनामुत्तरग्रंथेनप्र
तेहारः सिद्धांते ब्रह्मपरत्वादुपसंहारइति फलं पूर्वपक्षवाक्याद्रुदप्रसंगादधीदिश्रुति पादिकत्वमित्युक्तं न तु दिहापि प्रजापतेरेतो हेवाइ
ति पूर्वस्मात्प्रजापतिवाक्याद्रुद्रप्रसंगादात्मा वाइत्यादिवाक्यस्य न ब्रह्मपरत्वमिति दृष्टांतेन पूर्वपक्षयति नपरमात्मेत्यादिना वाक्य
स्य प्रजापतौ तात्पर्यदर्शनादित्यर्थः पूर्वपक्षमाक्षिप्य लोकसृष्टत्वलिंगात्प्रजापतौ वाक्यान्वय इत्याह नन्वित्यादिना लोकाएव महाभू

आत्मगृहीतीतिरितरवद्गुणात् १६ ऐतरेयके श्रूयते आत्मा वाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत्सईक्षत लोकान्नुसृजाइति
सइमांल्लोकानसृजत अंभोमरीचीर्मरमापइत्यादि तत्र संशयः किं परएवात्मा इहात्मशब्देनाभिलप्यते उतान्यः कश्चिदिति नपरमा
त्मेहात्मशब्देनाभिलप्यो भवितुमर्हतीति कस्माद्वाक्यान्वयदर्शनात् नन्वयं वाक्यान्वयः सुतरां परमात्मविषयो दृश्यते प्रागुत्पत्तेरा
त्मैकत्वावधारणात् ईक्षणपूर्वकं च सृष्टत्ववचनाच्चेन्नेत्युच्यते लोकसृष्टिवचनात् परमात्मनि हि सृष्टिविषये महाभूतसृष्टिर्महाभू
तसृष्टिरादावेव भवति लोकसृष्टिस्तु हायमुच्यते लोकाश्च महाभूतसंनिवेशविशेषास्तथा चांभःप्रभृतीँल्लोकत्वेनैव निर्ब्र
वीति अदोंभः परेण दिवमित्यादिना लोकसृष्टिश्चापरेणेश्वराधिष्ठितेनापरेण केनचिदीश्वरेण क्रियत इति श्रुतिस्मृत्यो
रूपलभ्यते तथा हि श्रुतिर्भवति आत्मैवेदमग्र आसीत्पुरुषविध इत्याद्यास्थितिशेषिस्मृतिर्भवति स वै शरीरी प्रथमः स वै पुरुष उच्यते
आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत इति ऐतरेयिणामपि प्राग्धानोरेतसः सृष्टिः प्रजापतेरेतो देवाइत्यत्र एवं स्मिन्प्रकरणे प्र
जापतिकर्तृकां विचित्रां सृष्टिमामनंति आत्मशब्दोपि तस्मिन्प्रयुज्यमानो दृश्यते आत्मैवेदमग्र आसीत्पुरुषविध इत्यत्र प
रमात्मावधारणमपि प्राग्रुत्पत्तेः सविकारापेक्षमुपपद्यते ईक्षणमपि तस्य चेतनत्वादुपपद्यमानमुपपन्नं अपि च नाभ्यो गामान
यताभ्यो श्वमानयताभ्यः पुरुषमानयता भूतवत्त्वाद्विजातीयकोभ्यस्तानव्यापारविशेषा लोकिके पुविशेषवत्स्वात्मसृष्टि
इत्यनुगम्यते तस्माद्विशेषवानेव कश्चिदिहात्मास्यादिति ॥

नौ तांत्यनतआह लोकाश्चेति लोकपदस्य महाभूते तात्पर्यं कठत्वादौ लौकिकाएव लोकाः निर्वचनाच्चेत्याह तथा चेति अंभोमरीचिर्मरमापइ
तिरेव यत्वास्वयमेव श्रुतिर्व्याचष्टे परेणादिवं द्युः परस्तादिदिप्रतिष्ठितमग्रे अंभः सा द्यौ मायालोकस्तदंभः अंतरिक्षमरीचयः पृ
थिवी मरो या अधस्तात्ता आपइति ननु लोकसृष्टिरपीश्वरादेवास्त्वनेत्याह लोकेति पुरुषविधो नराकारस्त्वात्माहिरण्यगर्भः आ
थिपीलिकाभ्यः सर्वमसृजतेत्यर्थः भूतानां लोकानामित्यर्थः प्रकरणादपि लोकस्रष्टा प्रजापतिरित्याह ऐतरेयिणामपीति रेतःका
र्यमिति यावत् ब्रह्मलिंगानि प्रजापतौ योजयति आत्मशब्दोपीत्यादिना किंच प्रजासृष्टेः प्रतिभागाभ्यो गामानयलोकसृष्टा
नपाश्वमानयतासुगमा अस्यप्राश्यानंतरमासतः पुरुषशरीरे आनिनेताश्वं वनत् मीःस्मर इति अयं च विवहारो लोकसृष्टः प्र

उतान्यः कश्चिदिति २४

जापतिर्लोकसृष्टिसमाप्य श्रियेरीति ॥

वाक्यभेदाभेदानवधारणात्संशयमाह तत्रेति पूर्वपक्षे वाक्यभेदाद्द्विधाभेदात् सिद्धान्ते वाक्यैक्याद्द्वैधमिति फले पूर्वत्र ब्रह्मस्व
भावानामानन्दादीनामुपसंहाराद्ययोगाद्ब्रह्मज्ञानफलोपायत्वमक्रमत्वं ब्रह्मस्वभाववस्त्वर्थादि परस्मिन्नुपसंहार्यस्तत्तदुपायत्वमभ्युपगत
इत्यनेकफलकत्वसंगतिः तत्र परत्वविशिष्टत्वेनार्थादीनां सर्वेषां प्रतिपाद्यानां भेदाद्वाक्यभेदोत्र दोषइति पूर्वपक्षः उ
त्तरत्र सिद्धान्तं प्रतिज्ञाय सौत्रे हेतुं व्याचष्टे पुरुषएवेति फलवत्त्वमत्र पुरुषत्वात्पुरुषस्यैव प्राधान्येन प्रतिपाद्यत्वमफलार्थादीनां

तत्र संशयः किमिमे सर्वे एवार्थादयः तत्तत्तः परत्वेन प्रतिपाद्यन्ते उत पुरुषएवैभ्यः सर्वेभ्यः परः प्रतिपाद्यत इति तत्र ता
वत्सर्वेषां परत्वेन प्रतिपादनमिति भवति मतिः तथाहि श्रूयते इदमस्मात्परमिति तत्तद्वस्तुषु परत्वेन प्रतिपाद
यिषितेषु वाक्यभेदः स्यात् न एष दोषः वाक्यबहुत्वोपपत्तेः बहून्येव ह्येतानि वाक्यानि भवन्ति बहुविषयान्यर्थोपेतानि प्र
तिपादयितुं तस्मात्प्रत्येकमेतेषां परत्वप्रतिपादनमित्येवं प्राप्ते ब्रूमः पुरुषएवैभ्यः परः प्रतिपाद्यत इति युक्तं न प्रत्ये
कमर्थादीनां परत्वप्रतिपादनं कस्मात्प्रयोजनाभावात् न हीतरेषु परत्वेन प्रतिपन्नेषु किंचित्प्रयोजनं दृश्यते श्रूयते वा
पुरुषे तु इन्द्रियादिभ्यः परस्मिन्सर्वानर्थव्राताती ते प्रतिपन्ने दृश्यते प्रयोजनं मोक्षसिद्धिः तथा च श्रुतिः निचाय्य तं मृ
त्युमुखात्प्रमुच्यत इति अपि च परप्रतिषेधेन काष्ठाशब्देन च पुरुषविषयमादरं दर्शयन्पुरुषप्रतिपत्त्यर्थैव पूर्वाप
रप्रवाहोक्तिरिति दर्शयति आध्यानायेत्याध्यानपूर्वकाय सम्यग्दर्शनायेत्यर्थः सम्यग्दर्शनार्थमेव हीह आध्यानमु
पदिष्टं न तु आध्यानमेव स्वप्रधानं आत्मशब्दाच्च १५ इतश्च पुरुषप्रतिपत्त्यर्थैवेयमिन्द्रियादिप्रवाहोक्तिः यत्कारणं
एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति प्रकृतं पुरुषमात्मेत्याह अतश्चानात्मत्व
मितरेषां विवक्षितमिति गम्यते तस्यैव च दुर्विज्ञानतां संस्कृतमतिगम्यतां च दर्शयति तद्विज्ञानायैव च यच्छेद्वाङ्मनसी
प्राज्ञ इत्याध्यानं विदधाति तद्व्याख्यातं मानुमानिकमप्येकेषामित्यत्र एवमनेकप्रकार आदरातिशयः श्रुतेः पुरुषप्र
त्यभिज्ञानेनेतरेषु अपि च साधुनः पारमापनीति तद्विष्णोः परमं पदमित्युक्ते किं तदध्वनः पारं विष्णोः परमं पदमित्याकाङ्क्षायामिं

परत्वं तत्सर्वेषु परत्वेनोच्यत इत्यर्थः किंच पुरुषान्न परं किंचित्सा काष्ठेति वदः परनिषेधलिङ्गेन सर्वबाधावधित्वलिङ्गेन च पुरुषेना
त्यर्थं दर्शयन्सर्वस्मात्सर्वस्मादपरस्य परत्वाकांक्षा सदर्थं तद्दर्शयतीत्याह अपिचेति अर्थादीनामचोक्तिराध्यानाय तत्तत्पर
तध्यानपूर्वकं पुरुषदर्शनायैव सत्तः प्रयोजनः भावादिति सूत्रं योजयति आध्यानायेति आत्मत्वादिलिङ्गैः पुरुष
एव प्रतिपाद्य इत्याह आत्मशब्दाच्चेति किं च तद्विष्णोः परमं पदं पुरुषान्न परं किंचिदिति उपक्रमसमुपसंहारपर्यालोच
नयापि तत्र फलवदेकपुरुषपरत्वे नेकवाक्यत्वनिश्चये सति वाक्यभेदफलभेदकल्पनानयुक्ता गौरवादित्याह अपि

णात्व
तर्फ:
२८

मिदमस्मात्परं ४

वे १४

४ सत्त्वपा४

द२४

दा

नाम
३४

ब्रह्मैकत्वाच्चेदानंदत्वादिधर्माणां सर्वत्र प्राप्तिस्तर्हि सगुणब्रह्मविद्यागतधर्मप्राप्तिरपि स्यादिति शंकानिरासार्थं सूत्रं व्याचष्टे
प्रियेति पुत्रदर्शनजसुखं प्रियं तल्लाभजनितो मोदस्तस्य विशेषः प्रमोदस्तेषां निरन्तरतम्यवतो धर्मास्त्वहयज्ञैयेन प्राप्तव-
तितेषामब्रह्मस्वरूपाणां ब्रह्मज्ञानानुपयोगादिति भावः तेषां ब्रह्मधर्मत्वं चासिद्धमित्याह नचैते इति ब्रह्मणो
चित्तावतारोपायत्वेपि तेषां प्राप्तिः स्यादित्याशंक्याह एवमपीति अज्ञेयत्वादेषां न ज्ञेये ब्रह्मणि प्राप्तिरित्यर्थः किमु

प्रियशिरस्त्वादीनां धर्माणां तैत्तिरीयकआम्नातानां नान्यत्र प्राप्तिः यत्कारणं प्रियं मोदः प्रमोद आनंद इत्येते पर
स्परापेक्षया भोक्त्रन्तरापेक्षया चोपचितापचितरूपा उपलभ्यंते उपचयापचयौ च सति भेदे संभवतः निर्भेदं
तु ब्रह्म एकमेवाद्वितीयमित्यादिश्रुतिभ्यः नचैते प्रियशिरस्त्वादयो ब्रह्मधर्माः कोशधर्मास्त्वेते इत्युपादिष्टमानंदम
याभ्यासादित्यत्रापि च परस्मिन् ब्रह्मणि चित्तावतारोपायमात्रत्वेनैते परिकल्प्यन्ते न द्रष्टव्यत्वेन एवमपि सुतरामन्य
त्राप्राप्तिः प्रियशिरस्त्वादीनां ब्रह्मधर्मत्वे नान्त्वान्यायमात्रमिदमाचार्येण दर्शितं प्रियशिरस्त्वाद्यप्राप्ति- १५
रिति स च न्यायोन्येषु निश्चितेषु ब्रह्मधर्मेषूपासनायामुपदिश्यमानेषु नेतव्यः सत्यकामादिषु सत्यकामादिषु च ते
षु हि सत्येप्युपास्यस्य ब्रह्मण एकत्वे प्रक्रमभेदादुपासनभेदे सति नान्यान्यधर्माणामन्योन्यत्र प्राप्तिः यथा हि द्वे ना
र्यौ एकं नृपतिमुपासाते छत्रेणान्या चामरेणान्येति तत्रोपास्यैकत्वेप्युपासनभेदो धर्मव्यवस्था च भवति एवमिहा
तापचि४ पीत्युपचितगुणत्वं हि सति भेदव्यवहारे सगुणे ब्रह्मण्युपपद्यते न निर्गुणे परस्मिन् ब्रह्मणि अतो न सत्यकामा
दीनां धर्माणां क्वचिच्छ्रुतानां सर्वत्र प्राप्तिरित्यर्थः इतरे त्वर्थसामान्यात् १३ इतरे त्वानंदादयो धर्मा ब्रह्मस्वरूप
मा३ प्रतिपादनायैवोच्यमाना अर्थसामान्यात्प्रतिपाद्यस्य ब्रह्मणो धर्मिण एकत्वात्सर्वे सर्वत्र प्रतीयेरन्निति विशेषः सम्प्र
प्रतिपत्तिमात्रप्रयोजना हि ते इति आध्यानाय प्रयोजनाभावात् १४ काठके हि पठ्यते इंद्रियेभ्यः परा ह्यर्था अर्थेभ्य
श्च परं मनः मनसस्तु परा बुद्धिरित्यारभ्य पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः॥

एवं तर्हि सूत्रमिदमपार्थकमित्यत आह ब्रह्मधर्मानिति क्वचित् चिंताफलमाह स चेति तेषां वा स्वधर्माणामनुपयोगादप्राप्तिरिति न्यायात्सत्य
कामत्वादीनामप्राप्तिरिति सूत्रं व्याख्येयमित्यर्थः ज्ञानानुपयोगे विध्यानेतेषां धर्माणामुपयोगादुपास्यब्रह्मैक्यात्प्राप्तिरस्तोन्यविद्यासु
स्यादित्याशंक्याह नवृद्धेति ध्यानविधिपरत्वाभावाद्यथाविधि वा व्यवस्थेत्यर्थः संपद्वामत्वादिधर्मस्य आनंदादीनां वेद्यस्वरूपज्ञानोपयोगित्वा
दित्याह इतरे त्विति सत्यज्ञानानंदात्मब्रह्मशब्दाः सर्वत्रोपसंहर्तव्या इति सिद्धं आध्यानाय ॥ रामाय नमः ।

शा.भा.
त.र.
३३

कौषीतकिश्रुतिस्थप्राणो वसिष्ठत्वादिगुणकः श्रेष्ठप्राणत्वाद्वाजिश्रुतिस्थप्राणवदित्यर्थः तद्गुणानमाने सति श्रुतहानिर्नास्ति
अविरोधादित्युक्तं स्पष्टयति नचैवं सतीति अपिर्गुणानामपि गुणिनो गुणा अतो एवं तत्र दृष्टान्तमाह नहीति फलितमाह तस्मा
दिति आनन्दादयः प्रधानस्य ब्रह्मणो ज्ञेयस्यैकत्वान्निर्विशेषत्वाच्च संशयमाह तेषु संशय इति एवं पदेन सत्यादिपदानुपसंहाराद्वा
क्यार्थानवधारणासिद्धौ तेनावधारणमिति फलम् प्राणस्य सविशेषत्वायुक्तः शाखान्तरीयवसिष्ठत्वाद्युपसंहारः एतत्तु निर्विशेष
त्वात्स्वशाखागतपदैरेव प्रमितिसिद्धेर्व्यर्थः पदान्तरोपसंहार इति प्रत्युदाहरणान्तरपूर्वपक्षः सिद्धान्तमाह इदमिति आनन्दत्व
सत्यत्वज्ञानत्वादिसामान्यानि ब्रह्मणि कल्पिताधर्मास्तेषां सर्वशाखास्वुपसंहारो नाम तद्वाचकानन्दादिपदानामेकवाक्यतया।
सर्वगतत्वं

नचैवं सति श्रुतहानिरश्रुतकल्पना वा भवति एकस्यामपि शाखायां श्रुता गुणाः श्रुता एव सर्वत्र भवन्ति गुणवतो
भेदाभावात् नहि देवदत्तः शौर्यादिगुणत्वेन स्वदेशे प्रसिद्धो देशान्तरं गतस्तद्देशीयैरविभावितशौर्यादिगुणोप्यतद्गुणो
भवति यथा च तत्र परिचयविशेषाद्देशान्तरेपि देवदत्तगुणा विभाव्यन्ते एवमभियोगविशेषाच्छाखान्तरेष्वप्युपास्या गुणाः शाखा
न्तरेषूपसंह्रियेरन् तस्मादेकप्रधानसंबद्धा धर्मा एकत्रापि उच्यमानाः सर्वत्रैवोपसंहर्त्तव्या इति आनन्दादयः प्रधानस्य ॥११॥ ब्र
ह्मस्वरूपप्रतिपादनपरासु श्रुतिष्वानन्दरूपत्वं विज्ञानघनत्वं सर्वज्ञत्वं सर्वात्मत्वमित्येवंजातीयका ब्रह्मणो धर्माः क्वचित्के
चिच्छ्रूयन्ते तेषु संशयः किमानन्दादयो ब्रह्मधर्मा यत्र यावन्तः श्रूयन्ते तावन्त एव तत्र प्रतिपत्तव्याः किं वा सर्वे सर्वत्रेति त
त्र यथाश्रुति विभागधर्मप्रतिपत्तौ प्राप्तायामुच्यते आनन्दादयः प्रधानस्य ब्रह्मणो धर्माः सर्वे सर्वत्र प्रतिपत्तव्याः कस्मात्स
र्वाभेदात् सर्वेष्वेव हि तद्देवैकं प्रधानं विशेष्यं ब्रह्म न भिद्यते तस्मात्सार्वत्रिकत्वं ब्रह्मधर्माणां नन्वेवं सर्वाधिकरणोदितेन
देवदत्तशौर्यादिनिदर्शनेनैवं सति प्रियशिरस्त्वादयोपि धर्माः सर्वे सर्वत्र संकीर्येरन् तथाहि तैत्तिरीयके आनन्द
मयमात्मानं प्रक्रम्याम्नायते तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्ष आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठा।
अत उत्तरं पठति प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥१२॥

चारणमानन्दः सत्यं ज्ञानमनन्तं ब्रह्म शुद्धमद्वयमात्मेति तानि च सजातीयविशेषाधिकरणानि पदानि विरुद्धधर्मत्यागेन तत्त्वाधिष्ठानम
तामेकामखण्डव्यक्तिं लक्षयन्ति नचैकेनैव पदेन लक्ष्यसिद्धेः पदान्तरं व्यर्थमिति वाच्यम् एकस्मिन्नपदे विरोधानावेन लक्षणा
नवतारात् यद्यपि पदद्वयेपि लक्षणा चतरितिन व्याप्याने दोषः सत्यत्वक्रोडः स्वत्वाल्पत्वभ्रान्तिनिरासः एवं सत्यज्ञानत्वादिभ्र
मो भवेत् अतस्तन्निरासार्थं सत्यज्ञानादिपदानि प्रयोक्तव्यानि च भ्रमस्थानं च यथोक्तब्रह्मक्षयर्थवसितस्यादिति वाच्यम् सवि
दानंदात्मकं सर्वधर्मशून्यमद्वयमविकल्पं ब्रह्माहमिति विशेषदर्शी में सर्वभ्रमनिरासात् च विशेषदर्शने यावद्भ्रमंपदे
भवन्तीतावति पदानुपसंहर्त्तव्यानीति भावः॥

भाष्य ३४

राम
३३

सर्वाभेदादन्यत्रेमे विषयं वक्तुं समस्तमर्थमाह वाजिनामिति वाचो वसिष्ठत्वं गुणः वाग्मिनः सुखवासदर्शनाच्चक्षुषः प्रतिष्ठागुणः
चक्षुष्मतः पादप्रतिष्ठादर्शनात् श्रोत्रं संपद्गुणकं श्रवणात् सर्वार्थसंपत्तेः मनस आयतनत्वगुणस्तस्य वृत्तिरात्मभोग्यस्याश्रयत्वात् तद्गुणाः
प्राणस्य श्रेष्ठस्य निश्चित्य वागादिभिस्तस्मिन्नर्पितास्तानिति शाखाभेदात् समस्तार्थः विषयमाह अन्येषामित्यादिना निःश्रेयसस्य श्रेष्ठस्या
दाने निर्धारणाय संशयते इत्यर्थः देवता वागादयो ह श्रेयसे स्वश्रेष्ठ्याय यत्नार्थः एवं शब्दो श्रेष्ठगुणकप्राणप्रत्यभिज्ञानात्तं संशयमाह
तत्रेति गुणानामन्त्यमहारोपस्तद्वै वचने न स्पष्टः फलं श्रैष्ठ्यं विशेषणादौ कारस्य सर्वे वेदव्याप्ति मात्रं स्वतन्त्रकृतिगुणामो
मात्रमाह केवलाद्याच्छाखान्तरगुणव्याहृतिरिति दर्शितेन पूर्वं पश्यति नमस्यामिति यद्यागादिभ्यः प्राणश्रेष्ठ्यं सिद्धं

सर्वाभेदादन्यत्रेमे १० वाजिनां छन्दोगानां च प्राणसंवादे श्रैष्ठ्यगुणान्वितस्य प्राणस्योपासनमुक्तं वागादयोपि हि तत्र व
सिष्ठत्वादिगुणान्विता उक्ताः ते च गुणाः प्राणे पुनः समर्पिताः यद्वा अहं वसिष्ठोस्मीत्यादिना अन्येषामपि तु शाखिनां
कौषीतकिप्रभृतीनां प्राणसंवादे श्रैष्ठ्यानि निःश्रेयसादाने एता ह वै देवता अहं श्रेयसे विवदमाना इत्येवं जातीयके प्रा
णसंवादे श्रैष्ठ्यमुक्तं न त्विमे वसिष्ठत्वादयोपि गुणा उक्ताः तत्र संशयः किमिमे वसिष्ठत्वादयो गुणाः क्वचिदुक्ता अन्यत्रा
पि स्युरुत नेति तत्र प्राप्तं तावन्नास्युरिति कुतः एवंशब्दसामर्थ्यात् एवं विद्वान् प्राणानिःश्रेयसविदि
वेति हि तत्र तत्र एवं शब्देन यद्वस्तु निवेद्यते एवं शब्दश्च संनिहितावलंबनो न शाखान्तरपठितमेवं जातीयकं गुण
जातं शक्नोति निवेदयितुं तस्मात्स्वप्रकरणस्थैरेव गुणैर्निराकांक्षत्वमित्येवं प्राप्ते प्रत्याह अस्युरेवेमे गुणाः क्वचिदुक्ता व
सिष्ठत्वादयो अन्यत्रापि कुतः सर्वाभेदात् सर्वत्रैव हि तदेवैकं प्राणविज्ञानमभिन्नं प्रत्यभिज्ञायते प्राणसंवादादिसारूप्यात्
अभेदे च विज्ञानस्य कथमिमे गुणाः क्वचिदुक्ता अन्यत्र नास्युः ननु एवं शब्दस्तत्र तत्र भेदेनैवं जातीयकं गुणजातं
वेद्यत्वाय समर्पयतीत्युक्तमत्रोच्यते यद्यपि कौषीतकिब्राह्मणगतेनैवं शब्देन वाजसनेयिब्राह्मणगतं गुणजात
मसंनिहितत्वात् न परामृश्येत तथापि तस्मिन्नेव विज्ञाने वाजसनेयिब्राह्मणगतेनैवं शब्देन [illegible] तत्संशब्दितमिति न पर
पाय्यवागेनमय्यभिन्नविज्ञानावरुद्धं गुणजातं स्वशाखागतं नाह्वियेप्यते ॥ ॥

ला ८ — दै ५ — स्मिंस्तत्तद्विशेषे २५ — ते — मसंशब्दितत्र

मपेतन यो एवं श्रेष्ठगुणं विद्वानुपास्ते स प्राणोस्मि विदित्वा ध्यात्वा श्रेष्ठो भवतीति श्रुतेरर्थः एवं जातीयकविषये कात्स्न्याम
मास्थिकं वसिष्ठत्वादिगुणजातमेवं शब्देन गृह्णाति श्रुतावलंबित्वादिति प्राप्ते सिद्धान्तयति अस्युरेवेति वाजसनेयिब्रा
ह्मणेतावदेवं शब्देन वसिष्ठत्वादिगुणजातस्य प्राणविषये तैर्बंधः सिद्ध एव विपाके पीतकि श्रुतौ प्रत्यभिज्ञायते तत्र च
गुणानां गुणं यदिनाभावेनार्थेतान्प्राप्तानामपि श्रुतगुणैरविरोधात् इहैव श्रुतमात्रे च गुणजातं श्रुतम्पर्याप्तं संनिहित
त्वाविशेषात् कौषीतकिगतेनैवं शब्देन परामृश्यत इत्याह तथापीति ॥ रामाय नमः ॥

यान्त॰
टी॰टी॰
३२

अत्र एवं प्रत्येकं पर्वोक्तसिद्धांतासिद्धिफले सिद्धांते न सिद्धिरिति मत्वा सिद्धांतं सूत्रं व्याचष्टे चशब्द इत्यादिना पक्षत्रयस्य इष्टत्वं प्रतिज्ञायाध्या॰
स पक्षे दोषमाह तत्राध्यास इति यस्यामोद्गीथस्य बुद्धिरोंकारेऽध्यस्यते तद्वाचको न्गीथशब्दः सोंकारे लक्षणा स्यात् न बुद्धिविषयत्वगुणा॰
परत्वात्तया संबंधाप्रसिद्धेः कल्पनीयः प्रतीकोपास्तेः फलं च कल्प्यमिति गौरवं स्यादित्यर्थः फलं न कल्प्यमिति शंकते आप्तेत्यादिना इति आ
आप्त्यादीति ओंकारस्योंकारस्याप्तिः समृद्धिरिति य उपासते स कामानामाप्तेति श्रुतं फलं नाध्यासस्येत्यर्थः उद्गीथोंकारयोरन्यतरबुद्धावन्य
तरबुद्ध्यपवादं मंगीकृत्यान्यतरमिथ्याबुद्धिनिवृत्तिरेव फलं उक्तं समस्तान्यतरबुद्धेरभातित्वान्नापवाद इत्याह न च क्वचिदपीति भ्रा
तिस्त्रि निवर्तनं न तु निवर्तनं इत्यभ्योतिरित्यर्थः किं च तत्त्वबोधकाद्वाक्याद्भ्रान्त्यपवादो भवति न ह वाक्यं तत्त्वपरमित्याह न चेति यद्

च शब्दोयं तत्राध्यस्यानेनैवोपपत्तेरयथाथ्यवर्णनप्रयोजनः तद्धि त्रयः पक्षाः सावधारणः इति पर्युदस्यं ते विशेषणपक्ष एवैकोनिर
वयत्त्वपादोषते तत्राध्यासे तावदुपाबुद्धिरितरत्राध्यस्यते तच्छब्दस्य लक्षणाहानित्वं प्रसज्येत न तत्फलं च कल्प्येत आप्तेत्येवफ
लमापयिताह वै कामानां भवतीत्यादीति चेत् न तस्यान्यफलत्वात् आप्त्यादिदृष्टेः फलं हि तन्नोद्गीथाध्यासफलं अपवादोपि
समानः फलाभावः मिथ्याज्ञाननिवृत्तिः फलमिति चेत् न पुरुषार्थोपयोगमानत्वमात्रात् न च कदाचिदप्योंकारेदोद्कारबुद्धिर्निवर्तते ग॰४
उद्गीथोद्गीथबुद्धिः न चैतद्वाक्यं तत्त्वप्रतिपादनपरमुपासनाविधिपरत्वात् नाप्येकत्वपक्षः संगच्छते निष्प्रयोजनत्वाद्
शब्दद्वयाचारणस्यादेकेनैव विवक्षितार्थसमर्पणात् न च होत्रविषयमाधर्यविषये वान्तरे ओंकारशब्दवाच्य उद्गीथशब्दप्र
सिद्धिरस्ति नापि समस्तलायां साम्नो हि तीयायां भक्ताबुद्गीथशब्दवाच्यायामोंकारशब्दप्रसिद्धिः येन तानतिरिक्तार्थता स्यात् त
द्विशेषणाद्विशेषणपक्षः परिशिष्यते यतः सर्ववेदसाधारणात्सर्वव्यापकत्वाच्चमिहमा ओमित्येतदुद्गीथशब्देनान्तरविशेष्यते ते॰५
कथं नाम उद्गीथावयवभूतओंकारो गृह्येतेति नन्वस्मिन्नपि पक्षे समानालक्षणा उद्गीथशब्दस्यावयवलक्षणार्थत्वात् सत्य
मेवमेतत् लक्षणायामपि तु संनिकर्षविप्रकर्षौ भवत एवाध्यासपक्षे दर्शितरबुद्धिरर्थान्तरे निक्षिप्यते इति विप्रकृष्टा लक्षणा वि
शेषणपक्षे त्ववयविवचनेन शब्देनावयवसमर्पणं इति संनिकृष्टा समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि प्रवर्तमाना दृष्टाः
पटग्रामादिषु अतस्तद्व्याप्तेः हेतोरोमित्येतदक्षरमिति एतस्योद्गीथमित्येतद्विशेषणमिति समंजसमेतन्निरवद्यमित्यर्थः ३

ॐ भक्त्या ह्ययोरित्यंकारोद्गीथशब्दयोः पर्यायत्वपक्षं दूषयति नापीति पर्यायत्वमपि नास्तीत्याह न चेति परिशिष्टविशेषणपक्षस्तु श्रेयो।
जयतीति व्याप्तेरिति मित्यक्षरमुपासीतेत्युक्ते सर्ववेदव्याप्योंकारग्रहो पाश्लोप्रसज्येतेन तन्निरासार्थमुद्गीथावयवत्वेन विशेषणं समंजस
मित्यर्थः अध्यासपक्षेन बुद्धिविषयत्वगुणयोगात्मः संबंधः कल्प्य इति विप्रकृष्टा लक्षणा अवयवलक्षणा तु सन्निकृष्टा अपि वा।
वयविसंबंधस्य लक्षणत्वात् तावयवेषु प्रपटोदग्ध इति लोकोप्रयोगाच्च नामादौ ब्रह्मशब्दस्य त्वगत्वा ब्रह्मबुद्धिग्राह्यत्वगुणेन लक्षणा
श्रितान तत्र प्रतीकोपास्तिविधिकल्पने आप्त्यादिगुणकोंकारविधानाद्द्विविधाने च वाक्यभेदः स्यादतो सर्ववेदव्याप्योंकारनिरासेनोंकोरेणाह

द्विविधयातनांशविशिष्टविशेषणस्यैव संसर्गकल्पना लाघवादिति सिद्धं

राम
३२

संज्ञेकं सर्वं प्रतीजमन्ना प्रत्ययति संज्ञातं इति उपास्यरूपभेदाद्धि यानानात्वं उक्तं तच्छुसत्त्वानुगतं बलवत्संज्ञातृ पौरुषेयी दुर्बलेत्यर्थः संज्ञे
कांकैमेकं श्रुभि चारि चेत्याह अस्ति चेति किं सत्संज्ञेकां सर्वत्राप्रमाणमेव नेत्याह यत्रेति अस्ति बाधके संज्ञेकत्वं प्रमाणमेव यथा सर्वग
विषेते संज्ञैकात्वं शाखास्तु तद्धि येकिं तत्र्यापचाग्न्यादिविधेकाम्या यत्र भेदोषितमित्यर्थः व्याप्ते स्रसमजसं सामानाधिकर

संज्ञातस्थेतरत्कं नत्वित्तदपि ८ अयो च्येतत्संज्ञेकत्वाद्धि येकत्वमन्नत्याय्यं उद्गीथविधेरुभयत्राप्येकां संज्ञातितद्दयिनो।
पपद्यते उक्तं सैन्तन नवाप्रकरणभेदात्परोवरीयस्त्वादिवद्धितितदेवात्रन्यायात्तरं अन्यत्त्वाननुगतं हितत्र संज्ञेकत्वमनुत्सु
तत्त्वात्सउद्गीथशब्दमात्रयोगाल्लौकिकैर्व्यवहर्तृभिरुपचर्यते अस्ति चेतत्संज्ञैकत्वं प्रसिद्धभेदेष्वपि परोक्षतीयत्वाद्यु
पासनेषूद्गीथविधिषु इति तथा प्रसिद्धभेदानामप्यग्निहोत्रदर्शपूर्णमासानां काठके कैष्यपठितानां काठकसंज्ञेकत्वं दृश्यते न
येहापि भविष्यति यत्रत्वनास्ति कोपि दृढं वल्यसीयकोभेदहेतुः भवति तत्र संज्ञेकत्वाद्धि येकत्वं यथा संवर्गविद्यादिषु व्या
प्तेरसमंजसं ॐमित्येतदक्षरमुद्गीथमुपासीतेत्यक्षरोद्गीथशब्दयोः समानाधिकरण्ये श्रूयमाणे ध्यासापवादैक
त्वविशेषणपक्षाणां प्रतिभानात्क्वतमोत्रपक्षो न्याय्य इति विचारः तत्राध्यासो नाम द्वयोर्वस्तुनो [illegible] रनिवर्तितामैवान्यतरबु
द्धावन्यतरबुद्धिरध्यस्यते अनुवर्तते एवतस्मिन्नितरबुद्धिरध्यस्येतरबुद्धावपि यथा नाम्नि ब्रह्मबुद्धावध्यस्तायामप्यनुवर्तते
एव नामबुद्धिर्न ब्रह्मबुद्ध्या निवर्त्यते यथा वा प्रतिमादिषु विष्ण्वादिबुद्ध्याध्यास एवमिहाप्यक्षर उद्गीथ एवान्तरबुद्धिरिति अपवादो
नाम यत्र कस्मिंश्चिद्वस्तुनि पूर्वनिविष्टायां मिथ्याबुद्धौ निश्चितायां पश्चादुपजायमानाया यथार्थबुद्धेः पूर्वनिविष्टाया मिथ्या
बुद्धेर्निवर्तिका भवति यथा देहेन्द्रियसंघाते आत्मबुद्धिरात्मन्येवात्मबुद्ध्या पश्चाद्भाविन्या तत्त्वमसीत्यनया यथार्थबुद्ध्या
निवर्त्यते यथा वा दिग्भ्रान्तिबुद्धिः दिग्याथात्म्यबुद्ध्या निवर्त्यते एवमिहाप्यक्षरबुद्ध्या उद्गीथबुद्धिर्निवर्तते उद्गीथबुद्ध्यावाक्षर
बुद्धिरिति एकत्वं त्वक्षरोद्गीथशब्दयोरनतिरिक्तार्थवृत्तित्वं यथा द्विजोत्तमो ब्राह्मण इत्यभमिदेवं इति विशेषणं पुनः सर्व
वेदव्यापिन ओमित्येतस्याक्षरस्य ग्रहणप्रसंगे उद्गीथविषयस्य समर्पणं यथा नीलं उत्पलमानयेति एवमिहाप्युद्गी
थाय ओंकारस्तमुपासीतेति एवमेतस्मिन्सामानाधिकरण्यवाक्ये विमृष्यमाणे एते पक्षाः प्रतिभान्ति तत्रान्यतमनिर्धार
णाकारणाभावादनिर्धारणप्राप्तौ विदमच्यते व्याप्ते स्रसमंजसमिति॥

करणं विषयीकृत्य संशयमाह ॐमित्येतदिति अध्यासादिपदार्थान्वाचष्टे तत्राध्यास इत्यादिना बुद्धिपूर्वकाभेदारूपो ध्यासः
वाधावादः एकत्ववात्मभेदः विशेषणं व्यावर्तकमिति विवेकः पूर्वमुद्गीथकर्मात्मको हि यावयवत्त्वसो कास्याधीयस्य विषो।
यत्रे सिद्धवत्कृत्यध्ययभेदाद्धि याभेदः सिद्धान्तितः सन्नक्रमात्यादिपक्षगन्याम्पूर्वपक्षयति नत्रेति॥ रामायनमः

यस्मिन्नितरबुद्धिर ध्यस्यते ८४

ना ०

दि ४

उद्गीथविषया ... स्ति ...

स २

पात०
द०द०
३१

वाक्यसामान्यमात्रेणार्थैक्यं नालीनम् इत्यतमाह तथाहीति विवापत्तं प्रजयापस्त्रिभिर्धयति वर्द्धपत्यस्मिन्नांतरंयस्य हविर्निरुप्तं पुर
स्ताच्चंद्रमा अभ्युदेति त्रेधा तंडुलान्विभजेद्ये मध्यमास्तान्ग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दध्
श्रृंह ये णिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमित्यभ्युदयवाक्यमस्यार्थः यस्य यजमानस्य चतुर्दश्यामेवामावास्याभ्रांत्या दर्श
कर्मार्थं प्रवृत्तस्य पुरस्तात्पूर्वं हविस्तंडुलदध्यादि पयो हवि निरुप्तं पश्चाद्देवताभ्योऽग्न्यादिभ्यः संकल्पितं चंद्रमाश्च पश्चादभ्युदे
तितेमंतं यजमानं कालव्यत्ययापराधात देवनिरुप्तं हविः प्रजादिनाधयति वियोजयति शत्रुं चास्य वर्धयति यस्मात्कालभ्रांति
मान्यजमानो यमध्ये माद्भिभावनत्रेधा सम्तास्तंडुलादध्यादि सहितानि रुप्तास्तान्विभजेदग्न्यादिभ्यो वियोजये द्वि योज्यचदात्र
त्वादि गुणकान्याग्न्यादिभ्यो दर्शदेव भिन्नेभ्यो निर्वपेद्धि ति दधन्दति स्थविष्टतंडुला चरुं शृते दुग्धे णि ष्टचरुमित्यर्थः अत्र काला
पराधे देवांतरयुक्तं प्रापश्चित्तरूपं दर्शाद्भिन्नं कर्म विधीयत इति प्रामेतंडुले त्रेधात्वा यनुवाद विभजेदिति हविषः प्रक्षांतदेव

तथा स्याभ्युदयवाक्ये पशुकामवाक्ये च त्रेधा तंडुलान्विभजेत् ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्या
दित्यादिना दर्शसाम्यरूपक्रमभेदादभ्युदयवाक्ये देवतापनयाध्यवसितः पशुकामवाक्ये तु यागविधिः तथ्ये हाणु
पक्रमभेदाद्धि या भेदः परोवरी यस्त्वादिवत्त यथा परमात्मह ष्याध्यासत्साम्ये प्याकाशे स्वेभ्यो ज्यायानाकाशः परा
यणं स एव परोवरी यद्गमीयः स एषोऽनंत इति परोवरीयस्त्वगुणविशिष्टमुद्गीथोपासनमत्यादित्यादिहिरण्यश्म
श्रुत्यादिगुणविशिष्टोद्गीथोपासनाद्भिन्नं न चेतरेतरगुणोपसंहारः एकस्यामेव शाखायां तद्वच्छाखांतरस्थ
स्वप्रावजातीयकेस्यपासने षिति ॥

वियोगेन तस्मिन्नेव दर्शकर्मणि देवांतरसंबंधमात्रविधानेन कर्मांतरमिति सिद्धांतितं एवमभ्युदयवाक्ये कालापराधेनो
पक्रमाद्दर्शकर्मण्येव हविषः एवं देवतान्योपनयो विनियोध्यवसितः पशुकामवाक्ये तु यद्यपि स्थविष्टास्तानग्ने यमनि
मतेष्टाकपालं निर्वपेयुर्मध्यमास्तान्विष्णवे शिपिविष्टाय शृते चरुं पेत्तोदिष्णास्तानिंद्राय प्रदात्रे दधश्चरुमिति निर्देशोऽभ्यु
दयवाक्यसमाप्ति तथापि यः पशुकामः स्यात्सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यादिति नित्यदर्शकर्म समाप्य पुनर्दीक्षापर्यंव
त्सापाकरणविधुपक्रमात्पशुकामस्य यागांतरविधिरेव नाभ्युदयवाक्ये नार्थिकामितित यथा प्रक्षांतेपि निर्देशसाम्ये न विषयक्
प्रयोजकमित्यर्थः वत्सानपाकुर्यान्मातृ दे शाद्देशांतरे नयेदित्यर्थः स्तत्रोक्तं दृष्टांतं व्याचष्टे परोवरीयस्त्वादिवदिति
परइति सकारांते परस्मात्परस्मात्सो वरस्माच्च वरस्तरइति परोवरीयानित्येकपदं अनंतस्य आकाशाख्य परमात्मानं दृष्टोले
वनत्वाद्गीथस्य योक्त इत्यर्थः आकाशात्मना हिरण्यश्मश्रुरूपात्मनाचोद्गीथोपासितान्यपि विधाभेदवदिहापि भेद इत्य

राम
३१

ननु वाजिवाक्यैकवाक्यत्वाच्छान्दोग्ये उपक्रमस्य उद्गीथपदं संसर्गात्तावन्मात्रभक्तिपरमस्तु प्राणमुद्गीथकर्तारं प्राणमुपास्य इति व्या-
ख्यायतामित्यत आह तत्र यद्युद्गीथ इति ओंकारोपास्त्युपक्रमभङ्गादुद्गीथपदे कर्तृलक्षणा चेन्निर्दोषं स्यादित्यर्थः। अ-
नेन सिद्धान्तेऽपि तत्सदेवयवलक्षणा स्वीकार्या ततो वरं कर्तृलक्षणा कृत्स्नतरानुग्रहात्तथा चोपसंहारे कर्तृप्राणोपास्तिर्निश्च-
याद्युपक्रमेऽपि तन्निश्चयः स्यादित्यत आह उपक्रमेति तदित्योपक्रमो हि वाक्यशेषान्निश्चीयते यथाऽक्ताः शर्करा इत्यत्राञ्जनद्रव्य-
संदेहे तेजो वै घृतमिति शेषः। विनिश्चयः इह तूपक्रमे मुखस्योपास्तित्वनिश्चितत्समानाधिकरणोद्गीथपदस्यावयवलक्षणा।
विनिश्चिते तत्प्राणमुद्गीथमित्युपसंहारस्तदेकार्थतया नेय इत्यर्थः। एवं छान्दोग्ये ओंकार उपास्य उक्तः बृहदारण्यके तु प्राण इत्युपा-

तत्र यद्युद्गीथपदेन साम भक्तिरभिसंप्रेयते तेन स्यात् स्वकर्तृत्वोद्गातृलिङ्गेनोपक्रमस्योपरुध्येत लक्षणा च प्रस-
ज्येत उपक्रमानुरोधेन चैकस्मिन्वाक्ये उपसंहारेण भवितव्यं तस्मादत्र तावदुद्गीथावयव ओंकारः प्राणदृष्ट्या परि-
गृह्यते वाजसनेयके तूद्गीथशब्देनावयवग्रहणकारणाभावात्सकलैव भक्तिरावेद्यते त्वेन उद्गात्रेत्यपि तस्य कर्तृ-
त्वोद्गातृत्विक्प्राणत्वेन निरूप्यत इति प्रस्थानान्तरं यद्यपि तत्रोद्गीथसमानाधिकरण्यं प्राणस्य तदप्युद्गातृत्वेनैव बुद्धि-
दर्शितमिति तस्य प्राणस्य सर्वात्मत्वप्रतिपादनार्थमिति न विधेयैकत्वमावहतीति सकलभक्तिविषय एव तत्राप्युद्गी-
थशब्द इति वैषम्यं न च प्राणस्योद्गातृत्वमसंभवेन हेतुनापरित्यज्येत उद्गीथभाववदुद्गातृभावस्योपासनार्थत्वे-
नोपदिश्यमानत्वात् प्राणवीर्येण चोद्गातोद्गात्रं करोतीति नास्त्यसंभवः तथा च तत्रैव श्रावितं वाचा ह्येव स प्राणे-
न चोद्गायदिति न च विवक्षितार्थभेदे वर्ण्यमाने वाक्यच्छायानुसारमात्रेण समानार्थत्वमध्यवसातुं यु-
क्तं॥

स्याभेदं हि विद्याभेद इत्याह वाजेति यदुक्तं वाजिश्रुतावपि प्राणस्योद्गीथरूपत्वश्रवणेन रूपासैक्यमिति तन्न दूषयति यद्यपीत्यादि-
ना तत्रोद्गीथ उपास्यतया नोक्तः किंतु प्राणस्योपास्यस्य गुणतयेत्यर्थः। किं चोद्गीथ ओंकारः छान्दोग्ये अत्र तु भक्तिरित्युपास्यभेद इ-
त्याह सकलेति प्राणस्य च उद्गातृत्वं किं तूद्गीथत्वमेव वाजिभिरपि ग्राह्यमित्यैक्यमाशङ्क्याह न चेति स उद्गाता वाग्विषि-
ष्टः प्राणो नोद्गात्रैकेन वानिति श्रुतेरसंभवोऽपि नेत्यर्थः। यदुक्तं वृजनरूपाविशेषाद्विधेयैक्यमिति तत्राह तच्चेति एकत्रोद्गातृप्रा-
प्राण उपास्योऽन्यत्र ओंकार इत्यन्तरङ्गोपास्यरूपभेदस्पष्टे तत्र बहिरङ्गार्थवादसाम्यमात्रेण नोपासनैक्यमित्यर्थः॥

भेदाभेदमानाभ्यां संशयमाह नवेति अत्र पूर्वाधिकरणसिद्धांतन्यायेनोद्गीथविद्येति संज्ञैक्येन विद्यैक्यमिति पूर्वपक्षे निषेधगुणो
पसंहारः फलं सिद्धांते संज्ञैक्येऽपि विद्यैक्यापवादादनुपसंहार इत्येवं पूर्वत्र पूर्वन्यायेन पूर्वपक्षः तत्रापवादिकोऽस्मिन्नास्तीति मंत्र
वा सूत्रस्य सिद्धांतिशंकाभागं व्याचष्टे नन्विति सर्वत्रोद्गीथकर्मकर्ता प्राणो वाजिनामुपास्यः उद्गायेति कर्तृशब्दाच्छंदोगानां
तूद्गीथावयव ॐकारः प्राणदृष्ट्योपास्य ओमित्येतदक्षरमुद्गीथमिति कर्मरूपत्वशब्दात् तथा कर्तृकर्मणो रूपास्ययोर्भेदादिह
योरन्यथात्वभेद इति पाकार्थः उद्गीथत्वेनेति ओंकारत्वेनेत्यर्थः अल्परूपभेदान विद्यैक्यविरोधोऽन्यत्र न्यायेनप्र

तत्र संशयः किमत्र विद्याभेदः स्यादाहोस्विद्विद्यैकत्वमिति किं तावत्प्राप्तं पूर्वेण न्यायेन विद्यैकत्वमिति ननु न यु
क्तं विद्यैकत्वं प्रक्रमभेदात् अन्यथा हि प्रक्रमंते वाजसनेयिनोऽन्यथा छंदोगाः त्वं न उद्गायेति वाजसनेयिन उद्गीथस्य क
र्तृत्वेन प्राणमामनंति छंदोगास्तूद्गीथत्वेन तमुद्गीथमुपासांचक्रिर इति तत्कथं विद्यैकत्वं स्यादिति चेत् नै
ष दोषः न ह्येतावता विशेषेण विद्यैकत्वमपगच्छति अविशेषस्यापि बहुतरस्य प्रतीयमानत्वात् तथा हि देवासुर
संग्रामोपक्रमत्वम् असुरात्ययाभिप्राय उद्गीथोपन्यासो वागादिसंकीर्तनं तन्निंदया मुख्यप्राणव्यपाश्रयस्तद्वी
र्याच्चासुरविध्वंसनमश्मलोष्टनिदर्शनेनेत्येवं बहवोऽर्था उभयत्राप्यविशिष्टाः प्रतीयंते वाजसनेयके चोद्गीथसामाना
धिकरण्यं प्राणस्य श्रुतम् एष उ वा उद्गीथ इति तस्माच्छांदोग्येऽपि कर्तृत्वं लक्षयितव्यं तस्माच्च विद्यैकत्वमिति न
वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ७ न वा विद्यैकत्वमत्र न्याय्यं विद्याभेद एवात्र न्याय्यः कस्मात्प्रकरणभेदात्
उपक्रमभेदादित्यर्थः तथा हीह प्रक्रमभेदो दृश्यते छांदोग्ये तावत् ओमित्येतदक्षरमुद्गीथमुपासीतेत्येवमु
द्गीथावयवस्योंकारस्योपास्यत्वं प्रस्तुत्य रसतमादिगुणोपव्याख्यानं च तत्र कृत्वा खल्वेतस्यैवाक्षरस्योपव्या
ख्यानं भवतीति पुनरपि तमेवोद्गीथावयवमोंकारमनुवर्त्य देवासुराख्यायिकाद्वारेण तं प्राणमुद्गीथमुपासां

पन्नीपरिहरति नैष दोष इति असुरात्ययाभिप्रायः असुरजयार्थसंवादः यथाश्मानं प्राप्य लोष्टो विध्वंसते तथा प्राणं
हंतोमागतासुरास्तस्य वीर्येणास्त्रमेव ध्वस्ता इति अन्तमुभयत्रेत्यर्थः अल्परूपभेदमंगीकृत्यापि विद्यैक्यमुक्तं सोऽपि नास्तीत्या
ह वाजेति उद्गीथरूपत्वेन प्राणस्योभयत्र श्रवणादेकश्रुतेः कर्तृत्वमप्युभयत्र द्रष्टव्यमित्यर्थः बहुविरुद्धरूपभेदान्न विद्यै
क्यमिति सिद्धांतयति नवेति अत्राक्षरविशिष्टं नप्युद्गीथमिति तदवयवमित्यर्थः पृथिव्यादिरसानां रसतम ओंकारः आदिः स
महादिरिति रसतमत्वानुकारोरवणावत्योंकारे प्राणदृष्टिविधानायाख्यायिका प्रस्तुतेत्याह रसतमेति॥

सर्वशाखाप्रत्ययविद्यैक्यचिंतायाः फलमाह उपसंहारश्चेति शाखाभेदे समानविद्यायां श्रुतानां गुणानां यथाश्रुति व्यवस्थितत्वात् एकत्रास्तु
ना इतरशाखास्थानामुपसंहारो नेत्याह इति संदेहे विद्यैक्येपि तत्तच्छाखोक्तैरेव गुणैर्विद्योपकारसिद्धेः शाखाभेदेन गुणानां व्यवस्थितत्वादिति पू
र्वपक्षः तत्र प्रकृतविद्यैक्यचिंतानैष्फल्यमिति फलं सिद्धांतं तन्नेत्यस्तं वाच्य एव स्थिते चेत्यादिना गुणानां गुणिं विनाभावादेक
त्वात् एकस्या विद्यायाः शाखांतरोक्तं तद्विद्यागुणवत्त्वं तदभिन्नत्वात् हि यावदित्यनुमानात् विद्यैक्ये गुणोपसंहारसिद्धिरित्यर्थः यथा
नैकत्वेन उपकारकाणामंगानामुपसंहारे दृष्टांतमाह विधिशेषवदिति उक्तमेव व्यतिरेकमुखेनाह यदि हीति नन्वाग्नेययाः
गावरुद्धानां तेनैषामिव सौर्ये प्राप्तिवद्विद्यांतरस्थगुणानां विद्यांतरप्राप्तिः किं न स्यादित्यत आह प्रकृतेति प्रकृतिगुणानां विका

उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ५ इदं प्रयोजनसूत्रं स्थिते चैवं सर्ववेदांतप्रत्ययत्वे सर्वविज्ञानानामन्यत्रो
दितानां विज्ञानगुणानामन्यत्रापि समाने विज्ञाने उपसंहारो भवति अर्थाभेदात् य एव हि तेषां गुणानामेकत्रार्थो वि
शिष्टविज्ञानोपकारः स एवान्यत्राप्युभयत्रापि हि तदेकं विज्ञानं तस्मादुपसंहारः विधिशेषवत् यथा हि विधिशेषा
णामग्निहोत्रादिधर्माणां तदेवैकमग्निहोत्रादिकर्म सर्वत्रेत्यर्थाभेदादुपसंहरणमेवमिहापि यदि विज्ञानभेदो
भावा५४ भवेत्ततो विज्ञानांतरनिबद्धत्वाद्गुणानां प्रकृतिविकारभावाभावाच्च न स्यादुपसंहारः विज्ञानैकत्वे तु नैवमिति अस्यै
व प्रयोजनसूत्रस्य प्रपंचः सर्वाभेदादित्यारभ्य भविष्यति अन्यथात्वं शब्दादिति चेन्नाविशेषात् ६ वाजसनेयके ते ह दे
वा ऊचुर्हंतासुरान्यज्ञ उद्गीथेनात्ययामेति ते ह वाचमूचुस्त्वं न उद्गायेति प्रक्रम्य वागादीन्प्राणान्मनसः पाप्मविद्धत्वेन
निंदित्वा मुख्यप्राणपरिग्रहः पठ्यते अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उद्गायदिति
तथा छांदोग्येपि तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति प्रक्रम्येतरान्प्राणान्पाप्मविद्धत्वेन निंदित्वा
तथैव मुख्यप्राणपरिग्रहः पठ्यते अथ य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे इत्युभयत्रापि च प्राणप्रशं

सया प्राणविद्याविधिरध्यवसीयते॥

कारे प्राप्तिर्युक्ता विद्यानां तु प्रकृतिभावाभावात् हेतोर्न तत्प्राप्तिरित्यर्थः नैवमिति गुणानुपसंहारो नेत्यर्थः उत्तरसूत्राणामनेन सूत्रेणापौ
नरुक्त्यं वारयति अस्यैव त्विति एवं चोदनाद्यविशेषादुत्सर्गतो विद्यैक्यमुक्त्वा तस्यापवादं वक्तुमाह अन्यथात्वमिति अत्र वाजिनां छं
दोगानां चोद्गीथाध्याये च विषयमाह वाजेत्यादिना ते ह देवाः सात्विकवृत्तयः प्राणा अन्योन्यमूचुः हे ते दान्यस्मि
न्यज्ञे उद्गीथेनोद्गात्रकर्मणासुरान् जित्वा तानतीत्य देवत्वं गच्छाम इति ते चैवं निर्दोषमुद्गीथकर्तारमुपास्यं निर्धार
यितुं कृतसंवादाः अथ मे वाचं परीक्षितवंतः त्वमस्मदर्थं नो स्माकं कुर्विति तथा त्वनृतं कृतं तया प्राणचक्षुःश्रोत्रमनांस्यपि को
मेनासुरपाप्मना ग्रस्तानीति निंदित्वा आसन्यमास्यभवं मुखमध्यस्थं प्राणमुपास्यं निर्धारितवंत इत्यर्थः तत्रान्योन्याभिभवात्म

कण्ठेभवत्ते देवाः सर्व एव उद्गीथमाहृतवंतः अनेनोद्गीथेनैनानसुरानप
मेत्यर्थः

अधिकारश्चेति व्याचष्टे नैतदिति एतत्कृतं मुंडकमनन्तरोदितं शिरोव्रतेनाधीत इति श्रुतिर्मुंडकाध्ययनांगमेव शिरोव्रतमित्यर्थः नन्व
विद्यातत्त्वेनाधीतेद्व्रतं श्रुतमिति शंकते नन्विति सर्वशाखास्वेकैव ब्रह्मविद्येकैव चेद्विद्यास्ततः कृतमपि सर्वत्र संबध्यते न च संबध्यत इति
विद्याभेद इत्यर्थः प्रकृतग्रंथवाचेतच्छब्दबलाद्ग्रंथसंबंधात्प्रकृतग्रंथपरो ब्रह्मविद्याया इति परिहरति नेति तस्य शिरोव्रतस्य मुंड
काध्ययने नियम इत्यत्र सववदिति निदर्शनं निर्दिशति सवा होमाः आथर्वणानां स्वसंप्रदायसिद्धैकोग्निरेकर्षिसंज्ञया प्रसिद्धस्तस्मिंश्च तेनोक्ता
या इति यथा नियम्यंते तथैतदित्यर्थः किंच वचेकोन निर्गुणब्रह्मविद्यैकानावकाशत्वं दर्शयति तत्सत्त्वविधिपाठात्सगुणविद्यानामपि

नैतदचीर्णव्रतोधीत इति चाधिकृतविषयादेतच्छब्दोऽध्ययनप्रकाशस्वोपनिषदध्ययनधर्म एवैष इति निर्धार्य नं
नन्वेतेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णमिति ब्रह्मविद्यासंयोगश्रवणादेकैव सर्वत्र ब्रह्मविद्ये
ति संकीर्यते एष धर्मः न तत्राप्येतामिति प्रकृतप्रत्यवमर्शात् प्रकृतत्वं च ब्रह्मविद्याया ग्रंथविशेषापेक्षमिति ग्रंथस्यैव शेष
एवं संयोगेप्येवैष धर्मः सववच्च तन्नियम इति निदर्शनं निर्दिशति यथा च सवाः सप्त सौर्यादयः शतौदनपर्यन्ता वेदान्तरोदित
त्रेताग्न्यनभिसंबंधादाथर्वणोदितैकाग्न्यभिसंबंधाच्चाथर्वणिकानामेव नियम्यन्ते तथायमपि धर्मः स्वाध्यायविशेषसंब
धात्तेष्वेव नियम्यते तस्मादप्यनवद्यं विद्यैकत्वं दर्शयति च ॥ ८ ॥ दर्शयति च वेदोपि विद्यैकत्वं सर्ववेदान्तेषु वेद्यैकत्वोपदेशा
त् सर्वे वेदा यत्पदमामनंतीति तथैतमेव बह्वृचा महत्युक्थे मीमांसंत एतमग्नावध्वर्यव एतं महाव्रते छंदोगा इति तथास्य
द्रष्टव्यं वज्रमुद्यतमिति काठक उक्तस्येश्वरगुणस्य भयहेतुत्वस्य तैत्तिरीयके भेददर्शननिंदायै परामर्शो दृश्यते यदा ह्येवै
ष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति तत्त्वेव भयं विदुषोऽमन्वानस्येति तथा वाजसनेयके प्रादेशमात्रसंपादित
स्य वैश्वानरस्य छान्दोग्ये सिद्धवदुपादानं यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त इति तथा सर्ववेदा
न्तप्रत्ययत्वेनान्यत्र विहितानामुक्थ्यादीनामन्यत्रोपादानविधानायोपादानाय दर्शनं न्यायेनोपासनानामपि सर्ववेदांत

सर्वशाखास्वेकत्वसिद्धिरित्याह सत्त्वकारः दर्शयति चेति सगुणानामप्येकं वेदत्रयवेद्यं दर्शयतीत्याह तथेति किंच शाखांतरोक्तप
दार्थस्य शाखांतरे सिद्धवत्परामर्शाद्विद्यैक्यं दर्शयतीत्याह तथा महद्भयमित्यादिना एष नर एतस्मिन्नहद्येऽल्पमप्यंतरं भे
दं पश्यति तदा तस्य संसारभयं भवत्येव यस्माद्धि द्वैतान्नरस्य भेददर्शिनस्तदेव ब्रह्म भयंकरं भवति ब्रह्मैवाहमित्यमन्वानस्ये
त्यर्थः प्रादेशमात्रमुपास्त इति सिद्धवदुपादानं वैश्वानरविद्यैकत्वं दर्शयतीत्याह तथेति किंच सर्वेषु वेदांतेषु उक्थ्यादीनां प्रतीयमान
त्वेन हेतुनैतद्गम्यते अन्यत्रोक्तानां तेषामन्यत्रोपास्त्यर्थमुपादानमिति न तस्मादुपास्तीनामपि सर्ववेदांतप्रमाणकत्वेनैकं वाङ्ले

ननु तत्समस्तस्य हार्थमग्निरेतोदृष्टिगताष्षष्ठोयः प्रसिद्धवद्वाजिभिरुक्तः स छांदोग्येऽप्युपसंहार्य इति न रूपभेदस्तत्राह नचात्रेति ।
अस्ति प्रजननगुणा वतोरेतसो वाजिनामावापस्य छांदोगानां च न स्पष्टा पत्तनः किमित्यत आह आवापेति छांदोग्ये षष्ठाग्न्यभा
वमाग्निहोत्रामाल्यरूपभेदो न विद्यैक्य विरोधीति परिहरति नेष इत्यादिना अंगीकारेऽन्य जनीति पट्टा तेपीति इतो स्माल्लोकादि
ष्टलोकांतरं प्रेतगतं ज्ञातयोगतये रहंतीत्यर्थः ननु छांदोग्ये ग्निमात्र श्रुतवाजिभिस्तत्समदादिविशेषः पठन इति रूपभेदं त
दवस्थस्तत्राह वाजसनेयिनस्त्विति षष्ठाग्नेस्तद्विशेषस्य चानुवादमात्रत्वेनानुपास्यत्वात्पंचाग्नयपयो पास्याऽभयत्रेति न रू

नचानेनागुणोपसंहारः शाकाते प्रसेतं पंचसंख्याविरोधात् तथा प्राणसंवादे श्रेष्ठादन्यः स्तरः प्राणान्वाक्चक्षुः श्रोत्रम
नो तेछांदोगाश्रामनंति वाजसनेयिनस्तु पंचमतप्यामनंति रेतो वै प्रजापतिः प्रजायते ह प्रजया पशुभिर्य एवं वेदेति
आवापोद्वापभेदाच्च वेद्यभेदो भवति वेद्यभेदाच्च विद्याभेदो द्रव्यदेवताभेदादिव यागस्येति चेत् नैष दोषः पतत्क्वस्मा
मपि विद्यायामेवंजातीयकोऽगुणभेद उपपद्यते यद्यपि षष्ठस्याग्नेरुपसंहारो न संभवति तथापि द्युप्रभृतीनां पंचा
नामग्नीनां प्रत्यभिज्ञायमानत्वान्नैव विद्याभेदो भवितुमर्हति नहि षोडशिग्रहणाग्रहणयोरतिरात्रो भिद्यते
पठ्यते पि च षष्ठाग्निश्छांदोगैः तं प्रेतं दिष्टमितोऽग्नय एव हरंतीति वाजसनेयिनस्तु सांपादिकेषु पंचस्वग्निषु अनुवृत्त
याः समिद्धूमादिकल्पनायानिवृत्तये तस्याग्निरेवाग्निर्भवति समित्समिदित्यादि समामनंतीति स नित्यानुवादः अथा
पुण्यस्तत्रार्थ एव वादस्तथापि समगुणः शाकांते छांदोग्ये रूपसंहर्तव्य न चात्र पंचसंख्याविरोध आशंक्यः सांपादिकान्यग्नि
प्रायाहि षा पंचसंख्या नित्यानुवादभूता न विधिसमवायिनीत्यदोषः एवं प्राणसंवादादिष्वप्याधिक्यस्य गुणस्येतरत्रो
पसंहारो न विरुध्यते नचावापोद्वापभेदाद्वेद्यभेदो विद्याभेदस्याशंक्यः कस्यचिद्वद्यांशस्यावापोद्वापयोरप्यभेदस्यो
विवपराशेषभेदावगमात्तत्समादेकविद्यमेव स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ३॥

दन्यपांचतदनपततणश्म यद्यपि उक्तमाथर्वणिकानां विद्यां प्रति शिरोव्रताद्यपेक्षणाद्विद्याभेद इति तत्प्रत्युच्यते स्वाध्यायस्यैष धर्मो न विद्यायाः
कथमिदमवगम्यते यतस्तथात्वेन स्वाध्यायधर्मत्वेन समाचारे वेदव्रतोपदेशपरे ग्रंथे आथर्वणिकाइदमपि वेदव्रतत्वेन ।

प्रभेद इत्यर्थः सविशेषस्य षष्ठाग्नेरुपास्यत्वेपि न रूपभेद इत्याह अथापीति द्युलोकादीनां पंचानाममग्नीनां अग्नित्वसंपत्तिविधिने
वाप्यानत्वं स्वसंपत्तिकल्पिताग्नीनां सिद्धमनूद्यते न ध्येयत्वेन विधीयत इत्यर्थः छांदोग्ये वाजिशाखास्थरेतउपसंहर्तव्यमित्युः
क्तानुपसंहारेपि न विद्याभेद इत्याह नचावापेति एवं रूपभेदो न विद्याभेदकर इत्युक्त्वा धर्मविशेषोपि न भेदक इत्याह स्वाध्या
यस्येति गोदानवदध्ययनांगत्वेन शिरोव्रतमाथर्वणिकानां सूत्रे विहितं न विद्यांगमित्यर्थः ॥ ॥ रामाय ॥

शा॰त्र॰
रु॰र॰
२८

सिद्धान्त इति एवमिति सर्ववेदान्तैः प्रतीयन्त इति सर्ववेदान्तप्रत्ययानि तैर्विहितानीत्यर्थः उक्तनामादिभिरग्निहोत्रादिकर्मणां प्रति
शाखं भेदे प्राप्ते शाखान्तराधिकरणसिद्धान्तस्त्वेकत्वं संयोगरूपचोदनाद्यविशेषादिति तत्र चोदनाविधायकः शब्दस्तत्प्रति
तः प्रयत्नो वा तस्याविशेषमाह यथैकस्मिन्निति एकधात्वर्थहोमादौ विहितप्रयत्नैक्यवदुपाधिप्रयत्नैक्यमित्यर्थः यथाज्यष्टत्वा
दिगुणकप्राणविद्या सर्वशाखास्वेकान्तथा पंचाग्निविद्याप्येका फलसंयोगाद्यविशेषात् तथान्यास्वपि विद्यास्वित्यत्राह ।
एवं प्राप्ते इति पूर्वपक्षे हेतुं विशिनष्टि येनेति काठकमित्यादिनाम्ना कर्मभेदो न युक्तः ज्ञातः अचोदनाभिधानत्वात्काठकादि
शाखानामग्रन्थनामतया कर्मवाचित्वाभावादतो भिन्ननामकशाखाग्रन्थभेदेपि तद्विहितं कर्मैकमेवाल्परूपभेदापि न कर्मैका

एवं प्राप्ते ब्रूमः सर्ववेदान्तप्रत्ययानि विज्ञानानि तस्मिंस्तस्मिन्वेदान्ते तानि तान्येव भवितुमर्हन्ति कुतः चोदनाद्यविशेषात्
आदिग्रहणेन शाखान्तराधिकरणसिद्धान्तसूत्रोदिता अभेदहेतव इहाकृष्यन्ते संयोगरूपचोदनाख्याविशेषादित्यर्थः
यथैकस्मिन्नग्निहोत्रे शाखाभेदेपि पुरुषप्रयत्नस्तादृश एव चोद्यते जुहुयादिति एवं यो ह वै ज्येष्ठं च श्रेष्ठं च वेदेति वाजि
सनेयिनां छन्दोगानां च तादृश्येव चोदना प्रयोजनसंयोगोप्यविशिष्ट एव ज्येष्ठश्च श्रेष्ठश्च स्वानां भवतीति रूपमप्यु
भयत्र तदेव विज्ञानस्य यदुत ज्येष्ठश्रेष्ठादिविशेषणान्वितं प्राणतत्त्वं यथा च द्रव्यदेवते यागस्य रूपमेवं ज्ञेयरूपं वि
विज्ञानस्य तेन हि तद्रूप्यते समाख्यापि सैव प्राणविद्येति तस्मात्सर्ववेदान्तप्रत्ययत्वं विज्ञानस्य एवं पञ्चाग्निविद्या वैश्वानर
विद्या शाण्डिल्यविद्येत्येवमादिषु योजयितव्यं ये तु नामरूपादयो भेदहेतवाभासास्ते प्रथम एव काण्डे नैनाम्नासादचोदनाभिधा
नत्वादित्यारभ्य परिहृताः इहापि कश्चिद्विशेषमाशंक्य परिहरति भेदान्नेति चेन्नैकस्यामपि इत्यादिना सर्ववेदान्तप्रत्ययत्वं
विज्ञानानां गुणभेदान्नोपपद्यते तथाहि वाजसनेयिनः पञ्चाग्निविद्यां प्रस्तुत्य षष्ठमपरमग्निमामनन्ति तस्याग्निरेवाग्निर्भवति
इत्यादिना छन्दोगास्तु तं नामनन्ति पञ्चसंख्ययैव च ते उपसंहरन्ति अथ ह य एतानेवं पञ्चाग्नीन्वेदेति येषां च गुणकृतोस्ति भेदः

तेषां त्वरूपभेदोपि विरोधी धर्मविशेषस्त्वध्ययनांगेन कर्मांगमतो न कर्मभेदकं शाखाभेदेपु न हि क्रियासिद्धान्ते तस्यार्थे दर्शनयोरपि
न भेदकत्वं ततो न हि द्विधा स्त्यते मात्रन्वात् बहुशाखाध्ययनाशक्तावपि स्वशाखानुक्तविशेषस्याप्राप्ति न स्यान्यतो ग्राह्यत्वं स्यावादशक्ति
रभेदिका एकस्मिन्नपि कर्मण्येग्रत्लोपादिनाप्रायश्चित्तं समानाभिवचनभेदोप्यप्रयोजकः तत्त्वकर्मभेदप्रमाणप्राबल्ये भेदहेतवः परिह
ताइत्यर्थः नहि शाखान्तरन्यायेनैव कर्मक्यवद्विद्यैक्यसिद्धेः पुनः किमर्थोयमिति तत्राह इहापीति रूपस्योत्पत्तिशिष्टत्वविशेषः पञ्चाग्नि
वेदपायुपासनात्पत्ति विधिस्थपञ्चान्यादिरूपभेदादुपासनाभेदः साक्षादित्वावाजिनरूपभेदात्कर्मभेदवदित्यधिकाशंकानिरा
सार्थत्वान्न पौनरुक्त्यमस्यादिवक्ष्यामीति मत्वा शंकां व्याचष्टे स्यादित्यादिना अत्र षष्ठस्याग्नेरत्वात्कर्मन्यायानामानमविद्या

राम
२८

विद्यासंबंधिन इत्यादि

भेदश्चानोक्ताग्निभ्य इत्यनुवादाये गाइत्यति शिक्षामिक्षा वहेकर्मणि वाजिनद्रव्यस्यानाकांक्षितस्य विध्ययोगाद्वाजिदेव
ताको वाजिनयागः कर्मान्तरमिति द्रव्यदेवतास्वरूपभेदात्कर्मभेदः सिद्धो भवति आदिपदादेवं पय इति द्रव्यभेदाद्या।
गभेदो ग्राह्यः एवमिष्टापि पचाग्निषडग्निरूपभेदाद्विधाभेदो वाजिनेष्ट्योर्यागयोः तथा रेतो भस्मनावागादयः ह्रादो गेपत।
स्विष्टिता वाजिनामिति अथ विद्याभेदः कठोरिवाक्याध्ययने तैत्तिरीयकाणां मोभोजने धर्मविशेषो नान्येषां अनत्य
ध्ययने केषांचिदुपाध्यायार्थमुदकमाहरणं धर्मो नान्येषामन्ये मेधाध्ययने स्वशाखाध्ययने केषांचिदेव नान्येषां न।
वतान्येव कारीर्यादीनि कर्माणि धर्मविशेषमपेक्षन्ते नापेक्षन्ते चेति युक्तं अन्तो धर्मविशेषाच्छाखान्तरे कर्मभेदः शांकितः
तथाथर्वापि मुण्डकाध्ययने केषांचिद्वशिरसः गारपात्रधारणरूपव्रतं नान्येषामिति विद्याभेदः स्यात् पुनरुक्तिरभ्यासः
यथा समिधो यजति तनूनपातं यजतीति यजतिभ्यामात्मयागानां भेद उक्तः यथा शाखान्तरेभ्यासाद्विद्याभेदः आदिपदा
न्निदादिग्रहः प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति ये अग्निहोत्रमित्यनुदितहोमस्य पदुदितस्तत्र्ये प्रातर्जुहुयात् यथा
तिष्ठये प्रदत्ताय स्मरन्त्या पावसथ्यायाहार्यं हरेति तात्येवनुदितहोमस्य च निन्दाश्रुते भेदः एकस्यैवोदितेनुदि।
तेवानुष्ठानायोगात् तयोर्दितानुदितहोमादि कमतत्र प्रायश्चित्तादपि अग्निहोत्रभेदः शांकितः एतेनिंदाप्रायश्चित्ते वेदा
न्तवेयासनविद्यते इति नोदाहियेते यथा सर्वशाखाविहितस्य कर्मणो ज्ञानकर्तृत्वाशक्तेर्भेदस्तथा सर्ववेदानाध्ययनशक्ता
यशक्तेस्तनेहेदान्तविद्याभेदः स्यात् यथा शाखानां सर्वासामेकरूपा समाप्तिर्नोच्यते किंतु कस्यचित्क्वचित्कर्मणि स
समाप्तिरतः समाप्तिवचनभेदात्प्रतिशाखं कर्मभेदः शंकितः तथा कस्यचिदेदान्तस्योंकारः सर्वान्ते समाप्तिः कस्यचि
दन्यत्रेति विद्याभेदः अन्यार्थदर्शनमर्थवादस्तभेदात्कर्मभेदवद्विद्याभेद इति एवं पञ्चसूत्र्योक्ता हेतवादर्शितास्ते
केचित्सिद्धान्ते एवं पञ्चेवात्रोपयुज्यन्त इति तथा शब्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयानि कर्मभेदकानि त
त्रनामधेयं गुणेनारूपमभ्यासश्चेति त्रयं व्याख्यातं यजेद्याजजुहुयादिति प्रकृतिशब्दभेदेन धात्वर्थभेदात्तद्वद्धि
त्वभावनाख्यकर्मभेद उक्तस्तथात्र वेदो वास्तु इत्यादिशब्दभेदाद्विद्याभेदः तिस्र आहुतीतिसंख्यायाकर्मभेदवद्धो।
पुष्पाणोहोसेवगोविनिहितत्वसंख्यायास्तं वर्गविद्याभेदः स्यात् नित्याग्निहोत्रप्रकरणात्प्रकरणान्तरकुण्डपायिनामय
नेमासमग्निहोत्रं जुहुतीति श्रुतमग्निहोत्रं प्रकरणान्तरस्थत्वात्कर्मान्तरमिति सिद्धान्तितं तथा च वेदान्तभेदे प्रकरणभेदाद्वया।

मीमांसापदार्थः ॥

प्रा.त.
र.र.
२७

एवं प्राप्तं समस्तान्तिप्य समाधत्ते तदुच्यत इति सगुणविद्यास्वेव भेदचिन्ता क्रियते निर्गुणविद्यायास्त्वेकत्वं सिद्धमिति वाक्यार्थरूपगुणोपसंहा
रमात्रं क्रियते वाक्यार्थनिर्णयायेति भावः पंचाग्निप्राणदहरशाण्डिल्यवैश्वानरादिविद्याभिधाभिश्च इति नाना शब्दादिभेदादि
त्यत्र वक्ष्यते अत्र सगुणविद्याभिन्ना उत्ताः किं प्रतिशाखं भिद्यन्ते न वेति नामादिभेदाच्चोदनाद्यविशेषाच्च संशयः एवं पदानि विद्याभेदाद्गु
णानुपसंहारः सिद्धान्ते त्वभेदादुपसंहार इति फलभेदः एवं तत्र शाखान्तराधिकरणं एवं प्रकृतसूत्रे नामरूपधर्मविशेषपुन
रुक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखान्तरे कर्मभेदस्यादिति तन्त्रोक्ता हेतवो नामादयो विद्याभेदार्थमिहोच्यन्ते अ

तदुच्यते सगुणब्रह्मविषयाः प्राणादिविषयाश्चेयं विज्ञानभेदचिन्तेत्यदोषः अत्र हि कर्मवदुपासनानां भेदाभेदौ
संभवतः कर्मवदेव चोपासनानि दृष्टफलान्यदृष्टफलानि चोच्यन्ते क्रममुक्तिफलानि कानिचित्सम्यग्दर्शनोत्प
त्तिद्वारेण तेष्वेषा विचिन्ता संभवति किं प्रतिवेदान्तं विज्ञानभेद आहोस्विन्नेति तत्र पूर्वपक्षहेतवस्तावदुपन्यस्यन्ते
नाम्नस्तावद्भेदप्रतिपत्तिहेतुत्वं प्रसिद्धं ज्योतिरादिषु अस्ति चात्र वेदान्तान्तरविहितेषु विज्ञानेषु अन्यदन्य

न

न्नाम तैत्तिरीयकं वाजसनेयकं कौथुमकं शाट्यायनकमित्येवमादि तथा रूपभेदोऽपि कर्मभेदस्य प्रतिपादकः
प्रसिद्धः वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्येवमादिषु अस्ति चात्र रूपभेदः तद्यथा केचिच्छाखिनः पंचाग्नि
विद्यायां षष्ठमपरमग्निमामनन्ति अपरे पुनः पंचैव पठन्ति तथा प्राणसंवादादिषु केचिदूनान्वागादीनामनन्ति
केचिदधिकान् तथा धर्मविशेषोऽपि कर्मभेदस्य प्रतिपादक आशंकितः कारीर्यादिष्वस्ति चात्र धर्मविशेषः य
थाथर्वणिकानां शिरोव्रतमिति एवं पुनरुक्त्यादयोऽपि भेदहेतवो वेदान्तान्तरेषु योजयितव्याः तस्मात्प्रतिवेदान्तं विज्ञान
भेद इति॥

थैषज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेत्यत्र प्रकृतज्योतिष्टोमानुवादेन सहस्रदक्षिणाख्यगुणविधिमाशंक्य ज्यो
तिरिति पदस्य कर्मान्तरनामत्वसंभवे ज्योतिष्टोमलक्षकत्वायोगादथेति प्रकरणविच्छेदाच्च ज्योतिष्टोमात्कर्मान्तरं विशिष्टदक्षिणा
कं विधीयत इति नाम्नः कर्मभेदकत्वमुक्तं ज्योतिरादिष्विति आदिपदेनाध्वर्यवं हौत्रमिति संज्ञाभेदात्कर्मभेदो ग्राह्यः तप्तक्षीरे दध्याक
ठिनमामिक्षा तन्मद्ध्यजलरूपं वाजिनमिति भेदः तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र वैश्वदे
वआमिक्षायागो वाजिनाख्यगुणविधिः वाजिभ्य इति विश्वेदेवानुवादादित्याशंक्यामिक्षां प्रत्युपसर्जनत्वेनोक्तविश्वे॥ ॥

राम
२७

ॐ श्री मंडलमूर्तये नमः ॥ ॐ नमो दुर्घटो नताशयति लकस्वामिनं नमद्दे विघ्नघ्नं विधस्तेप्रणामामिनद्रूस्तेद्रुः ब्रह्मस्वरूपं निर्ङ्घाय तज्ज्ञा नसाधनोपासनास्वरूपमाह सर्ववेदांतेति पादसंगतिमाह व्याख्यातमिति पूर्वपादेजनं पादार्थविवेकः कृतः इहतत्फलवाक्यार्थ ज्ञानमानद्यादयः धानस्येति लेनेणपुनरुक्तो पेतेन तपदतद्वाच्यार्थापत्तहारेणनिर्द्धार्यते इति फलफलीभावः संगतिः सगुण वाक्यार्थविद्याचिंतातु तद्वि यानां वितेकाग्रहद्वारा निर्गुणज्ञानसाधनत्वात्क्रियत इति मंतव्यं संप्रतिनिर्गुणज्ञाने भेदाभेदविचार

ब्रह्मवकु ३

ॐ श्रीगणेशायनमः ॐ सर्ववेदांतप्रत्ययं चोदनाद्यविशेषात् १ व्याख्यातं विज्ञेयस्य ब्रह्मणः तत्त्वं इदानीं तु प्रति वेदांतं विज्ञानानि भिद्यंते न वेति विचार्यते ननु विज्ञेयं ब्रह्म पूर्वापरादिभेदरहितं एकरसं सैंधवघनवदवधारितं तत्र कुतो विज्ञानभेदाभेदचिंतावतारः नहि कर्मवद्बहुत्वमपि वेदांतेषु प्रतिपादयिषितमिति शक्यं वक्तुं ब्रह्मण एक त्वात् एकरूपत्वाच्च नचैकरूपे ब्रह्मण्यनेकरूपाणि विज्ञानानि संभवंति न ह्यन्यथार्थोन्यथा ज्ञानमि त्यभ्रांतं भवति यदि पुनरेकस्मिन्ब्रह्मणि बहूनि विज्ञानानि वेदांतांतरेषु प्रतिपादयिषितानि तेषामे कमभ्रांतं भ्रांतानीतराणीत्यनाश्वासप्रसंगो वेदांतेषु तस्मान्न तावत्प्रतिवेदांतं ब्रह्मविज्ञानभेद आशं कितुं शक्यते नाप्यस्य चोदनाद्यविशेषादभेद उच्यते ब्रह्मविज्ञानस्याचोदनालक्षणत्वात् अविधिप्रधानै हि वस्तुपर्यवसायिभिर्ब्रह्मविज्ञानं जन्यते इत्यवोचद्भगवानाचार्यस्तत्तु समन्वयादित्यत्र तत्कथमिमां भेदाभे

ब्रह्मनाके १ दचिंतामारभत इति ॥

स्यात ब्रह्मणस्तत्त्वे एवैकत्वात्र चिंता २ री

विषयत्वेनोक्तमिति मन्वान आक्षिपति नन्विति वेद्यभेदविद्याभेदचिंतावसर इत्यर्थः ब्रह्मण्यपि धर्मभेदाद्विं त्यतत्राह एकरूपत्वाच्चेति निर्धर्मत्वादित्यर्थः एकरूपे ब्रह्मण्यनेकप्रकारसंभवादेदपोकेत्यत आह नचे त्यादिना पूर्वपक्षे ज्ञानभेदशंकानुपपत्तिमुक्त्वा चोदनाद्यभेदाज्ज्ञानाभेद इति सिद्धांतोप्ययुक्त इत्याह नाप्यस्येति ॥

शा.वि.
तृ.द्वि.
२६

ईश्वरः किं कर्मानपेक्षः फलं ददाति तत्सापेक्षो वा आद्ये आह अविचित्रस्येत्यादिना द्वितीये संवेदनेन संस्कारमात्रात्कदा।
दैवेनेन वा कर्मापूर्वादेव फलसिद्धेः किमीश्वरेणेति भावः अत्र वयं वदामः चंदनकंटकादिदृष्टसंपर्कवस्त्वादिसं
भवेन्नाम धर्माधर्माभ्यामिति स्थितिस्थितिवलात्तदपेक्षायामीश्वरेणाकिमपराद्धं अतः ईश्वरानपेक्षात्केवलात्कर्मणः

कारघ्ये४५

अविचित्रस्य कारणस्य विचित्रकार्यानुपपत्तेः वैषम्यनैर्घृण्यप्रसंगात् तदनुष्ठानवैयर्थ्यापत्तेश्च तस्मात्कर्मणः
देव फलमिति एवं तत्वाद्वादरायणो हेतुव्यपदेशात् ४१ वादरायणस्त्वाचार्यः पूर्वोक्तमेवेश्वरं फलहेतुं मन्यते के
वलात्कर्मणो पूर्वाद्वा केवलात्फलमित्ययं पक्षस्तु शब्देन व्यावर्त्यते कर्मापेक्षादपूर्वापेक्षाद्वा यथास्तु ईश्वरात्फ तथास्तु ३८
लमिति सिद्धांतः कुतः हेतुव्यपदेशात् धर्माधर्मयोरपि कारयितृत्वेनेश्वरो हेतुर्व्यपदिश्यते फलस्य च दातृत्वेन
एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनी
षत इति स्मर्यते चायमर्थो भगवद्गीतासु यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याचल
लां श्रद्धां तामेव विदधाम्यहं स तया श्रद्धया युक्तस्तस्याराधनमीहते लभते च ततः कामान्मयैव विहितान्हि २
तानिति सर्ववेदांतेषु चेश्वरहेतुका एव सृष्टयो व्यपदिश्यंते तदेव चेश्वरस्य फलहेतुत्वं यत्स्वकर्मानुरू
पाः प्रजाः सृजतीति विचित्रकार्यानुपपत्त्यादयोपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यंते इति श्री
मच्छारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ तृतीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥ ॥

फलमिति युक्तमिति सिद्धांत इति एवं स्थिते अचेतनस्य कर्मणस्तत्वतः प्रवृत्त्ययोगात्सेवादिदृष्टांतानुसारिश्रुते व
लीयस्त्वात् सर्ववेदांतेष्वीश्वरस्य जगद्धेतुत्वश्रुतेश्चेश्वराधिष्ठितात्कर्मणो जगद्दनः प्राप्तिफलफलसिद्धिरिति समुदा
यार्थः ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंदभगवत्कृतौ शारीरकव्याख्यायां भाष्यरत्नप्र
तृतीयस्याध्यायस्य द्वितीयः पादः ॥

राम
२६

तृतीयं शंकते अथेति अपूर्वं किं स्वतंत्रमेव फलदानाय प्रवर्त्तते चेतनताधिष्ठितं वानाधिष्ठितं वानाद्य इत्याह तदपीति द्वितीयं त्वदृ
ष्टानभिज्ञजीवस्याधिष्ठातृत्वायोगादीश्वरस्याधिष्ठातृत्वसिद्धिरिति भावः मीठवादेनापूर्वं नास्तीत्याह तदस्तित्वइति तृतीयं कर्
यागादेः आशुतरविनाशित्वान्नोपपन्नास्त्यापूर्वसिद्धिरिति चेन्न कर्मभिराराधितादीश्वरादेवस्थायिनः फलसिद्धेरित्यर्थः केव
लतर्केणापूर्वं न सिध्यतीति भावः ज्ञातानपनशायवानित्यत्रोदाहृताभिर्य इह रमणीयचरणा इत्यादि श्रुतिस्मृतिभिरपूर्वसिद्धि
श्रुताभिरीश्वरस्यापि फलदातृत्वं स्वीकार्यमित्याह श्रुतत्वाच्चेति सूत्रकारास्त्रमासमन्तात्प्राणिभ्यो ददातीत्यन्नादः वसुदानोथ

३९

अथोच्यते कर्मकार्यादपूर्वात्फलमुत्पत्स्यत इति तदपि नोपपद्यते अपूर्वस्याचेतनस्य काष्ठलोष्ठसमस्य चेतनेनाप्र
वर्तितस्य प्रवृत्त्यनुपपत्तेः तदस्तित्वे एव प्रमाणाभावात् अर्थापत्तिः प्रमाणमिति चेन्न ईश्वरसिद्धेरर्थापत्तिक्षया
त् श्रुतत्वाच्च इत्यनेन केवलमुपपत्तेरेव ईश्वरं फलहेतुं कल्पयामः किं तर्हि श्रुतत्वादीश्वरमेव फलहेतुं मन्यामहे त
था श्रुतिर्भवति सवा एष महानज आत्मान्नादो वसुदानः इत्येवंजातीयका धर्मं जैमिनिरत एव ४० जैमिनि
राचार्यो धर्मं फलस्य दातारं मन्यते अत एव हेतोः श्रुतेरुपपत्तेश्च श्रूयते तावदयमर्थः स्वर्गकामो यजेत
इत्येवमादिषु वाक्येषु तत्र विधिश्रुतेर्विषयभावोपगमाद्यागः स्वर्गस्योत्पादक इति गम्यते अन्यथा ह्यननुष्ठातृको
ए४ यागआपद्येत तत्रास्योपदेशवैयर्थ्यं स्यात् ननु अनुक्षणविनाशिनः कर्मणः फलं नोपपद्यते परित्यक्तोयं पक्षः
नैष दोषः श्रुतिप्रामाण्यात् श्रुतिश्चेत्प्रमाणं यथायं कर्मफलसंबंधः श्रुत उपपद्यते तथा कल्पयितव्यः
न चानुत्पाद्य किमप्यपूर्वं कर्म विनश्यत्कालांतरितं फलं दातुं शक्नोति अतः कर्मणो वा सूक्ष्मा काचिदुत्तरा
वस्था फलस्य वा पूर्वावस्था पूर्वं नामास्तीति तर्क्यते उपपद्यते चायमर्थः उक्तेन प्रकारेण ईश्वरस्तु फलं द
दातीत्यनुपपन्नं

नद्दाता कर्मणोपूर्वस्य वा जडत्वेनोपकरणमात्रतावत्तंत्र ईश्वर एव फलदातेति सिद्धांतो दर्शितः इदानीं पूर्वपक्ष
यति धर्मं मितिविधिश्रुतेर्विध्यर्थः तस्य लिङ्-अर्थस्य प्रेरणात्मनो यागो विषयत्वावगमाद्यागः स्वर्गसाधनमिति गम्य
ते यागस्येष्टसाधनत्वाभावे प्रेरणानुपपत्तेरित्यर्थः अपूर्वद्वारा कर्मणः फलमुपपद्यते इत्युक्ता सिद्धांतं दूषयति ई

शात.
त्रि.
२५

न न द्वितीयाभावे सर्वगतत्वश्रुतिविरोध इत्यत आह अनेन सर्वगतत्वमिति द्वितीयं सत्यं चेत्सेत्वादिवद्ब्रह्मणोऽल्पतास्यात् यत्रान्यत्पश्य
ति तदल्पमिति श्रुतेः किं च निरवयवासंगब्रह्मणः सत्यप्रपंचसंबंधायोगात् न च स्वसर्वगतत्वश्रुतिविरोध इति भावः अधिष्ठानेना
ध्यस्तं जगद्व्याप्तमध्यस्तत्वात् रज्ज्वा व्याप्तसर्पवदिति न्यायः एवं तत्पदलक्ष्यं संशोध्य वाच्यार्थमाह फलमत उपपत्तेः निर्विशेष
त्वादन्यः स्वभावः फलहेतुत्वात् इष्टं सुखं देवादीनामनिष्टं दुःखं नारकिणां व्यामिश्रं मनुष्याणां संसारो जन्ममृत्युप्रवाहः गोच
रः आश्रयो यस्य तत्संसारगोचरं अत्र कर्मेश्वरयोः फलहेतुत्वश्रुतेः संशयमाह किमिति अत्र पूर्वपक्षे फलदातृत्वेनेश्वरस्य तत्पद
वाच्यस्यासिद्धेर्लक्षणयासिद्धिः सिद्धांते तत्सिद्धिरिति फलभेदः एवं निर्विशेषत्वमुपजीव्य फलदातृत्वमपीश्वरस्य नास्तीति

अनेन सर्वगतत्वमायामशब्दादिभ्यः ३७ अनेन सेत्वादिव्यपदेशनिराकरणेनान्यप्रतिषेधसमाश्रयणेन च सर्वगतत्वमप्या
त्मनः सिद्धं भवति अन्यथा हि तत्र सिद्धे सेत्वादिव्यपदेशेषु मुख्येष्वाश्रीयमाणेषु परिच्छेद आत्मनः प्रसज्येत सेत्वा
दीनामेवमात्मकत्वात् तथान्यप्रतिषेधेऽप्यसति वस्तु वस्त्वन्तराद्व्यावर्तत इति परिच्छेद एवात्मनः प्रसज्येत सर्वगतत्वं
चास्यायामशब्दादिभ्योऽवगम्यते आयामशब्दो व्याप्तिवचनः शब्दः यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः आ
काशवत्सर्वगतश्च नित्यः ज्यायान्दिवो ज्यायानाकाशात् नित्यः सर्वगतः स्थाणुरचलोऽयमित्येवमादयो हि श्रुतिस्मृतिन्यायाः
सर्वगतत्वमात्मनोऽवबोधयंति फलमत उपपत्तेः ३८ तस्यैव ब्रह्मणो व्यावहारिक्यामीशित्रीशितव्यविभागावस्थाया
मयमन्यः स्वभावो वर्ण्यते यदेतदिष्टानिष्टव्यामिश्रलक्षणं कर्मफलं संसारगोचरं त्रिविधं प्रसिद्धं जंतूनां किमेतत्
कर्मणो भवति आहोस्विदीश्वरादिति विचारणा तत्र तावत्प्रतिपद्यते फलमत ईश्वराद्भवितुमर्हतीति कुतः उपपत्तेः स
हि सर्वाध्यक्षः सृष्टिस्थितिसंहारान् विचित्रान्विदधद्देशकालविशेषाभिज्ञत्वात्कर्मिणां कर्मानुरूपं फलं संपादयतीत्यु
पपद्यते कर्मणस्त्वनुक्षणविनाशिनः कालान्तरभावि फलं भवतीत्यनुपपन्नं अभावाद्भावानुत्पत्तेः स्यादेतत्कर्म विनश्यत्स्व
कालमेव स्वानुरूपं फलं जनयित्वा विनश्यति तत्फलं कालान्तरितं कर्त्रा भोक्ष्यत इति तदपि न परिशुध्यति प्राग्भोक्तृसं
बंधात्फलत्वानुपपत्तेः यत्कालं हि यत्सुखं दुःखं वात्मना भुज्यते तस्यैव लोके फलत्वं प्रसिद्धं न ह्यसंबद्धस्यात्मना सुखस्य दुः

पूर्वपक्षोत्थानासंगतिः यद्यपि सर्वगतत्वस्य फलदातृत्वेन व्यवहारदशायां सिध्यतीति तथापि कर्मण एव फलदातृत्वमिति शंकानिरा
सेनोक्तफलत्वार्थं निर्वाहकत्वाच्चापूर्वनिर्णयार्थमधिकरणस्यारंभ इति मत्वा सिद्धांतेन तावदाह तत्र तावदिति स्वर्गादिकं विशिष्ट
देशकालकर्माभिज्ञधातृकं कर्मफलत्वात्सेवाफलवदित्युपपत्तिः यागादिक्रियारब्धं कर्म तावत्क्षणिकं तत्किं स्वनाशात्फलं ज
नयति उत फलमजनयित्वा नश्यति आहोस्विदपूर्वात्फलसिद्धिः नाद्य इत्याह अभावादिति द्वितीयं शंकते स्यादिति कर्म नाशात्

लौकिकं दृष्टान्तमाह अर्ध्येवेति पादकल्पनां विनापि व्यवहारः किं न स्यादित्यत आह नहीति कार्षापणस्य व्यवहाराय पादकल्पना
वन्न दृष्ट्याध्यानव्यवहाराय ब्रह्मण उन्मानकल्पनेत्यर्थः संबंधभेदौ कल्पितौ न सत्याविति द्वितीयसाध्यकोऽन्याह स्थानेति स्थानमुपा
धिर्बुद्ध्यादिः एकस्यैवोपाधिना भिन्नस्योपाधिशान्तौ स्वात्मना संबंध उपचर्यते यथा सौरालोकादेर्गृहाद्युपाधिना भिन्नस्योपाधिवियो

विंशतिगंगा

अथवा पादवदिति यथा कार्षापणे पादविभागो व्यवहारप्राचुर्याय कल्प्यते नहि सकलेनैव कार्षापणेन सर्वदा स
र्वे जना व्यवहर्तुमीशते क्रियविक्रयपरिमाणानियमात्तद्वदित्यर्थः स्थानविशेषात्प्रकाशादिवत् ३४ यदुक्तं सं
द्वयोरपि संबंधभेदव्यपदेशयोः परिहारोऽभिधीयते यदप्युक्तं संबंधव्यपदेशाद्भेदव्यपदेशाच्च परमतः स्यादिति तदप्यसत् यत एक
स्यापि स्थानविशेषापेक्षया एतौ व्यपदेशावुपपद्येते संबंधव्यपदेशस्तावदयमर्थः बुद्ध्याद्युपाधिस्थानविशेषयो
गादुद्भूतस्य विशेषविज्ञानस्योपाध्युपशमे य उपशमः स परमात्मनः संबंध इत्युपाध्यपेक्षयोपचर्यते न परिमि
तत्वापेक्षया प्रकाशादिवदित्युपमोपादानं यथैकस्य प्रकाशस्य सौर्यस्य चान्द्रमसस्य वोपाधियोगादुपजातविशे
षस्योपाध्युपशमात्संबंधव्यपदेशो भवति उपाधिभेदाच्च भेदव्यपदेशः यथा वा सूचीपाशाकाशादिषूपाधिषु
अपेक्ष्यैवैतौ संबंधभेदव्यपदेशौ भवतः तद्वत् उपपत्तेश्च ३५ उपपद्यते चात्र ईदृश एव संबंधो नान्यादृशः स्वमपी
तो भवतीति स्वरूपसंबंधमेनमामनन्ति स्वरूपस्यानपायित्वान्न नरनगरन्यायेन संबंध उपपद्यते उपाधिकृतस्वरूप
तिरोभावात्तु स्वमपीतो ▬ भवतीत्युपपद्यते तथा भेदोऽपि नान्यादृशः संभवति बहुतरश्रुतिप्रसिद्धैकेश्व
रत्वविरोधात् तथा च श्रुतिः एकस्याकाशस्य स्थानकृतं भेदव्यपदेशमुपपादयति योऽयं बहिर्धा पुरुषादाकाशो
योऽयमन्तः पुरुष आकाशो योऽयमन्तर्हृदय आकाश इति तथान्यप्रतिषेधात् ३६ एवं सेत्वादिव्यपदेशान्पर
पक्षहेतूनुन्मथ्य संप्रति स्वपक्षं हेत्वन्तरेणोपसंहरति तथान्यप्रतिषेधादपि न ब्रह्मणः परं वस्त्वन्तरमस्तीति
गम्यते तथा हि स एवाधस्तादहमेवाधस्तादात्मैवाधस्तात्सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद ब्रह्मैवेदं सर्वं नेह नानास्ति
किंचन यस्मात्परं नापरमस्ति किंचित्तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमित्येवमादीनि वाक्यानि स्वप्रकरणस्थान्यन्यार्थत्वेन २२
परिणेतुमशक्यानि ब्रह्मव्यतिरिक्तं वस्त्वन्तरं वारयन्ति सर्वान्तरश्रुतेश्च न परमात्मनोऽन्योऽन्तरात्मास्तीत्यवगम्यते ॥

तथा भेदव्यपदेशोऽपि बुद्ध्याद्युपाधिभेदापेक्षयैवोपचर्यते न स्वरूपभेदापेक्षया ६४२
ती

शा६

गमहालोकायात्मना संबंधोपचारस्तद्वत् तथादित्यचक्षुषोः स्थानयोर्भेदाद्धिरण्मयपुरुषे भेदकल्पनेत्यर्थः मत्स्यावेव संबंधने
भेदोऽपि किं न स्यात्तामित्यत आह उपपत्तेश्चेति स्वरूपेणैव ब्रह्मणा जीवस्य संबंधो भेदनिवृत्तिरूपो युज्यते न मत्स्यवत् संयोगादिर्वस्तुतः

शा.त.
त्र.द्वि.
२४

आधारतो निर्देशात् स्वभेदमुक्त्वावधिनोपि तमाह सावधिकं चेति सिद्धांतसूत्रं व्याचष्टे तदेवेत्यादिना यदुक्तं तत्किं सायुनादिवानाद्यः नानाभावात्कार्यस्य ब्रह्मानन्यत्वनिर्णयाच्चेत्यस्मान्न द्वितीयः प्रागुत्पत्तेरुद्धृत्यतावधारणादित्याह नचब्रह्मव्यतिरिक्तमिति उक्तान्मानानामंगानवाधइतिभावः उक्तं स्मारयित्वा हेतुनामसिद्धिमाह ननुसेतुरित्यादिना किं सेतुश्रुत्या परसिद्धिरुच्यते आद्यो नाद्य

सावधिकं चेत्य्यन्यत्वमभयोर्व्यपदिशति यथा पुष्यमानस्यांचो लोकाः क्षीयंते एवमेवामुत्र पुण्यचितो लोकः क्षीयते तेषां चैषदेवकामानां चेत्यकस्यैव तस्मादेवं चालोकाल्लयाचैष्टमनुष्यकामानां चैत्यकस्य यथैदमागधस्य राज्यमिदं वैदेहस्येति एवमेभ्यः सेतुत्वादिव्यपदेशभ्यो ब्रह्मणः परमस्तीत्येवं प्राप्ते प्रतिपाद्यते सामान्यात् २।३।३२ शब्देन प्रदर्शितो प्राप्तिविहता हिः नब्रह्मणोऽन्यत्किंचिद्भवितुमर्हति प्रमाणाभावात् नह्यन्यस्यास्तित्वे किंचित्प्रमाणमुपलभामहे सर्वस्य हि जनिमतो वस्तुजातस्य जन्मादि ब्रह्मणो भवतीति निर्धारितं अनन्यत्वं च कारणात्कार्यस्य नच ब्रह्मव्यतिरिक्तं किंचिदजं संभवति सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यवधारणात् एकविज्ञानेन च सर्वविज्ञानप्रतिज्ञानान्न ब्रह्मव्यतिरिक्तवस्त्वस्तित्वमवकल्पते ननु सेतुत्वादिव्यपदेशा ब्रह्मव्यतिरिक्तं तत्त्वं सूचयंतीत्युक्तं नेत्युच्यते सेतुव्यपदेशाला वत्तब्रह्मणो वाद्यस्तत्त्वं प्रतिपाद्यते चामतं सेतुरात्मेति ह्याह नात्र परमस्तीति तत्रपरस्मिन्नसतिसेतुत्वनावकल्पते इति परं किमपि कल्प्येत नेवं तन्त्वाद्यदृष्टप्रसिद्धकल्पना अपि च सेतुव्यपदेशादात्मनो लौकिकसेतुनिदर्शनेन सावाद्यवस्तुतां प्रसंजयन्नात्मसाधारण्यतापि प्राप्तं स्यात् न चैतत्प्राप्यं अजत्वादिश्रुतिविरोधात् सेतुसामान्यात् सेतुशब्दस्यात्मनि प्रयुक्त इति लक्ष्यते जगतस्तन्मर्यादानां च विधारकत्वं सेतुसामान्यमात्मनः अतः सेतुरिव सेतुरिति प्रकृत आत्मा स्तूयते सेतुतीर्त्वेत्यपि तरणार्थे तिक्रमासंभवात् प्राप्तोत्यर्थे एव वर्तते यथाव्याकरणतीर्णः इति प्राप्त इत्युच्यते नातिक्रांतस्तद्वत् बुद्ध्यर्थः पादवत् ३।२।३३ यदप्युक्तमुन्मानव्यपदेशादस्ति परमिति तन्नाभिधीयते उन्मानव्यपदेशोऽपि न ब्रह्मव्यतिरिक्तवस्त्वस्तित्वप्रतिपत्त्यर्थः किमर्थस्तर्हि बुद्ध्यर्थः इति यावत् चतुष्पादष्टशफं षोडशकलमित्येवं रूपा बुद्धिः कथं नु ब्रह्मणि स्थिरा स्यादिति विकारद्वारेणोन्मानकल्पनैव क्रियते न सर्वविकारानंतेन ब्रह्मणि सर्वैः पुंभिः शक्या बुद्धिः स्थापयितुं मंदमध्यमोत्तमबुद्धित्वात्पुंसामिति पादवत् यथा मनस्याकाशे चाध्यात्मम् अधिदैवतं च ब्रह्मप्रतीकयोराम्नातयोः वाग्घोषश्चक्षुः श्रोत्रमिति मनसः स्वपादाः कल्प्यन्ते चत्वार अग्निर्वायुरादित्यो दिश इति आकाशस्य च ध्यानार्थं तद्वत् ॥

इत्युक्ता द्वितीयं शंकते तत्र परस्मिन्निति सेतुत्वलिंगेनाद्वितीयत्वश्रुतिर्वाध्यतामित्याशयमित्याह नचेति लिंगं चासिद्धमित्याह अपि चेति विधारकत्वं सेतुकल्पितं तद्वितीयापेक्षया विद्युत्पत इति भावः नोऽर्थे हेतुरप्यसिद्ध इत्याह सेतुं तीर्त्वेति पूर्वमितत्वम प्यसिद्धमित्याह बुद्ध्यर्थ इति वाक्याणि चक्षुः श्रोत्राणि मनसः पादः अग्निर्वाय्वादित्यपाश्चाकाशस्य पादाः ध्यानार्थं कल्पिताः तद्वत्

उपासनार्थः १४
बुद्ध्यर्थः

न ४

राम
२४

यदुक्तं नेमाधिष्यति मिर्ब्रह्मातिरिक्तं वस्तु निषिध्यत इति तदयुक्तं सेत्वादिश्रुतिभिर्वस्त्वन्तरास्तित्वभानादित्याक्षिपति परमत इति यथापि
पूर्वस्मिन्नधिकरणे सेतुशब्दो विधारकत्वेन गौण्या व्याख्यातः तथापि उन्मानादिश्रुतीनां गतिमजानतोयमेवं पक्षः तत्रोन्मानादिश्रु
तीनां मुख्यत्वात्सद्वयं ब्रह्मेति फलसिद्धान्ते कोटिर्नीयते तत्सदलत्वसिद्धिरिति विवेकः ब्रह्म सद्वयं सेतुत्वात् लौकिकसेतुवन्नोर्णे
त्यस्कृतेश्चेत्याह सेतुं तीर्त्वेति जांगलवानभूयिष्ठमिति वयोक्तेर्वा तन्मनुष्यदेशो जांगले इह तु देशमात्रग्रासादि पाद्यतस्तु:
कलाः प्रकाशवान्नाम पादः पृथिव्यन्तरिक्षं द्यौः समुद्र इत्यनन्तवान्नाम पादः अग्निः सूर्यश्चन्द्रो विद्युदिति ज्योतिष्मान्नाम पादः चतुः

ते

परमतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः ३१ पदेन निरस्तसमस्तप्रपंचं ब्रह्म निर्धारिते अस्मात्परमन्यत्तत्त्वमस्ति नास्ती
ति श्रुतिविप्रतिपत्तेः संशयः कानिचिद्वाक्यान्यापातेनैव श्रुतिभासमानानि ब्रह्मणोपि परमन्यत्तत्त्वं प्रतिपादयंतीव तेषां
हि परिहारमभिधातुमयमुपक्रमः क्रियते परमतो ब्रह्मणोन्येन भवितुमर्हतीति कुतः सेतुव्यपदेशात् उन्मानव्यपदे
शात् संबंधव्यपदेशात् भेदव्यपदेशाच्चेति सेतुव्यपदेशस्तावत् अथ य आत्मा स सेतुर्विधृतिरित्यात्मशब्दाभिहितस्य
ब्रह्मणः सेतुत्वं संकीर्तयति सेतुशब्दश्च हि लोके जलसंतानविच्छेदकरे मृद्दार्वादिप्रपंचे प्रसिद्धः इह च सेतुपो
कृ आत्मनि प्रयुक्त इति लौकिकसेतोरिवात्मसेतोरन्यस्य वस्तुनोस्तित्वं गमयति सेतुं तीर्त्वेति च तरतिशब्दप्रयो
गात् यथा लौकिकसेतुं तीर्त्वा जांगलमसेतुं प्राप्नोति एवमात्मानं सेतुं तीर्त्वा अनात्मानमसेतुं प्राप्नोतीति गम्यते उ
न्मानव्यपदेशोपि भवति तदेतद्ब्रह्म चतुष्पादष्टाशफं षोडशकलमिति यच्च लोके उन्मितमेतावदिदमिति परिच्छि
न्नं कार्षापणादि ततोन्यत्तत्त्वमस्तीति प्रसिद्धं तथा ब्रह्मणोप्युन्मानात्ततोन्येन च वस्तुना भवितव्यमिति गम्यते तथा संबं
धव्यपदेशो भवति सता सोम्य तदा संपन्नो भवतीति शारीर आत्मना संपरिष्वक्त इति च मितानां च मितेन संबंधो दृष्टः य
था नराणां नगरेण जीवानां च ब्रह्मणा संबंधं व्यपदिशति इह भूमो अतस्ततः परमन्यदमितमस्तीति गम्यते भेदव्यपदेश
श्चैतमेवार्थं गमयति तथाहि य एषोन्तरादित्ये हिरण्मयः पुरुष इत्यादित्याधारमीश्वरं व्यपदिश्य तदनन्तरं भेदे
नाक्ष्याधारमीश्वरं व्यपदिशति अथ य एषोक्षिणि पुरुषो दृश्यत इति अतिदेशं चास्यामुना रूपादि कुरुते तस्य
तस्य तदेव रूपं यदमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति गे ।

त्माप्रासेतो ४५

श्रोत्रं वाक् मन इत्यायतनवान्नाम पाद इति चतुष्पाद्ब्रह्मपादानामष्टौ न्यष्टौ शफा अस्येत्यष्टाशफं पादेषु चतुर्षु प्रत्येकं चत्वारः क
ला इति षोडशकलमित्यर्थः षोडशपणपरिमितं तांबकार्षापणं सेतुं भवति तद्वत्सद्वयं ब्रह्मपरिमितत्वादित्यर्थः संबं
धित्वाच्च नगरवदित्याह तथा संबंधेति अन्यदा सोमेति असंख्यानमित्यर्थः असमर्थं अल्पत्वेन मितत्वमिमं यमादित्यिमतं भे
भेदेनोक्तत्वाच्च घटवदित्याह भेदव्यपदेशाच्चेति अस्यादित्यस्यामुनादित्यस्य तु इतियावत् ।। राम ।। ।।

रामत:
त्र:द्वि:
२३

जीवस्य ब्रह्मात्मत्वफलश्रुतिरूपलिंगादपि भेदश्चौपाधिक एवेत्याह सूत्रकारः अतोनंतेनेति भेदाभेदपूर्वपक्षसूत्रद्वयस्य संगतिमा
ह तस्मिन्नेवेति यथाहित्वेनाभेदः कुंडलात्वेन सर्पस्य पावस्थाविशेषस्य कुंडलत्वेन भेदस्तथा जीवस्य ब्रह्मत्वेनाभेदो जीवत्वेन भेदः य
द्वा सूर्यप्रकाशयोरेकतेजस्त्वधर्मावच्छेदेनाभेदाभेदवज्जीवपरयोरपि एकेनैवात्मत्वधर्मेणाभेदाभेदौ श्रुतिबलात्स्वीकार्याविति सूत्र

अतोनंतेन तथाहि लिंगं २६ अतः स्वाभाविकत्वाद्भेदस्य विपाकत्वाच्चाभेदस्य विद्ययाविद्यां विभज्य जीवः परेणानंते
आत्मनात्मैकतां गच्छति तथाहि लिंगं स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति ब्रह्माप्येतीत्यादि उभयव्यपदेशात्त्वहिकुंडलवत् २७ ल २
तस्मिन्नेव संराध्यसंराधकभावमतांतरमुपन्यस्यति सममत्त विश्रुद्धये कश्चिज्जीवप्राज्ञयोर्भेदो व्यपदिश्यते न तत्स्तत्प
श्यति निष्कलं ध्यायमान इति ध्यातृध्यातव्यत्वेन द्रष्टृद्रष्टव्यत्वेन च परात्परं पुरुषमुपैति दिव्यमिति गंतृगंतव्यत्वेन यः स
र्वाणि भूतान्यंतरो यमयतीति नियंतृनियंतव्यत्वेन क्वचित्तयोरेवाभेदो व्यपदिश्यते तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा स
र्वांतर एष त आत्मांतर्याम्यमृत इति तत्रैवमुभयव्यपदेशे सति यद्यभेद एवैकांततो गृह्येत भेदव्यपदेशो निराल
लंबन एव स्यादतउभयव्यपदेशदर्शनादहिकुंडलवदत्र तत्त्वं भवितुमर्हति यथाहिरित्यभेदः कुंडलाभोगप्रांशुत्वा
दीनि इति भेदः एवमिहापीति प्रकाशाश्रयवद्वा तेजस्त्वात् २८ अथवा प्रकाशाश्रयवदेतत्प्रतिपत्तव्यं यथा प्रका
शः सावित्रस्तदाश्रयश्च सविता नात्यंतभिन्नावुभयोरपि तेजस्त्वाविशेषात् अथ च भेदव्यपदेशभाजौ भवतः एवमिहा
पीति पूर्ववद्वा २९ यथा पूर्वमुपन्यस्तं प्रकाशादिवच्चावैशेष्यमिति तथैव तद्भवितुमर्हति तथा ह्येवं चाकृतत्वा
या६ द्बंधस्य विद्यया मोक्ष उपपद्यते यदि पुनः परमार्थत एव बद्धः कश्चिदात्माहिकुंडलन्यायेन परस्यात्मनः संस्थानभूतः प्रका
शाश्रयन्यायेन चैकदेशभूतोभ्युपगम्येत ततः पारमार्थिकस्य बंधस्य तिरस्कर्तुमशक्यत्वान्मोक्षशास्त्रवैयर्थ्यं प्रस
ज्येत न चात्रोभावपि भेदाभेदौ श्रुतिस्तुल्यवद्व्यपदिशति अभेदमेव हि प्रतिपाद्यत्वेन निर्दिशति भेदं तु पूर्वप्रसिद्धमे
वानुवदत्यर्थांतरविवक्षया तस्मात्प्रकाशादिवच्चावैशेष्यमित्येष एव सिद्धांतः प्रतिषेधाच्च ३० इतश्चैष एव सिद्धां
तः यत्कारणं परस्मादात्मनोन्यं चेतनं प्रतिषेधति शास्त्रं नान्योतोस्ति द्रष्टेत्येवमादि अथात आदेशो नेति नेदं तद्ब्रह्म तिनेती २१
पूर्वमनपरमनंतरमबाह्यमिति च ब्रह्मव्यतिरिक्तप्रपंचनिराकरणाद्ब्रह्ममात्रपरिशेषाच्चैष एव सिद्धांत इति गम्यते

इत्यर्थः कुंडलत्वं वलयाकारत्वं आभोगत्वं वक्राकारत्वं प्रांशुत्वं दीर्घदंडाकारत्वं उद्धतत्वं आदि शब्दार्थः सिद्धांतस
सूत्रे पूर्ववद्वेति धर्मभेदेनैकधर्मेणवाभेदस्वीकारे भेदस्य सत्यत्वाद्भेदवद्बंधनिवृत्तिः स्यादेकत्र भेदाभेदस्वीकारे लोके विरोध
कयोश्छेद इत्यपि द्रष्टव्यं तस्मान्निष्प्रपंचं चिदेकरसं ब्रह्म तदन्यदलत्यमस्तीति सिद्धं ॥ श्रीरामायनमः

राम
२३

स्वरूपेणैव व्याचष्टे इतश्चैतिधान्नुपपत्त्या ब्रह्मास्तीत्यनवगतं भूयः पुनः परमस्तीति श्रुतिः साक्षादपि ब्रवीतीत्यर्थः तच्चेति अवशिष्टं ब्रह्मेत्यर्थः
स्वरूपमस्यात् नेत्यग्राह्यत्वाद्ब्रह्म नास्तीति शंकानिरासार्थं सूत्रं व्याचष्टे यत्तत्प्रतिषिद्धादिति रूपाद्यभावाद्व्यक्तमिंद्रियाग्राह्यं न तु सत्त्वादित्यर्थः
अन्येष्वैदिंद्रियाजैर्नेग्रह्यतद्भूत्यन्वयः नहिं कदाग्राह्यमिति शंकोत्तरसूत्रं व्याख्याति अपि चैनमिति चशब्दार्थः दृढ्वेयेनं गृह्यते अपि तु संराध
ने शास्त्रसंस्कृतमननसेव्यः भक्तिध्यानाभ्यां प्रत्यगात्मनश्चित्तप्रकर्षेण निधानप्रणिधानजपनमस्कारादित्यादिशब्दार्थः स्वयंभूः ईश्वरः स्वा
नि इंद्रियाणि पराचनात्मग्राहकाणि कृत्वा वितृणत् प्राशितवान्हितेषां नापायदसदर्थग्राहात्मपाप्ममज्जने तस्मात्तेषां तत्प्रयासेणनात्मसर्वोलो

इतश्चैकत्वनिर्णयः यत्तस्ततः प्रपंचप्रतिषेधात्कृत्यो ब्रवीमन्यत्परमस्तीत्यभावावसाने हि प्रतिषेधे हि क्रियामाणे किमन्यत्परमस्तीति ब्रू
तिनेनेती२ यात् तत्रैषादेश्यो जन्मनेति ब्रह्मादिरूपं तमेवादेशं पुनर्निवृत्तिर्नेति नेतीत्यस्यार्थः न ह्येतस्माद्ब्रह्मणोऽव्यतिरिक्तमस्तीत्यतो नेतीत्युच्यते न
पुनः स्वयमेव नास्तीत्यर्थः तच्चदर्शयति अन्यत्परमप्रतिषिद्धं ब्रह्मास्तीति यदा पुनरेवमक्षराणि योज्यन्ते न ह्येतस्मादिति नेति प्रपंचप्रतिषेध
रूपादादेशानादन्यत्परमादेशान्तरं ब्रह्मणोऽस्तीति तदा ततो ब्रवीति च भूयः इत्यत्र नामधेयविषयं योजयितव्यं अथ नामधेयं सत्यस्य सत्यमि
ति प्राणा वै सत्यं तेषामेष सत्यमिति हि ब्रवीतीति तच्च ब्रह्मावसाने प्रतिषेधे समंजसं भवति अभावावसाने तु प्रतिषेधे किं सत्यस्य सत्य
मित्युच्यते तस्माद्ब्रह्मावसानोयं प्रतिषेधो नाभावावसान इत्यध्यवस्यामः तदव्यक्तमाह हि २३ यत्तत्प्रतिषिद्धात्प्रपंचजातादन्यत्परं ब्रह्म
तदस्ति चेत्कस्मान्न गृह्यत इत्युच्यते तदव्यक्तमनिंद्रियग्राह्यं सर्वदृश्यसाक्षित्वादाह हि एवं श्रुतिः न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवै
स्तपसा कर्मणा वा स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यते यत्तदद्रेश्यमग्राह्यं यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने
इत्याद्याः स्मृतिरपि अव्यक्तोयमचिन्त्योयमविकार्योयमुच्यत इत्याद्या अपि संराधने प्रत्यक्षानुमानाभ्यां २४ अपि चैनमात्मानं निरस्तप्रपं
चमव्यक्तं संराधनकाले पश्यंति योगिनः संराधनं च भक्तिध्यानप्रणिधानाद्यनुष्ठानं कथं पुनरवगम्यते संराधनकाले पश्यंतीति प्रत्यक्षा
भ्यामि नुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः तथा हि श्रुतिः पराञ्चि खानि व्यतृणत्स्वयंभूः तस्मात्पराङ्पश्यति नान्तरात्मन् कश्चिद्धीरः प्रत्यगा
त्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ज्ञानप्रसादेन विशुद्धसत्त्वः ततस्तु तं पश्यति निष्कलं ध्यायमान इति चैवमाद्याः स्मृ
तिरपि यं विनिद्रा जितश्वासाः संतुष्टाः संयतेन्द्रियाः ज्योतिः पश्यन्ति युंजानास्तस्मै योगात्मने नमः योगिनस्तं प्रपश्यन्ति भगवन्तं
सनातनमिति चैवमाद्या ननु संराध्यसंराधकभावाभ्युपगमात्परेतरात्मनोरन्यत्वं स्यादिति नेत्युच्यते प्रकाशादिवच्चावैशेष्यं प्रका
शश्च कर्मण्यभ्यासात् २५ यथा प्रकाशाकाशसवितृप्रभृतयोऽङ्गुलिकरकोदकप्रभृतिषु कर्मसूपाधिभूतेषु सविशेषा इवावभासन्ते
न च तत्स्वाभाविकीमविशेषात्मतां जहति एवमुपाधिनिमित्त एवायमात्मभेदः स्वतस्त्वैकात्म्यमेव तथा हि वेदान्तेष्वभ्यासेनासकृज्जी

कः परागर्थमेव पश्यति नान्तरात्मानं कश्चिद्धीरो धीमान् आवृत्तचक्षुर्निरुद्धेन्द्रियः स्पृहे चेतसा प्रत्यगात्मानं शास्त्रेण पश्यति मोक्षार्थीत्यर्थः
ततः कर्मणो विशुद्धचित्तो ज्ञानात्स्वयं तत्त्वात्कर्मेण ध्यायमानस्तं निष्कलं पश्यतीत्यर्थः विनिद्रा विनमस्काः तत्र हेतुर्जितश्वासत्वं प्राणायाम
निष्ठत्वं युंजानाध्यायिनः योगात्मने आत्मा योगात्माय प्रकाशादयः उपाधिभिर्भिद्यन्ते न स्वतः एवं प्रकाशश्चिदात्मापि ध्यानादिकर्मण्युपा

प्र४

प्र२

ननु वासनामयं रूपेमयं रूपेणैव किमित्युपमीयते प्रसिद्धरूपमेव किं न स्यादित्यत आह अमूर्तरसस्येति रूपद्वयस्यैव प्राधान्येन प्रकृतत्वे
फलितमाह तदिति प्रतियोगित्वेन समर्पित इत्यर्थः न चार्थतः प्राधान्याद्ब्रह्मणो निषेधः राज्ञो मत्स्यो नास्तीत्यत्र राजनिषेधः किं
चात्र ब्रह्मणः प्रतिपाद्यत्वान्न निषेध इत्याह प्रपंचितेति चेति न च ब्रह्मणो निषिद्धस्याप्यन्यत्र स्थितिसंभवात्कथं कल्पितत्वमित्यत आह
तदास्पदमिति उपादाने निषिद्धस्यान्यत्र न स्थितिरित्यर्थः यत इह तु निषेधप्रत्यक्षादिविरोध इति तत्राह युक्तं चेति स्थापितं सारंभ
णाधिकरणे प्रत्यक्षादेर्व्यावहारिकप्रामाण्यं न त्वावेदकमित्यन्न न स्तत्त्वतो निषेधात्तद्विरोध इति भावः ननु वस्तुत्वाद्द्वैतवद्ब्रह्मणो

अमूर्तरसस्य रूपस्य चक्षुर्ग्राह्यरूपयोगित्वानुपपत्तेः तदेतत्प्रपंचं ब्रह्मणो रूपं सन्निहितालंबनेनेतिकरणेन प्रतिषेधकं
नञ्प्रत्युपनीयत इति गम्यते ब्रह्मतद्रूपविशेषणत्वेन षष्ठ्या निर्दिष्टे पूर्वस्मिन्ग्रंथे न स्वप्रधानत्वेन प्रपंचितेति च तदीये
रूपद्वये रूपवतः स्वरूपजिज्ञासायामिदमुपक्रांत अथात आदेशो नेति नेतीति तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्म
णः स्वरूपावेदनमिदमिति निर्णीयते तदास्पदं हीदं समस्तं कार्यं नेति नेतीति प्रतिषिद्धं युक्तं च कार्यस्य वाचारंभ
णशब्दादिभ्योऽसत्त्वमिति नेति नेतीति प्रतिषेधनं न तु ब्रह्मणः सर्वकल्पनामूलत्वात् न चात्रेयमाशंका कर्तव्या कथं
हि शास्त्रं स्वयमेव ब्रह्मणो रूपद्वयं दर्शयित्वा स्वयमेव प्रतिषेधति प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति य
तो नेदं शास्त्रं प्रतिपाद्यत्वेन ब्रह्मणो रूपद्वयं निर्दिशति लोकप्रसिद्धं तु रूपद्वयं ब्रह्मणि कल्पितं परामृश्यति प्रतिषेधा
यापरस्य ब्रह्मस्वरूपप्रतिपादनाय चेति निरवद्यं द्वौ चैतौ प्रतिषेधौ यथासंख्यन्यायेन द्वे अपि मूर्तामूर्ते प्रतिषेधतः
यद्वा पूर्वः प्रतिषेधो भूतराशिं प्रतिषेधत्युत्तरो वासनाराशिं प्रतिषेधति अथवा नेति नेतीति वीप्सयमितीति यावत्किं
चिदुत्प्रेक्ष्यते तत्सर्वं न भवतीत्यर्थः परिगणितप्रतिषेधे हि किं नाम यदि न तद्ब्रह्म भवेदिति जिज्ञासा स्यात् वीप्सा
यां तु सत्यां समस्तस्य विषयजातस्य प्रतिषेधाद्विषयः प्रत्यगात्मा ब्रह्मेति जिज्ञासा निवर्तते तस्मात्प्रपंचमेव ब्रह्मणि
कल्पितं प्रतिषेधति परिशिनष्टि ब्रह्मेति निर्णयः ॥ ला। किमन्यत् २५

पि निषेधोऽस्त्वित्यत आह न त्विति द्वैतभावाभावसाक्षित्वाद्ब्रह्मणो निषेधो न इत्यर्थः न चेत्यादिसूत्रशेषं यच्चोक्तं निषेधात्पूर्वं रूपं पि
ब्रह्म च निषिध्येतेति तत्राह द्वौ चैनाविति इदं रूपं विधेयार्थो नाम संख्यावाक्यमाम्नायपाक्रमसंबंध इति न्यायो यथासंख्यमनुदेशः
समानामिति पाणिनिसूत्रप्रसिद्धस्तेनात्र रूपद्वयोद्देशेन निषेधद्वयविधिरित्यर्थः वीप्सापक्षेऽस्त्वेवं द्व्यनिषेधाजिज्ञासापत्ते
नितिरितिविशेषमाह परिगणितेति मूर्तामूर्ते नेत्येव परिगणितनिषेधजिज्ञासानपायमतीत्यर्थः ॥ राम ॥ राम ॥

उत्सर्गमेव तावत्सिद्धान्तम्रपक्रमते एवमिति अन्यप्रसंगादप्रवृत्तिवदन्तं तमुत्थाह किंचिद्धीति नचेति प्रतिषेधनमित्यर्थः अधिष्ठाना
नवशेषतन्त्रमात्रपदेत्तभावान्निषेधवाक्यायप्रमाणस्यादिदमवन्नास्तीति लोके निषेधस्य साधिष्ठानस्यैव प्रमिते दर्शनादित्यर्थः किंच
वद्गातितत्साद्धिन्नुत्सर्गस्य भावायाभावाधिष्ठानप्रमितिरपवादः तथा एवं भावसम्भवत्वेनिमित्ते नार्थ सत्वापलापो सत्वे विनाभ्भीतिनि
षेधयोरयोगाच्छ यो हरअपवादो नगीकारेत्नुत्सर्गतः अपचसत्वत्यत्वापत्तेः निषेधानुपपत्तिरित्याह अपरिशिष्यमाणे चेति अधिष्ठा
नसत्व विनाभ्भीतिनिषेधयोगाच्छन्यवादो नयुक्तः यत्नात्का एवं पादितः पत्तान्तरदूषयति नापीति देहात्माभिमानवल्लौकिकमा।

एवं प्राप्तेऽब्रूमः नतावदुभयप्रतिषेध उपपद्यते शून्यवादप्रसंगात किंचिद्धिपरमार्थमालंब्यापरमार्थं प्रतिषिध्यते यथार।
ज्वादिषु सर्पादयः तच्चपरिशिष्यमाणे कस्मिंश्चिद्भावेवकल्पते तन्नत्र प्रतिषेधनकोन्योभावः परिशिष्येत अपरिशिष्यमाणेचा
न्यस्मिन्यइतरः प्रतिषेद्धुमारभ्यते तस्यैव परमार्थत्वापत्तेः प्रतिषेधानुपपत्तिः नापिब्रह्मप्रतिषेध उपपद्यते ब्रह्मतेवा
गित्याद्युपक्रमविरोधात असन्नेव सभवति असद्ब्रह्मेतिवेदचेदित्यादिनिन्दाविरोधात अस्तीत्येवोपलब्धव्यइत्य
वधारणविरोधात सर्ववेदान्तव्याकोपप्रसंगाच्च वाङ्मनसातीतत्वमपिब्रह्मणो नाभावाभिप्रायेणाभिधीयते नहि
महतापरिकरबन्धेन ब्रह्मविदाप्नोति परं सत्यं ज्ञानमनन्तं ब्रह्मेत्येवमादिना वेदान्तेषु ब्रह्मप्रतिपादितस्यैव [illegible] वोमिल
प्येत प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमितिहिन्यायः प्रतिपादनप्रक्रियात्वेषा यतो वाचो निवर्तन्ते अप्राप्यमनः
सा सहेति एतदुक्तं भवति वाङ्मनसातीतमविषयान्तःपाति प्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति त
स्माद्ब्रह्मणो रूपप्रपंचं प्रतिषेधति परिशिनष्टि ब्रह्मेत्यवगन्तव्यं तदेतदुच्यते प्रकृतैतावत्त्वं हि प्रतिषेधतीति प्रकृतं
यदेतावदियत्तापरिच्छिन्नं मूर्तामूर्तलक्षणं ब्रह्मणो रूपं तदेष शब्दः प्रतिषेधति तद्धि प्रकृतं प्रपंचितं एवं सिन्नन्यथ अ
धिदैवतमध्यात्मं च तज्जानितमेव चवाचनालक्षणमपररूपमहारजतं रसमभूतं पुरुषशब्दोदितं लिंगात्मव्यपाश्रयं महारजता

तत्सात्तदेतन्निषेधोयुक्तो नवेदान्तप्रमितब्रह्मण इतिभावः यदुक्तं वाङ्मनसातीतत्वान्निषेधार्हं ब्रह्मेति तत्राह वाङ्मनसेति ब्र
ह्मणोवाग्गाचरातीतत्वं निषेधार्थं नचेत्किमर्थं तदुक्तिरित्यत आह प्रतिपादनेति उक्तार्थे स्तुत्रं योजयति तदेतदित्यादि
ना द्वेवाव ब्रह्मणो रूपे इतिरूपद्वयस्यैव प्राधान्येन प्रकृतत्वान्नेतीति निषेध इत्यर्थः नन्वादित्यमण्डलपुरुष इति ब्रह्मप्र
प्राधान्येनोक्तमित्याशंक्य पुरुषोलिंगात्मा अमूर्तरसत्वमन्याभूतजनितत्वभावान्नमूर्तपवत्त्वस्तस्त्रेत्याह तज्जनितमेवेति

तस्य प्रतिषेद्धुमशक्य त्वादि २२

शा॰ भा॰ [illegible]

॥ [illegible]

पातं·
त्र·टि·
२१

ब्रह्मणो निर्विशेषचिन्मात्रत्वमुक्त्वा सर्वनिषेधावधित्वेन तद्रूपत्वमाह प्रकृतेनेति पृथिव्यप्तेजोभूतत्रयं मूर्तं वाय्वाकाशद्वयममूर्तमिति
रूपद्वयमुक्तं तद्द्वयस्यापि रसः सारः करणात्मा हिरण्यगर्भोऽयं पुरुष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षिन्पुरुष इत्युक्तः त
स्य वासनामयानि रूपाणि तद्यथा महारजनं वास इत्यादिना पाण्ड्वाविकं यथेन्द्रगोप इत्युपमाभिरुक्तानि विचित्राणि तत्र महारजनं हरि
द्रा तया लिप्तं वस्त्रं महारजनं पाण्ड्वाविकमविधवलकंबलादिकं चित्रं प्रतिमपलक्षणं कृत्वा सत्यस्य च भूतान्यमूर्तानि पंचीकृ
तानि सत्तानि तत्सत्यस्मात्तेन सत्तो ज्ञाकरणानां पांचभौतिकत्वसिद्धिर्व्याख्याता अथ सतत्यदात्मकप्रपंचोक्तानंतरमतदुक्तरोपरस्य नि
षेधार्थत्वान्नेति नेतीति निषेधेनोपदेशः क्रियत इत्यर्थः नेति शब्दार्थमाह नहीति एतस्मादात्मनोऽन्यत्रास्तीति नेति नेत्युर्थः प्र

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः २३ द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चेत्युपक्रम्य पंचमहाभूतानि द्वैराश्ये
न प्रविभज्यामूर्तरसस्य च पुरुषशब्दोदितस्य महारजनादीनि रूपाणि दर्शयित्वा पुनः पठ्यते अथात आदेशो नेति नेति न
ह्येतस्मादिति नेत्यन्यत्परमस्तीति तत्र कोऽस्य प्रतिषेधस्य विषय इति जिज्ञास्यते न ह्यत्रेदं तदिति विशेषितं किंचित्प्रतिषेध्यमुप
लभ्यते इतिशब्देन त्वत्र प्रतिषेध्यं किमपि समर्प्यते नेति नेतीति इति परत्वान्नञ्प्रयोगस्येति शास्त्रायुं सन्निहिता लं
वनं एवं शब्दसमानस्तिः प्रयुज्यमानो दृश्यते इतिहस्योपाध्यायः कथयतीत्येवमादिषु सन्निहितं चात्र प्रकरण
सामर्थ्याद्रूपद्वयं सप्रपंचं ब्रह्मणः तच्च ब्रह्म यस्य ते द्वे रूपे तत्र नः संशय उपजायते किमयं प्रतिषेधो रूपे रूपव
च्चोभयमपि प्रतिषेधति आहोस्विदेकतरं यद्येकतरं तदपि किं ब्रह्म प्रतिषेधति रूपे परिशिनष्टि आहोस्विद्रूपे प्रति
षेधति ब्रह्म परिशिनष्टीति तत्र प्रकृतत्वाविशेषादुभयमपि प्रतिषेधतीत्याशंकामहे द्वौ चैतौ प्रतिषेधौ द्विर्नेति
शब्दप्रयोगात्तयोरेकेन सप्रपंचं ब्रह्मणो रूपं प्रतिषिध्यते परेण रूपवद्ब्रह्मेति भवति मतिः अथ वा ब्रह्मैव रूप
वत्प्रतिषिध्यते तद्धि वाङ्मनसातीतत्वादसंभाव्यमानसद्भावं प्रतिषेधार्हं न तु रूपप्रपंचः प्रत्यक्षादिगोचरत्वात्प्रतिषेधा

र्हता निरासार्थं परं ब्रह्मास्तीति सिद्धांतरीत्या अत्यर्थः अत्र निषेध्यविशेषानुपलंभात्संशयमाह तत्र कोऽस्येत्यादिना अत्र योगस्तनका
रस्येति शब्दोपस्थापितवस्तुनिषेधकत्वादित्यर्थः इति शब्दात्रिषेध्यसामान्यसमर्पणे विशेषाकांक्षायां प्रकरणाद्रूपद्वयसरूपि ब्रह्म
णश्च निषेध्यत्वभानात्संशयमुक्त्वा पूर्वोक्तं निर्विशेषं ब्रह्म नास्तीत्याक्षेपसंगत्या पूर्वपक्षयति तत्र प्रकृततेति एवं पक्षे तदुभया
भावाद्वाकार्यांभयासिद्धिः सिद्धांते तत्सिद्धिरिति फलं निःशेषेण निषेधादर्शनात्सर्वनिषेधो न युक्त इत्यत्र ब्रह्मप्रपंचे च ब्रह्म निषेधद्वया
त् अथवेति एकब्रह्मण एव निषेधेन कारद्वयस्य पौनरुक्त्यमित्यत आह अभावास्त्विति ॥ श्रीरामायनमः ॥

राम
२१

नन्वनन्तिर्योषिदग्निरिति प्रत्यक्षप्रमाणपाठस्यान्नमपि ज्ञानं ज्ञानमग्निध्यायेदिति विधिना न्यायान्तेहृदयतस्तत्त्याह यदीति अन्यथा धीः स्मृतिसा
ध्या चेत्क्रियवत्कर्मविनेव चेष्टानिरोधातो मानं विना विधितो ज्ञानासिद्धर्माणवस्तुतन्त्रज्ञाने विधिर्निषेधन्यर्थः वेदान्तेषु विधिवादिनोन्यच्च दूष
णमस्तीत्याह किंचान्यदिति ब्रह्मात्मैक्ये नियोगे वेदान्तवाक्यस्याप्रामाण्यमाशङ्कार्थभेदाद्वाक्यभेदो विरुद्धार्थत्वादप्रामाण्यं चेति दूषयति अ
थेत्यादिना किंच अनन्तब्रह्मानन्दतो विधिर्वेदान्तेषु तत्कल्पने च कर्मजन्यत्वान्मोक्तस्यानित्यत्वस्यानिशयत्वादिप्रसंगमेत्याह नियोगपरता
यां चेति फलतमाह अतस्मादिति इदानीं प्रौढवादेन नियोगमङ्गीकृत्य तदेकत्वं खण्डयति अभ्युपगम्यमानेपीति भिन्नक्रियावाची शब्दः शब्दान्तरप

रित्युनर्निर्युक्तो हि मित्यन्यथा ज्ञानं कुर्यात न तज्ज्ञानं किं तर्हि मानसी सा क्रिया स्वयमेव चेदन्यथोत्ययतन्त्रानिरेवस्यात ज्ञानं तु प्रमाण
जन्यत एव न विषयचनतन्त्रियोगस्तेनापि कारयितुं शक्यते न च प्रतिषेधशतेनापि वारयितुं शक्यते [illegible]
[illegible] नहि नत्युरुषतन्त्रं वस्तुतन्त्रमेव हितत्त्व अतोपि नियोगाभावः किंचान्यत्त्रियोगनिष्ठत्वे एवं पर्यवसाय्यत्वाये यदभ्युपगत
मनियोज्यब्रह्मात्मत्वं जीवस्य तदप्रमाणकमेव स्यात अथ शास्त्रमेवानियोज्यब्रह्मात्मत्वमाचष्टीति तदवबोधे च पुरुषनियुंजी
त ततो ब्रह्मशास्त्रस्यैकस्य द्व्यर्थपरताविरूपार्थपरता च प्रसज्येयातां नियोगपरतायां चश्रुतकल्पनाकर्मफलवन्मोक्षस्यादृष्टफ
लत्वमनित्यत्वं चेत्येवमादयो दोषाः न केनचित्परिहर्तुं शक्याः तस्मादवगतिनिष्ठान्येव ब्रह्मवाक्यानि न नियोगनिष्ठानि अत
श्चैकनियोगवाक्यतेत्ययुक्तं अभ्युपगम्यमानेपि च ब्रह्मवाक्येषु नियोगसद्भावे तदेकत्वं निष्प्रपंचोपदेशेषु चासिद्धं नहि प्र
पंचवादिभिः प्रमाणैर्नियोगभेदावगम्यमाने सर्वत्रैको नियोग इति शक्यमाश्रयितुं प्रयाजदर्शपूर्णमासवाक्येष्वधिका
रभेदाद्युक्तमेकत्वं नहि सगुणनिर्गुणचोदनास्वेकश्चिदेकत्वाधिकारोस्ति नहि भारूपत्वादयो गुणाः प्रपंचप्र
लयोपकारिणः नापि प्रपंचभारूपत्वादिगुणोपकारी परस्परविरोधित्वात नहि कृत्स्नप्रपंचविलापनं प्रपंचैकदेशा
पेक्षणं चैकस्मिन्धर्मिणि युक्तं समावेशयितुं तस्मादसदुक्तं पूर्वविभागश्चाकारवदनाकारोपदेशानां युक्तं न रहेति ॥

यायजतिददातीतिनचेहापिदोपासीनेशाद्भेदः निर्गुणसगुणारूपभेदः मुक्तामभ्युदयफलभेदश्चेत्यनैः प्रमाणैर्निर्गुणज्ञान
सगुणोपासनाविषयकनियोगभेदइत्यर्थः कुतोत्रैव गाणिवाक्येषु नियोगैकित्वमाह प्रयाजेति एकस्यैव स्वर्गकामस्य सांग
प्रधानाधिकारात तस्माद्यफलार्थ वैकवाक्यतेत्यर्थः इहापि निर्गुणविषययोरेकाधिकारस्त्रियोगो स्यात्तेनेत्याह नहीति मुक्त
मभ्युदयाधिभेदास्ति ध्येयविरुद्धार्थविषययोरंगांगित्वा योगाच्च नहि योगैक्यं न चानिर्गुणविद्यानियोगैक एव सगुणविद्यानंगीका
रादिति वाच्यं अहोविपरीतं पांडित्यमायुष्मतः विचयोग्यविद्याया विधिर्योग्यानामविधिरिति तस्मात्साकारवाक्यानामाकारलय
द्वारा निर्गुणवाक्यैकवाक्यतानाग निरस्तं तिरेवकिं तत्तज्जेषाकल्पनाकारोगतिस्तदुपासनया भ्युदयसिद्धिः निर्गुणवाक्यानां तु परमा।

चोदितं तत्त्वमसि इत्यत्र प्रपञ्चविलयः साक्षी पालित्यपदं इति नवमाक्षी

द्वितीयमनवद्यदूषयति अयेत्यादिना उपदेशजन्यज्ञानादेवाविद्यातत्प्रपंचलयसिद्धेर्नियोगो ह्यपेत्यर्थः किंच ब्रह्मज्ञानाद्वैवि
धिः किंब्रह्मण एव ज्ञाते ज्ञातेवानायः अशक्यत्वादित्याह अनावेदितत्वेति द्वितीये पाकते नन्विति उपदेशादेवज्ञातेब्रह्मणि सा
ज्ञात्कारहेतवाधयोः सिद्धे विधिवैयर्थ्यसिद्धः स्वविधिनाकर्तृमयोगादित्याह नेति एवंविषयाभावमुक्त्वा नियोज्याभावात्तद
भावमाह नियोज्योपिचेतिप्रपंचांतर्भूतोब्रह्मवेत्यर्थः आद्येजीवनाशाद्धि ध्येयोगः द्वितीये नियोज्यासिद्धिः नहिं ज्ञानेविधिम

अथाविद्याध्यस्तोब्रह्मण्येकस्मिन्नयंप्रपंचोविद्ययाप्रविलाप्यतइतिस्यात् ततोब्रह्मैवाध्यस्तप्रपंचप्रत्याख्यानेना
वेदितव्यएकमेवाद्वितीयंब्रह्मतत्सत्यंसआत्मातत्त्वमसीति एवमावेदितेतस्मिन्विद्यास्वयमेवोत्पद्यते तयाचावि
द्याबाध्यते ततस्थाविद्याध्यस्तसकलोयंनामरूपप्रपंचः स्वप्नप्रपंचवत्प्रविलीयते अनावेदितेतुब्रह्मणिब्रह्म
विज्ञानंकुरुप्रपंचंप्रविलयेति पातकत्वोपदेशेन ब्रह्मविज्ञानंप्रपंचप्रविलयोवाजायते नन्वावेदितेब्रह्मणि त
द्विज्ञानविषयः प्रपंचविलयविषयोवानियोगः स्यात् नानिष्प्रपंचब्रह्मात्मत्वावेदनेनैवोभयसिद्धेः रज्जुस्वरूपप्रका
शनेनैवहितत्स्वरूपविज्ञानमविद्याध्यस्तसर्पादिप्रपंचविलयश्चभवति नचकृतमेवपुनःक्रियते नियोज्योपिच
प्रपंचावस्थायांयोयोवगम्यते जीवोनामसप्रपंचपक्षस्यैवस्यात् अन्यपक्षेचवाप्रथमविकल्पेनिष्प्रपंचब्रह्मतत्त्व
प्रतिपादनेन पृथिव्यादिवज्जीवस्यापि प्रविलापितत्वात् कस्यप्रपंचप्रविलयेनियोगउच्यतकस्य[illegible]
वानियोगानुष्ठानयामोक्षोवामध्यउच्यतद्वितीयेपिब्रह्मैवानियोज्यस्वभावजीवस्यस्वरूपजीवनंतविद्याकृतमे
वेतिप्रतिपादितेब्रह्मणिनियोज्याभावान्नियोगाभावएव द्रष्टव्यादिशब्दाअपिचपरविद्याधिकारपठितास्तत्वाभि
मुखीकरणप्रधानानतत्वावबोधविधिप्रधानाः लोकेपीदंपश्येदमाकर्णयेतिचैवंजातीयकेषुनिर्देशेषुप्रणिधा
नमात्रंकुर्वित्युच्यते नमात्साक्षात्ज्ञानमेवकुर्विति ज्ञेयाभिमुखस्यापिज्ञानंकदाचिज्जायतेकदाचिन्नजायते तस्मात्तंप्र
तिज्ञानविषयएवदर्शयितव्योज्ञापयितुकामेनतस्मिन्दर्शितेस्वयमेवयथाविषयंयथाप्रमाणंचज्ञानमुत्पद्यते
नचप्रमाणान्तरेणान्यथाप्रसिद्धेर्थेन्यथाज्ञानंनियुक्तस्याप्युपपद्यते ॥

त्वयातांकागतिरित्यतआह द्रष्टव्यादिशब्दाइति ननुश्रुतंज्ञानंत्यक्त्वातत्साधनव्यापारेविधिः किमितिकल्प्यतइत्याशंका
ज्ञानस्यपुरुषकृत्यसाध्यत्वादित्याह ज्ञेयाभिमुखस्यापीति किंचज्ञानविधिवादिनाज्ञेयंब्रह्मावश्यंवेदांतैर्ज्ञापनीयंविष
यानवबोधेविधिबोधायोगात्पाचवेदान्तैरेवज्ञानोत्पत्तेर्विधानर्थक्यमित्याह तस्मादिति तज्ज्ञानार्थिनंप्रतीत्यर्थः नन्

नतज्ञानमसत्वाबोधविधिरेवविधिरितिनेत्याह कृति ॥

किं वाकारानाकारस्मृतिर्हि विधेयेस्तत्र ब्रह्मानाकारमेवेत्यत्र किं विनिगमकमिति शंकोत्यानादस्य लादिस्मृतीनां निराकारतात्पर्यनिपा
नकमितिकपनार्थमिदं सत्त्वमर्थवद्भवति सर्वस्मृतीनां निषेधार्थत्वेन शंकानुत्थानान्नियामकस्तत्रैव घसादित्याह सर्वेषां चेति
ननु पासनार्थवाक्यानां स्वार्थफलाभावात्सफलनिषेधवाक्यशेषत्वमित्याशंक्य फलस्य श्रूयमाणत्वान्नान्यशेषत्वेत्याह फलमपीति त्र
र्थैकाभावात्त्वनेकवाक्यतेत्याह कथं चेति अर्थैकं शंकते एकेति यथा फलवत्परमास्वर्गाख्यनियोगैक्याद्दंगप्रधानवाक्यानामेकः
वाक्यता नयानतत्वावबोधकामस्य प्रपंचप्रविलयविषयकपरको नियोगरूपो यो ल्लोन्याकारानाकारवाक्यानां सर्वेषामेकवाक्यतेत्यर्थः

सर्वेषां च साधारणो प्रविलापार्थत्वे सति अग्न्यहवदेव हितत्वप्रधानत्वादिति विनिगमनकारणवचनमनवकाशं स्यात् फलमप्येषां
यथोपदेशं कविदुरितक्षयः क्वचिदैश्वर्यप्राप्तिः क्वचित्क्रममुक्तिरित्यवगम्यत एवेति अतः पार्थगर्थ्यमेवोपासनावाक्यानां ब्रह्म
वाक्यानां चन्यायेनेकवाक्यत्वं कथं चैषामेकवाक्यतेत्यत्र दूतिवक्तव्यं एकनियोगप्रतीतेः प्रयाजदर्शपूर्णमासवाक्यवदिति
वेत्त नब्रह्मवाक्येषु नियोगाभावात् वस्तुमात्रपर्यवसायीनि ब्रह्मवाक्यानि न नियोगोपदेशीनीति यजुष्टिस्तेरणप्रतिष्ठापितं तत
तु समन्वयादित्यत्र किंविषय आत्रनियोगोभिप्रेयत इति वक्तव्यं पुरुषो हि नियुज्यमानः ऊर्ध्वमितिस्वव्यापारे कस्मिंश्चिन्नियुज्येत
नि॰ नन्दहेनप्रपंचप्रविलयोगाविषयोभविष्यति अप्रविलापिते हि द्वैतप्रपंचे ब्रह्मतत्वावबोधो न भवति अतो ब्रह्मतत्त्वावबो
धप्रत्यनीकभूतो द्वैतप्रपंचः प्रविलाप्यो यथा स्वर्गकामस्य यागोनुष्ठातव्य इत्युपदिश्यते एवमपवर्गकामस्य प्रपंचप्रविलयः
यथा च तमसि व्यवस्थितेन घटादितत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतं तमः प्रविलाप्यते एवं ब्रह्मतत्त्वमवबुभुत्समानेन तत्प्र
त्यनीकभूतः प्रपंचः प्रविलापयितव्यः ब्रह्मस्वभावो हि प्रपंचो न प्रपंचस्वभावं ब्रह्म तेन नामरूपप्रपंचप्रविलापनेन ब्रह्मतत्त्वा
वबोधो भवतीत्यत्र वयं पृच्छामः कोयं प्रपंचप्रविलयो नाम किमग्निप्रतापसंपर्कात् घृतकाठिन्यप्रविलय इव प्रपंचप्रविलयः क
र्तव्यः आहोस्वित् एकस्मिंश्चंद्रे तिमिरकृतानेकचंद्रप्रपंचवत् अविद्याकृतो ब्रह्मणि नामरूपप्रपंचो विद्यया प्रविलापयितव्य इति
तत्र यदि तावद् विद्यमानोयं प्रपंचो देहादिलक्षण आध्यात्मिको बाह्यश्च पृथिव्यादिलक्षणः प्रविलापयितव्य इत्युच्यते स पुरुषमा
त्रेणाशक्यः प्रविलापयितुमिति तदुपदेशोऽशक्यविषय एव स्यात् एकेन चादिमुक्तेन पृथिव्यादिप्रविलयः कृत इदानीं

नियोगासिद्धिमाह दूषयति नेति विषयं शंकते नन्विति प्रत्यनीकं प्रतिबंधकं न न प्रपंचविलये ब्रह्मलयः स्यादभेदादित्यत आह ब्र
ह्मस्वभावो हि प्रपंच इति कारणं हि कार्यस्य स्वरूपं अतः कार्यनाशे कारणस्य न लयः घटनाशे मृदः दर्शनादित्यर्थः प्रपंचस्य स
त्यस्य कल्पितस्य वा लये विधिरिति विकल्प्याद्यं दूषयति तत्र यदि तावदिति सत्यस्य ज्ञानादध्वंसेन सत्तादिना च कृतत्वं हेतु
र्धं सायोगात्तद्भोग्रसंगेन विधिवदशक्यविषयोयं विधिः किंच शुकादिमुक्त्या सर्वमुक्तिः स्यादित्यर्थः ॥ रामायनमः

उभयश्रुतिबलादुभयात्मकत्वमितिशंकते अतत्त्वादिति मेहूविंध्यवत्स्वरूपभिन्नतनाद्बोधयोरेकब्रह्माभेदशंकाश्रुतिःशानेनापिनयुक्तेत्याह नेतिसद्बोधयोर्भेदोऽस्तिनवा आद्ये अनेकरूपत्वादाद्यौ विन्यात्तु पूर्वमेवपर्व पत्तेस्त्यानमितुके संप्रतिद्वितीयं शंकते अथसतेवेति सद्बोधपदयोर्वाच्यभेदेऽपिलक्ष्यैक्यात्पर्यपगतिः खण्डार्थस्वीकारादित्यर्थः अखण्डार्थस्यपर्वपत्तत्त्वेनस्थानित्वात्तत्त्वानं किंचात्रसंशयोऽप्ययुक्त इत्याह तथापीति एकाधिकरणपत्तेसूत्राणिकथंतयानीत्यत आह सूत्राणीति स्वपत्तेसूत्रसामंजस्यंचेत्याह अवश्यापेक्षितिगमकत्वेनतरत्सूत्राणएवैकवाक्यत्वात्रापिकरणाभेदइतिभावः आकारश्रुतीनांकल्पितोकारगतिरितिस्वमतमुक्त्वा प्रपंचविलयवादिनेत्तमनोमयः प्राणशरीरः सत्यकाम इत्याद्याकारश्रुतीनांतदितराका

सवचनात् ॥

अतत्त्वादद्वोषइतिचेत् नएकस्यानेकस्वभावत्वानुपपत्तेः अथसतेवबोधोबोधएवचसत्ता नानयोः परस्परव्यावृत्तिरस्तीतियद्युच्यते तथापिकिंसल्लक्षणंब्रह्मउतबोधलक्षणमुतोभयलक्षणमिति अयंविकल्पोनिरालंबनएवस्यात् सूत्राणित्वेकाधिकरणत्वेनैवास्माभिर्नीतानीतिअपिचब्रह्मविषयासुश्रुतिष्वाकारवदनाकारप्रतिपादनेनविप्रतिपन्नासुनाकारंब्रह्मणि परिगृहीते अवशिष्टंवश्यत्वेतरासांश्रुतीनांगतिःनादर्शयेन प्रकाशवच्चेत्यादीनिसूत्राण्येवंनराणीतिमपयंते यदप्याहुः आकारवादिन्योऽपिश्रुतयःप्रपंचविलयमुखेननानाकारप्रतिपत्यर्थाएवनस्वरूपपर्याइतितदपिनसमीचीनमिवलक्ष्यतेकथं येहिपरविद्याधिकारेकेचित्प्रपंचाउच्यंते यथायुक्ताह्यस्यहरयःशतादशेति अयंवैहरयोयंवैदशचसहस्राणिबहूनिचानंतानिचेत्येवमादयः तेप्रविलयार्थाः तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमित्युपसंहारात् येपुनरुपासनाविकारेकेचित्प्रपंचाउच्यंते यथामनोमयःप्राणशरीरोभारूपइत्येवमादयोनतेषांप्रविलयार्थत्वंन्याय्यंसंनिकृष्टंचगुणैःपासनविधिनातेषांसंबंधात् आत्याचैवजातीयकानांगुणानामुपासनार्थत्वेवकल्प्ये

ह वि ठ ह ष्ठ ठ ह ह ठ ठ ह ह ठ

ह प्रविलयोगतिरित्याहुः मनोमयइतिकोर्थः मनोतिरिक्तोपाधिम्यन्यइत्यर्थः एवंप्राणशरीरपदेनप्राणातिरिक्तोपाधिनिषेधात्मनसोऽप्यभावसिद्धिः एवंसर्वशब्दाअनाकारब्रह्मपराएवेतितन्मतमनूद्यदूषयति यदपीत्यादिना किंत्वेयब्रह्मप्रकरणस्यानामाकारशब्दानांनिषेधपरत्वंउतापासनाप्रकरणस्थानामपि तत्राद्यमंगीकरोति येहीति अस्यजीवेभावेप्रामप्युपरसदृशाहरयोविषयाहरणादृशेंद्रियाणिप्राणिभेदापेक्षयाशतानिसहस्राणिचतेषामीश्वरइदमशंकाह अयमितिईश्वरएवहरयइत्यर्थः द्वितीयंदूषयति येपुनरिति मनोमयादिशब्दानामुक्तमात्राणपरत्वसंभवेनिषेधलक्षणापिनयुक्तेत्याह अत्याचेति ॥

स

प्रवेशश्रुतेश्चोक्तानुमानबाधमित्याह तत्प्रकारः दर्शनाच्चेति द्विपदः परो मनुष्यादिदेहांश्चक्रे चतुष्पदः पुरः पक्षी भूत्वा पुरः पुरुषत्वाय
भिव्यक्तेः पुरःशब्दार्थः स्वरः पक्षी लिंगशरीरी भूत्वा पुरः उक्तानि शरीराणि आविशत् तच प्रविश्यापि पुरुषः शरीर एवेत्यर्थः तैत्तिरीयके लिंगस्य
पक्षित्वोक्तेः पक्षित्वं मंतव्यं एवं प्रतिबिंबभावभेदादेः कल्पितत्वात् त्रिविधो भेदो ब्रह्मण्यसिद्ध इति समस्तमुपसंहरति तस्मादिति एकदेशव्याख्यानम्
स्थापयति अत्रेति तस्यान्ततोपीत्याद्यक्तमधिकरणे तत्र ब्रह्मणो निष्प्रपंचत्वे स्थिते किंलक्षणं ब्रह्मेति संदेहे प्रकाशवच्चेत्यादि द्वितीय
मधिकरणं प्रवृत्तेन तद्रूपमेव ब्रह्म किंतु प्रकाशवच्चिद्रूपं च कुतः अवैयर्थ्यात् सत्यं ज्ञानं सदेव सोम्येदमभयमजरं हि रूपं
ब्रह्मणोर्यवत्त्वादिति पूर्वपक्षे सिद्धांतः आह च तन्मात्रं ब्रह्मेत्याह स्मृतिरात्मज्ञानस्य सत्तानतिरेकादिति इदं द्वितीयाधिकरणं द्वय

विपरीतलिंगश्च

दर्शनाच्च ॥२॥ दर्शयति च श्रुतिः परस्यैव ब्रह्मणो देहादिसोपाधिकत्वं नरत्वप्रवेशं पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः
स पक्षी भूत्वा पुरः पुरुष आविशत् अनेन जीवेनात्मनानुप्रविश्येति च तस्माद्युक्तमेतदुपमा च सूर्यकादिवदिति त
स्मात् त्रिविकल्पे केवलनिर्गुणमेव ब्रह्म नोभयलिंगं चेति सिद्धं अत्र केचिदधिकरणे कल्पयंति प्रथमं तावत् किं प्रत्यस्त
मितसमस्तप्रपंचमेकाकारं ब्रह्म उत समस्तप्रपंचवदनेकाकारोपेतमिति द्वितीये तु स्थिते प्रत्यस्तमितप्रपंचत्वे किं सल्लक्षणं
ब्रह्म उत बोधलक्षणं उतोभयलक्षणमिति अत्र वयं वदामः सर्वथाप्यानर्थक्यमधिकरणांतरारंभस्येति यदि तावद
नेकलिंगत्वं परस्य ब्रह्मणो निराकर्तव्यमित्ययं प्रयासः तत्पूर्वेणैव न स्थानतोपीत्यनेनाधिकरणेन निराकृत इत्युत्तरमधि
करणं प्रकाशवच्चेत्यपार्थकमेव भवेत् न च सल्लक्षणमेव ब्रह्म न बोधलक्षणमिति शक्यं वक्तुं विज्ञानघन एवेत्यादिश्रुतिवै
यर्थ्यप्रसंगात् कथं वा निरस्तचैतन्यं ब्रह्म चेतनस्य जीवस्यात्मत्वेनोपदिश्येत नापि बोधलक्षणमेव ब्रह्म न सल्लक्ष
णमिति शक्यं वक्तुं अस्तीत्येवोपलब्धव्य इत्यादिश्रुतिवैयर्थ्यप्रसंगात् कथं वा निरस्तसत्ताको बोधोऽभ्युपगम्येत नाप्युभ
[illegible]लक्षणमेव ब्रह्मेति शक्यं वक्तुं पूर्वाभ्युपगमविरोधप्रसंगात् सत्ताव्यावृत्तेन च बोधेन बोधव्यावृत्तया च सत्तयोपेतं ब्र
ह्म प्रतिजानानस्य तदेव पूर्वाधिकरणप्रतिषिद्धं सप्रपंचत्वं ब्रह्मणः प्रसज्येत ॥ ॥ ॥

ति अत्र वयमिति द्वितीयाधिकरणस्य किं ब्रह्मणोऽनेकरूपत्वनिरासः फलमुत बोधनिरासः आहोस्वित् सत्तानिरास इति विकल्प्य
सर्वथाप्यानर्थक्यं प्रपंचयत्याद्यमनार्थतामाह यदि तावदिति न द्वितीय इत्याह न चेति ब्रह्मणो बोधरूपत्वनिरासे जडत्वाज्जीवा
भेदश्रुतिबाधः स्यादित्याह कथं वेति न तृतीय इत्याह नापीति सत्तानिरासे बोधस्यासत्त्वं च स्यादित्याह कथं वेति न च बो
धस्य सत्तानतिरेकान्न तद्बाध इति वाच्यं सद्बोधपदयोर्व्यावृत्त्यानतिरेके पर्यायत्वप्रसंगात् एवं सिद्धांते फलाभावेन दूषयित्वा पूर्व
पक्षेऽपि दूषयति नापीति प्रसंगमेवाह सत्तेति व्यावृत्तत्वं भिन्नत्वं च निष्प्रपंचैकरूपत्वसिद्धांतविरोधाद्विनोभयरूपत्वपूर्वपक्षानु

शा०त०
तृ०द्वि०
२८

किंच यथा जलाद्युपाधिकल्पितः सूर्यचंद्रादेर्भेदचलनादिधर्म एवमात्मन इति दृष्टांतमाह अत एव चोपमेति जलस्य प्रतिबिंबितत्वाकार्येण सूर्यस्याभासत्वद्योतनाय सूर्यकेति कप्रत्ययः यथा यं ज्योतिर्मयो विवस्वान् स्वतएकोपि घटभेदेन भिन्नाः अपो नुगच्छन् बहुधा क्रियते एवमजोयमात्मा देवः स्वप्रकाश एकोप्युपाधिना मायया क्षेत्रेषु नुगच्छन् भेदरूपः क्रियत इति योजना ब्रह्मण्युक्तदृष्टांतवैषम्यं शंकते अंबुवदिति आत्मनो नीरूपत्वात् दूरस्थोपाध्यभावाच्च मायया बुद्ध्यादिषु प्रतिबिंबभेदो न युक्त इ

अत एव चोपमा सूर्यकादिवत् १८ यत एव चायमात्मा चैतन्यरूपो निर्विशेषो वाङ्मनसातीतः परप्रतिषेधोपदेश्यो तए व चास्योपाधिनिमित्तामपारमार्थिकीं विशेषवत्तामभिप्रेत्य जलसूर्यकादिवदित्युपमोपादीयते मोक्षशास्त्रेषु यथा॥ त्वयं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैको नुगच्छन्नुपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मेति एक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवदित्येवमादिषु अत्र प्रत्यवस्थीयते अंबुवदग्रहणा त्तु न तथात्वं १९ न जलसूर्यकादितुल्यत्वमिहोपपद्यते तद्वद्ग्रहणात् सूर्यादिभ्यो हि मूर्तेभ्यः पृथग्भूतं विप्रकृष्टदे शं मूर्तं जलं गृह्यते तत्र युक्तः सूर्यादिप्रतिबिंबोदयः न त्वात्मा मूर्तो न चास्मात्पृथग्भूता विप्रकृष्टदेशाश्चोपाध यः सर्वगतत्वा[illegible]त्वात्सर्वानन्यत्वाच्च तस्मादयुक्तोयं दृष्टांत इत्यत्र प्रतिविधीयते वृद्धिह्रासभाक्त्वमंतर्भावा दुभयसामंजस्यादेवं २० युक्त एव त्वयं दृष्टांतः विवक्षितांशसंभवात् न हि दृष्टांतदार्ष्टांतिकयोः क्वचित्कंचिद्विवक्षितां शं मुक्त्वा सर्वसारूप्यं केनचिद्दर्शयितुं शक्यते सर्वसारूप्ये हि दृष्टांतिकभावोच्छेद एव स्यात् न चेदं स्वमनीषया जल सूर्यकादिदृष्टांतप्रणयनं शास्त्रप्रणीतस्य प्रयोजनमात्रमुपन्यस्यते किं पुनरत्र विवक्षितं सारूप्यमिति तदुच्यते वृद्धि ह्रासभाक्त्वमिति जलगतं हि सूर्यप्रतिबिंबं जलवृद्धौ वर्द्धते जलह्रासे ह्रसति जलचलने चलति जलभेदे भिद्यत इत्येवं जलधर्मानु यायि भवति न तु परमार्थतः सूर्यस्य तत्त्वमस्ति एवं परमार्थतो विकृतमेकरूपमपि सद्ब्रह्म देहाद्युपाध्यंतर्भावाद्भजत इवोपा धिधर्मान्वृद्धिह्रासादीनेवमुभयोर्दृष्टांतदार्ष्टांतिकयोः सामंजस्यादविरोधः॥ नेचलतिजलं२५॥

७१

तदर्थः उपाध्यंतर्भावेन तत्कल्पितधर्मवत्त्वमात्रविवक्षितं तांशास्तेन सामान्येन समाधानसूत्रं वृद्धिह्रासेति दृष्टांतसाम्येपि नीरूपात्मनः प्र तिबिंबः स्वबुद्ध्या कल्पयितुं न कल्पत इत्यत आह नचेदमिति अयं तेन कल्पत इत्यर्थः अत दृष्टांतस्य सूर्यकादिवदित्युपन्यासेन किं फलमि त्यत आह शास्त्रेति आत्मनो निर्विशेषत्वं फलमित्यर्थः अविरोध इति नैवषम्यमित्यर्थः आत्मा प्रतिबिंबस्थान्यः नीरूपद्रव्यत्वा त वायुवदित्यनुमाने आकाशे व्यभिचारः अल्पजले विहाय आकाशप्रतिबिंबदर्शनादुपाधिदूरस्थत्वमपि क्वचिदनपेक्षितमिति

॥ श्रीः ॥

शा०
२८

कल्पितं हि तेषामवकाशत्वाद्युपप्रपंचवत् अत्रयो दुर्बलत्वादित्याह प्रकाशवच्चेति नन्वाकारवाक्यानामपि परिकल्पितं सर्वगंधत्वादिना कथं तत्त्वं किमिति वर्णपितेवे
त्यर्थमेवोच्यतां तत्राह नहि वेदवाक्यानामिति नन्वेवमपीति उक्तरीत्योभयरूपत्वाङ्गीकारेण श्रुतीनां व्यवस्थितत्वेपीत्यर्थः उपाधीनां कल्पितत्वादौ।
पाधिकस्य सत्यत्वानुपपत्तेर्न सत्यमुभयरूपत्वमिति पूर्वमुक्तं स प्रतिसत्यं निर्विशेषत्वं मिथ्या सविशेषत्वमिति स्यादित्युभयरूपत्वाङ्गीकारेपि न प
वापरविरोध इत्याह नेति ब्रूमः हि तस्य मिथ्यात्वे ज्ञाने न वाधितुं प्रशस्तं नापि उभयव्यवहारो न स्यादित्याशंक्य बाधात्यागे वस्त्वित्याह सत्यामिति यतः श्रु
तिश्चिन्मात्रमाह अत एवाविशेषामिच्यते सूत्रार्थमाह आह चेति सैंधवघनो लवणपिंडः किंच श्रुतिस्मृत्योः परप्रतिषेधेन ब्रह्मोपदेशान्नि।

प्रकाशवच्चावैयर्थ्यम् ।१५ यथा प्रकाशः सौरश्चान्द्रमसो वा वियद्व्याप्यावतिष्ठमानोऽङ्गुल्याद्युपाधिसंबंधात् ऋज्वक्रादिभावमापद्य।
मानेषु तद्भावमिव प्रतिपद्यते एवं ब्रह्मापि पृथिव्याद्युपाधिसंबंधात् तदाकारतामिव प्रतिपद्यते तदालंबनो ब्रह्मण आकारविशेषोपदे
श उपासनार्थो न विरुध्यते एवमवैयर्थ्यं साकारब्रह्मविषयाणामपि वाक्यानां भविष्यति नहि वेदवाक्यानां कस्यचिदर्थवत्त्वं कस्यचिद
नर्थकत्वमिति युक्तं प्रतिपत्तुं प्रमाणत्वाविशेषात् नन्वेवमपि यत्पुरस्तात्प्रतिज्ञातं नोपाधियोगादप्युभयलिंगत्वं ब्रह्मणोस्तीति तद्वि
रुध्यते नेति ब्रूमः उपाधिनिमित्तस्य वस्तुधर्मत्वानुपपत्तेः उपाधीनां चाविद्याप्रत्युपस्थापितत्वात् सत्यामेव च नैसर्गिक्यामविद्यायां
लोकवेदव्यवहारावतार इति तत्र तत्रावोचाम आह च तन्मात्रं ।१६ आह च श्रुतिश्चैतन्यमात्रं विलक्षणरूपान्तररहितं निर्विशेषं ब्र
ह्म स यथा सैंधवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेति एतदुक्तं भवति
नास्यात्मनोऽन्तर्बहिर्वा चैतन्यादन्यद्रूपमस्ति चैतन्यमेव तु निरंतरमस्य स्वरूपं यथा सैंधवघनस्यान्तर्बहिश्च लवणरस एव निरंतरो भवति
न रसान्तरं न येवं वेति दर्शयति चाथो अपि स्मर्यते ।१७ दर्शयति च श्रुतिः परप्रतिषेधेनैव ब्रह्म निर्विशेषत्वं अथात आदेशो नेति नेति नेति
वत् नह्येतस्मादिति नेत्यन्यत्परमस्ति यतो वाचो निवर्तन्ते अप्राप्य मनसा सह इत्येवमाद्या बाष्कलिना बाध्वः पृष्टः सन्नवचनेनैव ब्रह्म प्रोवाच।
चेति श्रूयते स होवाचाधीहि भो इति स तूष्णीं बभूव तं ह द्वितीये वा तृतीये वा वचन उवाच ब्रूमः खलु त्वं तु न विजानासि उपशान्तोऽय
मात्मेति तथा स्मृतिष्वपि परप्रतिषेधेनैवोपदिश्यते ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते अनादिमत्परं ब्रह्म न सत्तन्नासदु
च्यते इत्येवमाद्यासु तथा विश्वरूपधरो नारायणो नारदमुवाचेति स्मर्यते माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद सर्वभूतगु

नेति ५४

तो ३४

प्रपंचं ब्रह्मेत्याह दर्शयति चेति अथ हेतोऽन्यन्नं तरं ज्ञानहेतुत्वान्नेति नेत्युपदेशः क्रियते इत्यर्थः अपि अन्यत्वनः पुनरधीहि भो इति नि
र्बंधकारिणं तं द्वितीये तृतीये च प्रश्ने तूष्णीभावेन प्रोवाच उपशान्तोऽयमात्मा निरस्तद्वैतः अतः तूष्णीभाव एवोत्तरमिति सोऽर्थः अपा
शब्दस्पार्थकः आदिमत्कार्यं न तन्न भवतीत्यनादिमत् इन्द्रियवेद्य असत्परोक्षं च न स्वप्रकाशत्वादित्यर्थः सर्वभूतगुणैर्दि
व्यगंधादिभिर्युक्तं मां नार्हसि मंतुं पश्यसीति यन्मां मायाकृतं एवं सद्धेतो भगवानिति माद्रुणेनाहेति वस्तुनो द्वैतातीतत्वादित्यर्थः

पूर्वोक्तविरोधं स्मारयति नन्विति भेदश्रुतिप्रामाण्यपर्यायमौपाधिकरूपभेदस्वीकारादविरोध इति समाधत्ते किमुपाधिगत एव रूपभे
दो ब्रह्मणोपचर्यते ध्यानार्थमुतोपाध्यानार्थमुतोपाधियोगात्तत्तद्विरुद्धरूपवत्तया ब्रह्मणो भेदो भवतीति आद्ये स्वादिष्टसिद्धिः
द्वितीयमभेदश्रुत्या दूषयति नेति स्रमः इति वेत्तन्निरूपयन् क्रमं दृष्टान्तोक्तः स्वनिर्विशेषांशं तत्त्वमिति सूत्रार्थमाह अपि चेति भोक्ता
जीवो भोज्यं शब्दादि तयोः प्रेरितारमीश्वरं च मत्वा विचार्यमेतत्प्रोक्तं सर्वं त्रिविधं ब्रह्मैवेति जानीयादित्यर्थः द्विविधश्च।

ननु नोभयलिंगत्वं ब्रह्मणः संभवतीति अयमपि विरोध उपाधिकृतत्वादाकारभेदस्य अन्यथा हि निर्विषयमेव भेद
शास्त्रं प्रसज्येतेति चेत् नेति प्रत्येकमतद्वचनात् प्रत्युपाधिभेदमभेदमेव ब्रह्मणः श्रावयति शास्त्रं यश्चाय
यमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषो यमेव स योऽयमात्मा
इत्यादि अतश्च न भिन्नाकारयोगो ब्रह्मणः शास्त्रीय इति शास्त्रेणैव अपि चैवमेके १२ अपि चैवं भेददर्शननिन्दा एवक
मभेददर्शनमेवैके शाखिनः समामनन्ति मनसैवेदमाप्तव्यं नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोति य इह नानेव प
श्यति तथान्येऽपि भोक्ता भोज्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदिति समस्तस्य भोज्यभोक्तृनियन्तृलक्षणस्य
प्रपंचस्य ब्रह्मैकस्वभावतामधीयते कथं पुनराकारवदुपदेशिनीषु अनाकारोपदेशिनीषु च ब्रह्मविषयासु श्रुतिषु सतीषु
अनाकारमेव ब्रह्मावधार्यते न पुनर्विपरीतमित्यत उत्तरं पठति अरूपवदेव हि तत्प्रधानत्वात् रूपाद्याकाररहितमेव ब्र
ह्मावधारयितव्यं न रूपादिमत् कस्मात् तत्प्रधानत्वात् अस्थूलमनण्वह्रस्वमदीर्घम् अशब्दमस्पर्शमरूपमव्ययम् आ
काशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः तदेतद्ब्रह्मापूर्वम
नपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः इत्येवमादीनि वाक्यानि निष्प्रपंचब्रह्मात्मतत्त्वप्रधानानि नार्थान्तरप्रधा
नानीत्येतत् प्रतिष्ठापितं तत्तु समन्वयादित्यत्र तस्मादेवंजातीयकेषु वाक्येषु यथाश्रुतं निराकारमेव ब्रह्मावधारयितव्यं
इतराणि त्वाकारवद्ब्रह्मविषयाणि वाक्यानि न तत्प्रधानानि उपासनाविधिप्रधानानि तानि तेष्वसति विरोधे यथाश्रुतमाश्रयितव्यं सति
तु विरोधे तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि भवन्ति एष विनिगमनायां हेतुः येनोभयीष्वपि श्रुतिषु सतीषु
अनाकारमेव ब्रह्मावधार्यते न पुनर्विपरीतमिति कान्ताकारवद्विषयाणां श्रुतीनां गतिरित्यत आह ॥

तेषु निर्विशेषत्वे किं नियामकमिति शंकते कथं पुनरिति तत्प्रधानत्वस्य विरोधे तत्परत्वं बलवदिति न्यायो नियामक इत्याह
अरूपवदेवेति उपासनापरवाक्येषु आकारेतानर्थाभावेऽपि देवताविग्रहवदाकारसिद्धिमाशंक्य निष्प्रपंचपरश्रुतिविरोधान्नैवमि

उपासनविधिप्रधानानि २ सू ५

अप्रसिद्धिं संगीकृत्योक्तं प्रसिद्धिरप्यस्तीत्याह प्रसिद्धा चेति आयुर्वेदादौ वेदशास्त्रे प्रसिद्धौ कथं विवाद इत्याशंक्य पंचमत्वेनाप्रसिद्धेरित्याह अर्द्धेति
सत्यपि स्वर्गतिथमाहुः संपत्या तत्तदभावं बुद्धिर्लोकानामित्यर्थः सर्वाभिरवस्थाभिरफलमस्त्वमर्थ इति विचार्य पादसमाप्तेस्तत्पदार्थं निरू
पयितुकामः प्रथमं तस्य निर्विशेषत्वमाह न स्थानतोऽपीति उद्देशात्त्वंपदार्थजिज्ञासापरमानंतरं तत्स्वरूपब्रह्मविचारस्यावसरं संग
तिमाह पूर्वेनेति सविशेषत्वनिर्विशेषत्वे चेदुभयलिंगश्रुतेर्ज्ञाप्यते याभिस्ता उभयलिंगाः श्रुतयः संशयबीजत्वेनेत्यर्थः यथावि
रुद्धस्वभावमिन्नरणीभयरूपत्वमसंभवं तथापि श्रुतिप्रामाण्यादुभयरूपं ब्रह्मेत्यर्थमिति दृष्टांतेन पूर्वपक्षः निर्विशेषमेकरूपमेवज्ञे

प्रसिद्धा चेषा लोकायुर्वेदयोः अर्थसंपत्यभ्युपगमाच्च न पंचमीगण्यत इत्यनवद्यं न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि ॥
येन ब्रह्मणा सुषुप्त्यादिषु जीव उपाध्युपशमात्संपद्यते तस्येदानीं स्वरूपं श्रुतिवशेन निर्धार्यते सन्त्युभयलिंगाः श्रुतयः ब्र
ह्मविषयाः सर्वकर्मा सर्वकामः सर्वगंधः सर्वरस इत्येवमाद्याः सविशेषलिंगाः अस्थूलमनण्वह्रस्वमदीर्घमित्येवमा
द्याश्च निर्विशेषलिंगाः किमासु श्रुतिषूभयलिंगं ब्रह्म प्रतिपत्तव्यमुतान्यतरलिंगं यदाप्यन्यतरलिंगं तदापि सविशेषमुतानि
र्विशेषमिति मीमांस्यते तत्रोभयलिंगश्रुत्यनुग्रहात् उभयलिंगमेव ब्रह्मेति एवं प्राप्ते ब्रूमः न तावत्स्वत एव परस्य ब्रह्म
ण उभयलिंगत्वमुपपद्यते न ह्येकं वस्तु स्वत एव रूपादिविशेषोपेतं तद्विपरीतं चेत्यभ्युपगंतुं शक्यं विरोधात् अस्तु तर्हि
स्थानतः पृथिव्याद्युपाधियोगादिति [margin: तदपि नोपपद्यते २४] न ह्युपाधियोगादप्यन्यादृशस्य वस्तुनोऽन्यादृशः स्वभावः संभवति न हि स्वच्छः सन्स्फ
टिको लक्तकाद्युपाधियोगादस्वच्छो भवति भ्रममात्रत्वादस्वच्छताभिनिवेशस्य उपाधीनां चाविद्याप्रत्युपस्थापितत्वात् अतश्चा
न्यतरलिंगपरिग्रहेऽपि समस्तविशेषरहितं निर्विकल्पकमेव ब्रह्म प्रतिपत्तव्यं न तद्विपरीतं सर्वत्र हि ब्रह्मप्रतिपादनपरेषु वा
क्येषु अशब्दमस्पर्शमरूपमव्ययमित्येवमादिष्वपास्तसमस्तविशेषमेव ब्रह्मोपदिश्यते न भेदादिति चेन्न प्रत्येकमतद्वच २४
नात् १२ अथापि स्यात् यदुक्तं निर्विकल्पकमेकलिंगमेव ब्रह्म नास्य स्वतः स्थानतो वोभयलिंगत्वमस्तीति तन्नोपपद्यते कु
स्मात् भेदात् भिन्ना हि प्रतिविद्यं ब्रह्मण आकारा उपदिश्यंते चतुष्पाद्ब्रह्म षोडशकलं ब्रह्म वामनीत्वादिलक्षणं ब्रह्म त्रै
लोक्यशरीरं वैश्वानरशब्दोदितं ब्रह्मेत्येवंजातीयकाः तस्मात्सविशेषत्वमपि ब्रह्मणोऽभ्युपगंतव्य ॥

यमिति सिद्धांतयति एवं प्राप्त इति किमुभयरूपत्वं स्वत उत स्थानतो निर्गुणस्य सर्वगंधत्वादिविशेषः उपाधितः स्वतो वा स्वतः सवि
शेषमेव ब्रह्मेति तत्राद्यं निरस्य द्वितीयमनूद्य दूषयति अस्तु तर्हीति स्यान्नन्पाधिर्ब्रह्मणि विशेषः कल्पितः औपाधिकत्वात्स्फटिकलौ
हित्यवदित्यर्थः उपाधेः सत्यत्वेऽपि तत्कृतं मिथ्येति दृष्टं ब्रह्मणि तूपाधीनां मिथ्यात्वात् तत्कृतो विशेषो मिथ्येति किमु वाच्यमित्याह उ
पाधीनामिति तृतीयं निरस्यति अतश्चेति सर्वस्य विशेषस्य कल्पितत्वादेवेत्यर्थः निषेधश्रुतेश्चैवमित्याह सर्वत्र हीति भिन्नश्रुतिभे

पातं॰ टी॰ द्वि॰ २६

मूर्छाया जागरादेर्दृष्टत्वात्स्वप्नस्मृतिभ्यां भेदमाह नापीत्यादिना आलभंते स्पृशंति दिष्टं मरणं सुषुप्तिमूर्छयोः किंचित्सा[illegible]ह पाणि-
वद्भवेल्लक्षण्यादेर्दृष्टांतमाह नेति लक्षणभेदमुक्त्वा निमित्तभेदमाह निमित्तेति प्रसिद्धिभेदज्ञापकसिद्ध्याह न चेति उक्तसाम्यवैल-
क्षण्याभ्यामर्धसंपत्तिः सर्वैः सुषुप्तिधर्मैः संपन्नो मुग्धः सुषुप्तो न भवति सर्वैर्मरणसंपत्तेः मृतोपि न किंत्ववस्थांतरं गत इति सूत्रा-
र्थः अत्र सूत्रे जीवस्य ब्रह्मणार्धसंपत्तिरुक्तेति भ्रांतः शंकते कथमिति यत्सुषुप्तस्य संपन्नत्वमुक्तं न तूपाध्यभावाभि-

नापि स्वप्नान्पश्यति निःसंज्ञत्वात् नापि मृतः प्राणोष्मणोर्भावात् मुग्धे हि जंतौ मृतोयं स्यान्न वा मृत इति संशयाना ऊष्मास्ति
नास्तीति हृदयदेशमालभंते निश्चयार्थं प्राणोस्ति नास्तीति च नासिकादेशं यदि प्राणोष्मणोरस्तित्वं नावगच्छंति ततो मृतो-
यमित्यध्यवसाय दहनायारण्यं नयंति अथ तु प्राणमूष्माणं वा प्रतिपद्यंते ततो नायं मृत इत्यध्यवसाय संज्ञालाभाय भिषज्यं-
ति पुनः समुत्थानाच्च न दिष्टं गतः न हि यमराष्ट्रात्प्रत्यागच्छति अस्तु तर्हि सुषुप्तो निःसंज्ञत्वात् अमृतत्वाच्च नेति वैलक्षण्यात्
मुग्धः कदाचिच्चिरमपि नोच्छ्वसिति सवेपथुरस्य शरीरं भवति भयानकं च वदनं विस्फारिते नेत्रे सुषुप्तस्तु प्रसन्नवदनस्तु-
ल्यकालं पुनः पुनरुच्छ्वसिति निमीलिते अस्य नेत्रे भवतः न चास्य देहो वेपते पाणिपेषणमात्रेण च सुषुप्तमुत्थापयंति न
तु मुग्धं मुद्गरघातेनापि निमित्तभेदश्च भवति मोहस्वापयोः मुसलसंपातादिनिमित्तत्वान्मोहस्य श्रमनिमित्तत्वाच्च
स्वापस्य न च लोकेस्ति प्रसिद्धिः मुग्धः सुप्त इति परिशेषादर्धसंपत्तिर्मुग्धतेत्यवगच्छामः निःसंज्ञकत्वात्संपन्नः इतरस्मा-
द्वैलक्षण्यादसंपन्न इति कथं पुनरर्धसंपत्तिर्मुग्धतेति शक्यं वक्तुं यावता सुषुप्तं प्रति तावदुक्तं श्रुत्या सता सोम्य तदा संप-
न्नो भवति अत्र स्तेनोऽस्तेनो भवति नैनं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतमित्यादि जीवे हि सुकृतदुष्कृतयोः प्राप्तिः प्रत्यया-
त्पादनेन भवति न च सुखप्रत्ययो दुःखप्रत्ययो वा सुषुप्ते विद्यते मुग्धेपि तौ प्रत्ययौ नैव विद्येते तस्मादुपाध्युपशमात्सुषुप्तवन्मुग्धे-
पि कृत्स्नसंपत्तिरेव भवितुमर्हति नार्धसंपत्तिरिति अत्रोच्यते न ब्रूमो मुग्धेऽर्धसंपत्तिर्जीवस्य ब्रह्मणा भवतीति किं तर्ह्यर्धेन सुषुप्त-
पक्षस्य भवति मुग्धत्वमर्धेनावस्थांतरपक्षस्येति ब्रूमः दर्शिते च मोहस्य स्वापेन साम्यवैषम्ये द्वारं चैतन्मरणस्य यदास्य सावशेषं कर्म भवति तदा
वाङ्मनसे प्रत्यागच्छतः यदा तु निरवशेषं कर्म भवति तदा प्राणोष्माणावपगच्छतः तस्मादर्धसंपत्तिं ब्रह्मविद इच्छंति यत्तूक्तं न पंचमी काचि-

प्रायं उपाध्यभावस्य मुग्धस्यापि सममिति यतः तस्मात्कृत्स्नसंपत्तिरेवेत्यर्थः सुषुप्तकाले कर्मास्तित्वे पुनरुत्थानं कथमित्याशंक्य तत्का-
र्याभावात्तदसत्त्ववद्योक्तिरित्याह जीवे हीति ब्रह्मणा कृत्स्नसंपत्तिमंगीकृत्य परिहरति न ब्रूम इति मुग्धत्वे हि सुषुप्तस्यार्धेन
निःसंज्ञत्वादिधर्माणां साम्येन संपन्नो भवति मरणस्यार्धेन कंपादिना संपन्नमित्यर्धसंपत्तिरित्यर्थः इतोपि सुषुप्तवैषम्यमित्याह

मुग्धेऽर्धसंपत्तिः परिशेषात् ॥

स्तेनो ५४
२७

प्राप्तिः सुखित्वदुः ५४

यदास्य २५

राम
२६

सर्वपक्षं तं दृष्टांतं तु वैषम्येण दूषयति यत्तु नित्यादिना असदाद्यशक्यमपि विवेचनं प्राणप्रत्यपेक्षत्वे ईश्वरः करोतीति मन्वान दृष्टांतमाह दृ
श्यते चेति ब्रह्माभेदाच्च जीवस्य जलविंदुवैषम्यमित्याह अपि चेति अभेदे सत्यपि वात्सायनीति एतीति चिंतावनकाशहत्याशंक्य बुद्धिभेदेन जी
वभेदाद्वितीयमाह एवं तर्हीति तच्च नैव बुद्धिनाशेन प्रत्यं हृतबुद्ध्युपाधिभेदादेकजीवव्यवहारेण स्यादित्यत आह तथापीमिति स्थूलसूक्ष्मा
त्मना तिष्ठत्येकोपाधिरित्यर्थः अवस्थात्रयादात्मानं विविचयति मग्धेरिति सुषुप्तिहावस्थानेगतावाप्य चम्पावस्थावेति अवस्था
यस्तु नस्कंधे यथा जलराशौ प्रक्षिप्तो जलविंदुर्नोद्धर्तुं शक्यस्तथैवं सति संपन्नो जीवो नेऽस्मिंन्नर्हतीति तत्परिहृत्य यत्र तु कर्मविवेक
कारणभावाज्जलविंदुरेव तु हरणमिह तु विद्यते विवेककारणं कर्म च विद्या चेति वैषम्यं दृश्यते चेद्विवेचयोरपि असञ्ज्ञा
तीयः क्षीरोदकयोः संसृष्टयोर्हंसेन विवेचनं अपि चनजीवानामसंकल्पितस्मादन्यो विद्यते यो जलविंदुरिव जलराशेः स
त्ताविविच्यत सदैव तत्पाधिसंपर्काज्जीव इत्युपचर्यते इत्यसकृत्प्रपंचितं एवं सति यावद्देकोपाधिगतावंधानुवृत्तिस्तावदे
कजीवव्यवहारः उपाध्यंतरगतायां तु वंधानुवृत्तौ जीवांतरव्यवहारः स एवायमपाधिः स्वापप्रबोधयोर्बीजांकुरन्यायेने
त्यतः स एव जीवः प्रतिबुध्यत इति युक्तं मग्धेर्धतपातः परिशेषात् १० अस्ति मुग्धो नाम यम्मूर्छित इति लौकिकाः क
थयंति स तु किमवस्थ इति परीक्षायामुच्यते तिस्रस्तावदवस्थाः शरीरस्थस्य जीवस्य प्रसिद्धा जागरितं स्वप्नः सुषुप्तमिति च
तृतीयं शरीरादपसर्पणं न तु पंचमी काचिदवस्था जीवस्य श्रुतौ स्मृतौ वा प्रसिद्धास्ति तस्माच्चतसृणामेवावस्थानामन्यतमावस्था
मूर्छेत्येवं प्राप्ते ब्रूमः न तावन्मुग्धो जागरितावस्थो भवितुमर्हति न ह्ययमिन्द्रियैर्विषयानीक्षते स्यादेतत् इषुकारन्यायेन मू
र्च्छो भविष्यति यथेषुकारो जाग्रदपीषावासक्तमनस्तया नान्यान्विषयानीक्षते एवं मुग्धो मुसलसंपातादिजनितदुःखानुभ
वव्यग्रमनस्तया जाग्रदपि नान्यान्विषयानीक्षत इति अचेतयमानत्वात् इषुकारो हि व्याप्रतमना ब्रवीतीषुमेवाहमेतावंतं
कालमुपलभमानोऽभूवमिति मुग्धस्तु लब्धसंज्ञो ब्रवीत्यंधे तमसि प्रक्षिप्तोऽहमेतावंतं कालं नाभवं न किंचिन्मया चेतितं
मिति जाग्रतश्चैकविषयविवृतचेतसो देहो प्रियते मुग्धस्य देहो धरण्यां पतति तस्मान्न जागर्ति ॥
वहष्टय प्रसिद्धे मुग्धस्य न देहे लक्षणान्वैराग्येसोऽहमिति प्रत्यभियोग्यितसस्य नाभेदवहिद्वेषतानाभावो विशेषेणलिंगेनस्व
तिरेव मूर्छेति प्रत्यभिज्ञानात्तस्य अतर्गतानमूर्छेति दृष्टांतसंगत्या पूर्वपक्षमाह तिस्रस्तावदिति पूर्वपक्षे प्रसिद्धावस्थानःपृथ
गात्मनो मूर्छितो वि वेकार्थत्वात् सिद्धिः फलं सिद्धांते पृथक् पक्षत्रैध्यमिति भेदः पारिशेष्यं दर्शयन्सिद्धांतदूति न तावदित्यादिना
जाग्रदपि जागरावस्थापि न्यर्थः पेटेयकमर्थज्ञानदेहधारणं च तस्यास्तीति मुग्धस्येति वैषम्येण दूषयति नेत्यादिना ॥

रा.त.
त्र.टि.
१५

एवं यदि ज्ञानं चेद्व्यर्थं स्यात् सुषुप्तौ वा पुनरावृत्तिरूपमुक्तिसिद्धेः सिद्धांते तु ज्ञानब्रह्मानास्थितं तस्माज्ज्ञानबलेन पुनस्तस्यैवोत्थानाव द्रष्टं भावाद॥
ज्ञानेनापाययज्ज्ञानोपचेति फलमीश्वरो वेत्यन्नियमदर्शायो न समवान्यो वेत्येव एवं यत्त्वाज्ज्ञानं विना ब्रह्माप्रपोधेष्यतनापामायया वा
द्योपहितो जीवः सुषुप्तौ कारणात्मना स्थितस्तस्यैव नानाकर्मानुभवसंस्कारवत्त्वोपहितत्वादुत्तिष्ठतीति सिद्धांतः इति स एव तु इत्यादिना
साम्यक्तं तस्यादुक्तं तस्यैकस्यैव ज्योतिष्टोमादेरनेकयजमानकत्वापातोतानि प्रसंगः स्मृति नु त्वानुशब्द एवं तां प्रत्यभिज्ञामाह

स एव तु जीवः सुप्तः सास्थ्यं गतः पुनरुत्तिष्ठति नान्यः कस्मात् कर्मानुस्मृतिशब्दविधिभ्यः विभज्य हेतुं दर्शयिष्यामि कर्मणो
यानुष्ठानदर्शनात्तावत् स एवोत्थातुमर्हति नान्यः न ह्यादि पूर्वेद्युरर्धं कृतमस्य कर्मणोऽपरेद्युः शेषमनुतिष्ठन्दृश्यते न चान्येन
सामिकृतस्य कर्मणोऽन्यः शेषक्रियायां प्रवर्तितुमर्हति अतिप्रसंगात् तस्मादेक एव पूर्वेद्युरपरेद्युरेकस्य कर्मणः कर्तेति ग
म्यते इतश्च स एवोत्तिष्ठति यत्कारणमतीतेऽहन्यहमदोऽद्राक्षमिति पूर्वानुभूतस्य पश्चात्स्मरणमन्यस्योत्थानेनोपप
द्येत न ह्यन्यदृष्टमन्योऽनुस्मर्तुमर्हति सोऽहमस्मीति चात्मानुस्मरणमात्मांतरोत्थाने नावकल्पते शब्देभ्यश्च तस्यैवोत्थानमव
गम्यते तथा हि पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धांतायैव सर्वाः प्रजा अहरहर्गच्छंत्य एतं ब्रह्मलोकं न विंदंतीति त इह व्याघ्रो
वा सिंहो वा यद्यद्भवंति तदाभवंतीत्येवमादयः शब्दाः स्वापप्रबोधाधिकारे पठितानात्मांतरोत्थाने सामंजस्यमीयुः कर्मविद्या

९८

विधिभ्यश्चैवमेवावगम्यते अन्यथा हि कर्मविद्याविधयोऽनर्थकाः स्युरन्योत्थानपक्षे हि सुप्तमात्रो मुच्यत इत्यापद्येत एवं
चेत्स्याद्वदकिं कालांतरफलेन कर्मणा विद्यया वा कृतं स्यात् अपि चान्योत्थानपक्षे यदि तावच्छरीरांतरे व्यवहरमाणो
जीव उत्तिष्ठेत् तत्रास्य व्यवहारलोपप्रसंगः स्यात् अथ तत्र सुप्त उत्तिष्ठेत् कल्पनानर्थक्यं स्यात् यो हि यस्मिन्शरीरे सुप्तः स
तस्मिन्नोत्तिष्ठति अन्यस्मिन् शरीरे सुप्तोऽन्यस्मिन्नुत्तिष्ठतीति कोऽस्याः कल्पनाया लाभः स्यात् अथ मुक्त उत्तिष्ठेत् अंतवान्मो
क्षः आपद्येत निवृत्ताविद्यस्य च पुनरुत्थानमनुपपन्नं एतेनेश्वरस्योत्थानं प्रत्युक्तं नित्यनिवृत्ताविद्यत्वात् अकृताभ्यागम
कृतविप्रणाशौ च दुर्निवारावन्योत्थानपक्षे स्यातां तस्मात्स एवोत्तिष्ठति नान्य इति ॥

सोऽहमिति अयनं गमनं आयः योनिस्तत्तदिंद्रियस्थानं प्रति नियतं गमनं यथा भवति तथा प्रतियोन्यागच्छति जागर
णायेति श्रुत्यर्थः न विदंतीत्यज्ञानसत्त्वात्तस्मात्स्योत्थाननियम उक्तः इह एवं प्रबोधे येभवंति त एव न ते प्रबोधे भवंतीत्य
र्थः विधिश्चाच एष कर्मेति स एवोत्तिष्ठतीति निश्चीयत इत्यर्थः अत्र वा तत्र पुनरुक्तं तरमाह अपि चेत्यादिना अन्योत्था
नेऽरवादेनेरवं कर्मकार्यनेकृतत्वाभ्यागमः एवं सुप्तजीवकृतकर्मनाशश्चेत्यर्थः ॥ रामचंद्रायनमः

राम
१५

हेतावस्य स्वापिहेत्वाज्ञाने हेतुं पृच्छति तदभेदेति दृष्टं दर्पणाद्यपरस्यत्वं स्वाभाविकमौपाधिकं वा न माय्यं दृष्टान्तमनस्य प्रत्याह वाढमित्यादि
ना द्वितीयेन तत्परं दूषयति उपाधिगतमेवेति उपाधिभिन्नस्यैव नाडादौ स्वापेक्षया कल्पयितुं शक्यत्वात् ज्ञानप्रसंगात् सुषुप्तिव्याघातः स्या
त् उपाधिलयेन्त्वनन्तजीवस्य स्थितस्य योगाद्ब्रह्मण्येव स्वाप आस्थेय इत्यर्थः एवं विकल्प्य निरस्य नाडीपुरीततोर्ब्रह्मणस्तु तुल्यवत्स
मुच्चयमफलत्वेन दूषयन्मुख्यप्रधानत्वेन समुच्चयमुपपन्नं हरति नचवयमित्यादिना किंच ब्रह्मणः सकाशाज्जीवस्यान्यत्व

तदभेदविषयस्याप्ति हृदादिकारणमविज्ञाने स्यात् वाढमेवं स्याद्यदि जीवः स्वतः परिच्छिन्नोऽभ्युपगम्येत यथा विलस्थमित्रः प्रवासी
स्वगृहं न पश्यतीति न तु जीवस्योपाधिव्यतिरेकेण परिच्छेदो विद्यते उपाधिगतमेवेति हृदादिकारणमविज्ञाने इत्यपयुज्यते
तथापि पाधेहपपराणन्त्वात्तस्यैव सम्पन्नो न विजानातीति युक्तं नचवयमिह तल्पवन्नाड्यादिसमुच्चयं प्रतिपादयामः तेहि
नाड्यादिसमुच्चयं प्रतिपादयामः नहि नाड्यः स्वप्नस्थानं पुरीतद्वा तेन तेन विज्ञानेन किंचित्प्रयोजनमस्ति न ह्येतद्धि ज्ञानप्र
तिबद्धफलं किंचिच्छ्रूयते नाप्येतद्धि ज्ञानफलवतः कस्यचिदंगमुपदिश्यते ब्रह्मत्वनुपाधिस्वापस्थानमित्येतत्प्रतिपादया
मः तेन तद्विज्ञानेन प्रयोजनमस्ति जीवस्य ब्रह्मात्मत्वावधारणं स्वप्नजागरितव्यवहारविमुक्तत्वावधारणं च तस्मादात्मैव स्व
प्नस्थानं अतः प्रबोधोऽस्मात् ८ यस्माच्चात्मैव स्वप्नस्थानं अत एव कारणान्नित्यवदेवास्मादात्मनः प्रबोधः स्वापाधिकारेणि
ष्यते कृतपतदागादिवस्य सम्प्रसादप्रतिवचनावसरे यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरन्त्येवमेवैतस्मादात्मनः सर्वे प्राणा इत्या
दिना सत आगम्य न विदुः सत आगच्छामह इति विकल्पमानेषु तु सुषुप्तिस्थानेषु कदाचिन्नाडीभ्यः प्रबुध्यते कदाचित्पुरीत
तः कदाचिदात्मन इत्यशास्यत् तस्मादात्मैव सुषुप्तिस्थानमिति स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ९ तस्याः पुनः सत्सं
सतु २ पत्तेः प्रतिबुध्यमानः किं य एव सत्संपन्नः स एव प्रतिबुध्यते उतान्यो वेति चिन्त्यते तत्र प्राप्तं तावत् अनियम इति कुतः यदाहि ज
लराशौ काचिज्जलविन्दुः प्रक्षिप्यते जलराशिरेव स तदा भवति पुनरुद्धरणे न स एव जलविन्दुर्भवतीति दुःसंपादं तद्वत्सुप्तः परे
णैकत्वमापन्नः संप्रसीदतीति न स एव पुनरुत्थातुमर्हति तस्मात्स एव वेश्वरो वान्यो वा जीवः प्रतिबुध्यत इत्येवं प्राप्ते इदमाह

तेर्ब्रह्मैव सुषुप्तिस्थानमित्याह सूत्रकारः अतः प्रबोध इति नाडीपुरीततोः सुषुप्तस्थानतापादनत्वात् श्रवणात्तत्सुषुप्तिस्थानत्वमित्यर्थः तस्मा
दुपाधिलये जीवस्य ब्रह्माभेदादौपाधिक एव भेद इति विवेकाद्वाक्यार्थभेदसिद्धिरिति स्थिते स एवेति सुषुप्तावुपाधिनाशात्कर्मी
तस्मात्तादेर्दर्शनाच्च संशये सत्यस्माद् ब्रह्मणो जीवस्योत्थानश्रुतेर्ब्रह्मैव सुषुप्तिस्थानमित्युक्तम् समाद्यस्योत्थानसंभवे
न सुषुप्ते स्वनाड्यादिस्थानत्वसंभवादित्याक्षेपसंगत्या नियामकाभावादनियम इति पूर्वपक्षमाह तस्याः पुनरित्यादिना ॥ ॥

वि८

४

नाडीब्रह्मणोर्वर्णनात् प्राधान्यभावेनसंसैतेसमुच्चयवत् पुरीतद्ब्रह्मणोरपीत्याह तयोस्त्वादिना आकाशेब्रह्मणि शेतेइत्युपक्रम्य ताभिः प्रत्यवसृप्य
पुरीतति शेतेइत्युक्तत्वाच्च नाडीद्वारा पुरीततं गत्वा ब्रह्मणि शेते इति समुच्चयः सिद्ध इत्याह तथा नाडीति सता सोम्य तदा सम्पन्नो भवतीत्याद्युक्तेन
सम्परिष्वक्त इति सत्प्राज्ञयोः श्रुतेः पञ्चसुप्तिस्थानानाम तत्राह सत्प्राज्ञयोरिति किं च समुच्चयपक्षे तदुपादिसाधने कपरीडा शनिष्यतामित्या
नपेक्षततया समर्थत्वाद् युक्तो ब्रीहियववद्विकल्पः नाड्यादीनां तु ब्रह्मनिरपेक्षतया सुषुप्तजीवाधारसामर्थ्यात्तु विकल्प इत्याह अ
पि च नाड्य इति उपाधिलिंगास्त्रयनाडीपुरीततोरुपहितजीवाश्रयत्वं परम्परया वाच्यं तदपि सुषुप्तौ न सम्भवत्युपाधिलयादित्यर्थः न

तथा पुरीततोपि ब्रह्मप्रक्रियायां संकीर्तनात् तदनुगुणमेव सुषुप्तिस्थानत्वं विज्ञायते य एषोन्तर्हृदय आकाशस्तस्मिन् शेते इति हृदयाका
शस्य सुषुप्तिस्थाने प्रकृते तदुच्यते पुरीतति शेत इति पुरीतदिति हृदयपरिवेष्टनमुच्यते तदन्तर्वर्तिन्यपि हृदयाकाशे शयानः पुरीतति पु
रीतति शेत इति वक्तुं प्राकारपरिक्षिप्ते पि पुरे वर्तमानः प्राकारे वर्तत इत्युच्यते हृदयाकाशस्य ब्रह्मत्वं समन्वयेण तद्दहर उत्तरेभ्य इत्य
त्र तथा नाडीपुरीततसमुच्चयोपि ताभिः प्रत्यवसृप्य पुरीतति शेत इत्येकवाक्योपादानादवगम्यते सत्प्राज्ञयोश्च प्रसिद्धमेव ब्रह्म
त्वमेवमेतासु श्रुतिषु त्रीण्येव सुषुप्तिस्थानानि संकीर्तितानि नाड्यः पुरीतद् ब्रह्मेति तत्रापि द्वारमात्रं नाड्यः पुरीतच्च ब्रह्मैव त्वेकं सु
षुप्तिस्थानं अपि च नाड्यः पुरीतद्वा जीवस्योपाध्याधार एव भवति तत्रास्य करणानि वर्तन्त इति न ह्युपाधिसम्बन्धमन्तरेणास्य स्वत एव
जीवस्याधारः कश्चित् सम्भवति ब्रह्माव्यतिरेकेण स्वमहिमप्रतिष्ठितत्वात् ब्रह्माधारत्वमप्यस्य सुषुप्ते नैवाधाराधेयभेदाभिप्रायेणोच्य
ते कथं तर्हि तादात्म्याभिप्रायेण यत आह सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति इति स्वशब्देनात्माभिलप्यते स्वरूपमापन्नः सुप्तो भवतीत्य
र्थः अपि च न कदाचिज्जीवस्य ब्रह्मणा सम्पत्तिर्नास्ति स्वरूपस्यानपायित्वात् स्वप्नजागरितयोस्तूपाधिसम्पर्कवशात् पररूपापत्तिमिवा
पेक्ष्य तदुपशमात् सुषुप्ते स्वरूपापत्तिर्विवक्ष्यते स्वमपीतो भवतीति अतश्च सुप्तावस्थायां कदाचित् सता सम्पद्यते कदाचिन्न सम्पद्यत
इत्ययुक्तं अपि च स्थानविकल्पाभ्युपगमेपि विशेषविज्ञानोपशमलक्षणं तावत्सुषुप्तं न क्वचिद्विशिष्यते तत्र सति सम्पन्नस्तावदेक
त्वान्न विजानातीति युक्तं तत्केन कं जानीयादिति श्रुतेः नाडीषु पुरीतति च शयानस्य न किंचिद्विज्ञाने कारणं शक्यं विज्ञातुं भे
दविषयत्वात् यत्र वा अन्यदिव स्यात्तत्रान्योन्यत् पश्येदिति श्रुतेः

स्या॰

न्ति स्वमपीतो भ
वह॰

न ब्रह्मापि सुषुप्तौ न सम्भवत्युपाधिलयादित्यर्थः जीवस्य तन्मरत्वं स्थानमभेदादित्यत आह ब्रह्माधारत्वमिति जीवस्य ब्रह्मणा भेदे
नावस्थानं नाडीपुरीततोस्तु लीनोपाधेर्जीवस्य स्थितिरेव न सम्भवतीत्येकार्थसामर्थ्याभावान्न विकल्प इत्यर्थः सुषुप्तो जीवस्य भेदकोपा
धिलयाच्चोक्तस्मिंश्च ब्रह्माभेदस्य विकल्पानयुक्त इत्याह अपि चेति किंच नाड्यादीनां मध्ये तन्मस्थाने क्वचित्सुप्तिर्वा दिनापि सुषुप्तेन वि
शिष्यत इति वक्तव्यं न च वक्तुं न शक्यं तत्राह अपि चेत्या नेति भेदाभावो हि भेदज्ञानाभावे हेतुः नाडीपुरीततस्तु जीवस्य भेदाव

स्तत्रैवकारः प्रतीतसमुच्चयार्थः यदा नाड्यः सुषुप्तिस्थानं न भवतीति शङ्कनस्यानन्तस्य पत्तेर्बाधः स्यात्तन्नयुक्तमित्याह विकल्पे हीति व्रीहियव
योस्त्वगत्या विकल्प इतिभावः यत्तु समस्तानां नाड्यादीनामेकफलकत्वमिति नेत्याह नह्येकेति प्रासादस्य पर्यंकधारणमर्थः पर्यंकस्य
तु शयनमिति फलभेदेप्येकविभक्तिर्दृष्टा ते व्यवधानाव्यवधानाभ्यां शयनसाधनत्वात्समुच्चयश्च नचेहापि नाडीपुरीतत्सु जीवस्य तत्र चारद्वा
रा ब्रह्मण्येव हार्दिरिति समुच्चय इत्यर्थः नाडीनां प्राणस्य चैकेन वाक्येनोपादानान्नियमः समुच्चय इत्याह एकवाक्येति आधारत्वमात्रेस

विकल्पे दोषापत्तेर्बाधः स्यात् नन्वेकार्थत्वाद्विकल्पो नाड्यादीनां व्रीहियवादिवदुक्तं नेत्युच्यते नह्येकविभक्तिनिर्देशमात्रेणैका
र्थत्वं विकल्पश्च भवति नानार्थत्वसमुच्चययोरप्येकविभक्तिनिर्देशदर्शनात् प्रासादे शेते पर्यंके शेते इत्येवमादि नचेहापि नाडी पु२
षु पुरीतति ब्रह्मणि च स्वपितीत्यत्र तदुपपद्यते समुच्चयः तथा च श्रुतिः नास्तत्तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यति अ
थास्मिन्प्राण एवैकधा भवतीति समुच्चयेन नाडीनां प्राणस्य च सुषुप्तौ श्रावयति एकवाक्योपादानात् प्राणस्य ब्रह्मत्वं समधिग
तं प्राणस्तथानुगमादित्यत्र यत्रापि निरपेक्षा एव नाड्यः सुषुप्तस्थानत्वेन श्रावयत्यासु तदा नाडीषु सुप्तो भवतीति तत्रापि
प्रदेशान्तरप्रसिद्धस्य ब्रह्मणोऽप्रतिषेधान्नाडीद्वारेणैव ब्रह्मण्येवावतिष्ठत इति प्रतीयते नचैवमपि नाडीषु सप्तमी विरुध्य
ते नाडीद्वाराऽपि ब्रह्मोपसर्पन्सन्नेव नाडीषु भवति यो हि गंगया सागरं गच्छति गत एव स गंगाया भवति अपि चात्र रश्मिनाडी
द्वारात्मकस्य ब्रह्मलोकमार्गस्य विवक्षितत्वान्नाडीस्तुत्यर्थस्तत्र संकीर्तनं नाडीषु सुप्तो भवतीत्युक्त्वानन्तरं न कंचन पाप्मा स्पृ
शतीति ब्रुवन्नाडीः प्रशंसति ब्रवीति च पाप्मस्पर्शाभावे हेतुं तेन हि तेजसा हि तदा संपन्नो भवतीति तेजसा नाडीगतेन पित्ताख्येना
भिव्याप्तकरणो न बाह्यविषयानीक्षत इत्यर्थः अथवा तेजसेति ब्रह्मण एवायं निर्देशः श्रुत्यन्तरे ब्रह्मैव तेज एवेति तेजः
शब्दस्य ब्रह्मणि प्रयुक्तत्वात् ब्रह्मणा हि तदा संपन्नो भवति नाडीद्वारेण तत्र न कंचन पाप्मा स्पृशतीत्यर्थः ब्रह्मसंपत्ति
श्च पाप्मस्पर्शाभावे हेतुः समधिगतः सर्वे पाप्मानोऽतो निवर्तन्ते अपहतपाप्मा ह्येष ब्रह्मलोक इत्यादिश्रुतिभ्यः एवं च सति प्र
देशान्तरप्रसिद्धेन ब्रह्मणा सुषुप्तिस्थानेनानुगतो नाडीनां नयः समधिगतो भवति ॥ ॥ ॥

समर्थो न निरपेक्षत्वमतो न समुच्चयस्य सम्भावाबाध इत्याह नचैवमपीति समुच्चयेपीत्यर्थः अत्र नाडीभ्यो ततो नाडीषु भोक्तुः सु
प्तिर्न विवक्षिता रश्मिसंबद्धनाडीरूपमार्गस्तुत्यर्थत्वादित्याह अपि चेति पित्तेन विषयेक्षणाभावे हेत्वहः स्वयोरभावान्न हेतुर्धर्मा
धर्मात्मकपाप्मास्पर्शे इत्यर्थः अपहतपाप्मब्रह्मसंपत्त्या वा पाप्मास्पर्श इत्याह अथवेति अस्मिन्व्याख्याने लाभमाह एवं च
सतीति नास्त तदा भवत्यथास्मिन्प्राण एवैकधा भवतीति श्रुतेः समुच्चयश्रुतिरतो भवतीत्यर्थः ॥

पात॰ स्य॰ हि॰ १३

एवं वा सकरणोपरमे सति मनो वासनोद्दीपितान्विषयाविलासात्मकं स्वप्नमात्मनः साक्षिणः स्वयंज्योतिष्ट्वार्थं विचार्य प्रतियोगस्य योगिभा
वसंगत्या स्वभावस्य मनोलयात्मिकां सुषुप्तिं विचारयति तदभावेति तदेतत्स्वप्नं यथा स्यात्तथा यत्र काले सुप्तः समस्तो निरस्तबाह्य
करणो मनोलयात्सम्पन्नः सत्र इत्यर्थः स्वापे नाडीस्थानमुक्तं नाडीपुरीततौ नाडीपरमात्मनोऽस्य समुच्चयश्रुत्याह अन्यत्रेति परमा
त्मनात्र श्रुतीराह तथान्यत्र इत्यादिना नाडीपुरीतद्ब्रह्मसु सप्तमीश्रुतेः समुच्चयश्रुतेस्थसंग्रहमाह तत्रेति एवं पक्षे स्थानवि॰

३ सुषु॰

तदभावो नाडीषु तच्छ्रुतेरात्मनि च ७ स्वप्नावस्था परीक्षिता इदानीं सुषुप्तावस्था परीक्ष्यते तत्रैताः सुषुप्तविषयाः श्रुतयो भवन्ति
क्वचिच्छ्रूयते तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवतीति अन्यत्र तु नाडीरनुक्रम्य
श्रूयते ताभिः प्रत्यवसृप्य पुरीतति शेते इति तथान्यत्र नाडीरेवानुक्रम्य तासु तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यत्यथा
स्मिन्प्राण एवैकधा भवतीति तथान्यत्र य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेत इति तथान्यत्र सता सोम्य तदा सम्पन्नो भवति
स्वमपीतो भवतीति तथा प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति च तत्रैष संशयः किमेतानि नाड्यादीनि प
रस्परनिरपेक्षाणि भिन्नानि सुषुप्तिस्थानानि आहोस्वित्परस्परापेक्षयैकं सुषुप्तिस्थानमिति किं तावत्प्राप्तं भिन्नानीति कुत
एकार्थत्वात् नह्येकार्थानां क्वचित्परस्परापेक्षत्वं दृश्यते व्रीहियवादीनां नाड्यादीनां चैकार्थता सुषुप्तौ दृश्यते नाडीषु
सृप्तो भवति पुरीतति शेत इति च तत्र सप्तमीनिर्देशस्य तुल्यत्वात् ननु नैवं सति सप्तमीनिर्देशो दृश्यते सता सोम्य तदा सं
पन्नो भवतीति नैष दोषः तत्रापि सम्पत्त्यर्थस्य गम्यमानत्वात् वाक्यशेषे हि तत्रायतनैषी जीवः सदुपसर्पतीत्याह अन्यत्रायतनमल
ब्ध्वा प्राणमेवोपाश्रयत इति प्राणशब्देन च प्रकृतस्य सत उपादानात् आयतनं च सप्तम्यर्थः सप्तमीनिर्देशोऽपि च वाक्यशे
षे दृश्यते सति सम्पद्य न विदुः सति सम्पद्यामह इति सर्वत्र च विशेषविज्ञानोपरमलक्षणं सुषुप्तं न विशिष्यते तस्मादेकार्थत्वान्ना
ड्यादीनां विकल्पेन कदाचित्किंचित्स्थानं स्वापायोपसर्पतीति एवं प्राप्ते प्रतिपाद्यते तदभावो नाडीष्वात्मनि चेति तदभा
व इति तस्य प्रकृतस्य स्वप्नदर्शनस्याभावः सुषुप्तमित्यर्थः नाडीष्वात्मनि चेति समुच्चयेनैतानि नाड्यादीनि स्वापायोपस
र्पति न विकल्पेनेत्यर्थः कुतः तच्छ्रुतेः तथा हि सर्वेषामेव नाड्यादीनां तत्र तत्र सुषुप्तिस्थानत्वं श्रूयते तच्च समुच्चयेन

कल्प्याजीवस्य ब्रह्मैक्यानिर्णयः सिद्धान्ते नाडीभिः पुरीततं गत्वा तदन्तर्हृदि ब्रह्मण्येव शेत इति समुच्चयादत्र निर्णय इति विवेकः एकप्रयो
जनत्वं व्रीहियवयोर्दृष्टं नाड्यादीनामेकस्मिन्स्वापरूपार्थे निरपेक्षत्वान्नत्वं तत्कृतं सस्मृतमाह नाड्यादीनां चेति सति ब्रह्म
णि तृतीयाश्रुतेर्न सप्तमीति शङ्कार्थः आयतनप्राप्त्यात्मसम्पत्त्यर्थ आधारत्वं गम्यत इत्याह नैष दोष इति अन्यत्रावस्थाद्वये
आत्मनो जीवात्मानिस्थानं प्राणशब्दसद्ब्रह्मोपसर्पति सुषुप्ताविति श्रुत्यर्थः सप्तमीश्रुत्या निरपेक्षाधारत्वभानाद्विकल्प आ
स्थेयः कदाचित्समुच्चित्यापि नाड्यादीनां स्थानत्वमिति न समुच्चयश्रुतिविरोध इति पूर्वपक्षार्थः सिद्धान्तयति एवं प्राप्ते इति

नहि नित्यसिद्धधर्ममेव जीवस्येश्वरत्वं नास्त्येवेति शंकते किमिति नास्तीति न किं त्वावृतमस्ति तत्पुनरीश्वरप्रसादात्कस्यचिद्भवत्यपनद्यन्त्याह नाना
स्तीति विषतधौ नस्य निष्याय स्वसंसिद्धस्य गात्रिमादिविरेषस्येत्यर्थः अहमेवाहमिति देवं ज्ञात्वा साक्षात्कृत्य सर्वपाशानामविद्यादि
क्लेशानां प्रहानिरपक्षयस्तद्भावो भवति क्षीणैः क्लेशैः तत्कार्यं जन्ममरणात्मकवधध्वंसइतिनिर्गुणविद्याफलसगुणविद्याफलमा
ह तदीति परस्याभिध्यानाद्ब्रह्मणध्यानाद्धेर्धर्मात्तदपेक्षया मत्रोक्तहानिस्थायापेक्षयावाज्जीय विश्वैश्वर्यमणिमादिरूपमत्य देहपाते
मतिसिद्धे देहभवतिन हो गानन्तरमात्मज्ञानात्केवलो हेतस्य नमामकामः प्रासस्वयंज्योतिरानंदो भवतीतिक्रममुक्तिरित्यर्थः उक्तैश्वर्यति

किंपुनर्जीवस्येश्वरसमानधर्मत्वं नास्त्येव न नास्ति विद्यमानमपि तत्तिरोहितं अविद्यादिव्यवधानात् तत्पुनस्तिरोहितं सत्परमेश्व
रमभिध्यायतो यतमानस्य जन्तोर्विधूतध्वान्तस्य तिमिरतिरस्कृतेव दृक्शक्तिरौषधवीर्यादीश्वरप्रसादात्संसिद्धस्य चिदाविर्भव
ति नस्वभावत एव सर्वेषां जन्तूनां कुतः ततो हीश्वराद्धेतोरस्य जीवस्य बंधमोक्षौ भवतः ईश्वरस्य स्वरूपापरिज्ञानाद्बंधः तस्य
रूपपरिज्ञानात्तु मोक्षः तथा च श्रुतिः ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः तस्याभिध्यानात्तृतीयं
देहभेदे विश्वैश्वर्यं केवल आप्तकाम इत्येवमाद्याः देहयोगाद्वा सोपि देहयोगाद्वा सोपि केवलात्पुनर्जीवः परमात्मांशएव सन्तिरस्कृत
ज्ञानैश्वर्ययोर्न तिरस्कृतत्वं विस्फुलिंगस्येव दहनप्रकाशनयोरिति उच्येत सत्यमेवमेतत्सोपि तु जीवस्य ज्ञानैश्वर्यतिरो
भावो देहयोगाद्देहेन्द्रियमनोबुद्धिविषयवेदनादियोगाद्भवति अस्ति चात्रोपमा यथाग्नेर्दहनप्रकाशनसंपन्नस्यापि अरणिगतस्य द
हनप्रकाशने तिरोहिते भवतः यथा च भस्मच्छन्नस्य एवमविद्याप्रत्युपस्थापितनामरूपदेहाद्युपाधियोगात्तदविवेकभ्रम
कृतो जीवस्य ज्ञानैश्वर्यतिरोभावः वशब्दो जीवेश्वरयोरन्यत्वाशंकाव्यावृत्त्यर्थः ननु तत एव जीवईश्वराद्दस्ति तिरस्कृतज्ञाने
श्वर्यत्वात्तत् किं देहयोगकल्पनया नेत्युच्यते न हि अन्यत्वं जीवस्येश्वराद्दुपपद्यते सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्म
नानुप्रविश्य नामरूपे व्याकरवाणि इति श्रुतेः स आत्मा तत्त्वमसि श्वेतकेतो इति च जीवायोपदिशन्तीश्वरात्मत्वमस्मि
तो नन्वेवमीश्वराज्जीवः सन्देहयोगात्तिरोहितज्ञानैश्वर्यो भवति अत एव नसौ कल्पितो जीवस्य स्वप्नेष्वपि दृष्टिस्विन्नेत्य
पि च सा कल्पितौ स्वप्नदृष्टिः सात्वेवा निष्टं कश्चिद्दति निष्टं संकल्पयति इत्यनुरक्तं जागरितदेशश्रुति स्वप्नस्य सत्यत्वस्थापय
तीति न तत्साम्यवचनं सत्यत्वाभिप्रायं ज्योतिष्ट्वविरोधाच्छ्रुत्यैव च स्वप्ने रथाद्यभावस्य दर्शितत्वाज्जागरितप्रभववासनानिर्मितत

दोभावे देहाभिमानो दहत्तरि जि कल्पनार्थंस्तत्रैतत्रिरस्या शंकामाह कस्मादिति सत्यावरणं नास्तीत्यंगीकृत्य कल्पितावरणं साथयति इत्युत
इत्यादिना जीवस्येश्वरत्वमंगीकृत्यावरणकल्पनातो वरमन्यत्वकल्पनेत्याशंकाम्नद्रष्टव्यश्रुत्यानिरस्यति नन्वित्यादिना स्वप्ने प्यालो
कादेः सत्यत्वजाग्रतीवात्मनः स्वप्रकाशत्वमस्फुटं स्यात् प्रतिभासिकत्वे त्वालोकादिव्यवसत्वे पार्थिपरोक्ष्यमात्मज्योतिषएवेतिस्फु
टं सिध्यतीति तस्माद्देशादिसाम्यवचनं स्वप्नस्य जाग्रत्तुल्यभानाभिप्रायमित्यर्थः ॥ ॥ २० ॥ ॥

यो भवति पुनः ज्ञानैश्वर्य २४

कश्चित्स्वप्नं यपेपन नहि ५८

कस्य २४

कृत ६

श्रुतिन्यायविरोधाच्च न स्वप्नस्य सत्यत्वमित्याह अपि चेति व्यतिकरः संकरः अन्यान्यतरतयेत्यर्थः जागरितादविशेषादिति भावः फ
लितमाह तस्मादिति एतेनेति भाष्ये त्वेनेत्यर्थः द्वितीयसूत्रोक्तप्राज्ञकर्तृत्वहेतुरपि स्वप्नस्य किं सृष्टिसिद्धः उत प्राज्ञस्य सर्वे
श्वरत्वात्सिद्धिः नाद्य इत्याह यदप्युक्तमित्यादिना स्वयं विहत्य जाग्रद्देहं निश्चेष्टं कृत्वा स्वयं वासनया देहं निर्माय स्वेन भासा स्वे
यबुद्धिवृत्त्या स्वेन ज्योतिषा स्वरूपचैतन्येन च स्वप्नमनेन भवतीत्यर्थः न केवलं देहादावप्येके जीवस्य स्वप्नकर्तृत्वं श्रूयते किं तु का
कापीत्याह इहापीति जीवो कर्तापि ब्रह्मप्रकरणविरोध इत्यत आह तस्यादिति एवं हेतोः श्रुतिसिद्धत्वं निरस्य द्वितीयमंगीकरोति

अपि च जागरिते विषयेन्द्रियसंयोगादादित्यादिज्योतिर्व्यतिकराच्चात्मनः स्वयंज्योतिष्ट्वं दुर्विवेचनमिति तद्विवेचनाय
स्वप्न उपन्यस्तः तत्र यदि रथादिसृष्टिवचनं श्रुत्यानीयेत स्वयंज्योतिष्ट्वं न निर्णीतं स्यात् तस्माद्रथाद्यभाववचनं श्रुत्या र
थादिसृष्टिवचनं तु भक्त्येति व्याख्येयं एतेन निर्माणश्रवणं व्याख्यातं यदप्युक्तं प्राज्ञमेनं निर्मातारमामनंतीति तदप्य २३
सत् श्रुत्यंतरे स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीति जीवव्यापारश्रवणात् इहापि य एष सु
प्तेषु जागर्तीति प्रसिद्धानुवादाज्जीवस्यैव कामानां निर्मातृत्वं संकीर्त्यते तस्य तु वाक्यशेषेण तदेव शुक्रं तद्ब्रह्मेति
जीवभावं व्यावर्त्य ब्रह्मभावं उपदिशति तत्त्वमसीत्यादिवदिति न ब्रह्मप्रकरणं विरुध्यते न चास्माभिः स्वप्नेपि प्राज्ञव्या
पारः प्रतिषिध्यते तस्य सर्वेश्वरत्वात्सर्वास्वप्यवस्थास्वधिष्ठातृत्वोपपत्तेः पारमार्थिकस्तु नायं संध्याश्रयः सर्गो वि
यदादिसर्गवदित्येतावत्प्रतिपाद्यते न च वियदादिसर्गस्याप्यात्यंतिकं सत्यत्वमस्ति प्रतिपादितं हि तदनन्यत्वमारंभणशब्दा
दिभ्य इत्यत्र समस्तस्य प्रपंचस्य मायामात्रत्वं प्राक्तु ब्रह्मात्मदर्शनाद्वियदादिप्रपंचो व्यवस्थितरूपो भवति संध्याश्रयस्तु प्र
पंचः प्रतिदिनं बाध्यत इत्यतो वैशेषिकमिदं संध्यस्य मायामात्रत्वमुदितं पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बंध
विपर्ययौ ५ अथापि स्यात्परस्यैव तावदात्मनोंशो जीवः अग्नेरिव विस्फुलिंगः तत्रैवं सति यथाग्निविस्फुलिंगयोः
समाने दहनप्रकाशनशक्ती भवतः एवं जीवेश्वरयोरपि ज्ञानैश्वर्यशक्ती ततश्च जीवस्यैश्वर्यवशात्सांकल्पिकी
स्वप्ने रथादिसृष्टिर्भविष्यतीति अत्रोच्यते सत्यपि जीवेश्वरयोरंशांशिभावे प्रत्यक्षमेव जीवस्येश्वरविपरीतध

न चास्माभिरिति तर्हि हेतुसिद्धेः स्वप्नस्य सत्यत्वमित्याशंक्य सत्यत्वं व्यावहारिकं पारमार्थिकं वेति विकल्प्य व्यवहारकाले बाधदर्श
नान्नाद्य इत्याह पारमार्थिकस्त्विति द्वितीये दृष्टान्तस्य साध्यवैकल्यमित्याह न चेति कस्तर्हि स्वप्नस्य जाग्रतो विशेषोऽत्र कथ्यते इत्यत आह संध्य
स्य प्रातिभासिकत्वमित्याह प्रागिति एवं हेतुमसिद्धं मत्वा भावात्स्वप्नो यत्संकल्पमयुक्तं संकल्पमात्रेणापि सृष्टिसंभावादिति शं
कां कृत्वा परिहरन्सूत्रं व्याचष्टे अथापि स्यादित्यादिना सत्यसंकल्पस्य हि संकल्पात्सृष्टिः सत्या भवति जीवस्य तु सत्यसंकल्पत्व

राम १२

वहिरिवेति कुलायाद्देहाद्वहिरिवामृत आत्मा चरित्वा यत्र कामं विषयेष्वनीयते विहरतीत्यर्थः तदेतमाह यो हीति देहाभिमानहीनत्वगुः
णेन वहिरेव देहस्यापि वहिरित्युक्तमित्यर्थः एवं सति श्रुतियुक्तिभ्यामंतरेव स्वप्ने सतीत्यर्थः विप्रलंभो विभ्रमः यौगपद्याभावमुक्त्वा का
लाभावमाह कालेति अर्धरात्रिसमयेपि केतुमालादिवर्षांतरे वासरो भवतीति भारतवर्षस्थस्य सर्वपत्तावमानानां जाग्रद्दर्शनेन्द्रि
प्रमाणसामग्रीजन्यत्वमबाधयोग्यत्वं चोपाधिरिति निरस्तमनेनात्यर्थं स्वप्नस्याभ्यासमात्रेणैव तत्र सचितताप्यर्थः तस्मान्न स्यादिति शंकोत्तरत्वेनस्त

वहिरिवकुलायादमृतश्चरित्वेति यो हि वस्तुत्वपि शरीरेन तेन प्रयोजनं करोति स वहिरिव शरीराद्भवति स्थितिगतिमत्यः
यमेदोष्येव सति विप्रलंभ एवाभ्युपगंतव्यः कालविसंवादोपि च स्वप्ने भवति रजन्यां हि सुप्तो वासरं भारते वर्षे मन्यते तथा
मुहूर्तमात्रप्रवृत्तिनि स्वप्ने कदाचिद्बहुवर्षपूगानतिवाहयति निमित्तान्यपि च स्वप्ने न बुद्धयेपेक्षणो वोचितानि विद्यते
करणोपसंहाराद्धि नास्य रथादिग्रहणाय चक्षुरादीनि संति रथादिनिर्वर्तनेपि कुतोस्य निमेषमात्रेण सामर्थ्यं दारूणि
वैते४५ वा वाप्युतेरथादयः स्वप्नदृष्टाः प्रबोधे स्वप्न एवैतत्सर्वं बाधा भवंति आद्यंतयोर्व्यभिचारदर्शनात् रथोयमिति कदाचित्रि स्वप्ने५
धीरितः क्षणेन मनुष्यः संपद्यते मनुष्योयमिति च निर्धारितः क्षणेन वृद्धः संपद्यते स्पष्टं चाभावे रथादीनां स्वप्ने आवयविशास्त्र
नै५ न तत्र रथा न रथयोगा न पंथानो भवंत्यथ रथान् रथयोगान् पथः सृजत इत्यादि तस्मान्मायामात्रं स्वप्नदर्शनं सूचकश्च हि श्रुतेराचक्षते च तद्विदः ४ मायामात्रत्वात्
हि न कश्चित्स्वप्ने परमार्थगंधोस्तीति ननूच्यते सूचकश्च हि स्वप्नो भवति भविष्यतोः साधुसाधुनोः तथा हि श्रूयते यदा क
र्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने इति तथा पुरुषं कृष्णं कृष्णदंतं पश्यति स एनं
नै६ हंतीत्येवमादिभिः स्वप्नैश्चिरजीवित्वमावेद्यते इत्याचक्षते च स्वप्नाध्यायविदः कुंजरारोहणादीनि स्वप्ने धन्यानि
खरयानादीन्यधन्यानीति मंत्रदेवताद्रव्यविशेषनिमित्ताश्च केचित्स्वप्नाः सत्यार्थगंधिनो भवंतीति मन्यंते तत्रापि भवतु नाम
सूच्यमानस्य वस्तुनः सत्यत्वं सूचकस्य तु स्त्रीदर्शनादेर्भवत्येव वैतथ्यं बाध्यमानत्वादित्यभिप्रायः तस्मादुपपन्नं स्वप्नस्य
मायामात्रत्वं यदुक्तमाहेतीति भाक्तं व्याख्यातव्यं यथा लांगलं गवादीनुद्वहतीति निमित्तमात्रत्वादेवमुच्यते न तु प्रत्य
क्षमेव लांगलं गवादीनुद्वहति एवं निमित्तमात्रत्वात्सुप्तो रथादीन्सृजते स हि कर्तेति चोच्यते न तु प्रत्यक्षमेव सुप्तो रथादीन्
सृजतीति निमित्तत्वं चास्य रथादिप्रतिभाननिमित्तमोदत्रासादिदर्शनात् तन्निमित्तभूतयोः सुकृतदुष्कृतयोः कर्तृत्वेनेति वक्तव्यं

त्वात्तरं भाष्यं च एव मायेत्यादिना मंत्रेलादेवतानुग्रहे योषधिसेवया वा स्वप्नाः सत्यसूचकाश्चेत्सत्यास्तुरित्यत आह तत्रापि भवतु नामेति
सत्यहर्षहेतोरपि स्त्र्यादिरूपस्य सत्यत्वादर्शनादिति भावः यथा कश्चिद्बालो गलस्य गदि जीवननिमित्तत्वं तत्र या स्वप्नसृष्टेर्निमि
त्तत्वेन तत्कर्मप्रतिज्ञं भकारस्येव तात्त्वास्वप्नकर्तृत्वं सामग्र्यभावबाधयोः कृतत्वादित्याह यदुक्तमित्यादिना तथा च स्वप्नस्य सकार्त्स्न्यं मुख्यं

इति माशंक्य प्रकरणान्तरमाह तन्विन्नत्यादिना यः सुप्तेषु निर्मिपोरेषु करणेषु जागर्त्ति न देवस्य कांस्त्र प्रकाशं प्रश्नोत्तरार्थः स्वप्नस्य जाग्रदर्थैः समानदेशत्वस्य नेदभेदस्य तस्य सत्यत्वे तात्पर्यमित्याह अथो खल्वाहुरिति स्वप्नेरथादयः प्रातीतिकाः जाग्रद्रथादौ तत्सामग्रीविनाद्दष्टत्वात् शुक्तिरूप्यादिवदिति सिद्धांतयति नशब्द इत्यादिना चिन्मात्रनिष्ठा विद्या चित्त्वावच्छेदेन जीवे प्रियिनारथाद्याकाराभायेति सत्त्रभाष्ययोरुक्तोमायाविद्ययोरभेदमात्रपदेन तत्सत्तिप्रमात्तर्यवाध्यरूपस्य व्यावहारिकसत्यत्वस्य निरासः उक्तः

ननु काम पाठे नेक्षोविरोधापत्त्वोच्येरन्न न शतापुषः पुत्रपौत्रान्वृणीष्वेति प्रक्रम्यां ते कामानीत्वा कामभाजं करोमीति प्रक्रांतेषु तत्र तत्र पुत्रादिषु कामपदस्य प्रयुक्तत्वात् प्राज्ञेचेनति मीत्तारं प्रकरण वाक्यशोषाभ्यां मतीमः प्राज्ञस्य हीदं प्रकरणमन्यत्र धर्मादन्यत्राधर्मादित्यादिना हि पुनरेव च वाक्यशेषोपि तदेवम्यत्रं नञ्व्रह्मतदेवामृतमुच्यते तस्मिल्लोकाः श्रिताः सर्वे तदुनात्येति कश्चनेति माज्ञकर्तृकाच स्पष्टिश्च पारूपासमधिगतात् जागरितामयात पाच स्वप्नस्यापि सृष्टिर्भवितमर्हतीति तथा च श्रुतिः अथो खल्वाहुर्जागरितदेश एवास्यैष यद्धियानि हेव जाग्रन्पश्यति तानि सुप्त इति स्वप्नजागरितयोः समानन्यायता श्रावयति तस्मात्तथारूपैव संध्ये सृष्टिरित्येवं प्रत्याह मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् तु शब्दः पक्षं व्यावर्त्तयति नैतदस्ति यदुक्तं संध्ये सृष्टिः पारमार्थिकीति मायैव संध्ये सृष्टिर्न परमार्थगंधोप्यस्ति कुतः कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् नहि कार्त्स्न्येन परमार्थवस्तुधर्मेणाभिव्यक्तस्वरूपः स्वप्नः किं पुनरत्र कार्त्स्न्यमभिप्रेतं देशकालनिमित्तसंपत्तिरबाधश्च नहि परमार्थवस्तुविषयाणि देशकालनिमित्तान्यबाधश्च स्वप्ने संभाव्यंते नतावत्स्वप्ने रथादीनामुचितो देशः संभवति नहि संवृते देहदेशे रथादयोवकाशं लभेरन् स्याद्देतद्बहिर्देहात्स्वप्नं पश्यति देशांतरितद्रव्यग्रहणात् दर्शयति च श्रुतिः बहिर्देहात्स्वप्नमवहिः कुलायादमृतश्चरित्वा स ईयतेमृतो यत्र काममिति स्थितिगतिप्रत्ययभेदश्च नानिष्क्रांते जंतौ स्यादिति नेत्युच्यते नहि सुप्तस्य जंतोः क्षणमात्रेण योजनशतांतरितं देशं पर्येतुं विपर्येतुं च ततः सामर्थ्यं संभाव्यते क्वचिच्च प्रत्यागमनवर्जितं स्वप्नं श्रावयति कुरुष्वहमद्य शयानो निद्रयाभिप्लुतः स्वप्ने पांचालानभिगतश्चास्मि प्रतिबुद्धश्चेति देशाच्च देपयात्पांचालेषु प्रतिबुद्धो जनतानसान्वभिगतइति कुरुश्ववान्प्रतिबुध्यते येन चायं देहेन देशांतरमश्नुवानो मन्यते तमन्ये पार्श्वस्थाः शयनदेश एव पश्यंति यथाभूतानि चायं देशांतराणि स्वप्ने पश्यति न तानि तथाभूतान्येव भवंति परिधावंश्चायं पश्येज्जाग्रद्वत्स्वप्नं तमर्थमाकलयेत् दर्शयति च श्रुतिः

कार्त्स्न्येन न जाग्रतिपाल्लभ्यसामग्री तज्जन्यत्वं परमार्थवस्तुन जाग्रदर्थस्य कार्यस्य धर्मः सत्यत्वव्यापकः तदभावे स्वप्ने विधृणोति नतावदित्यादिना तत्र ते संकीर्णे पर्येतुं गंतुं विपर्येतुं मार्गं तं श्रावयति प्रबुद्धो जनतापार्श्वस्थान्प्रतिइति शेषः पतत्त्वापन्न पयास्यात पायत्रकाले स्वप्नया हत्वा चरतितदास्य शरीरं यथै एवं चरतीत्यर्थः ॥ ॥ ॥

ॐ श्रीगणेशाय नमः ॥ संध्ये सृष्टिराह हि ॥ उक्तं वैराग्यसाध्यस्तत्त्वंपदार्थविवेको वाक्यार्थज्ञानसाधनमस्मिन्पादे निरूप्यत इति पादयोर्हे-
तुसाध्यभावसंगतिमाह अतिक्रान्त इति साधनविचारत्वादेवास्य पादस्यास्मिन्नध्याये संगतिः अस्मिन्पादे न स्थानतोपीत्यतः प्राक् त्वंप-
त्वेन प्रथमं जिज्ञासितं त्वंपदार्थो वस्थाद्वारा विविच्यते तदारभ्यापादसमाप्ते विधेयतत्पदार्थो विवेकः तत्र स्वर्गगत्यागति चिंतयाऽजाग्र-
दवस्था निरूपिता तदनन्तरभाविनी स्वप्नावस्थाऽस्मत्प्रक्रियाविषयीक्रियते स्वप्ने रथादिसृष्टिः किं तदभावो वेति संशयवदन्यत्र पूर्वपक्षस्त्रे-
याजत्वादि तत्र संशय इत्यादिना स्वप्ने रथादियोगाश्रुत्यादिवद्व्यावहारिकसत्ताकाउत स्विन्महिरजतवत्प्रातीतिकाऽ इति संशयार्थः आरं-
भणाधिकरणे प्रपंचस्य पारमार्थिकत्वनिषेधादिति मन्तव्यं अत्र एवं पक्षे जाग्रद्व्यत्स्वप्नाज्जीवस्य विवेकासिद्धिः सिद्धान्ते प्रातीतिकत्वे ए-
तात्तिनयाविवेकात्स्वयंज्योतिष्ट्वसिद्धिरिति फलमन्तरूपैः सर्वेन्द्रियोपसंहारादेनलोकाननुभवे स्वप्नेतिवासनामात्रेण इमं लोके स्मर-

ॐ संध्ये सृष्टिराह हि ॥१॥ अतिक्रान्ते पादे पंचाग्निविद्यामुदाहृत्य जीवस्य संसारगतिप्रभेदः प्रपंचितः इदानीं तस्यैवावस्थाभेदः
प्रपंच्यते इदमाम्नायते स यत्र प्रस्वपितीत्युपक्रम्य न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान्रथयोगान्पथः सृज-
त इत्यादि तत्र संशयः किं प्रबोध इव स्वप्नेऽपि पारमार्थिकी सृष्टिराहोस्विन्मायामयीति तत्र तावत्प्रतिपद्यते संध्ये सृष्टिरिति
संध्यमिति स्वप्नस्थानमाचष्टे वेदे प्रयोगदर्शनात् संध्यं तृतीयं स्वप्नस्थानमिति द्वयोर्लोकस्थानयोः प्रबोधसंप्रसादस्था-
नयोर्वा संधौ भवतीति संध्यं तस्मिन्संध्ये स्थाने तथ्यरूपैव सृष्टिर्भवितुमर्हति कुतः यतः प्रमाणभूता श्रुतिरेवमाह
अथ रथान्रथयोगान्पथः सृजत इत्यादि स हि कर्तेति चोपसंहारादेवमेवावगम्यते निर्मातारं चैके पुत्रादयश्च ॥२॥ अ-
पि चैके शाखिनोऽस्मिन्नेव संध्ये स्थाने कामानां निर्मातारमात्मानमामनन्ति य एष सुप्तेषु जागर्ति कामंकामं पुरुषो नि-
र्मिमाण इति पुत्रादयश्च तत्र कामा अभिप्रेयन्ते काम्यन्त इति ॥

तथ्या ३५

तः कर्मवृत्ता हृदये मनसा परलोकस्फूर्तिरूपः स्वप्नो भवति सोऽयं लोकद्वयसंधौ भवतीति संध्यः स्वप्नः तथा च श्रुतिः तस्मि-
न्संध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदं च परलोकस्थानं चेत्ययं स्वप्नाकाशादावित्यन्यत्र व्याख्यातः स्वप्नस्य प्रबोधसंप्रसादसंधौ भ-
वत्वमुक्तं अन्येन मर्त्यचक्षुराद्यजन्यरूपादिसाक्षात्कारवत्त्वं परलोकलक्षणादेव चक्षुराद्यजन्यज्ञानत्वं मर्त्यलोकलक्षणं स्व-
प्नेऽस्तीति लक्षणतो लोकद्वयस्पर्शित्वान्नित्यस्वप्नस्यैव लोकद्वयसंध्यत्वं ग्रामद्वयस्पर्शिमार्गस्य तत्संध्यत्ववदिति व्याचक्षते न
केचन अत्र स्वप्नार्थानां व्यावहारिकसत्यत्वं किं तत्सकर्तृकत्वादपीत्याह स हि कर्तेति किं च स्वप्नार्थाः सत्याः प्राज्ञनिर्मित-
त्वादाकाशादिवदिति सूत्रार्थमाह अपि चेत्यादिना ॥ ॥ ॥ ॥

शा॰ त्र॰
तृ॰ प्र॰
१०

न च या हिंसा सो ऽधर्म इत्युत्सर्गस्य विशेषविधिना बाधो ऽत्र न युक्तः नाभिचरेदिति निषिद्धश्येनस्य पुरुषार्थत्ववत् निषिद्धहिंसादेरपि क्रत्वपकार-
कत्वाविरोधादिति तत्राह उत्सर्गापवादयोरिति अयमर्थः काम्यकर्मणि सर्वत्र करणे रागतः प्रवृत्तिरंगेषु विधित इति स्थितिः तथा च
पुरुषार्थे कर्मणि निषेधेपि रागप्राबल्यात् प्रवृत्तिः स्यात् क्रत्वंगहिंसादौ तु विधित एव प्रवृत्तिर्वाच्या स च विधिर्यद्युत्सर्गप्राप्तमनर्थहेतुत्वं न बा-
धेत तर्हि प्रवर्तको न स्यात् प्रवर्तकत्वे वा विधिरनर्थाय स्यात् अतो निरवकाशो विधिः सावकाशमुत्सर्गं विहितहिंसादिभ्यो ऽपवदतीति इदं
च निषेधशास्त्रस्य हिंसात्वादिसामान्ये न प्रवृत्तिमंगीकृत्योक्तं वस्तुतस्तु रागप्राप्तहिंसाविषयत्वान्न विहितहिंसायां प्रवृत्तेर्नास्त्युक्तशंका

उत्सर्गापवादयोर्व्यवस्थितविषयत्वं तस्माच्छुद्धं कर्म वैदिकं शिष्टैरनुष्ठीयमानत्वादितिं यमानत्वाच्च ततस्तत्प्रतिरूपं फलं जायते ।
सं॰ ३ तृ॰ २ स्थावरत्वेन चम्पादिजन्मवदपि व्रीह्यादिजन्म भवितुमर्हतीति तद्धि कूरयचरणानधिकृत्योच्यते नैवमिह वैशेषिकः कश्चिदधिकारो
ऽस्ति तस्मादुःखफलत्वं च लितानामनुशयिनां व्रीह्यादिसंश्लेषमात्रं तद्भाव इत्युपचर्यते रेतःसिग्योगोथ २६ इतश्च व्रीह्यादिसं-
श्लेषमात्रं तद्भावो यत्कारणं व्रीह्यादिभावस्यानन्तरमनुशयिनां रेतःसिग्भाव आम्नायते यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय
एव भवतीति न चात्र मुख्यो रेतःसिग्भावः संभवति चिरजातो हि प्राप्तयौवनो रेतःसिग्भवति कथमिवानुपचरितं तदन्ना-
वद्यमानान्नानुगतो नुशयी प्रतिपद्येत तत्रावश्यं वर्णयितव्यो रेतःसिग्योग एव रेतःसिग्भावो ऽभ्युपगन्तव्यः तद्व्रीह्यादिभावो
अ॰ ५ ऽपि व्रीह्यादियोग एवेति विरोधः योनेः शरीरं २७ अथ रेतःसिग्भावानन्तरं योनौ निषिक्ते रेतसि योनेरधि शरीरमनुशयिना-
मनुशयफलोपभोगाय जायत इत्याह शास्त्रं तद्य इह रमणीयचरणा इत्यादि तस्मादप्यवगम्यते नावरोहे व्रीह्यादिभावावस-
रे तच्छरीरत्वमेव तद्दुःखान्वितं भवतीति तस्माद्व्रीह्यादिसंश्लेषमात्रमनुशयिनां न तज्जन्मेति सिद्धं इति शारीर-
कमीमांसाभाष्ये भगवत्पादकृतौ तृतीयाध्यायस्य प्रथमः पादः ॥१॥ ॥ ॥

वसर इति द्रष्टव्यं प्रतिरूपं तस्य फलमिति योजना इह व्रीह्यादिभावे कश्चिदधिकारः कर्मपरामर्शो नास्तीत्युक्तं अथ व्रीह्या-
दिभावानन्तरं रेतःसिग्भावः श्रुतः तत्रान्नस्यानुशयिनो रेतःसेककर्तृत्वायोगाद्योगमात्रं वाच्यं तद्वदुपक्रमेपि योग एवास्थेयः
अन्यथोपक्रमोपसंहारयोर्विरोधः स्यादिति मत्वोक्तमित्यविरोध इति योनेः शरीरमुत्तरेण व्रीह्यादिशरीरत्वमनुशयिनामिति
सूत्रार्थः एवं कर्मिणां गत्यागती संसारोद्वेगार्थमनुसंधानात् कर्मफलाद्वैराग्यं तत्त्वज्ञानसाधनं सिद्धमिति पादार्थमुपसंहरति
इति सिद्धमिति ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दानन्दभगवतः कृतौ शारीरकमीमांसाव्याख्यायां भा-
ष्यरत्नप्रभायां तृतीयाध्यायस्य प्रथमः पादः ॥१॥

राम
१०

अपि च यो ह्यन्नमत्ति यो रेतः सिंचति तद्भूयो भवतीति वाक्यशेषे व्रीह्यादिषु विद्यमानस्यानुशयिनः संबन्धाद्धारेतःसिक्युक्
योगः श्रुतः तदन्यथानुपपत्त्यापि जन्मश्रुतिर्न मुख्येत्याह अपि चेत्यादिना व्रीह्यादिरूपदेहनाशे देहनाशश्रुतेरवश्यं
भावाद्रेतःसिग्योगो न स्यादित्यर्थः एतेनेति उक्तानुमानार्थापत्तिभ्यां जायत इति श्रुतेर्मुख्यार्थत्वमनुशयिभोगायतनत्वं च

अपि च मुख्येऽनुशयिनां व्रीह्यादिजन्मनि व्रीह्यादिषु लूयमानेषु कण्ड्यमानेषु पच्यमानेषु भक्ष्यमाणेषु च तदभिमानि-
नोऽनुशयिनः प्रवसेयुः यो हि जीवो यच्छरीरमभिमन्यते स तस्मिन्पीड्यमाने प्रवसतीति प्रसिद्धं तत्र व्रीह्यादिभावाद्रेतः
सिग्भावोऽनुशयिनो नाभिलप्येत अतः संसर्गमात्रमनुशयिनामन्याधिष्ठितेषु व्रीह्यादिषु भवति एतेन जनेर्मुख्यार्थत्वं
प्रतिब्रूयात् उपभोगस्थानत्वं च स्थावरभावस्य न च वयमुपभोगस्थानत्वं स्थावरभावस्यावजानीमहे भवत्वन्येषां जं-
तूनामपुण्यसामर्थ्येन स्थावरभावमुपगतानामेतदुपभोगस्थानं चंद्रमसस्त्ववरोहंतोऽनुशयिनो न स्थावरभावमुपभुंज-
त इत्याचक्ष्महे अशुद्धमिति चेन्न शब्दात् २५ यत्पुनरुक्तं पश्वहिंसादियोगादशुद्धमाध्वरिकं कर्म तस्यानिष्टमपि फ-
लमवकल्प्यत इत्यतो मुख्यमेवेहानुशयिनां व्रीह्यादिजन्मास्तु तत्र गौणी कल्पनानर्थिकेति तत्परिह्रियते न शा-
स्त्रहेतुत्वाद्धर्माधर्मविज्ञानस्य "अयं धर्मोऽयमधर्म" इति शास्त्रमेव विज्ञाने कारणमतीन्द्रियत्वात्तयोः अनियतदेशका-
लनिमित्तत्वाच्च यस्मिन्देशे काले निमित्ते च यो धर्मोऽनुष्ठीयते स एव देशकालनिमित्तान्तरेष्वधर्मो भवति तेन न शा-
स्त्रादृते धर्माधर्मविषयं ज्ञानं कस्यचिदस्ति शास्त्राच्च हिंसानुग्रहाद्यात्मको ज्योतिष्टोमो धर्म इत्यवधारितः स कथ-
मशुद्ध इति शक्यते वक्तुं ननु न हिंस्यात्सर्वा भूतानीति शास्त्रमेव भूतविषयां हिंसामधर्म इत्यवगमयति बाढं उ-
त्सर्गस्तु सः अपवादोऽग्नीषोमीयं पशुमालभेतेति ॥

अ५

व्रीह्यादेः प्रतिब्रूयादित्यर्थः ननु व्रीह्यादेर्भोगायतनत्वानंगीकारे पूर्वोक्तश्रुतिस्मृतिप्रसिद्धिबाध इत्यत आह न चेति वैदिकं क-
र्माशुद्धं न भवति शास्त्रविहितत्वादिति सूत्रार्थं प्रपंचयति अयं धर्म इत्यादिना शुचौ देशे प्रातःसायंकाले जीवनादिनिमित्ते
कृतमग्निहोत्रं धर्मो भवति स एवाशुचिदेशे मध्यरात्रे मरणादिनिमित्तं कृतः स त्वधर्मो भवतीति निर्णयः शास्त्रैकसाध्य इत्यर्थः ततः

शात्र
रत्न॰
९

अत्रजायंतइतिश्रुतेः पूर्ववदाकाशादिवर्षीतस्माद्रूपोक्तेःसंशयमाह तत्रेति अस्मिन्नवरोहेवर्षस्यानंतरस्मिन्नर्थः इर्निश्चयतर
शाद्रेन्नचिरेणनिर्गमनलक्षणोक्तानयुक्ताद्रवेननिर्गमनमितिमुख्यसंभवादित्याक्षेपसंगत्या पूर्वपक्षयति किंतावदित्यादिना अत्रपू
र्वपक्षेस्थावरत्वनिहत्तयेऽधिकारिणांयत्नगौरवंसिद्धांतेव्रीह्यादिसंश्लेषमात्रंपरिहर्तुंयत्नलाघवंवैराग्यंश्रेयश्चेतिविवेकः ननुदेहो
त्पत्त्याजीवानांजन्मस्यात्रस्यतःव्रीह्यादित्वनदेहत्वमित्यत आह स्थावरभावस्येति स्थाणुमन्येनुसंयंतीत्याद्यास्मृतिःशरीरजैःकर्म

तत्रसंशयः किमस्मिन्नवरोहेनुशयिनःस्थावरजात्यापन्नाःस्थावरसुखदुःखभाजोनुशयिनोभवंत्याहोस्वित्क्षेत्रज्ञांतराधिष्ठिते
षुस्थावरशरीरेषुसंश्लेषमात्रंगच्छंतीति किंतावत्प्राप्तंस्थावरजात्यापन्नास्तत्सुखदुःखभाजोनुशयिनोभवंतीति कु
तःएतज्जनेर्मुख्यार्थत्वोपपत्तेः स्थावरभावस्यचश्रुतिस्मृत्योरुपभोगस्थानत्वप्रसिद्धेः पशुहिंसादियोगा
च्चइष्टादेःकर्मजातस्यानिष्टफलत्वोपपत्तेः तस्मान्मुख्यमेवेदमनुशयिनांव्रीह्यादिजन्मश्वादिजन्मवत् य
थाश्वयोनिंवासूकरयोनिंवाचंडालयोनिंवेतिमुख्यमेवानुशयिनांश्वादिजन्मतत्सुखदुःखान्वितंभवत्ये
वंव्रीह्यादिजन्मापि एवंप्राप्तेब्रूमः अन्यैर्जीवैरधिष्ठितेषुव्रीह्यादिषुसंसर्गमात्रमनुशयिनःप्रतिपद्यंते न
तत्सुखदुःखभाजोभवंतिपूर्ववत् यथावायुधूमादिभावोनुशयिनांतत्संश्लेषमात्रमेवंव्रीह्यादिभावोपिजाति
स्थावरैःसंश्लेषमात्रंकुतएतत् तद्वदिहाप्यभिलापात् कोभिलापस्यतद्वद्भावःकर्मव्यापारमंतरेणसंकीर्तनं
यथाकाशादिषुप्रत्यवरोहणंतेषुनकिंचित्कर्मव्यापारंपरामृशत्येवंव्रीह्यादिजन्मन्यपि तस्मान्नास्त्यनुशयिनःसुखदुः
खभाक्त्वमनुशयिनां यत्रतुसुखदुःखभाक्त्वमभिप्रेतंपरामृशति तत्रकर्मव्यापारंरमणीयचरणाःकपू
यचरणाइतिच॥

दोषैर्यातिस्थावरतांनरइत्याद्यास्मृतिः ननुस्वर्गिणांपापाभावात्कथंस्थावरत्वंनत्राह पश्विति सोमायुच्छिष्टभक्ष
णात्सुराग्रहादावादिशब्दार्थः क्रतुधर्महिंसादेरपिहिंसात्वादिसामान्येनमन्वतिनहिंस्यादित्यादिशास्त्रनिषिद्धत्वाकारणाद्दु
रितोपूर्ववैकारिकत्वविरोधमितिसिद्धांत्याह दूषः अतोत्रव्रीह्यादिभावोनुशयिनांनजन्मरूपः कर्मविशेषपरामर्शनात्रो
क्त्वान्पूर्ववदाकाशादिभाववदितिसिद्धांतयति एवंप्राप्तइत्यादिना पूर्ववदितिपदंदृष्टांतत्वेनहेतुत्वंशान्येनचव्याख्या
तेयत्रप्रकरणेकर्मविशेषपरामर्शःपूर्वकमश्चयेतत तत्रतज्जन्मेतिव्यतिरेकदृष्टांतमप्याह यत्रत्विति ॥ ॥

राम
९

न

अनुशयिनां सर्वसिद्धाकाशादिस्वरूपापत्त्ययोगाल्लक्षणेति सिद्धांतयति एवमित्यादिना समानो भावो धर्मो यस्य तद्भावः साभाव्यं साम्य
मिति सूत्रपदार्थः एवं सेतादीति एतद्रूपेण संसादृश्यरूपमेवोपपद्यते इत्यर्थः अनुशयिनामाकाशादिभ्यो निर्गमनान्यथानुपपत्त्यापि
सादृश्यलक्षणेत्याह आकाशस्वरूपेति संयोगलक्षणामाशंक्याह विभुत्वादिति भवति अन्यासंयोगलक्षणायामनुवादः स्यादि
त्यर्थः विविधभूतसाम्यमवरोहे भवतीति नु संधानाद्धेतुसाम्यमुपसंहरति अतइति नातिचिरेणेति ऊर्ध्वं साम्यमुपजीव्य लोके गच्छतीति
तावित्यतिदर्शनात्संपायवदन्यपूर्वपक्षयति तत्रेत्यादिना अनियमात्कदाचिद्विलंबेन योन्यापत्तिरिति एवं पक्षे फलं सिद्धांते तत्री

एवं प्राप्तेक्रमः आकाशादिसाम्यं प्रतिपद्यंत इति चंद्रमंडले यदंबुशरीरमुपभोगार्थमारब्धं तदुपभोगक्षये सति प्रविलीयमानं सूक्ष्म
माकाशसमं भवति ततो वायोर्वशमेति ततो धूमादिभिः संप्रच्यवत इति तदेतदुच्यते यथेतमाकाशाद्वायुमित्येवमादिना क
३२ स्रोतदुपपद्यतेन मयेतदुपपद्यते एवं धूमसाम्यभावो मरवदुपपद्यते आकाशस्वरूपप्रतिपत्तौ च वाय्वादिक्रमेणावरोहो नोपपद्यते विभुत्वा
च्चाकाशेन नित्यसंबंधत्वात् तत्सादृश्यापत्तेरन्यस्तत्संबंधो घटते अन्यसंभवे च लक्षणाश्रयणं न्याय्यमेव अत आकाशादितु
ल्यतापत्तिरेवात्राकाशादिभाव इत्युपचर्यते नातिचिरेण विशेषात् २३ तत्राकाशादिप्रतिपत्तौ प्राग्व्रीह्यादिप्रतिपत्तेर्भ
वति विशयः किं दीर्घं दीर्घं काले पूर्वसादृश्येनावस्थायानंतरसादृश्यं गच्छंत्युत नाल्पमल्पमिति तत्रानियमो नियमकारि
णः शास्त्रस्याभावादित्येवं प्राप्ते इदमाह नातिचिरेणेति अल्पमल्पकालमाकाशादिभावेनावस्थाय वर्षधाराभिः सहेमां
भुवमापतंति कुत एतत् विशेषदर्शनात् तथाहि व्रीह्यादिभावापत्तेरनंतरं विशिनष्टि अतो वै खलु दुर्निष्प्रपतरमि
ति तकार एकः छांदसस्तत्प्रक्रियायां लुप्तो मंतव्यः दुर्निष्प्रपततरं दुर्निःक्रमतरं दुःखतरमस्माद्व्रीह्यादिभावान्निःसरणं भवती
त्यर्थः तदत्र दुःखं निःप्रपतनं प्रदर्शयन्पूर्वेषु सुखं निष्प्रपतनं दर्शयति सुखदुःखताविशेषश्चापतनस्य कालाल्प
त्वदीर्घत्वनिमित्तस्तस्मिंस्तव धौ शरीराणि निष्पन्नेतदुपभोगासंभवात् तस्माद्व्रीह्यादिभावापत्तेः प्रागल्पेनैव कालेनावरोहः
स्यादिति अन्याधिष्ठितेषु पूर्ववदभिलापात् २४ तस्मिन्नेवावरोहे प्रवर्षणानंतरं पठ्यते तदिह व्रीहियवा ओषधिवनस्पत

ह्रियवादिभावादनुशयिनां क्लिष्टेन निर्गमनमिति विशेषादाकाशादिभावाच्छीघ्रं निर्गमदुःखविलंबेन योन्यापत्तिरित्युक्तं
थाद्धे साम्यपदार्थो न तु विवक्षः ननु आकाशादिष्वनुशयिनां सुखं व्रीह्यादिषु दुःखमिति दुःखशब्दाद्भाति न चिराचिरनिर्गमन
मित्यत आह सुखदुःखताविशेषश्चापतनेति अवधिः कालः अन्याभिलापात् अतिक्रमाच्चाधिकरणानां क्रमो बो
ध्यः इह भूमौ वर्षधाराद्वारापतितानामनुशयिनो व्रीह्यादितामेन जायंत इति भावः ॥ वासुदेवाय हरि ॥ ॥

७४

पुरुषशब्दाच्चैवमित्याह अपि चेति तत्र षष्ठे हस्यापि नाहुतिसंख्यानियम इत्याह अपि चेत्यादिना विधिनिषेधरूपहृदयेकाकाभेदः स्यादित्यर्थः ॥ अनियमे स्मृतिसंवादो लोकानेनेनेति लोको भारतादिरूपः सूत्रार्थमप्याह वलाकेति अण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि च अत्यवरुष्टं भेन सूत्रव्याचष्टे अपि चेति अत्रापि निर्णयादिकारोधित्यर्थः अनयात्या चान्तर्विध्येकपुनः अक्तस्तरेत्रीणि एवम्प्रवधारणा विरोधादिति शोकानात्वेन सूत्रमाधत्ते नन्वित्यादिना जीवजं जरायुजं मनुष्यादिभिः मिमद्वियजायते एकाद्विजं गमनमिति भेदः संशोकः ॥ अपि च पंच मामाहुतावापः पुरुषवचसो भवंतीति मनुष्यशरीरहेतुत्वेनाहुतिसंख्याकीर्तनं न कीटपतंगादिशरीरहेतुत्वेन रूषणम् ॥ रूसमनुष्यजातिवचनत्वात् अपि च पंचम्यामाहुतावपां पुरुषवचस्त्वमुपदिश्यते न पंचम्यामाहुतौ पुरुषवचस्त्वप्रतिषिध्य ॥ ते वाक्यस्य व्यर्थतादोषात् त्रयेषामारोहावरोहौ संभवतस्तेषां पंचम्यामाहुतौ देहोद्भविष्यन्त्येषान्तु विनैवाहुतिसंख्यायाभंता ॥ तरोपस्थानिशाईदह आरभ्यते. स्मर्यतेऽपि च लोके ॥१९॥ अपि च स्मर्यते लोके द्रोणधृष्टद्युम्नप्रभृतीनां [illegible] त्वापोनिजत्वं तत्र द्रोणादीनां योषिद्विषयेकाहुतिर्नास्ति धृष्टद्युम्नादीनां तु योषित्पुरुषविषये द्वेप्याहुती न स्तः यथावत् पाहुतिसंख्यानादरो भवति एवमन्यत्रापि भविष्यति वलाकाप्यन्तरेतः सेके गर्भं धत्त इति लोके रूढिः दर्शनाच्च ॥२०॥ अपि च जरावि धेषु तत्र यजरायुजाण्डजस्वेदजोद्भिज्ज [illegible] लक्षणे स्वेदजोद्भिज्जयो रजरेतोव्यवायमन्तरेणैवोत्पत्तिदर्शनादाहुतिसंख्यानादरो भवति एवमन्यत्रापि भविष्यति ननु तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति आण्डजं जीवजमुद्भिज्जमिति तत्र त्रिविध एव भूतग्रामः श्रूयते कथं चतुर्विधत्वं भूतग्रामस्य प्रतिज्ञातमित्यत्रोच्यते तृतीयशब्दावरोधः संशोकजस्य ॥२१॥ आण्डजं जीवजमुद्भिज्जमित्यत्र तृतीयेनोद्भिज्जशब्देनैव स्वेदजोपसंग्रहः कृतः प्रत्येतव्यः उभयोरपि स्वेदजोद्भिज्जयोर्भूम्युदकोद्भेदप्रभवत्वसमानत्वात्स्थावरोद्भेदात्तु विलक्षणो जंगमोद्भेद इत्यन्यत्र स्वेदजोद्भिज्जयोर्भेदवादोऽप्यविरोधः साभाव्यापत्तिरुपपत्तेः ॥२२॥ इष्टादिकारिणा [illegible] त्वस्थावरोहतां तस्मिन्यावत्संपातमुषित्वा ततः सानुशयः अवरोहतीत्युक्तं अथावरोहप्रकारः परीक्ष्यते तत्रेयमवरोहश्रुतिर्भवति अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षतीति तत्र संशयः किमाकाशादिस्वरूपमेवावरोहन्तः प्रतिपद्यन्ते किंवाकाशादिसाम्यमिति तत्र प्राप्तं तावदाकाशादिस्वरूपमेव प्रतिपद्यन्त इति कुतः एवं श्रुतिर्भवति इतरथा लक्षणा स्यात् श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न लक्षणा तथा वायुर्भूत्वा

स्वेदः एवं प्राप्ते नान्यत्वागतेर्विचार्य संप्रतीष्टादिकारिणामवरोहे विशेषमाह साभाव्यापत्तिः यथेतमनेवं चतुष्क्रीत्यायथागतं यथा यथागतं पुनर्निवर्तन्ते तेन ज्ञायतेऽस्माल्लोकान्न शयितः कर्मीणो नदेहाः आकाशं गतो आकाशसदृशो भवति आकाशमाश्रयानं तत्र पिण्डीकृतानिलत्व सिंशो पहिताः वायुने समा भवंति तत्र यथा समो भूत्वा धूमं संगतस्तत्समो भवति धूमसमो भूत्वा अभ्रसमो भवति विपो विभक्तो त्वभ्रं मेह इति सिंचतीति वृष्टिकर्ता मेघः तत्समो भूत्वा वर्षधारा द्वारा पृथिवीं प्रविश्य व्रीहियवादिरूपो भवतीति सिद्धान्तगत्या अयमर्थः एवं तत्र प्रक्रियारूपं संशयवीजमतव्यं सर्वत्र मार्गा हृदयज्ञात्वा तो पत्यो कर्मयुक्तस्यानुशयवत्स्मार्गलक्षणरहितङ्गयंदाधिभवतीत्यादिप्रयोगे भवति अत्र विकारस्य

यद्वक्तं मार्गान्तराभावात्पापिनामपि चन्द्रगतिरिति तत्र तृतीयमार्गस्तेति न्यायाह विद्याकर्मणोरिति मार्गद्वयोक्त्यनन्तरं तृतीयमार्गो
क्रियारम्भार्थः स्तस्तावद्यं शब्दः एतयोर्विद्याकर्मणोः पथिद्वयसाधनयोः रत्यतरेणापि साधनेन येन रानयुक्ताः तेज्जन्ममरणानि तृतीय
तीयमार्गस्यानिम्नतानिभवति किंचाह तौ लोकेन पापिनां चन्द्रगत्यभावाच्च द्वलोको न संपूर्यते इति श्रूयते प्रतिपत्ताविति प्राप्तिसा
धनत्वार्थः अपि च पापिनां चन्द्रगतौ असौ लोकः संपूर्येत तत्रस्थानसंपूर्यतत्वं तत्प्रतिवचने विरुद्धं प्रसज्येतेत्यन्वयः अवरोहाद्धस्त

विद्याकर्मणोरिति तु प्रकृतत्वात् १७ वं चाग्निविद्यायां वेत्थ यथासौ लोको न संपूर्यत इत्यस्य प्रश्नस्य प्रतिवचनावसरे श्रूयते अ
थैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ
लोको न संपूर्यत इति तत्रैतयोः पथोरिति विद्याकर्मणोरित्येतत् कस्मात् प्रकृतत्वात् विद्याकर्मणी हि देवयानपितृयाणयोः
पथोः प्रतिपत्तौ प्रकृते तत्र य इत्थं विदुरिति विद्यया प्रतिपत्तव्यो देवयानः पन्थाः प्रकीर्तितः इष्टापूर्ते दत्तमिति
कर्मणा प्रतिपत्तव्यः पितृयाणः पन्थाः प्रकीर्तितः तत्प्रक्रियायामथैतयोः पथोर्न कतरेण चनेति श्रुतं एतदुक्तं भवति
ये न विद्यासाधनेन देवयाने पथ्यधिकृताः नापि कर्मणा पितृयाणे पथि तेषामेष क्षुद्रजन्तुलक्षणोऽसकृदावर्ती
थः पन्था भवतीति तस्मादपि नानिष्टादिकारिभिश्चन्द्रमाः प्राप्यते स्यादेतत्तेऽपि चन्द्रबिम्बमारुह्य ततोऽवरुह्य क्षुद्रजन्तु
त्वं प्रतिपत्स्यन्त इति तदपि नास्त्यारोहानर्थक्यात् अपि च सर्वेषु प्रयत्सु चन्द्रलोकं प्राप्नुवत्स्वसौ लोकः प्रयद्भिः संपूर्येतेत्यतः
प्रश्नविरुद्धं प्रतिवचनं प्रसज्येत तथा हि प्रतिवचनं दातव्यं यथासौ लोको न संपूर्यते अवरोहाभ्युपगमात् असंपूरणोप
पत्तिरिति चेत् न अश्रुतत्वात् सत्यमवरोहादप्यसंपूरणमुपपद्यते श्रुतिस्तु तृतीयस्थानसंकीर्तनेनासंपूरणं दर्शयति ए
तत्तृतीयं स्थानं तेनासौ लोको न संपूर्यत इति तेनानारोहादेवासंपूरणमिति युक्तं अवरोहस्येष्टादिकारिष्वप्यविशि
ष्टत्वे सति तृतीयस्थानोक्त्यानर्थक्यप्रसंगात् तु शब्दस्तु शाखान्तरीयवाक्यप्रभवामशेषगमनाशंकामपनुदति एवं सत्यपि
कृतोपदेशे यां शाखान्तरीये वाक्ये सर्वशब्दो विशेष्येते ये वा के चास्माल्लोकात्प्रयन्ति चन्द्र
मसमेव ते सर्वे गच्छन्तीति यस्तु नत्यक्तो देहलाभोपपत्तये सर्वे चन्द्रमसं गच्छन्तीत्येवम्पाहुस्ताविशेषं जितत्वा नियमादिति
तत्रयतु चोत न तृतीये तथोपलब्धेः १८ न तृतीयस्थाने देहलाभाय पञ्चसंख्यानियम आहुतीनामादरणीयः कृतः तथोपल
ब्धेः मतस्तेन कल्याश्रुत हान्यापतेरित्याह नास्मितत्वादिति अवरोह एव तृतीयस्थाने श्रुतसंसृष्टेत्यत आह अवरोहस्येति इममधा
नेपुनर्निवर्तन्ते इष्टादिकारिणामप्यवरोहस्य संस्थितत्वात्तु नहि किञ्चिदर्थं तथा अथ तयोरितिमार्गान्तराभावोपक्रमबाधः तृतीयवाध
श्रेयतः स्थानपाठो मार्गत्वं तत्कृतमिदं एवमविशेषस्त्वेमार्गान्तराभावाचेति एवं पञ्चवीजहृदयनिरस्य तृतीयवीजनिरासा
र्थं सूत्रमादत्ते यत्तु नरित्यादिना विपाककर्मस्थानानां क्रिमिकीटादिभावेन जायस्वेत्यादिसूत्यानिरंतरजन्ममरणोपलब्धेर्नाहुति

यवैकेचेत्यविशेषश्रुतेर्वैवस्वतंसंगमनंजनानामिति स्मृतेश्चसंशयेप्रथमाधिकरणान्निरुक्तनियमादेतत्संगत्या पूर्वपक्षस्तत्रैव्या।
चष्टे तमेतत्याधिनो यमराजं पापिजनानां समग्रगमं हविषा प्रीणयतेति श्रुतेरित्यर्थः पूर्वपक्षेपुण्यवतामेव चंद्रगतिरितिनियमा
भावात्पुण्यवत्ययथोपापापाद्वैराग्यपादार्थ्यं चेति फलं सिद्धांते पापिनां चंद्रलोकदर्शनमपि नास्तीति पुण्यापार्थवत्त्वराग्यपदार्थ्यं चेति फलं पद्
मानो देहारंभरविनियमान्यापि प्रथमद्युलोकाग्निप्राप्तिर्वाच्येत्याह देहारंभ इति पापिनां स्वर्गभोगाभावेपि मार्गांतराभावाच

तत्रतावदाह इष्टादिकारिण एव चंद्रमसं गच्छंतीत्येतन्न कस्मात् यतोनिष्टादिकारिणामपि चंद्रमंडलगंतव्यत्वेन श्रुतेत
था सविशेषेणकौषीतकिनः समामनंति ये वै केचास्माल्लोकात्प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति देहारंभोपि च पुनरा
जायमानानां नांतरेण चंद्रप्राप्तिमवकल्पते पंचम्यामाहुतावित्याहुतिसंख्यानियमात् तस्मात्सर्व एव चंद्रमसमासीयः इ
ष्टादिकारिणामितरेषां च समानगतित्वं नयुक्तमिति चेन्नेतरेषां चंद्रमंडले भोगाभावात् संयमनेत्वनुभूयेतरेषामारो
हावरोहौ तद्गतिदर्शनात् १३ तुशब्दः पक्षं व्यावर्तयति नैतदस्ति सर्वे चंद्रमसं गच्छंतीति भोगायैव हि चंद्रारोहणं नहि
ःप्रयोजनं नापि प्रत्यवरोहायैव यथा कश्चिद्वृक्षमारोहति पुष्पफलोपादानायैव न निःप्रयोजनं नापि पतनायैव भो
गश्चानिष्टादिकारिणां चंद्रमसि नास्तीत्युक्तं तस्मादिष्टादिकारिण एव चंद्रमसमारोहंति नेतरेतरे संयमनं यमालय
मवगाह्य स्वदुष्कृतानुरूपा यामीर्यातना अनुभूय पुनरेवेमं लोकं प्रत्यवरोहंत्येवंभूतौ तेषामारोहावरोहौ भवतः कुतः तद्गतिद
र्शनात् तथाहि यमवचनरूपा श्रुतिः प्रयतामनिष्टादिकारिणां यमवश्यतां दर्शयति न सांपरायः प्रतिभाति बालं प्रमाद्यंतं
वित्तमोहेन मूढं अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे इति वैवस्वतं संगमनं जनानामित्येवंजातीयकं च
बहुयमवश्यताप्राप्तिलिंगं भवति स्मरंति च १४ अपि च मनुव्यासप्रभृतयः शिष्टाः संयमने पुरे यमायत्तं कर्मविपा
कं स्मरंति नाचिकेतोपाख्यानादिषु अपि च सप्त १५ अपि च सप्त नरका रौरवप्रमुखा दुष्कृतफलोपभोगभूमित्वेन स्मर्यंते पौ
राणिकैः तानिष्टादिकारिणः प्राप्नुवंति कुतः ते चंद्रं प्राप्नुयुरित्यभिप्रायः ननु विरुद्धमिदं यमायत्ता यातनाः पापकर्मणां
न भवंतीति यावता तेषु रौरवादिष्वन्ये चित्रगुप्तादयो नानाधिष्ठातारः स्मर्यंत इति नेत्याह तत्रापि च तद्व्यापारादविरोधः १६ ते
ष्वपि च सप्तसु नरकेषु तस्यैव यमस्याधिष्ठातृत्वाभ्युपगमादविरोधः यमप्रयुक्ता एव हि ते चित्रगुप्तादयोधिष्ठातारः
इगतिरितिभावः सिद्धांतस्तु व्याचष्टे न शब्द इत्यादिना संयमनं यमलोके यमकृतां यातनामनुभूय आवरोहंतीत्येवं आरोहावितियोज
ना लक्ष्यते याप्रयतां मृत्वा गच्छतां सम्यक्प्रलापात्पत इति संपराय्यपरलोकः तदुपायः सांपरायः बालं मूढविशेषतो वित्तरोगेण मूढं
माहात्म्यमादकुर्वंतं न प्रतिभाति सच बालोयं स्त्री वितादिलोयं स्त्रीवितादिलोकोस्ति न परलोकोस्तीति मानी सर्वे मम वशमायामीः

चरणशब्दवाचस्यैव ग्रहणसंभवाच्चलक्षणप्रयुक्तेतिभावः किंनैव ब्रूते नन्विति प्रतिषिद्धं शीलं क्रोधानृतादिरूपं किंच शीलस्य निष्फलत्वाद्यो
गाद्भूतयोन्यापत्तस्तस्यैव फलं नानुशयस्येत्याह अवश्यं चेति वेदान्तदर्थकर्माण्याचारं विना न फलंती तिस्मृत्या शीलस्य कर्मांगत्वान्न पृथ
क्फलापेक्षा गि फलेनार्थवत्वान्न चांगमात्राद्योन्यापत्तिफलमिति वाच्यं अंगस्य फलासंभवेन मुख्यार्थस्याचारस्य ग्रहणयोगान्न लक्षण
त्वेविति समाधानार्थः यथाचारस्य स्नानादिवत्पुरुषसंस्कारतया पुरुषार्थत्वं तदाप्यविरोधइत्याह पुरुषार्थत्वेपीति अंगावबद्धीपान्ति वा
दावार्थवानित्यर्थः अस्तु तर्हि शीलाख्याचारादेवयोन्यापत्तिरित्याशंक्य पुण्येवैपुण्येन कर्मणेत्यादि श्रुत्याविरोधान्नैवमित्याह कर्मचेति ।
पारयमाणः शान्तः यद्यप्यक्रोधादिरूपं शीलं साधारणधर्मात्मकं विशेषरूपात्कर्मणो भिन्नं न तथापि चरणाचारशब्दौ कर्मवाचकावितिनल

नतु शीलस्यैवश्रौतस्य विहितप्रतिषिद्धस्य साधुसाधुरूपस्य शुभाशुभयोन्यापत्तिः फलं भविष्यति अवश्यं शीलस्यापि किंचित्फ
लमभ्युपगंतव्यं अन्यथा स्यानर्थक्यमेव शीलस्य प्रसज्येतेति चेत् नैष दोषः तदपेक्षत्वात् इष्टादिदिक कर्मजातं चरणापेक्षं नहि
सदाचारहीनः कश्चिदप्यधिकृतः स्यात् आचारहीनं न पुनंति वेदा इत्यादि स्मृतिभ्यः पुरुषार्थत्वेप्याचारस्य नानर्थक्यं इष्टादौहि
कर्मजाते फलमारभ्यमाणे तदपेक्ष एवाचारस्तत्रैव किंचिदतिशयमारप्स्यते कर्म च सर्वार्थकारीति श्रुतिस्मृतिप्रसिद्धिस्तस्मात्क
र्मैव शीलोपलक्षितमनुशयभूतं योन्यापत्तौ कारणमिति कार्ष्णाजिनेर्मतं नहि कर्मणि संभवति शीलाद्योन्यापत्तिर्युक्तानहि प।
द्भ्यां पलायितुं पारयमाणो जानुभ्यां रंहितुमर्हतीति सुकृतदुष्कृते एवेति वादरिः वादरिस्त्वाचार्यः सुकृतदुष्कृते एव चरण
शब्देन प्रत्याख्येते इति मन्यते चरणमनुष्ठानं कर्मेत्यनर्थांतरं तथाह्यविशेषेण कर्ममात्रे चरति प्रयुज्यमानो दृश्यते योऽयीष्टा
दिलक्षणं पुण्यं कर्म करोति तं लौकिका आचक्षते धर्मं चरत्येष महात्मेति आचारोपि च धर्मविशेष एव भेदव्यपदेशस्तु कर्मचरणं
योब्राह्मणपरिव्राजकन्यायेनाप्युपपद्यते तस्माद्रमणीयचरणाः प्रशस्तकर्माणः कपूयचरणा निंदितकर्माण इति निर्णयः
अनिष्टादिकारिणामपि च श्रुतं १२ इष्टादिकारिणश्चंद्रमसं गच्छंतीत्युक्तं ये त्वितरे निष्टादिकारिणस्तेपि किं चंद्रमसं गच्छंतु तनग
च्छंतीति चिंत्यते

ती।

तणाव ग्रहइति वादरिमतं मुख्यमिति सिद्धांतमाह सुकृतेति चरणशब्दार्थमुपसंहरति आचारोपीति कर्मण एवाचारत्वे यथा
कारीत्यादिभेदोक्तिः कथमित्यत आह भेदव्यपदेश इति निरुपपदादाचारशब्दात्सदाचाररूपो विशेषो भाति अन्तस्तत्सम
भिव्याहृतः कर्मसामान्यवाचको यथाकारीति शब्दस्तदितिशवि शेषपरः एवमन्नवयानि कर्माणीति सामान्यतः अस्माकं सुचि
तानीति विशेषइति विवेकः तस्मादनुशयबलादागत्य वर्षप्रभावानुसंधानाद्वैराग्यमिति सिद्धं एवं पुण्यात्मनोगत्याग
तिचिन्तया वैराग्यं निरूप्य पापीनां तच्चिन्तया तन्निरूपयति अनिष्टादिकारिणामपि च श्रुतं ॥ रामकृष्णायनमः॥

प्रात-
स्तः प्र-
६

एवं मरणस्य व्यंजकत्वाङ्गीकारेणादीपदृष्टान्तो निरस्तः अङ्गीकारेप्यनेकलोकदृष्टान्तं इत्याह स्थूलेति सत्त्वमनभिव्यक्तरूपमिति मरणे सर्वकर्मा
भिव्यक्तासिद्धिरिति शेषः एवं सर्वकर्मसंचय एकजन्मारम्भक इत्यैकभविकः कर्माशय इति मतं निरासमुपसंहरति तस्मादिति चरणा
श्रुत्यातत्तः पोषणान्यादिस्मृत्या प्रबलप्रतिबन्धादिति न्यायेन चानभिव्यञ्जककर्मसद्भावादित्यर्थः ननु मरणस्यानुपपत्त्या कार्य एकभवि
कत्वमत आह पोषनिमित्तत्रपोष्व्याचष्टे नेचेत्यादि अवरोहमार्गे इत्यभ्यूयते तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते
तेयथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओ
षधिवनस्पतयस्तिलमाषा इति जायन्ते अतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिंचति तद्भूय एव भवति तद्य इह रमणीय

स्थूलस्त्वमरूपाभिव्यक्तिवद्वेदं दृष्टव्यं यथा हि प्रदीपः समानेपि संनिधाने स्थूलरूपमभिव्यनक्ति न सूक्ष्मं एवं प्रायणं व्यंजकं सत्
समानेप्यनारब्धफलस्य कर्मजातस्य प्राप्तावसरत्वबलवतः कर्मणो वृत्तिमुद्भावयति न दुर्बलस्येति तस्माच्छ्रुतिस्मृतिन्याय
विरोधादश्लिष्टोयमशेषकर्माभिव्यक्त्यभ्युपगमः शेषकर्मसद्भावे निर्मोक्षप्रसंग इत्ययमप्यस्थाने संभ्रमः सम्यग्दर्शनादशे
षकर्मक्षयश्रुतेः तस्मात्स्थितमेतदनुशयवन्तोवरोहन्तीति तेचावरोहन्तो यथेतमनेवं चावरोहन्ति यथेतमिति यथागत
मित्यर्थः अनेवमिति तद्विपर्ययेणेत्यर्थः धूमाकाशयोः पितृयाणेध्वन्युपात्तयोरवरोहे संकीर्तनाद्यथेतं शब्दाच्च यथा
गतमिति प्रतीयते रात्र्याद्यसंकीर्तनादभ्राद्युपसंख्यानाच्च विपर्ययोपि प्रतीयते चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः
९ अथापि स्यात्प्राश्रुतिरनुशयसद्भावप्रतिपादनपरा तद्य इह रमणीयचरणा इति सा खलु चरणाद्योन्यापत्तिं दर्शयति नानुश
यात् अन्यच्चरणमन्योनुशयः चरणं चारित्रमाचारः शीलमित्यनर्थान्तरं अनुशयस्तु भुक्तफलात्कर्मणोतिरिक्तं कर्माभिप्रेतं श्रुतिश्च
कर्मचरणे भेदेन व्यपदिशति यथाकारी यथाचारी तथा भवतीति यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नेतराणि यान्यस्माकं सुचरितानि
तानि त्वयोपास्यानीति च तस्माच्चरणाद्योन्यापत्तिश्रुतेर्नानुशयसिद्धिरिति चेन्नैष दोषः यतोनुशयोपलक्षणार्थैवेषा श्रुति
रिति कार्ष्णाजिनिराचार्यो मन्यते आनर्थक्यमिति चेन्न तदपेक्षत्वात् १०॥ स्यादेतत्कस्मात्पुनश्चरणशब्देन श्रौतं शीलं विहाय

यथाचारी

नो४

चरणा रमणीयचरणा रमणीयां योनिमापद्यन्त इति धूमाय धनायेत्येतं यथागतं तथेतमध्वानं पुनरायान्तीत्यकार्याधूमादिह्रूपपित्रमार्गस्य
रात्र्यादिकं नोक्तमधिकं चाभ्रादिकमुक्तमिति मत्वा तत्रोक्ते तोक्रमयथेतमनेवं चेति अविशिष्टं ... भविष्यति
सप्रति श्रुतिस्थचरणपदव्याख्यानेपरपूर्वकं सम्बन्धमाचष्टे चरणादिति अत्राह सर्वं हि तत्कर्मणा मनसा गिरा अनु
ग्रहश्च ज्ञानं च शीलमेतद्धि दुर्बुधा इति स्मृत्या वक्रोधाद्रोहादयः शास्त्रार्थज्ञानरूपं शीलं सर्वकर्मागमत्वं तद्बोधकं
चरणपदसंगतः श्रौतादिकर्मणो लक्षकं कर्मणः एवानुशयस्याधर्मारव्यास्वेवमिति कर्मलक्षणैवतदभिप्रायः वाख्यानुशयसि

प्रसंगमत्वोत्तरं शङ्कते आरब्धेति आरब्धवदनारब्धस्यापि बलवत्तः प्रतिबन्धत्वात्सर्वकर्मणः फलदानायाभिव्यक्तिरितिसमौत्ते यद्ये
ति अनारब्धफलत्वाविशेषात्सर्वकर्मणामभिव्यक्तिमाशंक्य मियोविरुद्धस्वर्गनरकादिदेहफलानामेकदेहारंभकत्वासंभवउक्त
स्तं विहणोति नह्येति अस्तु तर्हि दुर्बलस्य कर्मणो नाश इत्यत आह नो चेति नाभिव्यक्ती यते कर्मत्यको न उत्सर्गः स च प्रायश्चित्तब
ह्मज्ञानध्यानै र्बाध्यते न मरणमात्रेणेत्यर्थः मरणे न दुर्बलकर्मा विनाशो मानमाह स्पष्टेति इति कर्मनाशपक्षं निरस्य प्रकृत न्ना
त्वकर्माभिव्यक्तिपक्षे दोषान्तरमारमाह यदि चेति कृत्स्नकर्मणामेकस्मिन्देवादिजन्मनि भोगेन क्षयान्नजन्मान्तरस्याज्ञाना

आरब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य तत्सुद्भवानुपपत्तेस्तदुपशमात्प्रायणकाले हि तदुद्भवो भवतीति यद्युच्येत तत्
नोपक्रम्यं यद्येवं तर्हि प्राक्प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्यानुद्भवानुपपत्तिरित्येवं प्रायणकाले पि विरुद्धफ
लानेकस्य कर्मणो युगपत्फलारंभासंभवाद्बलवता प्रतिबद्धस्य दुर्बलस्यानुद्भवानुपपत्तिरिति नह्यनारब्धफल
त्वसामान्येन जात्यन्तरोपभोग्यफलमप्यनेकं कर्म कस्मिन्प्रायणे युगपदभिव्यक्तं सदेकां जातिमारभत इति शक्यं वक्तुं प्र
तिनियतत्फलत्वविरोधात् नापि कस्यचित्कर्मणः प्रायणेभिव्यक्तिः कस्यचिदुच्छेद इति शक्यते वक्तुं ऐकान्तिकफ
लत्वविरोधात् न हि प्रायश्चित्तादिभिरिवेतराभिर्विना कर्मणां विच्छेदः संभाव्यते स्थिते पि विरुद्धफलेन कर्मणा प्रतिबद्ध
स्य कर्मान्तरस्य चिरमवस्थानं दर्शयति कदाचित्सुकृतं कर्म कूटस्थमिव तिष्ठति मज्जमानस्य संसारे यावद्दुःखाद्विमुच्य
ते इत्येवंजातीयका यदि च कृत्स्नमनारब्धफलं कर्म एकस्मिन्प्रायणेभिव्यक्तं जातिमारभेत ततः स्वर्गनरकतिर्यग्योनि
ष्वधिकारानवगमाद्धर्माननुपपत्तेर्निमित्ताभावान्नैताज्ञातिरुपपद्येत ब्रह्महत्यादीनां च एकैकस्य कर्मणोनेकजन्मनि
मित्तत्वस्मरणमनुपपन्नं स्यात् न च धर्माधर्मयोः स्वरूपफलसाधनादिसमधिगमे शास्त्राद्दतिरिक्तं कारणं शक्यं संभा
वयितुं न चादृष्टफलस्य कर्मणः कारीर्यादेः प्रायणमभिव्यञ्जकं संभवतीत्यव्यापिकापीयं प्रायणस्याभिव्यञ्जकत्वकल्पना

भावानभिव्यक्तिरित्यज्ञदेवस्य कश्चान्तरालदशायामित्यर्थः श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणां चंडालपुल्कसानां च ब्रह्म
हा योनिमृच्छतीत्यादिस्मृतीति विरोधाच्च न सर्वकर्मणामेकजन्मारंभकत्वमित्याह ब्रह्मेति न त्वेकस्य कर्मणः कथमनेकजन्म
फलकत्वमहदृष्टत्वादित्यत आह नचेति किं च व्यंजकत्वे पि मरणस्य किं सर्वकर्मव्यंजकत्वमुत उत यत्किंचित्कर्मव्यंजकत्वं नाद्यः
इह कृतकारीर्यादेरैहिकफलहेतोर्मरणाव्यंजकत्वासंभवादित्याह न चेति द्वितीयं निरस्यत्यपरोक्षं दृष्टान्तं विचटयति प्रदीये
ति रूपाणां प्रदीपवन्मरणं न कस्यचिदपि कर्मणो व्यंजकं किंतु प्रबलकर्मप्रतिबंधाभावे दुर्बलं व्यज्यत इत्यर्थः ॥ राम ॥

भोगमात्रविशेषो जात इति समाधत्ते पाठमित्यादिना इदमेकदेशिव्याख्यानं दूषयति नचेति स्वर्गकामो यजेतेत्यादिशास्त्रेण स्वर्गभोगार्थक
मेवोदितं तच्छेषस्य मर्त्यभोगहेतुत्वे शास्त्रविरोध इत्यर्थः किंच स्वर्गहेतुकर्मशेषादवरोहक एव योन्यापत्तिः श्रुतिविरोध इत्याह
अवरोहतीति स्वाभिमतमनुशयमाह तस्मादिति एवं पक्षबीजमनूद्य दूषयति यदित्यादिना स्वयमित्वा पुनरागच्छतीति प्राप्यान्तमि
तिवाक्येन गम्यत इति योजना जन्मारंभदृष्टभोगलिंगानुगृहीतया रमणीयचरणश्रुत्या हि कानुशयाख्यकर्मविशेषपरया

वाढं तथापि स्वल्पकर्मविशेषमात्रेण तत्रावस्थानं न लभ्यते यथा किल कश्चित्सेवकः सकलैः सेवोपकरणैः राजकुलम
पसृप्तश्चिरप्रवासात्परिक्षीणबहूपकरणः छत्रपादुकादिमात्रावशेषो न राजकुलेवस्थातुं शक्नोत्येवमनुशयमात्रपरि
ग्रहो न चन्द्रमण्डलेवस्थातुं शक्नोतीति न चैतद्युक्तमिव नहि स्वर्गार्थस्य कर्मणो भुक्तफलस्यावशेषानुवृत्तिरुपपद्यते का
र्यविरोधित्वादित्युक्तं ननु नैतदप्युक्तं न स्वर्गफलस्य कर्मणो निखिलस्य भुक्तफलत्वं भविष्यतीति नेदं तदपेशलं स्वर्गार्थं कि
लकर्म स्वर्गस्थस्यैव स्वर्गफलं निखिलं न जनयति स्वर्गच्युतस्यापि किंचित्फललेशं जनयतीति न शब्दप्रमाणकाना
मीदृशी कल्पना अवकल्पते स्नेहभाण्डे तु स्नेहलेशानुवृत्तिर्दृष्टत्वादुपपद्यते तथा सेवकस्योपकरणलेशानुवृत्तिः न
त्विह तथा न स्वर्गफलस्य कर्मणो लेशानुवृत्तिर्दृश्यते नापि कल्पयितुं शक्यते स्वर्गफलत्वशास्त्रविरोधात् अवश्यं
चैतदेवं विज्ञेयं न स्वर्गफलस्येष्टादेः कर्मणो भाण्डानुसारिस्नेहवदेकदेशोनुवर्तमानोनुशय इति यदि हि येन सु
कृतेन कर्मणेष्टादिना स्वर्गमन्वभूवंस्तस्यैव कश्चिदेकदेशोनुशयः कल्प्येत ततो रमणीय एवैकोनुशयः स्यान्न विपरीतस्तत्रेयमनुश
यविभाग श्रुतिरुपरुध्येत तद्य इह रमणीयचरणा अथ य इह कपूयचरणा इति तस्मादामुष्मिकफले कर्मजाते उपभुक्ते
वशिष्टमैहिकफलं कर्मान्तरजातमनुशयस्तद्वन्तोवरोहन्तीति यदुक्तं यत्किंचेत्यविशेषपरामर्शात्सर्वस्येह कृतस्य कर्मणः फ
लोपभोगेनान्तं प्राप्य निरनुशया अवरोहन्तीति नैतदेवमनुशयसद्भावस्यावगमितत्वात् यत्किंचिदिह कृतमामुष्मिकफलं कर्मा
रब्धभोगं तत्सर्वं फलोपभोगेन क्षपयित्वेति गम्यते यदप्युक्तं प्रायणमविशेषादनारब्धफलं कृत्स्नमेव कर्माभिव्यनक्ति तत्र केन
चित्कर्मणामुष्मिके लोके फलमारभ्यते केनचिदस्मिन्नित्ययं विभागो न संभवतीति तदप्यनुशयसद्भावप्रतिपादनेनैव प्रत्युक्तं
अपि च केन हेतुना प्रायणमनारब्धफलस्य कर्मणोभिव्यंजकं प्रतिज्ञायते इति वक्तव्यम् ॥ ॥

विरोधात् यत्किंचेति यावत्संपातमिति च सामान्यश्रुत्योरामुष्मिकविषयत्वेन संकोचो न्याय्य इति भावः मरणं कृत्स्नकर्माभिव्यंजकम्
मिति युक्तमनुशयश्रुतिविरोधादित्याह नपीति बलवदनारब्धकर्मप्रतिबंधाच्च न कृत्स्नकर्माभिव्यक्तिरित्याह अपि चेत्यादिना

वरणीयख्यापीत्यमात्रादिवरोहंतिश्रमेसिद्धांतप्रतिज्ञांव्याचष्टे येनेत्यादिना तत्रावरोहतांजीवानांमध्येयेकेचिदिहकर्मभूमौरमणीयचरणाः पुण्यकर्माणः पुण्ययोनिभाजश्रुतियत्तद्भाष्येह अवरूपं हीत्यर्थः कपूयचरणा पापं दुष्टशब्दस्याऽत्रसमर्थत्वख्यापनमाह दृष्टत्र ति पुण्योवैपुण्येनकर्मणाभवतिपापः पापेनेत्यादिशास्त्रात्सुखदुःखयोर्धर्माधर्महेतुकत्वमवगतेतत्रस्व जन्मारब्धदृष्टो भोगः कर्महेतुकः भोगत्वात्स्वर्गभोगवत् इत्यनुमानात्सिद्धिः विपर्ययेचहेत्वभावात्भोगस्याकस्मिकत्वप्रसङ्गाद्युत्सर्पः स्तत्तावा श्रमाः आश्रमिणः प्रेत्यमत्वालोकांतरेकर्मफलंत्यक्त्वा ततः शेषेणभुक्तादन्येनकर्मणाऽनुशयाख्येनपुनर्जन्मप्रति

येनकर्मवृंदेनचंद्रमसमारूढाः फलोपभोगायतस्मिन्नुपभोगेनक्षपितेतेषांयदम्मयंशरीरंचंद्रमस्युपभोगायारब्धंतदुप भोगक्षयदर्शनशोकाग्निसंपर्कात्प्रविलीयते सवितृकिरणसंपर्कादिवहिमकरकः हुतभुगर्चिःसंपर्कादिवचघृत काठिन्यंततः कृतात्ययेकृतस्येष्टादेःकर्मणः फलोपभोगेनोपक्षयेसतिसानुशयाएवेमंवरोहंतिकेनहेतुना दृष्ट स्मृतिभ्यामित्याह तथाहिप्रत्यक्षाश्रुतिः सानुशयानामेववरोहंदर्शयति तयइहरमणीयचरणाअभ्याशोहयत्तेर मणीयांयोनिमापद्येरन्ब्राह्मणयोनिंवाक्षत्रिययोनिंवाचंडालयोनिंवेति चरणशब्देनानुशयः सूच्यतइतिवर्णयिष्यति दृ ष्टश्चायंजन्मनेवप्रतिप्राण्युच्चावचरूपउपभोगःप्रविभज्यमानः आकस्मिकत्वासंभवादनुशयसद्भावंसूचयति अभ्युदय प्रत्यवाययोःसुकृतदुष्कृतहेतुत्वस्यसामान्यतःशास्त्रेणावगमितत्वात्स्मृतिरपिवर्णाआश्रमाश्चस्वकर्मनिष्ठाःप्रेत्यकर्म फलमनुभूयततः शेषेणविशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसोजन्मप्रतिपद्यंतइतिसानुश यानामेवावरोहंदर्शयति कःपुनरनुशयोनामेति केचित्तावदाहुः स्वर्गार्थस्यकर्मणोभुक्तफलस्यावशेषःकश्चित् नुशयोनामभांडानुसारिस्नेहवद्यथाहिस्नेहभांडंरिच्यमानंनसर्वात्मनारिच्यतेभांडानुसार्येवकश्चित्स्नेहशेषोव तिष्ठतेतथानुशयोपीति ननुकार्यविरोधित्वाददृष्टस्यनभुक्तफलस्यावशेषस्यावस्थानंन्याय्यंनायंदोषः नहिसर्वा त्मनाभुक्तफलत्वंकर्मणांप्रतिजानीमहे ननुनिरवशेषकर्मफलोपभोगायचंद्रमंडलमारूढाः ॥ ॥

पयंतइतिसंबंधःविशिष्टदेशादयोमेधांतादपाठगुणायेषुतेतथोक्ताः श्रुतंवृत्तंआचारःस्वाभिमतानुशयंवक्तुंपृच्छति कःपुनरितिकृतस्यकर्मणःस्वर्गेभोगेसतिभुक्तस्यकर्मणोलेशोनुशयस्तद्वानवरोहतिभांडेस्नेहलेशसदृष्टत्वात्तततःशो षेणेतिस्मृतेश्चान्यकर्दोषव्याख्यामाह केचिदित्यादिनारिच्यमानस्नेहेनवियुज्यमाने ननुभोगनाश्यत्वात्कर्मणोलेशोन युक्तइतिशंकते नन्वितिकृत्स्नकर्मणोभोगाज्ज्ञातेनाशस्यात्रभोगोजातइतिपरिहारार्थः भोगोनजायतइत्ययुक्तमिति

तेरमणीयांब्राह्मणादियो
निमापद्यंतेयेकपूयचरणाः ४

प्रात- स्त्र- ६

विषयात्तत्पर्यमन्यत्तन्नरव्यमित्यत्र अतं तरार्थस्तत्रूपोषं व्याचष्टे तथा हीति एवं गतिपर्यालोचनया वैराग्यमिति सिद्धं इदानीं गत्युतं
तरभाविनीमागतिं निरूपयति कृतात्ययइति भोक्तव्यकर्मसामान्यानंतर्यमपशायार्थः यथेतमित्यारभ्य स्थावरादियोनिमित्यंतवाक्यया
बलात् अवरोह आम्नायते इति योजना अत्र यावत्संपातमिति विशेषणात् रमणीयचरणा इति वाक्याच्च सानुशयमाह तत्रेति अनुशयः कर्मात्र
पर्यंकर्मात्र सर्वपर्यंतकर्माभावेनागतेरनियमात् वैराग्यपादार्थसिद्धौ नेकर्मसत्वेनागतिनियमाद्वैराग्यपादार्थमिति भेदः तथाभिष्टादि

तथा हि इष्टादिकारिणस्तं तरं चंद्रमंडले भोगमुक्त्वावं दर्शयति स सोमलोके विभूतिमनुभूय पुनरावर्तत इति तथा तस्य स्मृत्यंतरं अपश्ये
शतेयित्वा गाजितलोकानामानंदाः स एकः कर्मदेवानामानंदा ये कर्मणा देवत्वमभिसंपद्यंते इति इष्टादिकारिणां देवैः संवसतां
भोगप्राप्तिं दर्शयति एवं भाक्तत्वादन्नभाववचनं इष्टादिकारिणः त्र जीवा रंहंत इति प्रतीयते तस्मादूह रंहति संपरिष्वक्त इतिव
यंत्र कर्मवान् कृतात्ययेनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ इष्टादिकारिणां धूमादिना वर्त्मना चंद्रमंडलमधिरुह्य
तां भुक्त्वा भोगानां ततः प्रत्यवरोह आम्नायते तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तंते यथेतमित्यारभ्य यावद्रमणीय
चरणा अभ्यासो ह यत्ते रमणीयां योनिमापद्येरन् कपूयचरणाः श्वादियोनिमिति तत्रेदं विचार्यते किं निरनुशया भुक्तकृत्स्नकर्माणोवरोहंत्याहोस्वित्सानु
शया इति किं तावत्प्राप्तं निरनुशया इति कुतः यावत्संपातमिति विशेषणात् संपातशब्देनात्र कर्माशय उच्यते संपतंत्यनेनास्माल्लो
कादमुं लोकं फलोपभोगायेति यावत्संपातमुषित्वेति च कृत्स्नस्य तस्य तत्रैव भुक्ततां दर्शयति तेषां यदा तत्पर्यवैतीति च श्रुत्यंतरेण
चैतदेव दर्शयति स्यादेतत् यावदमुष्मिंल्लोके उपभोक्तव्यं कर्म तावदुपभुंक्त इति कल्पयिष्यामीति नैवं कल्पयितुं शक्यते यत्किंचे
त्यन्यत्र परामर्शात् प्राप्यांतं कर्मणस्तस्य यत्किंचेह करोत्ययं तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण इत्यपरा श्रुतिः यत्किंचे
त्यविशेषपरामर्शेन कृत्स्नस्येह कृतस्य कर्मणस्तत्र क्षयितां दर्शयति अपि च प्रायणमनारब्धफलस्य कर्मणोभिव्यंजकं प्राक्प्रायणा
दारब्धफलेन कर्मणा प्रतिबद्धस्याभिव्यक्त्यनुपपत्तेः तच्चाविशेषाद्यावत्किंचिदनारब्धफलं तस्य सर्वस्याभिव्यंजकं न हि साधारणे
निमित्ते नैमित्तिकमसाधारणं भवितुमर्हति न ह्यविशिष्टे प्रदीपसन्निधौ घटोभिव्यज्यते न पट इत्युपपद्यते तस्मान्निर
नुशया अवरोहंतीत्येवं प्राप्ते ब्रूमः कृतात्ययेनुशयवानिति ॥ ॥ ॥

कारिणां यदा तत्कर्म पर्यवैतीति विपरिक्षीणं भवति तदा पुनरावर्तंत इति श्रुत्यंतरेणापि कृत्स्नकर्मणश्चंद्रलोके भु
क्तत्वमुच्यत इत्यर्थः यावत्पदसंकोचो न युक्तः श्रुत्यंतरविरोधादित्याह नैवमिति अयं नरो यत्किंचिदिहलोके कर्म क
रोति तस्यांतं फलं परलोके प्राप्य कर्मार्थं पुनरायातीति श्रुत्यर्थः कर्माभावे अतिसत्कार्ययुक्तिमाह अपि चेति अभिव्य
क्तिः फलोन्मुखता मरणेनाभिव्यक्तस्य कर्मणः परलोकभोगस्यावश्यंभावात्कर्माभाव इत्यर्थः ॥ रामायनमः ॥

राम ४

मा॰

अग्निहोत्रप्रकरणे जनकेन याज्ञवल्क्यं प्रति निरुक्तेनैवैनयोः यं प्रश्नं नराहुत्योरुत्क्रान्त्यादिगतिं प्रतिष्ठां तृप्तिं पुनरावृत्तिं लोकं प्रत्युत्थायिनं तयोः प्रश्नाः कृतास्तेषां निर्वचनमपि राज्ञैवोक्तं ते वा एते आहुती हुते उत्क्रामतः ते अन्तरिक्षमाविशतः ते अन्तरिक्षमेवाहवनीयं कुर्वाते ते दिवमेवाहवनीयं प्रतिष्ठां कुर्वाते ते दिवं तर्पयतस्ते ततः पुनरावर्तेते ततः पृथिवीं पुरुषं योषितं चाविश्य ततः पुनः पुरुषरूपेणोत्तिष्ठत इति वाक्यशेषेण कृतास्ते प्रश्ना नरस्तत्र व्याख्याता इति कथमित्यादिना अत्र सामान्येन चन्द्रप्राप्त्यनन्तरमिष्टादिकारिणामिति निर्धारितं निरासार्थं अत्ये

कथं पुनरिष्टादिकारिणां स्वकर्मफलोपभोगाय स्वर्गं प्रति गताः प्रतिज्ञायते यावता तेषां धूमादिमार्गेण चन्द्रमसमधिरूढानां मन्त्रभावं दर्शयति एष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्तीति ते चन्द्रं प्राप्यान्नं भवन्ति तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेनांस्तत्र भक्षयन्तीति च समानविषयश्रुत्यन्तरं न च व्याघ्रादिभिरिव देवैर्भक्ष्यमाणानामुपभोगः संभवतीत्यत उत्तरं पठति भाक्तं वानात्मवित्त्वात्तथा हि दर्शयतीति वाशब्दश्चोदितदोषव्यावर्तनार्थः भाक्तमेषामन्नत्वं न मुख्यं मुख्ये स्वर्गकामो यजेतेत्येवंजातीयकाधिकारश्रुतिरुपरुध्येत चन्द्रमण्डले चेदिष्टादिकारिणामुपभोगो न स्यात्किमर्थमधिकारिण इष्टाद्यायासबहुलकर्म कुर्युः अन्नशब्दश्चोपभोगहेतुत्वसामान्यात् अनन्नेऽप्युपचर्यमाणो दृश्यते यथा विशोऽन्नं राज्ञां पशवोऽन्नं विशामिति तस्मादिष्टस्त्रीपुत्रमित्रभृत्यादिभिरिव गुणभावोपगतैरिष्टादिकारिभिर्यत्सुखविहरणं देवानां तदेवैषां भक्षणमभिप्रेतं न मोदकादिवच्चर्वणं निगरणं वा न ह वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्तीति च देवानां चर्वणादिव्यापारं वारयति तेषां चेष्टादिकारिणां देवान्प्रति गुणभावोपगतानामप्युपभोग उपपद्यते राजोपजीविनामिव परिजनानां अनात्मवित्त्वाच्चेष्टादिकारिणां देवोपभोग्यभाव उपपद्यते तथा हि श्रुतिरनात्मविदां देवोपभोग्यतां दर्शयति अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानामिति स चास्मिन्नपि लोके इष्टादिभिः कर्मभिः प्रीणयन्पशुवद्देवानामुपकरोत्यमुष्मिन्नपि लोके तदुपजीवी तदादिष्टं फलमुपभुञ्जानः पशुवदेव देवानामुपकरोतीति गम्यते अनात्मवित्त्वात्तथा हि दर्शयतीत्यस्यापरा व्याख्या अनात्मविदो ह्येते केवलकर्मिण इष्टादिकारिणो न ज्ञानकर्मसमुच्चयानुष्ठायिनः पञ्चाग्निविद्यामिहात्मविद्येत्युपचरन्ति प्रकरणात् पञ्चाग्निविद्याविहीनत्वाच्चेदमिष्टादिकारिणां गुणवादेना

न्नत्वमाह ते चन्द्रमिति यथा यज्ञे चमसस्थं सोममृत्विज आप्यायस्वेति क्रियापदं लोट् प्रतः पुनराप्यायपुनः पुनरपक्षयं भक्षयन्ति एवमेतानिष्टादिकारिणोऽन्नरूपान्भक्षयन्ति देवा इत्यर्थः अधिक्रियते पुरुषो विधिना संबध्यते येनेत्यधिकारः फलकामना शास्त्रानर्थक्यवारणाय अन्नत्वं गौणमिति भावः केन दोषेण तेषां देवभाग्यत्वं तत्राह अनात्मवित्त्वाच्चेति यथा पशुर्भोग्य एवमज्ञः स भेदधीमान्देवानां भोग्य इत्यर्थः आत्मशब्दस्य मुख्यत्वान्न बले नत्वं शंक्याख्याय प्रकृतपञ्चाग्निविद्यायाः स्तुतये कस्मादात्मत्वेनोपचरितादिति व्या

उपपद्यते इत्यस्या र्थोनस्मात् श्रद्धाकार्यमिति तस्याः श्रद्धाया हुतेः सोमः संभवतीत्यादिना श्रद्धासोमादीनां पूर्वपूर्वपरिणामत्वं श्रूयते ततो द्रवपरिणामत्वात् श्रद्धाया आप्त्वं प्रत्ययात्मकस्य श्रद्धाया आहुतित्वायोगाच्चेत्यर्थः श्रद्धाशब्दस्याप्सु तत्कार्यत्वेन गौणत्वं हि तत्कालत्वाणां वक्तुं श्रद्धाया अद्भिरेव कर्मयोगित्वहेतुत्वात् तद्वधमाह श्रद्धापूर्वं इति अस्मै यजमाना पत्नीना पर्यापः श्रद्धा सत्कर्मते जनयन्तीति श्रुत्यर्थः अयोगतिमयेत्याद्भिः सह जीवानां गतिमात्रिय समाधत्ते अथापीत्यादिना द्युलोकाग्नौ श्रद्धाहुतेः सोमो राजा संभव

श्रद्धाकार्यं च सोम त्वष्टादिस्थ लीभवद्देहत्वेन लक्ष्यते सा च श्रद्धायाः अत्र विप्रुतिः कारणानुरूपं हि कार्यं भवति न च श्रद्धाख्यः प्रत्ययो मनसो जीवस्य वा धर्मः सन्धर्मिणो निष्क्रम्य होमायोपादातुं शक्यते पश्वादिभ्य इव हृदयादीनीत्याप एव श्रद्धाशब्दाभवेयुः श्रद्धाशब्दस्याप्सु प्रयोगो वैदिकप्रयोगदर्शनात् श्रद्धा वा आप इति तनत्वे श्रद्धासाहृप्यं गच्छंत्यापो देहबीजभूता इत्यतः श्रद्धाशब्दाः स्युः यथा सिंह पावो भवति श्रद्धापूर्वककर्मसमवायाच्चाप्सु श्रद्धाशब्द उपपद्यते मंचुशब्द इव पुरुषेषु श्रद्धाहेतुत्वाच्च श्रद्धाशब्दोपपत्तिः यथोक्तं हि आपोहास्मै श्रद्धां सन्नमन्ते पुण्याय कर्मणे इति श्रुतेः अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ६ अथापि स्यात् अस्य प्रतिवचनाभ्यां नामापः श्रद्धादिक्रमेण पञ्चम्यामाहुतौ पुरुषाकारं प्रतिपद्येरन्निति न तस्मात् परिष्वक्ता जीवा रंहन्ति अश्रुतत्वात् तत्रापामिव जीवानां श्रावयिता कश्चिच्छब्दोऽस्ति तस्माद्रंहति संपरिष्वक्त इत्ययुक्तमिति चेन्नैष दोषः कुतः इष्टादिकारिणां प्रतीतेः अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्तीति इष्टादिकारिणां धूमादिना पितृयानेन पथा चन्द्रप्राप्तिं कथयति आकाशाच्चन्द्रमसमेष सोमो राजेति त एवेहापि प्रतीयन्ते तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा भवतीति श्रुतिसामान्यात् तेषां चाग्निहोत्रदर्शपूर्णमासादिकर्मसाधनभूता दधिपयः प्रभृतयो द्रवद्रव्यभूयस्त्वात्प्रत्यक्षमेवापः सन्ति ता आहवनीये हुताः सूक्ष्मा आहुत्यपूर्वरूपाः सत्यस्तानिष्टादिकारिण आश्रयन्ति तेषां शरीरं नैधनविधानेनान्त्येऽग्नावृत्विजो जुह्वत्यसौ स्वर्गाय लोकाय स्वाहेति तत्तस्याः श्रद्धापूर्वककर्मसमवायिन्य आहुतिमय्य आपोऽपूर्वरूपाः सत्यस्तानिष्टादिकारिणो जीवान्परिवेष्ट्यामुं लोकं फलदानाय नयन्तीति यत्तदत्र जुहोतिनाभिधीयते श्रद्धां जुह्वतीति तथा चाग्निहोत्रे षट्प्रश्नप्रतिवचनरूपेण वाक्यशेषेणैवापत्त्याहुती उत्क्रामतः इत्येवमादिनाग्निहोत्राहुत्योः फलारम्भाय लोकान्तरप्राप्तिर्दर्शिता तस्मादाहुतिमयीभिरद्भिः संपरिष्वक्ता जीवा रंहन्ति स्वकर्मफलोपभोगायेति श्लिष्यते ॥

तीत्युक्ता वाक्यशेषे धूमादिमार्गेणाकाशाच्चन्द्रमसं प्राप्ता इष्टादिकारिण एष सोमो राजेत्युक्ता अतः सोमराजशब्दसामान्यादिष्टादिकारिणां जीवानां श्रद्धाशब्दिताद्भिः सह गतिरिह श्रद्धाहुतिवाक्ये प्रतीयत इत्यर्थः तेषां सूक्ष्माभिर्द्रव्यापूर्वरूपाभिः पंचीकृताभिरद्भिः संबंधवदन्यत्र गतिं विहन्तीति तेषां चाग्निहोत्रेति नैधनेमरणे तन्निमित्तकर्मन्त्येष्टिविधानमसौ यजमानः स्वर्गाय गच्छत्विति मंत्रा

उत्क्रांतौ प्राणदेहबीजपंचभूतान्प्राणाश्च जीवदेहस्य प्राणवदित्याह प्राणगतेश्चेति प्राणानां गतिरस्ति हेत्वा शंकां निषेधति अग्न्या
दीति अदर्शनादोषधिवनस्पतिगमनस्येति शेषः लोमान्यपि यतीत्यर्थः प्राणानामग्न्यादिषु लयस्सन्दर्भे जीवस्य गतिभोगयोर
योगात्तं वै प्राणा अनूत्क्रामंतीति विस्पष्टश्रुतेर्लोमादिगौणत्वयपाठाच्च गौणत्वमित्यर्थः मरणांतरयुक्तानामयोगतिरुत्क्रांतत्वे
वचनत्वतासामान्यति समाधत्ते प्रथमइति ननु प्रथमपदं व्यर्थं मन्त्रराग्निरेव प्रथमोमीश्रवणादित्याशंक्य सोमनृस्य त्रेनसामग्र
प्राणगतेश्च ३ प्राणानां च देहांतरप्रतिपत्तौ गतिः श्राव्यते तमुत्क्रांतं प्राणोनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रा
मंतीत्यादिश्रुतिभिः सा च प्राणानां गतिः नाश्रयमंतरेण संभवतीत्यतः प्राणगतिप्रयुक्ता तदाश्रयभूतानामपामपि भूतां
तरोपसृष्टानां गतिरवगम्यते नहि निराश्रयाः प्राणाः क्वचिद्गच्छंति न तिष्ठंति वा जीवतो दर्शनात् अग्न्यादिगतिश्रुतेरितिचे
न्न भाक्तत्वात् ४ स्यादेतन्नैव प्राणा देहांतरप्रतिपत्तौ सह जीवेन गच्छंत्यग्न्यादिगतिश्रुतेः तथा हि श्रुतिः मरणकाले वागा
दयः प्राणा अग्न्यादीन्देवान्गच्छंतीति दर्शयति यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राण इत्यादिनेति चेन्न भाक्तत्वा
द्वागादीनामग्न्यादिगतिश्रुतिर्गौणी लोमसु केशेषु चादर्शनादोषधीर्लोमानि वनस्पतीन्केशा इति तत्राम्नायते नच लो
मानि केशाश्चोत्प्लुत्यौषधीर्वनस्पतींश्च गच्छंतीति संभवति नच जीवस्य प्राणोपाधिप्रत्याख्यानेन गमनमवकल्प्यते नापि
प्राणैर्विना देहांतरे उपभोग उपपद्यते विस्पष्टं च प्राणानां सह जीवेन गमनमन्यत्र श्राविते अतो वागाद्यधिष्ठात्रीणामग्न्या
दिदेवतानां वागाद्युपकारिणीनां मरणकाले उपकारनिवृत्तिमात्रमपेक्ष्य वागादयोग्न्यादीन्गच्छंतीत्युपचर्यते प्रथमे
ऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ५ स्यादेतत्कथं पुनः पंचम्यामाहुतावापः पुरुषवचसो भवंतीत्येतन्निर्धार्यते यावता नैव प्रथमेग्नावपां श्रवणमस्ति इह हि द्युलोकप्रभृतयः पंचाग्नयः पंचानामाहुतीनामाधारत्वेनाधीतास्तेषां च प्रमु
खे असौ वाव लोको गौतमाग्निरित्युपन्यस्य तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वतीति श्रद्धा होम्यद्रव्यत्वेनावेदिता नत्रापो होम्य
द्रव्यतया श्रुताः यदि नाम पर्जन्यादिषूत्तरेषु चतुर्ष्वग्निष्वपां होमद्रव्यता परिकल्प्यते परिकल्प्यतां नामैतेषु होमद्रव्यतयोपात्ता
नां सोमादीनामब्बहुलत्वोपपत्तेः प्रथमे त्वग्नौ श्रुतां श्रद्धां परित्यज्याश्रुता आपः परिकल्प्यंत इति साहसमेतत् श्रद्धा च
नाम प्रत्ययविशेषः प्रसिद्धिसामर्थ्यात् तस्मादयुक्तं पंचम्यामाहुतावपां पुरुषभाव इति चेन्नैष दोषः यतस्तत्रापि प्रथमे
ग्नौ ता एवापः श्रद्धाशब्देनाभिप्रेयंते कुतः उपपत्तेः एवं ह्यादिमध्यावसानसंगानादनाकुलमेतदेकवाक्यमुपपद्यते इतरथा पुनः
पंचम्यामाहुतावपां पुरुषवचस्त्वप्रकारे पृष्टे प्रतिवचनावसरे प्रथमाहुतिस्थाने यद्यनपो होम्यद्रव्यं श्रद्धां नामावतारयेत्ततो
न्याऽन्यत्र तासां श्रवणमस्ति न प्रथमस्त्याह यदि नामेति पंचाग्निषु पामाहुतित्वेसिद्धे तासां पंचम्यामाहुतौ पुरुषवचस्त्वं भवेत् न तु
सिद्धं प्रथमाग्नौ तासामनाहुतित्वादिति शंकार्थः एवं हि श्रद्धाशब्देनापां ग्रहे सति प्रश्नांतरोपसंहारयोः संगानादेकार्थत्वादेकवाक्यता
अग्रहे च तच्छेषाग्निष्वेवापामाहुतित्वाच्च पंचम्यामाहुतावितिवाच्ये अतः प्रश्नोपसंहारयोः पंचम्यामिति श्रवणात्प्रथमाग्नाव

शान्त॰
त॰ प्र॰
९

इहैव कर्मोपयं न भवि देहं देवोऽहमित्यादिभावनया गृहीत्वा त्वा परं वदेहं स जनतीति अत्यर्थः अतो न विरोध इति समाधत्ते तत्रापीति भाव
नायाः दीर्घभावो भावि देहविषयत्वं घटाकाशवद् परिहितो जीवः सूक्ष्मोपाधिगत्या लोकान्तरं गच्छतीति पंचाग्निस्वरूप सुक्तः प्रकारस्त
द्विरोधाद्बन्याः कल्पनाः सर्वास्वनादर्त्या इत्यन्वयः सांख्य कल्पनामाह व्यापिनामिति सुगत कल्पनामाह केवलस्येति निर्विकल्प
कज्ञानसंतानरूपस्यात्मनो देहान्तरे प्राप्त्यादि सविकल्पकज्ञाना त्वप्रवृत्तिलाभो भवतीत्यर्थः काणादकल्पनामाह मनइति देहान्तर
प्रतिमनोमात्रं गच्छति इन्द्रियाणि तु तत्र तत्रान्यान्यारभ्यन्ते दिगंबर कल्पनामाह जीवइति तत्र पाकस्येदं गंधस्वरूपकार्यत्रयोपलब्ध

तत्र पप्परिवेष्टितस्येव जीवस्य कर्मोपस्थापित प्रतिपत्स्य देहविषय भावना दीर्घीभावमानेज स्तकयोपमीयत इति विरोधः
एवमन्यत्र देहान्तर प्रतिपत्ति प्रकारे सजियाः पुरुषमतिप्रभावाः कल्पनाः व्यापिनां करणानामात्मनश्च देहान्तर प्रतिपत्तौ
कर्मैव पाह वृत्तिलाभस्तत्र भवति केवलस्यैव चात्मनो वृत्तिलाभस्तत्र तत्र भवति इन्द्रियाणि तु देहवदेभिनवान्येव तत्र तत्र भो
गस्थाने इत्येके मन एव केवलं भोगस्थानमभिप्रतिपद्यते जीव एवोत्प्लुत्य देहाद्देहान्तरं प्रतिपद्यते शुक इव वृक्षान्तरं वृक्षा
न्तरमित्येवमाद्याः सर्वा एवानादर्तव्याः श्रुतिविरोधात् तत्र दाहृत्वोभ्या प्रश्नप्रतिवचनाभ्यां केवलाभिरद्भिः संपरि
ष्वक्तो रंहतीति प्राप्नोत्यपां श्रवणसामर्थ्यात् तत्र कथं सामान्येन प्रतिज्ञायते सर्वैरेवभूतसूक्ष्मैः संपरिष्वक्तो रंह
तीति अत उत्तरं पठति त्र्यात्मकत्वात्तु भूयस्त्वात् २ तुशब्देन चोदितामाशंकामुच्छेत्ति त्र्यात्मिका ह्यापस्त्रिवृत्करण
श्रुतेः तास्वारंभिकास्वभ्युपगतासु इतरदपि भूतद्वयमवश्यमभ्युपगंतव्यं भवति त्र्यात्मकश्च देहस्त्रयाणामपि तेजोवन्ना
नां तस्मिन्कार्योपलब्धेः पुनश्च त्र्यात्मकस्त्रिधातुत्वात्त्रिभिर्वातपित्तश्लेष्मभिर्नसभूतान्तराणि प्रत्याख्याय केवलाभिरद्भि
रारब्धुं शक्यते तस्माद्भूयस्त्वापेक्षोऽयमापः पुरुषवचस इति प्रश्नप्रतिवचनयोरपशब्दो न केवलापत्वः सर्वदेहेषु हि रस
लोहितादिद्रवद्रव्यस्य भूयस्त्वं दृश्यते ननु पार्थिवो धातुर्भूयिष्ठो देहेषूपलक्ष्यते नैष दोषः इतरापेक्षयापां बाहुल्यं भविष्य
ति दृश्यते च शुक्रशोणितलक्षणेपि देहबीजे द्रववाहुल्यं कर्म च निमित्तकारणं देहान्तरारंभे कर्माणि चाग्निहोत्रादीनि
सोमाज्यपयः प्रभृतिद्रवद्रव्यव्यपाश्रयाणि कर्मसमवायिन्यश्चापः [illegible] श्रद्धाशब्दोदिताः सह कर्मभिर्द्युलोकाख्येऽग्नौ
हूयंत इति वक्ष्यति तस्मादप्यपां बाहुल्यप्रसिद्धिर्बाहुल्याच्चाप्शब्देन सर्वेषामेव देहबीजानां भूतसूक्ष्माणामुपादानमि

त्यात्मकोदेहभूयस्त्वयुक्तं प्राणवकाशयोरप्युपलब्धा देहस्य पंचभूतात्मकत्वादित्यर्थः व्याख्यान्तरमाह पुनश्चेति देहधारकत्वा
द्भूतवल्लस्त्रिधातुत्वात् त्र्यात्मकत्वमन्वयः देहस्य केवलाप्त्वे वातपित्तं च वायव्यं तैजसं न स्यातामिति भावः पृथिवीतरभूतापेक्षया
पांबाहुल्यं किं च देहनिमित्तानां कर्मणामपवाहुल्या तानाभिर्भूतान्तराण्युपलभ्यन्त इत्याह कर्म चेत्यादिना ॥ रामायनमः ॥

ढि
ढि
ढि
ढि

अधिकरणविषयमाह जीवइति अविद्याप्रसिद्धा विद्येति पाठे उपासनाप्रज्ञा कर्म धर्माधर्मौ रत्वं पूर्वप्रज्ञा जन्मान्तरसंस्कारः अथ मरण
काले प्राणहृदये जीवे नैकीभवतीत्यर्थः सूक्ष्मशरीरं पंचीकृतभूतभागा देहान्तरदेहपरिणामिनो भूतसूक्ष्मा वेदान्तार्थज्ञानसाधनवि
चारत्वात्सर्वाधिकरणानां श्रुतिशास्त्राध्यायसंगतयः वैराग्यफलकत्वादेतत्पादसंगतिः पूर्वाधिकरणे व्यवहारार्थं पंचीकरणमुक्तं स
व्यवहारोऽत्र निरूपित इति फलफलिभावो वानन्तरसंगतिः अत्र पूर्वपक्षे निराश्रयप्राणगत्यभावान्न वैराग्यसिद्धिः भूताश्रयप्राणगतौ वै
राग्यमिति फलभेदः तेजोमात्रा इत्यादयः प्रपश्यति जिघ्रतीति वाक्यशेषात् आपः पंचम्यामाहुतौ हुतायां पु
रुषवाच्याः पुरुषात्मना परिणमन्ते तथा किं त्वं वेत्थेति श्वेतकेतुं प्रति राज्ञः प्रश्नः तस्य चोत्तरं ज्ञानेनतमपि नरं प्रति राज्ञा वाचा सोऽवा

जीवो मुख्यप्राणसचिवः सेन्द्रियः समनस्को विद्याकर्मपूर्वप्रज्ञापरिग्रहः स पूर्वदेहं विहाय देहान्तरं प्रतिपद्यत इत्येतद्वेदान्तेष्व
शेन तमेते प्राणा अभिसमायन्तीत्येवमादिरन्यत्रवृत्तान्तरकल्यानेनन्तररूपं कृतमित्येवमेतावत्स्मारमकरस्याच्छुव्याह धर्माधर्मफलो १०२
पभोगसंभोगसंभवाच्च सकिं देहबीजैर्भूतसूक्ष्मैरसंपरिष्वक्तो गच्छति आहोस्वित्संपरिष्वक्त इति चिन्त्यते किं तावत्प्राप्तं अ
संपरिष्वक्त इति कुतः करणोपादानवद्भूतोपादानस्याश्रुतत्वात् स एतास्तेजोमात्राः समभ्याददान इत्यत्र तेजोमात्राशब्दे
न करणानामुपादानसंकीर्तनात् वाक्यशेषे चक्षुरादिसंकीर्तनात् नैवं भूतमात्रोपादानसंकीर्तनमस्ति सुलभाश्च सर्वत्र
भूतमात्राः यत्रैव देह आरब्धव्यस्तत्रैव सन्ति तासां नयनं निष्प्रयोजनं तस्मादसंपरिष्वक्तो यातीत्येवं प्राप्ते पठत्याचार्यः त
दन्तरप्रतिपत्तौ रंहति संपरिष्वक्त इति तदन्तरप्रतिपत्तौ देहान्तरप्रतिपत्तौ देहबीजैर्भूतसूक्ष्मैः संपरिष्वक्तो रंहति ग
च्छतीत्यवगन्तव्यं कुतः प्रश्ननिरूपणाभ्यां तथाहि प्रश्नः वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति नि
रूपणं च प्रतिवचनं द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीर्दर्शयित्वाह
इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति तस्मादद्भिः परिवेष्टितो जीवो व्रजतीति गम्यते नन्वन्या श्रुतिर्जलौका
वत्पूर्वदेहं न मुञ्चति यावन्न देहान्तरमाक्रमतीति दर्शयति तद्यथा तृणजलायुकेति ॥ ॥

वल्लोको गोतमाग्निस्तत्र श्रद्धाख्या आपः आहुतिः पर्जन्याग्नौ सोमरूपा इह खल्वग्निहोत्रे श्रद्धया हुता दध्यादिरूपा आपो
यजमानं तल्लग्नाः स्वर्गलोकं प्राप्य सोमाख्यदिव्यदेहात्मना तिष्ठन्ति तत्कर्मान्ते हुताः पर्जन्ये रूपेणेनतो वृष्टिरूपाः पृथिव्यां अन्नरूपा
पुरुषे रेतोरूपाः योषिति हुताः आपः पुरुषशब्दवाच्या भवन्तीति निरूपणात् ननु तदेहत्यक्त्वाद्भिः सह गतस्य पश्चाद्देहान्त
रप्राप्तिरित्ययुक्तं यथा तृणजलायुकातृणान्तरं गृहीत्वा पूर्वतृणं त्यजति तथा जीवो देहान्तरं गृहीत्वा पूर्वदेहं त्यजतीति श्रुतिविरोधा

ॐ श्रीगुरुभ्यो नमः ॐ यं हि वैराग्यसंपन्नाः सत्त्वमर्थ्यं विवेकिनः लभन्ते साधनैर्दीनास्तं सीतानायकं भजे ॥१॥ तदंतरप्र
तिपत्ताविति वृत्तमनन्तरपूरणो ऽध्यायार्थमाह द्वितीय इत्यादिना अविरुद्धे वेदान्तार्थे तज्ज्ञानसाधनचिन्तावसर इ
त्यनयोर्हेतुमद्भावः लिङ्गोपाधिसिद्धौ तदुपहितजीवसंसारचिन्ते पादद्वयेऽपि तद्भावः संगतिः अत्र प्रथमपादे वै
राग्यद्वितीये समाधवस्योक्तात्वपदार्थशोधनवचाच्येते तृतीये वाक्यार्थस्तदर्थमुपासनाश्च विचार्यन्ते चतुर्थे

हरिः ॐ तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां ॥१॥ द्वितीये ऽध्याये स्मृतिन्यायविरोधो वेदान्त
विहिते ब्रह्मदर्शने परिहृतः परपक्षाणां चानपेक्षत्वं प्रपंचितं श्रुतिविप्रतिषेधश्च परिहृतः तत्र च जी
व्यतिरिक्तानि तत्त्वानि जीवोपकरणानि ब्रह्मणो जायंत इत्युक्तं अथेदानीमुपकरणोपहितस्य जीवस्य संसार
गतिप्रकारस्तदवस्थान्तराणि ब्रह्मसतत्त्वं विद्याभेदाभेदौ गुणोपसंहारौ सम्यग्दर्शनात्पुरुषार्थसिद्धिः स संहारानुप
म्यग्दर्शनोपायविधिप्रभेदो मुक्तिफलानियमश्चेत्येतदर्थजातं तृतीये निरूपयिष्यते प्रसंगागतं च किंम
पि तत्र प्रथमे तावत्पादे पंचाग्निविद्यामाश्रित्य संसारगतिप्रभेदः प्रदर्श्यते वैराग्यहेतोः तस्माज्जुगुप्से
तेति चांते श्रवणात्

पादार्थमाह सम्यग्दर्शनादिति दर्शनोपायाः मुक्तिरूपफलस्य स्वर्गवृत्तारतस्यानियमाभावरूपकत्वमिति यथा
वत् प्रसंगागतं देहान्तरूपाणां पंचाहुत्युपर्जन्यपृथिवीपुरुषयोषित्स्वग्नित्वध्यानं पंचाग्निविद्या यस्मात्कर्मणा
गत्यागतिरूपोऽनर्थस्तस्मात्कर्मफले जुगुप्सां घृणां विरक्तिं कुर्वीतेति पंचाग्निविद्योपसंहारश्रवणाद्वैराग्यार्थप्र
दर्श्यते इत्यन्वयः शास्त्रादित इत्यनित्यानित्यविवेकजं वैराग्यमुक्तमिदं तु द्युलोकगत्यागतिक्लेशभावनाक्त
नेनाउच्यत इत्यपौनरुक्त्यं ॥

ना.भा.
द्वि.प्र.
१

ॐ श्रीगणेशाय नमः ॐ सांख्यादिस्मृतियुक्तिभिर्न चलितो वेदान्तसिद्धान्तगो निर्मलैर्विविधागमैश्च विदितो यो मादिजन्माप्ययः
उत्पत्त्यंतावेववर्जितस्मृतिवपुर्व्यापी च कर्ता शाकोलिङ्गेन प्रथितो पिनाम ततनुकृतं ज्ञानकी शं भजे ॥ १ ॥ नामरूपे व्याकरवाणीति
श्रुतेर्नो नाम ततनुकृदपि संज्ञामूर्तिर्व्याकृतापि लिङ्गशरीरोपाधिना कृतेति श्रुपा इति च प्रथितः प्रसिद्धो यस्तं प्रत्यगभिन्नपरमात्मानं
सत्यप्रकृतिनियन्तारं भजे इत्यर्थः स्मृतिप्रसंगात्सर्वोत्तराध्यायया विषयविषयिभावसंगतिं वक्तुं वृत्तं कीर्तयति प्रथमेध्या
य इति जन्मादिसूत्रमारभ्य जगदुत्पत्त्यादिकारणं ब्रह्मेति प्रतिपादितं शास्त्रदृष्ट्या त्वित्यादिसूत्रेषु स एवाद्वितीयः सर्वात्मेत्यु
क्तेसानुमानिकमित्यादिना कारणान्तरस्याश्रौतत्वं दर्शितमित्यर्थः एवं प्रथमाध्यायस्यार्थमनूद्य तस्मिन्विषयविरोधपरिहार
विषयिणो द्वितीयाध्यायस्यार्थं पादशः सतिप्पकथयति इदानीमिति अत्र प्रथमपादे समन्वयस्य सांख्यादिस्मृतियुक्तिभिर्विरो

ॐ स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् ॥ १ ॥ प्रथमेध्याये सर्वज्ञः सर्वेश्वरो जगतः उत्पत्ति
कारणं मृत्सुवर्णादय इव घटरुचकादीनामुत्पन्नस्य जगतो नियन्तृत्वेन स्थितिकारणं मायावीव मायायाः प्रसारितस्य
जगतः पुनः स्वात्मन्येवोपसंहारकारणमवनिरिव चतुर्विधस्य भूतग्रामस्य स एव च सर्वेषां न आत्मेत्येतद्वेदान्तवाक्यो
क्तसमन्वयप्रतिपादनेन प्रतिपादितं प्रधानादिवादाश्चाशब्दत्वेन निराकृताः इदानीं स्वपक्षे स्मृतिन्यायविरोधपरिहारः प्रधा
नादिवादानां न्यायाभासोपबृंहितत्वं प्रतिवेदान्तं च सृष्ट्यादिप्रक्रियाया अविगीतत्वमित्यस्यार्थजातस्य प्रतिपादनाय द्विती
योध्यायश्चारभ्यते तत्र प्रथमे तावत्स्मृतिविरोधमुपन्यस्य परिहरति यदुक्तं ब्रह्मैव सर्वज्ञं जगतः कारणमिति तदयुक्तं कुतः
स्मृत्यनवकाशदोषप्रसंगात् स्मृतिश्च तन्त्राख्या परमर्षिप्रणीता शिष्टपरिगृहीता अन्याश्च तदनुसारिण्यः स्मृतय एवं

प्रपरिहारः क्रियते द्वितीयपादे सांख्याद्यागमानां भ्रान्तिमूलत्वमविरोधाय कथ्यते तृतीयपादे प्रतिवेदान्तं हि श्रुतीनां जीवात्मश्रुती
नां च व्योमादिमहाभूतानां जन्मलयक्रमादिकथनेनाविरोधः प्रतिपाद्यते चतुर्थपादे लिङ्गशरीरश्रुतीनामविरोध इत्यर्थः अयमेवार्थः
तत्त्वबोधार्थं श्लोकेन संगृहीतः द्वितीये स्मृतितर्काभ्यामविरोधोन्यदुष्टताः भूतभोक्तृश्रुतेर्लिङ्गश्रुतेरपि विरुद्धतेति तत्र ज्ञाते
विषयविरोधशंकासमाधेययोगात्समन्वयाध्यायानन्तर्यमविरोधाध्यायस्य युक्तं तत्र प्रथमाधिकरणतात्पर्यमाह तत्र प्रथममिति
श्रौते समन्वये विरोधनिरासार्थत्वादस्य पादस्य श्रुतिशास्त्राध्यायसंगतयः स्वमतस्थापनात्मकत्वात्सर्वेषामधिकरणानामेतत्पाद
संगतिः अत्र पूर्वपक्षे स्मृतिविरोधादुक्तसमन्वयासिद्धिः फलं सिद्धान्ते तत्सिद्धिरिति विवेकः तत्र ब्रह्मण्युक्तवेदान्तसमन्वयो विषयः स
किं सांख्यस्मृत्याविरोधेनेनैवेति स्मृतिप्रामाण्याप्रामाण्याभ्यां संदेहे पूर्वपक्षमाह यदुक्तमिति तच्यंते कुन्यायतेतत्वानेनेतितं

ॐ स्मृ अ २ ॥ ५५

तात्मनपि ब्रह्मार्थकत्वमस्त्वित्यविरोध इत्यत आह नान्यहीति ततः सांख्यस्मृतिप्रामाण्याय प्रधानवादग्रहे मन्वादिस्मृतीनाम
प्रामाण्यं स्यादित्याशंक्य नासां धर्मे सावकाशत्वात्प्रामाण्यं स्यादित्याह मन्वादीति तर्हि सांख्यादिस्मृतीनामपि धर्मेनात्यर्येण
प्रामाण्यमस्तु तत्त्वतु ब्रह्मैवेत्यविरोध इत्यत आह नैवमिति तत्त्वे विकल्पनानुपपत्तेर्निरवकाशस्मृत्यनुसारेण श्रुतिव्याख्यान
मुचितं सावकाशनिरवकाशयोर्निरवकाशं बलीय इति न्यायादित्याह तस्मादिति श्रुतिविरोधे स्मृत्यप्रामाण्यस्योपष्टत्वात्सर्वपतो

नाम स्वचेतनं प्रधानं स्वतंत्रं जगतः कारणमुपनिबध्यते मन्वादिस्मृतयस्तावच्चोदनालक्षणेनाग्निहोत्रादिना धर्म
जातेनापेक्षितमर्थं समर्पयन्त्यः सावकाशा भवंत्यस्य वर्णस्यास्मिन्कालेनेन विधानेनोपनयनमीदृशश्चाचार इ
त्थं वेदाध्ययनमित्थं समावर्त्तनमित्थं सहधर्मचारिणीसंयोग इति तथा पुरुषार्थांश्च वर्णाश्रमधर्मान्नानाविधान्
विदधति नैवं कपिलादिस्मृतीनामनुष्ठेये विषये वकाशोस्ति मोक्षसाधनमेव हि सम्यग्दर्शनमधिकृत्य ताः
प्रणीता यदि तत्राप्यनवकाशाः स्युः आनर्थक्यमेवासां प्रसज्येत तस्मात्तदविरोधेन वेदान्ता व्याख्यातव्याः कथं
पुनरीक्षत्यादिभ्यो ब्रह्मैव सर्वज्ञं जगतः कारणमित्यवधारितः श्रुत्यर्थः स्मृत्यनवकाशदोषप्रसंगेन पुनराक्षिप्यते
भवेदयमनाक्षेपः स्वतंत्रप्रज्ञानां परतंत्रप्रज्ञास्तु प्रायेण जनाः स्वातंत्र्येण श्रुत्यर्थमवधारयितुमशक्नुवंतः
प्रख्यातप्रणेतृकासु स्मृतिष्ववलंबेरन् तद्बलेन श्रुत्यर्थं प्रतिपित्सेरन् अस्मत्कृते च व्याख्याने न विश्वस्युर्ब
हुमानात्स्मृतीनां प्रणेतृषु कपिलप्रभृतीनां चार्षं ज्ञानमप्रतिहतं स्मर्यते श्रुतिश्च भवति ऋषिं प्रसूतं कपिलं य
स्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येदिति तस्मान्नैषां मतमयथार्थं शक्यं संभावयितुं तर्कावष्टंभेन चैतेर्थं प्रति
ष्ठापयंति [illegible] तस्मादपि स्मृतिबलेन वेदान्ता व्याख्येया इति पुनराक्षेपः तस्य समाधिर्नान्यस्मृत्यनवकाशदोष
प्रसंगादिति यदि स्मृत्यनवकाशदोषप्रसंगेनेश्वरवाद आक्षिप्येत एवमप्यन्या ईश्वरकारणवादिन्यः स्मृतयो
नवकाशाः प्रसज्येरन् ता उदाहरिष्यामः यत्तत्सूक्ष्ममविज्ञेयमिति परं ब्रह्म प्रकृत्य स ह्यन्तरात्मा भूतानां क्षेत्र
ज्ञश्चेति कथ्यते इति चोक्त्वा तस्मादव्यक्तमु
त्पन्नं त्रिगुणं द्विजसत्तम इत्याह तेषामन्यत्रा
पि अव्यक्तं पुरुषे ब्रह्मन्निर्गुणे संप्रलीयत इत्या
ह ॥

८३

न पुनरुक्तमिति शंकते कथमिति ये स्वातंत्र्येण श्रुत्यर्थं ज्ञातुं शक्नुवंति तेषामयं सर्वपक्षो न भवेत् सांख्याहृते स्मृत्याग्रहाल्लानां तु भवे
दित्याह भवेदिति तेषामतीन्द्रियार्थज्ञानवत्त्वाच्छ्रुतेश्च श्रद्धास्यादित्याह कपिलप्रभृतीनां चेति आदौ यो जायमानं च कपिलं ज
नयेद्विपश्चित्तैर्विभृयाज्ज्ञानैस्तं पश्येत्परमेश्वरमिति श्रुतियोजना यथा सांख्यस्मृतिविरोधाद्ब्रह्मवादस्त्याज्य इति त्वयोच्यते
तथा स्मृत्यन्तरविरोधात्प्रधानवादस्त्याज्य इति सिद्धान्तयति तस्य समाधिरिति तस्माद्ब्रह्मणः सकाशादव्यक्तं मायायां लीनस
त्मात्मकं जगदिति यावत् ॥

इति ह्यसत्कार्यवादपक्षे प्रमाणसंगतिमाह अतस्त्वेति प्रभवत्यस्मादिति प्रभवो जन्महेतुः प्रलीयते अस्मिन्निति प्रलयो लयाधिष्ठानं त
स्मात्कं तर्हीश्वरात्कार्याचार्याद्यः प्रभवति स एव सकलमुपादानं किं परिणामिनश्चाश्वतिकः कूटस्थस्य अतः स नित्य इत्यर्थः ननु स्मृ
तिविरोधात्कि मिति नोक्तं इत्यत आह स्मृतिबलेनेति स्मृतीनां मिथो विरोधे कथं तत्त्वनिर्णय इत्यत आह दर्शितं त्विति श्रुतिभिरेव
तत्त्वनिर्णय इत्यर्थः स्मृतीनां का गतिरित्यत आह विप्रतिपत्तौ चेति वस्तुतत्त्वे स्मृतीनां मिथो विरोधे वस्तुनि विकल्पायोगात् श्रु
तश्रुतिमूलास्मृतयः प्रमाणं इतरास्तु कल्प्यश्रुतिमूला न प्रमाणमित्यर्थः नन्वसश्रुतिविरोधे स्मृतीनां प्रमाणमन्यत्र
मितीत्यन्यायमाह तदुक्तमिति औडुम्बरीं स्पृष्ट्वोद्गायेदिति प्रत्यक्षश्रुतिविरोधात् सर्ववेष्टनविधायिनी च स्मृतिर्मानं न भवतीति संदेहेन

सर्वमिदं पुराणः।

अतश्च संक्षेपमिमं शृणुध्वं नारायणः सर्वमिदं पुराणः स सर्गकाले च करोति सर्वं संहारकाले च तदत्ति भूयः इति पुराणे भगवद्गीतासु च
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथेति परमात्मानमेव च प्रकृत्यात्मकं पठति तस्मात्कार्याः प्रभवन्ति सर्वे स
लेशाश्वतिकः सनातनेत्य इति एवमनेकशः स्मृतिष्वपीश्वरः कारणत्वेनोपादानत्वेन च प्रकाश्यते स्मृतिबलेन प्रत्यव
तिष्ठमानस्य स्मृतिबलेनोत्तरं वक्ष्यामीत्यतोऽयमन्यस्मृत्यनवकाशदोषोपन्यासः दर्शितं तु श्रुतीनामीश्वरकारणवा
दं प्रति तात्पर्यं विप्रतिपत्तौ च स्मृतीनामवश्यकर्तव्येऽन्यतरपरिग्रहेऽन्यतरपरित्यागे च श्रुत्यनुसारिण्यः स्मृतयः प्रमाण
मनपेक्ष्या इतराः तदुक्तं प्रमाणलक्षणे विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति न चातीन्द्रियानर्थान् श्रुतिमन्तरेण
कश्चिदुपलभत इति शक्यं संभावयितुं निमित्ताभावात् शक्यं कपिलादीनां सिद्धानामप्रतिहतज्ञानत्वादिति चेत् न
सिद्धेरपि सापेक्षत्वात् धर्मानुष्ठानापेक्षा हि सिद्धिः स च धर्मश्चोदनालक्षणः ततः पूर्वसिद्धायाश्चोदनाया अर्थो न पश्चिम
सिद्धपुरुषवचनवशेनातिशंकितुं शक्यते सिद्धव्यपाश्रयकल्पनायामपि बहुत्वात्सिद्धानां प्रदर्शितेन प्रकारेण स्मृतिविप्र

स्मृत्यनुमानात्मानमिति प्राप्तिसिद्धांतः उक्तं श्रुतिविरोधे स्मृतिप्रमाणमनपेक्षमपेक्ष्या अन्यं हेयमिति यावत् हि यतो असति विरो
धे श्रुतिमनुमानं भवति अत्र तु विरोधे सति श्रुत्यनुमानायोगात् मूलाभावात् सर्वेष्टतास्मृतिरप्रमाणमित्यर्थः अस्तु सांख्यस्मृतिः प्र
त्यक्षमूलेत्यत आह न चेति योगिनां सिद्धिमहिम्ना अतीन्द्रियज्ञानं संभावयितुं शक्यमिति शंकते शक्यमिति कपिलादिभिः किलादौ वेद
प्रामाण्यं निश्चित्य तदर्थस्य धर्मस्यानुष्ठानेन सिद्धिः संपादिता तत्पासिद्धा प्रणीतस्मृत्यनुसारेण तादृशश्रुतिपीडा न युक्तापजीव्य
विरोधादिति परिहरति न सिद्धेरपीति अतिशंकितुमिति श्रुतीनामर्थमतिक्रमोपचरित्यर्थः शंकितुं न शक्यत इत्यर्थः स्वतः।
सिद्धे वेदे तेनापजीव्यश्रुतिविरुद्धानीश्वरस्मृतस्तः सिद्धो मानाभावादंगीकरोत्याह सिद्धेति सिद्धानां वचनमाश्रित्य वेदार्थकल्पनायाम्

ननु मंदमतेः सांख्यस्मृतौ श्रद्धा भवति तस्य मतिः वेदांतमार्गे कथमानेयेत्यत आह परंचेत्यादिना ननु श्रुत्या कपिलस्य सर्वज्ञत्वोक्तेस्तन्मते
श्रद्धा दुर्वारेत्यत आह या त्विति कपिलशब्दमात्रेण सांख्यकर्ता श्रौत इति भ्रांतिः कृता तस्य हेतुवादिनः सर्वज्ञत्वायोगाद्वेदसर्वज्ञत्वाभ
संभृतत्वेन श्रुतः कपिलो वासुदेवांश एव सहि सर्वात्मत्वज्ञानवेदिकसांख्यमनुपदिशतीति सर्वज्ञ इति भावः एतन्नुः श्रद्धाहकस्य किंच
यः कपिलं ज्ञानैर्बिभर्ति तमीश्वरं पश्येदिति विधीयते तथाचान्यार्थस्य स्वप्रतिपत्तिपोषस्य कपिलसर्वज्ञत्वस्य दर्शनमनुवादस्त
स्य मानांतरेण प्राप्तिश्चान्यस्य स्वार्थसाधकत्वायोगान्नानुवादमात्रात्सर्वज्ञत्वसिद्धिरित्याह अन्यार्थेति हेतुवादिनः कापिलस्य

अनेक।

परतंत्रप्रज्ञस्यापि नाकस्मात्स्मृतिविरोधविषयः पक्षपातो युक्तः कस्यचित्क्वचित्पक्षपाते सति पुरुषमतिवैश्वरूप्येण त
त्त्वाव्यवस्थानप्रसंगात् तस्मात्तस्यापि स्मृतिविप्रतिपत्त्युपन्यासेन श्रुत्यनुसारानुसारविवेचनेन च सन्मार्गे प्रज्ञा संग्रहणी
या या तु श्रुतिः कपिलस्य ज्ञानातिशयं प्रदर्शयंती प्रदर्शिता न तया श्रुतिविरुद्धमपि कापिलं मतं श्रद्धातुं शक्यं कपिलमिति
तिसा॰ श्रुमान्यमात्रत्वादन्यस्य च कपिलस्य सगरपुत्राणां प्रतप्तुर्वासुदेवनाम्नः स्मरणात् अन्यार्थदर्शनस्य च प्राप्तिरहितस्या
साधकत्वात् भवति चान्या मनोर्माहात्म्यं प्रख्यापयंती श्रुतिः यद्वै किंच मनुरवदत्तद्भेषजमिति मनुना च सर्वभूतेषु
चात्मानं सर्वभूतानि चात्मनि संपश्यन्नात्मयाजी स्वाराज्यमधिगच्छतीति सर्वात्मत्वदर्शनं प्रशंसता कापिलमतं निं
द्यत इति गम्यते कपिलो हि न सर्वात्मत्वदर्शनमनुमन्यते आत्मभेदाभ्युपगमात् महाभारतेपि च बहवः पुरुषा ब्रह्मन्नुता
वि॰ हो एक एवति विचार्य बहवः पुरुषा राजन्सांख्ययोगविचारिणामिति परपक्षमुपन्यस्य तद्व्युदासेन बहूनां पुरुषाणां हि
यथैका योनिरुच्यते तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकमित्युपक्रम्य ममांतरात्मा तव च ये चान्ये देहसंस्थि
ताः सर्वेषां साक्षिभूतोसौ न ग्राह्यः केनचित्क्वचित् विश्वमूर्द्धा विश्वभुजो विश्वपादाक्षिनासिकः एकश्चरति भूतेषु
स्वैरचारी यथासुखमिति सर्वात्मतैव निर्द्धारिता ॥

श्रौतत्वं निरस्य ब्रह्मवादिनोः श्रौतत्वमाह भवति चेति इतिहासेपि कापिलमतनिंदापूर्वकमद्वैतं दर्शितमित्याह महाभा
रतेपीति पुरुषाः आत्मानः किं वस्तुतो भिन्नाः उत सर्वेषामेकात्मा इति विमर्शार्थः बहूनां पुरुषाणां कारणं देहानां
यथैका योनिरुपादानं पृथिवी तथा तं पुरुषं सात्मानं विश्वं सर्वोपादानत्वेन सर्वात्मकं सर्वज्ञत्वादिगुणैः संपूर्णं कथयिष्या
मि विश्वं सर्वलोकप्रसिद्धादेवेति पश्चान्नुष्यादेर्नामद्वैतोस्येवेति विश्वं मूर्द्धा एकस्यैव सर्वदेहेषु शक्तिविभावेन प्रविष्टत्वा
द्विश्वभुजत्वादि याजना सर्वभूतेष्वेकश्चरति अवगच्छति सर्वं जानातीत्यर्थः स्वैरचारी स्वतंत्रः नास्य नियंता अस्ति सर्वेश्व

स्तुत्यर्थः यथाश्रुतमेवमिति शोकांतं तदुक्तमिति पदार्थं निर्णयति ॥

भामती
हि.प्र.
३

कापिलतंत्रस्य वेदमूलस्मृतिविरोधमुक्त्वा साक्षाद्वेदविरोधमाह श्रुतिश्चेति यस्मिञ्ज्ञानकाले केवलं स्वतंत्रप्रकृतिकल्पनयैव वेद
विरुद्धं न किं त्वात्मभेदकल्पनयापीति सिद्धमिति संबंधः स्मृतिविरोधे वेदस्यैवाप्रामाण्यं किं न स्यादित्यत आह वेदस्य हीति वेदस्य
प्रामाण्यं स्वतः सिद्धमपौरुषेयत्वात्पौरुषेयवाक्यानां स्वार्थस्मृतिस्तन्मूलानुभवकल्पनया प्रामाण्यं ज्ञेयमिति व्यवहितं परतः
प्रामाण्यमिति विप्रकर्षः श्रुतिस्मृत्योर्विशेष इत्यक्षरार्थः समयोर्विरोधे हि निरवकाशसावकाशबाध्यमिह त्वतः परतः
प्रामाण्ययोर्वैषम्यात् झटिति निश्चितप्रामाण्येन चानपेक्षं जातविरोधिना वेदवाक्येन विरुद्धस्मृतेरेव बाध इति भावः तस्मा

ले२

श्रुतिश्च सर्वात्मताया भवति यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोक एकत्वमनुपश्यत
इत्येवंविधा श्रुतिश्चेति द्वैतात्मभेदकल्पनयापि कापिलस्य तन्त्रस्य वेदविरुद्धत्वं वेदानुसारिमनुवचनविरुद्धत्वं च न
केवलं स्वतन्त्रप्रकृतिकल्पनयैवेति वेदस्य हि निरपेक्षं स्वार्थे प्रामाण्यं रवेरिव रूपविषये पुरुषवचसां तु तन्मूलान्तरा
पेक्षं व्यवहितं चेति विप्रकर्षः तस्माद्वेदविरुद्धे विषये स्मृत्यनवकाशप्रसंगो न दोषः ॥ कुतश्च स्मृत्यनव
काशप्रसंगो न दोषः इतरेषां चानुपलब्धेः ॥२॥ प्रधानादितराणि यानि प्रधानपरिणामत्वेन स्मृतौ कल्पितानि
महदादीनि न तानि वेदे लोके चोपलभ्यन्ते भूतेन्द्रियाणि तावल्लोकवेदप्रसिद्धत्वाच्छक्यन्ते स्मर्तुम् अलोकवेदप्र
सिद्धत्वात्तु महदादीनां षष्ठस्येवेन्द्रियार्थस्य न स्मृतिरवकल्पते यदपि क्वचित्तत्परमिव श्रवणं भासते तदप्यतत्परं व्याख्यातं
तम् आनुमानिकमप्येकेषामित्यत्र कार्यस्मृतेरप्रामाण्यात्कारणस्मृतेरप्यप्रामाण्यं युक्तमित्यभिप्रायः तस्मादपि न
स्मृत्यनवकाशप्रसंगो दोषः तर्कावष्टम्भं तु न विलक्षणत्वादित्यारभ्योन्मथिष्यति ॥ एतेन योगः प्रत्युक्तः ॥३॥ एतेन
सांख्यस्मृतिप्रत्याख्यानेन योगस्मृतिरपि प्रत्याख्याता द्रष्टव्येत्यतिदिशति तत्रापि श्रुतिविरोधेन प्रधानं स्वतन्त्रमेव
कारणं महदादीनि च कार्याण्यलोकवेदप्रसिद्धानि कल्प्यन्ते नन्वेवं सति समानन्यायत्वात्सर्वेणैव न गतं किमर्थ

श्रवणं ५
ने४

दिति विशेषादित्यर्थः भ्रान्तिमूलत्वसंभवादिति भावः महदहंकारौ तावदप्रसिद्धावहंकारप्रकृतिकत्वेन तन्मात्राण्यप्रसि
द्धानि स्मर्तुं न शक्यन्त इत्याह इतरेषां चेति ननु महतः परमव्यक्तमिति श्रुतिप्रसिद्धानि महदादीनीत्यत आह यदपीति स्वतन्त्रता
त्पर्यमाह कार्येति सांख्यस्मृतेर्महदादिष्विव प्रधानेऽपि प्रामाण्यं नेति निष्कर्षो यत इत्यर्थः सांख्यस्मृतेर्बाधेऽपि तदुक्तयुक्तीनाकः
र्य बाध इत्यत आह तर्केति ब्रह्मण्येव समन्वयः प्रधानवादियोगस्मृत्या विरुध्यते न वेति संदेहे पूर्वन्यायमतिदिशति एतेन योगः प्रत्युक्तः

एवं ज्ञानकर्मनिरासार्थं पूर्वपक्षमाह अलिङ्गत्वेति निदिध्यासनं योगः त्रीणि उरोग्रीवाशिरांसि उन्नतानि यस्मिंस्तच्छरीरं त्रिरुन्नतं त्रिरुन्न-
तमिति पाठश्चेच्छान्दसः युञ्जीतेति शेषः न केवलं योगविधिः किन्तु योगस्य ज्ञापकान्यर्थवादवाक्यान्यपि सन्तीत्याह लिङ्गानि चे-
ति तान्येवोक्तो धारणां योगविदो योगं परं तप इति मन्यन्ते उक्तामेतां ब्रह्मविद्यां योगविधिं ध्यानप्रकारं च मृत्युप्रसादान्नचिकेता ल-
लब्ध्वा ब्रह्म प्राप इति संबन्धः योगस्मृतिः प्रधानादितत्त्वांशेऽपि प्रमाणत्वेन लौकायां संप्रतिपन्नः प्रामाणिकार्थैकदेशो योगस्मृ-
यस्मात्तत्त्वादित्यर्थः अष्टकाः कर्तव्याः गुरुरनुगन्तव्य इत्यादिस्मृतीनां वेदाविरुद्धार्थकत्वान्मूलश्रुत्यनुमानेन प्रामाण्यमुक्तं

अलिङ्गत्वाभ्यधिकाशङ्का सम्यग्दर्शनाभ्युपायो हि योगो वेदे विहितः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति त्रिरुन्नतं स्था-
प्य समं शरीरमित्यादिना आसनादिकल्पनापुरःसरो बहुप्रपञ्चश्च योगविधानस्य ज्ञातव्यतयोपनिदिश्यते लिङ्गानि च वैदिका-
नि योगविषयाणि सहस्रश उपलभ्यन्ते तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणामिति विद्यामेतां योगविधिं च कृत्स्नमि-
ति चैवमादीनि योगशास्त्रेऽपि सम्यग्दर्शनोपायो योग इति सम्यग्दर्शनाभ्युपायत्वेनैव योगोऽङ्गीक्रियते अतः संप्रति-
पन्नार्थैकदेशत्वादष्टकादिस्मृतिरप्यनपवदनीया भविष्यतीति इयमभ्यधिका शङ्कातिदेशेन निवर्त्यते अर्थै-
कदेशसंप्रतिपत्तावप्यर्थैकदेशविप्रतिपत्तेः पूर्वोक्ताया दर्शनात् सतीष्वप्यध्यात्मविषयासु बह्वीषु स्मृतिषु सा-
ङ्ख्ययोगस्मृत्योरेव निराकरणे यत्नः कृतः सांख्ययोगौ हि परमपुरुषार्थसाधनत्वेन लोके प्रख्यातौ शिष्टैश्च परि-
गृहीतौ लिङ्गेन च श्रौतेनोपबृंहितौ तत्कारणं सांख्ययोगाभिपन्नं ज्ञात्वा देवं मुच्यते सर्वपाशैरिति निराकरणं तु
न सांख्यज्ञानेन वेदनिरपेक्षेण योगमार्गेण वा निःश्रेयसमधिगम्यत इति श्रुतिर्हि वैदिकादात्मैकविज्ञानादन्यन्निः-
श्रेयससाधनं वारयति तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति द्वैतिनो हि ते सांख्या योगाश्च नात्मैक-
त्वदर्शिनः यत्तु दर्शनमुक्तं तत्कारणं सांख्ययोगाभिपन्नमिति वैदिकमेव तत्र ज्ञानं ध्यानं च सांख्ययोगशब्दाभ्यामभि-

प्रमाणलक्षणे एवं योगस्मृतेर्योगे प्रामाण्यात्तत्त्वांशेऽपि प्रामाण्यमिति पूर्वपक्षमनूद्य सिद्धान्तयति इयमिति ननु वेदाद्युदितस्मृ-
तयोऽत्र किमिति न निराकृता इत्युच्यत आह सतीष्वपीति तासां प्रतारकत्वेन प्रसिद्धत्वाद्दर्शनैः पशुप्रायैर्गृहीतत्वाद्दुर्बला-
त्वाच्चात्रोपेक्षेति भावः तत्कारणमिति तेषां प्रकृतानां कामानां कारणं सांख्ययोगाभ्यां विवेकध्यानाभ्यामभिपन्नं प्रत्यक्तया
प्राप्तं देवं ज्ञात्वा सर्वपाशैरविद्यादिभिर्मुच्यत इत्यर्थः समूलत्वेऽस्मृतिद्वयस्य निरासः किमिति कृत इत्यत आह निराकर-
णं त्विति इति हेतोः कृतमिति शेषः प्रत्यासत्तेरिति श्रुतिस्थसांख्ययोगशब्दयोः सजातीयश्रुत्यर्थग्राहित्वादिति यावत्

शा.भा.
टि.प्र.
६

किं सर्वांशे युक्तस्तत्प्रामाण्येनेत्याह येनान्यपरेणेति ब्रह्मवादस्यैकदेशभक्त्यादिभिर्विरोधमाशंक्यातिदिशति एतेनेति श्रुतिवि
रोधेनेत्यर्थः उपकारकत्वाद्धीनयुक्त्या शेषशेषिभावोपकारकः स नवायः किं नु तत्त्वं पाहेत्याह नान्यपीति तर्कोऽनुमानं तद
नुग्राहिका युक्तिरुपपत्तिः स्मृती नाम प्रामाण्यात्ताभिः समन्वयस्य न विरोध इति सिद्धं न विलक्षणत्वादिति सूत्रानुवादस्याधि
करणस्य तात्पर्यमाह ब्रह्मास्येति पूर्वपक्षमाक्षिपति कुतः पुनरिति अनवकाशहेतुमाह ननु धर्म इवेति मानान्तरानु
पेक्षे वेदैकसमधिगम्ये ब्रह्मणि प्रमाणान्तरकतर्कस्याप्रवेशात्तेनाक्षेपस्यानवकाशः भिन्नविषयत्वात्केवलयोरित्यर्थः मि

येनान्यपरेण न विरुध्येते नेत्युक्तमेव सांख्ययोगस्मृत्योः सावकाशत्वं तद्यथा असंगो ह्ययं पुरुष इत्येवमादिश्रुतिप्रसिद्धमेव
पुरुषस्य विशुद्धत्वं निर्गुणपुरुषनिरूपणेन सांख्यैरभ्युपगम्यते तथा च योगैरपि च परिव्राड्विवर्णवाससा मुण्डोऽप
रिग्रह इत्येवमादिश्रुतिप्रसिद्धमेव निवृत्तिनिष्ठत्वं प्रव्रज्याद्युपदेशेनानुगम्यते एतेन सर्वाणि तर्कस्मरणानि प्रति
वक्तव्यानि [illegible]तान्यपि तर्कोपपत्तिभ्यां तत्त्वज्ञानायोपकुर्वन्तीति चेत् उपकुर्वन्तु नाम तत्त्वज्ञानं तु वेदान्तवाक्येभ्य ए
व भवति नावेदविन्मनुते तं बृहन्तं तं त्वौपनिषदं पुरुषं पृच्छामीत्येवमादिश्रुतिभ्यः न विलक्षणत्वादस्य तथात्वं च शब्दा
त् २ ब्रह्मास्य जगतः कारणं प्रकृतिश्चेत्यस्य पक्षस्याक्षेपः स्मृतिनिमित्तः परिहृतः तर्कनिमित्त इदानीमाक्षेपः परि
ह्रियते कुतः पुनरस्मिन्नवधारिते आगमार्थे तर्कनिमित्तस्याक्षेपस्यावकाशः ननु धर्म इव ब्रह्मण्यप्यनपेक्ष आग
मोऽभवितुमर्हतीति भवेदयमवष्टम्भो यदि प्रमाणान्तरानवगाह्य आगममात्रप्रमेयोऽयमर्थः स्यादनुष्ठेयरूप इव धर्मः परिनि
ष्पन्नरूपं तु ब्रह्मावगम्यते परिनिष्पन्ने च वस्तुनि प्रमाणान्तराणामस्त्यवकाशो यथा पृथिव्यादिषु यथा च श्रुतीनां परस्परविरो
धे सत्येकवशेनेतरा नीयन्ते एवं प्रमाणान्तरविरोधेऽपि तद्वशेनैव श्रुतिर्नीयेत दृष्टसाम्येन चादृष्टमर्थं समर्थयन्ती युक्तिरनुभ
वस्य संनिकृष्यते विप्रकृष्यते तु श्रुतिरैतिह्यमात्रेण स्वार्थाभिधानात् अनुभवावसानं च ब्रह्मविज्ञानमविद्याया निवर्तकं मोक्ष

हृत्समानान्तरगम्यत्वादेकविषयत्वाद्विरोध इति एवं पक्षे

हेतु समर्थ्यते भवेदयमिति अवष्टम्भो दृष्टान्तः न त्वेकविषयत्वेन विरोधेऽपि श्रुतिविरोधान्मानान्तरमेव बाध्यतामित्यत
आह यथा चेति प्रबलश्रुतिबाधवन्निरवकाशमानानां तर्काणां लक्षणया सावकाशश्रुतिनयनं युक्तमित्यर्थः किं
च ब्रह्मसाक्षात्कारस्य मोक्षहेतुत्वेन प्रधानस्यान्तरङ्गं तर्कं लक्ष्यापरोक्षदृष्टान्तगोचरत्वेन प्रधानवदपरोक्षार्थविषय
त्वात् शब्दस्तु परोक्षार्थकत्वाद्बहिरङ्ग इति तर्केणाबाध्य इत्याह दृष्टेति एतिमात्रेण परोक्षतयेति यावत् अनुभवस्य प्रधा
न्यं दर्शयति अनुभवावसानं चेति ॥

२२

४

नैषा तर्केणमतिरित्यर्थः न तर्कस्य निषेधमाशंक्य विधिविरोधात्सेवमित्याह श्रुतिरपीति एवं पूर्वपक्षं संभाव्य चेतनब्रह्म
कारणवादिवेदांतसमन्वयः स्मृत्यादिकेन चेतनप्रकृतिककार्यत्वानुमानात् घटवदिति सांख्ययोगन्यायेन निरूप्यते न वेति संदे
हे स्मृतेर्मूलाभावाद्दुर्लभत्वेप्यनुमानस्य व्याप्तिमूलत्वेन प्राबल्यात्तेन विरुध्यत इति प्रत्युदाहरणेन पूर्वपक्षयति न विलक्ष
णत्वादिति एवं च तत्पक्षयोः समन्वयासिद्धिः तत्सिद्धिश्चेति फलं जगन्न ब्रह्मप्रकृतिकं तद्विलक्षणत्वात् यद्यद्विल
क्षणं तत्तन्न तत्प्रकृतिकं यथा मृद्विलक्षणा रुचकादय इत्यर्थः सुखदुःखमोहाः सत्त्वरजस्तमांसि तथा च जगत्सुखदुःख

श्रुतिरपि श्रोतव्यो मंतव्य इति श्रवणव्यतिरेकेण मननं विदधती तर्कमप्यत्रादर्तव्यं दर्शयति अतस्तर्कनिमित्तः ।
पुनराक्षेपः क्रियते न विलक्षणत्वादस्येति यदुक्तं चेतनं जगतः प्रकृतिरिति तन्नोपपद्यते कस्माद्विलक्षणत्वा
दस्य विकारस्य प्रकृत्या इदं हि ब्रह्मकार्यत्वेनाभिप्रेयमाणं जगद्ब्रह्मविलक्षणमचेतनमशुद्धं च दृश्यते ब्रह्म च जग
द्विलक्षणं चेतनं शुद्धं च श्रूयते न च विलक्षणत्वे प्रकृतिविकारभावो दृष्टः नहि रुचकादयो विकारा मृत्प्रकृतिका भ
वंति शरावादयो वा सुवर्णप्रकृतिकाः मृदैव तु मृदन्विताः विकाराः प्रक्रियंते सुवर्णेन च सुवर्णान्विताः तथेदमपि
जगदचेतनं सुखदुःखमोहान्वितं सदचेतनस्यैव सुखदुःखमोहात्मकस्य कारणस्य कार्यं भवितुमर्हतीति न विलक्ष
णस्य ब्रह्मणः ब्रह्मविलक्षणत्वं चास्य जगतोऽशुद्ध्यचेतनत्वदर्शनादवगंतव्यं अशुद्धं हि जगत्सुखदुःखमोहात्मकत
या प्रीतिपरितापविषादादिहेतुत्वात्स्वर्गनरकाद्युच्चावचप्रपंचत्वाच्च अचेतनं चेदं जगच्चेतनं प्रति कार्यकारण
भावेनोपकरणभावोपगमात् नहि साम्ये सत्युपकार्योपकारकभावो भवति नहि प्रदीपौ परस्परस्योपकुरुतः ननु
चेतनमपि कार्यकरणं स्वामिभृत्यन्यायेन भोक्तुरुपकरिष्यति न स्वामिभृत्ययोरप्यचेतनांशस्यैव चेतनं प्रत्युपका
रकत्वात् यो ह्येकस्य चेतनस्य परिग्रहो बुद्ध्यादिरचेतनभागः स एवान्यस्य चेतनस्योपकरोति न तु स्वयमेव चेतनश्चेत
नांतरस्योपकरोत्यपकरोति वा ॥

मोहात्मकसामान्यप्रकृतिकं तदन्वितत्वात् यदित्थं तत्तथा यथा मृदन्विता घटादय इत्याह मृदैवेति विलक्षणत्वं साधय
ति ब्रह्मविलक्षणत्वं चेति यथा हि एक एव स्त्रीपिंडः पतिसपत्न्युपपतीनां प्रीतिपरितापविषादात्मको ति एवमन्येपि भावा
द्रष्टव्याः तत्र प्रीतिः सुखं परितापः शोकः विषादो भ्रमः आदिपदात् रागादिग्रहः उभयोश्चेतनत्वेन साम्यादुपकार्योपका
र्योपकारकभावो न स्यादित्युक्ते स्वामिभृत्ययोर्व्यभिचार इति शंकते ननु चेतनमपीति भृत्यदेहस्यैव स्वामिचेतनोपकारक
त्वान्न व्यभिचार इत्याह नेत्यादिना ॥

उत्कर्षापकर्षशून्यत्वाच्चेतनानां मिथो नोपकारकत्वमित्याह निरतिशया इति तस्मादनुपकारकत्वात् अचेतनत्वप्रकृतिकत्व
वत्त्वं जगच्चेतनमेवैकदेशीनमुत्थापयति योपीति यद्यदेश्चेतनत्वमनुपलब्धिबाधितमित्यत आह अविभावनमिति अ
न्तःकरणान्यपरिणामत्वात्तेषु चैतन्यस्यानुपलब्धिरित्यर्थः अन्तःकरणादन्यस्य तत्तु परागदशायामेव चैतन्याभिव्यक्तिर्नो
स्यादिति भावः तदभावे चैतन्यानभिव्यक्तौ दृष्टान्तः यथेति आत्मानात्मनोश्चेतनत्वे स्वस्वामिभावः कुत इत्यत आह एतस्मा

निरतिशया ह्यकर्तारश्चेतना इति सांख्या मन्यन्ते तस्मादचेतनं कार्यकरणं न च काष्ठलोष्टादीनां चेतनत्वे किंचित्प्र
माणमस्ति प्रसिद्धश्चायं चेतनाचेतनविभागो लोके तस्माद्ब्रह्मविलक्षणत्वान्नेदं जगत्तत्प्रकृतिकं योपि कश्चि
दाचक्षीत श्रुत्वा जगतश्चेतनप्रकृतिकतां तद्बलेनैव समस्तं जगच्चेतनमवगमयिष्यामि प्रकृतिरूपस्य विकारेऽन्वयद
र्शनात् अविभावनं तु चेतनायाः परिणामविशेषाद्भविष्यति यथा स्पष्टचैतन्यानामप्यात्मनां स्वापमूर्छाद्यवस्था
सु चैतन्यं न विभाव्यते एवं काष्ठलोष्टादीनामपि चैतन्यं न विभावयिष्यते एतस्मादेव च विभावितत्वाविभावितत्वकृ
ताद्विशेषाद्रूपादिभावाभावाभ्यां च कार्यकरणानामात्मनां च चेतनत्वाविशेषेपि गुणप्रधानभावो न विरोत्स्यते
यथा च पार्थिवत्वाविशेषेपि मांससूपौदनादीनां प्रत्यात्मवर्तिनो विशेषात्परस्परोपकारित्वं भवत्येवमिहापि
भविष्यति प्रविभागप्रसिद्धिरप्यत एव न विरोत्स्यत इति तेनापि कथंचिच्चेतनाचेतनत्वपरिह्रियते अशुद्ध्यशुद्धि
त्वलक्षणं विलक्षणत्वं नैव परिह्रियते न चेतरदपि विलक्षणत्वं परिहर्तुं शक्यत इत्याह तथात्वं च दर्शयतीति
अनवगम्यमानमेव हीदं लोके समस्तस्य वस्तुनः चेतनत्वं चेतनप्रकृतिकत्वश्रवणाच्छब्दशरणतया केवलयोत्प्रे
क्ष्यते तच्च शब्देनैव विरुध्यते यतः शब्दादपि तथात्वमिति प्रकृतिविलक्षणत्वं कथयति शब्दः एवं विज्ञानं चाविज्ञानं
चेति कस्यचिद्विभागस्याचेतनतां श्रावयंश्चेतनाद्ब्रह्मणो विलक्षणमचेतनं जगज्जगच्छ्रावयति ननु चेतनत्वमपि
क्वचिदचेतनत्वाभिमतानां भूतेन्द्रियाणां श्रूयते यथा मृदब्रवीत् आपोब्रुवन्निति तत्तेज ऐक्षत ता आप ऐक्ष
न्तेति चैवमाद्या भूतविषया चेतनत्वश्रुतिरिन्द्रियविषयापि ते हेमे प्राणा अहंश्रेयसे विवदमाना ब्रह्म जग्मुरिति

यात्वमवगम्यते नेत

लक्षणविलक्षणत्व ७ कृ:

दृष्टेति साम्येपि प्रातिस्विकस्वरूपविशेषाच्छेषशेषित्वे दृष्टान्तः यथा चेति चेतनाचेतनभेदः कथमित्यत आह प्रविभागे
ति चैतन्याभिव्यक्त्यनभिव्यक्तिभ्यामित्यर्थः सर्वस्य चेतनत्वमेकदेश्युक्तमङ्गीकृत्य सांख्यः परिहरतीति तेनापि कथंचिदिति अंगी
कारेण तत्र दोषान्तरेण परिहरति न चेत्यादिना इतरस्य चेतनाचेतनरूपवैलक्षण्यं तथात्वं शब्दार्थः अन्यथापत्तिः शब्देन बाध्येत

दादीनां वक्तृत्वादिस्तत्तदभिमानिविषयत्वात् यावित्तानं चाविज्ञानं चेति चेतनाचेतनविभागशब्दस्योपचरितार्थत्वं न युक्तमि
ति सांख्यः समाधत्ते अभिमानीति संवदने विवादेन भजमानमस्मिन्द्रियमात्रेणाचेतनत्वेन व्यपदिश्यते लोकवेदप्रसिद्धविभागवाधा
योगादित्यर्थः विशेषपदस्यार्थान्तरमाह अपि चेति अहं श्रेयसे स्वश्रेष्ठत्वाय प्राणा विवदमाना इत्युक्तं प्राणानां चेतन
वाचि देवतापदेन विशेषणत्वात् प्राणादिपदे अभिमानिव्यपदेश इत्यर्थः प्राणे निःश्रेयसं विदित्वा प्राणाधीना जाता इत्यन्वयः अ

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यां ८ न शब्द आशंकामपनुदति न खलु मृदब्रवीदित्येवं जातीयका श्रु
त्यो भूतेन्द्रियाणां चेतनत्वमाशंकनीयं यतोऽभिमानिव्यपदेश एषः मृदाद्यभिमानिन्यो वागाद्यभिमानिन्यश्च चेतना दे
वता वदनादिषु चेतनोचितेषु व्यवहारेषु व्यपदिश्यन्ते न भूतेन्द्रियमात्रे कस्माद्धि विशेषानुगतिभ्यां विशेषो हि भोक्तॄ
णां भूतेन्द्रियाणां चेतनाचेतनप्रविभागलक्षणः प्रागभिहितः सर्वचेतनतायां चासौ नोपपद्येत अपि च कौषीत
किनः प्राणसंवादे करणमात्राशंकाविनिवृत्तयेऽधिष्ठातृचेतनपरिग्रहाय देवताशब्देन विशिंषन्ति एता ह वै
देवता अहं श्रेयसे विवदमाना इति ता वा एताः सर्वा देवताः प्राणे निःश्रेयसं विदित्वेति च अनुगताश्च सर्वत्राभि
मानिन्यश्चेतना देवता मन्त्रार्थवादेतिहासपुराणादिभ्योऽवगम्यन्ते अग्निर्वाग्भूत्वा मुखं प्राविशदित्येवमादिका च
श्रुतिः करणेष्वनुग्राहिकां देवतामनुगतां दर्शयति प्राणसंवादवाक्यशेषे च ते ह प्राणाः प्रजापतिं पितरमेत्योचुरि
श्रेष्ठत्वनिर्धारणाय प्रजापतिगमनं तद्वचनाच्चैकैकोत्क्रमणेनान्वयव्यतिरेकाभ्यां प्राणश्रैष्ठ्यप्रतिपत्तिः तस्मै ब
लिहरणमिति चैवं जातीयकोऽस्मदादिष्विव व्यवहारोऽनुगम्यमानोऽभिमानिव्यपदेशं द्रढयति तत्तेज ऐक्षतेत्यपि पर
स्या एव देवताया अधिष्ठात्र्याः स्वविकारेष्वनुगताया इयमीक्षा व्यपदिश्यत इति द्रष्टव्यं तस्माद्विलक्षणमेवेदं ब्र
ह्मणो जगद्विलक्षणत्वाच्च न ब्रह्मप्रकृतिकमित्याक्षिप्ते प्रतिविधत्ते दृश्यते तु ६ तु शब्दः पक्षं व्यावर्तयति यदुक्तं
विलक्षणत्वान्नेदं जगद्ब्रह्मप्रकृतिकमिति नायमेकान्तो दृश्यते हि लोके चेतनत्वेन प्रसिद्धेभ्यः पुरुषादिभ्यो विल
क्षणानां केशनखादीनामुत्पत्तिरचेतनत्वेन प्रसिद्धेभ्यो गोमयादिभ्यो वृश्चिकादीनां ॥ दी। राम ॥

नुगतिं बहुधा व्याचष्टे अनुगताश्चेति तस्मै प्राणाय बलिहरणं वागादिभिः स्वीयवसिष्ठत्वादिगुणसमर्पणं कृतं तेज
आदीनामीक्षणं त्वीक्षत्यधिकरणे चेतननिष्ठतया व्याख्यातं द्रष्टव्यमित्यर्थः यस्मान्नास्ति जगतश्चेतनत्वं तस्मादि
ति एवं पक्षोपसंहारः किं यत्किंचिद्वैलक्षण्यं हेतुः बहुवैलक्षण्यं वा आद्ये व्यभिचारमाह नायमेकान्तो दृश्यते हीति ॥

वि

हेतोरसत्वाद्व्यभिचार इति शंकते नन्विति यल्लिंगं विशेषलक्षणमस्तीति व्यभिचार इत्याह उच्यत इति शरीरस्य केशादीनां च प्राणि
त्वाप्राणित्वरूपं वैलक्षण्यमस्तीत्यर्थः द्वितीये पि व्यभिचारमाह महानिति पारिणामिकः केशादीनां स्वगतपरिणामात्मक
त्वर्थः किं ययोः प्रकृतिविकारभावः तयोस्साहप्यं वक्तव्यं किमात्यंतिकं यत्किंचिदिति आद्ये दोषमाह अत्यंतेति द्विती
यमाशंक्य ब्रह्मजगतोरपि तत्सत्वात्प्रकृतिविकृतित्वसिद्धिरित्याह अथेत्यादिना विलक्षणत्वे विकल्पद्वयेणोत्तरमाह विल

नन्वचेतनान्येव पुरुषादिशरीराण्यचेतनानां केशनखादीनां कारणान्यचेतनान्येव च वृश्चिकादिशरीराण्यचे
तनानां गोमयादीनां कार्याणीति उच्यते एवमपि किंचिदचेतनं चेतनस्यायतनभावमुपगच्छति किंचिन्नेत्य
स्त्येव वैलक्षण्यं महांश्चायं पारिणामिकः स्वभावविप्रकर्षः पुरुषादीनां केशनखादीनां च रूपादिभेदात्
तथा गोमयादीनां वृश्चिकादीनां च अत्यंतसारूप्ये च प्रकृतिविकारभाव एव प्रलीयेत अथोच्यते अस्ति कश्चि
त्पार्थिवत्वादिस्वभावः पुरुषादीनां केशनखादिष्वनुवर्तमानो गोमयादीनां वृश्चिकादिष्विति ब्रह्मणोपि त
र्हि सत्तालक्षणस्स्वभाव आकाशादिष्वनुवर्तमानो दृश्यते विलक्षणत्वेन च कारणेन ब्रह्मप्रकृतित्वं जग
तो दूषयता किमशेषस्य ब्रह्मस्वभावस्याननुवर्तनं विलक्षणत्वमभिप्रेयते उत यस्य कस्यचिदथ चैतन्य
स्येति वक्तव्यं प्रथमे विकल्पे समस्तप्रकृतिविकारोच्छेदप्रसंगः न ह्यसत्यतिशये प्रकृतिविकार इति भव
ति द्वितीये चासिद्धत्वं दृश्यते हि सत्तालक्षणो ब्रह्मस्वभाव आकाशादिष्वनुवर्तमान इत्युक्तं तृतीये च दृ
ष्टांताभावः किं हि यच्चैतन्येनानन्वितं तदब्रह्मप्रकृतिकं दृष्टमिति ब्रह्मवादिनं प्रत्युदाह्रियेत समस्त
स्य वस्तुजातस्य ब्रह्मप्रकृतिकत्वाभ्युपगमात् आगमविरोधस्तु प्रसिद्ध एव चेतनं ब्रह्म जगतः कारणं
प्रकृतिश्चेत्यागमतात्पर्यस्य प्रसाधितत्वात् ॥

क्षणत्वेनेत्यादिना जगति समस्तस्य ब्रह्मस्वभावस्य चेतनत्वादेरननुवर्तनान्न ब्रह्मकार्यत्वमिति पक्षे सर्वस्याप्यप्र
कृतिविकारत्वमित्युक्तं स्यात् तदयुक्तमित्याह प्रथम इति तृतीये तु दृष्टांताभाव इति न च जगतो ब्रह्मप्रकृति
कत्वे चेतनत्वादविद्यावदिति दृष्टांतोस्तीति वाच्यं अनादित्वस्योपाधित्वात् न च धर्मस्य साध्याव्यापकता तस्यापि का
र्यसंस्कारात्मकस्य भावत्वेन ब्रह्मप्रकृतिकत्वाद्भावत्वाग्रहे चानादिभावत्वस्योपाधित्वादिति संप्रति कल्पत्रयसा
धारणं दोषमाह आगमेति ॥

पूर्वोक्तमननरूपब्रह्मणः शुष्कतर्कविषयत्वासंभवान्न तर्केणाक्षेप इत्याह यत्त्वित्यादिना लिंगादृष्यपदप्रवृत्तिनिमित्तानाम
भावादनुमानोपमानशब्दानामगोचरो ब्रह्मलक्षणो यो वैदिकवेद्यमित्यर्थः एषा ब्रह्मणि मतिस्तर्केण स्वतंत्रेणानापतेयानसंपा
दनीया यद्वा कुतर्केणानवाधनीया कुतः किंकादन्येनैव वेदविदाचार्येण प्रोक्ता मतिः सुज्ञानाय अनुभवाय फलाय भवति हे प्रेष्ठ
प्रियतमेति नचिकेतसं प्रति मृत्योर्वचनं इयं विविधा सृष्टिर्यतः आसमंताद्भवति को वा अद्धा साक्षाद्वेद इति श्रुत्यन्तरं इह
लोके तं प्रवोचत् आवोचत् छांदसो दीर्घलोपः यथावद्ब्रह्मापि नास्तीत्यर्थः प्रभवं जन्म न विदुः मम सर्वादित्वेन जन्माभावात् इति षे
णमननविधिव्याजेन शुष्कः शुष्कत्वप्रत्यक्षतः अन्यानन्वेतिनिश्चिते तत्त्वज्ञप्रस्तावप्यदो यस्मात् भावनादेर्निरासाय गृहीतः अन्य
नुगृहीतः तमाह स्मांतेति जीवस्यावस्थावतो देहादिप्रपंचयुक्तस्य निष्प्रपंचब्रह्मैक्यमसंभवि दृष्टत्वादि प्रमाणविरोधाद्ब्रह्मण

यत्तूक्तं परिनिष्पन्नत्वात् ब्रह्मणि प्रमाणान्तराणि संभवेयुरिति तदपि मनोरथमात्रं रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षस्य
गोचरः लिंगाद्यभावाच्च नानुमानादीनाम् आगममात्रसमधिगम्य एव त्वयमर्थो धर्मवत् तथा च श्रुतिः नैषा तर्केण मति
रापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेति को अद्धा वेद क इह प्रवोचदियं विसृष्टिः यत आबभूव इति चैते ऋचौ सिद्धानामपी
श्वराणां दुर्बोधतां जगत्कारणस्य दर्शयतः स्मृतिरपि भवति अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेदिति अव्यक्तो
यमचिन्त्योयमविकार्योयमुच्यते इति च न मे विदुः सुरगणाः प्रभवं न महर्षयः अहमादिर्हि देवानां महर्षीणां च सर्वशः
इति चैवंजातीयका यदपि श्रवणव्यतिरेकेण मननं विदधच्छब्द एव तर्कमप्यादर्तव्यं दर्शयतीत्युक्तं नानेन मिषे
ण शुष्कतर्कस्यात्रात्मलाभः संभवति श्रुत्यनुगृहीत एव ह्यत्र तर्कोऽनुभवाङ्गत्वेनाश्रीयते स्वप्नान्तबुद्धान्तयोरुभयोरि
तरेतरव्यभिचारादात्मनोऽनन्वागतत्वं संप्रसादे च प्रपंचपरित्यागेन सदात्मना संपत्तेर्निष्प्रपंचसदात्मत्वं प्रपंचस्य ब्रह्मप्र
भवत्वात् कार्यकारणानन्यत्वन्यायेन ब्रह्माव्यतिरेक इत्येवंजातीयकः तर्काप्रतिष्ठानादिति च केवलस्य तर्कस्य विप्र

स्वाद्विनीतत्वमुक्तमित्येवं श्रोतार्थासंभावनायां निरासाय सर्वास्ववस्थास्वात्मनोऽनुगतस्य व्यभिचारिणीभिरवस्थाभिरनन्वागतत्वमसं
स्पृष्टत्वमवस्थानां स्वाभाविकत्वे चन्द्रौ सवदात्मव्यभिचारायोगात् सुषुप्तौ प्रपंचाभावानुभवे सता सोम्येत्युक्तां भेददर्शनान्निष्प्र
पंचब्रह्मैक्यासंभवः यथा घटादयो मृदभिन्ना तथा जगद्ब्रह्माभिन्नं तज्जत्वादित्यादिस्तर्कश्चाश्रीयत इत्यर्थः इतोप्याह यस्तर्कस्य
अब्रह्मण्येव प्रवेशादसचानुकूलत्वान्न तर्केणाक्षेपावकाश इति भावः ब्रह्मणि शुष्कतर्कस्याप्रवेशः सूत्रसंमत इत्याह
इतस्तर्काप्रतिष्ठानादिति विप्रलम्भकत्वमप्रमाकत्वं यत्त्वेकेऽपि कदेशानां तत्त्वस्य जगतस्तत्र नन्वाक्तो विभागस्तु तत्र प्रपतति विति
इत्येण साम्येन तत्र नैकदेशिना विभागः श्रुतेस्तन्न्याभिव्यक्तानभिव्यक्तिभ्यां योजयितुं शक्यत्वात् स्वस्यास्विदं इत्येव

प्रभावत्कार्यत्वे सर्वस्याचेतनत्वेन चेतनाचेतनकार्यविभागासंभवादित्याह योपीत्यादिना सिद्धांते चेतनैर्विलक्षणत्वांगीकारे क
थं ब्रह्मणः प्रकृतित्वमित्यत आह प्रत्युक्तत्वादिति अप्रयोजकत्वव्यभिचाराभ्यां निरस्तत्वादित्यर्थः कार्यमुत्पत्तेः प्रागसदेवं
स्यात्त्वविरहेतु कारणात्मना सत्त्वायोगादित्यपि सिद्धांतापत्तिमाशंक्य मिथ्यात्वात्कार्यस्य कालत्रयेपि कारणात्मना सत्त्वमवि
रुद्धमिति समाधत्ते असदितिचेदित्यादिना असत्त्वादिति सत्त्वप्रतिषेधो निरर्थक इत्यर्थः कार्यसत्त्वाभावे श्रुतिमाह स

च्चाविज्ञानं च

योपि चेतनकारणश्रवणबलेनैव समस्तस्य जगतश्चेतनतामुत्प्रेक्षेत तस्यापि विज्ञानं चेतनाचेतनविभागश्रव
णाद्विभावनाविभावनाभ्यां चैतन्यस्य शक्यत एव योजयितुं परस्यैव त्विदमपि विभागश्रवणं न युज्यते कथं पर
मकारणस्य तत्र समस्तजगदात्मना समवस्थानं श्राव्यते विज्ञानं चाविज्ञानं चाभवदिति तत्र यथा चेतनस्या
चेतनभावो नोपपद्यते विलक्षणत्वादेवमचेतनस्यापि चेतनभावो नोपपद्यते प्रत्युक्तत्वात्तु विलक्षणत्वस्य यथाश्रुत्ये
व चेतनं कारणं ग्रहीतव्यं भवति असदितिचेन्न प्रतिषेधमात्रत्वात् १० यदि चेतनं शुद्धं शब्दादिहीनं च ब्र
ह्म तद्विपरीतस्याचेतनस्याशुद्धस्य शब्दादिमतस्य कार्यस्य कारणमिष्येत असत्तर्हि कार्यं प्रागुत्पत्तेरिति प्र
सज्येत अनिष्टं चैतत्सत्कार्यवादिनस्तवेति चेन्नैष दोषः प्रतिषेधमात्रत्वात् प्रतिषेधमात्रं हीदं नास्य प्रतिषेध
स्य प्रतिषेध्यमस्ति न ह्ययं प्रतिषेधः प्रागुत्पत्तेः सत्त्वं कार्यस्य प्रतिषेद्धुं शक्नोति कथं यथैव हीदानीमपीदं का
र्यं कारणात्मानमंतरेण स्वतंत्रं नास्ति सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेत्यादिश्रवणात् कारणात्मना तु स
त्त्वं कार्यस्य प्रागुत्पत्तेरविशिष्टं ननु शब्दादिहीनं ब्रह्म जगतः कारणं बाढं न तु शब्दादिमत्कार्यं कारणात्मना हीनं
प्रागुत्पत्तेरिदानीं वास्ति तेन न शक्यते वक्तुं प्रागुत्पत्तेरसत्कार्यमिति विस्तरेण चैतत्कार्यकारणानन्यत्ववादे
वक्ष्यामः अपीतौ तद्वत्प्रसंगादसमंजसं ११ अत्राह यदि स्थौल्यसावयवत्वाचेतनत्वपरिच्छिन्नत्वाशुद्ध्यादि
धर्मकं कार्यं ब्रह्मकारणकमभ्युपगम्येत तदपीतौ प्रलये प्रतिसंसृज्यमानं कार्यं कारणाविभागमापद्यमानं
कारणमात्मीयेन धर्मेण दूषयेदित्यपीतौ कारणस्यापि ब्रह्मणः कार्यस्येवाशुद्ध्यादिरूपप्रसंगात्सर्वज्ञं ब्रह्म

त्मनासदेवं प्रागुत्पत्तेरपीति गम्यते नहीदानीमपि कार्यं कारणात्.. टि ८

र्वं तमिति मिथ्यात्वमज्ञानतः शंकामत्र यत्परिहरति नन्वित्यादिना विस्तरेण चैतदिति मिथ्यात्वमित्यर्थः सत्कार्यवादसिद्ध्यर्थं का
र्याभेदे कारणस्यापि कार्यवदशुद्ध्यादिप्रसंग इति शंकासूत्रं व्याचष्टे अत्राहेति प्रतिसंसृज्यमानपदस्य व्याख्यां करोति यथाज

स्त्रव्यस्य योजनान्तरमाह अपीतेति सर्वस्य कार्यस्यापीतौ कारणवदेकरूपत्वप्रसंगात् इत्यर्थः। अर्थान्तरमाह अपीचेति कर्मादीना मुत्पत्तिनिमित्तानां प्रलयेपि भोक्तृणामनुत्पत्तौ तद्वदेव मुक्तानामप्युत्पत्तिप्रसंगादित्यर्थः। शंकापूर्वकं व्याख्यान्तरमाह अपीति यदि लयकालेपि कार्यं कारणाद्विभक्तं तर्हि स्थितिकालवल्लयाभावप्रसंगात् कार्येण हेतौ पतेत्यसमंजसमिदं दर्शनमित्यर्थः। अपीतौ जगत्स्वकारणं न दूषयति कारणे लीनत्वात् घटादिषु लीनघटादिवदिति सिद्धान्तसूत्रं व्याचष्टे नैवेत्यादिना अपिगच्छल्लीय

अपि च समस्तस्य विभागस्याविभागप्राप्तेः पुनरुत्पत्तौ नियमकारणाभावात् भोक्तृभोग्यादिविभागेनोत्पत्तिर्न प्राप्नोति इत्यसमंजसं अपि च भोक्तृणां परेण ब्रह्मणा विभागगतानां कर्मादिनिमित्तप्रलयेपि पुनरुत्पत्तावभ्युपगम्यमानाया मुक्तानामपि पुनरुत्पत्तिप्रसंगात् असमंजसं अथेदं जगदपीतावपि विभक्तमेव परेण ब्रह्मणावतिष्ठेतैवमप्यपीतिश्च न संभवति कारणाव्यतिरिक्तं च कार्यं न संभवतीत्यसमंजसमेवेति अत्रोच्यते नतदृष्टान्तभावात् ॥ नैवास्मदीये दर्शने किंचिदसामंजस्यमस्ति यत्तावदभिहितं कारणमपिगच्छत्कार्यं कारणमात्मीयेन धर्मेण दूषयेदिति तद्दूषणं कस्मात् दृष्टान्तभावात् सन्ति हि दृष्टान्ता यथा कारणमपिगच्छत् कार्यं कारणमात्मीयेन धर्मेण न दूषयति तद्यथा शरावादयो मृत्प्रकृतिका विकारा विभागावस्थायामुच्चावचमध्यमप्रभेदाः सन्तः पुनः प्रकृतिमपिगच्छन्तो न तामात्मीयेन धर्मेण संसृजन्ति रुचकादयश्च सुवर्णविकारा अपीतौ न सुवर्णमात्मीयेन धर्मेण संसृजन्ति पृथिवीविकारश्चतुर्विधो भूतग्रामो न पृथिवीमपीतावात्मीयेन धर्मेण संसृजति त्वत्पक्षस्य तु न कश्चिद् दृष्टान्तोस्ति अपीतिरेव हि न संभवेत् यदि कारणे कार्यं स्वधर्मेणावतिष्ठेत अनन्यत्वेपि कार्यकारणयोः कार्यस्य कारणात्मत्वं न तु कारणस्य कार्यात्मत्वमारम्भणशब्दादिभ्यो वक्ष्यामः अत्यल्पं चेदमुच्यते कार्यमपीतावात्मीयेन धर्मेण कारणं संसृजेदिति स्थितावपि समानोयं प्रसंगः कार्यकारणयोरनन्यत्वाभ्युपगमात् इदं सर्वं यदयमात्मा आत्मैवेदं सर्वं ब्रह्मैवेदममृतं पुरस्तात् सर्वं खल्विदं ब्रह्मेत्येवमाद्याभिर्हि श्रुतिभिरविशेषेण त्रिष्वपि कालेषु [illegible] कार्यस्य कारणानन्यत्वं श्राव्यते तत्र यः परिहारः

मानेन विभागावस्थायां स्थितिकालः त्वत्पक्षस्येति मधुरं जलं लवणमितिवद्दृष्टान्तः किंच दूषकत्वे कार्यस्य स्थितिः स्याल्लवणवदित्याह अपीतिरेवेति असति कार्ये तद्धर्मेण कारणस्य योगो न संभवति धर्मिसत्त्वे धर्माणामपि सत्त्वादिति भावः। ननु सत्कार्यवादे लयेपि कार्यस्य कारणाभेदेन सत्त्वाद्दूषकत्वं स्यादित्यत आह अनन्यत्वेपीति कल्पितस्याधिष्ठानधर्मवत्त्वमभेदात् न त्वधिष्ठानस्य कल्पितकार्यधर्मवत्त्वं तस्य कार्यान्तरस्पर्शकत्वादित्यर्थः किंचापीतावितिविशेषणं व्यर्थमिति

परिणामित्वदृष्टान्तं व्याख्याय विवर्तदृष्टान्तं व्याचष्टे असन्निवेति मायाया अनुपादानत्वमिष्टं चेद् दृष्टान्तान्तरमाह यथेति अस्त्येव स्वप्नका लेदृष्टस्य सर्ग इत्यत आह प्रबोध इति जाग्रत्स्वप्नयोः स्वस्मिन्नात्मनो स्पर्शात्तत्काले प्यस्पर्श इत्यर्थः यदुक्तं तस्य जीवस्यावस्थाभिः संस र्गाभावात्सर्वज्ञत्वं किं वाच्यमिति दार्ष्टान्तिकमाह एवमिति जगज्जन्मस्थितिलयाद्यवस्थावस्थात्रये तदसंगित्वेन तु सन्मति। माह अयोक्तमिति यथा तत्त्वमसीत्युपदेशकाले प्रबुध्यते मायानिवृत्त्याजातिदा जन्मलयस्थित्यवस्थास्वप्यसत्त्वमद्वैतमीश्वरमा त्मत्वेनानुभवतीत्यर्थः फलितमाह नेवेति द्वितीयमसामंजस्यमन्त्ययत्नेनेवस्वरूपेण परिहरति यत्तु नदीति स्वप्नमात्रानत्व

असलित्वा यमपरोदृष्टान्तः यथा स्वयं प्रसारितया मायया मायावी त्रिष्वपि कालेषु न संस्पृश्यते अवस्तुत्वात् एवं पर मात्मापि संसारमायया न संस्पृश्यत इति यथा च स्वप्नदृग् एकः स्वप्नदर्शनमायया न संस्पृश्यत इति प्रबोधसंप्रसादयो रनन्वागतत्वात् एवमवस्थात्रयसाक्ष्येकोव्यभिचार्यवस्थात्रयेणाव्यभिचारिणा न संस्पृश्यते मायामात्रत्वात् परमात्म नोवस्थात्रयात्मनावभासनं रज्ज्वा इव सर्पादिभावेनेति अत्रोक्तं वेदान्तार्थसंप्रदायविद्भिराचार्यैः अनादिमायया सुप्तो यदा जीवः प्रबुध्यते अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदेति तत्र यदुक्तमपीतौ कारणस्यापि कार्यस्येव स्थौल्या दिदोषप्रसंग इत्येतत् तद् युक्तं यत्तु नेदं तदुक्तमसमञ्जस्यविभागस्याविभागप्राप्तेः पुनर्विभागेनोत्पत्तौ नियमकारणा नुपपत्तेरित्ययमप्यदोषः दृष्टान्तभावादेव यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यामविभागप्राप्तौ मिथ्याज्ञाना

नस्यानपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवत्येवमिहापि भविष्यतीति श्रुतिश्चात्र भवति इमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामह इति त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदाभवन्ती ति यथा ह्यविभागेपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवदव्याहतः स्थितौ दृश्यते एवमपीता वपि मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते ॥

पुनर्विभागोत्पत्तौ चमानमाह श्रुतिश्चेति सतिसम्पद्य ईश्वराभिन्ने कारणे कीभूय न विदुरित्यज्ञानोक्तिः इह लोके प्राक्प्रबोधे येन येन जात्यादि नाविभक्ताभवन्ति तदा पुनरुत्थानकाले तथैव भवन्तीति विभागोक्तिः ननु सुषुप्तौ पुनर्विभागकारणज्ञानसत्त्वेपि न तत्प्रलयेत त्सत्त्वाकृतमित्यत आह यथा हीति यथा सुषुप्तौ परमात्मनि सर्वकार्याणामविभागेपि पुनर्विभागहेत्वज्ञानशक्तिरस्ति एवम पीतौ महाप्रलयेपि मिथ्याभूताज्ञानस्य वर्तमानत्वेन दृष्टविभागशक्तिरनुमानसम्भवः स्थितौ विद्यमानो मिथ्याज्ञान॥ कार्यो विभागव्यवहारस्तत्त्वबोधात्स्वप्नवदबाधितो दृश्यते अतः कार्यदर्शनात्कारणसत्त्वसिद्धिरित्यर्थः अज्ञानो जीवानां महाप्रलयेप्यज्ञानशक्तिनियमात्पुनर्जन्मनिप्रमत्तिभावः ॥ ॥

एतेनेति जन्मकारणाज्ञानपाक्षभावेनेत्यर्थः वैलक्षण्यादीनां स्वपक्षेपि दोषत्वान्नास्माभिरेतन्निरासप्रयासः कार्य इत्या
ह स्वपक्षेति सत्रं व्याचष्टे सेति प्रादुष्युः प्रादुर्भवेयुः अत एवेति सत्यकार्यस्य विलक्षणकारणात्मना सत्त्वायोगात्सांख्यस्यै
वायं दोषो न कार्यमिथ्यात्ववादिन इति मंतव्यं अपीताविति लयोक्तदोषचतुष्टयमाह तथापीताविति कार्यवद्धर्माः

२४

एतेन नु मुक्तानां पुनरुत्पत्तिप्रसंगः प्रत्युक्तः सम्यक्ज्ञानेन मिथ्याज्ञानस्यापोदितत्वात् यः पुनरयमंते पक्षो विक
ल्प उत्प्रेक्षितोथेदं जगदपीतावपि विभक्तमेव परेण ब्रह्मणावतिष्ठेतेति सोप्यनभ्युपगमादेव प्रतिषि
द्धः तस्मात्समंजसमिदमौपनिषदं दर्शनं स्वपक्षदोषाच्च १२ स्वपक्षे चैते प्रतिवादिनः साधारणा दोषाः प्रादुष्युः
कथमिति उच्यते यत्तावदभिहितं विलक्षणत्वान्नेदं जगद्ब्रह्मप्रकृतिकमिति प्रधानप्रकृतिकतायामपि समा
नमेतच्छब्दादिहीनात्प्रधानाच्छब्दादिमतो जगत उत्पत्त्यभ्युपगमात् अत एव च विलक्षणकार्योत्पत्त्यभ्यु
पगमात्समानः प्रागुत्पत्तेरसत्कार्यवादप्रसंगः तथापीतौ कार्यस्य कारणाविभागाभ्युपगमात्तद्वत्प्रसंगो
पि समानः तथा मृदितसर्वविशेषेषु विकारेष्वपीतावविभागात्मतां गतेष्विदमस्य पुरुषस्योपादानमि
दमस्येति प्राक्प्रलयात्प्रतिपुरुषं ये नियता भेदा न ते तथैव पुनरुत्पत्तौ नियंतुं शक्यंते कारणाभावाद्विनैव कार
णेन नियमेभ्युपगम्यमाने कारणाभावसाम्यान्मुक्तानामपि पुनर्बंधप्रसंगः अथ केचिद्भेदा अपीताववि
भागमापद्यंते केचिन्नेति चेद्ये नापद्यंते तेषां प्रधानकार्यत्वं न प्राप्नोतीत्येवमेते दोषाः साधारणत्वान्ना
न्यतरस्मिन्पक्षे चोदयितव्या भवंतीत्यदोषतामेवैषां द्रढयति अवश्याश्रयितव्यत्वात् ॥

मि२५

नस्वरूपादिप्रसंगः इदं कर्मादिकमस्योपादानं भोग्यमस्येत्यनियमः बद्धमुक्ताव्यवस्था च यदि व्यवस्थार्थमु
क्तानां भेदाः सचात विशेषाः प्रधाने लीयंते बद्धानां भेदास्तु न लीयंते इत्युच्यते तर्हि अलीनानां पुरुषवत्कार्यत्वव्याघात इत्यर्थः

शा.भा.
द्वि.अ.
२

किंच तर्कस्य संभावितदोषत्वात्तेन निर्दोषवेदार्थसमन्वयो न बाध्य इत्याह तर्काप्रतिष्ठानादिति पुरुषमतीनां विचित्रत्वेपि कपि-
लस्य सर्वज्ञत्वात्तदीयतर्के विश्वास इति शंकते अथेति कपिलो यदि सर्वज्ञः कणादो नेति का प्रमेति न्यायेन परिहरति एवमपी-
ति सत्त्वमध्यस्य शंकाभावं प्रत्याचष्टे अथोच्यतेति विलक्षणत्वादितर्काणामप्रतिष्ठितत्वेपि व्याप्तिपक्षधर्मतासंपन्नः कश्चित्त-
र्कः प्रतिष्ठितो भविष्यति तेन प्रधानं सम्यग्ज्ञेयमिति यर्थः नन्वसौ प्रप्रतिष्ठितर्कजातीयत्वाद्विलक्षणत्वादिवत्तत्राह नही-
ति तर्कजातीयत्वादिति तर्कः प्रतिष्ठितो न वा आद्ये व्यवाप्रतिष्ठितत्वसाध्याभावाद्व्यभिचारः द्वितीये पि न सर्वतर्काणामप्रतिष्ठि-

तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसंगः ॥११॥ इतश्च नागमगम्येर्थे केवलेन तर्केण प्रत्यवस्था-
तव्यं यस्मान्निरागमाः पुरुषोत्प्रेक्षामात्रनिबंधनास्तर्का अप्रतिष्ठिता भवन्त्युत्प्रेक्षाया निरंकुशत्वात् तथाहि कैश्चिदभि-
युक्तैर्यत्नेनोत्प्रेक्षितास्तर्का अभियुक्ततरैरन्यैराभास्यमाना दृश्यन्ते तैरप्युत्प्रेक्षिताः सन्तस्ततोन्यैराभास्यमाना दृश्यन्ते
इति न प्रतिष्ठितत्वं तर्काणां शक्यमाश्रयितुं पुरुषमतिवैरूप्यात् अथ कस्यचित्प्रसि-
द्धमाहात्म्यस्य कपिलस्यान्यस्य वा संमतस्तर्कः प्रतिष्ठित इत्याश्रीयेत एवमप्यप्रतिष्ठितत्वमेव प्र-
सिद्धमाहात्म्यानुमतानामपि तीर्थकराणां कपिलकणभुक्प्रभृतीनां परस्परविप्रतिपत्तिदर्शनात् अथोच्येत अ-
न्यथा वयमनुमास्यामहे यथा नाप्रतिष्ठादोषो भविष्यति न हि प्रतिष्ठितस्तर्क एव नास्तीति शक्यते वक्तुं एतदपि हि
तर्काणामप्रतिष्ठितत्वं तर्केणैव प्रतिष्ठाप्यते केषांचित्तर्काणामप्रतिष्ठितत्वदर्शनेनान्येषामपि तज्जातीयकानां तर्-
काणामप्रतिष्ठितत्वकल्पनात् सर्वतर्काप्रतिष्ठायां च लोकव्यवहारोच्छेदप्रसंगः अतीतवर्तमानाध्वसाम्येन ह्यना-
गतेप्यध्वनि सुखदुःखप्राप्तिपरिहाराय प्रवर्तमानो लोको दृश्यते श्रुत्यर्थविप्रतिपत्तौ चार्थाभासनिराकरणेन सम्य-
गर्थनिर्धारणं तर्केणैव वाक्यवृत्तिनिरूपणेन क्रियते मनुरपि चैवमेव मन्यते प्रत्यक्षमनुमानं च शास्त्रं च विविधागमं
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सतेति आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना यस्तर्केणानुसंधत्ते स धर्मं वेद ने-
तर इति च ब्रुवन् अयमेव तर्कस्यालंका-
रो यदप्रतिष्ठितत्वं नामैवं हि सावद्यपरि-
त्यागेन निरवद्यस्तर्कः प्रतिपन्नो भवति ॥

निरूपक नो
तत्वे हेत्वभावादित्यभिसंधिमानाह एतदपीति किं चानागतपाकं उष्णसाधनं पाकत्वात् अतीतपाकवदित्यादौ इष्टानिष्टसाधनान-
मानानां सत्तर्कस्य प्रवृत्तिव्यवहारहेतुत्वान्न प्रतिष्ठेत्याह सर्वतर्केति अध्वविषयः पाकभोजनादिर्विषभक्षणादिश्च तत्सा-
मान्येन पाकत्वादिनानागतविषये पाकादौ सुखदुःखहेतुत्वानुमितेः प्रवृत्तिनिवृत्त्यर्थः किंच पूर्वोत्तरमीमांसयोस्तर्केणै-
व वाक्यतात्पर्यनिर्णयस्य क्रियमाणत्वात्तर्कः प्रतिष्ठित इत्याह अन्यथेति मनुरपि केषांचित्तर्काणां प्रतिष्ठामन्यत इत्याह
मनुरिति धर्मस्य शुद्धिरयमीदृश इति निर्णयः कस्यचित्तर्कस्याप्रतिष्ठितत्वमंगीकरोति अयमेवेति सर्वतर्काणां प्रतिष्ठायामेवं
पक्ष एव न स्यादिति भावः

एवं प्राप्ते तर्कवत्सिद्धान्ततर्कोऽप्यप्रतिष्ठितः तर्कत्वाविशेषादिति वदन्तमुपहसति नहीति क्वचित्तर्कस्य प्रतिष्ठायामपि ज
गत्कारणविशेषे तर्कस्याप्रतिष्ठानं नेत्यनात्मीतीति सूत्रशेषं व्याचष्टे यद्यपीत्यादिना भावस्य जगत्कारणस्य याथात्म्यमह यत्त्वनु॥
क्तिनिबन्धने मनुष्याल्पवनं परमात्मनेह चित्रमश्रोतिगभीरत्वब्रह्मणो वेदान्यमात्रागम्यत्वं दर्शयति रूपादीति अविमोक्षः
मुक्त्यभाव इत्यर्थः तत्र राह अपि चेत्यादिना एकरूपवस्तुज्ञानस्य सम्यग्ज्ञानत्वेऽपि तर्कजन्यत्वं किं न स्यादितिनत्राह नचैवं

नहि एवंज्ञो महज्ञासीदितितूर्य्यमनास्ते न भवितव्य इति किंचिदस्ति प्रमाणं तस्मान्न तर्काप्रतिष्ठानं दोष इति चेदेव
मप्यविमोक्षप्रसंगो यद्यपि क्वचिद्विषये तर्कप्रतिष्ठितत्वमुपलक्ष्यते तथापि प्रकृते तावद्विषये प्रसज्यत एवा
प्रतिष्ठितत्वदोषादनिर्मोक्षस्तर्कस्य नहीदमतिगंभीरं भावयाथात्म्यं मुक्तिनिबन्धनमागममन्तरेणोत्प्रेक्षितु
मपि शक्यं रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षगोचरो लिंगाद्यभावाच्च नानुमानादीनामिति चावोचाम अपि च
सम्यग्ज्ञानान्मोक्ष इति सर्वेषां मोक्षवादिनामभ्युपगमः तच्च सम्यग्ज्ञानमेकरूपं वस्तुतन्त्रत्वात् एकरूपेण ह्य
वस्थितो योऽर्थः स परमार्थो लोके तद्विषयं ज्ञानं सम्यग्ज्ञानमित्युच्यते यथाग्निरुष्ण इति तत्रैवं सति सम्यग्ज्ञा
ने पुरुषाणां विप्रतिपत्तिरनुपपन्ना तर्कज्ञानानां त्वन्योन्यविरोधात्प्रसिद्धा विप्रतिपत्तिः यद्धि केनचित्तार्किके
णेदमेव सम्यग्ज्ञानमिति प्रतिपादितं तदपरेण व्युत्थाप्यते तेनापि प्रतिष्ठापितं ततोऽपरेण व्युत्थाप्यत इति प्रसिद्धं
लोके कथमेकरूपानवस्थितविषयं तर्कप्रभवं सम्यग्ज्ञानं भवेत् न च प्रधानवादी तर्कविदामुत्तम इति सर्वैस्ता
र्किकैः परिगृहीतः येन तदीयं मतं सम्यग्ज्ञानमिति प्रतिपद्येमहि न च शक्यन्ते अतीतानागतवर्तमानास्तार्कि
का एकस्मिन्देशे काले च समाहर्तुं येन तन्मतिरेकरूपैकार्थविषया सम्यङ्मतिरिति स्यात् वेदस्य तु नित्यत्वे च सति
व्यवस्थितार्थविषयत्वोपपत्तेः तज्जनितस्य ज्ञानस्य सम्यक्त्वम् अतीतानागतवर्तमानैः सर्वैरपि तार्किकैरपह्नोतु
मशक्यम् अतः सिद्धमस्यैवौपनिषदस्य ज्ञानस्य सम्यग्ज्ञानत्वम् अतोऽन्यत्र सम्यग्ज्ञानत्वानुपपत्तेः संसाराविमोक्ष एव

सतीति तर्कोत्थज्ञानानां मिथो विप्रतिपत्तेर्न सम्यग्ज्ञानत्वं सम्यग्ज्ञाने विप्रतिपत्त्ययोगादित्यर्थः एकरूपेणानवस्थितो वि
षयो यस्य तत्तर्कप्रभवं कथं सम्यग्ज्ञानं भवेदिति योजना ननु सांख्यस्य सर्वज्ञत्वात्तज्ज्ञानं सम्यगित्याशंक्याहेत्वसिद्धिमाह नच
प्रधानेति ननु सर्वतार्किकैर्मिलित्वा निश्चितस्तर्कोऽस्य मतिरस्ति हेतुरित्यत आह नच शक्यन्त इति तस्मात्तर्कोत्थज्ञानान्मु
क्त्यसामान्यतर्कैर्वेदान्तसमन्वयबाधेनयुक्तस्तद्बाधः सम्यग्ज्ञानालाभेनानिर्मोक्षप्रसंगादिति सूत्रार्थमुपसंहरति अ

२॥ सर्वैरपि तार्किकैरपह्नोतुमशक्यमतः सिद्धमस्यैवौपनिषदज्ञानस्य सम्यग्ज्ञानत्वं

शा॰भा॰
टि॰प्र॰
१०

समन्वयस्य तर्केण विरोधे फलितमधिकरणार्थमुपसंहरति अतश्चागमेनेति ब्रह्म जगदुपादानमिति ब्रुवतां वेदान्तसमन्वयो विषयः
स किं युक्तिमत्त्वे ब्रह्मोपादानमिति वैशेषिकादिन्यायेन विरुध्यते न वेति संदेहे सांख्यवद्ब्रह्मज्ञानां तर्काकुशलमतित्वेपि वैशे
षिकादीनां तर्ककुशलत्वप्रसिद्धेस्तदीयन्यायस्याबाधितत्वाद्विरुध्यत इति प्रत्युदाहरणेन प्राप्ते सिद्धान्तं दिशति एतेने
ति फलं पूर्ववत् ननु सांख्यमतस्योपदेशात्किं कमतस्यातिदेशः किमिति कृतो वैपरीत्यस्यापि संभवादित्याशंक्य
पूर्वोत्तरयोरुपदेशातिदेशभावे कारणमाह वैदिकस्येति सत्कार्यत्वात्मसंगत्वस्वप्रकाशत्वाद्यंशैर्वेदान्तशास्त्रस्य प्रत्यास
न्नः प्रदानवादः शिष्टदेवलादिभिः सत्कार्यत्वांशेन स्वीकृतश्चेति प्रबलत्वादुपदेशः अण्वादिवादानां निर्मूलत्वेन दुर्बलत्वा

नपरिग्रहा ५

अतश्चागमवशेनागमानुसारितर्कवशेन च चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेति स्थितं एतेन शिष्टापरिग्रहा
अपि व्याख्याताः १२ वैदिकस्य दर्शनस्य प्रत्यासन्नत्वात् गुरुतरतर्कबलोपेतत्वात् वेदानुसारिभिश्च कैश्चिच्छिष्टैः केन
चिदंशेन परिगृहीतत्वात् प्रधानकारणवादं तावद्व्यपाश्रित्य यस्तर्कनिमित्त आक्षेपो वेदान्तवाक्येषूद्भावितः स प
रिहृतः इदानीमण्वादिवादव्यपाश्रयेणापि कैश्चिन्मन्दमतिभिर्वेदान्तवाक्येषु पुनस्तर्कनिमित्त आक्षेप आशंक्यत
इत्यतः प्रधानमल्लनिबर्हणन्यायेनातिदिशति परिगृह्यन्त इति परिग्रहाः अपरिग्रहाः शिष्टानामपरिग्रहाः शि
ष्टापरिग्रहाः एतेन प्रकृतेन प्रधानकारणवादनिराकरणकारणेन शिष्टैर्मनुव्यासप्रभृतिभिः केनचिदंशेना
परिगृहीता ये अण्वादिकारणवादास्तेपि प्रतिषिद्धतया व्याख्याता निराकृता द्रष्टव्याः तुल्यत्वान्निराकरणस्य नात्र पुन
राशंकितव्यं किंचिदस्ति तुल्यमत्रापि परमगंभीरस्य जगत्कारणस्य तर्कानवगाह्यत्वं तर्कस्य चाप्रतिष्ठितत्वमन्यथा
नुमानेप्यविमोक्ष आगमविरोधश्चेत्येवंजातीयकं निराकरणकारणं भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् १३ अ

दतिदेश इति भावः किं निराकरणकारणमिति पृष्टं नास्तीत्याह तुल्यत्वादिति कारणमेवाह तुल्यमिति यदुक्तं विभक्ता
त्स्वद्रव्योपादाने ब्रह्मेति तदुपपत्तसाधकत्वेनाङ्गीकृतमुपजीव्यत्वात् न यद्बाधः महापरिमाणवत्त्वस्य सर्वसंयोगवत्त्वरूपविभु
त्वस्य निर्गुणब्रह्मण्यसिद्धेश्चेति द्रष्टव्यं अतः समन्वयस्यातार्किकन्यायेन न विरोध इति सिद्धं अद्वितीयात् ब्रह्मणो जगत्स
र्गादिवादी वेदान्तसमन्वयो विषयः स किं यस्मिन्पक्षे भिन्नत्वाद्वितीयकारणमिष्टं यथास्वतन्त्रेणोद्धटपदावितितर्कस्तद्वि
तभेदप्रतीत्यादिना विरुध्यते न वेति संदेहे ब्रह्मणि तर्कस्याप्रतिष्ठितत्वेपि जडे देप्रतिष्ठितत्वाद्विरुध्यत इति पूर्वपक्षयति
भोक्त्रापत्तेरिति विरोधादद्वैतासिद्धिः पूर्वपक्षफलं सिद्धान्ते तदसिद्धिरिति भेदः ॥ ॥ राम ॥

यद्वेदस्य श्रुत्या स्वार्थे निर्णयात् तर्केणाक्षेपो न युक्त स्यादुक्तमिति शंकते यद्यपीति मानान्तरायोग्यश्रुत्यर्थे भवतु नामैवं यत्त्वद्वितीय
ब्रह्माभेदो जगज्जन्तादीनामभेदो ब्रह्मोपादानत्वं च श्रुतिविषयः स आदिन्यायपञ्चन्यर्थवादार्थवन्मानान्तरयोग्य एवेति द्वैतप्रमा
णैरपह्रियत इति समाधत्ते तथापीति अन्यपरत्वं गौणार्थकत्वं स्वविषये जगद्भेदे तर्कस्य प्रतिष्ठितत्वात् नापि वेदस्त्वाह तर्को
पीति तर्कादेः प्रामाण्येऽपि ततः समन्वयविरोधः किमायातमिति शंकते किमत इति सर्वपक्षी समाधत्ते अत इति तर्कादेः प्रामा
ण्यात् द्वैतबाधकत्वं श्रुतेरयुक्तमित्यद्वैते समन्वयबाधो युक्त इत्यर्थः इममर्थं शंकापरत्वेन स्पष्टयति कथमित्यादिना ननु भो।

ऽद्वानी२ पि४

यद्यपि श्रुतिः प्रमाणं स्वविषये भवति तथापि प्रमाणान्तरेण विषयापहारेऽन्यपरा भवितुमर्हति यथा मन्त्रार्थवादौ तर्कोऽपि
स्वविषयादन्यत्राप्रतिष्ठितः स्यात् यथा धर्माधर्मयोः किमतो यद्येवं अत इदमयुक्तं यत्प्रमाणान्तरप्रसिद्धार्थबाधनं श्रुति
तेः कथं पुनः प्रमाणान्तरप्रसिद्धोऽर्थः श्रुत्या बाध्यत इत्युच्यते प्रसिद्धो ह्ययं भोक्तृभोग्यविभागो लोके भोक्ता चेतनः शा
रीरः भोग्याः शब्दादयो विषया इति यथा भोक्ता देवदत्तो भोज्य ओदन इति तस्य च विभागस्याभावः प्रसज्येत यदि भोक्ता भोग्य
भावमापद्येत भोग्यं वा भोक्तृभावमापद्येत तयोश्चेतरेतरभावापत्तिः परमकारणाद्ब्रह्मणोऽनन्यत्वात्प्रसज्येत न
चास्य प्रसिद्धस्य विभागस्य बाधनं युक्तं यथा चाद्यत्वे भोक्तृभोग्ययोर्विभागो दृष्टः तथातीतानागतयोरपि कल्पयितव्यः
तस्मात्प्रसिद्धस्यास्य भोक्तृभोग्यविभागस्याभावप्रसङ्गादयुक्तमिदं ब्रह्मकारणतावधारणमिति चेत् कश्चिच्चोदयेत्तं प्र
ति ब्रूयात् स्याल्लोकवदिति उपपद्यत एवायमस्मत्पक्षेऽपि विभागः एवं लोके दृष्टत्वात् तथाहि समुद्रादुदकात्मनोऽनन्य
त्वेऽपि तद्विकाराणां फेनवीचीतरङ्गबुद्बुदादीनामितरेतरविभाग इतरेतरसंश्लेषादिलक्षणश्च व्यवहार उपलभ्यते

क्तृभोग्ययोर्मिथः पृथक्त्वं केनोक्तमित्याशंक्य श्रुतार्थापत्त्येत्याह तयोश्चेति तयोरेकब्रह्माभेदश्रवणादेकत्वं कल्प्यते एकस्माद
भिन्नयोर्भेदः एकस्यापि भेदापत्तेः ततश्च भेदो बाध्येतेत्यर्थः दृष्टापत्तिं वारयति न चास्येति श्रुतेर्गौणार्थत्वेन सावकाशत्वान्निरव
काशद्वैतमानबाधो न युक्त इत्यर्थः नन्वविभागस्याधुनिकत्वादनाद्यद्वैतं श्रुत्या बाध्यत इत्यत आह यथेति अतीतानागतकालो भोक्तृ
हि विभागाश्रयो कालत्वादद्यतनकालवदित्यनुमानाद्विभागो नाद्यन्तेन इत्यर्थः एवं प्राप्ते परिणामदृष्टान्तेनापाततः सिद्धान्तमा
ह स्याल्लोकवदिति ॥ । रामः ॥ ॥

शान
द्वि॰ अ॰
११

हष्टो नैयायिकपक्षे भेदस्तु भूमिन्नानां परिणामानामभियोर्भेदः कथं वा तेषां भेदस्तत्केन कस्मादभिन्नत्वमित्याशंक्य न हि दृष्टेऽनुपपन्नमिति
न्यायेनाह नैवमिति एवं भोक्तृभोग्ययोर्मिथो भेदो ब्रह्माभेदश्चेत्याह एवमिहेति जीवस्य ब्रह्मविकारत्वाभावाद्दृष्टान्तवैषम्यमिति
शंकते यद्यपीति औपाधिकं जन्मास्तीति तरंगादिसाम्यमाह तथापीति विभागो जन्मयद्वा तथापीति शब्दे नैवोक्तः परिहारः न तु
भोक्तुः प्रतिदेहं विभागः कथमित्यत आह कार्यमनुप्रविष्टस्येति औपाधिकविभागे फलितमुपसंहरति इत्यत इति एकब्रह्माभिन्न
त्वेपि भोक्त्रादेस्तरंगादिवद्भेदांगीकाराद्द्वैतमानेनाद्वैतसमन्वयस्याविरोध इत्यर्थः पूर्वस्मिन्नेव वस्तुपदे विवर्तवादे न मुख्यसमाधानमा
४ आकाशस्यैव घटाद्युपाधिनिमित्तः ४ तरः

न च समुद्रादुदकात्मनोऽनन्यत्वेपि तद्विकाराणां फेनादीनामितरेतरभावापत्तिर्भवति न च तेषामितरेतरभावानापत्तावपि
समुद्रात्मनानन्यत्वं भवति एवमिहापि न च भोक्तृभोग्ययोरितरेतरभावापत्तिः न च परस्माद्ब्रह्मणोऽन्यत्वं भविष्यति य
द्यपि भोक्ता न ब्रह्मणो विकारः तत्सृष्ट्वा तदेवानुप्राविशदिति स्रष्टुरेवाविकृतस्य कार्यानुप्रवेशेन भोक्तृत्वश्रवणात्
तथापि कार्यमनुप्रविष्टस्यास्त्युपाधिनिमित्तो विभाग इत्यतः परमकारणाद्ब्रह्मणोऽनन्यत्वेप्युपपद्यते भोक्तृभोग्य
द्वि॰ लक्षणो विभागः समुद्रतरंगन्यायेनेत्युक्तं तदनन्यत्वमारम्भणशब्दादिभ्यः १२ अभ्युपगम्येमं व्यावहारिकं भो
क्तृभोग्यलक्षणं विभागं स्याल्लोकवदिति परिहारोऽभिहितो न त्वयं विभागः परमार्थतोऽस्ति यस्मात्तयोः कार्यकारणयो
रनन्यत्वमवगम्यते कार्यमाकाशादिकं बहुप्रपंचं जगत् कारणं परं ब्रह्म तस्मात्कारणात्परमार्थतोऽनन्यत्वं व्यतिरेकेणा=
भावः कार्यस्यावगम्यते कुतः आरम्भणशब्दादिभ्यः आरम्भणशब्दस्तावदेकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय दृ
ष्टान्तापेक्षायामुच्यते यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य

म् तदनन्यत्वमिति समानविषयत्वं संगतिं वदन्नुभयोः परिहारयोः परिणामविवर्ताश्रयत्वेनार्थभेदमाह अभ्युपगम्येति भोक्तृ
त्वादीनां मोक्षपर्यन्तं क्रमात् प्रमाणप्रमेयांगीकृत्य सत्त्वं हि समाधानार्थं परिणामः प्रकृते न भेदाभेदौ तत्त्वतोऽसत्त्वांगीकृत्य प्रामाण्येन तत्त्वावेद
कत्वाद्युच्यावस्थाव्यावहारिकत्वस्याप्यस्ति तथा मिथ्याद्वैतग्राहिप्रमाणैरद्वैतश्रुतेर्बाधः एकस्या रज्ज्वा द्वैतग्राहिद्वैतदर्शनादि
त्ययं मुख्यः परिहार इति भावः एवमद्वैतसमन्वयस्याविरोधार्थं द्वैतस्य मिथ्यात्वं साधयति यस्मात्तयोरिति स्वरूपैक्ये कार्य
कारणत्वव्याघात इत्यत आह व्यतिरेकेणेति कारणात्पृथक्सत्त्वशून्यत्वं कार्यस्य साध्यते नैक्यमित्यर्थः वाचारम्भणं नाममात्रं विका

॥

करकादूरीवत्वाय

स्मृतिं योजयति इतश्चानन्यत्वमिति आरंभणशब्दार्थान्तरमाह पुनश्चेति अपागात् अग्नेरग्नित्वमपगतं कारणमात्रत्वात् त्रीणि तेजोबन्नानां रूपाणि रूपत
न्मात्रात्मकानि सत्यं तेषामपि सन्मात्रत्वात् सदेवावशिष्यत इत्यभिप्रायः जीवजगतोर्ब्रह्मानन्यत्वप्रतिज्ञाबाध इत्याह न चानन्यत्वेऽपि तयोरन।
न्यत्वं क्रमेण दृष्टान्तावाह तस्माद्युज्यते प्रतिज्ञाबलादित्यर्थः दृष्टप्रातीतिकेन हि मननिदिध्यासनस्वरूपेण तद्रूपेणानुपाख्यत्वात् सत्तास्फूर्ति स्मृ।

एतदुक्तं भवति एकेनापि मृत्पिण्डेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृन्मयं घटशरावोदंचनादिकं मृदात्मकत्वाविशेषाद्विज्ञा
तं भवेत् यतो वाचारंभणं विकारो नामधेयं वाचैव केवलमस्तीत्यारभ्यते विकारो घटः शराव उदंचनं चेति न तु वस्तुवृत्तेन विका
रो नाम कश्चिदस्ति नामधेयमात्रं ह्येतदनृतं मृत्तिकेत्येव सत्यमिति एष ब्रह्मणो दृष्टान्त आम्नातः तत्र श्रुताद्वाचारंभणश।
ब्दात् दार्ष्टान्तिकेऽपि ब्रह्मव्यतिरेकेण कार्यजातस्याभाव इति गम्यते पुनश्च तेजोबन्नानां ब्रह्मकार्यतामुक्त्वा तेजोबन्नकार्याणां
तेजोबन्नव्यतिरेकेणाभावं ब्रवीत्यपागादग्नेरग्नित्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमित्यादिना आरंभण।
त.६ शब्दादिभ्य इत्यादिशब्दात् ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि इदं सर्वं यदयमात्मा ब्रह्मैवेदं सर्वं आत्मैवेदं सर्वं नेह नानास्ति
किंचनेत्येवमाद्यप्यात्मैकत्वप्रतिपादनपरं वचनजातमुदाहर्तव्यं न चान्यथा एकविज्ञानेन सर्वविज्ञानं संपद्यते तस्माद्यथा
घटकरकाद्याकाशानां महाकाशानन्यत्वं यथा च मृगतृष्णिकोदकादीनामूषरादिभ्योऽनन्यत्वं दृष्टनष्टस्वरूपत्वात् स्वरूपेणा
नुपाख्यत्वात् एवमस्य भोग्यभोक्त्रादिप्रपंचजातस्य ब्रह्मव्यतिरेकेणाभाव इति द्रष्टव्यं नन्वनेकात्मकं ब्रह्म यथा वृक्षोऽनेकशा।
खः एवमनेकशक्तिप्रवृत्तियुक्तं ब्रह्म अत एकत्वं नानात्वं चोभयमपि सत्यमेव यथा वृक्ष इत्येकत्वं शाखा इति नानात्वं यथा
च समुद्रात्मनैकत्वं फेनतरंगाद्यात्मना नानात्वं यथा च मृदात्मनैकत्वं घटशरावाद्यात्मना नानात्वं तत्रैकत्वांशेन ज्ञाना
न्मोक्षव्यवहारः सेत्स्यति नानात्वांशेन तु कर्मकाण्डाश्रयौ लौकिकवैदिकव्यवहारौ सेत्स्यत इति एवं च मृदादिदृष्टान्ता।
अनुरूपा भविष्यन्तीति नैवं स्यात् मृत्तिकेत्येव सत्यमिति प्रकृतिमात्रस्य दृष्टान्ते सत्यत्वावधारणात् वाचारंभणशब्देन च वि=
कारजातस्यानृतत्वाभिधानात् दार्ष्टान्तिकेऽप्यैतदात्म्यमिदं सर्वं तत्सत्यमिति च परमकारणस्यैवैकस्य सत्यत्वावधारणात् ट

न्यत्वादनन्यत्वमिति संबंधः ब्रह्माद्वैते स्वमतमुक्त्वा भेदाभेदमतमुत्थापयति नन्विति अनेकाभिः शक्तिभिस्तदधीनप्रवृत्तिभिः परि
णामैर्युक्तमित्यर्थः भेदाभेदमते सर्वव्यवहारसिद्धिरप्यभेदहेतमानुबाध इत्यभिमानः दूषयति नैवं स्यादिति एवकारवा
चारंभणशब्दाभ्यां विकारसत्तानिषेधात्परिणामबाधः श्रुतिवाह्य इत्यर्थः ॥ राम । ॥

किं च संसारस्य सत्यत्वे तद्विरोधिन्यस्य जीवस्य ब्रह्मैक्योपदेशो न स्याद्विरोधादित्याह सन्नात्मेति एकत्वं ज्ञानकर्मसमुच्चयसाध्यमित्युपदे
शार्थः स्यादाशंक्यासौ नेति पदविरोधान्नैवमित्याह स्वयमिति अतः सत्यज्ञानबाध्यत्वात्संसारस्य मिथ्येत्याह अत इति स्वतः सिद्धाय
शादित्यर्थः यद्वैक्यव्यवहारार्थं नानात्वं सत्यमिति तन्नेत्याह ऐक्यव्यवहारार्थं प्राग्वानाद्यत इत्याह बाधिते चेति स्वभावोऽप्यविद्यातया
कृतः स्वाभाविकः ज्ञानाद्यूर्ध्वं प्रमातृत्वादिव्यवहारस्याभावान्नानात्वं न कल्प्यमित्यर्थः नद्वितीयः ज्ञानाद्याकल्पितनानात्वव्यवहारो
एवं तैर्नानात्वस्य सत्यत्वासिद्धेः यतः प्रमातृत्वादिव्यवहारः सत्यं एवमात्मत्वस्यायानिवर्तत इतित तत्त्वेनत्याह न चायमिति संसारसत्यत्वेत

स आत्मा तत्त्वमसि श्वेतकेतो इति च शारीरस्य ब्रह्मभावोपदेशात् स्वयंप्रसिद्धं ह्येतच्छारीरस्य ब्रह्मात्मत्वमुपदिश्यते न यत्नां
तरप्रसाध्यं अतश्चेदं शास्त्रीयं ब्रह्मात्मत्वमवगम्यमानं स्वाभाविकस्य शारीरात्मत्वस्य बाधकं संपद्यते रज्ज्वादिबुद्धय इव सर्पा
दिबुद्धीनां बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति यत्प्रसिद्धये नानात्वांशोऽपरो ब्रह्म
णः कल्प्येत दर्शयति च यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना ब्रह्मात्मत्वदर्शिनं प्रति समस्तस्य क्रियाकारकफलल
क्षणस्य व्यवहारस्याभावं न चायं व्यवहाराभावोऽवस्थाविशेषनिबद्धोऽभिधीयत इति युक्तं वक्तुं तत्त्वमसीति ब्रह्मात्मभा
वस्यानवस्थाविशेषनिबन्धनत्वात् तस्करदृष्टान्तेन चानृताभिसंधस्य बन्धनं सत्याभिसंधस्य च मोक्षं दर्शयन्नेकत्वमेवैकं पा
रमार्थिकं दर्शयति मिथ्याज्ञानविजृम्भितं च नानात्वं उभयसत्यतायां हि कथं व्यवहारगोचरोऽपि जन्तुरनृताभिसंध इत्यु
च्येत मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति च भेददृष्टिमपवदन्नेतदेव दर्शयति न चास्मिन्दर्शने ज्ञानान्मोक्ष इत्यु
पपद्यते सम्यग्ज्ञानापनोद्यस्य कस्यचिन्मिथ्याज्ञानस्य संसारकारणत्वेनानभ्युपगमात् उभयसत्यतायां कथमेक
त्वज्ञानेन नानात्वज्ञानमपनुद्यत इत्युच्यते ॥

१४

एवं स्थिते जीवस्य ब्रह्मत्वं न स्यात् भेदाभेदयोरेव द्वैक्यविरोधादतो नेत्याह ब्रह्माभेदस्य सत्त्वात् तत्त्वावगमात्संसारोऽपि मिथ्यैवेत्यर्थः किं
च यथा लोके वञ्चितस्तस्करः शुद्धो भवेद्धि ग्रहीतान्नृतवादी चेत्तप्तपरशुग्रहणात् इति तद्वत्सत्यानानात्ववादी बध्यते सत्यवादी च मुच्य
ह्यते मृत्येवेतत्पश्येत्तदात्मैवेदं सर्वमित्येकत्वं दर्शयिष्यते इति अतस्तदृष्टान्तेनैकत्वं सत्यं नानात्वं मिथ्येत्याह तस्करेति व्यवहारगोचरो
रः नानात्वव्यवहारास्पदः नानात्वनिंदयाप्येकत्वमेव सत्यमित्याह मृत्योरिति किं चास्मिन्भेदाभेदमते जीवस्य ब्रह्माभेदज्ञानान्नेद्वज्ञा
न निवृत्तेर्मुक्तिरिति सा सा न युक्ता भेदज्ञानस्य भ्रमत्वानभ्युपगमात्सत्यायाः प्रमाणेन बाधायोगादित्याह न चास्मिन्निति विपरीतस्या

इदानीं प्रत्यक्षादिप्रमाणान्यथानुपपत्त्या नानात्वस्य सत्यत्वमिति सर्वप्रपञ्चबीजमुद्भावयति नन्वित्यादिना प्रकृतस्य वेदान्तैः केवलस्याव्याहन्येरन्नप्र
माणानि स्युः उपजीव्यप्रत्यक्षादिप्रमाणापायवेदान्तानां भेदाभेदपरत्वमुचितमिति भावः ननु कर्मकारकाणां यजमानादीनां विद्या
कारकाणां शिष्यादीनां च कल्पितभेदमाश्रित्य कर्मज्ञानकाण्डयोः प्रवृत्तेः स्वप्नमेयस्य धर्मादि रवाधात्प्रामाण्यमव्याहतमित्याशंक्याह।
कथं चानृतेनेति धूलिकल्पितधूमेनानुमितस्य वह्नेरिव स्वप्नमेयबाधापत्तेरिति भावः तत्र द्वैतविषयप्रत्यक्षादीनां यावद्ब्रह्मार्थं व्यवहारिकेप्रा
माण्यमुपपद्यत इत्याह अत्रोच्यत इत्यादिना सत्यत्वं बाधाभावः बाधो मिथ्यात्वनिश्चयः वस्तुतो मिथ्यात्वेपि विकारे तु तन्निश्चयाभा
वेन सत्यत्वादिव्यवहारोपपत्तावुत्तरकालेतनविह्नणाणि यथा स्वप्नस्येति एवं द्वैतप्रमाणानां व्यवहारकाले बाधस्यानुत्पत्तेर्बोधकत्वं व्यावहा

ननेकत्वैकान्ताभ्युपगमे नानात्वाभावात्प्रत्यक्षादीनि लौकिकानि प्रमाणानि व्याहन्येरन् निर्विषयत्वात्स्थाण्वादिष्विव पुरुषादिज्ञानानि तथा।
विधिप्रतिषेधशास्त्रमपि भेदापेक्षत्वात्तदभावे व्याहन्येत मोक्षशास्त्रस्यापि शिष्यशासित्रादिभेदापेक्षत्वात्तदभावे व्याहतिः स्यात्।
कथं चानृतेन मोक्षशास्त्रेण प्रतिपादितस्यात्मैकत्वस्य सत्यत्वमुपपद्येतेति अत्रोच्यते नैष दोषः सर्वव्यवहाराणामेव प्राग्ब्रह्मात्मतावि
ज्ञानात्सत्यत्वोपपत्तेः स्वप्नव्यवहारस्येव प्राक्प्रबोधात् यावद्धि न सत्यात्मैकत्वप्रतिपत्तिस्तावत्प्रमाणप्रमेयफललक्षणेषु विकारेष्वनृत
बुद्धिर्न कस्यचिदुत्पद्यते विकारानेव त्वहं ममेत्यविद्ययात्मात्मीयेन भावेन सर्वो जन्तुः प्रतिपद्यते स्वाभाविकीं ब्रह्मात्मतां हित्वा तस्मात्।
प्राग्ब्रह्मात्मताप्रतिबोधादुपपन्नः सर्वो लौकिको वैदिकश्च व्यवहारः यथा सुप्तस्य स्वप्न उच्चावचान्भावान्पश्यतो निश्चितमेव प्रत्यक्ष
त्वाभिमतं विज्ञानं भवति प्राक्प्रबोधात् न च प्रत्यक्षाभासाभिप्रायस्तत्काले भवति त
द्वत् कथं त्वसत्येन वेदान्तवाक्येन सत्यस्य ब्रह्मात्मत्वस्य प्रतिपत्तिरुपपद्येत न हि रज्जुसर्पेण दष्टो म्रियते नापि मृगतृष्णिकाम्भसा पा
नावगाहनादिप्रयोजनं क्रियत इति नैष दोषः शङ्काविषादिनिमित्तमरणादिकार्योपलब्धेः स्वप्नदर्शनावस्थस्य च सर्पदंशनोदकस्नाना

रिकं प्रामाण्यमुपपाद्याद्वैतप्रमाणानां वेदान्तानां सर्वकालेष्वबाधस्यात्यन्तब्रह्मबोधकत्वं तात्त्विकं प्रामाण्यमुपपादयितुमुक्तां शङ्कामनुवदति कथं
त्विति किमसत्यात्सत्यं न जायते किं वा असत्यस्य ज्ञानेन आद्य इष्ट एव न हि वयं वाक्यज्ञानेन सत्यमित्यङ्गीकुर्मः द्वितीयं त्वपि हेतुमाह नैष
दोष इति सर्पज्ञानादसत्यस्यापि हेतुत्वं भ्रान्तिकल्पितविषान्मरणमूर्छादिदर्शनादसत्यात्सत्यं न जायत इत्यनियम इत्यर्थः हेत्वन्तरमा
ह स्वप्नेति असत्यात्स्वप्नपदार्थात्सत्यस्य दर्शनस्नानादिज्ञानस्य कार्यस्य दर्शनाद्भूमिश्चास्त्येत्यर्थः ॥ ५१ ॥

शा॰ न्या॰
द्वि॰ प्र॰
१२

यथाश्रुतमादाय शंकते तत्कार्यमपीति उक्तमर्थं प्रकटयति अत्रेत्यादिना अवगतिहेतुः वृत्तादिवत्सत्यापि मातिभासिकस्वप्नदृष्ट
वस्तुनः फले चेतन्यत्वाहत्यमित्युक्तमवगतीशाद्वार्थः प्रसंगाद्देहात्मवादोपि निरस्त इत्याह एतेनेति स्वप्नस्यावगतेः स्वप्नदेहधर्मत्वे
उक्तिनस्वप्नयातादृष्टाः स्वप्नावगतेर्बाधितावगतिप्रतिसंधानेनस्यात् अतो देहभेदेप्यनुसंधानदर्शनाद्देहादन्योनुसंधातेत्यर्थः असत्या
त्सत्यस्य ज्ञानेन जायत इति हितीय नियमस्य श्रुत्याव्यभिचारमाह तथाच श्रुतिरिति नचस्त्रियामिथ्यात्वेपि तद्दर्शनात्सत्यादेवसत्याया
स्त्रहेत्तीनमितिवाच्यं दिव्यविशिष्टत्वेन दर्शनस्यापि मिथ्यात्वात्प्रकृतेपि सत्यब्रह्मणि मिथ्यावेदानुगतत्वे तत्त्वज्ञानं संभवाद्वेति भावः अ
तत्कार्यमप्यन्यजमेवेति चेत्तन्न्यात् अत्रेत्यमः यद्यपिस्वप्नदर्शनावस्थस्य पंदेशेदकस्नानादिकार्यमन्यतत्यापि तदवगतिः सत्यमेवफ
ले प्रतिबुद्धस्याप्यबाध्यमानत्वात् नहिस्वप्नादुत्थितः स्वप्नदृष्टमर्पदंशनोदकस्नानादिकार्यं मिथ्येति मन्यमानस्तदवगतिमपि
मिथ्येति मन्यते कश्चित् एतेन स्वप्नदृशावगतबाधनेन देहमात्रात्मवादो दूषितोवेदितव्यः तथाच श्रुतिः यदाकर्मसुकाम्ये
षु स्त्रियं स्वप्नेषु पश्यति सम्यद्भिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शन इति असत्येन स्वप्नदर्शनेन सत्यायाः समृद्धेः प्राप्तिं दर्श
यति तथा प्रत्यक्षदर्शनेषु केषुचिदरिष्टेषु जातेषु नचिरमिव जीविष्यतीति विद्यादित्युक्त्वा अथ स्वप्नपुरुषं कृष्णं कृष्णदंत
पश्यति स एनं हंतीत्यादिना तेनेतेनासत्येनैव स्वप्नदर्शनेन सत्यं मरणं सूच्यत इति दर्शयति प्रसिद्धं चेदं लोके अन्वयव्यतिरेककुशला
नामीदृशेन स्वप्नदर्शनेन साध्वागमः सूच्यते ईदृशेनासाध्वागम इति तथाकारादिसत्याक्षरप्रतिपत्तिर्दृष्टा रेखानृताक्षरप्रतिपत्तेः अ
पिवेदान्तवाक्यमिदं प्रमाणमात्मैकत्वस्य प्रतिपादकं नातः परं किंचिदाकांक्ष्यमस्ति यथाहि लोके यजेतेत्युक्ते किं केन कथमित्याकांक्ष
ते नैवं तत्त्वमसीत्युक्ते किंचिदाकां[illegible]क्ष्यमस्ति सर्वात्मैकत्वविषयत्वादवगतेः सतिह्यन्यस्मिन्नवशिष्यमाणेर्थे आकांक्षा स्यात्
नत्वात्मैकत्वव्यतिरेकेणावशिष्यमाणोन्योर्थोस्ति यआकांक्ष्येत ॥

का॰ मि॰२

सत्यात्सत्यस्येव स्वप्नज्ञानस्य कार्यं न प्रसज्ज्ञानमाह तथेति असत्यात्सत्यस्य ज्ञानेदृष्टांतो तस्माह तथाकारादीति शब्दस्वकारत्वादिश्रोत्रसा
त्याकारादयो ज्ञायन्त इति प्रसिद्धमित्यर्थः एवमसत्यात्सत्यस्य जन्मोत्तरयदर्थक्रियाकारित्वंसतीति नियमो भग्नः अन्यतात्सत्यस्य ज्ञानोत्पत्ता
यदृष्टान्तम् रणगम्यतद्धाधूमकल्पितानुमितवह्निवदिति व्याप्तिर्भग्ना तथाच कल्पितानामपि वेदान्तानां सत्यब्रह्मबोधकत्वं संभवतीति ना त्विकं
प्रामाण्यमिति भावः यदुक्तमेकत्वनानात्वव्यवहारः सिद्ध्यत्युभयं सत्यमिति तन्न भेदस्य लोकसिद्धस्याप्यभेदफलवदभेदविरोधेन सत्यत्वा
कल्पनायोगात् किंच यदुभयोरेकदा व्यवहारः स्यात्तदा स्यादपि त्वन्ते नैवमस्त्येकत्वज्ञानेन चरमेण नानात्वस्य निःशेषबाधकु
त्तित्वानेने वरजतस्येत्याह अपिचान्त्यमिति ॥ मा॰ ॥ ॥ ॥ ॥

नन्वेवं जीवब्रह्मैक्ये तत्प्रमाणविरोधादेकत्वावगतिर्नोत्पद्यत इत्यत आह नचेयमिति तन्किलात्मतत्वमुक्त्वापि तु वाक्यात् श्वेतकेतुर्विज्ञातवान् इति ज्ञानोत्पत्तेः
श्रुतत्वात्प्रमातृत्वाद्यनुपपत्तेः व्यावहारिकगुरुशिष्यादिभेदस्योपजीव्यत्वात् प्रमाणवाक्यार्थावगतेः प्रत्यक्षादिगतव्यावहारिकप्रामाण्यस्योपजीव्य
तत्त्वपारमार्थिकैकत्वावगत्या न विरोधः किन्तु तद्विरोधादनुपजीव्यप्रत्यक्षादेस्तात्विकप्रामाण्यबाधात् इति भावः । किंचैकत्वावगतेः फलवत्त्वा
मान्नाविषयत्वाद्द्वैतग्राहिप्रमाणबाध इत्याह नचेयमिति ननु सर्वस्य द्वैतस्य मिथ्यात्वे स्वप्नोपमिथ्या जाग्रत्सत्यमित्यादिलौकिकोव्यवहारः सत्यानृतेच

नचेयमवगतिर्नोत्पद्यत इति शक्यं वक्तुं तद्धास्य विजिज्ञावित्यादिश्रुतिभ्योऽवगतिसाधनानां च श्रवणादीनां वेदानुवचनादीनां च विधानात् न
चेयमवगतिरनर्थिका भ्रान्तिर्वेति शक्यं वक्तुं अविद्यानिवृत्तिफलदर्शनात् बाधकज्ञानान्तराभावाच्च प्राक् चात्मैकत्वावगतेरव्याहतः सर्वः
सत्यानृतव्यवहारो लौकिको वैदिकश्चेत्यवोचाम तस्मादन्त्येन प्रमाणेन प्रतिपादिते आत्मैकत्वे समस्तस्य प्राचीनभेदव्यवहारस्य बाधितत्वा
न्नानेकात्मकब्रह्मकल्पनावकाशोस्ति ननु मृदादिदृष्टान्तप्रणयनात्परिणामवत् ब्रह्म शास्त्रस्याभिमतमिति गम्यते परिणामिनो हि मृदाद
योऽर्था लोके समधिगता इति नेत्युच्यते स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्म स एष नेति नेत्यात्मास्थूलमनणु इत्याद्याभ्यः सर्व
विक्रियाप्रतिषेधश्रुतिभ्यो ब्रह्मणः कूटस्थत्वावगमात् न ह्येकस्य ब्रह्मणः परिणामधर्मत्वं तद्रहितत्वं च शक्यं प्रतिपत्तुं स्थितिगतिवत्स्या
दिति चेत् न कूटस्थस्येति विशेषणात् न हि कूटस्थस्य ब्रह्मणः स्थितिगतिवदनेकधर्माश्रयत्वं संभवति कूटस्थं च नित्यं ब्रह्म सर्वविक्रियाप्रतिषे
धादित्यवोचाम न च यथा ब्रह्मण आत्मैकत्वदर्शनं मोक्षसाधनं एवं जगदाकारपरिणामित्वदर्शनमपि [illegible] स्वतन्त्रमेव कस्मैचित्फलाया
भिप्रेयते प्रमाणाभावात् कूटस्थब्रह्मात्मत्वविज्ञानादेव हि फलं दर्शयति शास्त्रं स एष नेति नेत्यात्मेत्युपक्रम्याभयं वै जनक प्राप्तोऽसीत्येवंजा
तीयकं तत्रैतत्सिद्धं भवति ब्रह्मप्रकरणे सर्वधर्मविशेषरहितब्रह्मदर्शनादेव फलसिद्धौ सत्यां यत्तत्राफलं श्रूयते ब्रह्मणो जगदाकारपरिणामि
त्वादि तद्ब्रह्मदर्शनोपायत्वेनैव विनियुज्यते फलवत्संनिधावफलं तदङ्गमितिवत् न तु स्वतन्त्रं फलाय कल्प्यत इति ॥ ॥

सत्यमभूदिति वैदिकश्चेत्यवोचामेत्याशंक्यायुष्यास्वप्नेऽदं सत्यमिदमनृतमिति तात्कालिकबाधाबाधाभ्यां व्यवहारस्तत्पादीक्षैक्येऽपीत्युक्तं स्मरहन्तोऽन्ते
स्मारयति प्राक्चेति व्यवहारार्थं नानात्वं सत्यमिति कल्पनं संगतमित्युपसंहरति तस्मादिति नेदं कल्प्यते किन्तु श्रुतमिति शंकते नन्विति कार्यकारणयो
रनन्यत्वांशे दृष्टान्तो न परिणामित्वे ब्रह्मणः कूटस्थत्वश्रुतिविरोधादिति परिहरति नेत्युच्यत इति स्थितिपरिणामित्वमलयेन ब्राह्मणस्य चशब्दमाणवि
रुद्धमिति तद्ब्रह्मणेनवशंकते नेत्यनीति [illegible] कूटस्थस्य सर्वद्रष्टृविविक्रियान्वयुक्तात्कृतस्य त्वयाख्यानादित्याह नेति कूटस्थत्वासिद्धिमाशंक्याह ।
कूटस्थं चेति कूटस्थस्य सनिरवयवस्य सर्वरूपत्यागेनावस्थानरूपात्मकपरिणामायोगात् श्रुतिरंजनवद्धिविज्ञेयवस्तु पंचम इति भावः किं च निष्फलस्य ज

रौ॰ त्र॰
द्वि॰ प्र॰
१८

थी २

तं यथा यथोपासते तदेव भवतीति श्रुतेर्ब्रह्मणः परिणामित्वविज्ञानात् तत्प्राप्तिर्विदुषः फलमित्याशंक्याह नहीयं परिणामवत्त्वेति ब्रह्मविदाप्नोति परमि
ति श्रुतेः कूटस्थनित्यमोक्षफलत्वं संभवेद् दुःखोनित्यं परिणामित्वफलत्वं स्यान्नायोगादिति भावः ननु पूर्वं जन्माद्यस्य यत इतीश्वरकारणप्रतिज्ञा कृता
अधुना तदनन्यत्वमित्यात्मनाभेदप्रतिपादनेऽशित्रीशितव्यभेदाभावात् हि विरोधः स्यादिति शंकते कूटस्थेति कल्पितं हेतुमपेक्ष्येश्वरत्वादिकं परमा
र्थतोऽनन्यत्वमित्यविरोधमाह नेत्यादिना अविद्यात्मिके चिदात्मनि लीने नामरूपप्रपञ्चबीजे तस्य व्याकरणं स्थूलात्मना स्फुटीभूतं तद्रूपेणान्यत्वादीश्व
रत्वादेर्न विरोध इत्यर्थः सर्गहीनार्थं विवृणोति तस्मादित्यादिना तत्त्वान्यत्वाभ्यामिति नामरूपयोरीश्वरत्वेनानुमशंकां जडत्वान्नापीश्वराद

तात्पर्य २

नहि परिणामवत्त्वविज्ञानात् परिणामवत्त्वमात्मनः फलं स्यादिति वक्तुं युक्तं कूटस्थनित्यत्वान्मोक्षस्य कूटस्थब्रह्मात्मवादिन एकत्वैकां
त्यादीशित्रीशितव्याभावे ईश्वरकारणप्रतिज्ञाविरोध इति चेत् न अविद्यात्मकनामरूपबीजव्याकरणापेक्षत्वात्सर्वज्ञत्वस्य तस्माद्वा एतस्मा
दात्मन आकाशः संभूत इत्यादिवाक्येभ्यो नित्यशुद्धबुद्धमुक्तस्वरूपात्सर्वज्ञात्सर्वशक्तेरीश्वराज्जगज्जन्मस्थितिप्रलयाः नाचेतनात्प्रधानाद
न्यस्माद्वेत्येषोऽर्थः प्रतिज्ञातो जन्माद्यस्य यत इति सा प्रतिज्ञा तदवस्थैव न तद्विरुद्धोऽर्थः पुनरिहोच्यते कथं नोच्यते अत्यन्तमात्मनः ए
कत्वमद्वितीयत्वं च ब्रुवता शृणु यथा नोच्यते सर्वज्ञस्येश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसार
प्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया शक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते ताभ्यामन्यः सर्वज्ञ ईश्वरः आकाशो वै नाम
नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मेति श्रुतेः नामरूपे व्याकरवाणि सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते एकं बीजं बहु
धा यः करोतीत्यादिश्रुतिभ्यश्च एवमविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति व्योमवत् घटकरकाद्युपाध्यनुरोधि स च स्वा
त्मभूतानेव घटाकाशस्थानीयानविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातानुरोधिनो जीवाख्यान्विज्ञानात्मनः प्रतीष्टे
व्यवहारविषये तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च न परमार्थतो विद्ययापास्त
सर्वोपाधिस्वरूपे आत्मनीशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते

नन्वेकस्थितस्य स्रष्टृत्वं नास्ति अन्यस्याभावादित्यर्थः संस्कारात्मकनामरूपयोरविद्योपाधिकविवर्तपाशेनेमायेति नामरूपे चेदीश्वरस्यात्मभूते तर्हीश्व
रो जडः स्यादत आह ताभ्यामन्य इति अन्यत्वे व्याकरणे च श्रुतिमाह आकाश इत्यादिना अविद्याद्युपाधिनाकल्पितभेदेन विवर्तस्यान्येश्व
रत्वं प्रतिबिम्बभूतानां नियम्यत्वमित्याह स च स्वात्मभूतानिति न चात्र नानाजीवाभावोक्ता इति भ्रमितव्यं उपाधिसंघातभेदेन भेदोक्तेः
अविद्याप्रतिबिम्ब एक एव जीव इत्युक्तं ॥ ॥ ॥ ॥

परमार्थतत्त्वे ईश्वरत्वादिहेत्वभावे श्रुतिमाह तथा चेति कथं तर्हि कर्तृत्वादिकमित्यत आह स्वभावस्त्विति अनाद्यविद्यैककर्तृत्वादिरूपेण प्रवर्तनं तत्स्वभावार्थः
भक्ताभक्तयोः पापसुकृतनाशकत्वादीश्वरस्य वास्तवमीश्वरत्वमित्यत आह नादत्त इति न संहरतीत्यर्थः तत्स्वरूपज्ञानावरणेन कर्तृत्वमीश्वरे ले
लिप्यते इत्येवं भ्रमन्तीति उक्तार्थे सूत्रकारसम्मतिमाह सूत्रकारोऽपीति नैकत्र लोकवद्व्यवहारार्थं परिणामप्रक्रियाश्रयणं किन्तूपासनार्थं चेत्याह प
रिणामप्रक्रियां चेति तद्गुणरूपणाधीः परिणामसृष्टीदत्तेनापि तु कल्पवधीत्वविव तेनामितिएवं तदनन्यत्वे प्रत्यक्षविरोधं परिहृत्यानुमानमाह
भावे चेति कारणाभावे सत्यप्युपलब्धौ च कार्यस्य सत्त्वादुपलब्धेश्चानन्यत्वमिति सूत्रार्थः अतो महदनन्यः स्वस्मिन्नोपलब्धिलक्षणनियतसत्त्वोप।

मा। स्प२ श्रीश्वि३

तथा चोक्तं यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना च परमार्था
वस्थायां सर्वव्यवहाराभावं वदन्ति वेदान्ताः सर्वे तथेश्वरगीतास्वपि न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः न कर्मफलसंयोगं स्वभा
वस्तु प्रवर्तते नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इति परमार्थावस्थायामीशितव्याद्यव्यवहा
राभावः प्रदर्श्यते व्यवहारावस्थायां तूक्तः श्रुतावपीश्वरादिव्यवहारः एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण
एषां लोकानामसम्भेदायेति तथा चेश्वरगीतास्वपि ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया सू
त्रकारोऽपि परमार्थाभिप्रायेण तदनन्यत्वमित्याह व्यवहाराभिप्रायेण तु स्याल्लोकवदिति महासमुद्रस्थानीयतां ब्रह्मणः कथयति अ
प्रत्याख्यायैव कार्यप्रपञ्चं परिणामप्रक्रियां चाश्रयति सगुणेषूपासनेषूपयोक्ष्यत इति भावे चोपलब्धेः १४ इतश्च कारणात्तदनन्यत्वं कार्य
स्य यत्कारणाभाव एव कारणस्य कार्यमुपलभ्यते नाभावे न ह्यसत्यां मृदि घट उपलभ्यते सत्सु च तन्तुषु पटः ननु च नियमेनान्यभावेऽन्यस्यो
पलब्धिर्हेतुः न ह्यश्वो गोरन्यः सन्गोभाव एवोपलभ्यते न च कुलालभाव एव घट उपलभ्यते सत्यपि निमित्तनैमित्तिकभावेऽन्यत्वात् नन्व
न्यस्य भावेऽन्यस्योपलब्धिर्नियता दृश्यते यथाग्निभावे धूमस्येति ॥ ॥

लब्धिमत्त्वात् सद्धेतुः अन्यत्वेऽप्ययं हेतुः किं न स्यादित्यप्रयोजकत्वमाशङ्क्य निरस्यति नचेति मृद्घटयोरन्यत्वे गवाश्वयोरिव सहोपलब्धिः स्यादित्यर्थः ग
वाश्वयोर्निमित्तनैमित्तिकत्वाभावाद्धेत्वभावः अतो मृद्घटयोरनन्यत्वेन हेतुना निमित्तादिभावः सिध्यति नानन्यत्वमित्यर्थान्तरतामाशङ्क्याह न च कुला।
लेति नचोपादानोपादेयभावेनार्थान्तरता मृद्घटयोस्तेन तज्ज्ञावाभावविपि हेतुसत्त्वादन्यत्वे गवाश्ववत्तज्ज्ञावायोगाच्चेति भावः कुलालघटयोर्निमित्तादि
भावे सत्यप्यन्यत्वात्कुलालसत्त्वे नियतोपलब्धिर्घटस्य नैवेत्यपरार्थः यथाश्रुतसूत्रस्य हेतोर्व्यभिचारं शङ्कते नन्विति ॥ ॥ ॥

शी॰त्रे॰
हे॰प्र॰
१५

अग्निभावएव धूमोपलब्धिरिति नियमात्मको हेतुस्तत्र नास्तीत्याह नेति अग्निविकिरन्नुलदीप्ते रेखावस्थधूमे नियमोस्तीति व्यभिचार इत्याशंकते अथे
ति तद्भावनियतभावत्वं समित्ति हेतुग्नुरक्तं बुद्धिविषयत्वस्य हेतोर्विवक्षितत्वान्न व्यभिचार इत्याह नेवमिति आलोकवृद्धानुरक्तबुद्धिग्राह्यत्वे व्यभि
चारनिरासाय सत्येव आलोकाभावेपि हेतोर्दहनरूपस्थानान्न व्यभिचार उक्तधूमविशेषस्याग्निबुद्धिं विनानुपलंभान्न तत्र व्यभिचार इत्यर्थः तथा च तयोः
कार्यकारणयोर्भावेन सतत्योरक्तासहहनामिति भाष्यार्थः [illegible] यद्भावेन्द्राद्भावः सामानाधिकरण्यं पतत्किं यद्बुद्धिग्राह्यत्वं हेतुत्वेनदासः स्मृतहर द४
इति सामानाधिकरण्यबुद्धिदर्शनाद्धेत्वर्थः अनुमानार्थत्वेनदर्शनत्वाभ्युपगतेन तेणमत्यत्वे परतया वाचेष्टभावोस्तेति एवंस्थूलोक्तारंभणाश

मा२

नेनुच्यते उक्ताणि तेष्वग्नेगोपालघटिकादिषु धाम्नि तस्य धूमस्य हरूपमाननत्वात् अथ धूमं कयाचिदवस्थया विशिंष्यात् ईदृशो धूमोनासत्य
ग्नेर्भवतीति नैवमपि कश्चिद्दोषः तद्भावानुरक्तं हि बुद्धिकार्यकारणयोरनन्यत्वे हेतुर्वयंवदामः न चासावग्निधूमयोर्विद्यते भावाद्युपल
ब्धेरितिवाच्यं नवीनवदेशादेककार्यकारणयोरनन्यत्वं सत्वोपलब्धिभावाद्धि तयोरनन्यत्वमित्यर्थः भवतिहि सत्वोपलब्धिः।
कार्यकारणयोरनन्यत्वे तद्यथा तंतुसंस्थाने पटे तेनुव्यतिरेकेण पटो नाम कार्यं नैवोपलभ्यते केवलास्तु तंतवआतानवितानवंतः।
सत्वदाम्रुपलभ्यन्ते तथा तंतुष्वंशवोंशुषु तदवयवाः अनयाप्रत्यक्षोपलब्ध्यालोहितशुक्लकृष्णानि त्रीणि रूपाणि ततो वायुमा
त्रमाकाशमात्रं चेत्यनुमेयं ततः परं ब्रह्मैवमेवाद्वितीयं तत्र सर्वप्रमाणानां निष्ठामवाप्नाम सत्वाद्धावरस्य १९ इतस्त्रकारणात्का
र्यस्यानन्यत्वं यत्कारणं प्रागुत्पत्तेः कारणात्मनैव कारणेन सत्वमक्कालीनस्य कार्यस्य श्रूयते सदेवसोम्येदमग्रआसीत् आत्मावा
इदमेकएवाग्रआसीदित्यादौ किंदशब्दगृहीतस्य कार्यस्य कारणेन सामानाधिकरण्यात् ॥ ॥

रमा४

हृत्सत्त्वार्थस्त्रकारः नचैकः पट इति प्रत्यक्षोपलब्धेनन्यभ्यः पृथक्सत्वेप्रमाणं अपृथक्त्वेनाकमिथ्याकार्यनिषेधनेनाप्युपपत्तेः अतआता
नवितानसंयोगवंतस्तंतवएवपट इतिप्रत्यक्षोपलब्धेः सत्वादनन्यत्वमित्यर्थः पटन्यायेन वादावतिदिशति तथान्यादिना प्रत्यक्षोप
लब्धमाततनकार्यकारणमात्रपरिशिष्यतइत्यर्थः यत्र प्रत्यक्षं नास्ति तत्र कार्यविमतं कारणाद्भिन्नं कार्यत्वात्पटवदित्यनुमेयमित्याह।
अनेनेति कार्यविशेषप्रधानादिकं परिशिष्यतेनतद्वेत्यतआह तत्रसर्वेति ब्रह्मणिवेदांतानामेवैकतात्पर्यस्यात्तत्वात् तदेवेति परिशि।
ष्यतेनकारणांतरमप्रमाणिकत्वादितिभावः इदंजगत्सदात्मेत्यत्र सामानाधिकरण्यश्रुत्याहसूत्रेः प्राक्कार्यस्य कारणात्मनासत्वश्रुतेस्त
दनन्यथानुपपत्यात्वत्स्यापिजगतः कारणादनन्यत्वमित्याहसूत्रकारः सत्वाच्चेति ॥ ॥ ॥

श्रुत्यर्थं युक्तिमप्याह यत्तु यदात्मनेति यदादिकं प्राक् स्वात्मना वर्तते तेन स्वरूपेण उत्पद्यमानत्वात्सामान्यतो व्यतिरेकेण सिकतातैलवदित्य र्थः कारणवत्कार्यस्यापि सत्वात्सत्वभेदे मानाभावात्कार्यस्य कारणादभिन्नसत्ताकत्वमिति सूत्रस्यार्थस्तमाह यथा चेति इदानीं सतः कार्यस्य प्रागुत्तरकालयोरसत्वायोगात्सत्वायोगात् अभिव्यक्तम् सत्वसर्वानुस्यूतचिन्मात्रमेकं तद्भेदे न सती मृत्सत्त्व एवैतभासमान। योः कार्यकारणयोरनन्यत्वमित्यर्थः न चैवं घटपटयोरप्येकसत्वाभेदादनन्यत्वं स्यादिति वाच्यं वस्तुतस्तयोरपि सत्तात्मनानन्यत्वस्येष्टत्वात् हि मृद्घटयोः को विशेषः तादात्म्यमिति ब्रूमः वस्तुतः सर्वत्र सत्तैक्ये घटपटयोर्भेदेन सत्ताया भिन्नत्वान्न तादात्म्यं कार्यकारणयोर्भे

यत्तु यदात्मना यत्र न वर्तते न तत्तत उत्पद्यते यथा सिकताभ्यस्तैलं तस्मात् प्रागुत्पत्तेरनन्यत्वात् उत्पन्नमप्यनन्यदेव कारणात्कार्यमित्यवग म्यते यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति एवं कार्यमपि जगत् त्रिषु कालेषु सत्त्वं न व्यभिचरति एकं च पुनः सत्त्वमतोऽप्य नन्यत्वं कारणात्कार्यस्य असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् २ ननु क्वचिदसत्त्वमपि प्रागुत्पत्तेः कार्यस्य व्यपदिशति श्रु तिरसदेवेदमग्र आसीदिति असद्वा इदमग्र आसीदिति च तस्मादसद्व्यपदेशान्न प्रागुत्पत्तेः कार्यस्य सत्त्वमिति चेन्नेति ब्रूमः न ह्ययम त्यन्तासत्त्वाभिप्रायेण प्रागुत्पत्तेः कार्यस्यासद्व्यपदेशः किं तर्हि व्याकृतनामरूपत्वाद्धर्मात् अव्याकृतनामरूपत्वं धर्मान्तरं तेन धर्मान्त रेणायमसद्व्यपदेशः प्रागुत्पत्तेः सत एव कार्यस्य कारणरूपेणानन्यस्य कथमेतदवगम्यते वाक्यशेषात् यदुपक्रमे सन्दिग्धार्थं वाक्यं तच्छेषान्निश्चीयते इह च तावदसदेवेदमग्र आसीदित्यसच्छब्देनोपक्रमे निर्दिष्टं यत्तदेव पुनः तच्छब्देन परामृश्य सदिति वि शिनष्टि तत्सदासीदिति असतश्च पूर्वापरकालासम्बन्धादासीच्छब्दानुपपत्तेश्च असद्वा इदमग्र आसीदित्यत्रापि तदात्मानं स्वयम कुरुतेति वाक्यशेषे विशेषणान्नात्यन्तासत्त्वं तस्माद्धर्मान्तरेणायमसद्व्यपदेशः प्रागुत्पत्तेः कार्यस्य नामरूपव्याकृतं हि वस्तु सच्छब्दार्हं लोके प्रसिद्धं अतः प्राङ्नामरूपव्याकरणादसदिवासीदित्युपचर्यते युक्तेः शब्दान्तराच्च ३ युक्तेः प्रागुत्पत्तेः कार्यस्य सत्त्वमनन्यत्वं च कारणादवगम्यते शब्दान्तराच्च युक्तिस्तावद्वर्ण्यते दधिघटरुचकाद्यर्थिभिः प्रतिनियतानि कारणानि क्षीरमृत्तिकासुवर्णादीन्युपादी

दस्य सत्तामेदकत्वाभावादभिन्नसत्ताकत्वं तादात्म्यमिति विशेषः उक्तं कार्यस्य प्राक् कारणात्मना सत्त्वमसिद्धमित्याशङ्क्य समाधत्ते असदिति असत्त्वः शर्करा उपदधातीत्युपक्रमे केनाकारणे सन्देहे तेजो वै घृतमिति वाक्यशेषात् घृतेनेति यथा निश्चयः एवमत्रापि तस्मादिति वाक्यशे षात्सत्त्वनिश्चय इत्यर्थः असदित्यतीतकालसम्बन्धोक्तेश्चासदव्याकृतमेव न शून्यमित्याह असतश्च पूर्वापरेति उक्तन्यायं वाक्यान्तरे अतिदि शति असद्वा इति क्रियमाणत्वविशेषणाच्छून्यस्यासम्भवतीति भावः सत्त्वानन्यत्वयोर्हेत्वन्तरमाह सूत्रकारः युक्तेरिति दध्याद्यर्थिनो क्षीरादेरुपादानस्यान्यथानुपपत्तिर्युक्तिस्तया कार्यस्य प्राक् कारणानन्यत्वेन सत्त्वं सिध्यतीत्यर्थः

गा॰ त॰ द्वि॰ प्र॰ १९

असतेपिकार्यस्यतस्मादुत्पत्तेः कारणानां धियाद्यव प्रवृत्तिरित्यन्यथोपपत्तिमाशंक्याह अविशिष्टेहीति असतउत्पत्त्यभावात्तुल्यत्वेवा सर्वस्मात्सर्वो
त्पत्तिप्रसंगात्तदुपादाने विशेषप्रवृत्तिर्नस्यादित्यर्थः तदुक्तं सांख्यैः असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् शक्तस्यशक्यकरणा
त्कारणभावाच्च सत्कार्यमिति शक्तस्यकारकस्य शक्यकार्यकारित्वाच्छक्तिविषयस्य कार्यस्यासत्त्वेशक्यत्वानुपपत्तेः व सत्कारणा
भेदात्कार्यं सदित्युत्तरार्धार्थः कार्यस्यासत्वेपि कुतश्चिदतिशयात्प्रवृत्तिनियमोपपत्तिरिति शंकते अथेति अतिशयः कार्यधर्मः कार
णधर्मोवा आद्ये धर्मिणोऽप्रागवस्थारूपस्यकार्यस्यासत्वेतद्वयोरसिन्न्याह नह्यतिशयवत्त्वादिति द्वितीयेपि कार्यसत्त्वमायातीत्याह शक्तिश्चे
ति कार्यकारणाभावस्यान्यकार्यवदसतीवाशक्तिः शक्यकार्यनियामिका यस्यकस्यचिदसत्त्वस्य नरशृंगस्य वानियामकत्वप्रसंगात्तयोः शक्त्या
वत्वेनचाविशेषात्तस्मात्कारणात्समनालीनं कार्यमेवाभिव्यक्तिनियामकतया शक्तिरित्युच्यते नः सत्कार्यसिद्धिरित्यर्थः किंचकार्यका
रणयोरनन्यत्वेन हेतोरपि तोमतावितिभेदबुद्धिः स्यादित्याह अपिचेति तयोरनन्यत्वेपि समवायेच ग्राते पश्चाद्बुद्धिर्नोदेतीत्याशंक्य समवायेपह
तिः सत्कार्यवादः

९ शक्तिखंडं

अविशिष्टेहिप्रागुत्पत्तेः सर्वसमवेतासत्वे कस्मात्क्षीरोदध्येवोत्पद्यते नमृत्तिकायाः मृत्तिकायाएव च घट उत्पद्यते नक्षीरात् अ
थाविशिष्टेपिप्रागसत्वे क्षीरस्यैव दध्नः कश्चिदतिशयो नमृत्तिकायाः मृत्तिकायामेव च घटस्य कश्चिदतिशयो नक्षीरस्य उच्यते त
र्ह्यतिशयवत्वात्प्रागवस्थायाः असत्कार्यवादहानिः किंचकारणस्य कार्यनियमार्थीकल्प्यमाना नानान्याऽसतीकार्यंनियच्छेत अ
सत्वाविशेषादन्यत्वाविशेषाच्च तस्मात्कारणस्यात्मभूताशक्तिः शक्तेश्चात्मभूतंकार्यं अपिच कार्यकारणयोर्द्रव्यगुणादीनां
वाश्वमहिषवद्भेदबुद्ध्यभावात्तादात्म्यमभ्युपगंतव्यं समवायकल्पनायामपि समवायस्य समवायिभिः संबंधेऽभ्युपगम्यमाने
तस्यतस्यान्यान्यः संबंधः कल्पयितव्य इत्यनवस्थाप्रसंगोऽनभ्युपगम्यमानेषु वा विच्छेदप्रसंगः अथसमवायःस्वयंसंबंधरूप
त्वादनपेक्ष्यैवापरं संबंधं संबध्यते संयोगोपि तर्हि स्वयंसंबंधरूपत्वादनपेक्ष्यैव समवायं संबध्येत ॥ ॥

यतिसमवायेति समवायः समवायिभिः संबद्धो नवा आद्ये संबंधः किं समवायान्तरं स्वरूपं वा आद्ये समवायानवस्थाद्वितीये स्वद्वययोः स्व
रूपसंबंधादेवोपपत्तेः समवायासिद्धिः असंबद्धयतिपक्षे दोषमाह अनभ्युपगम्यमानइति द्रव्यगुणादीनां विशिष्टधीविरहप्रसंगः असंब
द्धस्य विशिष्टधीनियामकत्वायोगादित्यर्थः विशिष्टधीनियामको हि संबंधः नतस्य नियामकोऽन्तरापेक्षाऽनवस्थानादत स्वपरनिर्वाह
कः समवाय इति शंकते अथेति संबंधे नस्वस्य संबंधी नस्य विशिष्टधियं करोतीत्यर्थः सतिवेत्याह संयुक्तेति संयोगोपि द्रव्यगुणात्वा
त्संयोगस्य समवायापेक्षान संबंधत्वादिति न धर्मत्वात्समवायस्यापि संबंधांतरापत्तेरसंबद्धस्यास्य धर्मत्वादर्शनात् किंच नित्यापत्वात्
योगगुणाश्चेति श्रुतिस्मृत्यादिप्रतिवादिव्यवहारादिविरोधो गुणा इतिपरिभाष्यायां समवायस्यापि गुणत्वात् जातिविशिष्टानांगुणत्वमितिपरिभाषाकृत

द्विवप्रतीत्यनुसारेणावस्त्रसीकार्यमन्यथारोपप्रतीतेरस्य आलंबनमित्यपि स्ववचनात्तथाचस्म्र द्वन्द्वस्वप्रभेदप्रतीतेरभेदप्रवस्थीकार्यः तास्था
मत्वेनाभिन्नस्य समवायस्यनन्निपामकत्वात्संभवादित्याह तादात्म्येति एवं प्रतीत्यनुसारेण कार्यस्य कारणात्मना सत्त्वस्वरूपेणानुमित्यानुमि
मुक्त्वात्मनिरूपणस्त्र तस्य मिथ्यात्वमित्याह कथंचेति तथाच मनुष्यावयविनाः पटादेस्तन्त्वादिष्ववयवेषु त्रित्वादिवत्स्वरूपेणाप्रतिष्ठता
वयवशत्वतिविकल्पाशेषं दूषयति यदीत्यादिना व्यासज्यवृत्तिवत्समवायसत्त्वस्यावधात्मत्वमन्यत्तजन्यतासं[illegible]पूर्णत्वे तु तत्पटादेर्यावदवय
वानामप्रत्यक्षत्वात्प्रत्यक्षत्वं न प्रसज्येतेत्यर्थः द्वितीयं शंकते अथेति प्रत्यात्मनैकदेशेनावयवशः एकदेशेनैव तेषां नो हस्तमात्रग्रहेपिग्र
हणे एवं यत्किंचिदवयवग्रहणेनावयविनो ग्रहः संभवेदिति सर्वावयवानामनवस्थास्यादिति दूषयति तथापीति अर्थाद्वितीयमुत्तातं दूषयति

तादात्म्यप्रतीतेः द्रव्यगुणादीनां समवायकल्पनानर्थक्यं कथं च कार्यमवयविद्रव्यमेकाश्रितोवयवेष्ववयवेषु वर्तमाने वर्तेत किंसम
स्तेष्ववयवेषु वर्तेतोतान्यत्ववयवे यदि तावत्समस्तेषु वर्तेत ततो नुपलब्धिः प्रसज्येत समस्तावयवसंनिकर्षाभावात्सकलान
नहि बहुत्वसमस्तेष्वाश्रयेषु वर्तमानस्यास्त्याश्रयग्रहणेन ग्रहणं दृष्टम् अथावयवशः समस्तेषु वर्तेत ततोप्याश्रयावयवव्यतिरे
केणावयविनोवयवाः कल्प्येरन् यैरवयवेषु वयवशोवयवी वर्तेत कोशावयवैर्वर्तेत रिक्तेऽवयवेरसि कोशव्याप्तेति।
अनवस्था चैवं प्रसज्येत तेषु तेष्ववयवेषु वर्तताये तन्मन्येषामन्येषामवयवानां कल्पनीयत्वात् अथ प्रत्यवयवं वर्तेत तदेकत्र
व्यापारेन्यत्राव्यापारः स्यात् नहि देवदत्तः स्रुघ्ने संनिधीयमानस्तदहरेव पाटलीपुत्रेपि संनिधीयते युगपदनेकत्र वृत्तावने
कत्वप्रसंगः स्यात् देवदत्तयज्ञदत्तयोरिव स्रुघ्नपाटलीपुत्रनिवासिनोः गोत्वादिवत्प्रत्येकं परिसमाप्तेर्न दोष इति न तत्प्रती
त्यभावात् यदि गोत्वादिवत्प्रत्येकं परिसमाप्तोवयवी स्यात् यथा गोत्वं प्रतिव्यक्ति प्रत्यक्षेण गृह्यते एवमवयव्यपि प्रत्यक्षेण गृह्ये
त नचैवं नियतं गृह्यते प्रत्येकपरिसमाप्तौ चावयविनः कार्येणाधिकारात्तस्यैकत्वात् शृंगेणापि स्तनकार्यं कुर्यादुर
सा च पृष्ठकार्यं न चैवं दृश्यते प्रागुत्पत्तेश्च कार्यस्यासत्त्वे उत्पत्तिः कर्तृकारकाभावान्निरात्मिका च स्यात् ॥ ॥

अथ प्रत्यवयवमित्यनेन एकस्मिंस्तंतौ पट इति काले तत्तंतौ पट इति न स्यात् वृत्तावनेकत्वापत्तेरित्यर्थः यथा युगपद्देवदत्तोनेकव्यक्तिषुवृ
त्तावपि त्रातुरनेकत्वदोषानापत्तिस्तथावयवेन वृत्त्याशंकते गोत्वेति जातिवदवयविनो वृत्तिरसिद्धा अनभ्युपगमाभावादिति परिहरति न
तु पूर्वदोषात्तस्मात् मत्वेति अधिकारात्मेव धाम्य यात्स्वदत्तः स्वकार्यमध्ययनं ग्रामेरण्ये वा करोति तथा गोत्ववयवी स्वकार्ये तत्रीय
विकल्पे गत्वकादावयिकृत्येत्यर्थः एवं वृत्तिनिरूपणाद्वृत्तिनिर्वाच्यत्वं कार्यस्य प्रतिपाद्य तस्य प्रत्यक्षत्वात्कार्यवादे दोषांतरमाह प्रागिति य
था घटस्य उत्पत्तौ तेन विना क्रियाप्रत्याश्रयत्वरूपं कर्तृत्वं घटस्याभाति न यथा घटो जायत इति जनिक्रियाकर्तृत्वमनुभूयते अतोज।

प्रा० त०
टि० प्र०
८

नेनैरन्तुभवविद्वेपिसकर्त्तृकत्वे क्रियान्वेनानुमानमाह उत्पत्तिश्चेति अस्मतोयद्दस्योत्पत्तेनोक्तनेत्वासंभवेपिकुलालादेः सत्वाकर्त्तृत्वेन मित्याशंक्याह ढेटस्य चेति घटोत्पत्तिटेदेसत्कपालायुत्पत्तिरित्युत्पत्तिर्दृश्यते तद्वयेषि शेकामन्त्यवदाषमाहनप्याचेति अनुभवविरोध इत्यर्थः उत्पत्तिः भावस्याद्याविक्रियेतिस्वमतेनकार्यस्तुसमानीतसप्रतिकार्यस्योत्पत्तिर्नामस्वकारणसमवायः स्वस्मिन्सत्तासमवायो वेतितार्किकमतमाशंकते अथेति तन्मतेनापिकार्यस्यसत्वमावश्यकमतः सवधित्वायोगादित्याहकथमिति असतोवे तिहर्षोतोक्तिः ननुनरशृंगादिवत्कार्यमसदेवास्तु सत्वासत्वेभवतिकिन्तूत्पत्तिः प्रागभावमात्रेनतरेचासन्नधोनसदेवेतिवेधम्यात्सवधित्वापप

तु।

उत्पत्तिश्चनामक्रियासाप्रकृतेव्याभविवमर्हतितगत्यादिवत्क्रियावनाम सा अनुकर्त्तृकाचेतिविप्रतिषिध्येत वटस्यचोत्पत्तिरु च्यमानानघटकर्त्तृकाकेतर्हि अन्यकर्त्तृकेतिकल्पास्यात् तथाकपालादीनामप्युत्पत्तिरुच्यमानान्यकर्त्तृकेववस्या त् तथाचसतिघटउत्पद्यतेइत्युक्तेकुलालादीनिकारणान्युत्पद्यन्तइत्युक्तंस्यात् नचलोकेघटोत्पत्तिरित्युक्तेकुलालादी नामपुत्पद्यमानताप्रतीयते उत्पन्नताप्रतीतेश्च अथस्वकारणसत्तासंबंधएवोत्पत्तिरात्मलाभश्चकार्यस्येतिचेत् कथमल ब्धात्मकंसंबध्येतेति वक्तव्यं सतोर्हिद्वयोः संबंधः संभवतिनसदसतोरसतोर्वा अभावस्यचनिरुपाख्यत्वात्प्रागुत्पत्तेरि तिमर्यादाकरणमनुपपन्नं सतोहिलोकेक्षेत्रगृहादीनांमर्यादादृष्टानाभावस्य नहिवंध्यापुत्रोराजावभूवप्राक्पूर्णव मर्मणोभिषेकादित्येवंजातीयकेनमर्यादाकरणेननिरुपाख्योवंध्यापुत्रोराजावभूवभवतिभविष्यतीतिवाविशेष्यते। यदिचवंध्यापुत्रोपिकारकव्यापारादूर्ध्वंभविष्यतीतिउपपद्येतततकार्याभावोपिकारकव्यापारादूर्ध्वंभविष्यतीतिवयन्तु पश्यामो वंध्यापुत्रस्यकार्याभावस्यचाभावत्वाविशेषात् यथावंध्यापुत्रःकारकव्यापारादूर्ध्वंनभविष्यति एवंकार्याभा वोपिकारकव्यापारादूर्ध्वंनभविष्यतीति नन्वेवंसतिकारकव्यापारोनर्थकःप्रसज्येत यथैवहिप्राक्सिद्धत्वात्कारणस्वरूप सिद्धयेनकश्चिद्व्याप्रियते एवंप्राक्सिद्धत्वात्तदनन्यत्वाच्चकार्यस्यस्वरूपसिद्धयेनकश्चिद्व्याप्रियतव्याप्रियतेच अतःकारक

गे४

तिरित्याशंक्याह अभावस्येति अत्राभावशब्दोअसत्वपर्यायाख्येयाः असतःकालेनासंबंधात्प्राक्शब्दानुपपत्तिरित्यर्थः ननु। कारकव्यापारादूर्ध्वंभाविनःकार्यस्यवंध्यापुत्रवत्वंनेत्यपिमित्यतआह यदिचेतिकार्याभावअसत्कार्यमित्यर्थः तुल्ययोपयन्त्या। तद्यथपन्नमभविष्यदित्यन्वयः कस्तर्हिनिर्णयस्तमाह वयंत्विति नासतोविद्यतेभावइतिस्मृतेरितिभावः सत्कार्यवादेकारक वैयर्थ्यंशंकते नन्विति सिद्धकारणानन्यत्वाच्चकार्यस्यसिद्धत्वमित्याह तदनन्यत्वाच्चेति॥ ॥ ॥

१४

[illegible]

८

अनिर्वाच्यकार्यात्मनाकारणस्याभिव्यक्त्यर्थः कारकव्यापार इत्याह नैष दोष इति कार्यस्यान्यत्वमङ्गीकृत्य सांख्यानां सत्कार्यवादे कार
कव्यापारवैयर्थ्यदोष आपतति अभिव्यक्तेरपि सत्त्वाद्धेतुवादिनां तु दृष्टितत्त्वदर्शनावभासनचतुरमायामहिम्नासप्रपञ्चस्यादर्शने सर्वमुपप
न्नं विचार्यमाणे सर्वमयुक्तं युक्तत्वेहेतुनापततीति न्यायसमर्थनसमाधानान्तराभावात् ननु कारणाद्भिन्नमसदेवोत्पद्यत इति समा
धानं किं न स्यादित्याशङ्क्यासत्त्वात् तस्य दूषणमुक्तं स्मारयत्याह कार्याकारेणापीति अतः कारणाद्भेदाभेदाभ्यां दुर्निरूपस्य सदसद्वि
लक्षणस्यानिर्वाच्याभिव्यक्तिरनिर्वाच्यकारकव्यापाराणां फलमिति पक्ष एव श्रेयानिति भावः ननु स्वरूपतः पृथग्भूतत्वाच्च
स्याविशेषो वृद्धेदृश्यते तथा च घटोऽपि भिन्नः तद्धि कुड्यविशेषवत्वात् कुड्यवदित्यत आह नचेति वस्तुनोऽन्यत्वं समभेदः हेतोर्व्य
भिचारस्थलान्तरमाह तथा प्रतिदिनमिति प्रत्यहं पित्रादिदेहस्यावस्थाभेदेऽपि जन्मनाशयोरभावादभेदो युक्तः दार्ष्टान्तिके त्वसत्

नैष दोषः यतः कार्याकारेण कारणस्यावस्थापयितं कारकव्यापारस्यार्थवत्त्वमुपपद्यते कार्याकारोऽपि कारणस्यात्मभू
त एवानात्मभूतस्यानारभ्यत्वादित्यभाणि नच विशेषदर्शनमात्रेण वस्त्वन्यत्वं भवति न हि देवदत्तः संकोचितहस्तपादः
प्रसारितहस्तपादश्च विशेषेण दृश्यमानो वस्त्वन्यत्वं गच्छति स एवेति प्रत्यभिज्ञानात् तथा प्रतिदिनमनेकसंस्था
नानामपि पित्रादीनां न वस्त्वन्यत्वं भवति मम पिता मम भ्राता मम पुत्र इति प्रत्यभिज्ञानात् जन्मोच्छेदानन्तरितत्वात्
तद्युक्तं नान्यत्रेति चेन्न क्षीरादीनामपि दध्याद्याकारसंस्थानस्य प्रत्यक्षत्वात् अदृश्यमानानामपि वटधानादीनां स
मानजातीयावयवान्तरोपचितानामङ्कुरादिभावेन दर्शनगोचरतापत्तौ जन्मसंज्ञा तेषामेवावयवानामपचयवशाद्दर्
शनापत्तावुच्छेदसंज्ञा तत्र चेदृग्जन्मोच्छेदान्तरितत्वात् असतश्च सत्त्वापत्तिः सतश्चासत्त्वापत्तिः तथा सति गर्भवासिन उत्तानशायिनश्च भे
दप्रसङ्गः तथा च बाल्ययौवनस्थविरेष्वपि भेदप्रसङ्गः पित्रादिव्यवहारलोपप्रसङ्गश्च एतेन क्षणभङ्गवादः प्रति
वदितव्यः यस्य पुनः प्रागुत्पत्तेरसत्कार्यं न तस्य निर्विषयः कारकव्यापारः स्यात् अभावस्य विषयत्वानुपपत्तेः आकाश

हननाद्यर्थोऽसतो नित्यत्वादि किं जायत इति जन्म विना पारूप्यविरुद्धधर्मवत्त्वात् कार्यकारणयोर्भेदो न युक्त इति शङ्कते जन्मेति कारण
स्य नाशाभावाद् हेत्वसिद्धिरिति परिहरति नेति दधिघटादिकार्याणि नित्वेन क्षीरमृदादेर्नाशप्रसक्तत्वान्नाशासिद्धिरित्यर्थः ननु य
त्रान्वयो दृश्यते तत्र हेतुसिद्धावपि यत्रोक्तोऽङ्कुरादौ वटबीजादीनामन्वयो न दृश्यते तत्र हेतुसत्त्वात् कुड्यत्वं स्यादित्यत आह अदृश्य
मानेति तत्राप्यङ्कुरादौ बीजाद्यवयवानामन्वयात्तत्र एव जन्मविनाशौ किं त्ववयवानामुपचयापचयाभ्यां तद्व्यवहार इत्यर्थः अ
त्रोपचयापचयपरिणामत्वस्य भेदानुमाने तत्रासत उत्पत्तिः सतो नाश इत्याशङ्क्य व्यभिचारमाह तत्र हेतावपि दृष्टे देहे विभे
दत्वात्तु व्यभिचारान्तरबाधमाह पित्रादीति एतेनेति कारणस्य सर्वकार्येष्वन्वयकथनेनेत्यर्थः स्वपक्षदोषपरिहृत्य पर

असतः कार्यस्य कारकव्यापारादिति तातिशयाश्रयत्वायोगाद् विषयत्वेपि स्वतः दार्द्वविषयत्वं स्यादिति शंकते समवायीति समवाय
कारणात्कार्यं भिन्नमभिन्नं वेति विकल्पाद्यं निरस्यति नेत्यादिना द्वितीयामाशंकेशपतिमाह समवायीति कार्यात्मना तत्कारणं
कारणमनन्यत्वमुपसंहरति तस्मादिति परमकारणानन्यत्वफलितमाह तथा मृलेति असत्कार्यवादे प्रतिज्ञाबाधः स्यादित्याह यदित्व

समवायिकारणविषयः कारकव्यापारः स्यादिति चेत् नास्य विषयेण कारकव्यापारेणान्यनिष्पत्ते रतिप्रसंगात् समवायि
कारणस्यैवात्मातिशयः कार्यमिति चेत् न सत्कार्यतापत्तेः तस्मात्क्षीरादीन्येव द्रव्याणि दध्यादिभावेनावतिष्ठमानानि
कार्याख्यां लभन्ते इति न कारणाद् अन्यत्कार्यं वर्षशतेनापि शक्यं निश्चेतुं तथा मूलकारणमेवान्त्यात्कार्यात्तेन तेन का
र्याकारेण नटवत् सर्वव्यवहारास्पदत्वं प्रतिपद्यते एवं युक्तेः कार्यस्य प्रागुत्पत्तेः सत्त्वमनन्यत्वं कारणाद् अवगम्यते श
ब्दान्तराच्चैतदेवगम्यते पूर्वसूत्रे असद्व्यपदेशिनः शब्दस्योदाहृतत्वात् ततोन्यः सद्व्यपदेशी शब्दः शब्दान्तरं सदेव सो
म्येदमग्र आसीदेकमेवाद्वितीयमित्यादि तद्धैक आहुरसदेवेदमग्र आसीदिति चासत्पक्षमुपक्षिप्य कथमसतः सज्जा
येतेति आक्षिप्य सदेव सोम्येदमग्र आसीदित्यवधारयति तत्रेदं शब्दवाच्यस्य कार्यस्य प्रागुत्पत्तेः सच्छब्दवाच्येन कारणे
न सामानाधिकरण्यश्रवणात्सत्त्वानन्यत्वे प्रसिध्यतः यदि तु प्रागुत्पत्तेरसत्कार्यं स्यात् पश्चाच्चोत्पद्यमानं कारणे सम
वेयात् तदन्यत्कारणात्स्यात् तत्र येनाश्रुतं श्रुतं भवतीतीयं प्रतिज्ञा पीड्येत सत्त्वानन्यत्वावगतेस्त्वियं प्रतिज्ञा समर्थ्यते
पटवच्च २२ यथा च संवेष्टितः पटो न व्यक्तं गृह्यते किमयं पटः किं वान्यद् द्रव्यमिति स एव प्रसारितो यत्संवेष्टितं
द्रव्यं स पट एवेति प्रसारणेनाभिव्यक्तो गृह्यते यथा संवेष्टनसमये पट इति गृह्यमाणोपि न विशिष्टायामविस्तारो गृ
ह्यते स एव प्रसारणसमये विशिष्टायामविस्तारो गृह्यते न संवेष्टितरूपादन्यो यमभिन्नः पट इति एवं तन्त्वादिकारणाव
स्थं पटादिकार्यमस्पष्टं सत् तुरीवेमकुविन्दादिकारकव्यापारादभिव्यक्तं स्पष्टं गृह्यते अतः संवेष्टितप्रसारितपटन्या
येनैवानन्यत्कारणात्कार्यमित्यर्थः यथा च प्राणादिः २३ यथा च लोके प्राणापानादिषु प्राणभेदेषु प्राणायामेन नि
रुद्धेषु कारणमात्ररूपेण वर्तमानेषु जीवनमात्रं कार्यं निर्वर्त्यते नाकुञ्चनप्रसारणादिकं कार्यान्तरं तेष्वेव प्रा
णभेदेषु पुनः प्रवृत्तेषु जीवनादधिकमाकुञ्चनादिकमपि कार्यान्तरं निर्वर्त्यते न च प्राणभेदानां प्रभेदवतः प्रा
णादन्यत्वं समीरणस्वभावाविशेषात् एवं कार्यस्य कारणादनन्यत्वं अतश्च कृत्स्नस्य जगतो ब्रह्मकार्यत्वात्तदनन्यत्वा
च्च सिद्धैषा श्रौती प्रतिज्ञा येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति ॥
प्रागुत्पत्तेरिति कार्यमुपादानाद्भिन्नं तदुपलब्ध्यावश्यमुपलभ्यमानत्वात्तदाधिकपरिमाणत्वाच्च मषकादिवदाशङ्क्य तत्र
व्यभिचारार्थं सूत्रं पटवच्चेति द्वितीयहेतोर्व्यभिचारं स्फुटयति यथा च संवेष्टनेति आयामो दैर्घ्यं तत्रैव विलक्षणकार्यका
रित्वहेतुमाशंक्य व्यभिचारमाह सूत्रकारः यथा चेति एवं जीवजगतो ब्रह्मानन्यत्वात् प्रतिज्ञासिद्धिरित्यधिकरणार्थमुपसं

इति आरम्भणाधिकरणम् ॥

जीवाभिन्नं ब्रह्म जगत्कारणमिति वदन्वेदान्तसमन्वयो विषयः स यदि तादृग्ब्रह्म जगज्जनयेन्नर्हि स्वानिष्टं नरकादिकं न जनयेत् स्वतन्त्रश्चेतन
त्वादित्यन्यायेन विरुध्यते न वेति संदेहे पूर्वोक्तजीवानन्यत्वमुपजीव्य दोषाः ब्रह्मणि प्रसज्येरन्निति पूर्वपक्षसूत्रं गृहीत्वा व्याचष्टे इत
रव्यपदेशादित्यादिना पूर्वपक्षे जीवाभिन्ने ब्रह्मणि समन्वयासिद्धिः सिद्धान्ते तत्सिद्धिरिति फलं हिताकरणमजननं व्यासेनाहितक

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः २४ अन्यथा पुनः अस्मिन्नन्यकारणवादे आक्षिप्यते चेतनाद्धि जगत्प्रक्रियाया
माश्रीयमाणायां हिताकरणादयो दोषाः प्रसज्यन्ते इतरव्यपदेशात् शारीरस्य ब्रह्मात्मत्वमुपदिशति स आत्मा तत्त्वमसि श्वेत
केतो इति प्रतिबोधनात् यद्वा इतरस्य च ब्रह्मणः शारीरात्मत्वं व्यपदिशति तत्सृष्ट्वा तदेवानुप्राविशदिति स्रष्टुरेवा
विकृतस्य ब्रह्मणः कार्यानुप्रवेशेन शारीरात्मत्वदर्शनात् अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति च परा
देवता जीवमात्मशब्देन व्यपदिशन्ती न ब्रह्मणो भिन्नः शारीर इति दर्शयति तस्माद्यद्ब्रह्मणः स्रष्टृत्वं तच्छारीरस्यैवेति अतः
स स्वतन्त्रः कर्ता सन् हितमेवात्मनः सौमनस्यकरं कुर्यात् नाहितं जन्ममरणजरारोगाद्यनेकानर्थजालं नहि कश्चिदपर
तन्त्रो बन्धनागारमात्मनः कृत्वानुप्रविशति न च स्वयमत्यन्तनिर्मलः सन्नत्यन्तमलिनं देहमात्मत्वेनोपेयात् कृतमपि कथंचि
द्यद्दुःखकरं तदिच्छया जह्यात् सुखकरं चोपाददीत स्मरेच्च मयेदं जगद्बिम्बं विचित्रं विरचितमिति सर्वो हि लोकः स्पष्टं कार्यं कृ
त्वा स्मरति मयेदं कृतमिति यथा च मायावी स्वयंप्रसारितां मायामिच्छयानायासेनैवोपसंहरति एवं शारीरोऽपीमां सृष्टि
मुपसंहरेत् स्वामपि तावच्छरीरं शारीरो न शक्नोत्यनायासेनोपसंहर्तुं एवं हितक्रियाद्यदर्शनादन्याय्या चेतनात्प्रक्रिये
ति मन्यते अधिकं तु भेदनिर्देशात् २५ तु शब्दः पक्षं व्यावर्तयति यत्सर्वज्ञं सर्वशक्ति ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं शा
रीरादधिकमन्यत् तद्वयं जगतः स्रष्टृ ब्रूमः न तस्मिन् हिताकरणादयो दोषाः प्रसज्यन्ते न हि तस्य हितं किंचित्कर्तव्यमस्त्यहितं
वा परिहर्तव्यं नित्यमुक्तत्वात् न च तस्य ज्ञानप्रतिबन्धः शक्तिप्रतिबन्धो वा क्वचिदप्यस्ति सर्वज्ञत्वात् सर्वशक्तित्वाच्च शारीर
स्त्वनेवंविधः तस्मिन् प्रसज्यन्ते हिताकरणादयो दोषाः न तु तं वयं जगतः स्रष्टारं ब्रूमः कुत एतत् भेदनिर्देशात् आत्मा
वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः सता सोम्य तदा संपन्नो भवति शारीर
आत्मा प्राज्ञेनात्मनान्वारूढः इत्येवंजातीयकः कर्तृकर्मादिभेदनिर्देशो जीवादधिकं ब्रह्म दर्शयति ननु भेदनिर्देशोऽपि
दर्शितः तत्त्वमसीत्येवंजातीयकः कथं भेदाभेदौ विरुद्धौ संभवेयातां नैष दोषः आकाशघटाकाशन्यायेनोभयसंभवस्य

रणे दोषो व्याख्यातः आदिपदोक्तं भ्रान्त्यादिकमापादयति न च स्वयमित्यादिना जीवेशयोरभेदाज्जीवगता दोषाः ब्रह्मणि स्युः ब्रह्म
गता अपि स्युः सृष्टिसंहारसर्वज्ञत्वादयो गुणा जीवे स्युः न चेष्टापत्तिः जीवस्य स्वशरीरेऽपि संहारसामर्थ्यादर्शनादिति प्राप्ते सिद्धान्तसूत्रं
व्याचष्टे तु शब्द इत्यादिना जीवेश्वरयोर्लोके बिम्बप्रतिबिम्बयोरिव कल्पितभेदाङ्गीकारान्न व्यवस्थेति सिद्धान्तग्रन्थार्थः यदि च यं जी

शा.भा.
द्वि.अ.

किंचाभेदज्ञानादूर्ध्वं वा दोषा आपाद्यन्ते पूर्वं वा ज्ञानादित्याह अपि चेति उक्तं मिथ्याज्ञानविजृम्भितत्वं स्फुटयति अविद्येति कर्तृत्वादिबुद्धि
मीध्यासे देहधर्माध्यासे दृष्टान्तयति जन्मेति द्वितीयपक्षमाह अबाधिते त्विति ज्ञानादूर्ध्वं तत्त्वादिधर्माणां बाधात्स्वैवचकल्पितभेदे
व्यवस्थोपपद्यते न किंचिदवद्यमित्यर्थः ननु स्वच्छैकरूपब्रह्मणि कथं जीवस्य वैविध्यं कथं च तत्कार्यवैचित्र्यमित्यनुपपत्तिं दृष्टान्तैः
परिहरति सूत्रकारः अश्मादिवच्चेति किंपाको महातालफलं तत्कार्यसंस्काररूपानादिपाकभेदो हेविच्यमिति भावः सू
त्रस्य चकारार्थमाह श्रुतेश्चेति ब्रह्मजीवगतदोषप्रसञ्जकानुविदित्वा यदनुमानं स्वतःप्रमाणनिरवद्यत्वादिश्रुतिबाधितं किं च कर्तृत्व
भोक्तृत्वादिविकारस्य मिथ्यात्वाज्जीवस्यैव तावद्दोषो नास्ति कुतो विवस्थानीयस्यापोषविशेषदर्शिनः परमेश्वरस्य दोषप्रसक्तिः ॥

अपि च यदा तत्त्वमसीत्येवंजातीयकेनाभेदनिर्देशेनाभेदः प्रतिबोधितो भवत्यपगतं भवति तदा जीवस्य संसारित्वं ब्रह्मण
श्च स्रष्टृत्वं समस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन बाधितत्वात्तत्र कुत एव सृष्टिः कुतो वा हिता
करणादयो दोषाः अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकारणसंघातोपाध्यविवेककृता हि भ्रान्तिर्हिताकरणा
दिलक्षणः संसारो न तु परमार्थतोऽस्तीत्यसकृदवोचाम जन्ममरणछेदनभेदनाद्यभिमानवत् अबाधिते तु भेदव्यवहा
रे सोऽन्वेष्टव्यः स विजिज्ञासितव्य इत्येवंजातीयकेन भेदनिर्देशेनावगम्यमानं ब्रह्मणोऽधिकत्वं हिताकरणादिदोषप्रसक्तिं निरुण
द्धि ॥ अश्मादिवच्च तदनुपपत्तिः २३ यथा च लोके पृथिवीत्वसामान्यान्वितानामप्यश्मनां केचिन्महार्हा मणयो वज्रवैडू
र्यादयोऽन्ये च मध्यमवीर्याः सूर्यकान्तादयोऽन्ये प्रहीणाः श्ववायसप्रक्षेपणार्हाः पाषाणा इत्यनेकविधं वैचित्र्यं दृश्यते यथा चैक
पृथिवीव्यपाश्रयाणामपि बीजानां बहुविधं पत्रपुष्पफलगन्धरसादिवैचित्र्यं चन्दनकिंपाकादिषूपलक्ष्यते यथा चैक
स्याप्यन्नरसस्य लोहितादीनि च विचित्राणि भवन्ति एवमेकस्यापि ब्रह्मणो जीवप्राज्ञपृथक्त्वं कार्यवैचित्र्यं चोपपद्यत इति
अतस्तदनुपपत्तेः परपरिकल्पितदोषानुपपत्तिरित्यर्थः श्रुतेश्च प्रामाण्याद्विकारस्य च वाचारम्भणमात्रत्वात्स्वप्नदृश्यभाव
वैचित्र्यवच्चेत्यभ्युच्चयः उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि २४ चेतनं ब्रह्मैकमद्वितीयं जगतः कारणमिति यदुक्तं तन्नोपप
द्यते कस्मात् उपसंहारदर्शनात् इह हि लोके कुलालादयो घटपटादीनां कर्तारो मृद्दण्डचक्रसूत्राद्यनेककारकोपसंहारेण संगृहीतसा
धनाः सन्तः तत्तत्कार्यं कुर्वाणा दृश्यन्ते ब्रह्म चासहायं तवाभिप्रेतं तस्य साधनान्तरानुपसंग्रहे सति कथं स्रष्टृत्वमुपपद्येत त

यत ब्रह्म न विचित्रकार्यप्रकृति एकरूपत्वाद्व्यतिरेकेणाश्मत्वादिवदिति तन्नैकरूप्यस्य स्वप्नदृशीव विचित्रदृष्टत्वाल्लवैचित्र्यद
र्शनेन व्यभिचारादित्यर्थः तस्मात्प्रत्यगभिन्ने ब्रह्मणि समन्वयस्याविरोध इति सिद्धं उपसंहारदर्शनात् असहायाद्ब्रह्मणो
जगत्सर्गं प्रवत्समन्वयो विषयः स किं यद्सहायं तत्र कारणमिति लौकिकन्यायेन विरुध्यते न वेति संदेहः एवं सोपाधि
कजीवभेदाद्ब्रह्मणि जीवदोषात्प्रसज्यन्ते के संप्रत्युपाधितोऽपि विभक्ते ब्रह्मणः प्रेरकादिके सहकारिनालीषानाना
त्वाभावादिति प्रत्युदाहरणेन पूर्वपक्षसूत्रांशं व्याचष्टे चेतनमित्यादिना फलेपूर्वक्वत्कारकाणामुपसंहारो मेलनं ॥ राम ।

जमावत्मा२ पि२ मेवविशेष१

इत्यन्यापेक्षस्य क्षीरादेर्व्यभिचार इति सिद्धान्तयति नैष इति स्यादेतत् ब्रह्मणोऽकारणत्वमिष्टं स्वरसतस्तमाये वसहाय इति भावे
नाह वास्तविमिति क्षीरस्याप्यातंचनादि सहायोऽस्तीत्यसहायत्वहेतोर्नव्यभिचार इत्याशंक्य सहायाभावेऽपि यस्य कस्यचित्परिणाम
स्य क्षीरे दर्शनाद्व्यभिचारं नादवस्यामित्याह नन्वित्यादिना तर्हि सहायापेक्ष्यत्वं तत्राह त्वार्यत इति ननु त्वार्यते क्षीरे दधिभा
वाय शैघ्र्यं कार्यते इति किमर्थं कल्प्यते स्वतो पाक्ते क्षीरे सहायेन शक्तेः क्रियत इति किन्न स्यात्तत्राह यदि चेति पाक्तस्य सहाय

नैष दोषः यतः क्षीरवत्द्रव्यस्वभावविशेषादुपपद्यते यथा हि लोके क्षीरं जलं वा स्वयमेव दधिहिमकरकादिभावेन
परिणमतेऽनपेक्ष्य बाह्यं साधनं तथेहापि भविष्यति ननु क्षीराद्यपि दध्यादिभावेन परिणममानमपेक्षत एव बा
ह्यं साधनमौष्ण्यादिकं कथमुच्यते क्षीरवद्धीति नैष दोषः स्वयमपि हि क्षीरं यां च यावतीं च परिणाममात्रामनुभ
वत्येव त्वार्यते त्वौष्ण्यादिना दधिभावाय यदि च स्वयं दधिभावशीलता न स्यान्नैवौष्ण्यादिनापि बलाद्दधिभावमापद्येत
न हि वायुराकाशो वौष्ण्यादिना बलाद्दधिभावमापद्यते साधनसामग्र्या च तस्य पूर्णता संपद्यते परिपूर्णशक्तिकं तु
ब्रह्म न तस्यान्येन केनचित्पूर्णता संपादयितव्या श्रुतिश्च भवति न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिक
श्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति तस्मादेकस्यापि ब्रह्मणो विचित्रश
क्तियोगात् क्षीरादिवद्विचित्रपरिणाम उपपद्यते देवादिवदपि लोके २८ स्यादेतदुपपद्यते क्षीरादीनामचेतना
नामनपेक्ष्यापि बाह्यं साधनं दध्यादिभावः दृष्टत्वात् चेतनाः पुनः कुलालादयः साधनसामग्रीमपेक्ष्यैव तस्मै तस्मै
कार्याय प्रवर्तमाना दृश्यन्ते कथं ब्रह्म चेतनं सदसहायं प्रवर्तेतेति देवादिवदिति ब्रूमः यथा लोके देवाः पितर ऋष
य इत्येवमादयो महाप्रभावाश्चेतना अपि सन्तोऽनपेक्ष्यैव किंचिद्बाह्यं साधनमैश्वर्यविशेषयोगादभिध्यानमात्रेण स्व
त एव बहूनि नानासंस्थानानि शरीराणि प्रासादादीनि रथादीनि च निर्मिमाणा उपलभ्यन्ते मन्त्रार्थवादेतिहासपुरा
णप्रामाण्यात् तन्तुनाभश्च स्वत एव तन्तून्सृजति बलाका चान्तरेणैव शुक्रं गर्भं धत्ते पद्मिनी चानपेक्ष्य किंचित्प्रस्थान
साधनं सरोवरान्तरात्सरोवरान्तरं प्रतिष्ठते एवं चेतनमपि ब्रह्मानपेक्ष्य बाह्यं साधनं स्वत एव जगत्स्रक्ष्यति ॥ ॥

स्यादेतत् किं कार्यमित्यत्राह साधनेति सहायविशेषाभावे कश्चिद्विकारः क्षीरस्य भवति तत्रातंचनप्रक्षेपोऽस्याभावेऽनमदधि
भावसामर्थ्यमुत्पन्नमित्यर्थः तर्हि शक्तिव्यंजकोऽपि सहायो ब्रह्मणो वाच्यस्तत्राह परिपूर्णेति निरपेक्षमायाशक्तिकमित्य
र्थः तत्र प्रमाणमाह श्रुतिश्चेति ननु ब्रह्म न कारणं चेतनत्वे सत्यसहायत्वात् कुलालादिवदिति नदी
रादौ व्यभिचार इति तत्र व्याप्त्याशंकामाह स्यादेतदिति तस्यापि हेतोर्देवादौ व्यभिचार इत्याह देवादिवदिति लोका

१४ श्री ... ब्रह्मसूत्रभाष्यम्

क्षीरप्रभ वतीव

२ प्रमाणात

शा॰भा॰
द्वि॰ अ॰
२१

ननु ब्रह्म कार्यात्मना परिणमति चेत्सावयवत्वं दुर्वारं निर्वयवस्यैकस्य द्विधासत्त्वायोगात् ततो यद्द्विधाभूतं तेन सावयवमि-
ति तर्कविरुद्धं ब्रह्मणो निरवयवत्वमिति विवर्तमजानतः शंकां गूढाशय एव परिहरति शब्दमूलत्वेत्ति यदा लौकिकानामप्रत्य-
तद्दृष्टानामपि शक्तिरचिंत्या तदा शब्दैकसमधिगम्यस्य ब्रह्मणः किमु वक्तव्यं अतो ब्रह्मणो निरवयवत्वं द्विधाभावश्चोभयम-
पि शाब्दमभ्युपगन्तव्यं न तर्केणाबाधनीयमित्यर्थः प्रकृतिभ्यः प्रत्यक्षदृष्टवस्तुस्वभावेभ्यो यत्परं विलक्षणं केवलोपदेशगम्यं
तदचिंत्यस्वरूपमिति सूत्रार्थः आशयानवबोधेन शंकते ननु शब्देनापीति यद्वा ब्रह्मपरिणामीत्येकदेशिनामियं सिद्धांत

शब्दमूलं च ब्रह्म शब्दप्रमाणकं [नाऽ नेन्द्रियप्रमाणकं] तथा शब्दमभ्युपगन्तव्यं शब्दश्चोभयमपि ब्रह्मणः प्रतिपादयति [न] कृत्स्नप्रसक्तिं
निरवयवत्वं च लौकिकानामपि मणिमंत्रौषधिप्रभृतीनां देशकालनिमित्तवैचित्र्यवशाच्छक्तयो विरुद्धानेककार्य-
विषया दृश्यन्ते ता अपि तावन्नोपदेशमन्तरेण केवलेन तर्केणावगन्तुं शक्यन्ते अस्य वस्तुन एतावत्य एतत्सहाया
एतद्विषया एतत्प्रयोजनाश्च शक्तय इति किमुताचिन्त्यस्वभावस्य ब्रह्मणो रूपं विना शब्देन न निरूप्येत तथा चाहुः पौ-
राणिकाः अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणमिति तस्माच्छब्द-
मूल एवातीन्द्रियार्थयाथात्म्याधिगमः ननु शब्देनापि न शक्यते विरुद्धोऽर्थः प्रत्याययितुं निरवयवं च ब्रह्म परिणा-
मते न च कृत्स्नमिति यदि निरवयवं ब्रह्म स्यान्नैव परिणमेत कृत्स्नमेव वा परिणमेत अथ केनचिद्रूपेण परिणमेत केनचिच्चावतिष्ठेत
रूपभेदकल्पनात्सावयवमेव प्रसज्येत क्रियाविषये हि अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीत्ये-
वंजातीयकानां विरोधप्रतीतावपि विकल्पाश्रयणं विरोधपरिहारकारणं भवति पुरुषतंत्रत्वाच्चानुष्ठानस्य इह
तु विकल्पाश्रयणेनापि विरोधपरिहारः संभवत्यपुरुषतन्त्रत्वाद्वस्तुनः तस्माद्दुर्घटमेतदिति नैष दोषोऽविद्याक-
ल्पितरूपभेदाभ्युपगमात् न ह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु संपद्यते न हि तिमिरोपहतनयनेनानेक इव
चंद्रमा दृश्यमानोऽनेक एव भवति अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वा-
न्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते पारमार्थिकेन च रूपेण सर्वव्यवहारा-
तीतमपरिणतमवतिष्ठते ॥

स्त्वव्याख्यादर्शितात्मतामाक्षिपति नन्विति शब्दस्य योग्यज्ञानसापेक्षत्वादित्यर्थः ननु ब्रह्म सावयवं निरवयवं चेति विकल्पाश्र-
यणं सर्वश्रुतिसमाधानं स्यादित्यत आह क्रियेति निरवयवत्वे ब्रह्मणः प्रकृतित्वश्रुतिविरोधः सावयवत्वे निरवयवत्वशब्द-
विरोधः विकल्पश्च वस्तुन्ययुक्तः अतः प्रकारान्तरानुपलंभाच्छ्रुतीनां प्रामाण्यं दुर्घटमिति प्राप्ते सिद्धांतयति नैष दोष इति
निरवयवस्य वस्तुनः कृत्स्नस्यैवाविद्याकल्पितनामरूपविकारांगीकाराद्दुर्घटत्वदोषो नास्ति वास्तवकृत्स्नकल्पितत्वेवि-
कारप्रकृतित्वेनाविरोधादित्यर्थः रूपभेदांगीकारे सावयवत्वं स्या-
दित्याशंकोत्तरं विवृणोति नहीत्यादिना ॥

कृत्स्नप्रसक्तिं निरस्य दोषान्तरं निरस्यति वाचारंभणेति ननु श्रुतिप्रतिपाद्यस्य परिणामस्य कथं मिथ्यात्वं तत्राह न चेयमिति निष्प्रपंचब्र
ह्मधीशेषत्वेन स्थितिरत्र यत्तेन प्रतिपाद्यत्वेन प्रतिपाद्यतत्त्वस्य सत्यत्वे वदिति अतो विवर्तवादे न कश्चिद्दोष इत्युपसंहरति तस्मादिति ।
पूर्वावस्थानाशेनावस्थान्तरं परिणामः यथा दुग्धस्य दध्याविर्भावः पूर्वरूपानुपमर्देनावस्थान्तरं विवर्तः यथा शुक्तेः रजतभावः तत्र ब्र
ह्मणि विवर्तोपादानत्वं स्वप्नमायादिदृष्टान्तेन दृढयन्मायावादं स्फुटयति सूत्रकारः आत्मनि चेति एवयोगाश्च स्थाः किंच कृत्स्नप्र
सक्त्यादीनां सांख्यादिपक्षेपि दोषत्वान्नास्माकमनुयोज्यत्वं यश्चोभयोः समो दोष इति न्यायादित्याह सूत्रकारः स्वपक्षेति प्रधा
नस्य निरवयवत्वे कृत्स्नप्रसक्तिः सावयवत्वे च निरवयवत्वाभ्युपगमविरोध इत्यर्थः शंकते नन्विति किं साम्यावस्था गुणानां विकारः

वाचारंभणमात्रत्वाद्द्वाविद्याकल्पितेन नामरूपभेदेनेति न निरवयवत्वं ब्रह्मणः कुप्यति नचेयं परिणामश्रुतिः परिणाम ॥
प्रतिपादनार्था तत्प्रतिपत्तौ फलानवगमात् सर्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था त्वेषा तत्प्रतिपत्तौ फलाव
गमात् स एष नेति नेत्यात्मेत्युपक्रम्याभयं वै जनक प्राप्तोसीति तस्मादस्मत्पक्षे न कश्चिदपि दोषप्रसंगोस्ति आत्मनि चै
वं विचित्राश्च हि २८ अपि च नैवात्र विवदितव्यं कथमेकस्मिन् ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः स्यादिति यत
आत्मन्येकस्मिन्नपि स्वप्नदृशि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः पठ्यते न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृ
जते इत्यादिना लोकेपि देवादिषु च स्वरूपानुपमर्देनैव विचित्रा हस्त्यश्वादिसृष्टयो दृश्यन्ते तथैक
स्मिन्नपि ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिर्भविष्यतीति स्वपक्षदोषाच्च २९ परेषामप्येष समानः स्वपक्ष
दोषः प्रधानवादिनोपि हि निरवयवमपरिच्छिन्नं शब्दादिहीनं प्रधानं सावयवस्य परिच्छिन्नस्य शब्दादिमतः कार्यस्य का
२६ रणमिति स्वपक्षः तत्रापि कृत्स्नप्रसक्तिर्निरवयवत्वात्प्रधानस्य प्राप्नोति निरवयवत्वाभ्युपगमकोपो वा ननु नैवैते निरव
२९ यवं प्रधानमभ्युपगम्यते सत्वरजस्तमांसि त्रयो गुणास्तेषां साम्यावस्था प्रधानं तैरेवावयवैस्तत्सावयवमिति नैवंजातीय
केन सावयवत्वेन प्रकृतो दोषः परिहर्तुं पार्यते यतः सत्वरजस्तमसामप्येकैकस्य समानं निरवयवत्वं एकैकमेव चेतर
द्वयानुगृहीतं सजातीयस्य प्रपंचस्योपादानमिति समानत्वात्स्वपक्षदोषप्रसंगस्य तर्काप्रतिष्ठानात् सावयवमेवेति

समुदायो वा आद्ये तस्यान्यतमत्वप्रकृतित्वं विकारत्वात् द्वितीये प्रधानाभावः समुदायस्यावस्तुत्वेन मूलत्वाभावात् अथ निरवयवा गुणा
एवविविधपरिणामानां प्रकृतिरिति चेत्तर्हि कृत्स्नप्रसक्तिमूलोच्छेदौ दुर्वाराविति भाष्यं परिहरति तैरेवेत्यादिना इति यत अतः स्व
मानत्वाच्च वयं पर्यनुयोज्या इत्यन्वयः प्रत्येकं सत्वादिकमितरगुणद्वयसचिवं निरवयवं वियदाद्युपादानं तर्हि कृत्स्नस्योपादानस्य कार्य
रूपप्रसक्तेर्मूलोच्छेदप्रसक्तेर्निरवयवत्वसाधकतर्कस्याभासत्वाद्गुणानां सावयवत्वमेव परिणामित्वेन मृदादिवदतो न कृत्स्न
प्रसक्तिरेकदेशपरिणामसंभवादिति शंकते तर्केति एतद्दोषाभावेपि दोषान्तरं स्यादिति परिहरति एवमपीति ॥ ॥

शां॰भा॰
द्वि॰प्र॰
२१

ननु ब्रह्म कार्यात्मना यदि परिणमते तदा सावयवत्वेन दुर्वारं निरवयवस्यैकस्य द्विधा सत्त्वायोगात् ततो यदि द्विधाभूतं तत् सावयवमि
ति तर्कविरुद्धं ब्रह्मणो निरवयवत्वमिति विवर्तमजानतः शंकां गूढाशय एव परिहरति शब्दमूलत्वादिति यदा लौकिकानामप्यस्य
तर्कमणीनामपि शक्तिरचिंत्या तदा शब्दैकसमधिगम्यस्य ब्रह्मणः किमु वक्तव्यं अतो ब्रह्मणो निरवयवत्वे द्विधाभावस्त्वप्रभवं
यथाशब्दमभ्युपगन्तव्यं न तर्केणावाधनीयमित्यर्थः प्रकृतिभ्यः प्रत्यक्षदृष्टवस्तुस्वभावेभ्यो यत्परं विलक्षणं केवलोपदेशगम्यं
तदचिंत्यस्वरूपमिति स्मृत्यर्थः आगमानववोधनशंकते ननु शब्देनापीति यद्या ब्रह्मपरिणामी तदेकदेशिनामिदं सिद्धांत

शब्दमूलत्वं ब्रह्मशब्दप्रमाणकं तथा शब्दमभ्युपगन्तव्यं शब्दश्चोभयमपि ब्रह्मणः प्रतिपादयति कृत्स्नप्रसक्तिं
निरवयवत्वं च लौकिकानामपि मणिमंत्रौषधिप्रभृतीनां देशकालनिमित्तवैचित्र्यवशाच्छक्तयो विरुद्धानेककार्य
विषया दृश्यंते ता अपि तावन्नोपदेशमंतरेण केवलेन तर्केणावगंतुं शक्यंते अस्य वस्तुन एतावत्य एतत्सहाया
एतद्विषया एतत्प्रयोजना च शक्तय इति किमुताचिंत्यस्वभावस्य ब्रह्मणो रूपं न विना शब्देन निरूप्येत तथा चाहुः पौ
राणिकाः अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेत् प्रकृतिभ्यः परं यच्च तदचिंत्यस्य लक्षणमिति तस्माच्छब्द
मूल एवातींद्रियार्थयाथात्म्याधिगमः ननु शब्देनापि न शक्यते विरुद्धोऽर्थः प्रत्याययितुं निरवयवं च ब्रह्म परिणा
मते न च कृत्स्नमिति यदि निरवयवं ब्रह्म स्यान्नैव परिणमेत अथ केनचिद्रूपेण परिणमेत केनचिच्चावतिष्ठेत
रूपभेदकल्पनात्सावयवमेव प्रसज्येत क्रियाविषये हि अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीत्ये
वं जातीयकानां विरोधप्रतीतावपि विकल्पाश्रयणं विरोधपरिहारकारणं भवति पुरुषतंत्रत्वाच्चानुष्ठानस्य इह
तु विकल्पाश्रयणेनापि न विरोधपरिहारः संभवत्यपुरुषतंत्रत्वाद्वस्तुनः तस्माद्दुर्घटमेतदिति नैष दोषो विद्याक
ल्पितरूपभेदाभ्युपगमात् न ह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु संपद्यते न हि तिमिरोपहतनयनेनानेक इव
चंद्रमा दृश्यमानोऽनेक एव भवति अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वा
न्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते पारमार्थिकेन रूपेण सर्वव्यवहारा

सत्त्वाख्यानादर्शितानामाक्षिपति नन्विति शब्दस्य योग्यज्ञानसापेक्षत्वादित्यर्थः ननु ब्रह्म सावयवं निरवयवं चेति विकल्पाश्र
यणे सर्वश्रुतिसमाधानं स्यादित्यत आह कथमिति निरवयवत्वे ब्रह्मणः प्रकृतित्वश्रुतिविरोधः सावयवत्वे निरवयवत्वशब्द
विरोधः विकल्पश्च वस्तुन्ययुक्तः अतः प्रकारांतरानुपलंभाच्छ्रुतीनां प्रामाण्यं दुर्घटमिति प्राप्ते समाधत्ते यदि नैष दोष इति
निरवयवस्य वस्तुनः कूटस्थस्याप्यविद्याकल्पितनामरूपविकारयोगिकारणत्वं घटत इति दोषो नास्ति वास्तवं कूटस्थकल्पितवि

कृत्स्नप्रसक्तिर्निरस्य दोषान्तरं निरस्यति वाचारंभणेति ननु श्रुतिप्रतिपाद्यस्य परिणामस्य कथं मिथ्यात्वं तत्राह नचेयमिति निष्प्रपंचब्र
ह्मधीशेषत्वेन सृष्टिश्रुतेः तेन प्रतिपाद्यत्वेन प्रतिपाद्यत इत्यसत्क्रोदोवदित अतो विवर्तवादे न कश्चिद्दोष इत्युपसंहरति तस्मादिति।
पूर्वावस्थानाशेनावस्थान्तरं परिणामः यथा दुग्धस्य दधिभावः पूर्वरूपानुपमर्देनावस्थान्तरं विवर्तः यथा शुक्तेः रजतभावः तत्रब्र
ह्मणो विवर्तोपादानत्वं स्वमतसिद्धं दृष्टान्तेन दृढयन्मायावादं स्फुटयति सूत्रकारः आत्मनि चेति रथयोगाश्वाः किंच कृत्स्नप्र
सक्त्यादीनां सांख्यादिपक्षेपि दोषत्वान्नास्माकमनुशोचनीयत्वं यश्चोभयोः समो दोष इतिन्यायादित्याह सूत्रकारः स्वपक्षेति प्रधा
नस्य निरवयवत्वे कृत्स्नप्रसक्तिः सावयवत्वे च निरवयवत्वाभ्युपगमविरोध इत्यत्र शाकेन नन्विति किं साम्यावस्था गुणानां विकारः

वाचारंभणमात्रत्वाच्चाविद्याकल्पितेन नामरूपभेदेनेति न निरवयवत्वं ब्रह्मणः कुप्यति नचेयं परिणामश्रुतिः परिणाम
प्रतिपादनार्था तत्प्रतिपत्तौ फलानवगमात् सर्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था त्वेषा तत्प्रतिपत्तौ फलाव
गमात् स एष नेति नेत्यात्मेत्युपक्रम्याभयं वै जनक प्राप्तोसीति तस्मादस्मत्पक्षे न कश्चिदपि दोषप्रसंगोस्ति आत्मनि चै
वं विचित्राश्च हि २८ अपि चैनेवात्र विवदितव्यं कथमेकस्मिन्ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः स्यादिति यत
आत्मन्यप्येकस्मिन्स्वप्नदृशि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः पठ्यते न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्
रथयोगान्पथः सृजत इत्यादिना लोकेपि देवादिषु मायाव्यादिषु च स्वरूपानुपमर्देनैव विचित्रा हस्त्यश्वादिसृष्टयो दृश्यन्ते तथैक
स्मिन्नपि ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिर्भविष्यतीति स्वपक्षदोषाच्च २९ परेषामप्येष समानः स्वपक्ष
दोषः प्रधानवादिनोपि हि निरवयवमपरिच्छिन्नं शब्दादिहीनं प्रधानं सावयवस्य परिच्छिन्नस्य शब्दादिमतः कार्यस्य का
रणमिति स्वपक्षेपि कृत्स्नप्रसक्तिर्निरवयवत्वात्प्रधानस्य प्राप्नोति निरवयवत्वाभ्युपगमकोपो वा ननु नैवैते निरव
यवं प्रधानमभ्युपगम्यते सत्त्वरजस्तमांसि त्रयो गुणास्तेषां साम्यावस्था प्रधानं तैरेवावयवैस्तत्सावयवमिति नैवंजातीय
केन सावयवत्वेन प्रकृतो दोषः परिहर्तुं पार्यते यतः सत्त्वरजस्तमसामप्येकैकस्य समानं निरवयवत्वं एकैकमेव चेतर
द्वयानुगृहीतं सजातीयस्य प्रपंचस्योपादानमिति समानत्वात्स्वपक्षे दोषप्रसंगस्य तर्काप्रतिष्ठानात्सावयवमेवेति

आत्मनि चैवं विचित्राश्च हि

समुदायो वा आद्ये तस्यानवस्थलप्रकृतित्वं विकारत्वात् द्वितीये प्रागेवाभावः समुदायस्यावस्तुत्वेन स्वलाभाभावात् अथ निरवयवा गुणा
एव विविधपरिणामानां प्रकृतिरिति चेत्तर्हि कृत्स्नप्रसक्तेः समूलोच्छेदो दुर्वार इत्यभिप्रेत्य परिहरति नैवमित्यादिना इतियत्त अतः स
मानत्वाच्चावयवपर्यनुयोज्यादित्यन्वयः प्रत्येकं सत्त्वादिकमितरगुणद्वयसचिवं निरवयवं यद्युपादानं तर्हि कृत्स्नस्योपादानस्य कार्य
रूपप्रसक्तेः समूलोच्छेद इत्युक्ते निरवयवत्वसाधकतर्कस्याभासत्वाद्गुणानां सावयवत्वमेव परिणामित्वेन सादिवदतो न कृत्स्न
प्रसक्तिरेकदेशपरिणामसंभवादिति शाकेन तर्केति एतद्दोषाभावेपि दोषान्तरं स्यादिति परिहरति एवमपीति ॥ ॥

पा०भा०
द्वि०प्र०
२८

न्नत्राणानामेव यथाकालं तत्तदारंभकत्वं भवेदिति किं तत्कार्यवैचित्र्यानुमितानंतनंताः शक्तयः स्वीकार्या मायिकशक्तिभिर्ब्रह्मणः
पिसावयवत्वं तत्स्यादित्याह अपेत्यादिना अणुवादेपि दोषसाम्यमाह तथेति सांख्यवद्दोषः समानइति संबंधः निरवयवयोः
परमाण्वोः संयोगः व्याप्य वर्त्तते अव्याप्य वर्त्तते वा आद्ये तत्कार्यं संघात एकदेशेन परमाणुमात्रत्वापातः प्रथिम्नोऽधिकपरिमाणा
नामनुपपत्तेः नचाणोः एकदेशेन पर्यायः पार्श्वतश्च व्याप्नोतीति नाधिकद्रव्यं संभवतीति द्वितीये परमाण्वोः सावयवत्वापातिरित्यर्थः न
न्वेवं तवेदानीं कृत्स्नत्वमपि चोदयितव्यं दोषसाम्याद्विरपेक्षेत्तत आह परिहृतत्वमिति उक्तं हि मायावादे स्वप्नवत्सर्वसामंजस्यं अ

सर्वकामः सर्वगंधः

अयुगाक्रमयएव कार्यवैचित्र्यस्य चिंताश्रवयवावन्तंभिप्रायः नास्ति ब्रह्मवादिनोऽपि विशेषः तथा णुवादिनोपि
एवं तत्त्वेण संयुज्यमानो निरवयवत्वाद्यदि कार्त्स्न्येन संयुज्येत ततः प्रथिमानुपपत्तेरणुमात्रत्वप्रसंगः अथैक
देशेन संयुज्यते तथापि निरवयवत्वाभ्युपगमकोपइति स्वपक्षेपि समान एव दोषः समानत्वाच्चनान्यतरस्मिन्न
देवैते सवाच्योभवति परिहृतस्तु ब्रह्मवादिना स्वपक्षे दोषः सर्वोपेता च तद्दर्शनात् २८ एकस्यापि ब्रह्मणो वि
चित्रशक्तियोगादुपपद्यते विचित्रो विकारः प्रपंचइत्युक्तं तत्पुनः कथमवगम्यते विचित्रशक्तियुक्तं परं ब्रह्मेति त
दुच्यते सर्वोपेता च तद्दर्शनात् सर्वशक्तियुक्ता च परा देवतेत्यभ्युपगंतव्यं कुतः तद्दर्शनात् तथाहि दर्शयति श्रु
तिः सर्वशक्तियोगं परस्या देवतायाः सर्वकर्मा सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः सत्यकामः सत्यसंकल्पो यः
सर्वज्ञः सर्ववित् एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इत्येवंजातीयका विकरणत्वा
न्नेति चेत्तदुक्तं ३० स्यादेतत् विकरणां परां देवतां शास्ति शास्त्रमचक्षुष्कमश्रोत्रमवागमना इत्येवंजातीयकं कथं सा
सर्वशक्तियुक्तापि सती कार्याय प्रभवेत् देवादयो हि चेतनाः सर्वशक्तियुक्ता अपि संत आध्यात्मिककार्यकारणसंप
न्ना एव तस्मै कार्याय प्रभवंतो विज्ञायंते कथं च नेति नेतीति प्रतिषिद्धसर्वविशेषाया देवतायाः सर्वशक्तियोगः सं
भवेदिति चेत् यदत्र वक्तव्यं तत्पुरस्तादेवोक्तं श्रुत्यवगाह्यमेवेदमतिगंभीरं ब्रह्म न तर्कावगाह्यं नच यथैकस्य सा
मर्थ्यं दृष्टं तथान्यस्यापि सामर्थ्येन भवितव्यमिति नियमोस्तीति प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगः
संभवतीत्येतदप्यविद्याकल्पितरूपभेदोपन्यासेनोक्तमेव तथा च शास्त्रं अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणो
तो निरवयवे ब्रह्मणि समन्वयस्याविरोध इति सिद्धम् सर्वोपेता मायाशक्तिमतो ब्रह्मणो जगत्सर्गो वदतः समन्वयस्य शारीरस्य नमा
येतिन्याये न विरोधोस्ति न वेति संदेहे हेत्वाभासानाभासत्वादस्तीति पूर्वपक्षे सर्वोक्तशक्तिमत्त्वसमर्थनादेकविषयत्वसंगतिं वदन् सि
द्धांतसूत्रं व्याचष्टे एकस्यापीत्यादिना पूर्वोत्तरपक्षयोर्विरोधाविरोधौ फलमिति स्फुटमेवापादसमाप्तेरवगंतव्यं अभ्यात्तः अभितो व्याप्तः
सं अवाकी वाकिंद्रियशून्यः अनादरो निष्कामः एवं पूर्वपक्षन्यायमनूद्य दूषयति विकरणत्वादिति देवादिचेतनानां शक्ता।
नामपि देहाभिमानेन तत्त्वे वक्तव्ये दृष्टं तदभावे सुषुप्ते तन्न दृष्टं अतो ब्रह्मणः प्राणाद्यपि देहत्वाभावे कर्तृत्वे नादेहस्य शक्तिसंभव

प्रयोजनवत्त्वात् इत्यस्मात् ब्रह्मणः जगत्सर्गवदन्तम् अन्वयो विषयः तत्किमभिन्नं चेतनेनायं सनिष्फलं वस्तु न रचयतीति न्यायेन विरुध्यते न वेति सन्देहे पूर्वं मन्देहस्यापि श्रुतिबलाच्छक्तत्वेनाक्षाकर्तृत्वमुक्तं न दातृत्वपक्षे गत्या पूर्वपक्षः तत्र व्याचष्टे अन्यथेत्यादिना ईश्वरस्य फलाभावेऽपि परप्रयोजनायास्पष्टा प्रवृत्तिरस्त्वित्याशंक्य श्रुतिमाह भवति चेति याप्रेक्षावत्प्रवृत्तिः सा स्वफलार्थेति लोकप्रसिद्धिः न च दयालुप्रवृत्तौ व्यभिचारस्तस्यापि परदुःखासहनप्रयुक्तस्वचित्तव्याकुलत्वनिवृत्त्यर्थत्वादिति भावः किं च गुरुतरायासस्य फलं वाच्यमित्याह गुरुतरेति न हीश्वरस्यापि प्रवृत्तिः स्वार्थेत्युक्तमाह यदीयमपीति अस्वार्थत्वे प्रवृत्त्यभावमाह स्वेति

अन्यथा पुनश्चेतनकर्तृकं जगत् प्रतिपत्ति न खलु चेतनः परमात्मेदं जगद्बिंबं विरचयितुमर्हति अतः प्रयोजनवत्त्वात्प्रवृत्तीनां चेतनो हि लोके बुद्धिपूर्वकारी पुरुषः प्रवर्तमानो न मन्दोपक्रमामपि तावत्प्रवृत्तिमात्मप्रयोजनानुपयोगिनीमारभमाणो दृष्टः किमुत गुरुतरसंरंभां भवति च लोकप्रसिद्ध्यनुवादिनी श्रुतिः न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवतीति गुरुतरसंरंभा चेयं प्रवृत्तिः यदुच्चावचप्रपंचं जगद्बिंबं विरचयितव्यं यदीयमपि प्रवृत्तिः चेतनस्य परमात्मनः आत्मप्रयोजनोपयोगिनी परिकल्प्येत परितृप्तत्वं परमात्मनः श्रूयमाणं बाध्येत प्रयोजनाभावे वा प्रवृत्त्यभावोऽपि स्यात् अथ चेतनोऽपि सन्नुन्मत्तो बुद्ध्यपराधादन्तरेणैवात्मप्रयोजनं प्रवर्तमानो दृष्टस्तथा परमात्मापि प्रवर्तिष्यत इत्युच्येत तथा सति सर्वज्ञत्वं परमात्मनः श्रूयमाणं बाध्येत तस्मादश्लिष्टा चेतनात्सृष्टिरिति लोकवत्तु लीलाकैवल्यं ३३ तुशब्देनाक्षेपं परिहरति यथा लोके कस्यचिदाप्तैषणस्य राज्ञो राजामात्यस्य वा व्यतिरिक्तं किंचित्प्रयोजनमनभिसंधाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवंति यथा चोच्छ्वासप्रश्वासादयोऽनभिसंधाय बाह्यं किंचित्प्रयोजनं स्वभावादेव संभवंति एवमीश्वरस्याप्यनपेक्ष्य किंचित्प्रयोजनांतरं स्वभावादेव केवलं लीलारूपा प्रवृत्तिर्भविष्यति न हीश्वरस्य प्र

क्तः स्यादित्यर्थः ईश्वरः प्रेक्षावान्न भवतीत्याशंक्य श्रुतिविरोधमाह अथेत्यादिना बुद्धेरपराधो विवेकाभावः उक्तन्यायस्य राज्ञां लीलायां व्यभिचार इति सिद्धान्तसूत्रं व्याचष्टे तुशब्देनेति व्यतिरिक्तं लीलातिरिक्तं क्रीडारूपविहारा येषु रम्यदेशेषु तेष्वित्यर्थः कदाचिद्राजादीनां लीलायामपि किंचित्फलं सुखोल्लासादिकं संभाव्येत न पायिनिश्वासादौ प्रेक्षावत्प्रवृत्तित्वमस्ति न तत्र स्वस्य तत्रोद्देशफलं किंचिदस्तीति व्यभिचारस्थलांतरमाह यथा चेति प्राणस्य स्वभावस्थत्वं प्रारब्धं वोच्छ्वासादिहेतुरीश्वरस्य स्वभावः कालकर्मसहितमाया न तु ईश्वरस्य जगद्रचनायाः केवललीलात्वं किमित्युच्यते फलमेव किंचित्कल्प्यतां तत्राह न हीति आप्तकामत्वव्याघातादित्यर्थः ॥ ॥ ॥ ॥

नन्वीश्वरस्य लीला किमिति न तिष्ठति किमिति स्वस्य फलापेक्षा परेषां दुःखाय हा सृष्टिं करोतीति तत्राह न च स्वभाव इति कालकर्मादिसामग्र्यां
सत्यां सृष्टेः परिहार्यत्वादित्यर्थः यदुक्तं गुरुतरायासत्वात्फलं वाच्यमिति तत्र हेत्वसिद्धिमाह यद्यपीत्यादिना अल्पप्रवृत्तेरपि फलं
वाच्यं लोके तथादर्शनादित्यादितर्कस्यागमबाधमाह यदि नामेति सृष्टिश्रुतेरप्रवृत्तिर्नास्ति सर्वज्ञत्वश्रुतेरन्ततानानात्वीतिविभागः।
स्वप्नसृष्टिवदस्याः सृष्टेर्मायामात्रत्वात्फलापेक्षेत्याह न चेयमिति न च निष्फलसृष्टिश्रुतीनामानर्थक्यं आत्मैकत्वफलब्रह्मधीशेषत्वेना।
नार्थक्यादित्युक्तं न विस्मर्तव्यमित्यर्थः वैषम्यनैर्घृण्ये नेति निर्दोषाद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो विषयः स किं योविषमका

न च स्वभावः पर्यनुयोक्तुं शक्यते यथा प्रसाकमिन्य जगति उन्मत्तप्रवृत्तिरचनात्सर्गमेवाभातीति तथापि परमेश्वरस्य लीलैव केवलेयं
मपरिमितशक्तित्वात् यदि नाम लोके लीलास्वपि किंचित्सूक्ष्मं प्रयोजनमुत्प्रेक्ष्येत तथापि नैवात्र किंचित्प्रयोजनमुत्प्रेक्षि
तुं शक्यते आप्तकामश्रुतेः नाप्यप्रवृत्तिर्वा सृष्टिश्रुतेः सर्वज्ञश्रुतेश्च न चेयं परमार्थविषया सृष्टिश्रुतिः अविद्याकल्पितना
मरूपव्यवहारगोचरत्वात् ब्रह्मात्मभावप्रतिपादनपरत्वाच्चेत्येतदपि नैव विस्मर्तव्यं वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि द।
र्शयति ३४ पुनश्च जगज्जन्मादिहेतुत्वमीश्वरस्याक्षिप्यते स्थूणानिखनननन्यायेन प्रतिज्ञातस्यार्थस्य दृढीकरणायेश्वरो
जगतः कारणमुपपद्यते कुतः वैषम्यनैर्घृण्यप्रसङ्गात् कांश्चिदत्यन्तसुखभाजः करोति देवादीन् कांश्चिदत्यन्तदुःखभाजः पश्वादी
न् कांश्चिन्मध्यमभोगभाजो मनुष्यादीनित्येवं विषमां सृष्टिं निर्मिमाणस्येश्वरस्य पृथग्जनस्येव रागद्वेषोपपत्तेः श्रुतिस्मृत्य
वधारितस्वच्छत्वादीश्वरस्वभावविलोपः प्रसज्येत तथा खलजनैरपि जुगुप्सितं निर्घृणत्वमतिक्रूरत्वं दुःखयोगविधानात्सं
र्वप्रजासंहाराच्च प्रसज्येत तस्माद्वैषम्यनैर्घृण्यप्रसङ्गान्नेश्वरः कारणमिति एवं प्राप्ते ब्रूमः वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्येते
कस्मात् सापेक्षत्वात् यदि हि निरपेक्षः केवल ईश्वरो विषमां सृष्टिं निर्मिमीते स्यातामेतौ दोषौ वैषम्यं नैर्घृण्यं च न तु निरपेक्षस्य
निर्मातृत्वमस्ति सापेक्षो हीश्वरो विषमां सृष्टिं निर्मिमीते किमपेक्षत इति चेत् धर्माधर्मावपेक्षत इति वदामः अतः सृ।
ज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिरिति नायमीश्वरस्यापराधः ॥ ॥ गतः ॥

ईशे दोषवानिति न्यायेन विरुध्यते न वेति संदेहे सर्वत्र लीलया यत्स्रष्टृत्वमुक्तं तदेव कर्मादिसापेक्षत्वं न युक्तं अनीश्वरत्वापत्ते
र्निरपेक्षत्वे रागादिदोषापत्तेरित्याक्षेपसङ्गत्या पूर्वपक्षयति पुनश्चेत्यादिना ब्रह्मैव जगत्कारणमिति जन्मादिसूत्रे प्रतिज्ञातो।
र्थः एष ज्ञनः पापमत्र निरवद्यं निरञ्जनमिति श्रुतिः न मे द्वेष्योऽस्ति न प्रिय इति स्मृतिः स्वच्छत्वादीत्यादिपदेन कूटस्थत्वग्रहः
स्वच्छत्वादिरूपा तावदीश्वरस्वभावश्च इति विग्रहः निमित्तमनपेक्ष्य विषमकारित्वे वैषम्यादिदोषः स्यात्तत्त्वनपेक्षत्वमीश्वर
स्यास्तीति सिद्धान्तयतीति एवं प्राप्ते इत्यादिना न च सापेक्षत्वेनेश्वरत्वं ते वामपेक्ष्य फलदातुरीश्वरत्वानपायात् ॥

ननु तर्हि धर्माधर्माभ्यामेव विचित्रा सृष्टिरस्तु किमीश्वरेणेत्यत आह ईश्वरस्तु पर्जन्यवदिति साधारणहेतुः सहितस्यैवासाधार-
णहेतोः कार्यकारित्वादीश्वरवैषम्यं अन्यथा पर्जन्यस्यैव वैषम्यप्रसंगादिति भावः यं जनमुन्निनीषत ऊर्ध्वं नेतुमिच्छति तेन साधुकार-
यति एष ईश्वर इत्यन्वयः न च कंचिज्जनं साधुं कंचिदसाधुं कर्म कारयतो वैषम्यं तदवस्थमिति वाच्यं अनादिपूर्वार्जितसाध्व-
साधुवासनया स्वभावेन जनस्य तत्तत्कर्मसु प्रवृत्तावीश्वरस्य साधारणहेतुत्वादतो न वैषम्यमीश्वर इति भावः प्रथमसर्गस्य वैषम्य-
हेतुकर्माभावादेकरूपत्वं स्यात् तथा तु इतरकल्पानामपीत्याशंक्य समाधत्ते सूत्रकारः नकर्मेति प्रथमसर्गे पश्चाद्भाविकर्म-
कृतं वैषम्यमित्याशंक्यानेनाभ्युपगमाह सृज्यत इति आद्यसृष्टिविस्तृपलक्षणं आदावेकरूपत्वे मध्ये विषमकर्मोत्पत्तौ

ईश्वरस्तु पर्जन्यवद्द्रष्टव्यः यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं भवति व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवासाधा-
रणानि सामर्थ्यानि कारणानि भवन्ति एवमीश्वरो देवमनुष्यादिसृष्टौ साधारणं कारणं भवति देवमनुष्यादिवैषम्ये तु तत्तज्जी-
वगतान्येवासाधारणानि कर्माणि कारणानि भवन्त्येवमीश्वरः सापेक्षत्वान्न वैषम्यनैर्घृण्याभ्यां दुष्यति कथं पुनरवगम्यते
सापेक्ष ईश्वरो नीचमध्यमोत्तमं संसारं निर्मिमीत इति तथा हि दर्शयति श्रुतिः एष ह्येव साधु कर्म कारयति तं यमेभ्यो लो-
३४ केभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इति पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति
च स्मृतिरपि प्राणिकर्मविशेषापेक्षमेवेश्वरस्यानुगृहीतृत्वं निग्रहीतृत्वं च दर्शयति ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह-
मित्येवंजातीयका न कर्माविभागादिति चेन्नानादित्वात् ३५ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति प्राक्सृष्टे-
रविभागावधारणान्नास्ति कर्म यदपेक्ष्य विषमा सृष्टिः स्यात् सृष्ट्युत्तरकालं हि शरीरादिविभागापेक्षं कर्म कर्मापेक्षश्च शरी-
रादिविभाग इतीतरेतराश्रयत्वं प्रसज्येत अतो विभागादूर्ध्वं कर्मापेक्ष ईश्वरः प्रवर्ततां नाम प्राग्विभागाद्वैचित्र्यनिमित्तस्य कर्म-
णोऽभावात्तुल्यैवाद्या सृष्टिः प्राप्नोतीति चेत् नैष दोषोऽनादित्वात्संसारस्य भवेदेष दोषो यद्यादिमान्संसारः स्यात् अनादौ तु
हेतु४ संसारे बीजांकुरवद्धेतुहेतुमद्भावेन कर्मणः सर्गवैषम्यस्य च प्रवृत्तिर्न विरुध्यते कथं पुनरवगम्यते अनादिरेष संसार इत्य-
त उत्तरं पठति उपपद्यते चाप्युपलभ्यते च ३६ उपपद्यते च संसारस्यानादित्वं आदिमत्त्वे हि संसारस्याकस्मादुद्भूतेर्मुक्ता-
नामपि पुनः संसारोद्भूतिप्रसंगोऽकृताभ्यागमप्रसंगश्च सुखदुःखादिवैषम्यस्य निर्निमित्तत्वात् न चेश्वरो वैषम्यहेतुरि-
वा। त्युक्तं न चाविद्या केवला वैषम्यस्य कारणमेकरूपत्वात् रागादिक्लेशवासनाक्षिप्तकर्मापेक्षा त्वविद्या वैषम्यकरी स्यात्

हेतुभावेनोत्तरसृष्टीनामपि तुल्यत्वस्य दुर्वारत्वादिति द्रष्टव्यं परिहारः सुगमः प्रथमसर्गः कश्चिन्नास्तीत्यत्र प्रमाणं पृच्छति
कथं पुनरिति उपपत्तिसहितश्रुत्यादिकं प्रमाणमिति सूत्रव्याख्यया दर्शयति उपपद्यत इति हेतुं विनैव तत्र गामीकारे ज्ञानक-
र्मकांडवैयर्थ्यं स्यादिति भावः ननु सुखादिवैषम्ये ईश्वरोऽविद्या वा हेतुरस्त्वित्याशंक्य क्रमेण दूषयति न चेश्वर इत्यादिना का
तर्हि हेतुरत्राह रागादीति रागद्वेषमोहाः क्लेशास्तेषां वासनाभिराक्षिप्तानि कर्माणि धर्माधर्मव्यामिश्ररूपाणि तदपे-
क्षात्वविद्यास्त्वादिसर्गवैचित्र्यहेतुः तस्मादविद्यासहकारित्वेन क्लेशकर्मणामनादिप्रवाहोऽङ्गीकर्तव्य इति भावः ॥

किं च सृष्टेः सादित्वे प्रथमशरीरस्योत्पत्तिर्न संभवति हेत्वभावात् न च कर्म हेतुः शरीरात् प्राक् कर्मासंभवात् तस्मात् कर्मशरीरयोः
अन्योन्याश्रयपरिहाराय सर्वैर्वेदवादिभिः संसारस्यानादित्वमङ्गीकार्यमित्याह न चेति सर्गमध्ये स्थूलदेहस्यादौ प्राग्धारितप्राणो
पित्वेन्यप्राणनाभाविधारणनिमित्तेन जीवशब्देनोच्यतामित्यत आह न च धारयिष्यतीति गृहस्थः इष्टीं भार्यामुपेयादित्यादि
वगत्या भाविवृत्त्याश्रयणमिति भावः असत्समानत्वात्स्वरूपसत्त्वं मिथ्यावस्तु पटे शाविनानोपलभ्यते ज्ञानं विनाऽतोऽपि ना
लिनाप्यादिरुपलभ्यते अस्मत्वादेकत्वस्य प्रतिपन्नमध्यास्थितिः इष्टस्वरूपत्वादिति गीतावाक्यार्थः संसारस्यानादि
त्वे मिथ्यात्वादेकैवाद्वितीयमित्यवधारणमनुपपन्नं तस्मान्निरवद्ये ब्रह्मणि समन्वयाविरोध इति सिद्धं सर्वधर्मोपपत्ते
श्च निर्गुणं ब्रह्म जगदुपादानत्ववादिवेदान्तसमन्वयाविरुद्धः सक्रियत्वनिर्गुणत्वोपादानेन यथा रूपमिति न्याये न वि
रोधे न च कर्मान्तरेण शरीरं संभवति न च शरीरमन्तरेण कर्म संभवतीतीतरेतराश्रयत्वप्रसंगः अनादित्वे तु बीजांकुरन्या
येनोपपत्तेः न कश्चिद्दोषो भवति उपलभ्यते च संसारस्यानादित्वं श्रुतिस्मृत्योः श्रुतिस्तावदनेन जीवेनात्मनेति स
र्गप्रमुखे शारीरमात्मानं जीवशब्देन प्राणधारणनिमित्तेनाभिलपन्ननादिः संसार इति दर्शयति आदिमत्वे तु प्रागधारितप्राणः
कथं प्राणधारणनिमित्तेन जीवशब्देन सर्गप्रमुखेऽभिलप्यते न च धारयिष्यतीत्यतोऽभिलप्यते अनागताद्धि संबन्धाद
तीतसंबन्धो बलवान्भवति अभिनिष्पन्नत्वात् सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति च मन्त्रवर्णः पूर्वकल्पस
द्भावं दर्शयति स्मृतावप्यनादित्वं संसारस्योपलभ्यते न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठेति
पुराणे चातीतानामनागतानां च कल्पानां न परिमाणमस्तीति स्थापितं सर्वधर्मोपपत्तेश्च ३७ चेतने ब्रह्मणि जगतः कारण
प्रकृतिश्चेत्यस्मिन्नवधारिते वेदार्थे परैरुपक्षिप्तान्विलक्षणत्वादीन्दोषान्पर्यहार्षीदाचार्यः इदानीं परपक्षप्रतिषे
धप्रधानं प्रकरणं प्रारिप्समानः स्वपक्षपरिग्रहे प्रधानं प्रकरणमुपसंहरति यस्मादस्मिन्ब्रह्मणि कारणे परिगृह्य
माणे प्रदर्शितेन प्रकारेण सर्वे कारणधर्मा उपपद्यन्ते सर्वज्ञं सर्वशक्तिमहामायं च ब्रह्मेति तस्मादनतिशङ्कनीयमिदमौ
पनिषदं दर्शनमिति इति शारीरकमीमांसाभाष्ये श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशंकरभगवत्पूज्यपादकृतौ
रुध्यते न वेति सदेहे भवन्ती स्वरसविषसृष्टिनिमित्तत्वं तत्प्रयोजकस्य कर्मणः सत्त्वान्न तूपादानत्वं तद्व्यापकस्य सत्ता
णत्वस्याभावादिति प्रत्युदाहरणेन प्राप्ते सिद्धान्तसूत्रतात्पर्यमाह चेतनमिति विवर्तोपादानत्वनिरूपणस्याप्यविरुद्धं अ
त्तानत्वसत्त्वमधिष्ठानत्वप्रयोजकस्य सत्त्वात्तद्गुणत्वव्यापके शब्दादिगुणो विनसत्वान्मदर्पीनादिति भावः यद्य
पि सर्वज्ञत्वे सर्वशक्तित्वं च लोके कारणधर्मत्वेन प्रसिद्धं तत्पापियोऽयस्य कर्ता स तस्य सर्वस्य ज्ञाता पाकस्येति प्रसिद्धं इत्य
रस्यापि सर्वकर्तृत्वं अवगतं यस्मिन्सिद्धान्तसारेण ध्यानविरतिशायसर्वज्ञत्वसर्वशक्तित्वं च सिध्यतीत्यभिसंधायाह सर्वशा
ति महामायमिति कर्तृत्वोपादानत्वकथनेन सर्वशोकापकर्तालनायोक्ते तस्माद्दोषपरिहारसिद्धेन कश्चिद्दोष इति सिद्धं ॥

ॐ श्रीगणेशाय नमः ॥ सांख्यतार्किकबौद्धार्हज्जैनाः पाशुपतादयः ॥ यस्तत्त्वं न जानन्ति तं वन्दे रघुपुंगवं ॥ १ ॥ ब्रह्मणि तत्त्वं यथानो-
पपत्तिर्व्यवधानेपि तदुपपत्तिमाशंक्य निराचष्टे ॥ रचनेति ॥ ननु समन्वयलक्षणे वाक्यार्थनिर्णयप्रतिबन्धनिरासाय वेदान्तानां तात्पर्य-
निश्चितत्वमिदं शास्त्रमारब्धं तच्च निर्दोषतया निश्चितं ततः परपक्षनिरासात्मकोयं पादो सिद्धान्तत्वेन संगतः तन्निरासस्य समन्वयलक्षणा-
पेक्षितत्वादित्याशंक्याह यद्यपीति परपक्षनिराकरणं विना स्वपक्षस्य याथायोगात्तत्कर्तव्यमित्याह तथापीति नहि स्वपक्षस्थाप-
नाभ्यागेव परपक्षप्रत्याख्यानं कार्यमित्यत आह वेदान्तार्थेति वेदान्ततात्पर्यनिर्णयस्य फलं च ज्ञानं करणं तदभावादभ्यर्हितं ।
नेन न तु रागद्वेषकरत्वात्परमतनिराकरणं न कार्यमिति शंकते नन्विति नन्वनिर्णयप्रधानाख्यवलियेकथाख्यातन्तत्त्वनिर्णयस्त्रपरमे-

ॐ श्रीगणेशाय नमः ॥ रचनानुपपत्तेश्च नानुमानं ॥ १ ॥ यद्यपीदं वेदान्तवाक्यानामैदंपर्यं निरूपयितुं शास्त्रं प्रवृत्तं न तर्कैः
शास्त्रवत्केवलाभिर्युक्तिभिः केचित्सिद्धान्तं साधयितुं दूषयितुं वा प्रवृत्तं तथापि वेदान्तवाक्यानि व्याचक्षाणैः सम्यग्दर्शन-
प्रतिपक्षभूतानि सांख्यादिदर्शनानि निराकरणीयानीति तदर्थः परः पादः प्रवर्तते वेदान्तार्थनिर्णयस्य सम्यग्दर्श-
नार्थत्वात् निर्णयेन स्वपक्षस्थापनं प्रथमं कृतं तद्ध्यभ्यर्हितं परपक्षप्रत्याख्यानादिति ननु मुमुक्षूणां मोक्षसाधन-
त्वेन सम्यग्दर्शननिरूपणाय स्वपक्षस्थापनमेव केवलं कर्तुं युक्तं किं परपक्षनिराकरणेन परद्वेषकरेण बाढमेवं तथापि
महाजनपरिगृहीतानि महान्ति सांख्यादितन्त्राणि सम्यग्दर्शनापदेशेन प्रवृत्तान्युपलभ्य भवेत्केषांचिन्मन्दमती-
नामेतान्यपि सम्यग्दर्शनायोपादेयानीत्यपेक्षा तथा युक्तिगाढत्वसंभावनया सर्वज्ञभाषितत्वाच्च श्रद्धा चेत्यतस्तदसा-
रतोपपादनाय प्रयुज्यते ननु ईक्षतेर्नाशब्दं कामाच्च नानुमानापेक्षा एतेन सर्वे व्याख्याता इति च एवं चापि सांख्यादिपक्षप्र-
तिक्षेपः कृतः किं पुनः कृतकरणेनेति तदुच्यते सांख्यादयः स्वपक्षस्थापनाय वेदान्तवाक्यान्युदाहृत्य स्वपक्षानुगु-
णेनैव योजयन्तो व्याचक्षते तेषां यद्व्याख्यानं तद्व्याख्यानाभासं न सम्यग्व्याख्यानमित्येतावत्पूर्वं कृतमिह तु वाक्यनिरपे-

क्षश्रद्धां विना न सिध्यति सा च तेषु भ्रान्तिमूलत्वनिश्चयं विना न सिध्यतीति स चेमं पादं विना नेति स्वसिद्धान्तसंरक्षणार्थत्वात्प्रधान-
सिध्यर्थत्वाच्चास्य पादोस्मिन्नध्याये संगतः संगतत्वाद्धीनतरेणापि कर्तव्य इत्यभिसंधायांगीकारेण समाधत्ते बाढमित्यादि-
ना अपदेशेन व्याजेन मन्दमतीनां तेषु श्रद्धानिमित्तानि बहूनि सन्तीति तन्निरासाय यत्नः क्रियत इत्यर्थः स्वमतश्रद्धापरम-
तद्वेषात्प्रधानसिद्ध्यर्थत्वादंगीकृतेनानापयं दोषः परपक्षबुद्ध्याद्विनिरासो द्वेषमावहति न तु तत्त्वनिर्णयेच्छया कृत इति
मन्तव्यं येन केनापि शंकते नन्वीक्षतेरिति एवं सांख्यादीनां अनुपपन्नग्राहकतर्कनिरासाच्छ्रौततत्त्वमुक्तं संप्रति श्रुत्यनपेक्षालदी

शा. टी.
द्वि.
२५

प्रधानचेतनं जगदुपादानमिति सांख्यसिद्धान्तोऽत्र विषयः स किं प्रमाणमूलो वेति संदेहे सर्वधर्मोपपत्तेश्चानुक्तधर्माणां प्रधाने
संभवान्नद्वेषोऽर्यदानमित्यादितेषु संगत्या प्रमाणमूलत्वं दर्शयन्पूर्वपक्षमाह तत्र सांख्या इति स्वसिद्धान्तज्ञानस्य परमतनिरा
सप्रत्ययजो व्याख्यात्रा दयोः संगतिः परमतनिरासात्मकत्वात्सर्वेषामधिकरणानामेतत्पादसंगतिः एवं पक्षे प्रमाणमूलमतः
विरोधाद्युक्तस्यापि समन्वयासिद्धिः फलं सिद्धान्ते तत्सिद्धिरिस्यापादद्वयं श्रौतसमन्वयदार्ढ्यार्थत्वादस्याश्रुतिसंगतिः
तिविवेकः भिद्यन्त इति भेदा विकाराः ये विकारा येनान्वितास्ते तत्प्रकृतिका इति व्याप्तिमाह यथेति सर्वं कार्यं सुखदुःखमो
हात्मकवस्तुप्रकृतिकं तदन्वितत्वात् घटवदित्यनुमानमाह तथेति किमर्थं प्रधानं परिणमते तत्राह चेतनस्येति अर्थो
भोगापवर्गरूपः तदर्थं स्वभावत एव प्रवर्तते न तु केनचिच्चेतनेन प्रेर्यत इत्यर्थः तदुक्तं पुरुषार्थ एव हेतुः न केनचित्कार्यते
करणमिति अनुमानान्तराणि तेषु कानि स्मारयति तथेति उक्तो हि भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च कार्यकारणवि

तत्र सांख्या मन्यन्ते यथा घटशरावादयो भेदा मृदात्मतान्वीयमाना मृदात्मकसामान्यपूर्वका लोके दृष्टाः तथा सर्व एव बा
ह्याध्यात्मिका भेदाः सुखदुःखमोहात्मतयान्वीयमानाः सुखदुःखमोहात्मकसामान्यपूर्वका भवितुमर्हन्ति यत्सुखदुः
खमोहात्मकं सामान्यं तत्त्रिगुणं प्रधानं मृद्वदचेतनं चेतनस्य पुरुषार्थं साधयितुं स्वभावेनैव विचित्रेण विकारा
त्मना विवर्तत इति तथा परिमाणादिभिरपि लिङ्गैस्तदेव प्रधानमनुमिमते तत्र वदामः यदि दृष्टान्तबलेनैव निरू
प्यते नाचेतनं लोके चेतनानधिष्ठितं स्वतन्त्रं किंचिद्विशिष्टपुरुषार्थनिर्वर्तनसमर्थान्विकारान्विरचयद्दृष्टं॥ ↑

भेदानां २

भागादविभागाद्वैश्वरूप्यस्येति अत्र कारिकायां समन्वयादिति लिङ्गं व्याख्यातं शिष्टानि व्याख्यायन्ते तथा हि हिमादीनां भेदानां
कारणमव्यक्तमस्ति परिमितत्वात् घटवत् न च दृष्टान्ते साध्यवैकल्यं घटोत्पत्तेः प्रागनभिव्यक्तघटादिरूपकार्यविशिष्टत्वेन
मृत्तोऽप्यव्यक्तत्वात् यावद्घटादीनां कारणशक्तितः प्रवृत्ते[illegible] मेरुपर्यादिकार्याणामपि
कारणशक्तितः प्रवृत्तिर्वाच्या तदुक्तं किमत्र कारणमव्यक्तं किं च कारणात्कार्यस्य विभागो जन्म तद्रूपेण हि तन्मृत्तिका जायते न
तु घट इति एवमविभागः प्रातिलोम्येन प्रलयादृष्टेऽपि नेदं घटस्य मृत्तिकायां लयः तस्यां तिरोहितत्वस्य अपां तेजसीत्येवं तो
विभागाविभागौ वैश्वरूप्यस्य विचित्रस्य भावजातस्य दृश्यमानौ एवं व्यक्तावेतौ क्वचित्कारणे विश्रान्तौ विभागत्वाच्च मृदादि
घटविभागाविभागवदित्यर्थः सिद्धान्तयति तत्र वदाम इति किमनुमानेः अचेतनप्रकृतिकत्वं जगतः साध्यते स्वतन्त्रा चे
तनप्रकृतिकत्वं वा आद्ये सिद्धसाधनता अस्माभिरनादित्रिगुणमायाङ्गीकारात् द्वितीये घटादिदृष्टान्ते साध्याप्रसिद्धिरित्या
ह यदीति स्वतन्त्रमचेतनं प्रकृतिरित्येन दृष्टान्तबलेन तदानिरूप्येत यदि दृष्टान्तः कश्चित्स्यान्न तु दृष्टः कश्चिदित्यन्वयः स्वतन्त्रप

परकीयस्य साध्यस्याप्रसिद्धिमुक्त्वा तन्मतिपक्षं वक्तुं यद्धि विचित्ररचनात्मकं कार्यं तच्चेतनाधिष्ठिताचेतनप्रकृतिकमिति व्याप्तिमा
ह गेहेति इदं जगच्चेतनाधिष्ठिताचेतनप्रकृतिकं कार्यत्वात् गेहवदिति प्रयोगः विपक्षे विचित्ररचनानुपपत्तिरूपं सद्वोक्तं
बाधकं तर्कं वक्तुं जगतो वैचित्र्यमाह नयेति बाह्यपृथिव्यादि भोग्यम् आध्यात्मिकं शरीरादि च भोगाधिष्ठानमिति विभागः प्रति
नियतासाधारणावयवानां विन्यासो रचना यस्य तदित्यर्थः ईदृशं विचित्रं जगच्चेतनानाधिष्ठिता जडप्रकृतिः कथं रचयेत् कथम
पीत्यर्थः यच्चेतनानधिष्ठितमचेतनं तन्न कार्यकारीति व्याप्तिमुक्त्वा तर्कमूलं लभ्यं नामाह लोष्टेति चेतनाः प्रेरितेषु लोष्ठादिषु का
र्यकारित्वाद्दर्शनादित्यर्थः किं च नाद्यजडप्रकृतिः चेतनाधिष्ठिता परिणामित्वान्मृदादिवदित्याह मृदिति ननु मृदादिदृष्टा
न्ते द्वयमप्यस्ति अचेतनत्वं चेतनाधिष्ठितत्वं चेति तत्र परिणामित्वे हेतोरचेतनत्वमेव व्यापकं मृदादिस्वरूपत्वेनान्तरंगत्वात् ननु चेतना

गेहप्रासादशयनासनविहारभूम्यादयो हि लोके प्रज्ञावद्भिः शिल्पिभिर्यथाकालं सुखदुःखप्राप्तिपरिहारयोग्याः रचिता
दृश्यन्ते तथेदं जगदखिलं पृथिव्यादि नानाकर्मफलोपभोगयोग्यं बाह्यमाध्यात्मिकं च शरीरादि नानाजात्यन्वितं प्रति
नियतावयवविन्यासमनेककर्मफलानुभवाधिष्ठानं प्रज्ञावद्भिः संभावितमैः शिल्पिभिर्मनसाप्यालोचयितुम
शक्यं सत्कथमचेतनं प्रधानं रचयेत् लोष्टपाषाणादिष्वदृष्टत्वात् मृदादिष्वपि कुम्भकाराद्यधिष्ठितेषु विशिष्टाकार
रचना दृश्यते तद्वत् प्रधानस्यापि चेतनाधिष्ठितत्वप्रसंगः न च मृदाद्युपादानस्वरूपव्यपाश्रयेणैव धर्मेण मूलकार
णमवधारणीयं न बाह्यकुंभकाराद्यपाश्रयेणेति किंचिन्नियामकमस्ति न चैवं सति किंचिद्विरुध्यते प्रत्युत श्रुतिरनुगृ
ह्यते चेतनकारणसमर्पणात् अतो रचनानुपपत्तेश्च हेतोर्नाचेतनं जगत्कारणमनुमातव्यं भवति अन्वयाद्यनुपपत्तेश्चे
ति २ चशब्देन हेतोरसिद्धिं समुच्चिनोति न हि बाह्याध्यात्मिकानां भेदानां सुखदुःखमोहात्मकतयान्वय उपपद्यते सुखा

धिष्ठितत्वं व्यापकं न सम्भवति मृदादिवत् कुलालादिसापेक्षत्वेन बहिरंगत्वात् तथा च परिणामित्वेऽपि मूलप्रकृतेरचेतनत्वधर्मेणैव योगो
न चेतनाधिष्ठितत्वेनेत्याशंक्य निषेधति नचेति महानसदृष्टान्ते तदंगस्यापि महानसस्वरूपस्य धूमव्यापकत्वं नास्ति तद्भिन्नस्य बहिरं
गस्यापि वह्नेः स्वरूपत्वेन तदंगत्वं व्यापकत्वे प्रयोजकं न भवतीति भावः किं च पटश्चेतनं तच्चेतनाधिष्ठितमेव परिणमत इत्यसंगीकारे वा
धकाभावात् प्रत्युत श्रुत्यनुग्रहाच्च तथांगीकार्यमित्याह नचैवं सतीति सुखदुःखमोहान्वयादिति हेतोरसिद्धिद्योतनार्थः सु
खैवकारद्वित्याह अन्वयेति नानुमानं युक्तमित्यर्थः आदिपाकपरिमाणादिग्रहार्थः पाद्यादौ नावाप्त्यात्यानुभवादान्तरस्य
स्वाध्यात्मकत्वमसिद्धं तन्निमित्तत्वात् न हि निमित्तनैमित्तिकयोरभेदेन योगोऽस्ति दण्डघटयोरदर्शनादित्यर्थः ॥ राम ॥
मि।

५२

सा०भा० टि० टि० २६

किंचयदिघटेमहत्तत्त्वादिकंशब्दादावन्वितंस्यात्तर्हिसर्वैरविशेषेणमहत्त्वादिकमुपलभ्येतनचघटेमहत्त्वेनयोपलब्धिरस्तीतियो
ग्यानुपलब्ध्याहेत्वभावनिश्चयइत्याह शब्दादीति विषयस्यैकत्वेपिपुरुषवासनावैचित्र्यात्कस्यचित्सुखबुद्धिःकस्यचिद्दुःख
बुद्धिःकस्यचिन्मोहबुद्धिर्दृश्यतेतेनविषयाःसुखाद्यात्मकाननुभवन्तीत्यर्थः एवंसत्त्वाद्यादितिहेतुंदूषयित्वापरिमाणादितिहेतुं
दूषयति तथेति बुद्ध्यादीनांपरिमितत्वेनसंसर्गपूर्वकत्वसिद्धौसत्त्वस्थानेकानिसत्त्वरजस्तमांसिसिद्ध्यन्त्येकस्मिन्संसर्गा
संभवात्ब्रह्मसिद्धिरितिसांख्यस्वभावः किमिदंपरिमितत्वंनतावद्देशतःपरिच्छेदः पञ्चाननर्गताकाशेनतस्याभावेनभागासि
द्धेः नापिकालतःपरिच्छेदःसांख्यैः कालस्यानंगीकारात्अविद्यागुणसंसर्गेणासिद्धसाधनाच्चनापिवस्तुतःपरिच्छेदःस
त्त्वादीनांपरस्परंभिन्नत्वेसत्त्वपिसाध्याभावेनव्यभिचारादित्याह सत्त्वेति यद्वाकार्यकारणविभागोयत्रसमाप्यतेतत्प्रधा
नमितितत्रब्रह्मणिमायायांवासमाप्तिसंभवात्नचमायाकार्यस्यविभागःसचेतनानधिष्ठितोचेतनेसमाप्तइतिव्याप्तिरस्ति

विशेषाणामव्या हेतुः १

शब्दाद्यविशेषेपिचभावनाविशेषोपलब्धेः तथापरिमितानांभेदानांमृल्लांकुरादीनांसंसर्गपूर्वकत्वेदृष्टेपिबाह्या
ध्यात्मिकानांभेदानांपरिमितत्वात्संसर्गपूर्वकत्वमनुमिमानस्य सत्त्वरजस्तमसामपिसंसर्गपूर्वकत्वप्रसंगःपरि
मितत्वाविशेषात् कार्यकारणभावस्तुप्रेक्षापूर्वकनिर्मितानांप्रायतनासनादीनांदृष्टइतिनकार्यकारणभावाद्बा
ह्याध्यात्मिकानांभेदानामचेतनपूर्वकत्वंशक्यंकल्पयितुं प्रवृत्तेश्च रथ्यास्तावद्दिरचनात्सिध्यर्थायाप्र
वृत्तिःसाम्यावस्थानाप्रच्युतिःसत्त्वरजस्तमसामंगांगिभावरूपापत्तिर्विशिष्टकार्याभिमुखप्रवर्तिता ॥ ॥५

सर्वत्राचेतनेषुचेतनाधिष्ठानदर्शनादित्याह कार्येति एतेनाविभागोपिव्याख्यातः यत्तुयत्परिमितंतदव्यक्तप्रकृतिपूर्वक
मितिव्याप्येनतेनैतस्यापिगुणेष्वनादिषुपरिमितेषुव्यभिचारः एतेनसदृशयोरेवप्रकृतिविकारभावाद्रचेतनविकाराणाम
चेतनमेवप्रकृतिरितिनिरस्तंचेतनाधिष्ठिताचेतनप्रकृतिकत्वेपिसादृश्योपपत्तेः नविलक्षणत्वादित्यत्रसादृश्यनियम
स्यनिरस्तत्वाच्च एवंचेतनाधीनकारणशक्तितःकार्यप्रवृत्तिसंभवात् शक्तितःप्रवृत्तिलिंगमन्यथासिद्धमितिभावः स्व
तेत्यादि अचेतनेकारणत्वेननानुमातव्यंतस्यस्वरूपस्यप्रकृतिरनुपपत्तेरितिचकारेणानुपपत्तिपदमनुषज्यसत्त्वेयोजनीये
रचनाप्रवृत्त्योःकोभेदइत्याशंक्यप्रवृत्तिस्वरूपमाह गुणानांकिलसाम्यावस्थानांसत्त्वानांप्रलयः तदानकिंचित्कार्यंभवति
त्र२ प्रलयाभावप्रसंगात्किंत्वादौसाम्यच्युतिरूपंवैषम्यंभवति ततःकस्यचिद्गुणस्यांगित्वमन्येषांतत्त्वेनप्राधान्यंकस्यचिदंगत्वं
शेषत्वमित्यंगांगिभावोभवतितस्मिन्सतिमहदादिकार्योत्पादनात्मिकाप्रवृत्तिः तयाविविधकार्यविन्यासरचनेतिमे

ण२

साम्येति १

२६

णानां प्रवृत्तिः चेतनाधिष्ठानपूर्विका प्रवृत्तित्वात् इत्यादिः प्रवृत्तिवदित्याह सापीति विपक्षे स्वतन्त्रप्रवृत्तेरनुपपत्तिरित्यर्थः केचि
त्तु भेदानां प्रवृत्तिशक्तिमत्त्वात् चेतनाप्रकृतिकत्वमिति प्राक्तनः प्रवृत्तिरिति लिंगं व्याचक्षते अस्यापि न दोषः व्यभिचारः कर्पत्वेवि
(१२) शेषणाविरहतः प्रवृत्तिशक्तित्वमतिकार्यत्वस्य घटादिषु चेतनाधिष्ठितप्रकृतिकत्वेनाक्रसाध्यविरहेण व्याप्तिदर्शनादिति प्रवृ
त्तेश्चेतनसत्त्वेन ज्ञापिता ननु लोके स्वतन्त्राचेतनानां प्रवृत्त्यदर्शनेऽपि प्रधानेन सा प्रवृत्तिः सिध्यतु तत्राह दृष्टान्त इति अनुमानप्रा
णस्य तद्दृष्टान्तेन विना तौद्रियार्थे सिध्ययोगादिति भावः ननु प्रधानस्य प्रवृत्तिः खण्ड्यतां चेतनस्य स्वरूपेण प्रवृत्तिर्वा व्यासानुमे
तिसांख्याः प्राकृत नान्विति स्पष्टं चेतनस्य प्रवृत्तिं योगमङ्गीकरोति तर्हि केवलस्याचेतनस्य प्रवृत्तिसिद्धिरस्त्वित्याह स्वयोगात्तत्रा
ह तथापीति केवलस्य चेतनस्य प्रवृत्तावपि चेतनाचेतनयोर्मिथः संबन्धात् सृष्टिप्रवृत्तिरिति भावः इमं वेदान्तसिद्धान्तं सांख्यो
दूषयति नन्विति सर्वा प्रवृत्तिश्चेतनाश्रयैव दृष्टा नन्वचेतनसंबन्धेनापि चेतनस्य क्वचित्प्रवृत्तिर्दृष्टा तस्माच्चेतनान्स्थितिरित्यर्थः

(प्रवृत्तेश्च ॥२॥)

सापि नाचेतनस्य प्रधानस्य स्वतन्त्रस्योपपद्यते मृदादिष्वदर्शनात् रथादिषु च नहि मृदादयो [रथादयो वा] स्वयमचेतनाः सन्तः चेत
नैः कुलालादिभिरश्वादिभिर्वानधिष्ठिता विशिष्टकार्याभिमुखप्रवृत्तयो दृश्यन्ते दृष्टाच्चादृष्टसिद्धिः प्रवृत्त्यनुपपत्तेर
पि हेतोर्नाचेतनं जगत्कारणमनुमातव्यं भवति ननु चेतनस्यापि प्रवृत्तिः केवलस्य न दृष्टा सत्यमेतत् तथापि चेतना
संयुक्तस्य रथादेरचेतनस्य प्रवृत्तिर्दृष्टा नत्वचेतनसंयुक्तस्य चेतनस्य प्रवृत्तिर्दृष्टा किं पुनरत्र युक्तं यस्मिन्प्रवृत्तिर्दृष्टा तस्य
सा उत यत्संयुक्तस्य दृष्टा तस्य सेति ननु यस्मिन्दृश्यते प्रवृत्तिस्तस्यैव सेति युक्तमुभयोः प्रत्यक्षत्वात् न तु प्रवृत्त्याश्रयत्वे
न केवलश्चेतनो रथादिवत्प्रत्यक्षः प्रवृत्त्याश्रयदेहादिसंयुक्तस्यैव तु चेतनस्य सद्भावसिद्धिः केवलाचेतनरथादिवैलक्षण्यं
जीवद्देहस्य दृष्टमिति अत एव च प्रत्यक्षे देहे सति दर्शनात् असति चादर्शनाद्देहस्यैव चैतन्यमपीति लोकायतिकाः प्रति

मतद्वयं स्मृत्वा मध्यस्थः पृच्छति किं पुनरिति यस्मिन्न चेतने रथादौ प्रवृत्तिर्दृष्टा तस्यैव सा न चेतनस्य तद्धेतोरिति किं सांख्यमतं साधु
उत येन चेतनेनाश्वादिना संयोगाद् चेतनस्य प्रवृत्तिस्तत्संयुक्ता सेति वेदान्तिमतं वा साध्विति प्रश्नार्थः सांख्य आह नन्विति उभ
योः प्रवृत्तितदाश्रययोरित्यर्थः दृष्टाश्रयेणैव प्रवृत्तेरुपपत्ताव दृष्टचेतनप्रयुक्तिर्न कल्प्येति भावः आत्मनोऽप्रत्यक्षत्वे कथं सिद्धि
स्तत्राह प्रवृत्तीति जीवद्देहस्य रथादिभ्यो वैलक्षण्यं प्राणादिमत्त्वलिंगं दृष्टमिति कृत्वा चेतनस्य सिद्धिरित्यन्वयः जीवद्देहः सात्म
कः प्राणादिमत्वात् व्यतिरेकेण रथादिवदित्यात्मसिद्धिरित्यर्थः देहप्रवृत्तिः स्वाश्रयादन्येन ज्ञानवता सम्बद्धा प्रवृत्तित्वाद्र
थप्रवृत्तिवदित्यनुमानान्तरसूचनाय प्रवृत्त्याश्रयेत्युक्तं सद्भावसिद्धिरेव न प्रवर्तकत्वमित्येवकारार्थः अनुमितस्य सद्भावमात्रेण
प्रवृत्तिहेतुत्वे सर्वज्ञाकाशस्य हेतुत्वप्रसंगादिति भावः आत्मनोऽप्रत्यक्षत्वे चार्वाकाणां सम्मतिमपि लिंगयितुमाह अत एवेति अ
प्रत्यक्षत्वादेवेत्यर्थः देहान्यात्मनः प्रत्यक्षत्वे न मानमभावादिति भावः दर्शनान्मतिचैतन्ययोरिति शेषः ॥ राम ॥

वदि २

भा॰
द्वि॰
द्वि॰
४०

प्रवृत्तिं प्रत्यन्वयत्वमचेतनस्यैवेत्युक्तमंगीकृत्य चेतनस्य प्रयोजकत्वमसिद्धं तौ साधयति तदभिधीयत इति इत्यादि॥ स्तावत्स्यादिचेत
नस्यान्वयव्यतिरेकौ स्तः देहाभावे चेतनस्य प्रवर्तकत्वव्याहानामपि सन्तमित्याह लोकायतिकानामपीति यः प्रवर्तकः सः स्वयंप्रवृत्तिमानः
स्यादिति व्याप्तेरात्मनि व्यापकाभावान्न प्रवर्तकत्वमिति कश्चिच्छंकते नन्विति मणयादौ व्यभिचारान्न व्याप्तिरिति परिहरति नेति व
स्तुत एकत्वेपि कल्पितं द्वैतं न प्रवर्त्यमस्तीत्याह नाविद्येति अविद्याकल्पितेन नामरूपप्रपंचेन तयैवाविद्यारूपया मायया आवेश
तदभिधीयते न ब्रूमो यस्मिन्न चेतने प्रवृत्तिर्दृश्यते न तस्य सेति भवतु तस्यैव सा सा तु चेतनाद्भवतीति ब्रूमः तद्भावे भावात्॥
तदभावे चाभावात् यथा काष्ठादिव्यपाश्रयापि दाहप्रकाशलक्षणा विक्रियानुपलभ्यमानापि च केवले ज्वलने ज्वलनादेव
भवति तत्संयोगे दर्शनात् तद्वियोगे चादर्शनात् तद्वत् लोकायतिकानामपि चेतन एव देहो चेतनानां रथादीनां प्रवर्तको दृष्ट
इत्यविप्रतिषिद्धं चेतनस्य प्रवर्तकत्वं ननु तव देहादिसंयुक्तस्याप्यात्मनो विज्ञानस्वरूपमात्रव्यतिरेकेण प्रवृत्त्यनुपपत्तेः
अनुपपन्नं प्रवर्तकत्वमिति चेन्न अयस्कान्तवद्रूपादिवच्च प्रवृत्तिरहितस्यापि प्रवर्तकत्वोपपत्तेः यथा अयस्कान्तो मणिः स्व
यं प्रवृत्तिरहितोऽप्ययसः प्रवर्तको भवति यथा वा रूपादयो विषयाः स्वयं प्रवृत्तिरहिता अपि चक्षुरादीनां प्रवर्तका भवन्ति।
एवं प्रवृत्तिरहितोपीश्वरः सर्वज्ञः सर्वगतः सर्वात्मा सर्वशक्तिश्च सन् सर्वं प्रवर्तयेदित्युपपन्नं एकत्वात्प्रवर्त्याभावे प्रव
र्तकत्वानुपपत्तिरिति चेत् नाविद्याप्रत्युपस्थापितनामरूपमायावेशवशेनासकृत्प्रत्युक्तत्वात् तस्मात्सम्भवति प्रवृत्तिः
सर्वज्ञकारणत्वे नत्वचेतनकारणत्वे पयोम्बुवच्चेत्तत्रापि ४ स्यादेतत् यथा क्षीरमचेतनं स्वभावेनैव वत्सविवृद्ध्यर्थं प्रवर्त
ते यथा च जलमचेतनं स्वभावेनैव लोकोपकाराय स्यन्दते एवं प्रधानमचेतनं स्वभावेनैव पुरुषार्थसिद्धये प्रवर्तिष्यत
इति तत्रोच्यते अत्रापि पयोम्बुनोश्चेतनाधिष्ठितयोरेव प्रवृत्तिरित्यनुमिमीमहे उभयवादिप्रसिद्धे रथादाव
चेतने केवले प्रवृत्त्यदर्शनात् शास्त्रं च योऽप्सु तिष्ठन् योऽपोऽन्तरो यमयति एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्य
न्दन्ते इत्येवंजातीयकं समस्तस्य लोकपरिस्पन्दितस्य [illegible]श्वराधिष्ठिततां श्रावयति तस्मात्साध्यपक्षनिक्षिप्तत्वात्
पयोम्बुवदित्यनुपन्यासः चेतनायाश्च धेन्वाः स्नेहेच्छया पयसः प्रवर्तकत्वोपपत्तेः वत्सचोषणेन च पयस आकृ
ष्यमाणत्वात् न चाम्बुनोऽप्यत्यन्तमनपेक्षा निम्नभूम्याद्यपेक्षत्वात् स्यन्दनस्य चेतनापेक्षत्वं तु सर्वत्रोपदर्शितं उपसंहा
रदर्शनान्नेति चेन्न क्षीरवद्धि इत्यत्र तु बाह्यनिमित्तनिरपेक्षमपि स्वाश्रयं कार्यं भवतीत्येतल्लोकदृष्ट्या निदर्शितं शास्त्रदृ
स्थितात्मनः कल्पितः संबंधः तस्य वशः सामर्थ्यं तेनान्तर्यामित्वादिकमीश्वरस्योक्तत्वान्न चोद्यावसर इत्यर्थः अनादिज उत्पन्नप्र
वृत्तिः चेतनाधीना प्रवृत्तित्वात् रथादिप्रवृत्तिवदिति स्थिते न च क्षीरादौ व्यभिचारमाशंकनीयस्यापि पक्षसमत्वेनोक्तानुमानाद्या
गमो न च साध्यसिद्धेर्व्यभिचार इति सूत्रं व्याचष्टे स्यादेतदित्यादिना साध्यपक्षेति साध्यवता पक्षेण तुल्यत्वादित्यर्थः अन
पन्यासो न व्यभिचारस्थानमिति यावत् क्षीरे प्रवर्तकत्वेन धेन्वादेः सत्त्वाच्च न व्यभिचार इत्याह चेतनायाश्चेति उपदर्शितमस्म

[illegible]

वतिष्ठमानाः।

अस्तु प्रधानस्यापि धर्मादिकर्म पुरुषो वा प्रवर्तकस्तथापि कस्मात् तत्प्रवृत्तं तत्तद्धाचेष्टे सांख्यानामित्यादिना प्रधानव्यतिरेकेणावृक्षणोन
वस्थितेः पुरुषस्योदासीनत्वात्कदाचित्सृष्टिप्रवृत्तिः कदाचित्प्रलयप्रवृत्त्ययुक्तमित्यर्थः कर्मणोपि प्रधानात्मकस्याचेतनत्वात्स
दामत्वाच्च न कदाचित्कप्रवृत्तिनियामकत्वमिति भावः पुनरपि दृष्टान्तबलात्प्रधानस्य स्वत एव कादाचित्कप्रवृत्तिरित्याशंक्य

सांख्यानां त्रयो गुणाः साम्येन प्रधानं न तद्व्यतिरेकेण प्रधानस्य प्रवर्तकं निवर्तकं वा किंचिद्वास्त्यपेक्ष्यमवस्थित
मस्ति पुरुषस्तूदासीनो न प्रवर्तको न निवर्तक इत्यतोऽनपेक्षं प्रधानमनपेक्षत्वाच्च कदाचिन्महदाद्याकारेण परि
णमते कदाचिन्न परिणमत इत्येतदयुक्तं ईश्वरस्य तु सर्वज्ञत्वात्सर्वशक्तित्वान्महामायत्वाच्च प्रवृत्ती न विरुध्यते अ
नपेक्षाभावाच्चेत्तृणादिवत् यथा तृणपल्लवोदकादि निमित्तान्तरनिरपेक्षं स्वभावादेव क्षीराद्याकारेण
परिणमते एवं प्रधानमपि महदाद्याकारेण परिणंस्यत इति कथं च निमित्तान्तरनिरपेक्षत्वं तृणादीनां गम्यते निमि
त्तान्तरानुपलंभात् यदि हि किंचिन्निमित्तमुपलभेमहि ततो यथाकामं तेन तृणाद्युपादाय क्षीरं संपादयेमहि न
तु संपादयामहे तस्मात्स्वाभाविकस्तृणादेः परिणामः तथा प्रधानस्यापि स्यादिति अत्रोच्यते भवेत्तृणादिवत्स्वा
भाविकः प्रधानस्यापि परिणामो यदि तृणादेरपि स्वाभाविकः परिणामोऽभ्युपगम्येत न त्वभ्युपगम्यते निमित्तान्तरो
पलब्धेः कथं निमित्तान्तरोपलब्धिः अन्यत्राभावात् धेन्वैव ह्युपभुक्तं तृणादि क्षीरीभवति न प्रहीणमनडुहाद्युप
भुक्तं वा यदि हि निर्निमित्तमेतत्स्याद्धेनुशरीरसंबंधादन्यत्रापि तृणादि क्षीरीभवेत् न च यथाकामं मानुषैः शक्यं
संपादयितुमित्येतावता निर्निमित्तं भवति भवति हि किंचित्कार्यं मानुषसंपाद्यं किंचिद्दैवसंपाद्यं मनुष्या अपि
शक्नुवन्त्येवोचितेनोपायेन तृणमुपादाय क्षीरं संपादयितुं प्रभूतं हि क्षीरं कामयमानाः प्रभूतं घासं धेनुं चारय
न्ति ततश्च प्रभूतं क्षीरं लभन्ते तस्मान्न तृणादिवत्स्वाभाविकः प्रधानस्य परिणामः अभ्युपगमेप्यर्थाभावात्।
स्वाभाविकी प्रधानप्रवृत्तिर्न भवतीति स्थापितं तथापि तां भवतः श्रद्धामनुरुध्यमानाः स्वाभाविकीमेव प्रधा
नस्य प्रवृत्तिमभ्युपगच्छामः तथापि दोषोऽनुषज्यत एव कोसौ अर्थाभावात् यदि तावत्स्वाभाविकी प्रधानस्य प्रवृत्तिः
न किंचिदन्यदिहापेक्षत इत्युच्यते ततो यथैव सहकारि किंचिन्नापेक्षते एवं प्रयोजनमपि किंचिन्नापेक्षेत

निषेधतिस्तु कारः अत्र वेत्यादिना एतदिति कथमित्यत्र निमित्तान्तरेति धेन्वादि निमित्तान्तरमस्तीति सिद्धान्तयति अत्रो
च्यत इति प्रतीकानं एवं यदुक्तं क्षीरस्य स्वेच्छया संपादयितुमशक्यत्वात्स्वाभाविकत्वमिति तत्राह न च यथाकाममिति प्रधानस्येन

सां.त.
टि.टि.
२८

ग्राह्र

तत्रेष्टापत्तिं निरस्यति इत्यत इति प्रधानमिति उक्तप्रसंगस्येष्टत्वे प्रतिज्ञाहानिः स्यादित्यर्थः अर्थांतरं मन्त्रस्वतः प्रवृत्तिवि
नित्यर्थांतरशंकापूर्वकमाह सर्वदीत्यादिना प्रयोजनमपास्तेतत्वेद्यक्तव्य मिति तथापीति कूटस्थपुरुषस्वतः
सुखादिरूपस्यातिशायस्याधानस्य पाकत्वादध्यामानेनौकाराच्च भोगोनयुक्तः किंच प्रधानप्रवृत्तेर्भोगार्थत्वे मोक्षहे
बा४ तुविवेकख्यातेरभावादनिर्मोक्षप्रसंगस्य अपवर्गार्थत्वे स्वरूपावस्थानरूपमोक्षः स्वतःसिद्धत्वात्प्रवृत्तिवैयर्थ्यं भोगाभा
वप्रसंगश्चेत्यर्थः तृतीयं दूषयति उभयार्थतेति मीयते भज्यते इति मात्रा भोग्याः औत्सुक्यनिवृत्त्यर्थं यथा क्रिया

इत्यतः प्रधानं पुरुषस्यार्थं साधयितुं प्रवर्तते इति यं प्रतिज्ञाहीयेत सर्वदित्रयात्स्वकार्यैर्वकेवलेनापेक्षते
न प्रयोजनमपीति तथापि प्रधानप्रवृत्तेः प्रयोजनं विवेक्तव्यं भोगोवास्यादपवर्गोवोभयं वेति भोगश्चेत्कीदृ
शोनाधेयातिशयस्य पुरुषस्य भोगो भवेदनिर्मोक्षप्रसंगश्चापवर्गश्चेत्प्रागपि प्रवृत्तेरपवर्गस्य सिद्धत्वा
त्प्रवृत्तिरनर्थिका स्यात् शब्दाद्युपलब्धिः प्रसंगश्च उभयार्थताभ्युपगमे पि भोक्तव्यानां प्रधानमात्राणा
मानंत्यादनिर्मोक्षप्रसंग एव न चौत्सुक्यनिवृत्त्यर्था प्रवृत्तिः नहि प्रधानस्याचेतनस्यौत्सुक्यं संभवति नचपु
रुषस्य निर्मलस्य निष्कलस्यौत्सुक्यं दृक्शक्तिसर्गशक्तिवैयर्थ्यभयाच्चेत्प्रवृत्तिः तर्हि दृक्शक्त्यनुच्छेदादनि
र्मोक्षप्रसंग एव तस्मात्प्रधानस्य पुरुषार्था प्रवृत्तिरित्ययुक्तं पुरुषार्थ इव प्रवर्तत इति चेन्नापि दृष्टांतो यथा
कश्चित्पुरुषो दृक्शक्तिसंपन्नः प्रवृत्तिशक्तिविहीनः पंगुरपरं पुरुषं प्रवृत्तिशक्तिसंपन्नं दृक्शक्तिविहीन
मंधमधिष्ठाय प्रवर्तयति यथा वायस्कांतोश्मस्वयमप्रवर्तमानोप्ययः प्रवर्तयति एवं पुरुषः प्रधानं प्रवर्त
यिष्यतीति दृष्टांतप्रत्ययेन पुनः प्रत्यवस्थानमत्रोच्यते तथापि नैव दोषान्निर्मोक्षोस्ति अभ्युपेतहानेनात्रोद्
ष्टव्यापततीति प्रधानस्य स्वतंत्रस्य प्रवृत्त्यभ्युपगमात्पुरुषस्य च प्रवर्तकत्वानभ्युपगमात् ॥ ॥

स्य प्रवर्त्तते लोकः पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तमिति कारिकोक्तं दूषयति नचेति औत्सुक्यमिच्छाविशेषः केवल
जडस्यात्मनो वानयुक्तः इत्यर्थः अस्ति पुरुषस्य दृक्शक्तिः चिद्रूपत्वात् अस्ति च प्रधानस्य सर्गशक्तिः त्रिगुणत्वात् तयोः शक्त्योर्दृष्टप्र
दृष्टिं विना सार्थक्यायोगात्प्रधानस्य दृष्टौ प्रवृत्तिरिति चेन्न शक्त्योर्नित्यत्वात्सृष्टिनित्यत्वापत्तिरित्याह दृक्शक्तीति पुरुषस्य प्रवर्त

प्रधानस्य स्वातंत्र्यं पुरुषस्योदासीनत्वं चाभ्युपेतं तत्र जाते इति वदंतं सांख्यं प्रत्याह कथं चेति पुरुषस्य परिस्पंदः प्रयत्नगुणो वा नास्तीति
वक्ष्यते तद्द्वयं प्रधानपुरुषयोर्नित्यत्वाद्व्यापित्वाच्च नित्यः सन्निधिः अपमनेतु परिमार्जनमृजुत्वेन स्थापनमनित्यसन्निधिश्चेति
व्यापारोऽस्तीत्यनुपन्यासः सदृष्टांतोपन्यासो न भवतीत्यर्थः ननु चिज्जडयोर्दृग्दृश्यभावयोग्यतास्ति तया तद्भावः संबंधः
स्यात अत आह योग्यतेति विज्ञउत्वरूपाया योग्यताया नित्यत्वात्संबंधनित्यत्वापत्तिरित्यर्थः यथा स्वतंत्रप्रधानप्रवृत्तिपक्षो मो-
क्षापवर्गोभयं वा फलमिति विकल्प्य दूषितः एवं पुरुषाधीनप्रधानप्रवृत्तिपक्षोऽपि फलाभावेन दूषणीय इत्याह एवं चेति

कथं चोदासीनः पुरुषः प्रधानं प्रवर्तयेत् पंगुरपि ह्यंधं वागादिभिः पुरुषं प्रवर्तयति नैवं पुरुषस्य कश्चिदपि प्रवर्तनव्या-
पारोऽस्ति निष्क्रियत्वात् निर्गुणत्वाच्च नाप्ययस्कांतवत्संनिधिमात्रेण प्रवर्तयेत् संनिधिनित्यत्वेन प्रवृत्तिनित्यत्वप्र-
संगात् अयस्कांतस्य त्वनित्यसन्निधेरस्ति स्वव्यापारः संनिधिः परिमार्जनाद्यपेक्षा चास्तीत्यनुपन्यासः पुरुषाश्मवदिति त-
था प्रधानस्याचेतनत्वात्पुरुषस्य चोदासीनत्वात्तृतीयस्य च तयोः संबंधयितुरभावात्संबंधानुपपत्तिः योग्यतानिमित्ते च संबंधे
योग्यत्वानुच्छेदादनिर्मोक्षप्रसंगः एवं चेहाप्यर्थाभावो विकल्पयितव्यः परमात्मनस्तु स्वरूपव्यपाश्रयमौदासीन्यं मा-
याव्यपाश्रयं च प्रवर्तकत्वमित्यस्त्यतिशयः अंगित्वानुपपत्तेश्च ९ इतश्च न प्रधानस्य प्रवृत्तिरवकल्पते यद्धि सत्त्वरजस्त-
मसां साम्येनान्योन्यगुणप्रधानभावमुत्सृज्य साम्येन स्वरूपमात्रेणावस्थानं सा प्रधानावस्था तस्यामवस्थायामनपेक्षस्वरूपाणां
स्वरूपप्रणाशभयात्परस्परं प्रत्यंगांगिभावानुपपत्तेर्बाह्यस्य च कस्यचित्क्षोभयितुरभावाद्गुणवैषम्यनिमित्तो महदाद्युत्पा-
दो न स्यात् अन्यथानुमितौ च ज्ञशक्तिवियोगात् १० अन्यथापि स्यादन्यथा वयमनुमिमीमहे यथा नायमनंतरोदि-
तः प्रसज्यते न ह्यनपेक्षस्वभावाः कूटस्थास्माभिर्गुणा अभ्युपगम्यंते प्रमाणाभावात् कार्यवशेन तु गुणानां स्वभा-
वोऽभ्युपगम्यते यथा यथा कार्योत्पाद उपपद्यते तथा तथैषां स्वभावोऽभ्युपगम्यते ॥ ॥ ॥

सिद्धांते परमात्मन उदासीनस्य कथं प्रवर्तकत्वमित्याशंक्याह परमात्मेति
सांख्यमते उभयं विरुद्धं सत्यत्वादस्मन्मते कल्पितयोरविरोध इति भावः किं प्रधानावस्था कूटस्था उत विकारिणी आ-
द्ये दोषमाह तस्यामिति अंगांगिभावे साम्यस्वरूपनाशः स्यात् ततः कौटस्थ्यभंग इति भयादंगांगित्वानुपपत्तेः स्वरूपानप-
पत्तिरित्यर्थः द्वितीयं दूषयति बाह्यस्येति चिरकालस्थितस्य साम्यस्य च्युतौ निमित्तं वाच्यं तन्नास्तीत्यर्थः गुणानामिया-
नपेक्षस्वभावत्वान्न स्वतो वैषम्यमित्युक्ते तत्र हेतुसिद्धिमाशंक्य सूत्रकारः परिहरति अन्यथेति ॥ राम ॥ ॥

अनपेक्षस्वभावादन्यथा सापेक्षत्वे न गुणानामनुमानं सर्वस्त्रोक्तो दोषान प्रसज्यते नैवमपि सिद्धांतः कार्यानुसारेण गुणस्व
भावांगीकारादित्याह चलगुणवृत्तत्वादिति एवमस्त्वोक्तोगित्वानुपपत्ति दोषाभावमंगीकृत्य परिहरति एवमपीति कार्याये
ज्ञानशक्तिकल्पनेन ब्रह्मवादः स्यादित्यर्थः अंगीकारं त्यजति वैषम्येति सहव्याचष्टे परस्परेति त्वगात्रमेव ज्ञानेन्द्रियमेकम
नेकरूपादिज्ञानकारणं पंचकर्मेन्द्रियाणि मनश्चेति सप्तेन्द्रियाणि ज्ञानेन्द्रियाणि पंचकर्मेन्द्रियाणि पंचमनश्चेत्येकादश
बुद्धिरहंकारो मन इति त्रीणि एकमिति बुद्धिरेव एवं पूर्वापरविरोधादिति व्याख्याय श्रुतिस्मृति विप्रति [illegible]

चलं गुणवृत्तमिति चाभ्युपगमः तस्मात्साम्यावस्थायामपि वैषम्योपगमयोग्यापवर्गुणाश्रवतिष्ठंत इति एव
मपि प्रधानस्य ज्ञानशक्तिवियोगाद्रचनानुपपत्त्यादयः पूर्वोक्ता दोषास्तदवस्था एव ज्ञानशक्तिमपि त्वनुमिमानः प्रतिवादि
त्वान्निवर्तते चेतनमेकं प्रपंचस्य जगतश्चोपादानमिति ब्रह्मवादप्रसंगात् वैषम्योपगमयोग्य गुणा अपि गुणाः साम्यावस्था
यां निमित्ताभावान्नैव वैषम्यं भजेरन्भजमाना वा निमित्ताभावाविशेषात्सर्वदैव वैषम्यं भजेरन्निति प्रसज्यत एवा
यमनंतरोदोषः विप्रतिषेधाच्चासमंजसं ॥ परस्परविरुद्धश्चायं सांख्यानामभ्युपगमः क्वचित्सप्तेन्द्रियाणि ना
मेति क्वचिदेकादश तथा क्वचिन्महतस्तन्मात्रसर्गमुपदिशंति क्वचिदहंकारात्तथा क्वचित्त्रीण्यंतःकरणानि व
र्णयति क्वचिदेकमिति प्रसिद्ध एव तु श्रुत्येश्वरकारणवादिन्या विरोधः तदनुरोधवतिन्या च स्मृत्या तस्मादप्यस
मंजसं सांख्यानां दर्शनमिति अत्राह नन्वौपनिषदानामप्यसमंजसमेव दर्शनं तप्यतापकयोर्जात्यंतरभावान
भ्युपगमात् एकं हि ब्रह्मसर्वात्मकं सर्वस्य प्रपंचस्य कारणमभ्युपगच्छतां एकस्यैवात्मनो विशेषौ तप्यतापकौ न
जात्यंतरभूतौ इत्यभ्युपगंतव्यं स्यात् यदि चैतौ तप्यतापकावेकस्यात्मनो विशेषौ स्यातां सततान्योन्यतापका भ्यां न
निर्मुच्यत इति तापोपशांतये सम्यग्दर्शनमुपदिशच्छास्त्रमनर्थकं स्यात् न ह्यल्पप्रकाशधर्मस्य प्रदीपस्य तदव
स्थस्यैव ताभ्यां निर्मोक्षउपपद्यते ॥

प्रसिद्ध इति तस्मादभ्रांतिमूलत्वात्संख्यापास्तस्य तेन निर्दोषवेदांतसमन्वयस्य न विरोध इति सिद्धं स्वमतासामंजस्यमसह
मानः संख्यः प्रतिवतिष्ठते अत्राहेति तयोर्जीवस्तापकः संसारस्तयोर्भेदानंगीकाराल्लोकप्रसिद्धस्तप्यतापकभावो लुप्येतेत्
यर्थः विहरणेति एकं हेति तथा च भेदव्यवहारलोप इत्यसमंजसमित्यर्थः ननु तयोरुपादाने कोपि मिथोभेदोस्त्येव य
थैकवह्न्यात्मकयोरल्पप्रकाशयोरतो न व्यवहारलोप इत्याशंक्य वह्नेरिव ताभ्यामात्मनो मोक्षो न स्यादित्याह यदि चेत्यादिना ॥

ननु सत्त्वपि धर्मिणि सत्त्वभावनायोगेनोत्तरूपप्रयुज्यते तत्सेवजलेवीच्यादिनोद्दर्शनादित्याशंकां दृष्टान्तासिद्धमाह यापीति किंचभेदा
गीकारोपि सिद्धान्ते अनंगीकारे लोकप्रसिद्धिवाधइत्याह प्रसिद्धश्चेति अर्थोऽज्ञानं तालाभादिनार्थिनं तापयतीति तापक अ
र्थीत पक्षयोरभेदेवादकमाह यदीति अर्थिनोऽन्यस्यार्थस्याभावादर्थित्वाभाववदर्थादन्यस्यार्थिनोऽसत्त्वादर्थित्वाभावः प्र
सज्येतेत्याह तथार्थस्यापीति प्रसंगस्येष्टत्वं निराकरोति नचेतदस्तीति अर्थत्वं हि कामनाविषयत्वं तच्च काम्यादन्यस्य का
मयितुरसत्त्वात्तस्यात्र हि स्वार्थमस्ति कामस्यैवमयितृत्वायोगात्तस्माद्द्वंद्वोगीकार्यइत्यर्थः इतस्थभेदइत्याह संबंधीति

यथा जलतरंगवीचीफेनादिरूपन्यासेपि जलात्मनएकस्य वीच्यादेर्योविशेषः आविर्भावतिरोभावरूपेण तिष्ठत्येवे
तिसमानोजलात्मनोवीच्यादिभिर्विर्भावः प्रतिद्धश्चायं तप्यतापकयोर्जात्यंतरभावो लोकेनपाहि अर्थी चार्थश्चान्यो
न्यभिन्नौलक्ष्यते यद्यर्थिना स्वतोऽन्योऽर्थो न स्यात् यस्यार्थिनो यद्विषयमर्थित्वं स तस्यार्थो नित्यसिद्ध एवेति न तस्य तद्वि
षयमर्थित्वं स्यात् यथा प्रकाशात्मनः प्रदीपस्य प्रकाशाख्योऽर्थो नित्यसिद्ध एवेति न तस्य तद्विषयत्वमर्थित्वं भवत्यप्राप्तेर
र्थार्थित्वं स्यादिति तथार्थस्याप्यर्थित्वं न स्यात् यदि स्वात्मार्थत्वमेव स्यात् नचैतदस्ति संबंधपाव्या स्येतो अर्थी चा
र्थश्चेतिद्वयोरप्यसंबंधिनोः संबंधः स्यान्नैकस्यैव तस्माद्भिन्नावेवैतौ अर्थार्थिनौ तथानर्थानर्थिनावपि अर्थिनोनुकूलो
र्थः प्रतिकूलोऽनर्थस्तत्प्राप्तिमेकः पर्यायेणोभाभ्यां संबध्यते तत्रार्थस्याप्राप्तौ यत्वाद् यत्वा ज्ञानर्थस्याभावप्राप्तौ अनर्थे
वेत्तितापकः स उच्यते तप्यस्तु पुरुषोऽयमेकः पर्यायेणोभाभ्यां संबध्यते इति तयोः तप्यतापकयोरेकात्मतायामो ज्ञानुप
पत्तिः जात्यंतरभावे तु तत्संयोगहेतुपरिहारात्स्यादपि कदाचिन्मात्राप्युपपत्तिरिति अत्रोच्यते नेकत्वादेवतप्यतापकभावा
नुपपत्तेः भवेदेषदोषो यद्येकात्मनायनतप्यतापकाववन्योन्यस्य विषयविषयिभावप्रतिपद्येयातां न त्वेतदस्त्येकत्वादे
वन ह्यग्निरेकः स्वमात्मानं दहति प्रकाशयति वा सत्यपि स्वप्रकाशादि धर्मभेदे परिणामित्वे च किं कूटस्थे ब्र
ह्मण्येकस्मिन्तप्यतापकभावः संभवेत् कः पुनरयं तप्यतापकभावः स्यादित्युच्यते ॥

तथानर्थानर्थिनावपि भिन्नावित्यन्वयः

अर्थानर्थयोः स्वरूपोक्तिपूर्वकं तापकत्वं स्फुटयति अर्थिनोनुकूलइति अद्वैतमते एकरूपयोगमसत्का स्वमते योगमाह जात्यंत
रेति तप्यतापकयोर्बुद्धिपुरुषयोः संयोगः स्वस्वामिभावः तस्य हेतुरनादिरविवेकस्तस्य परिहारो विवेकस्तस्मान्नित्यमुक्तस्यापि पुरुष
स्य कथंचिद्रूपत्वात्मोक्षोपपत्तिरित्यर्थः यथा योधगतौ जयपराजयौ राजन्युपचर्येते तत्स्वामित्वात् तथा भिन्नबुद्धिगतौ बंध
मोक्षौ पुरुषे उपचर्येते तद्वत्स्वेवचबंधस्तेनच्यते इति सिद्धान्तयति अत्रेति किंपरमार्थदृष्ट्यातप्यतापकभावानुपपत्ति
रुच्यते व्यवहारदृष्ट्यावानायदृत्याह नेकत्वादेवेति दोषत्वमितिशेषः भवेदित्यादिना एतन्नात्विकविषयविषयित्वेन

तस्यादोषत्वं विवृणोति ॥

वनर्थे ५

॥ ॥

पाभा॰ टि॰ ३०

यत्र तप्यतापकभावो दृष्टस्तत्रैवेति व्यवहारप्रत्तमादाय सिद्धान्ती ब्रूते किं न पश्यसीति देहस्य तप्यत्वे देहात्मवादापत्तिरिति शं॰
कते नन्विति अचेतनस्येव देहस्य तस्मिन्नेतिवदनासाङ्ख्यनवकल्प्य किं चेतनस्य केवलस्य तस्मिः किं वा देहसहितस्य उत्तरमेःना
द्यस्त्याह उभयत्रेति न द्वितीय इति तृतीयाविर्भ्याह नापीत्यादिना चतुर्थं शंकते सत्वमिति सत्वरजसत्प्यतापकत्व पुरुषस्य तथा सोऽ
भावाच्छास्त्रारम्भवैयर्थ्यमिति परिहरति तान्याभिति असंगत्वेपि पुरुषस्य तप्यत्वं प्रतिबिंबनात्मिरिति शंकते सत्वे
ति न हि जलचंद्रस्य चलत्वमस्त्येव तस्मिंस्तस्य तत्त्वमागतं इत्याह परमार्थत इति दृष्टव्यमात्रेणैकत्वे मिथ्यात्
३१ आगमइति चेद् उच्यते द्रष्टव्यपालम्बुद्धिसत्वसारूप्यं द्रष्टृतेतत्त्वसारूप्यं पुरुषस्य तप्यत्वरूपं कल्पितमेव वस्तुतस्तु सभावादि चेः

किं न पश्यसि कर्मभतो जीवदेहस्य त्वत्तापकः सविता इति तत्र तस्मिन्नीम दुःखं सो चेतनस्य देहस्य यदि देहस्येव तत् चेतनपिवुर्न्नी
मिः सात्त्वो देहनाशो स्वयमेव तत्पुनः प्रत्तीतितत्त्वापायसाधनं नैष्टव्यं स्यादिति उच्यते देहाभावेपि केवलस्य चेतन
स्य तस्मिन्नेह इत्थान्त चत्वया पितस्मि नाम विक्रिया चेतयितुः केवलस्यैष्यते नापि देहचेतनयोः सहत्वम
तस्मेरेव४ संग्राह्यदि दोषप्रसंगात् न च तस्मिन्नभ्युपगच्छामि कथं तर्ह्यपि तप्यतापकभावः सत्वे तप्यं तापकं रजउक्ति वत्र
ता ताभ्यां चेतनस्य संहततत्वानुपपत्तेः सत्वानुरोधित्वाच्च ततोपि तप्यतद्भवतिचेत् परमार्थतस्तर्हि तेव तप्य
तद्रूप्यापत्तेतीवणावप्रयोगात् नेवेतप्यतेनवप्राप्त्वोदोषाय नहिदेहभः सर्पदृष्टत्वे तावता तविषो भवति
सर्पो वा दृष्टभदृवेसेतावता निर्विषोत स्याद्वि प्राक्नो यतप्यतापकभावः नपारमार्थिकरूपगंतव्यमितिः सुप४
नैवं तर्ति सम्मायि किंचिदृष्यति अपपारमार्थिकमेव चेतनस्य तप्यत्वमभिगच्छामि नचैवमसंतरामनिर्मोक्षः प्र
सज्येत नित्यत्वाभ्युपगमात् तापकस्य तप्यतापकयोर्नित्यत्वेपि सनिमित्तसंयोगापेक्षत्वात् संयोगनि
मित्तादर्शननिवृत्ता वात्यंतिकः संयोगोपरमस्ततश्चात्यंतिको मोक्ष उपपन्न इति चेत् नादर्शनस्य तमसो नित्य

त्वमुपपादयति नचेदिति पुरुषो वस्तुतस्तस्मिन्मूलस्त्रेदिवशात्रोनदोषाय मिथ्यात्मि परत्वादित्यर्थः मिथ्यासा दृष्ट
मवदोषइति चेन्नेत्याह नहीति सविषत्वनिर्विषत्वे वत्र प्रावाद्यर्थः कल्पितप्रवृद्धृष्ट्यः साख्यस्यापि पूर्वेक्तप्रतताप
कत्वे सति ममापि किंचिदूष्यति किं न दूष्यति किं तेदूष्ट मेवसप्तत्राभित्यर्थः यदि मिथ्या तप्यत्वागौकारे पसिद्धान्तः
स्यादितिभीत्याह तेन तप्यत्वं पुरुषस्योच्यते न पाप्यपसिद्धान्तः कौटस्थ्याहानादिनि मोक्षस्य सत्यस्यानवच्छिन्नत्वयोगादित्या
ह अपेत्यादिना किंच रजसो नित्यत्वादुःखमानंत्यमित्याह नित्यत्वेति अत्र सांख्यः शंकते तपेति सत्वपुरुषयोर्वा तप्य
शक्तितापकशक्तिसुरजः निमित्तमवि वेकात्मकमदर्शनं तमः तेन सहितः सनिमित्तः संयोगः पुरुषस्य गुणसामिव

३०

तमसो निवृत्त्यभावे ऽपि विवेकेनो परमात्मा स्वीकृत इत्यत आह गुणानां चेति चलं गुणवृत्तमिति अंगीकारादिति भावः परस्य चैवं धर्मोपलब्ध्यनुपप-
त्तिमुक्तास्य पत्तत्वप्रसङ्ग इत्यत औपनिषदस्योक्तिरिति वस्तुत एकत्वेन वैयर्थ्याभावो ऽत्र मुक्तभावप्रश्नावसरः व्यवहारे तु भेदांगीकारात्तप्य-
तापकभावो ऽवैषम्यस्तत्वज्ञानान्निवृत्तिश्चोपपद्यत इति न चोद्यावसरः इत्यतानुवादेन महद्दीर्घवदिति सूत्रस्यास्या पुनात्यकाधिकरणस्य
संगतिमाह प्रधानेति यद्यपि सांख्यमतनिरासानन्तरं परमाणुवादो निराकर्तव्यः स्मृतस्य पिनस्य तस्य स्मृतिपादे संगतत्वात्तथापि
पूर्वत्र प्रधानगुणानां जगत्यन्वयात्प्रधानस्यानुपादानत्वमुक्तं तथा ब्रह्मगुणचेतन्यानन्वयाद्ब्रह्मणो ऽप्युपादानत्वमिति लाभाद
त्रतमाक्षेपयत इत्यर्थः चेतनात् ब्रह्मणो जगत्सर्गवादो वेदान्तसमन्वयो विषयः स किं यः समवायिकारणगुणाः स कार्यद्रव्ये स्वस-

गुणानां चोद्भवाभिभवयोरनियतत्वादनियतः संयोगनिमित्तो परमश्रुतिवियोगस्यापि नियतत्वात्सांख्यस्यवा निर्मोक्षोप-
विहार्यः स्यात् औपनिषदस्य त्वात्मैकत्वाभ्युपगमादेकस्य च विषयविषयिभावानुपपत्तेः विकारभेदस्य वाचारंभणमात्र-
त्वश्रवणात् निर्मोक्षणे कस्यचिदपि नोपजायते व्यवहारे तु यत्र यथा दृष्टस्तप्यतापकभावस्तत्र तथैवमस्त्विति न चोदयितु-
व्यः परिहर्तव्यो वा भवति प्रधानकारणवादो निराकृतः परमाणुकारणवाद इदानीं निराकर्तव्यः तत्रादौ तावदणुवादि-
ना ब्रह्मवादिनि दोष उत्प्रेक्षते स प्रतिसमाधीयते तत्रायं वैशेषिकाणामभ्युपगमः कारणद्रव्यसमवायिनो गुणाः का-
र्यद्रव्ये समानजातीयं गुणान्तरमारभन्ते शुक्लेभ्यस्तन्तुभ्यः शुक्लस्य पटस्य प्रसवदर्शनात्तद्विपर्ययादर्शनाच्च तस्मा-
च्चेतनस्य ब्रह्मणो जगत्कारणत्वेऽभ्युपगम्यमाने कार्येऽपि जगति चैतन्यं समवेयात् तददर्शनात्तु न चेतनं ब्रह्म जगत्कारणं भवि-
तुमर्हतीति इममभ्युपगमं तदीयैव प्रक्रियया व्यभिचारयति महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यां ११ एषा तेषां प्रक्रिया
परमाणवः किल कंचित्कालमनारब्धकार्या यथायोगं रूपादिमन्तः पारिमाण्डल्यपरिमाणाश्च तिष्ठन्ति ते च पश्चाद-
दृष्टादिपुरःसराः संयोगसचिवाश्च सन्तो द्व्यणुकादिक्रमेण कृत्स्नं कार्यजातमारभन्ते कारणगुणाश्च कार्ये गुणान्त-
रमारभन्ते यदा द्वौ परमाणू द्व्यणुकमारभेते तदा परमाणुगता रूपादिगुणविशेषाः शुक्लादयो द्व्यणुके शुक्लादीनपरानारभन्ते
परमाणुगुणविशेषस्तु पारिमाण्डल्यं न द्व्यणुके पारिमाण्डल्यमपरमारभते द्व्यणुकस्य परिमाणान्तरयोगाभ्युपगमात्

मानजातीयगुणारंभकत्वं तु शौक्ल्यावदितिन्यायेन विरुध्यते नवेति संदेहन्यायस्याव्यभिचाराद्विरुध्यत इति प्राप्ते व्यभिचारान्न तद्विरो-
ध इति सिद्धान्तस्तत्र व्याचष्टे एवं त्वादिना यद्यपि न विलक्षणत्वादित्यत्र चेतनाचेतनसर्गः साधितः तथापि वैशेषिकन्यायस्य दृ-
ष्टप्रक्रियया व्यभिचारो ऽत्र प्रदर्श्यत इत्यादस्यास्त्रस्यानगतार्थता प्रलयकाले परमाणवो निश्चला असंयुक्ताः तिष्ठन्ति सर्गकाले चाद-
ष्टवशात्तत्संयोगाय तेषु कर्म भवति तेन संयोगात् द्रव्यान्तरस्यारंभो भवति कारणगुणाः कार्ये गुणान्तरमारभन्त इति सामान्येन
प्रक्रियामुक्त्वा विशेषमुक्तमाह यदा द्वाविति परमाणोः पारिमंडल्यं तदुक्तं परिमाणं पारिमाण्डल्यमित्युच्यते तत्र स्वसमान

प्रा॰भा॰ टि॰टि॰ ३१

व्यभिचारस्यालोतरमाह यद्यपि ह्रस्वेति हेतुद्वयमिति शब्दद्वयं पठितव्यं एवं सति चतुर्भिर्द्व्यणुकैरारब्धस्य त्र्यणुकारंभकं उपपद्यते यथास्त्र
तेव ह्रस्वाभ्यां द्व्यणुकाभ्यां महत् त्र्यणुकस्यारंभो न युज्यते कारणगतमहत्त्वबहुत्ववाविना कार्यमहत्वायोगादिति मतव्यम
कुतः पर्यकावाल्पद्वयद्वाभ्यां काभ्यामारब्धकार्यमहत्वं इदं पद्यते तस्य हेतुः प्रचयानाम प्रशिथिलावयवसंयोग इति रावणप्र
णीते भाष्ये इदं पद्यत इति विवृतं नैवं प्रयोजिकं इदं तद्भाष्यमित्यर्थः तथा पादि द्व्यणुकगतह्रस्वत्वाणुत्वपरिमाणयोरनार
म्भकत्वाणुत्वपरिमाणयोरनारम्भकत्वाद्व्यभिचारः यद्यपि तार्किकाद्वाभ्यामेव परमाणुभ्यां द्व्यणुकं त्रिभिर्द्व्यणुकैः त्र्यणुक
मिति कल्पयन्ति तथापि तर्कस्याप्रतिष्ठानान्न नियम इति मत्वाप्युक्तं यद्यपि च द्व्यणुकेति काणादगणाः शुक्लादयः समा
नजातीयगुणारम्भकाः कार्यद्रव्यपरिमाणं तु न कारणगुणपरिमाणारभ्यं किंतु कारणगतसंख्यारभ्यमिति प्रक्रियेतल्ल

पा१

यद्यपि द्व्यणुके चतुरणुकमारभेते तदापि समानं द्व्यणुकसमवायिनां शुक्लादीनामारंभकत्वे अणुत्वह्रस्वत्वे
तद्व्यणुकसमवायिनो अपि नैवारभेते चतुरणुकसमहत्त्वदीर्घत्वपरिमाणयोगाभ्युपगमात् यद्यपि च द्व्यण्वः
परमाणवो वहूनि द्व्यणुकानि द्व्यणुकसहितो वा परमाणुः कार्यमारभते तदापि समानेषा योजना तदेवं यथा
परमाणोः परिमण्डलात्सतो न ह्रस्वं च द्व्यणुकं जायते महद्दीर्घं च त्र्यणुकादि न परिमण्डलं यथा वा द्व्यणुकादेः
ह्रस्वाच्च सतो महद्दीर्घं च त्र्यणुकं जायते नाणु नो तु ह्रस्वं एवं चेतनाद्ब्रह्मणोऽचेतनं जगज्जनिष्यते इत्यभ्युपगमे किं तव
छिन्नं अथ मन्यसे विरोधिना परिमाणान्तरेणाक्रान्तं कार्यद्रव्यं द्व्यणुकादीत्यतो नारंभकाणि कारणगतानि पा
रिमाण्डल्यादीनीत्यभ्युपगच्छामि न तु चेतनाविरोधिना गुणान्तरेण जगत आक्रान्तत्वमस्ति येन कारणगता चेतना
कार्ये चेतनान्तरं नारभेत न ह्यचेतना नाम चेतनाविरोधी कश्चिद्गुणोऽस्ति चेतनाप्रतिषेधमात्रत्वात् तस्मात्पारिमाण्ड
ल्यादिवैषम्यात्प्राप्नोति चेतनायाश्चारम्भकत्वमिति मैवं मंस्थाः यथा कारणे विद्यमानानामपि पारिमाण्डल्या
दीनामनारंभकत्वमेवं चैतन्यस्यापीत्यस्यांशस्य समानत्वात् ॥

इत्यर्थः एवं प्रक्रियां दर्शयित्वा सूत्रं योजयन्व्यभिचारमाह तदेवमिति परमाणुभ्य एव महद्दीर्घं चेत्यनियतप्रक्रियामाश्रि
त्योक्तो नियतप्रक्रियामाश्रित्य व्यभिचारमाह यथा वेति अणुह्रस्वेभ्यो द्व्यणुकेभ्योऽणु द्रव्यं न जायते ह्रस्वमपि न जायते इति व्य
भिचार इत्यर्थः ह्रस्वेवा शब्दस्यार्थान्तरानन्तरसमुच्चयार्थः तथा च ह्रस्वपरिमण्डलाभ्यां द्व्यणुकपरमाणुभ्यां यथा क्रमं महद्दीर्घा
त॰ णुत्वं नार्द्वतनं जायत इति सूत्रयोजना तत्र ह्रस्वात्महद्दीर्घं त्र्यणुकं परिमण्डलाद्द्व्यणुकमिति विभागः दृष्टान्तवै
षम्यं शङ्कते अथ मन्यस इति अचेतनेन विरोधिगुणेनेत्यत आह न ह्यचेतनेति कार्यद्रव्यस्य परिमाणान्तराक्रान्तत्वम

गीकृत्य विवक्षितां प्राशाम्य माह मैवमिति ॥

टीर

३१

अंगीकारेत्यजति नचेति उत्पन्नं हि परिमाणांतरं विरोधि भवति तदुत्पत्तेः प्रागविरोधाभावादणुके पारिमांडल्यारंभः किं न स्यादित्य
र्थः ननु विरोधि परिमाणेन सह द्रव्यं जायत इत्यत आह आरब्धमपीति सहोत्पत्तावप्रसिद्धात् अतो विरोधाभावः सिद्ध इ
तिभावः अणुत्वायारंभकत्वं ग्रहत्वात्पारिमांडल्यादेस्स्वसमानगुणानारंभकत्वमित्याशंक्य निषेधति नचेति व्यग्रत्वमन्यथासि
द्धिं नत्र हेतुः परिमाणांतरस्येति अस्य हेतुकत्वे समानोदाहरति कारणेति कारणानां द्व्यणुकानां बहुत्वात्त्र्यणुके महत्त्वमदो
महत्त्वाद्दीर्घमहत्त्वं हि तूलपिंडारब्धेति स्थूलतूलपिंडे प्रचयादवयवसंयोगविशेषान्महत्त्वमित्यर्थः महत्त्वविहृत्त्र्यणुके
परमाणुगतद्वित्वसंख्याया द्व्यणुके भवतीत्याह नेति यत्महत्त्वस्यासमवायिकारणं तदेव महत्त्वसमानाधिकरणस्य दीर्घत्वस्य प
रिमाणत्वस्यासमवायिकारणं तद्व्यणुत्वाविनाभूतह्रस्वत्वस्यासमवायिकारणमित्यतिदिशति एतेनेति अतो महत्त्वादौ त्र्य

नच परिमाणांतराक्रांतत्वं पारिमांडल्यादीनामनारंभकत्वे कारणं प्राक्परिमाणांतरारंभात्पारिमांडल्यादीनामारं
भकत्वोपपत्तेः आरब्धमपि कार्यद्रव्यं प्राग्गुणारंभात्क्षणमात्रमगुणं तिष्ठतीत्यभ्युपगमात् नच परिमाणांतरारंभे
व्यग्राणां पारिमांडल्यादीनां ततः स्वसमानजातीयपरिमाणांतरानारंभेन परिमाणांतरस्यानुत्पत्तेस्त्वाभ्युपगमात्
कारणमहत्त्वस्य कारणबहुत्वात्प्रचयविशेषाच्च महत्त्व नहि परिमाणः एतेन दीर्घत्वह्रस्वत्वे व्याख्याते इति ह्रिकाणाम्
जातित्वाणि न च सन्निधानविशेषात्कुतश्चित्कारणबहुत्वादीनामेवारंभे नन पारिमांडल्यादीनामभ्युपेत द्रव्यांतरारंभ गुणांतरे
परमाणोः सर्वेषामेव कारणगुणानां स्वाश्रयसमवायिविशेषात् तस्मात्स्वभावादेव पारिमांडल्यादीनामनारंभक
त्वं तत्र चेतनानामपीति द्रव्ये संयोगाच्च द्रव्यादीनां विलक्षणानामुत्पत्तिदर्शनात् समानजातीयोत्पत्तिव्यभिचारः
द्रव्यप्रकृते गुणोदाहरणमयुक्तमिति चेत् ॥

इतरत्वात्पारिमांडल्यादीनां व्यग्रत्वमसिद्धमितिभावः तेषां सन्निधिविशेषाभावात्समानगुणारंभकत्वमित्यपि न वाच्यमित्याह
नचेति पारिमांडल्यादीनामपि बहुत्वादिवत्समवायिकारणगतत्वाविशेषादित्यर्थः तेषामनारंभकत्वे कार्यद्रव्यस्य विरोधिगु
णाक्रांतत्वव्यग्रत्वसन्निधिर्वा न हेतुरित्युक्तिफलमाह तस्मादिति यावत्कारणगुणाः स्वसमानगुणारंभका इति व्याप्तेः सामा
न्यगुणेषु पारिमांडल्यादिषु व्यभिचारेऽपि पादव्यसमवायिगतो विशेषगुणः स्वसमानजातीयगुणारंभक इति व्याप्तेश्च त
न्तुसविशेषगुणत्वादारंभकत्वमुर्वीरमिति तन्नं द चित्रपटहेतुतंतुगतेषु नीलादिरूपेषु विजातीयचित्ररूपहेतुषु व्यभिचा
रात् तन्न स्यात्सत्वेन गुणत्वाभाववच्चेति मतं तन्न तस्माच्चेतनादि जातीयारंभायुक्तमित्याशंक्य तत्रोदाहरणांतरमाह संयोगादिति
ननु चेतनं प्रति कार्योपादानत्वाद्द्रव्यं तत्र विलक्षणस्योपादानमिति प्रकृते किंचिद्द्रव्यमेव विलक्षणकार्यकरमुदाहर्तव्यमित्यसं

कार्यसमानजातीयगुणारंभकत्वमनिबंधनमिति द्रष्टव्यं ॥

दचेतना।

गुण द्रव्यवच्चेतनारम्भ इति विलक्षणारम्भकत्वांशोयं दृष्टान्त इति परिहरति नेति अनियमः कणादसंमत इत्याह लक्षकारणेपीति एता
वतांशमात्रे यमनियमस्त्राह एतद्रक्रमिति नविलक्षणत्वस्यायेन पुनरुक्ताभावेप्यतिदेशाधिकरणेनतु पुनरुक्तिरिति शंकते नं
न्विति समानगुणारम्भनियमस्य पारिमाण्डल्यादिदृष्टान्तेन भंगार्थमस्यारम्भ इत्याह सत्यमिति तस्यैवातिदेशस्येत्यर्थः वै
शेषिकन्नतपरीत्यारम्भते उभयथापीति नास्यप्रासंगिकेन एवाधिकरणेन संगतिरपेक्षितेति मन्वानः प्रधानस्येश्वरानं
पेक्षितस्याकारणत्वेपि परमाणूनां तदपेक्षितानां कारणत्वमस्त्विति प्रत्युदाहरणसंगत्यास्याधिकरणेन तर्कमस्य वदन्नत्य
पमाह इदानीमिति द्व्यणुकादिक्रमेण परमाणुभिर्जगदारभ्यत इति वैशेषिकसिद्धान्तोत्र विषयः सकिं मानमूलोन्यथेति

तद्दृष्टान्तेन विलक्षणारम्भमात्रस्य विवक्षितत्वात नच द्रव्यस्य द्रव्यमेवोदाहर्तव्यं गुणस्य वा गुण एवेति कश्चिन्नियमः
इतरथापि सत्त्वकारोपि भवतो द्रव्यस्य गुणमयान्नहारप्रत्यक्षाप्रत्यक्षाणाम प्रत्यक्षत्वात्संयोगस्य पंचात्मकेन विषयते
इति यथा प्रत्यक्षाप्रत्यक्षयोर्भूम्याकाशयोः समवयत्संयोगो प्रत्यक्षः एवं प्रत्यक्षाप्रत्यक्षेषु पंचसु भूतेषु समवः
यच्छरीरमप्रत्यक्षं स्यान्नतु तच्च हि प्रशरीरं तस्मात्त्र्यपांचभौतिकमित्येतदुक्तं भवति गुणश्च संयोगो द्रव्यं शरीरं दृष्टप्र
तेत्यादिनीत्या विलक्षणोत्पत्तिः प्रपंचतानत्वेवं सतिते नैवेतदुक्तं नेति क्रमः तस्माद्व्याख्यात्युक्तं एतेनैव शेषिकप्रति
त्वति द्वणोयि समानन्यायतया कृतत्पतेनेव शिष्टापरिग्रहाश्च अपिव्याख्याता इति सत्यमेतत्तस्यैवत्र्यवैशेषिकस्य
क्रियारम्भतत्राकियानगतेन निदर्शनेन प्रपंचः कृतः उभयथापि न कर्मातस्तदभावः १२ इदानीं परमाणुकारणवादं
निराकरोति सचवाद इत्थमुत्तिष्ठते पटादीनिहि लोके सावयवानि द्रव्याणि स्वानुगतेरेव संयोगसचिवैस्तंत्वादिभिः
सद्रव्यैरारभ्यमाणानि दृष्टानि तत्सामान्येन यावत्किंचित्सावयवं तत्सर्वं स्वानुगतैरेव संयोगसचिवैस्तैस्तैर्द्रव्यैरार
ब्धमिति गम्यते सचायमवयवावयविविभागो यतो निवर्तते सोपकर्षपर्यन्तगतः परमाणुः सर्वं चेदं जगद्गिरिसमुद्रा

स्लोवेवृतिसंदेहे एवंपक्षयति सवेति तेःपटादिभिः सामान्येनेत्यादेः कार्यद्रव्यत्वं तेनेत्यर्थः विमतं सावयवं तत्त्वादिकं स्व
न्यूनपरिमाणसंयोगसचिवानेकद्रव्यारब्धं कार्यद्रव्यत्वात्पटादिवदिति प्रयोगः स्वेण परमाणुसिध्यर्थं निलाध्यविशेषणा
नि नन्वेतावता कथं परमाणुसिद्धिरित्यत्राह सचायमिति विमतं सावयवत्वं पक्षतावच्छेदकं यतो निवर्तते सत्स्वन्यूनपरिमाणस्यापि
कर्षस्य पूर्वतत्वेनावस्तानमभिमतेनावगतः परमाणुरित्यर्थः यावत्सावयवमनुमानप्रवृत्तेः द्व्यणुकस्यानद्रव्यं निरवयवं
सिध्यतीति भावः जगन्नित्यत्ववादात्कार्यद्रव्यत्वहेत्वसिद्धिरिति वदन्तं प्रत्याह सर्वं चेति विमतमायं तत्सावयवत्वात्पटवदि

सांख्यवैशेषिकवादनिरसनम् ॥

हेतोरसिद्धिं निरस्याप्रयोजकत्वं निरस्यति न चेति नैकतिविधा इत्याकांक्षायामाह तानीति प्रलयेते चामपि नाशात्त्वजगत्कारणत्वमि
त्याशंक्याह तेषां चेति अवयवानां विभागात्राशाद्यवयविनां नाशः परमाणूनां निरवयवत्वेनावयवविभागादेर्नाशहेतोरसंभ
वान्नेनाशाद्युत्पत्त्यर्थः तेषां नित्यत्वे फलितं सृष्टिक्रममाह ततइति एवकारेण दृष्टनसमानमूलत्वान्नेन वदान्तसमन्वयस्याविरोधाद
सिद्धिरिति एवं प्रत्येफलं तस्य भ्रान्तिमूलत्वाद विरोध इति सिद्धान्तयति न चैदमिति प्रलये भक्तानां परमाणूनामन्यतरकर्मणोभय
कर्मणा वा संयोगो वाच्यः कर्मणश्च निमित्तं प्रयत्नादिकं रेणं यथा प्रयत्नवदात्मसंयोगादहचेष्टा वा व्याघाभिघातात् तदिव

न चाकारणेन कार्येणाभवितव्यमित्यतः परमाणवो जगतः कारणमिति कणभुगभिप्रायः तानीमानि चत्वारि भूतानि भूमे
जः पवनान्तानि सावयवान्युपलभ्यन्ते चतुर्विधाः परमाणवः परिकल्प्यन्ते तेषां चापकर्षपर्यन्तगतत्वेन परतो विभागासंभ
वाद्विनश्यतां पृथिव्यादीनां परमाणुपर्यन्तो विभागो भवति स प्रलयकालः ततः सर्गकाले वायवीयेष्वणुष्वदृष्टापेक्षं ॥ ५२
५४ कर्मोत्पद्यते तत्कर्मस्वाश्रयं मणुमणवन्तरेण संयुनक्ति ततो द्व्यणुकादिक्रमेण वायुरुत्पद्यते एवमग्निरेव मापः एवं पृथि
व्येवमेव शरीरं सेन्द्रियमित्येवं सर्वमिदं जगदणुभ्यः संभवति अणुगतेभ्यश्च रूपादिभ्यो द्व्यणुकादिगतानि रूपादी
नि संभवन्ति तेनुपपन्नत्वाये नैतत्काणादा मन्यन्ते न चेदमभिधीयते विभागावस्थानां नावदणूनां संयोगः कर्मापेक्षोभ्युः
पगन्तव्यः कर्म च तत्त्वादीनां संयोगदर्शनात् कर्मणश्च कार्यत्वान्निमित्तं किमप्यभ्युपगन्तव्यं अनभ्युपगमे निमित्ताभा
वात्राणुष्वाद्यं कर्म स्यादभ्युपगमेपि यदि प्रयत्नोभिघातादिर्वा यथा दृष्टं किंचित्कर्मणो निमित्तमभ्युपगम्यते तस्या
संभवान्नैवाणुष्वाद्यं कर्म स्यात् नहि तस्यामवस्थायामात्मगुणः प्रयत्नः संभवति शरीराभावाच्छरीरप्रतिष्ठे
हि मनस्यात्मनः संयोगे सत्यात्मगुणः प्रयत्नो जायेत एतेनाभिघातादयोपि दृष्टनिमित्तं प्रत्याख्यातव्याः सर्गोत्तरकाल
हि तत्सर्वं नाद्यस्य कर्मणो निमित्तं संभवत्यथाऽदृष्टमाद्यस्य कर्मणो निमित्तमित्युच्यते तत्पुनरात्मसमवायि वा

लनहस्तनोदनादिव्यादिगमनं तद्धृदणुकर्मणोदृष्टं निमित्तमभ्युपगम्यते न वाहितीयकर्मोत्पत्तिः नाद्यं प्रयत्नादेः सृष्
त्तरकालीनत्वादित्युभयथापि न कर्मसंभवः अतः कर्मासंभवान्न तत्संयोगपूर्वकद्व्यणुकादिसर्गस्याभाव इति सूत्रार्थः शि
१०२ तस्य वेगवद्द्रव्यसंयोगविशेषाभिघातः स एव चलस्य नोदनमिति भेदः दृष्टनिमित्ताभावेप्यदृष्टवदात्मसंयोगादणुष्वकर्मेति
शंकते अथादृष्टमिति विकल्पपुरःसरं दूषयति तत्पुनरिति जडात्मवदणोराश्रयत्वं किं न स्यादिति मत्वा विकल्पः कृत इति

ति २

प्रशा.
टि.
३३

अत्रापि संयोजयति । उभयथेति जीवाधिष्ठितमदृष्टं निमित्तमस्त्वित्यत आह आत्मनश्चेति अचेतनत्वान्नाधिष्ठातृत्वमिति शेषः
मिनेश्वरस्याधिष्ठातृत्वमग्रे निराकरिष्यते अचेतनत्वमदृष्टस्य कर्मनिमित्तत्वाभावे हेतुं वक्तुं हेत्वन्तरमाह आत्मसमवायित्वेति
तद्वदृष्टमपि स्यादत्र प्रयत्नयुक्ते क्रियाहेतुरिति शङ्कते अदृष्टवतेति विभुसंयोगस्याणुभूतसदासत्वात् क्रियासन्तानः प्रलयाभा
वः स्यादिति दूषयति तत्वं चेति कादाचित्कप्रवृत्तेरदृष्टनियमस्त्वायातोपीश्वरान्नियम इत्यत आह नियामकान्तरेति यज्ज्ञानं करी
रजन्यमिति व्याप्तिविरोधे न नित्यज्ञानासिद्धेस्तद्गुण ईश्वरो नास्ति अस्तित्वेपि तद्दासत्वान्न नियामकत्वमिति भावः सत्रार्थं निगमयति तः
देवमिति संयोगस्य हेतुत्वं खण्डयित्वा स्वरूपं खण्डयति संयोगस्याणोरिति संयोगस्य व्याप्यवृत्तित्वे एकस्मिन्नितरस्यानभावात्का

उभयथापि नादृष्टनिमित्तमणुषु कर्मावकल्पते नादृष्टस्याचेतनत्वात् न ह्यचेतनं चेतनेनानधिष्ठितं स्वतन्त्रं प्रवर्तते प्रवर्त
यति वेति सांख्यप्रक्रियायामभिहितम् आत्मनश्चानुत्पन्नचैतन्यस्य तस्यामवस्थायामचेतनत्वात् आत्मसमवायित्वा।
भ्युपगमाच्च नादृष्टमणुषु कर्मणो निमित्तं स्यात् असंबन्धाददृष्टवतो पुरुषेणाणूनामसंबन्ध इति चेत् संबन्धस्तत्प्रत्य
हतिमात्मनः प्रसंगो नियामकान्तराभावात् न दैवं नियतस्य कस्यचित् कर्मनिमित्तस्यानुभावात् नाण्वाद्यं कर्म स्यात् कर्माभावा
त्तन्निबन्धनः संयोगो न स्यात् संयोगाभावात्तन्निबन्धनं द्व्यणुकादिकार्यजातं न स्यात् संयोगश्चाणोरणवन्तरेण सर्वात्मना वा
स्यादेकदेशेन वा सर्वात्मना चेदुपचयानुपपत्तेरणुमात्रत्वप्रसंगः दृष्टविपर्ययप्रसंगश्च प्रदेशवतो द्रव्यस्य प्रदेशवता
द्रव्यान्तरेण संयोगस्य दृष्टत्वात् एकदेशेन चेत् सावयवत्वप्रसंगः परमाणूनां कल्पिताः प्रदेशाः सन्तीति चेत् कल्पितानामवस्तु
त्वात् अवस्त्वेव संयोग इति वस्तुनः कार्यस्यासमवायिकारणं न स्यात् असति चासमवायिकारणे द्व्यणुकादिकार्यद्रव्यं नोत्पद्ये
त यथा चादिसर्गे निमित्ताभावात्संयोगोत्पत्त्यर्थं कर्माणूनां न संभवति एवं महाप्रलयेपि विभागोत्पत्त्यर्थं कर्म नैवाणूनां संभ
वेत् न हि तत्रापि किंचित् निमित्तं दृष्टमदृष्टमपि भोगप्रसिद्ध्यर्थं न प्रलयप्रसिद्ध्यर्थमिति निमित्ताभावान्न स्यादणू
नां संयोगोत्पत्त्यर्थं विभागोत्पत्त्यर्थं वा कर्म नाणुसंयोगविभागाभावात्तदायत्तयोः सर्गप्रलययोरभावः प्रसज्येत तस्मादनुपपन्नोयं प

र्थं स्यात् प्रसूत्वायोगात्सर्वं कार्यं परमाणुमात्रं स्यादित्यर्थः किंच सांशद्रव्यसंयोगस्यैकांशवृत्तित्वं दृष्टं न हि शेषांशव्याप्यवृत्तित्वं न कल्प्यमित्याह
दृष्टेति परमाणोः संयोग एकदेशेन चेदिति संबन्धः दिग्भेदेन कल्पितप्रदेशस्य संयोगस्यापि कल्पितत्वात्ततः कार्यं नोत्पद्येत वा सिध्या
स्यादित्यपसिद्धान्त इत्यर्थः कारणदानां सर्गप्रस्तुक्तौ सूत्रं योजयित्वा प्रलयनिरासेपि सूत्रं योजयति यथा चेति परमाणूनां कर्मणा संयोगात्
सर्गः विभागात्प्रलय इति प्रक्रिया न युक्ता युगपदनेन परमाणूनां विभागे नियतस्याभिघातादेरदृष्टस्य निमित्तस्यासत्त्वाद्धर्माधर्म
रूपादृष्टस्य सुखदुःखार्थत्वेन सुखदुःखध्वंसप्रलयप्रयोजकत्वायोगान्नादृष्टनिमित्तेन कर्मणा विभागः संभवति तथा चादृष्टादृष्ट
निमित्तयोरसत्त्वादुभयथापि संयोगार्थत्वेन च कर्म नास्ति अतः कर्माभावात् तयोः संयोगविभागपूर्वकयोः सर्गप्रलययोरभाव इ

३३

१

समवायाभ्युपगमाच्च तदभावः अणुवादासंभवति योगपत्तया संबध्यते द्व्यणुकसमवाययोः परमाणुभिन्नत्वसाम्याद्द्व्यणुकवत्समवाय
स्यापि समवायान्तरमित्यनवस्थितिरित्यर्थः ननु इह तंतुषु पट इत्यादिविशिष्टधीनियामकः समवायो न संबंधांतरमपेक्षते स्वरूप
तो वनित्यसंबंधत्वादिति शंकते ननु इहेति संयोगस्यापि स्वरूपसंबंधोपपत्तेः समवायो नस्यादिति दूषयति नेति संबंधिभिन्न
त्वाद्युपेता समवायस्यापि तुल्या गुणपरिभाषायाश्चेति गुणत्वाभावेपि कर्मसामान्यादीनां समवायोगीकाराद्गुणत्वे समवायि

समवायाभ्युपगमाच्च साम्यादनवस्थितेः १४ समवायाभ्युपगमाच्च तदभाव इति प्रकृतेनाणुवादनिराकरणेन संबध्यते द्व्य
भ्यां चाणुभ्यां द्व्यणुकमुत्पद्यमानमत्यन्तभिन्नमणुभ्यामणोः समवैतीत्यभ्युपगम्यते भवता न चैवमभ्युपगच्छता शक्यते
ऽणुकारणता समर्थयितुं कुतः साम्यादनवस्थितेः यथैव ह्यणुभ्यामत्यन्तभिन्नं सद्द्व्यणुकं समवायलक्षणेन संबंधेन ता
भ्यां संबध्यते एवं समवायोपि समवायिभ्योत्यन्तभिन्नः समवायलक्षणेनान्येनैव संबंधेन समवायिभिः संबध्येतात्यंतभे
दसाम्यात् ततश्च तस्य तस्यान्योन्यः संबंधः कल्पयितव्य इत्यनवस्थैव प्रसज्येत ननु इहप्रत्ययग्राह्यः समवायो नित्यसंबद्ध
एव समवायिभिर्गृह्यते नासंबद्धः संबंधान्तरापेक्षो वा ततश्च न तस्यान्यः संबंधः कल्पयितव्यो येनानवस्था प्रसज्येतेति
नेत्युच्यते संयोगोप्येवं सति संयोगिभिर्नित्यसंबद्ध एवेति समवायवन्नान्यं संबंधमपेक्षेत अर्थान्तरत्वात्संयोगः संबंधा
न्तरमपेक्षेत समवायोपि तर्ह्यर्थान्तरत्वात्संबंधान्तरमपेक्षेत न च गुणत्वात्संयोगः संबंधान्तरमपेक्षते न समवायो
ऽगुणत्वादिति युज्यते वक्तुं अपेक्षाकारणस्य तुल्यत्वात् गुणपरिभाषायाश्चातन्त्रत्वात् तस्मादर्थान्तरं समवायमभ्यु
पगच्छतः प्रसज्येतैवानवस्था प्रसज्यमानायां चानवस्थायामेकासिद्धौ सर्वासिद्धेर्द्वाभ्यामणुभ्यां द्व्यणुकं नैवोत्पद्येतेत
स्मादप्यनुपपन्नः परमाणुकारणवादः नित्यमेव च भावात् १५ अपि चाणवः प्रवृत्तिस्वभावा वा निवृत्तिस्वभावा
वा उभयस्वभावा वा अनुभयस्वभावा वाभ्युपगम्यन्ते गत्यन्तराभावात् चतुर्धापि नोपपद्यते प्रवृत्तिस्वभावत्वे नित्यमे
व प्रवृत्तेर्भावात्प्रलयाभावप्रसंगः निवृत्तिस्वभावत्वेपि नित्यमेव निवृत्तेर्भावात्सर्गाभावप्रसंगः उभयस्वभावत्वं च वि
रोधादसमंजसं अनुभयस्वभावत्वे तु निमित्तवशात् प्रवृत्तिनिवृत्त्योरभ्युपगम्यमानयोरदृष्टादेर्निमित्तस्य नित्यसन्निधानान्नि

तेन व्यापकं नापि व्याप्यं गुणस्यापि समवायवत्स्वरूपसंबंधसंभवेन व्याप्यत्वकलनकीभावात्तस्मात्संबंधिभिन्नत्वमेव संबंधान्तरापे
क्षायां कारणं तत्समवायेपि तुल्यं [illegible] दनवस्था दुर्वारा तां च मल्लत्यकरीतु [illegible] सिद्धौ समवेतद्व्यणुकासिद्धिरित्यर्थः
[illegible] अपि चेति अनुभयस्वभावत्वे नैमित्तिकी प्रवृत्तिर्वाच्या निमित्तं च कालादृष्टादिकं नित्यसन्निहितमिति नि
त्यमेव प्रवृत्तिप्रसंगः तस्मान्निमित्तत्वे प्रवृत्त्यभाव इत्यर्थः ॥ मवा२ ॥ ॥

२७५

किं च परमाणवः समवायिकारणं वेतः कारणापेक्षया स्थूला अनित्याश्च रूपवत्वात् रसवत्वात् गन्धवत्वात् स्पर्शवत्वाद् घटवदिति सूत्रं योजयित्वं परप्रक्रियामाह सावयवानामित्यादिना नन्वत्र परमाणुत्वं यत्तावच्छेदकं तद्धि रूपं स्थूलत्वं कथं साध्यं तद्वृत्तिः चेत् न वायुत्वतेजस्त्वादेः पृथगवच्छेदकत्वात् न चाप्रयोजकता कारणस्य स्थूलत्वे नित्यत्वं चास्त्वं रूपादिमत्वायोगात् न च तद्विवायुः तद्रूपं कारणं वानिति पृथक्साधनेन रूपादिहेतुत्वाभागासिद्ध्यभावेपि सिद्धसाधनतास्यादिति वाच्यं यत्र स्पर्शस्तत्कारणं यत्र रूपं तत्कारणमिति व्याप्तिग्रहकाले वायुतो यवच्छेदेन साध्यासिद्ध्यभावादिति भावः परमाणवो नित्याः सत्त्वे सत्यकारणवत्वादात्मवदित्यनुमानेन प्रत्यक्षविरोधमाशङ्क्य परिहरति यच्चानित्यत्वइति सत्त्वं भावत्वं प्रागभावनिरासार्थं नित्यत्वप्रतिषेधः स इति सत्प्रतिपक्षमन्यत्रापि दोषमिथ्यात्वं दूषयति ॥

रूपादिमत्त्वाच्च विपर्ययोदर्शनात् २८ सावयवानां द्रव्याणामवयवशो विभज्यमानानां यतः परो विभागो न संभवति ते चतुर्विधा रूपादिमन्तः परमाणवः चतुर्विधस्य रूपादिमतो भजन्मौतिकस्यारंभका नित्याश्चेति यद्वैशेषिका अभ्युपगच्छन्ति सते षामभ्युपगमो निरालंबन एव यतो रूपादिमत्वात् परमाणूनामणुत्वनित्यत्वविपर्ययः प्रसज्येत परमकारणापेक्षया स्थूलत्वमनित्यत्वं च तेषामभिप्रेतविपरीतमापद्येतेत्यर्थः कुतः एवं लोके दृष्टत्वात् यद्धि लोके रूपादिमद्वस्तु तत्स्वकारणापेक्षया स्थूलमनित्यं च दृष्टं तद्यथा पटस्तन्तूनपेक्ष्य स्थूलो अनित्यश्च भवति तेन वस्त्वांशूनपेक्ष्य स्थूला अनित्याश्च भवंति तथा चामी परमाणवो रूपादिमन्तस्तैरभ्युपगम्यन्ते तस्मात्तेपि कारणवन्तस्तदपेक्षया स्थूला अनित्याश्च प्राप्नुवंति यच्चानित्यत्वे कारणं तेनोक्तं सत्कारणवन्नित्यमिति तदप्येवं सत्यणुषु न संभवति उक्तेन प्रकारेणाणूनामपि कारणवत्त्वोपपत्तेः यदपि नित्यत्वे द्वितीयं कारणमुक्तमनित्यमिति च विशेषतः प्रतिषेधाभाव इति तदपि नावश्यं परमाणुनित्यत्वं साधयत्यसति हि यस्मिन्कस्मिंश्चिन्नित्ये वस्तुनि नित्यपदेन नञः समासो नोपपद्येत न पुनः परमाणुनित्यत्वमेवापेक्ष्यते तच्चास्त्येव परमकारणं ब्रह्म न च शब्दार्थव्यवहारमात्रेण कस्यचिदर्थस्य प्रसिद्धिर्भवति प्रमाणान्तरसिद्धयोः

नित्यं॰

प्रतियोगिकः अभावत्वाद्दृष्याभाववदिति नित्यत्वस्य क्वचित्सिद्धौ कार्यमनित्यमिति विशेषतः कार्यनित्यत्वप्रतिषेधात्कारणमजप्रतियोगिकः ... इति निरूपणा पदपीति कारमाणुषु नित्यत्वं सिध्यति अन्यथा प्रतियोग्यभावप्रतिषेधानुपपत्तेरिति कणादोक्तमनूद्यान्यथासिद्ध्या दूषयति यदपीति कारणनित्यत्वस्य प्रमाणेन नित्यत्वप्रतिषेधव्यवहारमङ्गीकृत्य ब्रह्माणि प्रतियोगिप्रसिद्धिरुक्ता वस्तुतस्तु विशेषव्यवहारस्य वाक्सिद्धः कारणनित्यत्वस्य प्रमाणान्तरेण ज्ञानविनाकार्यमनित्यमिति व्यवहारायोगादित्याह न च शब्देति यदि प्रमाणान्तरं कारणनित्यत्वे स्यात्तदायं व्यवहारः समूलो भवति ततो मूलज्ञानात्प्राग्व्यवहारमात्रात्र वस्तु सिद्धिः वेदस्तु व्यवहारादपि तत्सिद्धिः प्रसंगः ॥ ॥ ॥ ॥
तत्तेनैव विप्रोषसिद्धेर्व्यवहारोपन्यासवैयर्थ्यमिति भावः ॥ ॥

अपि नित्यमिति च विशेषतः प्रतिषेधाभाव इति कार्यस्य नित्यत्वाभावप्रकारकं ज्ञानं नित्यत्वप्रतियोगिकं नाव्यभिचरितं धर्मीति स्वकारणेन नित्यत्वं यावत् स्यापद्यते अन्यथा यदि नित्यत्वं न स्यात्तदा नित्यत्वप्रतियोगिकस्य ज्ञानस्य प्रसिद्धिरिति भावः ३

२४

परमाणूनां नित्यत्वं व्यापयतीति ३म्ः३

एवं परमाणुनित्यत्वैकारणं कारणद्वयं निरस्य तृतीयं निरस्यति यदपीति सतामणूनां दृश्यमानस्थूलकार्याणामप्रत्यक्षाणा
कारणत्वानुमविधेयतियदिस्यात्रार्थः तदप्यसत् कारणत्वे नित्यत्वे हेतुः स्यात्तत्र द्व्यणुके व्यभिचारादित्यर्थः यद्यारम्भकद्रव्यस्यान्य
त्वे हेतुविशेषणं तदा विशेषणवैयर्थ्यमापद्येत पुनरपि स्वेष्याह अथेत्यादिना परमाणवो नित्याः नाशकानुपलम्भादात्मवदि
तितत्राप्युपमाशङ्कते अत्रापीति तत्रावयवानां विभागान्नाशाद्वा पटादिनाशो दृष्टः तच्च द्वयं निरवयवाणूनां नास्तीति नित्य
त्वमित्यर्थः परिणामवादमाश्रित्याणूनां नाशकं किञ्चित्संभवतीति तद्धरति नेति अवयवानां संयोगेन द्रव्यान्तरोत्पत्तिरा
रम्भ इति यदि मतं स्यात् तदा द्रव्यविनाशो द्वाभ्यामेवेति नियमः स्यात्तारम्भमाननास्ति संयुक्तं तन्त्वन्तपटादृष्टानादतः कारण।

यदपि नित्यत्वे तृतीयं कारणमुक्तमविद्या चेति तदप्येवं विशीर्येत मतोपरि दृश्यमानानां कार्याणां [कारणानां] प्रत्यक्षे [illegible]णाग्र
हणमविद्येति तत्राणूनामेकनित्यताप्यापद्येत अपाद्रव्यत्वे सतीति विशेष्यते तथाप्यकारणत्वमेव नित्यतानिमित्तमापद्येत
तस्य च सामग्रेकत्वात् अविद्या चेति पुनरुक्तं स्यात् अपापि कारणविभागात्कारणविनाशाद्वान्यस्य तृतीयस्य वि
नाशहेतोरसंभवाविद्यासा परमाणूनां नित्यत्वस्यापयतीति व्याख्यायेत नावपर्यविनप्रपट्ठलहाभ्यामेव हेतुभ्यामिति
नष्टमर्हतीति नियमोऽस्ति संयोगात्तचिवेहसनेकस्मिन्नद्रव्ये द्रव्यान्तरस्यारम्भकेऽनुपगम्यमाने एतदेव स्यात् यदा त्वपास्त
विशेषसमानाकारणकाविशेषवदवस्थान्तरमापद्यमानमारम्भकमभ्युपगम्यते तदा तन्तुकाठिन्यविलयनवन्न
ह्यवस्थाविलयनेनापि विनाश उपपद्येत तस्माद्रूपादिमत्त्वात् स्यादभिप्रेतविपर्ययः परमाणूनां तस्माद्युक्तमुपपन्नः
परमाणुकारणवादः उभयपक्षोक्तदोषात् ॥१७॥ गन्धरसरूपस्पर्शगुणा स्थूला पृथिवी रूपरसस्पर्शगुणाः सूक्ष्मा आपः रू
पस्पर्शगुणं सूक्ष्मतरं तेजः स्पर्शगुणः सूक्ष्मतमो वायुरिति एवमेतानि चत्वारि भूतानि उपचितापचितगुणा
नि स्थूलसूक्ष्म[illegible]सूक्ष्मतरसूक्ष्मतमतारतम्योपेतानि च लोके लक्ष्यन्ते ॥ ॥१८॥

मेवमेतानि निर्विशेषं विशेषवदवस्थान्तरतया कार्यमित्यनुभवबलाद्दार्ढ्यं तथा चाणूनामप्यविद्यापरिणामरूपाणां प्रलय
निमित्तेन कालादिना पिण्डात्मकस्वरूपतिरोभावेन कारणभावापत्तिर्विनाश उपपद्यते यथाग्निसंपर्कीद्धृतकाठिन्यम
वं संयोगस्यावयवानां च नाशं विनैव लीयते तत्र काठिन्यस्य संयोगविशेषत्वेन गुणत्वात् द्रव्यनाशेनोदाहरणत्व
मिति शङ्कां [illegible]णाव द्रव्यस्यापि कृतत्वं विनाशउत्पन्नोदाहरणं कृष्णपरिभाषायामाज्ञात्वा घृतमपि घृते काठिने
द्रव्यमित्यनुसृत्य घृतपरिणामविशेषो द्रव्यमेव काठिन्यं न च द्रव्यत्वेऽप्यवयवविभागादेव तस्य नाश इति वाच्यं घृतस्य परि
णामिनः एकत्वेन विभागासंभवात्परमाणुकाठिन्यनाशेन तदसंभवाच्च निभावः किं च शलयेनासौ द्रवीभवनान्वयीकिं च नन्य
त्वेनानाशासिद्धिस्तस्मान्नैव परमकारणत्वमित्युपसंहरति तस्मादिति ॥ ॥ रामः ॥

स्या॰
सि॰ सि॰
३५

यद्यस्मादधिकगुणवत्तत्तस्मात्स्थूलमिति व्याप्तिमङ्गीकृत्य विकल्पयति तद्वदिति पार्थिवः परमाणुः अधिकगुणस्ततएकैकन्यून
गुणाज्जलादिपरमाणव इति कल्पितेन वा आद्ये दोषमाह कल्प्यमानइति मत्स्यपचयात् स्थौल्यादित्यर्थः पार्थिवाणुरा
प्यात्स्थूल अधिकगुणवत्त्वात् घटवदित्येवं प्रयोक्तृभिः अप्रयोजकत्वं निरस्यति नचान्तरेणेति दृष्टविरोधः स्यादिति भावः
नेतिपक्षे सर्वेषामणूनां साम्यार्थमेकैकगुणवत्त्वं वा साकल्यगुणवत्त्वं वा उभयथापि दोषमाह अकल्प्यमाने त्वित्यादिना
नकेवलमणुवादस्य युक्त्या उपेक्षा किं तर्हि शिष्टबहिष्कृतत्वात् ग्रन्थतोऽर्थतश्चाग्राह्यत्वमित्याह अपरिग्रहश्चेति चका

गु२
तद्वत्परमाणवोऽप्युपचितापचितगुणाः कल्प्येरन् तथा उभयथापि च दोषानुषङ्गोऽपरिहार्य एव स्यात् कल्प्यमाने
तावदुपचितापचितगुणत्वे उपचितगुणानां मूर्त्युपचयादपरमाणुत्वप्रसङ्गः नचान्तरेणापि मूर्त्युपचयं गुणोप
चयो भवतीत्युच्यते कार्येषु गुणोपचये मूर्त्युपचयदर्शनात् अकल्प्यमाने तूपचितापचितगुणत्वे परमाणुत्वसा
म्यप्रसिद्धये यदि तावत्सर्व एकैकगुण एव कल्प्येरन् ततस्तेजसि स्पर्शस्योपलब्धिर्न स्यात् अप्सु रूपस्पर्शयोः पृथि
व्यां च रसरूपस्पर्शानां कारणगुणपूर्वकत्वात्कार्यगुणानां अथ सर्वे चतुर्गुणा एव कल्प्येरन् ततोऽप्स्वपि गन्धस्योप
लब्धिः स्यात्तेजसि गन्धरसयोर्वायौ गन्धरूपरसानां नचैवं दृश्यते तस्मादप्यनुपपन्नः परमाणुकारणवादः अप
रिग्रहाच्चात्यन्तमनपेक्षा १८ प्रधानकारणवादो वेदविद्भिरपि कैश्चिन्मन्वादिभिः सत्कार्यत्वाद्यंशोपजीवनाभिप्रा
येणोपनिबद्धः अयं तु परमाणुकारणवादो न कैश्चिदपि शिष्टैः केनचिदप्यंशेन परिगृहीत इत्यत्यन्तमेवानादरणीयो
वेदवादिभिः अपि च वैशेषिकाः तन्त्रार्थभूतान्षट्पदार्थान्द्रव्यगुणकर्मसामान्यविशेषसमवायाख्यानत्यन्तभिन्नान्
भिन्नलक्षणानभ्युपगच्छन्ति यथा मनुष्योऽश्वः शश इति तथात्वं चाभ्युपगम्य तद्विरुद्धं द्रव्याधीनत्वं शेषाणामभ्युप
गच्छन्ति तन्नोपपद्यते कथं यथाहि लोके शशकुशपलाशप्रभृतीनामत्यन्तभिन्नानां सतां नेतरेतराधीनत्वं भवति
एवं द्रव्यादीनामत्यन्तभिन्नत्वान्नैव द्रव्याधीनत्वं गुणादीनां भवितुमर्हतीति ॥

निर्गुण२
तार्थं प्रपंचयितुमुपक्रमते अपिचेति अत्यन्तभेदज्ञापकमाह भिन्नलक्षणानिति द्रव्यगुणकर्मणां द्रव्यत्वगुणत्व
कर्मत्वजातयो लक्षणं अथवा यथायथं वा निर्गुणत्वे सति जातिमदक्रियात्वं गुणलक्षणं संयोगविभागयोर्निरपेक्ष
कारणं कर्म नित्यमेकमनेकसमवेतं सामान्यं नित्यद्रव्यवृत्तयो नेता विशेषाः नित्यसंबंधः समवाय इति भिन्नानि लक्ष
णानि तेभ्योऽत्यन्तभेदसिद्धिरित्यर्थः तथात्वमत्यन्तभिन्नत्वं तेन विरुद्धो योधर्मधर्मिभावः गुणादयो न
द्रव्यधर्माः स्युः ततोऽत्यन्तभिन्नत्वाच्छशकुशपलाशादिवदित्यर्थः ॥ ॥ रामः ॥

लि ४

३॥

तर

भेदबाधकमनुपपत्त्यभेदमाह अयमभवतीति गुणादिषु तदधीनत्वं तच्च तदन्वयव्यतिरेकसिद्धं तथा च गुणादयो द्रव्याभिन्नाः द्रव्याधीनत्वात्
यद्यस्माद्भिन्नं तन्न तदधीनं यथा घटपटाभिन्नाकृतिरित्यर्थः अभेदे द्रव्यं गुण इति शब्दप्रत्ययभेदः कथं तत्राह द्रव्यमिति कल्पितभेदोपप
त्तेरित्याशयः अन्यथास्मत भेदवदत्यन्ताभेदेपि धर्मधर्मित्वायोगादिति मंतव्यं अत्र गुणादीनां द्रव्यतादात्म्यमिति वदं तार्किकमन्यथ

माह नघासतीति सांख्यो वेदांतिनश्चाहुः यद्वा कापिलस्यापि तादात्म्यसिद्धांत इति सांख्यग्रहणं यद्यपि तदधीनत्वं तद्बुद्धित्वं तच्च
धूमेनात्यग्निं विनापि भावात्तथापि तत्कार्यत्वं तदधीनत्वमतो व्यभिचारं शंकते नन्विति कार्यत्वमन्यत्वं चांगीकरोति सत्यमिति

अयुमवतिद्रव्याधीनत्वं गुणादीनां ततो द्रव्याभावे भावाद्द्रव्याभावेभावात् द्रव्यमेव संस्थानादिभेदादनेकशब्दप्रत्ययभाग्भ
वति यथा देवदत्त एक एव सन्नवस्थान्तरयोगादनेकशब्दप्रत्ययभाग्भवति तदुक्तं तथा तत्तिसांख्यसिद्धांतप्रसंगः स्वसिद्धा
न्तविरोधश्चापद्येयातां नन्वग्नेरन्यस्यापि धूमस्यान्यधीनत्वं दृश्यते सत्यं दृश्यते भेदप्रतीतेस्तु तत्राग्निधूमयोरन्यत्वं निश्ची
यते इह तु शुक्लः केवलो रोहिणी धेनुर्नीलमुत्पलमिति द्रव्यस्यैव तत्तद्रूपतया तेन तेन विशेषेण प्रतीयमानत्वान्न द्रव्यगु
णयोरग्निधूमयोरिव भेदप्रतीतिरस्ति तस्माद्द्रव्यात्मकता गुणस्यैवं कर्मसामान्यविशेषसमवायानां द्रव्यात्मकता व्याख्या
ता गुणादीनां द्रव्याधीनत्वं द्रव्यगुणयोरयुतसिद्धत्वादिति यदुच्यते तत्पुनरयुतसिद्धत्वमपृथग्देशत्वं वा स्यादपृथक्काल
त्वं वा अपृथक्स्वभावत्वं वा सर्वथापि नोपपद्यते अपृथग्देशत्वे तावत्स्वाभ्युपगमो विरुध्यते कथं तंतवारब्धो हि पटः तंतु
देशोभ्युपगम्यते न पटदेशः पटस्तु तद्गुणाः शुक्लत्वादयो पटदेशा अभ्युपगम्यन्ते न तंतुदेशाः यथाहुः द्रव्याणि द्रव्या
न्तरमारभंते गुणाश्च गुणान्तरमिति तंतवो हि कारणद्रव्याणि कार्यद्रव्यं पटमारभंते तंतुगताश्च गुणाः शुक्लादयः कार्य
द्रव्ये पटे शुक्लादिगुणान्तरमारभंते इति हि तेभ्युपगच्छंति सोभ्युपगमो द्रव्यगुणयोरपृथग्देशत्वेभ्युपगम्यमाने बाध्येत अ
पृथक्कालत्वमयुतसिद्धत्वमुच्यते सव्यदक्षिणयोरपि गोविषाणयोरयुतसिद्धत्वं प्रसज्येत तथापृथक्स्वभावत्वे त्व
युतसिद्धत्वे न द्रव्यगुणयोरात्मभेदः संभवति

तथापि तादात्म्येन प्रतीयमानत्वस्य हेतुत्वं विवक्षितत्वान्न व्यभिचार इत्याशयः अस्य हेतोरन्यथासिद्धिमाशंकते गुणादीना
मिति गुणादीनां द्रव्येणाभेदाभावेपि अयुतसिद्धत्वेन तादात्म्यप्रतीतिसिद्धिरित्यर्थः दूषयितुं विकल्पयति तत्पुनरिति पृथग्दे
शत्वस्य पटनिष्ठत्वात्पटस्य तंतुदेशत्वाभावाच्छुक्लः पट इति सामानाधिकरण्यप्रतीतिर्न स्यादित्याशयं दूषयति अपृथग्देश
त्व इति कारणद्रव्यं विवृणोति तंतवो हीति स्वभावो हि स्वरूपं तस्यापृथक्त्वे स्वरूपाभेदसिद्धिरित्याह अपृथक्स्वभावत्व इति

अभेदे युक्तिमाह नखेति गुणास्तेत्यर्थः एवं षट्पदार्थाः अत्यंतभिन्ना इति सिद्धांतो न भवविरोधेन दूषितः सिद्धांतांतरं दूषयति युतेति
अयुतसिद्धत्वं किमभयोः हेतुतान्यतरस्य नाद्य इत्याह प्रागिति द्वितीयमाशंक्य दूषयति अपेत्यादिना कारणस्य यथा सिद्धत्वेपि कार्य
मप्रयुक्तिसिद्धमित्युक्तमपेनासंबंधीति द्रव्यसिद्धस्यैवेति विकल्पयत्वाद्यं दूषयत्वा द्वितीयं शंकते सिद्धमस्त्वेति सतोरप्राप्तयोः
प्राप्तिः संयोग इत्यभ्युपगमात्तत्पटयोरपि संयोगापत्तिरिति परसिद्धांतः स्यादित्यर्थः संयोजातपरस्य क्रियाभावात्कथं संयोग
स्तत्राह यद्येति किंच संबंधस्यापि संबंधे नवस्थानादसंबंधस्यानियामकत्वात्संबंधोपि दुर्निरूप इत्याह नापीति संबंधःसं

तस्तादात्म्येनैव प्रतीयमानत्वात् युतसिद्धयोः संबंधः संयोगो युतसिद्धयोस्तु समवाय इत्ययमभ्युपगमोस्त्वेव तेन
प्रा प्राक्सिद्धस्य कार्यात्कारणस्यायुतसिद्धत्वानुपपत्तेः अपान्यतरापेक्ष एवायमभ्युपगमः स्यादयुतसिद्धस्य का
र्यस्य कारणेन संबंधः समवाय इति एवमपि प्रागसिद्धस्यालब्धात्मकस्य कार्यस्य कारणेन संबंधो नोपपद्यते इत्यायत्तत्वा
त्संबंधस्य सिद्धमतत्वात्संबंधस्य तद्वृत्ति चेत् प्राक्कारणसंबंधात्कार्यस्य सिद्धाविभ्युपगम्यमानायामयुतसिद्ध्यभावात्का
र्यकारणयोः संयोगविभागौ न विद्येते इतीदं दुरुक्तं स्यात् यथा चोत्पन्नमात्रस्याक्रियस्य कार्यद्रव्यस्य विभुभिराका
शादिभिर्द्रव्यांतरैः संबंधः संयोग एवाभ्युपगम्यते न समवायः एवं कारणद्रव्येणापि संबंधः संयोग एवस्यान्न सम
वा८ वायः नापीति संयोगस्य समवायस्य संबंधस्य संबंधिव्यतिरेकेणास्तित्वे किंचित्प्रमाणमस्ति संबंधिशब्दप्रत्ययव्य
तिरेकेण संयोगसमवायशब्दप्रत्ययदर्शनात्तयोरस्तित्वमिति चेत् नेकत्वेपि स्वरूपबाह्यरूपापेक्षयानेकशब्द
३१ प्रत्ययदर्शनात् यथैकोपि सन्देवदत्तो लोके स्वरूपं संबंधिरूपं वापेक्ष्यानेकशब्दप्रत्ययभाग्भवति मनुष्यो ब्राह्म
णः श्रोत्रियो वदान्यो बालो युवा स्थविरः पिता पुत्रः पौत्रो भ्राता जामातेति यथा चैकापि सती रेखा स्थानान्यत्वेन
निविशमानैकदशशतसहस्रादिशब्दप्रत्ययभेदं अनुभवति तथा संबंधिनोरेव संबंधिशब्दप्रत्ययव्यतिरेकेण सं
योगसमवायशब्दप्रत्ययार्हत्वं न व्यतिरिक्तवस्त्वस्तित्वेन अनुपलब्धिलक्षणप्राप्तस्यानुपलब्धेरभावो वस्त्वं

तरंबंधिभिन्नत्वाद्विलक्षणशब्दधीगम्यत्वाद्धस्त्वं नरवदिति शंकते संबंधीति कल्पितभेदसाधने सिद्धसाधनता वस्तुभेदसा
धने तव्यभिचार इति समाधत्ते नेकत्वेपीति स्वरूपेणैव मनुष्यादिशब्दभाग्वपुत्राद्यपेक्षयापि तत्यादिविलक्षणशब्द
धीगम्यो भवति न च भिद्यत इति व्यभिचार इत्यर्थः फलितमाह अनुपलब्धीति विलक्षणशब्दधीगम्यत्वादिरनुपलब्धिव
दितेन लक्षणेन लिंगेन प्राप्तस्य वस्त्वंतरस्य संयोगादेः संबंधिव्यतिरेकेणानुपलब्धेरभावो निश्चीयत इत्यर्थः नेह
गलिद्धयस्मैनंतर्या तिरेकेण संयोग उपलभ्यते समवायस्तु न कस्यापि किंचिदप्यनुभवमारोहतीति भावः ॥राम

= द्वि

संबंधस्य संबंध्यभेदे संबंधिनस्सदा सत्वात्सर्वदा संबंधबुद्धिप्रसंग इति शंकां निषेधति नापीति परापेक्षत्वेनेरंतर्यव्यवस्थायामंगुल्यो
रूपरूपिणोश्च संबंधाधीनस्वतन्त्र्यभिन्नार्थः एवं परमाणवोः संयोग निरासेनद्व्यणुकादिसृष्टेर्निरस्तात्म प्रत्यग्दृष्टवदात्मना(णु)नोस्सं
योगाणु(?)क्रियाहेतुरात्ममनसोस्संयोगो वुद्ध्याय समवायिकारणं निरस्यते नचायवात्मेति निरवत्मपि कल्पितप्रदेशापत्तमतिप्रसं
गाख्यदोषांतरं वक्तुं पुनरुद्भावयति कल्पिताइति कल्पनम्नरः इहिताः सतोसतोवा द्वितीयेत संयोगसिद्धिः स्वसाभावयोरे
कत्रस्य वच्छेदकात्स्वात्मायेत्त्वमात्रेण सर्वार्थसिद्धप्रसंगः आद्यस्य स्वाधीनत्वात्प्रभूतत्वं निर्वृपित्वेतत्संभवो चेत्यर्थः यद्यहमस

नापिसंबंधिविषयत्वेसंबंध एवं प्रत्ययोः संततभावप्रसंगः स्वरूपवाद्यरूपापेक्षयेतरक्रोतरत्वात नचात्मावात्ममनसा
मप्रदेशत्वात्संयोगः संभवति प्रदेशवतो द्रव्यस्य प्रदेशवताद्रव्यांतरेण संयोगदर्शनात कल्पिताप्रदेशाश्च एवात्मम
नसाभविष्यंतीति चेन्नाविद्यमानार्थकल्पनायां सर्वार्थसिद्धिप्रसंगात् इयानेवाविद्यमानो विरुद्धो वार्थः कल्पनीयोना
तोधिक इति नियमहेत्वभावात्कल्पनायाश्च स्वायत्तत्वात् प्रभूतत्वसंभवाच्च नचवैशेषिकैः कल्पितेभ्यः षड्भ्यः
पदार्थेभ्योन्येधिकाः शतं सहस्त्रं वार्था न कल्पितव्या इति निवारको हेतुरस्ति तस्माद्यस्मै यस्मै यद्यद्रोचते तत्तत्सिध्येत्
कश्चित्कृपालुः प्राणिनां दुःखबहुलः संसार एव मा भूदिति कल्पयेत् अन्यो वा व्यसनी मुक्तानामपि पुनरुत्पत्तिं कल्पये
त् कस्तयोर्निवारकः स्यात् किंचान्याभ्यां परमाणुभ्यां निरवयवाभ्यां सावयवस्य द्व्यणुकस्याकाशेनेव संश्लेषानुपपत्तिः
नह्याकाशस्य पृथिव्यादीनां च जतुकाष्ठवत्संश्लेषोस्ति कार्यकारणद्रव्ययोराश्रिताश्रयभावोन्यथानोपपद्यत इत्यव
श्यं कल्प्यः समवाय इति चेत् नेतरेतराश्रयत्वात्कार्यकारणयोर्हि भेदसिद्धावाश्रिताश्रयभावसिद्धिराश्रिताश्रय
भावसिद्धौ च तयोर्भेदसिद्धिः कुंडबदरवदित्यतरेतराश्रयता स्यात् नहि कार्यकारणयोर्भेदः आश्रिताश्रयभावोवा
वेदांतवादिभिरभ्युपगम्यते कारणस्यैव संस्थानमात्रं कार्यमित्यभ्युपगमात् ॥ न्य१

सर्वसिद्धित्वदापदार्थबंधमुक्तिनियमालुप्येरन्नित्याह नचेत्यादिना संयोगं दूषयित्वा समवायं दूषयति किंचादिति नस
मेतेह यणातरेत्र्यन्तरस्या र्थः संश्लेषसंग्रहः यतएकाकर्षेणेनापराकर्षणं तस्यानुपपत्तिरित्यर्थः द्व्यणुकं निरवयवाभ्यां
समवेतं सावयवत्वादाकाशसमवेतभ्मिवदिति भावः ननुद्व्यणुकस्यासमवेतत्वे तदाश्रितत्वं न स्यात्संबंधं विनातद्योगात्
नचसंयोगादाश्रितत्वं कार्यद्रव्यस्य युक्तत्वसंयोगादिति शंकते कार्येति प्रकृतिविकारयोरभेदादाश्रयिभावानुपपत्तिरिष्टेति
परिहरति नेतिभेदात द्भावइति वदंतं प्रत्याह इतरेतराश्रयत्वादिति कथं तर्हि कार्यस्य कारणाश्रितत्वव्यवहारः कल्पितभे

पश्र२

तर्क॰ दि॰ ३७

परमाणूनां निरवयवत्वमप्ययुक्तमित्याह किं चेति परमाणवः सावयवाः अल्पत्वात् घटवदित्युपपत्तेस्तेषां दिग्भेदोपाधित्वेन सादान्तवदित्यर्थः ननु
परमाण्वपेक्षया पौर्वप्राचीदक्षिणेत्यादिदिग्भेदव्यवहारस्तदवधित्वेनैवयवाल्पत्वाच्च तेनैवमपरमाणावस्तु पि सावयवत्वात्तदय
वयवेत्येवयतः परं न विभागः स एव निरवयवः परमाणुरिति शंकते योऽल्पत्वमिति परिहरति न स्थूलेति अपमर्षः यत्सर्वाल्प
नाविभागायोग्यं वस्तु स परमाणुरिति यद्युच्यते तर्हि त्र्यणुक एव परमाणुसंज्ञा कृता स्यात् तस्याल्पस्य इदविभागादित्वेनावय
वविभागावयवाभावात् दिपृथिव्यादिजातीयाल्पपरिमाणविश्रान्तभूमिर्यः स परमाणुरिष्यते तर्हि तस्य न स्थूलकारणत्वं विना
शित्वाद्घटवत्तथैव हेतुत्वसिद्धिः अणवो विनाशिनः पृथिव्यादिजातीयत्वाद्घटवदिति साधनादिति संप्रति निरवयवद्रव्यस्य ना
शहेतुभावादात्मवद्विनाश इत्याशंक्य पूर्वोक्तपरिहारं स्मारयति विनश्यं तदुत्पादिनाश्रयात् अतिरिक्तस्यानित्यत्वानिकत्वात् द्रव्यस्यानि
रवयवत्वमसिद्धं निमित्तनाशादाश्रयादिनाशाद्विनाशः प्रलये संभवति मतोऽज्ञानाद्ज्ञाननाशो नत्कार्याणुनाशसंभव इति भावः पडं॰

विनश्यति तन्तुः स्तम्भस्तरं च पृथिव्येकजातीयकं विनश्यति तत्तो द्व्यणुकं तथा परमाणवोऽपि पृथिव्येकजातीय त्वात् ३ त्रुटिः ४

किं चाल्पत्वपरमाणूनां परिच्छिन्नत्वाद्यावन्त्यो दिशः षडङ्गैद शावान्तावद्भिरवयवैः सावयवास्तेषु सावयवत्वादनित्या॰
इति निरवयवत्वाभ्युपगमो बाध्येत योऽल्पत्वं दिग्भेदभेदिनोवयवान्कल्पयसि स एव परमाणव इति चेत् न स्थूलसूक्ष्मता
रतम्यक्रमेणापरमकारणाद्विनाशोपपत्तेः यथा पृथिवी द्व्यणुकाद्यपेक्षया स्थूलतमा वस्तु सन्तापि विनश्येत् विनश्य
त्यवयवविभागेन विनश्यंतीति चेन्नायं दोषो यतो घृतकाठिन्यविलयनवदपि विनाशोपपत्तेर्मया चानयाहि घृत
सुवर्णादीनामविभज्यमानावयवानामप्यग्निसंयोगाद्द्रवभावापत्त्या काठिन्यविनाशो भवति एवं परमाणूनामपि परम
कारणभावापत्त्या स्वजात्यादिविनाशो भविष्यतीति तथा कार्यारंभोऽपि नावयवसंयोगेनैव केवलेन भवति क्षीरजलादीनां
मन्तरेणाप्यवयवसंयोगान्तरं दधिहिमादिकार्यारंभदर्शनात् ॥

ननु यत्कार्यद्रव्यं तत्संयोगसचिवानेकद्रव्यारब्धमिति तत्राह तथा कार्यारंभोऽपीति केवलं प्राधान्यं कार्यद्रव्यस्य तावपि हेतु॰
त्वात्संयोगस्य क्षीरारंभकसंयोगान्तरं तथा च दध्यादौ व्यभिचारान्न व्याप्तिरित्यर्थः किं च यत्कार्यद्रव्यं तद्द्रव्यारब्धमित्येव व्याप्तिरस्तु ला
घवात् न तु संयोगसचिवत्वमपि स्वतन्त्रपरिमाणानेकद्रव्यारब्धमिति गौरवाद्दीर्घविस्तृततन्तुकलारब्धरज्जौ समानपरिमाणायां व्यभिचाराच्च॰
न च रज्जुर्न द्रव्यान्तरमिति वाच्यं अवयवमात्रविश्रान्तवायातात् किं च निरवयवद्रव्यत्वस्यैकात्मन्यन्तित्वे लाघवान्निरवयवानेकाणुसि
द्धिः परमाणुत्वतारतम्यविश्रान्तिभूमित्वेन तत्सिद्धिरिति त्र्यणुकत्वेनोक्तत्रुटिषु विश्रान्तेः न च तत एव त्रुटिनामानो जग
द्धेतव इति वाच्यं पृथिवीत्वादिना सावयवत्वानित्यत्वयोरनुमानात् न चावयवत्वस्य क्वचिद्विश्रान्तौ परमाणुसिद्धिः अविश्रान्ता
वनवस्थेति वाच्यं मायायां प्रत्यागावयवत्वविश्रान्तिसंभवात् नानन्किंचिदणुसद्भावे प्रमाणं निरवयवानां संयोगसमवाययोर

तं प्रत्यपरिग्रहाच्चेति सूत्रवाक्यशेषं परमतान्यधिकरणार्थमुपसंहरति तदेवमिति तस्माद्भ्रान्तिमूलेनैव वैशेषिकमतेन वेदान्ततात्पर्यस्या
विरोध इति सिद्धं वैशेषिकं निरस्य वैनाशिकं निरस्यति समुदाय इति परिमाणभेदेन देहादेरारम्भविनाशाङ्गीकारादर्धवैनाशिको वै
शेषिकः तस्य निराकरणानन्तरं सर्वक्षणिकवादी बुद्धिस्थो निरस्यत इति प्रसङ्गसंगतिमाह वैशेषिकेति नाभावउपलब्धेरिति निरसनीय
सिद्धान्तादनिरस्य सिद्धान्तस्य भेदवक्तुं तत्सिद्धान्तं विभजते स चेति ननु सुगतप्रोक्तागमस्यैकत्वात्कुतो बहुप्रकारतेत्यत आह प्रतिप
त्तीति एकस्यैवागमस्य व्याख्यातुः शिष्यस्यावस्थाभेदेन बुद्धिभेदान्मन्दमध्यमोत्तमधियां शिष्याणां वा भेदाद्बहुप्रकारतेत्यर्थः तानेव प्र
कारानाह तत्रेति सौत्रान्तिको वैभाषिको योगाचारो माध्यमिकश्चेति चत्वारः शिष्यास्तत्र प्रथमौ बाह्यार्थानां परोक्षत्वापरोक्षत्वविवादेप्यस्तित्व
संप्रतिपत्तेस्तयोः सिद्धान्तमेकीकृत्य निरस्यत इत्याह तत्र ये सर्वास्तित्ववादिन इति भूतं भौतिकं वा ह्यं चित्तं चैत्तं चान्तरमिति विभागः तत्र
संदिह्यते किं मानमूलोऽयं भ्रान्तिमूलो वायं सिद्धान्त इति तत्र मानमूल इति पूर्वपक्षयन्सिद्धान्तं तदीयं दूषयति तत्र भूतमिति स्थिरः प्रपञ्चो

। तदेवमसारतरतर्कसंदृब्धत्वादीश्वरकारणश्रुतिविरुद्धत्वाच्छ्रुतिप्रवणैश्च शिष्टैर्मन्वादिभिरपरिगृहीतत्वादत्यन्तमेवानपेक्षा
। स्मिन्परमाणुकारणवादे कार्या श्रेयोर्थिभिरिति वाक्यशेषः समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥१८॥ वैशेषिकराद्धान्तो दुर्यु
क्तियोगाद्वेदविरोधाच्छिष्टापरिग्रहाच्च नापेक्षितव्य इत्युक्तं सोऽर्धवैनाशिक इति वैनाशिकत्वसाम्यात्सर्ववैनाशि
कराद्धान्तो नतरामपेक्षितव्य इतीदमिदानीमुपपादयामः स च बहुप्रकारः प्रतिपत्तिभेदाद्विनेयभेदाद्वा तत्रैते त्रयो वादिनो भ
वन्ति केचित्सर्वास्तित्ववादिनः केचिद्विज्ञानास्तित्वमात्रवादिनः अन्ये पुनः सर्वशून्यत्ववादिन इति तत्र ये सर्वास्तित्ववादिनो बाह्यमान्त
कः रं च वस्त्वभ्युपगच्छन्ति भूतं भौतिकं चित्तं चैत्तं च तांस्तावत्प्रतिवदामः तत्र भूतं पृथिवीधात्वादयः भौतिकं रूपादयश्चक्षुरादयश्च चतु
ष्टये च पृथिव्यादिपरमाणवः खरस्नेहोष्णेरणस्वभावास्ते पृथिव्यादिभावेन संहन्यन्त इति मन्यन्ते तथा रूपविज्ञानवेदनासंज्ञा
संस्कारसंज्ञकाः पञ्च स्कन्धाः तेऽप्यध्यात्मं सर्वव्यवहारास्पदभावेन संहन्यन्त इति मन्यन्ते तत्रेदमभिधीयते ॥ + ॥

ब्रह्महेतुक इति वेदान्तसिद्धान्तसमानमूलत्वात्क्षणिकसिद्धान्तविरोधादसिद्धिः सर्वपक्षफले सिद्धान्तेन तद्विरोध इति ज्ञेयं पृथिव्यादिः
भूतं चतुष्टयं विषयेन्द्रियात्मकं भौतिकं च परमाणुसमुदाय एव नावयवी तस्मिन्निति मत्वा परमाणून्विभजते चतुष्टये चेति चतुर्वि
धा इत्यर्थः खरः कठिनस्तत्स्वभावाः पार्थिवाः परमाणवः स्निग्धा आप्याः उष्णास्तैजसाः ईरणं चलनं स्वभावो वायव्यानामि
ति बाह्यसमुदायमुक्त्वाध्यात्मिकसमुदायमाह तथेति सविषयेन्द्रियाणि रूपस्कन्धः विषयाणां बाह्यत्वेऽपि देहस्थेन्द्रियग्रा
ह्यत्वादाध्यात्मिकत्वं अहमहमित्यालयविज्ञानप्रवाहो विज्ञानस्कन्धः सुखाद्यनुभवो वेदनास्कन्धः गौरश्व इत्येवं सविशिष्टसवि
कल्पकः प्रत्ययः संज्ञास्कन्धः रागद्वेषमोहधर्माधर्माः संस्कारस्कन्धः तत्र विज्ञानस्कन्धश्चित्तमात्मेति गीयते अन्ये चत्वारः स्कन्धाश्चैत्तास्तेषां

नाश संघातः आध्यात्मिकः सकललोकयात्रानिर्वाहक इत्यर्थः ॥

अवयवानि निरुक्तावयवस्यानुपलब्धेरवयवा एवाभिधीयन्ते यत्तत्तत्क्षणिकं यथा विद्युदिति तेषां क्षणिकत्वमिति मातमलोर्य सिद्धान्त इति प्रामेसि
द्धान्तेऽस्य योजयति यो ऽयमिति सर्गादौ परमाणूनां स्कन्धानां च स्वतः संघातस्तावन्न संभवति अचेतनत्वात् नापि विनाक्रमभिज्वल
नं समुदायहेतुः संघाते देहाकारे जाते विज्ञाने विज्ञाने जाते संघात इत्यन्योन्याश्रयात् च क्षणिकविज्ञानादन्यः कश्चिज्जीव ईश्वरो वान्य
याभ्युपगम्यते यः संघातकर्ता भवेत् न च कर्तारमनपेक्ष्याणवः स्कन्धाश्च स्वयमेव संघातार्थं प्रवर्तन्त इत्याह च अनिमित्तप्रसंगा
त् तन्मूलस्य विज्ञानसंतानः संहन्ता स्यादित्यत आह आशयस्येति आशयस्तेषामिति रागाद्युपलक्षितः संतानः स किं संतानिभ्यो वि
भिन्नोऽनन्यो वा आद्ये स्थिरः क्षणिको वा नाद्यः असदिष्टनित्यात्मवादप्रसंगात् द्वितीये दोषमाह क्षणिकत्वेति क्षणिक
स्य जन्मातिरिक्तव्यापारो नास्ति तस्मात्तस्य परमाण्वादिमेलनार्थं प्रवृत्तिरनुपपन्ना क्षणिकत्वव्याघातादित्यर्थः एतेनानन्यः सं
तान इति पक्षो निरस्तः क्षणिकस्य मेलकत्वानुपपत्तेः तस्मात्संहन्तृरहितत्वात्संघातानुपपत्तिरित्यर्थः संहन्तृरभावेऽपि संघातोपपत्ति
यो ऽयमुभयहेतुक उभयप्रकारः समुदायः परेषामभिप्रेतो ऽणुहेतुकश्च भूतभौतिकसंहतिरूपः स्कन्धहेतुकश्च पञ्चस्कन्धीरूपः
स इत्युभयहेतुके ऽभिसमुदाये ऽभिप्रेयमाणे तदप्राप्तिः स्यात्समुदायाप्राप्तिः समुदायभावानुपपत्तिरित्यर्थः कुतः समुदायिनाम
चेतनत्वात् निरपेक्षप्रवृत्त्यभ्युपगमे च प्रवृत्त्यनुपरमप्रसंगात् आशयस्याप्यन्यत्वानन्यत्वाभ्यामनिरूप्यत्वात् क्षणिकत्वाभ्युप
गमाच्च निर्व्यापारत्वात्प्रवृत्त्यनुपपत्तेः तस्मात्समुदायानुपपत्तिः समुदायानुपपत्तौ च तदाश्रया लोकयात्रा लुप्येत इतरेत
रप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् २० यद्यपि भोक्ता प्रशासिता वा कश्चिच्चेतनः संहन्ता स्थिरो नाभ्युपगम्यते तथा
प्यविद्यादीनामितरेतरकारणत्वादुपपद्यते लोकयात्रा तस्यां चोपपद्यमानायां न किंचिदपरमपेक्षितव्यमस्ति ते चाविद्यादयः अवि
द्या संस्कारो विज्ञानं नामरूपं षडायतनं स्पर्शो वेदना तृष्णोपादानं भवो जातिर्जरामरणं शोकः परिदेवना दुःखं दुर्मनस्तेत्येवंजातीयका

मातृकानुबंधनिति इतरेति कार्यं प्रत्ययते गच्छतीति प्रत्ययः कारणं अविद्यादिभिरेवार्थात् संघातसिद्धौ व्यवहारोपपत्तिरित्यर्थः अविद्यादी
नाह तेष्विति क्षणिकेषु स्थिरत्वबुद्धिरविद्या ततो रागद्वेषमोहाः संस्कारा भवन्ति तेभ्यो गर्भस्थस्याद्यं विज्ञानमुत्पद्यते तस्माच्चालयविज्ञानात्पृथि
व्यादिचतुष्टयं नामाश्रयत्वान्नाम भवति ततो रूपं सितासितात्मकं शुक्रशोणितं निष्पद्यते गर्भस्य कललबुद्बुदावस्था नामरूपशब्दा
र्थ इति निष्कर्षः विज्ञानं पृथिव्यादिचतुष्टयं रूपं चेति षडायतनानि यस्येन्द्रियजातस्य तत् षडायतनं नामरूपेन्द्रियाणां मिथः संयो
गः स्पर्शः ततः सुखादिका वेदना तया पुनर्विषयतृष्णा तया प्रवृत्तिरुपादानं तेन भवत्यस्माज्जन्मेति भवो धर्मादिः ततो जातिर्देहज
न्म पञ्चस्कन्धसमुदाय इति यावत् जातानां स्कन्धानां परिपाको जरा स्कन्धनाशो मरणं म्रियमाणस्य पुत्रादिस्नेहादन्तर्दाहः शोकः ते
न हा पुत्रेत्यादिप्रलापः परिदेवना अनिष्टानुभवो दुःखं तेन दुर्मनस्ता मानसी व्यथा इति शब्दो मानावमानादिक्लेशसंग्रहार्थः

ना१

न केवलं संघातानामेवाविद्यादयः संमताः किंतु सर्ववादिनामपीत्याह सर्वैरिति अविद्यादिहेतुका जन्मादयो जन्मादिहेतुकाश्चा विद्यादय इति मिथो हेतुहेतुमद्भावाद्यो नः संघातसिद्धिरिति शंकामुपसंहरति तदेवमिति सिद्धांतभागं व्याचष्टे नेत्येति अविद्यादीनाम् इतरेतरहेतुत्वमंगीकृत्य संघातहेतुत्वाभावात् संघाता न स्यादित्युक्ते पूर्वोक्तं स्मारयति नन्विति किमविद्यादयः संघातस्यागमकाउतोत्पादका इति विकल्प्याद्ये संघातस्योत्पादकं किंचिद्वाच्यं तन्नास्तीत्याह अथोच्यत इति आश्रयाश्रयिभूतेष्विति भोक्तृविशेषणमदृष्टाश्रयेष्वित्यर्थः यदा स्थिरेष्वणुषु संघातयोग्येषु कर्तृषु चादृष्टसहायेषु तत्सु ज्ञानाभावमात्रेणेत्याह हि तिकत्वित्याद्यो

सर्वेषामप्ययमविद्यादिकलापोभ्युपगन्तव्यः तदेवमविद्यादिकलापे परस्परनिमित्तनैमित्तिकभावेन घटीयंत्रवदनिशमावर्तमानेर्थाक्षिप्त उपपन्नः संघात इति चेत् तन्न कस्मात् उत्पत्तिमात्रनिमित्तत्वात् भवेदुपपन्नः संघातो यदि संघातस्य किंचिन्निमित्तमवगम्येत न त्ववगम्यते यत इतरेतरप्रत्ययत्वेप्यविद्यादीनां पूर्वं पूर्वमुत्तरोत्तरस्योत्पत्तिमात्रनिमित्तं भवद्भवेन्न तु संघातोत्पत्तेः किंचिन्निमित्तं संभवति नन्वविद्यादिभिरर्थादाक्षिप्यते संघात इत्युक्तं अत्रोच्यते यदि तावदयमभिप्रायः अविद्यादयः संघातमंतरेणात्मानमलभमाना अपेक्षंते संघातमिति ततस्तस्य निमित्तं वक्तव्यं तच्च नित्येष्वणुष्वभ्युपगम्यमानेष्वाश्रयाश्रयिभूतेषु भोक्तृषु सत्सु न संभवतीत्युक्तं वैशेषिकपरीक्षायां किमंग पुनः क्षणिकेष्वणुषु भोक्तृरहितेष्वाश्रयाश्रयिशून्येषु वाभ्युपगम्यमानेषु संभवेत् अथायमभिप्रायः अविद्यादय एव संघातस्य निमित्तमिति कथं तमेवाश्रित्यात्मानं लभमानास्तस्यैव निमित्तं स्युः अथ मन्यसे संघाता एवानादौ संसारे संतत्यानुवर्तंते तदाश्रयाश्चाविद्यादय इति तदपि संघातात्संघातांतरमुत्पद्यमानं नियमेन वा सदृशमेवोत्पद्येत अनियमेन वा सदृशो विसदृशो वोत्पद्येत नियमाभ्युपगमे मनुष्यपुद्गलस्य देवतिर्यग्योनिनारकप्राप्त्यभावः प्राप्नुयात् अनियमाभ्युपगमेपि मनुष्यपुद्गलः कदाचित्क्षणेन हस्ती भूत्वा देवो वा पुनर्मनुष्यो वा भवेदिति प्राप्नुयात् उभयमप्यभ्युपगमविरुद्धं ॥ + ॥

ना४

गात्संघातापत्तेर्निमित्तं नास्तीत्युक्ते तदा क्षणिकपक्षे तन्नास्तीति किमु वक्तव्यमित्याह किमिति आश्रयाश्रयः संघातकर्ता तच्छून्येष्वित्यर्थः आश्रयाश्रयिशून्येष्विति पाठे उपकार्योपकारकत्वशून्येष्वित्यर्थः द्वितीयं शंकते अथायमिति संघातस्याविद्यादीनां चोत्पत्तौ अन्योन्याश्रयः स्यादिति दूषयति कथमिति स्वाभाविकः खल्वयं संघातानां हेतुहेतुमद्भावेन प्रवाहो न संहतानामयत्नतो एवं संघाताश्रयाश्चाविद्यादय उत्तरसंघातप्रवर्तका इति नान्योन्याश्रयदोष इत्याशंकते अथ मन्यस इति सभावस्य नियमानियमयोरपसिद्धांतापातः स्यादिति परिहारार्थः एवं तेगलतीति चेतिपञ्जलो देहः ॥ रामः ॥

शा॰भा॰
द्वि॰
२९५

किं च भोक्तृक्षणिकत्वपक्षे भोगापवर्गाभाव इत्याह अपि चेति यो यदिच्छति स तत्कालेनास्ति चेदिच्छा व्यर्था अस्ति चे
त्क्षणिकत्वभङ्ग इत्यर्थः प्रकृतं समाधानं निगमयन्नुपसंहरति तस्मादिति द्विविधो हि कार्यसमुत्पादः सुगतसंमतः हेत्वधीनः कार
णसमुदायाधीनश्चेति तत्राद्यः विज्ञानं संस्काराः ततो विज्ञानमित्येवं रूपः प्रथमः पृथिव्यादिसमुदायात्कायस्येत्येवं द्वितीयः तत्रा
द्यमङ्गीकृत्य द्वितीयः संघातकर्तृभावेन दूषितः सम्प्रत्याद्यं दूषयितुं तत्प्रकारः उत्तरेति क्षणिकोर्थः क्षणद्वयमुच्यते निरुध्यमान
त्वे विनाश्य सान्निध्यति कर्तृत्वमतीतत्वे ननु कार्यकाले विनाशव्याप्तत्वेपि पूर्वक्षणे सत्त्वात्क्षणिकस्य हेतुत्वमसत्तमितिशे

अपि यद्भोगार्थः संघातः स्यात्स नास्ति स्थिरो भोक्तेति तत्र वाभ्युपगमः तत्र भोगो भोगार्थ एव सन्नान्येन प्रार्थनीयः तथा
मोक्षो मोक्षार्थ एवेति मन्तृक्षणान्तरेण न भवितव्यं अन्येन चेत्प्रार्थ्यते भययं भोगमोक्षकालावस्थायिना तेन भवितव्यं ।
अवस्थायित्वे च क्षणिकत्वाभ्युपगमविरोधः तस्मादिति इतरेतरोत्पत्तिमात्रनिमित्तत्वमविद्यादीनां यदभिहितं तन्न संगत
त्वं संघातः सिध्येद्भोक्त्रभावादित्यभिप्रायः उत्तरोत्पादे च पूर्वनिरोधात् २।२।२० तदविद्यादीनामुत्पत्तिमात्रनिमित्त
त्वात्संघातसिद्धिः स्यादिति तदपि तत्प्रति मात्रनिमित्तत्वं न संभवतीति इदमिदानीमुपपाद्यते क्षणभङ्गवादिनायमभ्यु
पगमः उत्तरस्मिन्क्षण उत्पद्यमाने पूर्वः क्षणो निरुध्यत इति न चैवमभ्युपगच्छता पूर्वोत्तरयोः क्षणयोर्हेतुफलभावः शक्यो
ते संपादयितुं निरुध्यमानस्य निरुद्धस्य वा पूर्वक्षणस्याभावग्रस्तत्वादुत्तरक्षणहेतुत्वानुपपत्तेः अथ भावभूतः परिनि
ष्पन्नावस्थः पूर्वक्षण उत्तरक्षणस्य हेतुरित्यभिप्रायस्तथापि नोपपद्यते भावभूतस्य पुनर्व्यापारकल्पनायां क्षणान्तरसं
बन्धप्रसङ्गात् अथ भाव एवास्य व्यापार इत्यभिप्रायः तथापि नैवोपपद्यते हेतु [illegible]
[illegible]
[illegible] स्वभावानुपरक्तस्य फलस्योत्पत्त्यसंभवात् स्वभावोपरागाभ्युपगमे च हेतु
मवस्थायित्वात्त्वेवावस्थितान्तरमेव वा सर्वव्यापिनोपपद्यते यदि नाव हस्तु नः स्वरूपमेवास्यादनिरोधोऽस्यान्तो तावत्स्थायि उत्पाद

कोते अथ भावेति तद्रूपस्त्वर्थः किं हेतुरहरतुतिरिक्तः कार्योत्पादनाख्यो व्यापारः अनतिरिक्तो वा नाद्य इत्युक्ता द्वितीयं
शङ्कते अथेति भावः उत्पत्तिः उक्तो हि भूतिर्येषां क्रियासैव कारकं सैव चोच्यत इति येषां क्षणिकभावनोयाभूतिः सैव
क्रियाकारकं चेत्यर्थः न एष स्यापि निमित्तत्वं स्यान्नोपादानत्वे तथा च मृदादेर्घटादिकालासत्त्वे च घटाद्यनुत्पत्तिः
सत्त्वे च क्षणिकत्वहानिरिति परिहरति तथापीत्यादिना प्रथमपक्षोक्तदोषं द्रढयति विनैवेति वस्तुनो जन्मधर्मा
निरूपणाच्च न क्षणिकत्वमित्याह अपि चेति तयोः स्वरूपत्वेवस्तुनोऽन्तर्भावाद्वस्तुनो नाशनं तत्त्वमित्यपि द्रष्टव्यं ॥

॥ निरोधपाद्धौ च पर्यायाः प्राग्भवः ॥

स्वभावस्य फलकालावस्थायित्वे सति क्षणभङ्गाभ्युपगमत्यागप्रसङ्गः विनैव वा स्वभावोपरागेण हेतुफलभावमभ्युपगच्छतः सर्वत्र तत्प्राप्तिरतिप्रसङ्गः अपि चोत्पादनिरोधौ नाम वस्तुनः स्वरूपमेव वा स्यातां २।२।२० मूलम्

२९५

द्वितीयं शंकते अथ यास्तीति विशेषमेवाह उत्पादेति दूषयति एवमपीति ताभ्यां संसर्गे वस्तुनः क्षणिकत्वभंगः स्यात् संसर्गाभावे नास्ती
ति तृतीयकल्पमत्याप्य दूषयति अथात्यंतेति सत्त्वं व्याख्याति तु तेसाद्यति लक्षणभंगोति किं कार्योत्पत्तिर्निर्हेतुका सहेतुका वा आद्ये
प्रतिज्ञाहानिरित्याह अथ यास्त्वेवेत्यादिना विषयकरणसहकारिसंस्काराश्चतुर्विधा हेतवस्तान्प्रतीत्यप्राप्य चित्तरूपादिविज्ञा
नचैतास्तेनात्मकाः सुखादयश्च जायंत इति प्रतिज्ञार्थः यथा नीलविज्ञानस्य नीलं वस्त्वालंबनप्रत्ययो विषयः चक्षुःकरणम
पः\ धिपतिप्रत्ययः सहकारिप्रत्ययश्चालोकः समनंतरप्रत्ययः संस्कार इति भेदः प्रतिज्ञाहानिपुरुषदोषमुक्त्वा वस्तुदोषमा

अथापि कश्चिद्विशेष इति मन्येत उत्पादनिरोधशब्दाभ्यां मध्यवर्तिनो वस्तुनस्त्याद्यंताख्यावस्थे भिलप्येते इति एवमा
प्याद्यंतमध्यलक्षणत्रयसंबंधित्वाद्वस्तुनः क्षणिकत्वाभ्युपगमहानिः अथात्यंतव्यतिरिक्तावेवोत्पादनिरोधौ वस्तुनः स्या
तां अश्वमहिषवत् अतो वस्तूत्पादनिरोधाभ्यामसंस्पृष्टमिति वस्तुनः शाश्वतत्वप्रसंग एव [illegible] यदि च
दर्शनादर्शने वस्तुनः उत्पादनिरोधौ स्यातां एवमपि द्रष्टृधर्मितौ न वस्तुधर्माविति वस्तुनः शाश्वतत्वप्रसंग एव तस्मा
दप्यसंगतं सौगतं मतं असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा २१ क्षणभंगवादे पूर्वक्षणो निरोधग्रस्तत्वादुत्तर
क्षणस्य हेतुर्न भवतीत्युक्तं अथासत्येव हेतौ फलोत्पत्तिं ब्रूयात् ततः प्रतिज्ञोपरोधः स्याच्चतुर्विधान्हेतून्प्रतीत्य चित्तचै
त्ता उत्पद्यंत इतीयं प्रतिज्ञा हीयेत निर्हेतुकायां चोत्पत्तावप्रतिबंधात्सर्वं सर्वत्रोत्पद्येत अथोत्तरक्षणोत्पत्तिं यावदव
तिष्ठते पूर्वक्षण इति ब्रूयात् ततो यौगपद्यं हेतुफलयोः स्यात् तथापि प्रतिज्ञोपरोध एव स्यात् क्षणिकाः सर्वे संस्कारा इती
यं प्रतिज्ञोपरुध्येत प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् २२ अपि च वैनाशिकाः कल्पयंति बुद्धिबोध्यं त्रया
नेः द्न्यत् संस्कृतं क्षणिकं चेति तदपि च त्रयं प्रतिसंख्याप्रतिसंख्यानिरोधावाकाशं चेत्याचक्षते त्रयमपि चैतदवस्त्वभाव
मात्रं निरुपाख्यमिति मन्यंते बुद्धिपूर्वकः किल विनाशो भावानां प्रतिसंख्यानिरोधो नामाभाष्यते ॥ ॥

प्याह निर्हेतुका वेति सहेतुकत्वपक्षेन्वयिकारणस्य मृदादेः कार्यसहभावापत्त्या क्षणिकत्वप्रतिज्ञाहानिरिति सूत्रा
नः र्थो व्याचष्टे अथोत्तरक्षणोत्पत्त्यादिना समनंतरप्रत्ययं इति संस्काराः आयतनवतो भावः इत्यर्थः एवमायुस्त्वाभ्यां समुदायो निर
स्त इतरसत्त्वाभ्यां कार्यकारणभावः क्षणिकत्वनिरस्तं संप्रति तदभिमतं द्विविधं विनाशं दूषयति प्रतिसंख्येति संस्कृतम
त्याद्यं बुद्धिबोध्यं प्रमेयमात्रं त्रयात्तद्रूपादन्यदित्यर्थः किं तत्त्रयं तदाह तदपीति निरुपाख्यं निःस्वरूपं प्रतीपा संख्या
संतं भावमसंतं करोमीत्येवंरूपा संख्या बुद्धिः प्रतिसंख्या तया निरोधः कस्यचिद्भावस्य भवति ॥ ॥ रामाय नमः

अबुद्धिपूर्वकस्तु स्तंभादीनां स्वरसभंगुराणामित्याह तद्विपरीत इति परप्रक्रियामुक्त्वा सूत्रं व्याचष्टे तेषामिति भावाः संतानिनः
संतानो नाम भावानां हेतुफलभावेन प्रवाहः तस्मिन्संतानेन चरमः क्षणः क्षणांतरं करोति न वा आद्ये चरमत्वव्याघातः संताना
विच्छेदात् द्वितीये चरमस्यासत्त्वप्रसंगः अर्थक्रियाकारित्वं सत्त्वमिति तदसिद्धौ ताच्चरमस्यासत्त्वे पूर्वेषामप्यसत्त्वप्रसंगः अ
र्थक्रियाशून्यत्वात् तस्मात्संतानस्य विच्छेदासंभवान्निरोधाप्राप्तिरित्याह न तावदिति नहि तावदित्याह नापीति घटकपाल
न्य। चूर्णाद्यवस्थासु सेयं मृदिति प्रत्यभिज्ञानादन्वयिभावस्य मृदादेर्नात्यंतिकविनाश इत्यर्थः बीजस्यांकुरादिषु प्रत्यभिज्ञानादर्श
प्रतिसंख्या
तद्विपरीतो प्रतिसंख्यानिरोधः आवरणाभावमात्रमाकाशमिति तेषामाकाशं परस्तात्प्रत्याख्यास्यति निरोधद्वयमि
दानीं प्रत्याचष्टे प्रतिसंख्याप्रतिसंख्यानिरोधयोः प्राप्तिरसंभव इत्यर्थः कस्मादविच्छेदात् एतौ हि प्रतिसंख्याप्रतिसंख्यानिरोधौ स
तानगोचरौ वा स्यातां भावगोचरौ वा न तावत्संतानगोचरौ संभवतः सर्वेष्वपि संतानेषु संतानिनामविच्छिन्नेन हेतु
फलभावेन संतानविच्छेदस्यासंभवात् नापि भावगोचरौ संभवतः नहि भावानां निरन्वयो निरुपाख्यो विना
संभवतिप शः संभवति सर्वास्वप्यवस्थासु प्रत्यभिज्ञानबलेनान्वय्यविच्छेददर्शनात् अस्पष्टप्रत्यभिज्ञानास्वप्यवस्थासु क्वचित् दृ
ष्टेनान्वय्यविच्छेदेनान्यत्रापि तदनुमानात् तस्मात्परपरिकल्पितस्य निरोधद्वयस्यानुपपत्तिः उभयथा च दोषात्
प्रतिसंख्याद् २४ योयमविद्यादिनिरोधः प्रतिसंख्यानिरोधांतःपाती परपरिकल्पितः सम्यग्ज्ञानाद्वा सपरिकरात्स्यात्स्वयमेव
वा पूर्वस्मिन्विकल्पे निर्हेतुकविनाशाभ्युपगमहानिप्रसंगः उत्तरस्मिंस्तु मार्गोपदेशानर्थक्यप्रसंगः एवमु
भयथापि दोषप्रसंगादसमंजसमिदं दर्शनम् आकाशे चाविशेषात् २५ यच्च तेषामेवाभिप्रेतं निरोधद्वयं नाका
शं च निरुपाख्यमिति तत्र निरोधद्वयस्य निरुपाख्यत्वं पुरस्तान्निराकृतं आकाशस्येदानीं निराक्रियते आकाशे
चाप्युक्तो निरुपाख्यत्वाभ्युपगमः प्रतिसंख्याप्रतिसंख्यानिरोधयोरिव वस्तुत्वप्रतिपत्तेरविशेषात् आगमप्रा
माण्यात्तावदात्मन आकाशः संभूत इत्यादिश्रुतिभ्य आकाशस्य च वस्तुत्वप्रसिद्धिः ॥ रामः ॥

नादन्वयिनो विच्छेद इत्यत आह अस्पष्टेति अंकुरादयो न संतानान्वयिभावस्याः कार्यत्वात् घटवदित्यन्वय्यविच्छेदसिद्धि
रित्यर्थः यस्माद्भावानां स्थायित्वं तस्मात्प्रतिक्षणनिरोधासंभव इत्युपसंहारः अविद्यादीनां प्रतिसंख्यानिरोधं तद
भिमतं दूषयति उभयथेति यमनियमादयः परिकराः सर्वं दुःखं क्षणिकमिति भावनोपदेशो मार्गोपदेशः ॥
आगमप्रामाण्यादिति नत्वाकाशस्य कार्यत्वोत्पाद्यत्वादिवद्वस्तुत्वं प्रसिध्यत्वित्यर्थः ॥ श्रीरामायनमः ॥

नी२

नन्वागमप्रमाणेऽपि विप्रतिपन्नान्स्तु गतान्प्रत्याकाशस्य वस्तुत्वं कथं सिध्यतीत्यत आह विप्रतिपन्नानिति शब्दो वस्तुनिष्ठः गुणत्वाद्रूपादि
वदित्यनुमानादाकाशस्य वस्तुत्वं सिध्यति पृथिव्याद्यष्टद्रव्याणां श्रोत्रग्राह्यगुणाश्रयत्वायोगादित्यर्थः आकाशस्याभावत्वं प्रसाध्या
भावत्वं दूषयति अपि चेति पृथ्व्येकत्वदृष्टत्वेऽपि दृष्टसामान्याभावो नास्ति न पृथक्पदत्वसत्वेऽपि मूर्त्तद्रव्यसामान्याभावात्मकाकाशो ना
स्त्यपि वति पदत्व मूर्त्तसंचारो न स्यादित्यर्थः देशविशेषावच्छेदेनावरणाभावोऽस्तीत्याशंक्याभावावच्छेदकदेशविशेषस्याकाशो नाभाव
इत्याह यत्र तादृशा पतिष्यतीति पतत्री संचरिष्यतीत्यर्थः आकाशस्यावस्तुत्वे ग्रन्थविरुद्धं चेत्याह अपि चेति किंसमयकनिश्चय आ

श्री

विप्रतिपन्नान्प्रति तु शब्दगुणानुमेयत्वं वक्तव्यं गन्धादीनां गुणानां पृथिव्यादिवृत्त्याश्रयत्वदर्शनात् अपि चावरणाभावमात्रमा
काशमित्युक्ते एकस्मिन्नपि पर्णे पतत्यावरणस्याविद्यमानत्वात्पर्णान्तरस्यापि तत्रानवकाशत्वप्रसंगः यत्रावरणाभावः तत्र
पतिष्यतीति चेत् येनावरणाभावो विशेष्यते तर्हि वस्तुभूतमेवाकाशस्यात्रावरणाभावमात्र अपि चावरणाभावमात्रमाका
शमन्यमानस्य सौगतस्याभ्युपगमविरोधः प्रसज्येत सौगतैर्हि समये पृथिवी भगवः किंसन्निश्रयेत्यस्मिन्प्रतिवचन
प्रवाहे पृथिव्यादीनामन्ते वायुः किंसन्निश्रय इत्यस्य प्रश्नस्य प्रतिवचनं भवति वायुराकाशसन्निश्रय इति तदाकाशस्या
वस्तुत्वे न समंजसं स्यात्तस्मादभ्युपगममाकाशस्यावस्तुत्वे अपि च निरोधद्वयमाकाशं च त्रयमप्येतन्निरुपाख्यमवस्तु नित्यं
चेति विप्रतिपिद्धं न ह्यवस्तुनो नित्यत्वं वा संभवति वस्त्वाश्रयत्वाद्धर्मधर्मिव्यवहारस्य धर्माभावे हि यदा दिव हि तत्त्वमेवस्या
न्न निरुपाख्यत्वे अनुस्मृतेश्च २६ अपि चैवं वैनाशिकः सर्वस्य वस्तुनः क्षणिकतामभ्युपपन्नुपलब्धुरपि क्षणिकतामभ
भ्युपेयात् न च सा संभवति अनुस्मृतेः अनुभवमुपलब्धिमनूत्पद्यमानं स्मरणमेवानुस्मृतिः सा चोपलब्ध्येककर्तृका
सती संभवति पुरुषान्तरोपलब्धिविषये पुरुषान्तरस्य स्मृत्यदर्शनात् कथं ह्यहमदोऽद्राक्षमिदं पश्यामीति च पूर्वोत्त
रदर्शिन्येकस्मिन्नसति प्रत्ययः स्यात् अपि दर्शनस्मरणयोः कर्त्तर्येकस्मिन्प्रत्यक्षः प्रत्यभिज्ञाप्रत्ययः सर्वस्य लोकस्य प्रसि
द्धो ह्यहमदोऽद्राक्षमिदं पश्यामीति ॥

अयोऽस्या इति किंसन्निश्रयाश्रवस्तुनः प्राग्विषाणस्याश्रयत्वादर्शनादिति भावः व्याख्यानान्तरमाह अपि चेति ध्वंसाप्रतियोगि
त्वाख्यो धर्मो नित्यत्वं नासति संभवति धर्मिणोऽसत्वव्याघातादित्यर्थः आत्मनः क्षणिकत्वं दूषयति अनुस्मृतेरिति अनुभवज
न्यास्मृतिरनुस्मृतिस्तस्या अनुभवसमानाश्रयत्वात्तदुभयाश्रयात्मनः स्थायित्वमित्यर्थः क्षणिकत्वे ज्ञानद्वयानुसंधानं च न स्या
दित्याह कथं ह्यहमिति दर्शनकर्तृद्रष्टा त्वमिति स्मरणकर्त्रैक्यप्रत्यभिज्ञानाच्चात्मनः स्थायित्वमित्याह अपि चेति योऽहमदः
पूर्वमद्राक्षं स एवाहमधुनैतत्स्मरामीति प्रत्यभिज्ञानाकारोऽद्रष्टव्यम् इदं पश्यामीति ज्ञानान्तरसंबंधकथनं योऽहमद्राक्षं सोऽहं पश्यामी

मनित्यत्व

२प्रश्न४

ग्र२

व१

विप्रतिपन्नानितियोतकस्यै ।

न्या० ता०
टि० टि०
६१

विपक्षे बाधकमाह यदीति इष्टस्मर्त्रोर्भेदेऽहं स्मरामि अन्यो द्राक्षीदिति प्रतीतिः स्यादित्यत्र दृष्टान्तमाह येनैवेति प्रत्यय
माह स्मरामीति स्मराम्यहमन्यो द्राक्षीदिति प्रत्ययो यत्र तत्र भिन्नमेव कर्तारं लोकोऽवगच्छतीत्यविवादमित्यर्थः प्रकृते प्रत्यभि
ज्ञायां तादृशभेदप्रत्ययस्य बाधकस्यादर्शनादात्मस्थायित्वं दुर्वारमित्याह इहत्वहमद्राक्षमिति यथाग्नेः शैत्यादिकेन बाधते
कश्चित् यातायातमद्राक्षमिति एवं दर्शनेन निर्दिष्टतद्रूपेण न बाधाभावात्प्रत्यभिज्ञाप्रमेत्युक्तं भवति तथा इष्टस्मर्त्रोरैक्ये सति
स्थायित्वं फलितमित्याह तस्मादेवं सतीति क्षणद्वयस्तत्वं धर्म्यात्मनस्तु तो यत्क्षणभङ्गोऽस्त्विति वदन्तं प्रत्याह तथेति वर्तमानदर्शना
रम्भो तमाचक्षीतादामरणाद्दिने दिने तावन्नेनतत्रोक्तस्यैव प्रतिपत्तिमात्मैककर्तृकां प्रत्यभिज्ञानत्वाज्जन्मनस्थैर्यं वर्तमानदर्शापर्ये

यदि हि तयोर्भिन्नः कर्ता स्यात् ततोऽहं स्मराम्यद्राक्षीदन्य इति प्रतीयात् न त्वेवं प्रत्येति कश्चित् यत्रैवं प्रत्ययः तत्र दर्शनस्मरणयोर्भि
न्नमेव कर्तारं सर्वो लोकोऽवगच्छति स्मराम्यहमसावद्राक्षीदिति इह त्वहमद्राक्षमिति दर्शनस्मरणयोर्वैनाशि
कोऽप्यात्मानमेवैककर्तारमवगच्छति ततोऽहमित्यात्मनो दर्शनेन निर्दिष्टे तन्निर्दिष्टे यथाग्निरनुष्णः प्रकाशो रूपवान् इति वा त
त्रैव सत्यैकस्य दर्शनस्मरणलक्षणद्वयसम्बन्धक्षणिकत्वाभ्युपगमहानिरपरिहार्या वैनाशिकस्य स्यात् तथा ने
तदा मनन्तरमात्मन एव प्रतिपत्तिप्रत्यभिज्ञानं नैककर्तृकामोतमाउच्छ्वासादतीतास्म प्रतिपत्तीराजन्मन आत्मै
ककर्तृकाः प्रतिसंदधानः कथं क्षणभङ्गवादी वैनाशिको नापत्रपेत स यदि ब्रूयात्सादृश्यादेतत्तत्प्रत्यत इति त
प्रति ब्रूयात् तेनेदं सदृशमिति हि यथा तत्त्वात्सादृश्यस्य क्षणभङ्गवादिनः सदृशयोर्द्वयोर्वस्तुनोर्ग्रहीतुरेकस्याभा
वात्सादृश्यनिमित्तेन प्रतिसंधानमिति मिथ्याप्रलाप एव स्यात् स्याद्वस्तु वीतरयोः क्षणयोः सादृश्यस्य ग्रहीतैकस्तु
यासत्यैकस्य क्षणद्वयावस्थानात्क्षणिकत्वप्रतिज्ञा पीड्येत तेनेदं सदृशमिति प्रत्ययान्तरमेवेदं न पूर्वापरक्षण
द्वयग्रहणनिमित्तमिति चेत् न तेनेदमिति भिन्नपदार्थोपादानात् प्रत्ययान्तरमेव चेत्सादृश्यविषयस्यान्ते नेदं
सदृशमिति वाक्यप्रयोगोऽनर्थकः स्यात् सादृश्यमित्येव प्रयोगः प्राप्नुयात् ॥ + ॥

दृ० १

तेऽतीताः प्रतिपत्तीः स्वैककर्तृकाः प्रतिसंदधानः सन्निति योजना दीपज्वालास्विवात्मनि प्रत्यभिज्ञानं सादृश्यदोषादिति शंक
ते तद्गति सादृश्यज्ञानस्य धर्मीति प्रतियोगिज्ञानाधीनत्वात् स्थिरस्यज्ञातुरसत्वान्न सादृश्यज्ञानं संभवति तत्त्वेवापसिद्धान्तः स्यादि
ति परिहरति तस्मिन्नित्यादिना स्यादेतन्न सादृश्यप्रत्ययः पूर्वापरवस्तुद्वयज्ञानजन्यस्तद्धि यस्मात् सादृश्यावगाही किं तर्हि वासनादेव
विकल्पः स्वाकारमेव बाह्यत्वेन विषयीकुर्वाणः क्षणान्तरासंस्पर्शी अतो न स्थिरज्ञातृमपेक्षत इति शंकते तेनेदमिति अत्रेवं
व्येसादृश्यप्रत्यये तेनेदं सदृशमिति वस्तुत्रयं भासते नैव तिन्नि विदतः स्वानुभवविरोधः किं चार्थभेदाभावात्पदत्रयप्रयो

अथ भासते वस्तुद्वयं तच्च प्रत्ययाभिन्नमेव नवाद्यमिति चेन्न प्रमाणमेकप्रत्ययाभेदे मिथोऽप्यभेदापत्तेः इष्टापत्तिरिति ब्रुवाणं विज्ञानवादिनं
प्रत्याह यथा ह्येति वस्तुद्वयं ज्ञेयं सादृश्यप्रत्ययाद्विन्नं सर्वलोकप्रसिद्धं न चेत्त्वांगीक्रियते स्यापि इष्टप्रसंगभयेन तर्हि तत्तदाकारा
णां तात्त्विकविज्ञानानामपि योवार्त्तानमिति त्वादेकप्रत्ययस्फुरणात्मकविप्रतिपत्त्यसंभवात्स्वप्नसाधनादिव्यवहारोल्लेख्यतन्त्रतो य
थानुभवं ज्ञानज्ञेयभेदांगीकार्यः तथा च तेनेदं सदृशमिति वा ह्यार्थयोर्ज्ञानं एवं कस्मादृश्यं ज्ञानतत्त्रात्मनः स्यापि त्वं दूर्वा र भिन्नर्थेः
न न तत्स्वैव वाह्यार्थाः तात्त्विकसकलत्वाणां निर्विकल्पग्राह्याः सविकल्पाध्यवसेयास्तु स्यापि त्व सादृश्याद्यो वाह्याकल्पितास्त्वव
भासन्त अतो विप्रतिपत्त्यादिव्यवहार इति वाह्यार्थवादमाशंक्य निरस्यति एवमेवेति प्रत्यक्षमाणसिद्धं न देव वक्तव्यं न हि तात्त्विकत्वे किं
चित्प्रमाणमस्ति न चेदानीं घट इति प्रत्यक्षमवर्तमानकालासत्त्वं घटस्य गोचरयद्वर्तमानक्षणमात्रसत्तारूपेणात्त्विकत्वमानमिति वा
चं तस्य वर्तमानत्वमात्रगोचरत्वेन कालान्तरासत्त्वासिद्धेः न च यत्सत्तत्क्षणिकमिति व्याप्तिरस्ति विपुलदर्शदर्पिपिहितत्वेन स्यापि त्वन

यदा हि लोके प्रसिद्धः पदार्थपरीक्षकैर्नपरिहृत्यतेन दाक्ष्यपक्षसिद्धिः परपक्षदोषो वा उभयमप्युच्यमाने परीक्षकानामा
मनस्य यथार्थत्वे तन्न बुद्धिमत्तानमारोहत्येवमेवैषोर्थ इति निश्चितेयन्न देव वक्तव्यं ततोऽन्यदुच्यमानं बहुप्रलापि
पित्वमात्मनः केवलमवस्थापयेत् न चायमस्मादृश्यात्सव्यवहारोपयुक्तः तद्भावावगमात् तत्सादृश्याभावानवगमाच्च
भवेदपि कदाचिद्दृष्टावेवमतिविप्रलम्भसंभवात् तदेवेदं स्यात्तत्सदृशं वेति संदेहः उपलब्धोपि तत्संदेहोपि न कदाचिद्
वति स एवाहं स्यां तत्सदृशो वेति यः प्रवाहं एवं पूर्वापरालतं स एवाहमयं स्मरामीति निश्चित्तत्तद्भावोपलंभात् तस्मादप्येक
न पपन्नो वैनाशिकसमयः नासतो हेतुत्वात् २७ इ नानुपन्नो वैनाशिकसमयो यतः स्थिरमनपायिकारणमनभ्युपगच्छतामा
भावाद्भावोत्पत्तिरित्येतदापद्यते दर्शयति चाभावाद्भावोत्पत्तिं नानुपमृद्य प्रादुर्भावादिति ॥

दृष्टांताभावान्न च स्थायिनमनुमातारमन्तरेणानुमानं संभवति तस्मादनुमानसिद्धार्थवक्ता तथागतोऽश्रद्धेयवचन इत्यर्थः किंवसा
दृश्यं प्रत्यभिज्ञायां दृष्टतया निमित्तविषयतया वा आद्येपि स्वरूपस्य ज्ञानं वा नाद्यः भेदाधिकोऽस्फुरितमात्रग्रहे स्वव्यापारेपि रूपा
भेदभ्रमापत्तेः न द्वितीयः स्थायि ज्ञातारं विना तज्ज्ञानासंभवसोऽकत्वान्नापि विषयतया निमित्तमित्याह नचेति सोहमित्युल्ले
खेन नाहं सदृशः इत्युल्लेखादित्यर्थः सोहमिति प्रत्यभिज्ञायाभ्रमत्वं निरस्य संशयत्वं निरस्यति भवदिति नदोर्थे प्रत्यभिज्ञानेपि बाध
संभावनया संशयः कदाचित्स्यान्नात्मनीत्यर्थः असंदिग्धाविपर्यस्तप्रत्यभिज्ञाविरोधादात्मक्षणिकत्वमतमन्येतासंगतमित्युपसंहरति
तस्मादिति अभावप्रागविषाणवदत्यन्तातत्त्विके यौक्तिकस्वन्दादिनाप्यादसतो वराहिका यत इति स्वगतावदन्तितदूषयति सासत इति
न केवलं वलादापद्यते किं तु स्वयं दर्शयति चेद्दान्तेन प्रहृतार्थं गमयतः स्वदादिकं उपमृद्य घटादेः प्रादुर्भावादिति ॥ +

इममर्थमाह विनश्यदिति कारणविनाशात्कार्यजन्मेत्यत्र युक्तिमाह कूटस्थादिति विनाशमप्राप्य नित्यादित्यर्थः नित्यस्य निरतिशयस्य
कार्यशक्तित्वे तत्कार्याणि सर्वाण्येककालीनि स्युः स्याद्योत्तरत्त्वेन कार्याभावादसत्त्वापत्तिः न च सहकारिक्रमात्तत्क्रमात्का
र्यक्रम इति युक्तम् अतिशयस्यानतिशयानपेक्षत्वायाम् अनवस्थानादनपेक्षायां कार्यस्याप्यनतिशयानपेक्षत्वेन सहकारिवैयर्थ्यात्
स्थानत्वस्यापि भावात्कार्यजन्मेत्यर्थः तर्हि क्षणिकभावस्य हेतुत्वमस्तु तस्यादे चेन्नत्र निरस्तं अभावस्य हेतुत्वनिरासार्थं सूत्रं व्याचष्टे
तत्रेदमिति यदि वीजाभावस्याभावोऽङ्कुरात्तद्विशेषः स्यात् तदा विशेषवदभावद्वारा बीजादेवाङ्कुर इति लोकायतिनामभ्युपगमो-

विनश्यद्धि किल बीजादङ्कुर उत्पद्यते यथा विनश्यत्क्षीराद्दधि मृत्पिण्डाच्च घटः कूटस्थाच्चेत्कारणात्कार्यमुत्पद्येत तत्र
विशेषात्सर्वं सर्वत उत्पद्येत तस्मादभावग्रस्तेभ्यो बीजादिभ्योऽङ्कुरादीनामुत्पद्यमानत्वात् अभावाद्भावोत्पत्तिरिति
मन्यते नेत्येतदुच्यते नासतो दृष्टत्वादिति नाभावाद्भाव उत्पद्यते यद्यभावाद्भाव उत्पद्यते अभावत्वाविशेषेऽभ्युपगमो- (कारणविशेषात्)
नर्थकः स्यात् बीजादीनामुपमर्दितानां योऽभावः सस्य शशविषाणादीनां च निःस्वभावत्वाविशेषादभावत्वे क
श्चिद्विशेषोऽस्ति येन बीजादेवाङ्कुरो जायते क्षीराद्दध्येव इति कारणविशेषाभ्युपगमोऽर्थवान्स्यात् निर्वि-
शेषस्य त्वभावस्य कारणत्वाभ्युपगमे शशविषाणादिभ्योऽप्यङ्कुरादयो जायेरन् न चैवं दृश्यते यदि पुनरभाव
स्यापि विशेषोऽभ्युपगम्येत उत्पलादीनामिव नीलत्वादिस्ततो विशेषवत्त्वादेवाभावस्य भावत्वमुत्पलादिवत्प्रस- २४
ज्येत नाप्यभावः कस्यचिदुत्पत्तिहेतुः स्यात् अभावत्वाच्छशविषाणादिवत् अभावाच्च भावोत्पत्तावभावान्वितमे
व सर्वं कार्यं स्यान्न चैवं दृश्यते सर्वस्य च वस्तुनः स्वेन स्वेन रूपेण भावात्मनैवोपलभ्यमानत्वात् न च मृदान्विताः
शरावादयोऽभावात्मत्वादिविकाराः केनचिदभ्युपगम्येत मृद्विकारा एव तु मृदन्विता लोकैः प्रत्येति ॥ ॥

२३

र्थवान्स्यान्नेत्याह येनेति सूत्रं योजयति निर्विशेषस्येति शशविषाणादेः कार्यकारित्वस्यादृष्टत्वान्नाभावस्य
तोर्हेतुत्वमित्यर्थः अस्त्वभावस्यापि विशेषस्तत्राह यदीति अभावस्य हेतुत्वेति प्रसङ्ग इति तर्कमुक्त्वानुमानमाह ॥
तुर नापीति अभावो न हेतुरसत्त्वात्सम्मतवदित्यर्थः अभावो न प्रकृतिः कार्याननुगतत्वात् यथा शरावायनन्वितं तन्न शरावादि
प्रकृतिरिति तर्कपूर्वकमाह अभावाच्चेति अतोऽन्वितत्वान्मृदादिर्भावप्रकृतिरित्याह मृदिति ॥ राम ॥

णा१

स्थायिनः कार्यत्वायोगात् क्रमवत्त्वं च दूषयति यत्क्रममित्यादिना अनुभवबलात् स्थिरभावानामेव सहकारिसन्निधिक्रमेण कार्यक्र-
महेतुत्वमनोकार्यं न च पाक्रमस्य सहकार्यपेक्षानयुक्तेति वाच्यं यतो शक्तस्यापि नापेक्षितं सहकारि विघ्नं स्यात् ततः स्ववर्णादे
स्वेतातिशाय स्यैवोत्पन्नापादि सहकारिकृतातिशाय क्रमाद् वेकारिकार्यक्रमः न चातिशायस्यातिशायांतरानपेक्षत्वे कार्यस्याप्य
नपेक्षेति वाच्यं पटस्यास्पंदनपेक्षत्वे कार्यत्वाविशेषात् घटस्यापि स्पंदनपेक्षाप्रसंगात् अन्वयव्यतिरेकाभ्यामनपेक्षा सहकारिष्वपि
तुल्या यदुक्तं कार्याभावदशायां कारणस्यासत्त्वापत्तिरिति तन्न अकारणस्यापि बाधाभावेन सत्त्वोपपत्तेः न ह्यर्थक्रियाकारित्वमेव

यदुक्तं स्वरूपोपमर्दमंतरेण कस्यचित्कूटस्थस्य वस्तुनः कारणत्वानुपपत्तेरभावाद्भावोत्पत्तिर्भवितुमर्हतीति तत् दु
रुक्तं स्थिरस्वभावानामेव सुवर्णादीनां प्रत्यभिज्ञायमानानां रुचकादिकारणभावदर्शनात् येष्वपि बीजादिषु स्वरू
पोपमर्दो लक्ष्यते तेष्वपि नासावुपमृद्यमाना पूर्वावस्थोत्तरावस्थायाः कारणमभ्युपगम्यते अनुपमृद्यमानाना
मेवानुयायिनां बीजाद्यवयवानामंकुरादिकारणभावाभ्युपगमात् तस्मादसद्भ्यः शशविषाणादिभ्यः सदुत्पत्त्यद
र्शनात् सद्भ्यश्च सुवर्णादिभ्यः सदुत्पत्तिदर्शनात् अनुपपन्नोयमभावाद्भावोत्पत्त्यभ्युपगमः अपि च चतुर्भि
श्चित्तचैत्ता उत्पद्यन्ते परमाणुभ्यश्च भूतभौतिकलक्षणः समुदाय उत्पद्यत इत्यभ्युपगम्य पुनरभावाद्भावोत्पत्तिं कल्पय
द्भिरभ्युपगतम् पह्नुवानैर्वैनाशिकैः सर्वो लोक आकुलीक्रियते उदा
सीनानामपि चैवं सिद्धिः २८ यदि चाभावाद्भावोत्पत्तिरभ्युपगम्येतैवं सत्युदासीनानामनीहमानानामपि जनानामभि
मतसिद्धिः स्यात् अभावस्य सुलभत्वात् कृषीवलस्य क्षेत्रकर्मण्यप्रयतमानस्यापि सस्यनिष्पत्तिः स्यात् कुलालस्य च
सू० संस्क्रियायामप्रयतमानस्याप्यमत्रोत्पत्तिः तंतुवायस्यापि तंतून तन्वानस्यापि तन्वानस्येव वस्त्रलाभः स्वर्गापवर्गयोश्च न
कश्चित्कथंचित्समीहेत न चैतद्युज्यतेभ्युपगम्यते वा केनचित् तस्मादनुपपन्नोयमभावाद्भावोत्पत्त्यभ्युपगमः ॥

नो३

सत्त्वमनत्वदयोगेन सत्त्वस्यानंतोभेदात् ततो ह्यर्थक्रियाकारित्वं नाम सतः अंतःकारणतावच्छेदकमबाधितस्वरूपात्मकं सत्त्वं कारण
त्वाद्भिन्नमेव तस्मादनुत्पत्तस्थिरभावानां हेतुत्वमुपपन्नमिति भावः पूर्वापरविरोधमप्याह अपि चेति अभावादसतो शशवि
षाणादनुत्पत्तिः स्यादित्युक्तं अतिप्रसंगान्तरमाह उदासीनानामिति अनीहमानानां प्रयत्नरहितानां अमत्रं घटादिपात्रं त
न्वानस्य व्यापारयतः तस्मान्नीतिमूलेन क्षणिकवादार्थवादेन कूटस्थनित्यब्रह्मसमन्वयस्य न विरोध इति सिद्धं ॥ रामः ॥

शा॰भा॰
टि॰टि॰
५३

नाभावउपलब्धेः आवं इति निर्विशेषत्वश्चाविज्ञानं वा ह्यार्थो पादानं वक्तां वेदांतानां भिन्नं साकारं क्षणिकं विज्ञानं न ततोन्यो र्थो स्तीति यो
गाचारमते न विसंध्यते नवेति तत्र तस्य मानत्वोतिरूलत्वाभ्यां संशये पूर्वोक्तवाह्यार्थवादनिरासनमुपजीव्य पूर्वपक्षमाह,
एवमित्यादिना पूर्वोत्तरपक्षयोः विरोधाविरोधौ फलं तन्वेकस्य सुगतागमस्य कथं वाह्यार्थसत्वासत्वयोक्तात्पर्यं विरोधादि
त्याशंक्याधिकारिभेदादविरोधः इति वदन्विज्ञानवादिनः सुगताभिप्रायज्ञत्वेन मंदाधिकारिभ्यो वाह्यार्थवादिभ्यः श्रेष्ठमाह, के
षांचिदिति इत्यं च धर्मकीर्तिना देशनालोकनाथानां सत्वाशयवशानुगाः इति सुगतानाम्पदेशाः शिष्यमनस्संसारिणः इत्य
र्थः ननु सति वाह्यार्थे मानमेयव्यवहारः कथंतत्राह तस्मिन्निति विज्ञानेमेव कल्पितनीलाद्याकारेण प्रमेयम अवभासात्मना

वेः
नाभावउपलब्धेः॥२९॥ एवं वाह्यार्थवादमाश्रित्य समुदायाप्राप्त्यादिदूषणे उद्भाविते विज्ञानवादी बौद्ध इदानीं प्रत्यव
तिष्ठते केषांचित्किल विनेयानां वाह्यवस्तुन्यभिनिवेशमालक्ष्य तदनुरोधेन वाह्यार्थवादप्रक्रियं विरचिता नासौ सुगता
भिप्रायः तस्य तु विज्ञानैकस्कंधवाद एवाभिप्रेतः तस्मिंश्च विज्ञानवादे बुद्ध्यारूढेन रूपेणांतस्थ एव प्रमाणप्रमेयफलव्य
वहारः सर्व उपपद्यते सत्यपि वाह्यार्थे बुद्ध्यारोहमंतरेण प्रमाणादिव्यवहारानवतारात् कथं पुनरवगम्यते अंतस्थ एवा
यं सर्वव्यवहारो न विज्ञानव्यतिरिक्तो वाह्यार्थोस्तीति तदसंभवादित्याह सहि वाह्यो र्थोभ्युपगम्यमानः परमाणवो वा
स्युस्तत्समूहा वा स्तंभादयः स्युः तत्र न तावत्परमाणवः स्तंभादिप्रत्ययपरिच्छेद्या भवितुमर्हंति परमाण्वाभासज्ञानान
त्पत्तेः नापि तत्समूहाः स्तंभादयस्तेषां परमाणुभ्योन्यत्वानन्यत्वाभ्यां निरूपयितुमशक्यत्वात् एवं जात्यादीनपि प्रत्याचक्षीत अपि चानुभव
मात्रेण साधारणात्मनो ज्ञानस्य जायमानस्य यो यं प्रति विषयं पक्षपातः स्तंभज्ञानं कुड्यज्ञानं घटज्ञानं पटज्ञानमिति नासौज्ञान
गतविशेषमंतरेणोपपद्यत इत्यवश्यं विषयसारूप्यं ज्ञानस्यांगीकर्तव्यं अंगीकृते च तस्मिन्विषयाकारस्य ज्ञानेनैवावरु

मानफलं णकाल्मनामानेणोक्तात्सयत्वाकारेणप्रमाणत्वेनभेदकल्पनयाव्यवहारइत्यर्थः मात्व्येवभेदः किं न स्यादत आह स
पी॰२ त्येतिनहिवुद्ध्यानारूढस्यनीलादेः प्रयत्नव्यवहारोस्ति अतोबुद्ध्यारूढाकार एव प्रमेय न वाह्य इत्यर्थः वाह्यार्थोसत्वे प्रश्नपूर्व
कं युक्तीरुपन्यस्यति कथमित्यादिना ज्ञेयज्ञानातिरेकेणासंभवान्नेर्थगवदित्याह तदसंभवादिति असंभवं विवृणोति स
दूति॰२ हीति परमाणव इत्यादेः स्थूलस्तंभज्ञानं न स्यात्समूहस्य तान्नित्यर्थः अवयव्यभावेपि जात्यादयो वाह्यार्थाः स्युरत आह एव
मिति जातिगुणकर्मणां धर्मिणः सकाशाद्भेदेन भेदेवाधर्मि विरुद्धमंतरवचनधर्मधर्मिभावः भेदाभेदौ च विरुद्धाविति
तिनम्नंति जात्यादीत्यर्थः किं च ज्ञानस्य ज्ञेयसारूप्यरूपविशेषसंबंधाभावे सर्वविषयत्वापत्तेर्विशेषांगीकार्यस्तत्र ताच
ज्ञानगतविशेषस्य ज्ञानेनविषयाकारेणत्वात्सिद्धिर्नालाभावाद्योखान्यत्याह अपि चेति पक्षपातो विषयविशेषवै

॥ टि॰ टि॰ ॥ शा॰ भा॰ ॥ ५४

॥ शारीरकभाष्य टि॰ ॥
५४

किं चास्ये यं ज्ञानाभिन्नं ज्ञानोपलंभलक्षणानियतोपलंभग्राह्यत्वाज्ज्ञानवदित्याह अपि चेति ज्ञानार्थयोर्वास्तवभेदेपि सहोपलंभनेयमाद्ग्रा
ह्यग्राहकभावादितिनस्याह नचैतदिति लाक्षणिकज्ञानस्यार्थेन संबंधहेत्वभावान्न ग्राह्यग्राहकभाव इत्यर्थः किंच जाग्रद्विज्ञानेन
वाह्यालंबनेविज्ञानत्वात्स्वप्नादिज्ञानवदित्याह स्वप्नेति विज्ञानानांवैचित्र्यानुपपत्त्यापि तमनुमानमितिशंकते कथमिति अन
र्थोपपत्त्यापरिहरति वासनेति अनादिसंतानान्तर्गतपूर्वज्ञानमेववासनातद्वशादनेकलक्षणाव्यवस्थानेपि नीलाद्याकारज्ञान
वैचित्र्यंभवति यथाबीजवासनयाकार्यांकुरवदित्यर्थः उभयवादिसंमतत्वाच्च वासनाएव ज्ञानवैचित्र्यहेतवोनवाह्या

अपि च सहोपलंभनियमादभेदो विषयविज्ञानयोरापतति नह्यनयोरेकस्यानुपलंभेन्यस्योपलंभोस्ति नचैतत्स्वभा
वविवेके युक्तं प्रतिबंधकारणाभावात् तस्माद्व्यप्याभावः स्वप्नादिवच्चेदद्रष्टव्यं यथाहि स्वप्नमायामरीच्युदकगंध
र्वनगरादिप्रत्ययाविनैववाह्येनार्थेन ग्राह्यग्राहकाकारा भवंति एवं जागरितगोचरा अपि स्तंभादिप्रत्यया भवितु
प्रत्य४ मर्हंति इत्यवगम्यते प्रत्ययाविशेषात् कथं पुनरसत्यवाह्यार्थे प्रत्ययवैचित्र्यमुपपद्येत वासनावैचित्र्यादित्याह अना
दौहि संसारे बीजांकुरवद्विज्ञानानां वासनानां चान्योन्यनिमित्तनैमित्तिकभावेन वैचित्र्यं न विप्रतिषिध्यते अपि चान्वयव्यतिरेका
भ्यां वासनानिमित्तमेव ज्ञानवैचित्र्यमित्यवगम्यते स्वप्नादिष्वंतरेणाप्यर्थं वासनानिमित्तस्य ज्ञानवैचित्र्यस्योभाभ्याम
प्यावाभ्यामभ्युपगम्यमानत्वादंतरेण तु वासनामर्थनिमित्तस्य ज्ञानवैचित्र्यस्य मयानभ्युपगम्यमानत्वात् तस्माद
प्यभावो वाह्यस्यार्थस्येत्येवं प्राप्ते ब्रूमः नाभाव उपलब्धेरिति न खल्वभावो वाह्यस्यार्थस्याध्यवसातुं शक्यते कस्मा
दुपलब्धेः उपलभ्यते हि प्रतिप्रत्ययं वाह्योर्थः स्तंभः कुड्यं घटः पट इति न चोपलभ्यमानस्यैवाभावो भवितुमर्हति
यथा हि कश्चिद्भुंजानो भुजिसाध्यायां तृप्तौ स्वयमनुभूयमानायामेवं ब्रूयात् नाहं भुंजे न वा तृप्यामीति तद्वदिंद्रिय
सन्निकर्षेण स्वयमुपलभ्यमान एव वाह्यमर्थं नाहमुपलभे न च सोस्तीति ब्रुवन्कथमुपादेयवचनः स्यात् ननु
नाहमेवं ब्रवीमि न कंचिदर्थमुपलभ इति किंतूपलब्धिव्यतिरिक्तं नोपलभ इति ब्रवीमि बाढमेवं ब्रवीषि निरंकुश
७२ त्वात्ते तुंडस्य न तु युक्त्युपेतं ब्रवीषि यत उपलब्धिव्यतिरेकोपि बलादर्थस्याभ्युपगंतव्य उपलब्धेरेव नहि कश्चिदुपलब्धिमे
व स्तंभः कुड्यं चेत्युपलभ्यते उपलब्धिविषयत्वेनैव तु स्तंभकुड्यादीन्सर्वे लौकिका उपलभंते ॥

र्था इत्याह अपि चेति लाक्षणिकविज्ञानमात्रवादस्य मानमूलत्वात्तेनानित्यविज्ञानवादो विरुध्यते इति प्राप्ते सिद्धांतसूत्रं व्याचष्टे
नाभाव इत्यादिना किं वाह्यार्थस्यानुपलब्धेरभावः उत ज्ञानाद्भेदेनानुपलब्धेः नाद्य इत्युक्तमनुपलब्धेरसिद्धेः न द्वितीय इत्याशंकते
नानुनाहमिति ज्ञानज्ञेययोर्विषयविषयिभावेन भेदस्य साक्षिप्रत्यक्षसिद्धत्वादत्यन्ताविरुद्धमभेदाभिधानमित्याह बाढ

शा.भा.
हि.टि.
६८

ना१

त्वद्वचनादपि जनो वाह्यार्थं ज्ञात्वा देवोपलभत इत्याह अतश्चेति वाह्यार्थस्यात्यंतासत्वे प्रत्यक्षोपलंभायोगादृष्टं तत्वासंभवाच्च
वहिर्वद्भवेन्नसादित्याह इतरथेति अवाधितभेदानुभवाद्विवेको गृहीतनकारइत्याह तस्मादिति ते यार्थे ज्ञानातिरेकेण स
त्वसंभवादिसुक्तवा…कारणमिति शंकते नवेति कोलावसंभव असत्वे वा असत्वनिश्चयो वा अयुक्त एव वाऽऽह केऽपि कस
पायात्मकसंभवस्याभावो वा नाद्यः साध्याभेदात् द्वितीयः स्थूलो घटस्तेभाविति समस्तालंभने स्थूलत्वहित्वसंभवरूपविरु
द्धधर्मवतोरर्थयोरस्थूलादेकस्माद्वा यावगाहिविज्ञानाद्भेदसत्वनिश्चयेनासंभवासिद्धेरित्याह नायं साधुरिति संभवः सत्ता
तानिश्चयः प्रमाणाधीनः असंभवासत्वनिश्चयः प्रमाणाभावाधीनः नैवपरीत्यमिति व्यवस्थामेव स्फुटयति यद्वीति उक्तं

मा.ना.२

अतश्चैवमेव सर्वे लौकिका उपलभन्ते यत्र प्रमाणानामपि वाह्यार्थमेव वर्णयिष्ये यदंतर्ज्ञेयं रूपं तद्बहिर्वदवभा
सत इति तेपि सर्वलोकप्रतिष्ठां वहिरवभासां संविदं प्रतिलभमानाः प्रत्याख्यातकामा अवाह्यमर्थं वहिर्वदिति व
त्कारं कुर्वंति इतरथा हि कस्माद्बहिर्वदिति अब्रुवुः नहि विस्मिता… वंध्यापुत्रवदवभासत इति कश्चिदाचष्टेति तस्मात्
यथानुभवं तत्वं समभ्युपगच्छद्भिर्वहिरेवावभासत इति युक्तमभ्युपगंतुं न तु वहिर्वदवभासत इति नन्वाह्यस्यार्थस्यासंभवा
द्बहिर्वदवभासमतीव सितं नायं साधुरध्यवसायो यतः प्रमाणप्रवृत्त्यप्रवृत्तिपूर्वकौ संभवासंभवावेवधार्यते न
पुनः संभवासंभवपूर्वके प्रमाणप्रवृत्त्यप्रवृत्ती यद्धि प्रत्यक्षादीनामन्यतमेनापि प्रमाणेनोपलभ्यते तत्संभवति य
देकेनापि प्रमाणेनोपलभ्यते तन्नसंभवति इहत्वयाप्तसर्वैरेव प्रमाणैर्वाह्योर्थ उपलभ्यमानः कथं व्यति
रेकाव्यतिरेकविकल्पेन संभवतीत्युच्यते उपलब्धेरेव नचज्ञानस्य विषयसारूप्याद्विषयता शोभवति असतिवि
षयेविषयसारूप्यानुपपत्तेः

त्
मेद
आतिरेका

व्यवस्थायाः फलं वाह्यार्थस्य प्रत्यक्षादिभिः संभवं वदन्नेव वक्ष्यतीयं द्रष्टव्यमि इहेति प्रमाणनिश्चितत्वाह्यार्थस्यालंभादेः
परमाणुभेदाभेदविकल्पैरयुक्तत्वमात्रेण सत्वनिश्चयुनयुक्तः त्वत्वेत्यप्युक्तत्वमसत्कल्पत्वात् ह्यस्थूलस्यैकस्यविज्ञा
नस्यास्थूलानेकसमस्तालंबनस्य विषयाभेदोयुक्तः स्थूलत्वानेकत्वप्रसंगात्र चैषापतिः समस्तालंबनोच्छेदे विज्ञानानां
निर्यावाणानिश्चितत यविषयहित्वादिव्यवहारलोपापत्तेः तस्मादयुक्तत्वेपि यथानुभवं व्यवहारयोग्योर्थः स्वी
कार्यं न चतदर्थः निश्चितेनाद्यासंभवस्यानुपयोगात्तस्मात्कचित्प्रमाणप्रवृत्तेः एवं गत्वादितिभावः यच्चोक्तं ज्ञानगता
नायमारूप्यस्यवज्ञानालंवनत्वोपपत्ते वहिरर्थाभावइतितत्राह नचेति ॥

यत्तु गौरवमस्के तत्र ह यथांप्रमाणिकत्वादित्याह वहिरिति यत एव ज्ञानार्थयोर्भेदः सर्वलोकसाक्षिकभवसिद्धः अत एव सहोपलंभनियमो
पि नाभेदसाधक इत्याह अत एवेति यथा चोक्तं घटद्रव्यरूपस्यालोकोपलंभनियतोपलब्धिकत्वेपि नालोकाभेदः तथार्थस्य ज्ञानाभेदः भे
दे चिग्राह्यग्राहकभावेन नियमोपपत्तेः न च ज्ञानस्य क्षणिकत्वात्स्वभिन्नग्राह्यसंबंधायोगः स्थायित्वादिति भावः विज्ञानमनेकार्थभ्योभि
न्नमेकत्वात् गोत्ववदिति सत्प्रतिपक्षमाह अपि चेति न च हेत्वसिद्धिः ज्ञातं ज्ञानमित्येकाकारप्रतीतेः ज्ञानैक्यानिश्चयात् न च साज्ञा
तो विषयाव्यक्तिभेदानिश्चयादित्याह न विशेष्यस्येति घटो दृश्यते तत्रांशे इदमेकाकारमिति ज्ञानांशे इदमाह तथेति घटोद्वा भिन्नः एक
त्वाद्दीनीरवदित्यर्थः ज्ञानभिन्नार्थानंगीकारे स्वशास्त्रव्यवहारलोपपत्त्यर्थमाह अपि चेति क्षणिकयोः स्वप्रकाशयोः क्षणिकज्ञानयोर्मिथो
ग्राह्यग्राहकत्वमयुक्तमनभ्युपगंतव्यं न चाचनयोर्भेदप्रतिज्ञानयुक्ता धर्मिप्रतियोगिनोर्मिथः परेणाप्रहणे भेदग्रहायोगात् तथा चनयोर्भे

वहिरुपलब्धेश्च विषयस्य अत एव सहोपलंभनियमोपि प्रत्ययविषययोरुपायोपेयभावहेतुकोनाभावहेतुक इत्यभ्युपगंतव्यं
अपि च घटज्ञानं पटज्ञानमिति विशेषणयोरेव घटपटयोर्भेदो न विशेष्यस्य ज्ञानस्य यथा शुक्लोगौः कृष्णोगौरिति शौक्ल्यका
र्ष्ण्ययोरेव भेदो न गोत्वस्य द्वाभ्यां च भेद एकस्य सिद्धो भवति एकस्माच्च द्वयोः तस्मादर्थज्ञानयोर्भेदः तथा घटदर्शनं घटस्मर
णमित्यत्रापि प्रतिपत्तव्यं अत्रापि विशेषयोरेव दर्शनस्मरणयोर्भेदः न विशेष्यस्य घटस्य यथा क्षीरगंधः क्षीररस इति वि
शेष्ययोरेव गंधरसयोर्भेदो न विशेषणस्य क्षीरस्य न तद्वत् अपि च योर्विज्ञानयोः पूर्वापरकालयोः स्वसंवेदनेनैवो
पक्षीणयोरितरेतरग्राह्यग्राहकत्वानुपपत्तिः ततश्च विज्ञानभेदप्रतिज्ञा क्षणिकत्वादिधर्मप्रतिज्ञा स्वलक्षणसामान्यल
क्षणवास्यवासकत्वाविद्योपप्लवसदसद्धर्मबंधमोक्षादिप्रतिज्ञाश्च स्वशास्त्रगता हीयेरन् ॥ ॥

द ग्राह्यग्राहकस्य व्याप्तिर्न तद्भिन्न एवं व्ययः एवं पक्षसाध्यहेतुदृष्टांतभेदाभावेपि क्षणिकमसदिति प्रतिज्ञानयुक्ता सर्वतो व्यावृत्तं व्यक्ति
मात्रं स्वलक्षणं अनेकानुगतं सामान्यमतद्व्यावृत्तिरूपमिति प्रतिज्ञानयुक्ता सर्वानेकार्थानां ज्ञानमात्रत्वेन मिथः परेणावाद्यत्वा
त्वात् उत्तरनीलज्ञानं वास्यं पूर्वनीलज्ञानं वासकमिति प्रतिज्ञानयुक्ता तयोर्भिन्नस्य ज्ञातुरभावात् किंचाविद्योपप्लवोविद्या
संस्कारः तेन नीलमिति सद्धर्मः नरविषाणमिति असद्धर्मः ततो विज्ञानस्यासतो नरविषाणस्य चामूर्तत्वादिति प्रतिज्ञायु
क्ते भा अनेकार्थज्ञानसाध्यत्वाद्ज्ञानेनास्य बंधो ज्ञानेनास्य मोक्ष इति च प्रतिज्ञा बहुर्थज्ञानसाध्या आदिपदेन सामान्यतदृष्ट
ग्राह्यमनिष्टत्याज्यमिति शिष्यहितोपदेशोनेकज्ञानसाध्यो गृहीतः तस्मात्प्रतिज्ञादिव्यवहाराय ग्राह्यग्राहकभेदोंगीकार्य इत्य

ज्ञानार्थयोर्भेदे युक्त्यंतरमस्तीत्याह किंचान्यदिति विज्ञानवदर्थस्याप्यनुभवाविशेषात्स्वीकारो युक्त इत्यर्थः स्वविषयत्वाद्धि
ज्ञानं स्वीक्रियते नार्थः परत्वादित्याशंकते अथ विज्ञानमिति विरुद्धत्वोक्तत्वाविरुद्धत्वजातावोद्धृतनयेन मोहदर्शि
तमित्याह अत्यंतेति ज्ञाने स्ववेद्यमित्यंगीकृत्य मेोर्व्योमापादितं वस्तुतः स्ववेद्यत्वमयुक्तमित्याह नचेति कर्तृक्रिया
प्रतिपत्तिरत्ननिभ्रंते प्रधानत्वाख्यकर्मत्वायोगात्स्वकर्तृकवेदनकर्मत्वमसंदिग्धमित्यर्थः नच स्वविषयत्वमात्रं स्ववेद्यत्वमिति वाच्यं अ
भेदे विषयत्वस्याप्यसंभवादिति भावः ज्ञानस्य स्ववेद्यत्वाभावे दोषद्वयं स्यादित्याशंकते नन्विति अनवस्था च साम्यं चेति दोषद्वय

किंचान्यदिति ज्ञाने विज्ञानमित्यभ्युपगच्छतां वाह्योऽर्थलंभः कृतमित्येवंजातीयकः कस्मान्नाभ्युपगम्यते इति वक्तव्यं वि
ज्ञानमनुभूयत इति चेत् वाह्योप्यर्थोनुभूयत एवेति युक्तमभ्युपगंतुं अथ विज्ञानं प्रकाशात्मकत्वात्प्रदीपवत् स्वयमे
वानुभूयते न तथा वाह्योप्यर्थ इति चेत् अत्यंतविरुद्धां स्वात्मनि क्रियामभ्युपगच्छसि अग्निरात्मानं दहतीतिवत् अविरु
द्धं तु लोकप्रसिद्धं स्वात्मव्यतिरिक्तेन विज्ञानेन वाह्योर्थोनुभूयत इति नेच्छसि अहो पांडित्यं महद्दर्शितं नचार्थव्यतिरिक्तम
पि विज्ञानं स्वयमेवानुभूयते स्वात्मनि क्रियाविरोधादेव ननु विज्ञानस्य स्वरूपव्यतिरिक्तग्राह्यत्वे तदप्यन्येन तदप्यन्येनेत्यन
वस्थामाप्नोति अपि च प्रदीपवदवभासात्मकत्वाज्ज्ञानस्य ज्ञानांतरं कल्पयतः समत्वादवभास्यावभासकभावानुपपत्तेः
कल्पनानर्थक्यमिति तदुभयमप्यसत् विज्ञानग्रहणमात्र एव विज्ञानसाक्षिणो ग्रहणाकांक्षानुत्पादादनवस्थाशंका
नुपपत्तेः साक्षिप्रत्यययोश्च स्वभाववैषम्यादुपलब्ध्रुपलभ्यभावोपपत्तेः स्वयंसिद्धस्य च साक्षिणोऽप्रत्याख्येयत्वा
त् किंचान्यत्प्रदीपवद्विज्ञानमवभासकांतरनिरपेक्षं स्वयमेव प्रथत इति ब्रुवताऽप्रमाणगम्यं विज्ञानमनवगंतृकमि
त्युक्तं स्याच्छिलाघनमध्यस्थप्रदीपसहस्रप्रथनवत् ॥

परिहरति तदुभयमपीति अनित्यज्ञानस्य जन्मादिमत्वेन घटवज्जडस्य स्वेन स्वीयजन्मादिग्रहायोगादस्ति ग्राहकाकांक्षा साक्षि
णस्तु सत्तायाः स्फुरणे च निरपेक्षत्वान्नानवस्था नापि साम्यं च जडत्ववैषम्यादित्यर्थः साक्षी क्वेत्यत आह स्वयंसिद्धस्येति नि
रपेक्षस्य साक्षिणो मन्वेऽक्षणिकविज्ञानभेदासिद्धेः सोंगीकार्य इत्यर्थः अनित्यज्ञानस्वरूपसाधकत्वाच्च साक्षी स्वीका
र्य इत्याह किंचेति विज्ञानं ज्ञानांतरानपेक्षमिति ब्रुवता तस्य प्रामाणिकत्वमुक्तं स्यात् स्वयं प्रथत इति ब्रुवता ज्ञातृत्वमन्य
त्वं चोक्तं स्यात् यथा च ज्ञातृज्ञानाविषयत्वाच्छिलास्थप्रदीपवदसदेव विज्ञानं स्यात् तस्मात् स्वयं प्रथत इत्यर्थः ॥ राम॥

विज्ञानस्य स्वात्मज्ञाने स्वात्मविरोधेनैव तत्त्वया पाद्यते न चात्मत्वापत्तिर्ज्ञात्रभावादिति वाच्यं स्वस्यैव ज्ञातृत्वादित्यर्थः शंकते वाह्यमि
ति अभेदे ज्ञातृज्ञेयत्वायोगात् ज्ञात्रंतरमावश्यकमिति परिहरति नेति विमतं ज्ञानं स्वातिरिक्तवेद्यं वेद्यत्वाद्देहवदित्यर्थः अतिरि
क्तः साक्षी किमन्यवेद्यः स्ववेद्यो वा आद्ये नवस्था द्वितीये विज्ञानवाद एव भंग्यंतरेणोक्तः स्यादिति शंकते साक्षिण इति नत्वया विज्ञान
नन्यविनाशशुक्रमुच्यते अतः कार्यसजडत्वनियमात्स्वातिरिक्तवेद्यत्वमस्माभिः साधितं कूटस्थचिदात्मनो ग्राहकानपेक्षत्वात्ना
न वास्थितिचोक्तमतो महदेव लक्षणमावयोरिति परिहरति विज्ञानस्येति एवं वेद्यविज्ञानवदर्थस्याप्युपलब्धेनैवाध्यासायोभाव
इत्युक्तं संप्रति ज्ञाप्रतिज्ञा यद्विज्ञानं स्वप्नादिविज्ञानवद्वाह्यालंबनमित्यनुमानं दूषयति वैधर्म्याच्चेति किमत्र निर्विषयत्वसाध्यमत

वाढमेवमनुभवरूपत्वाद्विज्ञानस्येष्टेनः पत्तत्स्वयानज्ञायत इति चेत् नान्यस्यावगतेः चक्षुरादिसाधनस्य प्रदीपादिमप्यन
दर्शनाद्दतो विज्ञानस्याप्यवभास्यत्वाविशेषात्सत्येवान्यस्मिन्नवगंतरि प्रथनं प्रदीपवद्विज्ञानमवगम्यते साक्षिणोवगंतुः स्वय
सिद्धतामप्रतिपत्नास्वयं प्रथते विज्ञानमित्येष एव मत्पक्षस्त्वया वाचो युक्त्यंतरेणाश्रित इति चेत् न विज्ञानस्योत्पत्तिप्र
ध्वंसानेकत्वादिविशेषवत्त्वाभ्युपगमात् अतः प्रदीपवद्विज्ञानस्यापि व्यतिरिक्तावगम्यत्वमस्माभिः प्रसाधितं वैधर्म्याच्च न
स्वप्नादिवत् २९ यदुक्तं वाह्यार्थापलापिना स्वप्नादिप्रत्ययवज्जागरितगोचरा अपि स्तंभादिप्रत्यया विनैव वाह्येनार्थेन भवेयुः
प्रत्ययत्वाविशेषादिति तत्प्रतिवक्तव्यं अत्रोच्यते न स्वप्नादिप्रत्ययवज्जाग्रत्प्रत्यया भवितुमर्हंति कस्मात् वैधर्म्यात् वैधर्म्यं हि
भवति स्वप्नजागरितयोः किं पुनर्वैधर्म्यं वाधावाधाविति ब्रूमः वाध्यते हि स्वप्नोपलब्धं वस्तु प्रतिबुद्धस्य मिथ्या मयोपलब्धो म
हाजनसमागम इति नह्यस्ति मम महाजनसमागमो निद्राग्लानं तु मे मनो बभूव तेनैषा भ्रांतिरुद्बभूवेति एवं मायादिष्वपि
भवति यथायथं वाधः नैवं जागरितोपलब्धं वस्तु स्तंभादिकं कस्यांचिदवस्थायां वाध्यते अपि च स्मृतिरेषा यत्स्वप्नदर्शनम्
उपलब्धिस्तु जागरितदर्शनं स्मृत्युपलब्ध्योश्च प्रत्यक्षमंतरं स्वयमनुभूयते अर्थविप्रयोगात्मकमिष्टपुत्रं स्मरामि नोपल गसंप्रयो

पारमार्थिकविषयशून्यत्वमथवा व्यावहारिकविषयशून्यत्वं नाद्यः स्वप्नादिविभ्रमाणामपि मिथ्यार्थालंबनत्वेन दृष्टांते साध्यवैकल्या मि
न्न द्वितीयः सिद्धसाधनादिति सूत्रस्य चकारार्थः तृतीये न व्यवहारदशायां बाधितार्थग्राहित्वमुपाधिरित्याह बाध्यते हीत्यादि
ना निद्राग्लानमिति करणदोषोक्तिः साधनव्यापकत्वं निरस्तमाह नैवमिति किंच प्रमाणज्ञानमेव उपलब्धिः प्रत्यक्षप्रमा
णं स्वप्नज्ञानं दृष्टांत इति वैधर्म्यांतरं परमतेन स्वप्नस्य स्मृतित्वमंगीकृत्याह अपि चेति स्मृतिप्रत्यक्षोपलब्ध्योर्वैधर्म्यांतर
माह अर्थविप्रयोगेति असंबद्धस्यावर्तमानस्य स्मृतेरर्थो विषय इति निरालंबनत्वमप्यस्याः कदाचिद्भवेत् न संप्र
युक्तवर्तमानार्थमात्रग्राहिण्या उपलब्धेरिति भावः ॥ ॥

एवं क्रमेण प्रमाणज्ञाने वैधर्म्योक्तिफलमाह तथैवं सतीति वैधर्म्ये सतीत्यर्थः अप्रमाणज्ञानस्यापि निरालंबनत्वानुमानेन युक्तमितिभावः वैधर्म्यासिद्धिं निरस्यति न चेति बाधमाप्याह अपि चेति वस्तुतो ग्राह्यानुभवस्य निरालंबनत्वधर्मो यदि स्यात् तर्हि किं दृष्टान्तग्रहणे प्रत्यक्षतोपि वक्रेणाकारतान्नष्टैव सोऽस्य दृष्टान्तेन वक्रत्वं यदि न वस्तुतो धर्मोऽस्ति तदापि किं दृष्टान्तेन बाधितस्य दृष्टान्तस्य ग्रहणेऽपि दुःसाध्यत्वात् अतः स्वतो निरालंबनत्वोक्तौ सालंबनत्वानुभवबाधमिथ्यात्वयानुमानमारब्धं तस्यापि बाधो न च तनीत्यर्थः उक्तोपपत्तिरपि न विस्मर्तव्या इत्याह दर्शितेति विति लक्ष्यावयवेषु साधर्म्यत्वाद् दूषयति यदप्युक्तमित्यादिना भावः उक्तिः सत्तावा नन्वाद्यर्थानुपलब्ध्यावपि एवं एवं वासनावलादुत्तरोत्तरविज्ञानवैचित्र्यं नस्त्वबीजांकुरवदनादित्वादित्यत आह

तथैवं सतीति न स्याकारनैवक्तं मिथ्याजागरितोपलब्धिरूपलब्धित्वात्स्वप्नोपलब्धिवदिति उभयोरंतरस्य यमनुभवता नवस्त्वानुभवापलापः प्राज्ञमानिभिर्युक्तः कर्तुं अपि चानुभवविरोधप्रसंगाज्जागरितप्रत्ययानां स्वतो निरालंबनताव क्रमशःक्रमवत्त्वात् स्वप्नप्रत्ययसाधर्म्यात् उक्तं मिथ्यात्वे न च योयस्य स्वतो धर्मो न संभवति सोऽन्यस्य साधर्म्यात् तस्य संभविष्यति न ह्यग्निरुष्णोऽनुभूयमान उदकसाधर्म्यात् शीतो भविष्यति दर्शितं तु वैधर्म्यं स्वप्नजागरितयोः नभावोनुपलब्धेः ३२ यदप्युक्तं विनाप्यर्थेन ज्ञानवैचित्र्यं वासनावैचित्र्यादेवावकल्पत इति तत्प्रतिवक्तव्यं अत्रोच्यते न भावो वासनानामुपपद्यते त्वत्पक्षेऽनुपलब्धेर्बाह्यानामर्थानामर्थोपलब्धिनिमित्ता हि प्रत्यर्थं नानारूपा वासना भवंत्यनुपलभ्यमानेषु त्वर्थेषु किंनिमित्ता विचित्रा वासना भवेयुः अनादित्वेप्यंधपरंपरान्यायेनाप्रतिष्ठैवानवस्था व्यवहारलोपिनी स्यान्नाभिप्रायसिद्धिः यावप्यन्वयव्यतिरेकावर्थोपलब्धिनो वस्तुतो वासनानिमित्तमेवेदं ज्ञानं जातं नार्थनिमित्तमिति तावप्येवं सति प्रत्युक्तौ द्रष्टव्यौ विनार्थोपलब्ध्या वासनानुपपत्तेः अपि च विनापि वासनाभिरर्थोपलब्ध्युपगमात् विनार्थोपलब्ध्या वासनोत्पत्त्यनभ्युपगमात् अन्वयसद्भावमेवान्वयव्यतिरेकावपि प्रतिषेधयतः ॥ राम ॥

अनादित्वेपीति बीजादंकुरोदयदृष्टांतदृष्टेपि तज्जातीययोः कार्यकारणभावकल्पना युक्ता इह त्वर्थानुभवनिरपेक्षवासनोत्पत्तेरदृष्टेर्वकल्प्यत्वादनादित्वकल्पना निर्मूलेति नाभिप्रेतधीवैचित्र्यसिद्धिरित्यर्थः ननु निरपेक्षा वासनानां सत्त्वे धीवैचित्र्यमस्तु न त्वेतत्स्वमेव दृष्टमिति समूलानवस्थेत्यत आह यावितिवासनानां बाह्यानुभवकार्यत्वे सति निरपेक्षत्वासिद्धेर्नान्वयादिदृष्टेरित्यर्थः कार्यत्वग्राहकव्यतिरेकमाह विनेति अर्थानुभवकार्याणां वासनानां तदपेक्षत्वायोगान्नत्वदुक्तान्वयादिदृष्टिरित्युक्तमपि न वार्थोपलब्धिवैचित्र्यस्य वासनां विनापि भावेन व्यतिरेकव्यभिचाराच्च न क्वापि वासनामात्रकृतं धीवैचित्र्यं किं त्वर्थानुभवे सति वासनास्तीति नेत्यन्वयव्यतिरेकाभावः वासनामूलानुभवावच्छेदकार्थकृतमेवेति भावः सार्थं तद्भाव

यः संस्कारः स साश्रयो लोके दृष्टः यथा वेगादिरिषाद्याश्रयः अतो विज्ञानसंस्काराणां नाभावः आश्रयानुपलब्धेरित्यर्थो न स्मा
दृ अपि चेति अस्त्वालयविज्ञानमाश्रय इत्यत आह क्षणिकत्वाच्चेति सूत्रं व्याचष्टे यदपीति सहोत्पन्नयोः सव्येतरविषाण
वदाश्रयाश्रयिभावायोगात्स्थायीपर्यंचाधेयं क्षणेन तत्राधारत्वायोगात्तत्त्वे क्षणिकत्वव्याघातात्तानाधारत्वमालयविज्ञानस्य क्षणिकत्वा
न्नीलादिविज्ञानवदित्यर्थः अस्तु तर्ह्यालयविज्ञानसन्तानाश्रया वासनेत्यत आह नहीति सविकारः कूटस्थो वास्थायात्माय
दिनाविज्ञातदासंतानस्यावस्तुत्वाद्देशायपक्षे यावत्सिद्धान्तनानामाधाने निक्षेपो पर्यवस्यति प्रत्यभिज्ञेयश्चानन्तरलोकव्यवहारः तत्सर्वं न
संभवतीत्यर्थः यदि व्यवहारार्थमात्मस्थायित्वं तदा अपसिद्धान्त इत्याह स्थिरेति सूत्रमतिदेशार्थत्वेनापि व्याचष्टे अपि चेति म
तद्द्वयनिरासमुपसंहरति एवमिति ज्ञानज्ञेयात्मकस्य सर्वस्य सत्त्वाभ्यां विचारासहत्वाच्छून्यतावशिष्यत इति माध्यमिकपक्ष सत्वा २

अपि च वासना नाम संस्कारविशेषाः संस्काराश्चनाश्रयमन्तरेणावकल्पन्ते एवं लोके दृष्टत्वात् न च तव वासनाश्रयः
कश्चिदस्ति प्रमाणतोऽनुपलब्धेः क्षणिकत्वाच्च ३२ यदप्यालयविज्ञानं नाम वासनाश्रयत्वेन परिकल्पितं तदपि
क्षणिकत्वाभ्युपगमादनवस्थितस्वरूपं सत्प्रवृत्तिविज्ञानवन्न वासनानामधिकरणं भवितुमर्हति नहि कालत्रयसंबंधिन्ये
कस्मिन्नन्वयिन्यसति कूटस्थे वा सर्वार्थदर्शिनि देशकालनिमित्तापेक्षवासनाधानस्मृतिप्रतिसंधानादिव्यवहारः
संभवति स्थिरस्वरूपत्वे त्वालयविज्ञानस्य सिद्धान्तहानिः अपि च विज्ञानवादेऽपि क्षणिकत्वाभ्युपगमस्य समानत्वा
द्यानि बाह्यार्थवादे क्षणिकत्वनिबंधनानि दूषणान्युद्भावितानि उत्तरोत्पादे च पूर्वनिरोधादित्येवमादीनि तानीहा
प्यनुसंधातव्यानि एवमेतौ द्वावपि वैनाशिकपक्षौ निराकृतौ बाह्यार्थवादिपक्षो विज्ञानवादिपक्षश्च शून्यवादि
पक्षस्तु सर्वप्रमाणविप्रतिषिद्ध इति तन्निराकरणाय नादरः क्रियते ॥

स्यापि मानमूलत्वमाशंक्य सूत्रकारः किमिति न निराचकार इत्यत आह अन्त्येति आदरः पृथक्सूत्रारंभो न क्रियते प
तान्येव तन्मतनिरासार्थत्वेनापि योज्यानीत्यर्थः तथाहि ज्ञानार्थयोर्नाभावः प्रमाणोपलब्धेः ननु जाग्रत्स्वप्नयोर्ज्ञानार्थ
योरैक्याऽवस्थात्वात्स्वप्नमिव दृश्यत इत्यत आह वैधर्म्याच्च न स्वप्नादिवत् स्वप्नः आदिर्यस्याः सुषुप्तेः तद्वज्जाग्रदवस्थायाः असत्या
त्वमुपलब्ध्यनुपलब्धिवैधर्म्यलक्षणाबाधितज्ञानार्थोपलब्धिबाधात् सुषुप्तावप्यात्मज्ञानसत्त्वेन साध्यं कल्याद्वनान्तु वै २
मानमित्यर्थः किंच निरधिष्ठान[illegible]निषेधायोगादधिष्ठानमेव तत्त्वं वाच्यं न सत्त्वमिति तेनाभावः मानतोऽनुप

२ उपलब्ध्यनुपलब्धी इति उपलब्ध्यनुपलब्ध्योर्यद्वैधर्म्यं तल्लक्षणे तेऽनये यत्साचासौ बाधितज्ञानार्थोपलब्धिस्तद्रूपबाधादित्यर्थः २

धाभावा

शा०त० द्वि० ८०

तदर्थमाह नश्यमिति यद्यतिनत्रासदित्युत्सर्गतः अयं च सन्नसत्त्वं वेत्यर्थः न च सत्त्वासत्त्वाभ्यां विचारासहत्वाच्छून्यत्वं
मिथ्यात्वसंभवादिति भावः क्षणिकत्वाच्चेति सत्त्वक्षणिकत्वोपदेशाच्चेति पठतीयमन्यविरुद्धक्षणिकत्वोपदेशादसंगतप्र
लापोहत नश्यत्यर्थः सुगतमतासांगत्यमुपसंहरति सर्वथेति सर्वज्ञस्य कथं विरुद्धप्रलापत्वं तत्राह प्रद्वेषो वेति वेदवाद्या
अत्र प्रजा प्राहुमतीताना नैकत्र मलसुगतसिद्धा तेन वेदांतसिद्धांतस्याविरोधः इति सिद्धं नैकस्मिन्नसंभवात् म्लङ्घकच्छमतेनिरः
स्यप्रकावरणांमनन्तवुद्धस्य भवति तन्निरस्यते इति प्रसंगसंगतिमाह निरस्तइति एकरूपं प्रस्तिति वैदिकसिद्धांतस्यानेका
न्तवादेन विरोधोस्ति न वेति तद्वादस्यमानत्वं नेति मूलत्वाभावात्तदेहमाननमूलत्वात् विरोध इति पूर्वपक्षफलमभिसंधायत

अतस्य३

नश्ययं सर्वप्रमाणसिद्धो लोकव्यवहारोन्यतत्त्वमनधिगम्य शक्यते पन्होतुं अपवादाभाव उत्सर्गप्रसिद्धेः सर्वथानुपपत्ते
श्च ३३ किं वहुना सर्वप्रकारेण यथा यथायं वैनाशिकसमय उपपत्तिमत्वाय परीक्ष्यते तथा तथा सिकताकूपवद्विदी
र्यत एव न काचिदत्र उपपत्तिं पश्यामः अतश्चानुपपन्नो वैनाशिकतन्त्रव्यवहारः अपि च बाह्यार्थविज्ञानशून्य
वादत्रयमितरेतरविरुद्धमुपदिशता सुगतेन स्पष्टीकृतमात्मनो संवधप्रलापित्वं प्रद्वेषो वा प्रजासु विरुद्धार्थप्रतिपत्त्या
विमुह्येयुरिमाः प्रजा इति सर्वथाप्यनादरणीयोयं सुगतसमयः श्रेयस्कामैरित्यभिप्रायः नैकस्मिन्नसंभवात्
३४ निरस्तः सुगतसमयः विवसनसमय इदानीं निरस्यते सप्त चैषां पदार्थाः संमता जीवाजीवास्रवसंवरनिर्जरबंध
मोक्षानाम संक्षेपतस्तु द्वावेव पदार्थौ जीवाजीवाख्यौ यथायोगं तयोरेवेतरान्तर्भावादिति मन्यन्ते तयोरिमम् अपरं
प्रपंचमाचक्षते पंचास्तिकाया नाम जीवास्तिकायः पुद्गलास्तिकायः धर्मास्तिकायः अधर्मास्तिकायः आकाशा
स्तिकायश्चेति ॥

मत मुपन्यस्यति सप्त चेति जीवाजीवौ भोक्तृभोग्यौ विषयाभिमुख्येन इंद्रियाणां प्रवृत्तिरास्रवः तां संवृणोतीति संवरो
यमनियमादिः निर्जरयति नाशयति कल्मषमिति निर्जरस्तप्तशिलारोहणादिः वंधः कर्म मोक्षः कर्मपाशनाशे तस्य
लोकाकाशप्रविष्टस्य सततोर्ध्वगमनं नन्वास्रवादीनां भोग्यत्वेनाजीवान्तर्भावात् सप्तत्वमित्यत आह तत्रैप तावदिति संक्षे
पविस्तराभ्यामुक्ता पदार्थाः मध्यम एषां विस्तारान्तरमाह तयोरिति अस्तिकायशब्दः सांकेतिकः पदार्थवाची जीवश्चा
सावस्तिकायश्चेत्येव विग्रहः पूर्यन्ते गलन्तीति पुद्गलाः परमाणुसंघाः कायाः सम्यक्प्रवृत्त्यनुमेयो धर्मः ऊर्ध्व
गमनशीलस्य जीवस्य देहस्थितिहेतुरधर्मः आवरणाभाव आकाश इत्यर्थः ॥ रामाय नमः ॥

पंचपदार्थानामवांतरभेदमाह सर्वेषामिति अयमर्थः जीवास्तिकायस्त्रिविधः कश्चिज्जीवो नित्यसिद्धः अर्हन्नाख्यः केचित्साम्प्रतिकमुक्ताः केचिद्बद्धा इति पुद्गलास्तिकायः षोढा पृथिव्यादिचत्वारि भूतानि स्थावरं जंगमं चेति प्रवृत्तिस्थितिलिंगो धर्माधर्मौ द्वौ आकाशास्तिकायो द्विविधः लोकाकाशः सांसारिकः अलोकाकाशः मुक्ताश्रय इति बंधाख्यं कर्माष्टविधं चत्वारि घातिकर्माणि चत्वार्यघातीनि तत्र ज्ञानावरणीयं दर्शनावरणीयं मोहनीयमांतरायं चेति घातिकर्माणि तत्त्वज्ञानान्मुक्तिरिति ज्ञानमाद्यं कर्म आह तत्र श्रवणात्मकं कृतिनिर्णयं द्वितीयं बहुषु तीर्थंकरप्रदर्शितेषु मोक्षमार्गेषु विशेषानवधारणं मोहनीयं मोक्षमार्गप्रवृत्तिविघ्नकारणमांतरायं इमानि चत्वारि श्रेयो हंतृत्वात् घातिकर्माणि अघातीनि चत्वारि कर्माणि वेदनीयं नामिकं गोत्रिकं आयुष्कमिति मम वेदितव्यं तत्त्वमस्तीत्यभिमानो वेदनीयं एतन्नामाहमस्मीत्यभिमानो नामिकं अहमत्र भवतो देशिकस्यार्हतः शिष्यवंशे प्रविष्टोऽस्मीत्यभिमानो गोत्रिकं शरीरस्थित्यर्थं कर्मायुष्कं अथवा शुक्लशोणितमिश्रितमायुष्कं तस्य तत्त्वज्ञानानुकूलदेहपरिणामशक्तिर्गोत्रिकं शुक्लशोणितस्य द्रवीभावात्मककललावस्थायां बुद्बुदावस्थायाश्चारंभकाक्रियाविशेषो नामिकं तत्क्रियेयं जाठराग्निवायुभ्यामीषद्घनीभूतं वेदनानुकूलत्वात् तान्येतानि तत्त्ववेदकशुक्लपुद्गलायत्तत्वाद् घातीनीति तदेतत्कर्माष्टकं जन्मायत्तत्वात् बंधः आस्रवादिद्वारेति इयमपि

सर्वेषामप्येषामवांतरप्रभेदान् बहुविधान् स्वसमयपरिकल्पितान्वर्णयंति सर्वत्र चेमं सप्तभंगीनयं नाम न्यायमवतारयंति स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यश्च स्यान्नास्ति चावक्तव्यश्च स्यादस्ति च नास्ति चावक्तव्यश्चेत्येवमेवैकत्वनित्यत्वादिष्वपीमं सप्तभंगीनयं योजयंति ॥ ति

क्रियामात्रमस्त्येति द्योतयति स्वसमयपरिकल्पितानिति स्वीयतंत्रसंकेतमात्रकल्पितानित्यर्थः पदार्थानामनेकांतत्वं वदतीत्याह सर्वत्र चेति अस्तित्वनास्तित्वविरुद्धधर्मद्वयनादायवस्तुमात्रे न्यायं योजयंति समानामस्तित्वादीनां भंगानां समाहारः सप्तभंगीति स एव न्यायः वदंति हि तत्त्वं तत्त्वात्मना तदेकरूपत्वेप्राप्यात्मना प्यसत्वसत्त्वमिति तस्मात्प्रमेयं यत्नेन स्याद्दत्तो घटत्वादिरूपेण कथंचिदस्ति प्राप्यत्वादिरूपेण कथंचिन्नास्तीत्येवमनेकरूपत्वे वस्तुमात्रस्य साध्यं यमिति भावः केते सप्तभंगाः तानाह स्यादस्तीति स्यादित्यव्ययं तिङंतप्रतिरूपकं कथंचिदर्थकं स्यादस्ति कथंचिदस्तीत्यर्थः एवमग्रेऽपि तत्र वस्तुनास्तित्ववांछायां स्यादस्तीत्याद्यो भंगः प्रवर्तते नास्तित्ववांछायां स्यान्नास्तीति द्वितीयो भंगः क्रमेणोभयवांछायां स्यादस्ति नास्ति चेति तृतीयो भंगः युगपदुभयवांछायामस्ति नास्तीति शब्दस्य सकृदुक्तमशक्यत्वात्स्यादवक्तव्यमिति चतुर्थो भंगः आद्यचतुर्थभंगयोर्वांछायां स्यादस्ति चावक्तव्यश्चेति पंचमो भंगः द्वितीयचतुर्थेच्छायां स्यान्नास्ति चावक्तव्यश्चेति षष्ठो भंगः तृतीयचतुर्थेच्छायां स्यादस्ति नास्ति चावक्तव्यश्चेति सप्तमो भंग इति विभागः एवमेकत्वमनेकत्वं चेति द्वयमादाय स्यादेकः स्यादनेकः स्यादेकोऽनेकश्च स्यादवक्तव्यः स्यादेकोऽवक्तव्यः स्यादनेकोऽवक्तव्यः स्यादेको नेकश्चावक्तव्यश्चेति तथा स्यान्नित्यः स्यादनित्य इत्यादयो ॥

वीर्य स्मर

भावो वेदनीर

स्मर

शा॰भा॰
द्वि॰
६८

एवमनेकरूपत्वेच वस्तुनि प्राप्तिस्त्या गादिव्यवहारः संभवति एकरूपत्वेतु सर्वे सर्वत्र सर्वदास्त्येवेति व्यवहारविलोपापत्तिः स्यात्तस्मादने कांतं सर्वमित्येकरूपब्रह्मवादबाध इति प्राप्ते सिद्धांतयति अनेति यदस्ति तत्सर्वत्र सर्वदास्त्येव यथा ब्रह्मात्मा न चैवं तन्नाम सेयथ वोत सत्यादिति वाच्यं अप्राप्तिर्भ्रांत्या यत्नसंभवात्यत्रास्ति तत्रास्त्येव यथा शविषाणादि प्रपंचस्तूभयविलक्षण एवेत्येकांतवाद एवयुक्तः नानेकांतवाद स्तथा हि किं येनाकारेण वस्तुनः सत्वं तेनैवाकारेणासत्वमुताकारांतरेणासत्वं [illegible] द्वितीये वः स्तुन आकारांतरेणैवासदिति वस्तुनासदेकरूपत्वमेव न हि हरस्य प्राम स्य प्रामेरसत्वे प्रामोप्यसन्भवति प्राप्यासत्वेप्राप्तिर्यत्नाने पपत्तेः अतोयथा व्यवहारं प्रपंचस्यैकरूपत्वमास्थेयं नायद्वत्याह नायमिति नन्वविमतमनेकात्मकं वस्तुत्वादात्मवदित्यत

आह नाचत्याह नायमनभ्युपगमोयुक्त इति कुत एकस्मिन्नसंभवात् न ह्येकस्मिन्धर्मिणि युगपत्सदसत्वादि विरुद्धधर्मसमावेशः संभवति शीतोष्णवत् यत्तेन सप्तपदार्थानिर्द्धारिताएतावंत एवंरूपाश्चेति ते तथैववास्युः नैववा तथास्युः इतरथाहि ते यावा स्युरतथा वेत्यनिर्द्धारितरूपंज्ञानंसंशयज्ञानवदप्रमाणमेवस्यात् नन्वनेकात्मकंवस्त्विति निर्द्धारितरूपमेवज्ञा नमुत्पद्यमानंसंशयज्ञानवन्नाप्रमाणंभवितुमर्हतीति नेति ब्रूमः निरंकुशं ह्यनेकांतत्वंसर्ववस्तुषु प्रतिजानानस्य निर्धारणस्यापि वस्तुत्वाविशेषात्स्यादस्ति स्यान्नास्तीत्यादि विकल्पोपनिपातादनिर्धारणात्मकतैवस्यात् एवंनिर्धारयितुर्निर्धारणा फलस्य च स्यात्पक्षेनास्तितेति एवंसतीति कथंप्रमाणभूतः सन्तीर्थकरः प्रमाणप्रमेयप्रमातृप्रमितिष्वनिर्धारितासु पदेष्ठं शक्नुयात् कथं वा तदभिप्रायानुसारिणस्तदुपदिष्टेर्थेनिर्धारितरूपेप्रवर्तेरन् ऐकांतिकफलत्वनिर्धारणे हि सति तत्साधनानुष्ठानाय सर्वोलोकोनाकुलःप्रवर्तते नान्यथा अतश्चानिर्धारितार्थशास्त्रं प्रणयन्मत्तोन्मत्तवदनुपादेयवचनः स्यात् तथा पंचानामस्तिकायानां पंचत्वमस्तिवानास्ति वेति विकल्प्यमानास्यात्तावदेकस्मिन्पक्षेपक्षांतरेतु न स्यादिति न्यूनसंख्यत्वमधिकसंख्यत्वंवाप्राप्नुयात् न चैषां पदार्थानामवक्तव्यत्वं संभवति अवक्तव्याश्चेन्नोच्येरन् उच्यंतेचावक्तव्याश्चे

ति तत्सदृशानीमस्त्येवेत्यनुभवबाधात् किंच जीवादिपदार्थानां सत्वं जीवत्वादिरूपं चास्मिन्नास्त्येवेतिस्वनिपत्तं वाऽनुतां नियतं अप्येत्यभिचार इत्याह यइति द्वितीये पदार्थ निश्चयो न स्यादित्याह इतरथेति अनेकांतं सर्वमित्येव निश्चय इति शंकते नन्विति तस्यनिश्चयरूपत्वं नियतमनियतंवा आद्यवस्तुत्वस्य तस्मिन्नेवैकरूपनिश्चये व्यभिचारः द्वितीये न सत्संशयत्वं स्या दित्याह नतिरूमइति प्रमाप्रमातृकत्वादिप्रमात्राद्यावतिदिशति एवमिति निर्धारणफलस्य प्रमाणादेरसत्वपक्षः इत्येवसर्वत्रानिर्धारणात्सत्यं पदेष्टोनिष्कंपप्रवृत्तिश्च न स्यादित्याह एवंसतीति अनेकांतवादे अस्तिकायपंचत्वमपि न स्यादित्याह तथा पंचानामिति यदुक्तमवक्तव्यत्वं तत्किंकेनापि शब्देनावाच्यत्वमुत तत्सकृदनेकशब्दवाच्यत्वं नाद्यः व्याघातादित्याह न चैषामि

॥ इत्येवं ... ॥

इ॰ ...
४८

नद्वितीयः सकृदेकवस्तुन्यखण्डज्ञाने कुशलानामप्रसिद्धेर्निषेधायोगात् शेषस्यापि सुखभेदात्र चार्थस्य युगपद्विरुद्धधर्मवाञ्छायां वस्तुन्येक
त्वमात्रसवक्तव्यपदेन विवक्षितमिति वाच्यं तादृशवाञ्छाया एवानुत्पत्तेरिति किंच विरुद्धानेकधर्मप्रलापित्वादर्हन्ननाप्त इत्याह उन्मत्ता
प्रमत्ता इति इतिच प्रलपन्नित्यन्वयः अर्हन्निति शेषः अनाप्तपक्षस्यैवोन्नगीतः स्यात्राप्तपक्षस्येत्यर्थः इत आप्तासंगतोऽनेकांतवाद इ
त्याह सर्वेति किं चानादिसिद्धोऽर्हन्मुनिः अनेन तु हेतुत्वेनानुष्ठानान्युच्यते अनन्तानुष्ठानाद्युत्पत्तेरित्याह तत्रैवावद्धतस्वभावानां त्रिविधजी
वानां त्रैविध्यनियमोऽपि न स्यादित्याह अनादीति मुक्तेतरस्य चार्थं निगमयति एवमिति एतेनेति सत्त्वासत्त्वयोरेकत्र निरासेन

उन्मत्तानामप्रतयेवावधार्यं न इति वचनात् तदवधारणफलं सम्यग्दर्शनमस्ति नास्ति वा एवं तद्विपरीतमसम्यग्दर्शनमस्ति वा
नास्ति वेति प्रलपन्नतोन्मत्तपक्षस्यैव स्यात्र प्रत्यायितव्यपक्षस्य स्वर्गापवर्गयोरप्रपक्षभावः पक्षे चाभावस्तथापक्षे नित्यता
पक्षे चानित्यतेति अनवधारणायां प्रवृत्त्यनुपपत्तिः अनादिसिद्धजिनप्रभृतीनां च सत्त्वासत्त्वावद्धतस्वभावानामप्यावद्ध
तस्वभावत्वप्रसंगः एवं जीवादिषु पदार्थेष्वेकस्मिन्धर्मिणि सत्त्वासत्त्वयोर्विरुद्धयोर्धर्मयोरसंभवात् सत्त्वे वैकस्मिन्धर्मे स
त्त्वस्य धर्मान्तरस्यासंभवात् असत्त्वे चैव सत्त्वस्यासंभवादसंगतमिदमार्हतमतं एतेनैकानेकनित्यानित्यव्यतिरिक्ताव्यतिरे
काद्यनेकान्ताभ्युपगमा निराकृता मंतव्याः यत्तु कुशलास्तत्केभ्योऽभ्यः सन्नाताः संभवंतीति कल्पयंति तत्सर्वेणैवाग
वादनिराकरणेन निराकृतं भवतीत्यतो न पृथक् तन्निराकरणाय प्रयत्यते एवं चात्मैकान्त्ये ४५ यथैकस्मिन्धर्मिणि वि
रुद्धधर्मासंभवो दोषः स्याद्वादे प्रसक्तः एवमात्मनोऽपि जीवस्यात्मन्यम परो दोषः प्रसज्येत कथं शरीरपरिमाणो हि जीव इ का ५
त्यार्हता मन्यंते शरीरपरिमाणतायां च सत्यामकृत्स्नोऽसर्वगतः परिच्छिन्न आत्मेत्यतो घटादिवदनित्यत्वमात्मनः प्रसज्येत श
रीराणां चानवस्थितपरिमाणत्वात् मनुष्यजीवो मनुष्यशरीरपरिमाणो भूत्वा पुनः केनचित्कर्मविपाकेन हस्तिजन्म प्राप्नुवन्न स
कलं हस्तिशरीरं व्याप्नुयात् पुत्तिकाजन्म च प्राप्नुवन्न कृत्स्नः पुत्तिकाशरीरे संमीयेत समान एष एकस्मिन्नपि जन्मनि कौमा
रयौवनस्थविरेषु दोषः स्यादेतत् अनंतावयवो जीवस्तस्य त एवावयवा अल्पे शरीरे संकुचेयुर्महति विकसेयुरिति॥

त्यर्थः परमाणवस्तावन्तः पृथग्वादय इति दिगंबरसिद्धांतः किमिति सूत्रकृतोपेक्षितस्तत्राह पर्यायेति जीवस्य देहपरिमाणतां दूषय
ति एवंचेति अकार्त्स्न्यमध्यमपरिमाणत्वं तेनानित्यत्वं स्यादित्यर्थः अपर्याय इत्याह शरीराणां चेति विपाकः कर्मणामभिव्यक्तिः
जीवस्याकृत्स्नमगजशरीराव्यापित्वमकार्त्स्न्यं शरीरैकदेशे निर्जीवः स्यादित्यर्थः पुत्तिकादेहे कृत्स्नो जीवो न प्रविशेद्देहाद्बहिरपि
जीवः स्यादित्यर्थः किंच बालदेहमात्र आत्मा ततः स्थूलेषु वदेहः कथंचित्स्यादिति कृत्स्नदेहः स जीवो न स्यादित्याह समान इ
ति यथा दीपावयवानां घटे संकोचो गेहे विकासस्तथा जीवावयवानामिति देहमानत्वनियमप्राकृतं स्यादिति॥ ॥

शात्र.
द्वि०
४८

दीर्घं शावज्जीवांशानां भिन्नदेशाः एकदेशा वेति विकल्प्याद्ये ल्पदेहाद्बृहद्देहेऽपि जीवः स्यादिति दूषयति तेषामित्यादिना दीपस्तनच
द्वाहहिः सत्वं अधिकावयवानां विनाशात् द्वितीयं दूषयति अप्रतिघातात् इति अवयवानां नित्यत्वं चासिद्धं अल्पत्वाद्दीपांशवद्विना
ह अपि चेति एवं जीवावयवानित्या इति मते देहमानत्वे निरस्ते प्रतिजीवस्य केचिदेव स्फुटस्था अवयवा अन्ये त्वागमापायिन इति
पाकृते अपेति ह्रहतत्कायाप्तो जीवस्यावयवागमापायाभ्यां देहमानत्वमित्यर्थः सूत्रेणपरिहरति तत्रापीति आगमापाययो
पर्यायः किमागमापायिनामवयवानामात्मत्वमस्ति न वा आद्ये आह विकारादिदोषेति कोसौ वै धर्मो द्वाभ्युपगम्यत
यवाना वै
तेषां पुनरनंतानां जीवावयवानां समानदेशत्वं प्रतिविहन्यते वा न वेति वक्तव्यं प्रतिघाते तावन्नानंतावयवाः परिछि
न्ने देशे संमीयेरन् अप्रतिघातेऽप्येकावयवदेशत्वोपपत्तेः सर्वेषामवयवानां प्रथिमानुपपत्तेः जीवस्याणुमात्रत्वप्र
संगः स्यात् अपि च शरीरमात्रपरिछिन्नानां जीवावयवानामानंत्यं नोत्प्रेक्षितुमपि शक्यं अथ पर्यायेण बृहच्छरीरं प्रति
पत्तौ चैके चिज्जीवावयवा उपगच्छंति तनुशरीरं प्रतिपत्तौ च केचिदपगच्छंतीत्युच्येत तत्राप्युच्यते न च पर्यायाद
प्यविरोधो विकारादिभ्यः ३६ न च पर्यायेणाप्यवयवोपगमापगमाभ्यामेतद्देहपरिमाणत्वं जीवस्याविरोधेनोप
पादयितुं शक्यते कुतः विकारादिदोषप्रसंगात् अवयवोपगमापगमाभ्यां ह्यनिशमापूर्यमाणस्यापक्षीयमाण
स्य च जीवस्य विक्रियावत्त्वं तावदपरिहार्यं विक्रियावत्त्वे च चर्मादिवदनित्यत्वं प्रसज्येत ततश्च बंधमोक्षाभ्युपग
मो बाध्येत कर्माष्टकपरिवेष्टितस्य जीवस्यालाबुवत्संसारसागरे निमग्नस्य बंधनोच्छेदादूर्ध्वगामित्वं भवतीति
किंचान्यदागच्छतामपगच्छतां चावयवानामागमापायिधर्मवत्त्वादेवानात्मत्वं शरीरादिवत् ततश्चावस्थितः क
श्चिदवयव आत्मेति स्यात् न च निरूपयितुं शक्यते अयमसाविति किंचान्यदागच्छंतश्चैते जीवावयवाः कुतः
प्रादुर्भवंति अपगच्छंतश्च क्व वा लीयंत इति वक्तव्यं न हि भूतेभ्यः प्रादुर्भवेयुः भूतेषु च लीयेरन् अभौतिकत्वाज्जीव
स्य नापि कश्चिदन्यः साधारणोऽसाधारणो वा जीवानामवयवाधारो निरूप्यते प्रमाणाभावात् किंचानवधृतस्वरूप
श्चैवं सत्यात्मा स्यादागच्छतामपगच्छतां चावयवानामनियतपरिमाणत्वात् वा
आह कर्माष्टकेति व्याख्यानमेतत् आद्यकल्पे दोषांतरं वदन्कल्पांतरमादाय दूषयति किंचेति अवशिष्टस्फुटस्यावयव
स्य दुर्ज्ञानत्वात् ज्ञानाभावान्न मुक्तिरित्यर्थः यथा दीपावयवानामाकरस्तैजसं तथात्मावयवानामाकरकारणाभावा
त्वागमापायौ युक्तौ विनाह किंचेति सर्वजीवसाधारणः प्रतिजीवमसाधारणो वेत्यर्थः किंचात्मन आगमापायिशी
लावयवत्वे सति क्रियंतः आयांत्यवयवाः कियंतोऽपयंतीत्यज्ञानादात्मनिश्चयाभावादनिर्मोक्षः स्यादित्याह किंचेति ॥

अपि चावयवाख्यावयविनि जीवस्यानित्यत्वं अवयवसमूहत्वे चासत्वमात्मत्वस्य यावदवयवनित्यत्वे यत्किंचिदवयवापाये पि तत्प्रशरीरस्याचेतनत्वं गोत्वं वत्प्रत्येकसमाप्तावेकस्मिन्शरीरे आत्मनानात्वस्यादृष्टत्वान देहपरिमाणत्वसावयवत्वे आत्मनः इत्युपसंहरति अत इति सूत्रस्यार्थांतरमाह अथवेति स्थूलसूक्ष्मशरीरप्राप्तावकार्त्स्न्याकृत्स्नद्वारेणात्मानित्यतापातमङ्गीकारेण तस्यागन्तवत संतानरूपेणात्मनित्यतामाशंक्याने नोनतरेत्यन्यथ्यत इत्यन्वयः पर्याये णेत्यस्याख्यानं तान इति देहभेदेन परिमाणस्यात्मन आनवस्थाने पिनापो पिस्रोतः प्रवाहस्तदात्मकस्यात्मव्यक्तिसंतानस्य नित्यतया तन्नित्यतास्यादित्यत्रेष्टान्तमाह यथेति स्रिग्वस्त्र विगतये श्वेतविसिचोदिगंवराणां तथामित्यर्थः पर्यायात्संतानादप्यात्मनित्यत्वस्याविरोध इति नचरुतः विकारादिभ्यः संतानस्यावस्तुत आत्मत्वेप्यन्यवादः संतानस्य वस्तुत्वे संतानसंतिरेकेचन्वस्यात्मवादः अनतिरेके जन्मादिविकारो विनाशोन्वृमभावइत्युक्तदोषप्रसंगात्संतानात्मपक्षोनुपपन्न इति सूत्रार्थः यत्स्थूलवासूक्ष्मंवादेहंगृह्णाति तद्देहपरिमाण एव जीव इति नियमं दूषयति अंत्येति

अत एवमादिदोषप्रसंगात न पर्यायेणाप्यवयवोपगमापगमाभ्यामात्मन आ अवयवप्राप्तेः अवयवा एवैणात्मत्वेनशरीरपरिमाणत्वमात्मनउपचितापचितशरीरांतरप्रतिपत्तौ वकार्त्स्न्यप्रसंजनद्वारेणानित्यतायाचोदितायांपुनः पर्यायेणपरिमाणानवस्थानेपि स्रोतः संताननित्यतान्यायेनात्मनोनित्यता स्यात यथा रक्तपटानांविज्ञानानवस्थानेपितत्संतानानित्यता तेहदिगंवराणामपीत्याशंक्यानेनसूत्रेणोत्तरमुच्यते मतानस्यतावदसत्त्वेनैरात्म्यवादप्रसंगोवस्तुत्वेप्यात्मनोविकारादिदोषप्रसंगादस्य पक्षस्यानुपपत्तिरिति अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ३७ अपि चान्त्यस्य मोक्षावस्थाभाविनो जीवपरिमाणस्यनित्यत्वमिष्यते जैनैस्तद्वत्पूर्वयोरप्याद्यमध्यमयोर्जीवपरिमाणयोर्नित्यत्वप्रसंगात अविशेषः स्यात्प्रसंगस्य एकशरीरपरिमाणतैवस्यान्नोपचितापचितशरीरांतरप्राप्तिः अथवान्त्यस्य जीवपरिमाणस्यावस्थितत्वात्पूर्वयोरप्यवस्थयोरवस्थितपरिमाण एव जीवः स्यात ततश्चाविशेषेण सर्वदेवाणुर्महान्वा जीवोभ्युपगंतव्यो न शरीरमाणः अतश्चसौगतवदार्हतमपि

अंत्यशरीरपरिमाणस्यावस्थितेर्नित्यत्वदर्शनादुभयोराद्यमध्यमपरिमाणयोर्नित्यत्वप्रसंगादविशेषस्त्रयाणां नित्यपरिमाणानां साम्यस्याद्विरुद्धपरिमाणानामेकत्रायोगादिति सूत्रयोजना आद्यमध्यमपरिमाणौ नित्यौ आत्मपरिमाणत्वात अंत्यपरिमाणवत् नचाप्रयोजकता परिमाणनाशेसत्यात्मनोपिनाशादंत्यपरिमाणनित्यत्वायोगादितिभावः परिमाणत्रयसाम्यापादनफलमाह एकेति अंत्यशरीरसमानेनैवपूर्वशरीराणिस्युः विषमशरीरप्राप्तावात्मनस्तत्परिमाणत्रयसाम्यानुमानविरोधादित्यर्थः सर्वकालत्रयेपरिमाणत्रयमंगीकृत्यांत्यदृष्टांतेननित्यत्वमनुमायसाम्यमापादितं संप्रत्यसमत्वरूपरिमाणस्याणुत्वस्थूलत्वयोरन्यतरत्वेनावस्थितेस्तदेवान्यमाद्यमध्यमकालयोरपिनित्यत्वात्स्यात्मागस्ततानित्यत्वायोगात्तथा चाविशेषः कालत्रयेपि जीवपरिमाणाभेदइत्याह अथवेति तस्माद्वानैकशरणानृपणाकसिद्धातेनाविरोधः समन्वयस्येति सिद्धं ॥ ॥ श्रीरामायनमः ॥

२५

व२ परि१

संग१

शात्र- द्वि-द्वि ५० ति६

पत्युरसामंजस्यात् । केवलनिमित्तकेश्वरमतनिरासानंतरं जटाधारिशैवमतं बुद्धिस्थं निराक्रियत इति प्रसंगतिमाह इदानीमिति सामान्यई
श्वरनिरासएवात्र किं न स्यादिति शंकते नहीति स्वोक्तिविरोधान्मैवमित्याह प्रकृतिश्चेत्यादिना प्रतिष्ठापितत्वात्केवलनिमि
त्तेश्वरप्रतिषेधोवगम्यते यत्त्वयं वादिनो विरुद्धाभिव्याहारः इति यस्य सत्तया अद्वितीयब्रह्मप्रकृतिकं जगदिति वदतो वेदांतसमन्व
यस्य केनवेश्वरो न प्रकृतिरिति शैवादिमतेन विरोधोस्ति नवेति संदेहे जन्मन स्समानमूलत्वाद्विरोधस्स्तिवेदांतानां काहं यत्र ब्रह्मासिद्धि
रिति फलमभिप्रेत्य सत्वासत्त्वयोरेकत्रासंभवं कर्तृत्वोपादानत्वयोरप्येकत्रासंभवात्कर्तैवेश्वर इति पूर्वपक्षं कुर्वन्नेवानरमतमे
वमाह सा चेति स ईश्वरः सांख्यः सांख्यपाद्वायर्थः चत्वारो माहेश्वराः शैवाः पाशुपताः कारुणिकसिद्धांतिनः कापालिका

पत्युरसामंजस्यात् ३८ इदानीं केवलाधिष्ठात्रीश्वरकारणवादः प्रतिषिध्यते तत्कथमवगम्यते प्रकृतिश्च प्रतिज्ञा
दृष्टांतानुपरोधादित्यभिध्योपदेशाच्चेत्यत्र प्रकृतिभावेनाधिष्ठातृभावेन चोभयस्वभावस्येश्वरस्य स्वयमेवाचार्येण प्रतिष्ठापि
तत्वात् यदि पुनरविशेषेणेश्वरकारणवादमात्रमिह प्रतिषिध्येत पूर्वोत्तरविरोधाद्व्याहताभिव्याहारः सूत्रकार इत्येत
दापद्येत तस्मादप्रकृतिरधिष्ठाता केवलं निमित्तकारणमीश्वर इत्येष पक्षो वेदांतविहितब्रह्मैकत्वप्रतिपक्षत्वाद्यत्ने
नात्र प्रतिषिध्यते सा चेयं वेदबाह्येश्वरकल्पनानेकप्रकारा केचित्तावत्सांख्ययोगव्यपाश्रयाः कल्पयंति प्रधानपुरुष
योरधिष्ठाता केवलं निमित्तकारणमीश्वर इतरेतरविलक्षणाः प्रधानपुरुषेश्वरा इति माहेश्वरास्तु मन्यंते कार्यकारण
योगविधिदुःखांताः पंच पदार्थाः पशुपतिनेश्वरेण पशुपाशविमोक्षायोपदिष्टाः पशुपतिरीश्वरो निमित्तकारणमि
ति तथा वैशेषिकादयोपि केचित्कथंचित्स्वप्रक्रियानुसारेण निमित्तकारणमिति अत उत्तरमुच्यते पत्युरसामंज
स्यादिति पत्युरीश्वरस्य प्रधानपुरुषयोरधिष्ठातृत्वेन जगत्कारणत्वं नोपपद्यते कस्मादसामंजस्यात् किं पुनरसामंज

कारणं२

स्येति सर्वेप्यमी माहेश्वरप्रोक्तागमानुगामित्वान्माहेश्वरा उच्यंते कार्यं महदादिकं कारणं प्रधानमीश्वरश्च योगः समाधिः विधिः
त्रिषवणस्नानादिः दुःखांतो मोक्ष इति पंच पदार्थाः पशवो जीवास्तेषां पाशो बंधस्तन्नाशायेत्यर्थः पशुपत्यागमप्रामा
ण्यात्पशुपतिर्निमित्तमेवेति मतमुक्त्वानुमानिकेश्वरमतमाह तथेति विमतं तत्कर्तृकं कार्यत्वात् घटवदिति वैशे
षिकाः कर्तारमीश्वरं साधयंति कर्मफलं सपरिकराभिज्ञदातृकं कालांतरभावि फलत्वात्सेवाफलवदिति गौतमादिदि
गंबराश्च ज्ञानैश्वर्योत्कर्षः क्वचिद्विश्रांतः सातिशयत्वात्परिमाणवदिति सांख्यसौगतपातंजला इति मत्वा केचि
त्कथंचिदिति सिद्धांतयंति अत इति आगमादिना निर्दोषेश्वरसिद्धेः कथं दोषवत्वमित्याह किमिति ॥ श्रीरामायनमः

नतावत्तस्यागमादीश्वरनिर्णयः आगमानां निर्मलत्वेनाप्रामाण्यात्तच्च सर्वज्ञज्ञानं मूलं तन्मानाभावान्न चागमएवमाने आगममान
त्वनिश्चये तन्मूलनिश्चयस्तन्निश्चये तन्निश्चय इत्यन्योन्याश्रयत्वात् नच पुरुषवचसां सतो मानत्वयुक्तं मिथोविरोधेनतत्त्वाव्यवस्थाना
च्च नाप्यनुमानादीश्वरः सर्वज्ञः कर्त्तेति निर्णयः संभवत्यनुमानस्य दृष्टानुसारित्वेन दृष्टविपरीतार्थासाधकत्वात्तथा च लोके यो
दृष्टः कर्त्ता घटादेः कुलालादिः स एव जगत्कर्त्तारो रागद्वेषादिमतः सिध्येयुर्यदि लोके विचित्रप्रासादादिकर्त्तरेकत्वायदर्शनेपि जगत्कर्त
विलाघवादेकत्वं नित्यज्ञानं निर्दोषत्वं च कल्प्येत तर्हि द्रव्योपादानत्वमपि कल्प्येत लोके तु रेवोपादानत्वेन लाघवादस्य घासस्तत्र प्रधान
परमाण्वाद्युपादानकल्पनागौरवाददृष्टत्वाच्चेत्कर्त्तुर्द्रव्योपादानत्वमस्ति हेतुः एकत्वादिकमपि न सिध्येत अप्रसारितत्वपौरुषेयत्वयाथा
तः सिद्धप्रमाणभावयायत्नात्सत्वप्रमेयबोधनदृष्टान्तानपेक्षया भवत्स्वलौकिककर्तृविपरीताद्द्वितीयकर्त्रुपादानकसर्वज्ञनिर्दो ना६
षेश्वरनिर्णयः निर्णीतश्चतत्सिन्ध्यनिग्राहकमानबाधात्तरागादिदोषापादानस्यावकाशः इत्यनुमानेनेश्वरादिर्भ्रमोवैषम्यं तदभि
प्रेत्याश्रौतेश्वरस्याप्रामाणिकत्वमाह हीनेति यदि कर्तुरुपादानत्वमदृष्टत्वान्नकल्प्यते तर्हि निर्दोषत्वमप्यदृष्टत्वात् यो विषमकारी
वा। स दोषवानिति व्याप्तिदृष्टेर्जगत्कर्त्तादोषवान्स्यात् नचात्र धर्मिग्राहकानुमानबाधः कार्यत्वलिंगस्यकर्तृमात्रसाधकत्वेन निर्दोषत्वा

हीनत्वधीमो तन्मभोवत्तद्दि प्राणिभद्रान्विदधतईश्वरस्य रागद्वेषप्रसक्तेरस्मदादिवदनीश्वरत्वं प्रसज्येत प्राणिकर्मापेक्षित्वा
द्दोष इति चेन्नकर्मेश्वरयोः प्रवर्त्यप्रवर्त्तयितृत्वे इतरेतराश्रयदोषप्रसंगात नानादित्वादिति चेन्न वर्तमानकालवदतीतेष
पिकालेष्वितरेतराश्रयदोषाविशेषादेषपरंपरान्धपापतेः

दावदासीनत्वान्तचोत्कर्षसमाजातिर्व्यापकधर्मोपादानादोषाभावेनतत्प्राप्तविषमकर्तृकत्वायोगाद्दृष्टान्तस्याव्यापकधर्माणामपदेशेआपाद
तु२ नेहत्कर्षसमाजातिर्यथापादोयदिकृतकत्वेनहेतुनाघटवदनित्यःस्यात्तर्हि तेनैव हेतुनासावयवत्वं गंधादिर्व्यभिचारादिति भावः नन्वप्राणिक
मप्रेरितईश्वरोविषमफलान्प्राणिनःकरोति नसत्कुर्येति शंकते प्राणीति जडस्य कर्मणः प्रेरकत्वायोगात्सैवमित्याह नेतिनचेश्व
रप्रेरितंकर्मेश्वरस्य प्रेरकमिति वाच्यमित्याह कर्मेति अतीति कर्मणा प्रेरितईश्वरो वर्तमाने कर्म तत्फलाय प्रेरयतीत्यनादित्वान्ने
षप्रेरकभावस्यानानुपपत्तिरिति शंकते नानादित्वादिति अतीतिकर्मणोपि जडत्वान्नेश्वरप्रेरकत्वं न तदपीश्वरेण प्रेरितं सदीश्व
रेप्रेरयति इत्यन्योन्याश्रयात् ततोऽप्यतीतकर्मप्रेरितेनतदैवेश्वरेणवर्तमानेकर्माणि फलदानाय प्रेरयतीति चेन्नमानहीनायामन
त्यावस्थायामनवस्थायाः प्रसंगादतः कर्मापेक्षएवेश्वरविषमत्वे ऽन्यसामंजस्यं दुर्वारमित्यर्थः यत्फलदानेश्वरस्यक
र्मनिमित्तमात्रं नप्रेरकमिति नोक्तदोष इति तत्रविषमत्वकर्मकारणपितृतीश्वरस्य दोषत्वानपायात्सर्वकर्मापेक्षयाकर्मकारयि
तृत्वेचोक्ताप्रामाणिकानवस्थानादस्माकं त्वेषहेवसाधुकारयतीतिनिरवद्यमिति च श्रुतिमूलं सर्वकर्मापेक्षाकल्पतेमिति

यवोपिस्यादितिन
सत्त्रानित्यत्वस्य
व्यापकं सावयव२।

ने२ साधु।

किंच परमतानुसारेणापीश्वरस्य रागादिमत्त्वं प्राप्नोतीत्याह अपि चेति प्रवर्तकत्वलिंगाद्दोषाद् इति नार्किकाणां स्थितिस्तथा च
ईश्वरः स्वार्थरागादिमान् प्रवर्तकत्वात्संमतवत् न च कारुणिके व्यभिचारः परदुःखप्रयुक्तस्य दुःखनिवृत्त्यार्थित्वात्स्येत्यर्थः उ
दासीनः प्रवर्तक इति च व्याहतमिति योगात्प्रत्याह प्रकृतेति प्रधानवादे दोषान्तरमाह सूत्रकारः संबंधेति ईश्वरेण सं
बंधस्य प्रधानादेः प्रेर्यत्वायोगात्संबंधो वाच्यः स च संयोगः समवायो वा नास्तीत्यर्थः कार्यबलात्प्रेरणायोग्यत्वाख्यः संबंधः कल्प्यता
मित्यत आह नाप्यन्यद् इति ईश्वरप्रेरितप्रधानकार्यं जगदिति सिद्धे च तत्संबंधकल्पनास्यात्तच्चाद्याप्यसिद्धमित्यर्थः मायाब्रह्म
पुरुषस्य
अपि च प्रवर्तनालक्षणाद्दोषाद् इत्यायवित्समयः नहि कश्चिद्दोषप्रयुक्तः स्वार्थे परार्थे वा प्रवर्तमानो दृश्यते स्वार्थ
प्रयुक्त एव च सर्वो जनः परार्थेऽपि प्रवर्तत इत्येवमप्यसामंजस्यं स्वार्थवत्त्वादीश्वरस्यानीश्वरत्वप्रसंगात् पुरुषविशेषा
भ्युपगमाच्चेश्वरस्योदासीनाभ्युपगमात्तसामंजस्यं संबंधानुपपत्तेश्च २११ पुनरप्यसामंजस्यमेव नहि प्रधानपुरु
षव्यतिरिक्त ईश्वरोऽन्तरेण संबंधं प्रधानपुरुषयोरीशिता न तावत्संयोगलक्षणः संबंधः संभवति प्रधानपुरुषेश्व
राणां सर्वगतत्वान्निरवयवत्वाच्च नापि समवायलक्षणः आश्रयाश्रयिभावानिरूपणात् नाप्यन्यः कश्चित्कार्य
गम्यः संबंधः शक्यते कल्पयितुं कार्यकारणभावस्यैवाद्याप्यसिद्धत्वात् ब्रह्मवादिनः कथमिति चेत् न तस्य तादा
त्म्यलक्षणसंबंधोपपत्तेः अपि चागमबलेन ब्रह्मवादी कारणादिस्वरूपं निरूपयति नावश्यं तस्य यथादृष्टमे
व सर्वमभ्युपगंतव्यमिति परस्य तु दृष्टांतबलेन कारणादिस्वरूपं निरूपयतो यथादृष्टमेव सर्वमभ्युपगंतव्य स० ४
मित्ययमस्त्यतिशयः परस्यापि सर्वज्ञप्रणीतागमसद्भावात्समानमागमबलमिति चेत् न इतरेतराश्रयप्रसंगा नमायं
त् आगमप्रत्ययात्सर्वज्ञत्वसिद्धिः सर्वज्ञप्रत्ययाच्चागमसिद्धिरिति तस्मादनुपपन्ना सांख्ययोगवादिनामी
श्वरकल्पना एवमन्यास्वपि वेदबाह्यास्वीश्वरकल्पनासु यथासंभवमसामंजस्यं योजयितव्यं ।।

णोऽत्वनिर्वाच्यतादात्म्यसंबंधः देवात्मशक्तिमिति श्रुतेः किंच वेदस्यापौरुषेयत्वान्न लोकदृष्टमकुलालसंबंधो वैदिकेना
नुसर्तव्यः आनुमानिकेन तु अनुसर्तव्य इति विशेषमाह अपि चेति सर्वज्ञस्यागमप्रामाण्यस्य च तत्संभावनयोन्याश्रयः अनुमा
नात्सर्वज्ञसिद्धेः निरस्तत्वान्न च मनस्तस्य ज्ञानं संभवति ज्ञानं मनोजन्यमिति व्याप्तिविरोधान्नित्यज्ञानकल्पनानवकाशादि
तिभावः प्रधानवत्परमाणूनामपि निरवयवत्वेश्वरेण संयोगाद्यसत्त्वात्प्रेर्यत्वायोगः प्रेरकत्वे चेश्वरस्य दोषवत्त्वमित्याह

ईश्वरस्य प्रधानादिप्रेरणानुपपत्तेश्चासामंजस्यमित्याह सूत्रकारः अधिष्ठानेति प्रधानादिकं चेतनस्यानधिष्ठेयमप्रत्यक्षत्वादीश्वरवद्व्यतिरे
केण स्तम्भादिवच्चेत्यर्थः चक्षुरादौ व्यभिचारमाशंक्य निषेधति करणवदिति रूपमुद्भूतं नास्तीत्यप्रत्यक्षत्वं स्फुरयति रूपेति स्वभोगहेतु
त्वे सतीति विशेषणान्न व्यभिचार इत्याह तथापीति भोगः सुखदुःखानुभवः आदिपदाद्विषयानुभवग्रहः न च यद्येनाधिष्ठेयं तत्तदीय
भोगहेतुत्वे सति प्रत्यक्षमिति व्यतिरेकव्याप्तौ करणेषु व्यभिचारतादवस्थ्यमिति वाच्यं भोगहेतुत्वविशिष्टप्रत्यक्षत्वस्य हेतुत्वात्कर
णेषु विशेषणाभावेन विशिष्टस्य हेतोरभावात्तत्त्वविशेष्यवैयर्थ्यं परार्थपाचकाधिष्ठेयकाष्ठादौ व्यभिचारात्तत्र च प्रधानादेरीश्वरप्र
त्यक्षत्वाद्विशेष्यासिद्धिः अतीन्द्रियत्वरूपाप्रत्यक्षत्वस्य सत्त्वादित्यभिप्रायः जीवेकरणकर्ता भोगादयो दृश्यन्ते ईश्वरे तु प्रधानकर्ता
त्वेन दृश्यन्त इत्यस्त्वर्थः विपक्षे दोषं वदन्प्रयोजकत्वहेतोर्निरस्यति करणात्तु प्रधानादेः प्रेयत्वाङ्गीकारे प्रेरकभोगहेतुत्वस्या

अधिष्ठानानुपपत्तेश्च ४० इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य यदि हि कल्प्यमानः कुंभकारादिवन्मृदादीनि प्रधानादीन्य
धिष्ठाय प्रवर्तयेत नैवमुपपद्येत न ह्यप्रत्यक्षं रूपादिहीनं च प्रधानमीश्वरस्याधिष्ठेयं संभवति मृदादिवैलक्षण्यात् करण
वच्चेन्न भोगादिभ्यः ४१ स्यादेतद्यथाकरणग्रामं चक्षुरादिकमप्रत्यक्षं रूपादिहीनं च पुरुषोऽधितिष्ठत्येवं प्रधानमीश्वरोऽधिष्ठा
स्यतीति तथापि नोपपद्यते भोगादिदर्शनाद्धि करणग्रामस्याधिष्ठितत्वं गम्यते न चात्र भोगादयो दृश्यन्ते करणग्रामसाम्ये वा

भ्युपगम्यमाने संसारिणामिवेश्वरस्यापि भोगादयः प्रसज्येरन् अन्यथा वा सूत्रद्वयं व्याख्यायते अधिष्ठानानुपपत्तेश्च इत
श्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य साधिष्ठानो हि लोके सशरीरो राजा राष्ट्रस्येश्वरो दृश्यते न निरधिष्ठानः अतश्च
तद्दृष्टान्तवशेनादृष्टमीश्वरं कल्पयितुमिच्छत ईश्वरस्यापि किंचिच्छरीरं करणायतनं वर्णयितव्यं स्यात् न च तद्वर्णयितुं शक्यते सृष्ट्युत्तरकालभावित्वाच्छरीरस्य प्राक्सृष्टेस्तदनुपपत्तेः निरधिष्ठानत्वे चेश्वरस्य प्रवर्तकत्वानुपपत्तिः एवं लो
के दृष्टत्वात् करणवच्चेन्न भोगादिभ्यः अथ लोकदर्शनानुसारेणेश्वरस्यापि किंचित्करणानामायतनं शरीरं कामेन कल्प्येत ए
वमपि नोपपद्यते सशरीरत्वे हि सति संसारिवद्भोगादिप्रसंगादीश्वरस्याप्यनीश्वरत्वं प्रसज्येत ॥ ॥

इन्द्रियस्य प्रेर्यस्याभोगहेतुत्वानियमादित्यर्थः सूत्रद्वयस्यार्थान्तरमाह अन्यथा वेति यः प्रवर्तकश्चेतनः स शरीरी इति लोके व्या
प्तिदृष्टेश्वरस्य चाशरीरत्वानुपपत्तेर्न प्रवर्तकत्वमिति सूत्रार्थमाह इतश्चेति विमतं तत्ते ईश्वरं कार्यत्वात् राष्ट्रवदिति कल्प्यते
राजवत्स शरीर एवेश्वरः स्यादित्युक्तं तत्रेष्टापत्तिं निरस्यति न च तद्वर्णयितुमिति न च नित्यशरीरं सर्गात्प्राक्सिद्धं सम्भवतीत्य
ति वाच्यं शरीरस्य भौतिकत्वनियमादित्यर्थः अस्तु शरीर एवेश्वर इत्यत आह निरधिष्ठानत्वे चेति जीवस्येव शरीरे भौतिकः
मीश्वरस्य तदिच्छानिर्मितप्रागभावस्यादित्याशंक्य निरस्यति करणवदिति करणान्यत्रसती ति करणवच्छरीरे इच्छामयं
शरीरं कल्पनेनानुपपन्नं मानाभावाद्दृष्टभौतिकत्वनियमविरोधाच्चेति मन्तव्यं ॥ श्रीरामाय नमः + ॥

आत्म-
सिद्धि-
५२

एवमीश्वरस्य सकर्तृकत्वनिर्णयो नेश्वरपर्यायनित्यत्वसर्वज्ञत्वनिर्णयोपि संभवतीत्याह सूत्रकारः अंतवत्त्वमिति प्रधानपुरुषेश्वर-
त्रयमनित्यं दृष्टत्वात् परिच्छिन्नत्वात् घटवदित्याह एवमस्मिन्निति संख्या वा परिमाणं वेयत्ता तया च निश्चितसंख्यत्वान्निश्चितपरिमा-
णत्वाच्चेति हेतुद्वयं यद्यपि संख्यावत्त्वमात्रे हेतुः संभवति तथापि सर्वज्ञत्वनिश्चयेन हेतुसिद्धिर्निरासयोगायिति निश्चितपदं तत्राद्यहेतोर-
सिद्धिं नास्तीत्याह संख्यापरिमाणमिति संख्यास्वरूपमित्यर्थः द्वितीयहेतुं साधयति स्वरूपेति प्रधानादयो निश्चितपरिमाणाः वस्तु-
भिन्नत्वात् घटवदित्यर्थः ननु प्रधानपुरुषेश्वराः त्रय इति सांतेपि जीवानामानंत्यात् कथं संख्यानिश्चय इत्यत आह पुरुषेति जीवसंख्यापी-
श्वरेण निश्चीयते अनिश्चये सर्वज्ञत्वायोगादित्यर्थः हेतुसिद्धेः फलमाह ततश्चेति मायया शिवत्वे केषांचिज्जीवानां संचरत्वं हृदयस्थान

अंतवत्त्वमसर्वज्ञता वा ४२ उत्पत्त्यनुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य सर्वज्ञत्वेभ्युपगम्यते अनंतत्वं अनंतं च प्रधानं अनंता-
श्च पुरुषा मिथो भिन्ना अभ्युपगम्यंते तत्र सर्वज्ञेनेश्वरेण प्रधानस्य पुरुषाणामात्मनश्चेयत्ता परिच्छिद्यते न वा परिच्छिद्यते उभयथा-
पि दोषो नत्युक्तं एवं कथं एवमस्मिन्निति वस्तुकल्पितत्वादियत्तापरिच्छिन्नत्वात् प्रधानपुरुषेश्वराणामंतवत्त्वमवश्यंभावि एवं लोके दृष्ट-
त्वात् यद्धि लोके इयत्तापरिच्छिन्नं वस्तु घटादि तदंतवद्दृष्टं तथा प्रधानपुरुषेश्वरत्रयमपीयत्तापरिच्छिन्नत्वादंतवत्स्या-
त् संख्यापरिमाणतावत्प्रधानपुरुषेश्वरत्रयरूपेण परिच्छिन्नं स्वरूपपरिमाणमपि तत्तन्मीश्वरेण परिच्छेद्यत इति पुरु-
षगता च महासंख्या ततश्चेयत्तापरिच्छिन्नानां येषां तारिणां तेषां संसारान्मुच्यंते तेषां संसारो न वा संसारित्वं च तेषामंतवत्
एवमितरेष्वपि क्रमेण मुच्यमानेषु संसारस्य संसारिणां चांतवत्त्वं स्यात् प्रधानं च सविकारं पुरुषार्थमीश्वरस्याधिष्ठेयं
संसारिवत्तेनाभिमतं तच्छून्यतायामीश्वरः किमधितिष्ठेत् किंविषये वा सर्वज्ञतेश्वरतेस्योत प्रधानपुरुषेश्वराणां
चैवमंतवत्त्वमसत्यादिमत्त्वप्रसंगः आद्यंतवत्त्वे च सत्यत्वादप्रसंगः अयमाभटे षट्दोषः इत्युत्तरो विकल्पोभ्युपगम्यते तेन प्रधा-
नस्य पुरुषाणामात्मनश्चेयत्तेश्वरेण परिच्छिद्यते इति ततईश्वरस्य सर्वज्ञत्वाभ्युपगमहानिरपरो दोषः प्रसज्येत तस्मात्
प्रसंगतस्तार्किकपरिगृहीतेश्वरकारणवादः उत्पत्त्यसंभवात् ४३ येषामप्रकृतिरधिष्ठाता केवलनिमित्तकारणमी-
मीश्वरोभिमतस्तेषां यत्तत् प्रत्याख्यातः प्रकृतिश्चाधिष्ठाता चोभयात्मकं कारणमीश्वरोभिमतस्तेषां पक्षः प्रत्याख्या-

येपदित्येवं सर्वमुक्तेः इदानीं सत्यजगत्सादित्यर्थः नित्यस्यानवशेषादिति भावः ननु ईश्वरः शिष्यतामिति चेत् तस्यापि भिन्नत्वे
त्वतान्कि चेति नव्याभावादीश्वराभावः स्यादित्याह प्रधानमिति दोषांतरमाह प्रधानेति इयत्तानिश्चयाभावात् स्यत्येति द्विती-
यपक्षे अव्येति इयत्ता नास्ति न निश्चीयते चेत्यर्थः प्रधानादयः संख्यापरिमाणवंतः इयत्ताभावादित्यनुमानाद्दृष्टो-
यत्तानिज्ञाने स्यादसर्वज्ञता उत्पत्त्यसंभवात् तत्त्वमप्युक्तमिति परिहरति ततइति तस्मात् केवलकर्त्रीश्वरवादस्य निरस्त-
त्वान्न कर्तृपादानाद्यमीश्वरस्यानन्वयविरोधप्रतिसिद्धं पंचपदार्थवादिमाहेश्वरमतनिरासानंतरं चतुर्थं हवादं बुद्धिस्थं निरस्यति


उत्पत्त्यसंभवात् अधिकरणतात्पर्यमाह प्रधानमिति ॥

अधिकरणमारभते न वेति वेदाविरुद्धांशमङ्गीकृत्य वेदविरुद्धं जीवोत्पत्त्यंशं निराकर्तुमधिकरणमारभते इत्याह उच्यत इति अत्र भा-
गवतपञ्चरात्रागमो विषयः स किं जीवोत्पत्त्यंशे मानं न वेति संदेहे वाधेन फलं मानमिति पूर्वपक्षयति तत्रेति पूर्वपक्षे तन्त्रागमावि-
रोधात् श्रीवामित्वब्रह्म तन्मानत्वसिद्धिः सिद्धान्ते तदंशे तस्यामानत्वादविरोधात् तत्सिद्धिरिति फलभेदः सावयवत्वं निरस्यति निरंजनेति कथं त-
द्विरोधे वासुदेवस्य तिभेदस्तत्राह यदिति वस्तुतोऽन्तरीतस्य विशेषं शास्त्रार्थमन्त्रातो हेतुरूपाधिमाह तमित्यभ्यगमितमिति पूर्वोक्तव्यूह-
वतं सर्वप्रकृतिं निरंजनं विज्ञानरूपं परमात्मानमिति यावत् वाक्कायचेतसामवधानपूर्वकं देवतागृहगमनमभिगमनं पूजाद्रव्या-
ननम्युतिसमाश्रयेनाप्येवंरूप एवेश्वरः प्राप्तिर्ध्वरितः प्रकृतिस्वाधिष्ठाना चेति अन्नत्वेन सारिणीचवस्थितिः प्रमाणमिति स्थितिः
तत्करूपे हेतोरेषपक्षः प्रत्यासिद्ध्यासितं इति उच्यते यद्यपि जातीयकांशः समानत्वान्न विसंवादगोचरो भवत्यस्ति त्वंशोन्तरे वि-
संवादस्यानमिति अतस्तन्निरुपाख्यानायारभ्यते तत्र भागवता मन्यन्ते भगवानेको वासुदेवः निरंजनज्ञानस्वरूपः परमार्थतत्त्व-
स चतुर्धात्मानं प्रविभज्य प्रतिष्ठितो वासुदेवव्यूहरूपेण संकर्षणव्यूहरूपेण प्रद्युम्नव्यूहरूपेणानिरुद्धव्यूहरूपेण वासुदे-
वो नाम परमात्मोच्यते संकर्षणो नाम जीवः प्रद्युम्नो नाम मनः अनिरुद्धो नामाहंकारः तेषां वासुदेवः परा प्रकृतिरितरे संकर्षणा-
दयः कार्यं तमित्थंभूतं भगवन्तमभिगमनोपादानेज्यास्वाध्याययोगैर्वर्षशतमिष्ट्वा क्षीणक्लेशो भगवन्तमेव प्रतिपद्यत इति
तत्र यत्तावदुच्यते योऽसौ नारायणः परोऽव्यक्तात्प्रसिद्धः परमात्मा सर्वात्मा स आत्मनात्मानमनेकधा व्यूह्यावस्थित इति तन्न
निराक्रियते स एकधा भवति त्रिधा भवतीत्यादिश्रुतिभ्यः परमात्मनोऽनेकधाभावस्याधिगतत्वात् यदपि तस्य भगवतोऽभिगम-
नादिलक्षणमाराधनमजस्रमनन्यचित्ततयाभिप्रेयते तदपि न प्रतिषिध्यते श्रुतिस्मृत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात् य-
त्पुनरिदमुच्यते वासुदेवात्संकर्षण उत्पद्यते संकर्षणाच्च प्रद्युम्नः प्रद्युम्नाच्चानिरुद्ध इति अत्र ब्रूमः न वासुदेवसंज्ञकात्प-
रमात्मनः संकर्षणसंज्ञकस्य जीवस्योत्पत्तिः संभवति अनित्यत्वादिदोषप्रसंगात् उत्पत्तिमत्त्वे हि जीवस्यानित्यत्वादयो दोषाः प्रसज्ये-
रन् ततश्च नैवास्य भगवत्प्राप्तिर्मोक्षः स्यात् कारणप्राप्तौ कार्यस्य प्रविलयप्रसंगात् प्रतिषेधिष्यति चाचार्यो जीवस्योत्पत्तिं नात्मा-
ऽश्रुतेर्नित्यत्वाच्च ताभ्य इति तस्मादसंगतैषा कल्पना। न च कर्तुः करणं ४४ इतश्चासंगतैषा कल्पना यस्मान्न हि लोके
कर्तुर्देवदत्तादेः करणं परश्वाद्युत्पद्यमानं दृश्यते वर्णयन्ति च भागवताः कर्तुर्जीवात्संकर्षणसंज्ञकात्करणं मनः प्रद्युम्नसंज्ञ-
कमुत्पद्यते कर्तृजाच्च तस्मादनिरुद्धसंज्ञकोऽहंकार उत्पद्यत इति हि।
णं मार्जनमुपादानं इज्या पूजा स्वाध्यायो जपः योगो ध्यानं तत्राविरुद्धांशमनुवदति तत्रेति समाहितः अद्वाक्ये
नाभत्वेति तयथाय यौपासत इत्याद्याचश्रुतिः मत्कर्मकृन्मत्परम इत्याद्यास्मृतिः विरुद्धांशमनूद्य दूषयति यत्पुनरिति
कृतहान्यादिदोषशादिशब्दार्थः न्यायोपेतयाश्रज आत्मेत्यादिश्रुत्या पांचरात्रागमस्योत्पत्त्यंशे मानत्वाभावनिश्चयान्नजीवाभि-
न्नब्रह्मसमन्वयस्थैर्यमिति भावः जीवस्योत्पत्तिं निरस्य जीवान्मनस उत्पत्तिं निरस्यति न च कर्तुरिति यस्मात्कर्तुः करणोत्पत्तिर्न दृश्यते तस्माद

वर्णितं निर्मलमित्याह तचेति तत्र लोके कश्चित्कश्चिदीश्वरः कृतार्थं निर्माय तेन तत्तत्क्षिनत्तीदृशमिति चेत्सत्यं पाल्यत्वोद्देश्यादिकरणान्तरसत्वात्कर्त्तुः कारकत्वेन युक्ता जीवस्य तु करणान्तराभावात्कर्त्तृत्वे विनैव करणं कर्त्तृत्वं नैवेष्यते इति भावः संकर्षणादेरप्यसत्वं त्वमभवेपि दृष्टं हि वाह्यप्रयत्नादिति स्वे व्याचष्टे माभूदेव अपयस्यादिति ज्ञानैश्वर्ययोः शक्तिरितरेषां सामर्थ्यं बलं शरीरसामर्थ्यं वीर्यं प्रायः तेजः प्रागल्भ्यमैतेरत्वेता यस्मात्संकर्षणादयः तस्मादीश्वरा एवेत्यर्थः सर्वेषामीश्वरत्वे या चरमोक्तिमाह वासुदेवा एवेति निर्दोषा रागादिरहिता निरधिष्ठानाः प्रकृत्यजन्या निरवद्या नाशादिरहिताः इत्यर्थः ईश्वरत्वेऽजन्मासंभवो गुण एवेत्याह तस्मादिति सूत्रेण सिद्धांतयति अत्रेति

नचैतदप्यन्तमन्तरेणाध्यवसातुं शक्नुमः नचैवंभूतां श्रुतिमुपलभामहे विज्ञानादिभावे वा तदप्रतिषेधः ४५ अथापि स्यात्तवे ते संकर्षणादयो जीवादिभावाभिप्रेयन्ते किं तर्हि ईश्वरा एवैते ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिरैश्वर्यधर्मैरन्विता अभ्युपगम्यन्ते वासुदेवा एवैते सर्वे निर्दोषा निरधिष्ठाना निरवद्याश्चेति तस्मान्नायं यथावर्णित उत्पत्त्यसंभवदोषः प्राप्नोतीति अत्रोच्यते एवमपि तदप्रतिषेधः उत्पत्त्यसंभवस्याप्रतिषेधः प्राप्नोत्येवायमुत्पत्त्यसंभवो दोषः प्रकारान्तरेणेत्यभिप्रायः कथं यदि तावदयमभिप्रायः परस्परभिन्ना एवैते वासुदेवादयश्चत्वार ईश्वरास्तुल्यधर्माणो नैषामेकात्मकत्वमस्तीति ततोऽनेकेश्वरकल्पनानर्थक्यमेकेनैवेश्वरेणेश्वरकार्यसिद्धेः सिद्धांतहानिश्च भगवानेवैको वासुदेवः परमार्थतत्त्वमिति अभ्युपगमात् अथायमभिप्रायः एकस्यैव भगवत एते चत्वारो व्यूहास्तुल्यधर्माण इति तथापि तदवस्थ एवोत्पत्त्यसंभवः नहि वासुदेवात्संकर्षणस्योत्पत्तिः संभवति संकर्षणाच्च प्रद्युम्नस्य प्रद्युम्नाच्चानिरुद्धस्यातिशयाभावात् भवितव्यं हि कार्यकारणयोरतिशयेन यथा मृद्घटयोः न ह्यसत्यतिशये कार्यकारणमित्यवकल्पते नच पाञ्चरात्रसिद्धान्तिभिर्वासुदेवादिष्वेकस्मिन्सर्वेषु वा ज्ञानैश्वर्यादितारतम्यकृतः कश्चिद्भेदोऽभ्युपगम्यते वासुदेवा एव हि सर्वे व्यूहा निर्विशेषा इष्यन्ते नचैते भगवद्व्यूहाश्चतुःसंख्यायामेवावतिष्ठेरन् ब्रह्मस्तादिस्तम्बपर्यन्तस्य समस्तस्यैव जगतो भगवद्व्यूहत्वावगमात् विप्रतिषेधाच्च विप्रतिषेधश्चास्मिन् शास्त्रे बहुविध उपलभ्यते गुणगुणित्वकल्पनादिलक्षणः ज्ञानैश्वर्यशक्तिबलवीर्यतेजांसि गुणाः आत्मान एवैते भगवन्तो वासुदेवा इत्यादिदर्शनात् वेदविप्रतिषेधश्च भवति चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधिगतवानित्यादिवेदनिन्दादर्शनात् तस्मादसंगतैषा कल्पनेति सिद्धं ॥ इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छंकरभगवत्पादकृतौ द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

एवमपि चतुर्णामीश्वरत्वे न विज्ञानशक्त्यादिभावे पीत्यर्थः प्रकारान्तरं पृच्छति कथमिति किं चत्वारः स्वतंत्रा भिन्ना एव उतैकस्य विकारत्वेनाभिन्ना आद्यमनूद्य दूषयति यदीत्यादिना द्वितीये विकाराः प्रकृतितुल्या सन्नावा आद्यमत्यापत्ति निषेधति अथेत्यादिना न तत्र पञ्चे पसिद्धांतमाह नच पांचेति यदि मना आपि भगवतो व्यूहा सदा चतुष्ट्वं व्याहतं स्यादाह नचैत इति इतश्च जीवोत्पत्तिवाद उपेक्ष्य इत्याह स चकारः विप्रतिषेधाच्चेति स एव गुणत्वं गुणित्वं च विरुद्धं आदिपदादात्म प्रद्युम्नानिरुद्धो भिन्नावात्मन उत्क्रान्ता नैवेत इति विरुद्धोक्तिग्रहः पूर्वापरविरोधादसंगतमिति तत्त्वार्थमन्यत्राथैरितमाह वेदेति एकस्यापि तं चान्तरसाध्यता चतुर्वेदिन्यापिकमिति निन्दादिपदार्थः तस्मान्नियोऽवि



शा·त्त
हि·त्त·
५६

हरिः ॐ विपद्यादिविधातारं सीतास्याब्जमधुव्रतं नित्यविद्विश्वकर्त्रात्माभिन्नं सर्वेश्वरं भजे १ जीवस्यानुत्पत्तिप्रसंगेना
काशस्याप्युत्पत्त्यसंभवमाशंक्य परिहरत्यादावेकदेशमतमाह नवियदश्रुतेः वियत्प्राणपादयोरर्थं संक्षिप्य सर्ववादेन
संगतिमाह वेदान्तेष्विति भिन्नोपक्रमत्वमेवाह केचिदित्यादिना भूतभौतिकश्रुतीनां मिथो विरोधशंकानिरासो विय
त्पादार्थः लिंगशरीरश्रुतीनां तन्निरासः प्राणपादार्थः यथा मिथो विरोधात्सर्वोपरि विरोधाच्च परपक्षा उपेक्ष्याः तथा
श्रुतिपक्षोप्युपेक्ष्य इति शंकोत्थाने पादद्वयस्यारंभात्सर्वपादेन दृष्टांतसंगतिरिति समुदायार्थः आकाशवायो

ॐ नवियदश्रुतेः १ वेदांतेषु तत्र तत्र भिन्नप्रस्थाना उत्पत्तिश्रुतय उपलभ्यंते केचिदाकाशस्योत्पत्तिमाम
नंति केचिन्न तथा केचिद्वायोरुत्पत्तिमामनंति केचिन्न एवं जीवस्य प्राणानां च एवमेव क्रमादिद्वारकोपि
विप्रतिषेधः श्रुत्यंतरेषूपलक्ष्यते विप्रतिषेधाच्च परपक्षाणामनपेक्षितत्वं स्थापितं तद्वत्स्वपक्षस्यापि वि
प्रतिषेधादेवानपेक्षितत्वमाशंक्येत अतः सर्ववेदांतगतसृष्टिश्रुत्यर्थनिर्मलत्वाय परः प्रपंच आ
रभ्यते तदर्थनिर्मलत्वे च फलं यथोक्ताशंकानिवृत्तिरेव तत्र प्रथमं तावदाकाशमाश्रित्य चिंत्यते किमस्या
काशस्योत्पत्तिरस्त्युत नास्तीति ॥

त्पत्तिमामनंति तैत्तिरीयकानामनंति छांदोग्याः जीवस्य प्राणानां चोत्पत्तिं सर्व एत आत्मानो व्युच्चरंतीति वाजि
नः एतस्माज्जायते प्राण इत्याथर्वणिकाश्चामनंति नान्य एवमाकाशपूर्विका क्वचित्सृष्टिः क्वचित्तेजःपूर्विकेति
क्रमविरोधः आदिपदात्स इमाल्लोकानसृजतेत्यक्रमः क्वचित्सप्त प्राणाः क्वचिदष्टावित्यादिसंख्याद्वारकश्च विरो
धो ग्राह्यः प्रपंचः पादद्वयं तथा च पादद्वयस्य श्रुतीनां मिथो विरोधनिरासार्थत्वाच्छ्रुतिशास्त्राध्यायसंगतयः सिद्धाः

राम
५६

अत्राकाशस्योत्पत्त्यनुत्पत्तिश्रुत्योर्मिथो विरोधोस्ति न वेति वाक्यभेदैकवाक्यत्वाभ्यां संदेहे यद्युत्पत्तिस्तदा वाक्यभेदेन विरोधादप्रा
माण्यमनयोः श्रुत्योरिति पूर्वपक्षयिष्यन्नादावनुत्पत्तिपक्षमेकदेशीनं ह्यानीत्याह नवियदिति उत्पत्तिश्रुतिनिरव्यानासी
तिसिद्धामिमं तथिः तत्प्रति पूर्वपक्षयति स चकारः अस्ति त्विति एकवाक्यत्वेन प्रामाण्यमस्तमेव किमिति श्रुत्योरप्रामाण्यमिति शंकते न
त्वेकवाक्यतेति एकवाक्यत्वासंभवादप्रामाण्यं युक्तमित्याह सत्यमित्यादिना पक्षस्य युगपत्कार्यद्वयासंबंधेपि क्रमेणासंबंधसंभवा
देकवाक्यतेति निरव्यसिद्धांती शंकते ननु स्यात्क्रमादिति अप्रामाण्यवादी दूषयति नैवमिति क्रमो न युज्यते द्वयोः श्रुत्योः प्राथम्यभं

तेनतावत्तिपद्यते न वियदश्रुतेरिति न खल्वाकाशमनुत्पद्यते कस्मादश्रुतेः न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति छांदो
ग्ये हि सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति सच्छब्दवाच्यं ब्रह्म प्रकृत्य तदैक्षत तत्तेजोसृजतेति पंचानां मह
भूतानां मध्यमं तेजआदिकं त्रयाणां तेजोवन्नानामुत्पत्तिः श्राव्यते श्रुतिश्च नः प्रमाणमतींद्रियार्थविज्ञानोत्पत्तौ
न चात्र श्रुतिरस्त्याकाशस्योत्पत्तिप्रतिपादिनी तस्मान्नाकाशस्योत्पत्तिरिति अस्ति तु तु शब्दः पक्षांतरप
रिग्रहे माभून्नामाकाशस्य छांदोग्ये उत्पत्तिः श्रुत्यंतरे त्वस्ति तैत्तिरीयका हि समामनंति सत्यं ज्ञानमनंतं ब्रह्मेति प्रकृ
त्य तस्माद्वा एतस्मादात्मन आकाशः संभूत इति तत्र श्रुत्योर्विप्रतिषेधः क्वचित्तेजःप्रमुखा सृष्टिः क्वचिदाकाशप्र
मुखेति नन्वेकवाक्यतानयोः श्रुत्योर्युक्ता सत्यं सा युक्ता न तु सावगंतुं शक्यते कुतः तत्तेजोसृजतेति सकृच्छ्रुतस्य स्रष्टुः स्र
ष्टव्यद्वयेन संबंधानुपपत्तेः तत्तेजोसृजत तदाकाशमसृजतेति ननु सकृच्छ्रुतस्यापि कर्तुः कर्तव्यद्वयेन संबंधो दृश्यते यथा
सूपं पक्त्वौदनं पचतीत्येवं तदाकाशं सृष्ट्वा तत्तेजोसृजतेति योजयिष्यामि नैवं युज्यते प्रथमजत्वं हि छांदोग्ये तेजसो वगम्य
ते तैत्तिरीयके चाकाशस्य न चोभयोः प्रथमजत्वं संभवति एतेनेतरश्रुत्यक्षरविरोधोपि व्याख्यातः तस्माद्वा एतस्मादात्मन
आकाशः संभूत इत्यत्रापि तस्माद्धाकाशः संभूतस्तस्मात्तेजः संभूतमिति सकृच्छ्रुतस्यापादानस्य संभवनस्य च वियत्तेजो
भ्यां युगपत्संबंधानुपपत्तेः वायोरग्निरिति च पृथगाम्नानात् अस्मिन्विप्रतिषेधे कश्चिदाह गौण्यसंभवात् ॥ ३ ॥

गापत्तेरित्यर्थः एकस्मात्तद्धि दलबीजाद्दलद्वयवदस्तूभयं प्रथममित्यत आह नवेति वायोरग्निरिति क्रमश्रुतिभंगादिति
दोषः छांदोग्यश्रुतेस्तिरविरुद्धार्थत्वमुक्त्वा तैत्तिरीयश्रुतेस्तद्विरुद्धार्थत्वमाह एतेनेति एतत्पदार्थमाह तस्मादिति
छांदोग्येपि श्रुतं तेजसः प्राथम्यं अत्र दुर्योज्यमित्यर्थः किंच तत्पदार्थ आत्मा छांदोग्ये तेजस उपादानं श्रूयते अत्र तु वायुरि
तिनैकवाक्यतेत्याह वायोरिति एवं श्रुत्योर्विरोधादप्रामाण्यमिति पूर्वपक्षप्राप्ते स एव वियदनुत्पत्तिवादी स्वमते न प्रामाण्यं व्रतेः

शा॰ भा॰
टि॰ त॰
५५

एवमाध्यायसमाप्तेरधिकरणेषु प्रथमं विरोधाच्छ्रुत्यप्रामाण्यमिति पूर्वपक्षफलं ततएकदेशिसिद्धान्तः पश्चान्मुख्यसिद्धान्तेऽश्रु
तीनामविरोधे नैकवाक्यतयाप्रमाणत्वमन्वयसिद्धिरिति फलक्रमस्त्रेधा त्ववगन्तव्य नत्वश्रुत्या विरोध्यमतत्वमपन विप्रपातयोः
प्रामाण्ये योगाद्विय उत्पन्नत्वेन भवन्तु पतर्को न गृह्यते नह्यादोगपश्रुतिमप्यव्याप्यो द्वितीयो गुणत्व विरोधहेत्वेकदेशिमतं विहायेति ना
तीत्यादिना आकाशो नोत्पद्यते सामग्र्यसत्त्वात् आत्मवत् न चाविद्याप्रकृतिकत्वात् सत्त्वाहेतुत्वसिद्धिः विज्ञानं सत्त्वेनानयोराम्भ
कत्वायोगाद् समयुक्तत्वात् न संयोगपरं हि द्रव्यत्वात् समवायिकारणमतः समवायसमवायिनोरभावात् तेहेत्वसिद्धिरिति पूर्वः आम्भ
वसमत्वाच्चात्मवदाकाशो नोत्पद्यत इत्याह उत्पत्तिमतां चेति प्राकाशश्चात्मा तस्माद्भवः आदिपदात्तमोध्वंसपाकयोग्रहणं

नास्ति वियतउत्पत्तिरश्रुतेरेव यावितराविषय उत्पत्तिवादिनीश्रुतिरुदाहृता सा गौणी भवितुमर्हति कस्मात् असंभवात् न
ह्याकाशस्योत्पत्तिः संभावयितुं शक्या श्रीमत्कणभुगभिप्रायानुसारिषु जीवत्सु ते हि कारणसामग्र्यसंभवादाकाशस्यानुत्प
त्तिं वारयन्ति समवाय्यसमवायिनिमित्तकारणेभ्यो हि किल सर्वमुत्पद्यमानं समुत्पद्यते द्रव्यस्य चैकजातीयकमनेकं च द्रव्यं
समवायिकारणं भवति न चाकाशस्यैकजातीयकमनेकं च द्रव्यमारंभकमस्ति यस्मिन्समवायिकारणे सति असमवायि
कारणं च तत्संयोग आकाशमुत्पद्येत तदभावात्तु तदनुग्रहप्रवृत्तं निमित्तकारणं दूरापेतमेवाकाशस्य भवति उत्पत्तिम
तां चैतेजः प्रभृतीनां पूर्वोत्तरकालयोर्विशेषः संभाव्यते प्रागुत्पत्तेः प्रकाशादिकार्यं न बभूव पश्चाच्च भवतीति आकाशस्य पु
नर्न पूर्वोत्तरकालयोर्विशेषः संभावयितुं शक्यते किं हि प्रागुत्पत्तेरनवकाशमसुषिरमच्छिद्रं बभूवेति शक्यतेऽध्यवसातुं
पृथिव्यादिवैधर्म्याच्च विभुत्वादिलक्षणादाकाशस्याजत्वसिद्धिस्तस्माद्यथा लोके आकाशमाकाश इति एवंजातीय
को गौणः प्रयोगो भवति यथा च देवदत्तकाशः कुरुकाकाशो गृहाकाश इत्येकस्याप्याकाशस्यैवंजातीयको भेदव्यपदेशो भवति वेदे
ऽप्यारण्यानाकाशेष्वालभेरन्निति एवमुत्पत्तिश्रुतिरपि गौणी द्रष्टव्या पादाच्च ४ पादः खल्वाकाशस्याजत्वं व्यापयति यत आ
ह वायुश्चान्तरिक्षं चैतदमृतमिति न ह्यमृतस्योत्पत्तिरुपपद्यते आकाशवत्सर्वगतश्च नित्य इति चाकाशेन ब्रह्म सर्वगत
त्वे नित्यत्वाभ्यां धर्माभ्यामुपमिमान आकाशस्यापि तौ धर्मौ सूचयति न च तादृशस्योत्पत्तिरुपपद्यते सयथानन्तोयमाकाश एव
मनन्त आत्मा वेदितव्य इति चोदाहरणं आकाशशरीरं ब्रह्म आकाश आत्मेति च न ह्याकाशस्योत्पत्तिमत्त्वे ब्रह्मणस्तेन विशेष
णं तद्र्व्याश्रयत्वे ह्याकाशस्य कार्यत्वं तच्च प्रलये प्युत्पत्तिपरमाणवाश्रयत्वात् अतो न प्रागभाव इत्यर्थः प्रागभावस्तत्वं स्फुरयति किं हीति सुषि
ला आश्रयो वकाशः तदभावः स्वरूपः छिद्रं तत्ता आश्रयः सुषिरमिति भेदः किं चात्मवदाकाशो न जायते विभुत्वाद् स्पर्शद्रव्यत्वाच्चेत्याह पृ
थिव्यादीति तस्माद् केवलतर्कबलाद्गौणी इत्यन्वयः भेदोक्तेर्गौणत्वे दृष्टान्तोदाहरणमाह वेदेऽप्यारण्यानिति आकाशेष्विति भेदः
व्यपदेशो गौणश्रुतिसंबन्धः न केवलतर्कादाकाशस्यानुत्पत्तिः किंतु श्रुतितो पीत्याह सत्यकारः शब्दाद्वेति नित्यभावसामानादित्वादिति भावः

शा॰ भा॰ टि॰ त॰ ५५

का॰२

का॰

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पदोत्तरमिति शंकोत्तरमिति यावत् तान्येव शंकापदानि पठति स्यादेतदिति अधिकारे प्रकरणे एकस्मिन्ब्रह्मप्रकरणे अनेन ब्र॥
ह्मणे प्रश्नितिवाक्ययोर्ब्रह्मशब्दस्यानेकार्थत्वमानदेकवाक्यतानैकवाक्यस्थस्यैकस्यापि संभवनशब्दस्य गौणमुख्यार्थभेदायोगादता
वलोदित्याह स्यादेतदिति उदाहरणान्तरमाह यथा चेति अभेदोपचारो भक्तिर्मुख्यसिद्धान्तादिपति कथं पुनरिति स एवाक्षेपद्वयस्य
एयति तस्येति अद्वितीयत्वश्रुतिबाधः सर्वविज्ञानप्रतिज्ञाबाधश्चेत्यर्थः प्रथमाक्षेपं दृष्टान्तेन परिहरति एकमेवेति कार्यद्व
पद्वितीयमस्यान्त्वपरीगावस्थायामवधारणमित्यर्थः कुलगृहेऽमत्राणि घटादीनि पात्राणि एकमेवेत्यवधारणव्यावर्त्यकार्यमि

स्याच्चैकस्य ब्रह्मशब्दवत् ५ इदं पदोत्तरं सूत्रं स्यादेतत् कथं पुनरेकस्य संभवनशब्दस्य तस्माद्वा एतस्मादात्मन आकाशः
संभूत इत्यस्मिन्नधिकारे परेषु तेजःप्रभृतिष्वनुवर्तमानस्य मुख्यत्वं संभवति आकाशे च गौणत्वमिति अत उत्तरमुच्य
ते स्याच्चैकस्यापि संभवनशब्दस्य विषयविशेषवशाद्गौणो मुख्यश्च प्रयोगो ब्रह्मशब्दवत् यथैकस्यापि ब्रह्मशब्दस्य
तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्मेत्यस्मिन्नधिकारे अन्नादिषु गौणः प्रयोगः आनन्दे च मुख्यो यथा च तपसि ब्रह्मविज्ञा
नसाधने ब्रह्मशब्दो भक्त्या प्रयुज्यते अञ्जसा तु विज्ञेये ब्रह्मणि तद्वत् कथं पुनरनुत्पत्तौ नभस एकमेवाद्वितीयं प्र
तिज्ञा समर्थ्यते न तं नभसा द्वितीयेन सद्वितीयं ब्रह्म प्राप्नोति कथं च ब्रह्मणि विदिते सर्वं विदितं स्यादिति तदुच्यते ए
कमेवेति तावत्स्वकार्यापेक्षयोपपद्यते यथा लोके कश्चित्कुम्भकारकुले पूर्वेद्युर्मृद्दण्डचक्रादीनि चोपलभ्यापरेद्युश्च
नानाविधान्यमत्राणि प्रसारितान्युपलभ्य ब्रूयात् मृदेवैकाकिनी पूर्वेद्युरासीदिति स च तेनावधारणेन मृत्कार्यजातमे
व पूर्वेद्युर्नासीदित्यभिप्रेयात् न दण्डचक्रादि तद्वत् अद्वितीयश्रुतिरधिष्ठात्रन्तरं वारयति यथा मृदोऽमत्रप्रकृतेः कुम्भकारोऽधि
ष्ठाता दृश्यते नैवं ब्रह्मणो जगत्प्रकृतेरन्योऽधिष्ठातास्तीति न च नभसापि द्वितीयेन सद्वितीयं ब्रह्म प्रसज्यते लक्षणान्यत्वनि
मित्तं हि नानात्वं न च प्रागुत्पत्तेर्ब्रह्मनभसोर्लक्षणान्यत्वमस्ति क्षीरोदकयोरिव संसृष्टयोर्व्यापित्वामूर्तत्वादिधर्मसामान्या
त् सर्गकाले तु ब्रह्म जगदुत्पादयितुं यतते स्तिमितमितरत्तिष्ठति तेनान्यत्वमवसीयते तथा चाकाशशरीरं ब्रह्मेत्यादिश्रुति
भ्योऽपि ब्रह्माकाशयोरभेदोपचारसिद्धिः अत एव च ब्रह्मज्ञानेन सर्वविज्ञानसिद्धिः ॥

नि९२

ति व्याख्यायाद्वितीयपदव्यावर्त्यमाह अद्वितीयश्रुतिरिति आकाशस्याद्वितीयादिपदसंकोचः कृतस्तदपि नास्तीत्याह
न च नभसापीति धर्मसाम्ये ब्रह्मनभसोः कथं भेदस्तत्राह सर्गकाले त्विति धर्मसाम्याद्द्वितीयत्वोपचार इत्यर्थः श्रुतिमाह
तथा चाकाशेति द्वितीयमाक्षेपं परिहरति अत एवेति अभेदोपचारादेवेत्यर्थः

शात्रं हि
५६

न मृत्तो ब्रह्मतत्कार्याभ्यामभिन्नदेशकालत्वात्तज्ज्ञानेन ज्ञानमित्याह अपि चेति एवमाकाशस्यानन्यत्वेऽपि सर्वश्रुतीनामवि
रोध इत्येकदेशिसिद्धान्तः प्राप्तः तमरुच्या सिद्धान्ती दूषयति प्रतिज्ञेति अहानिरबाधः सामयजुरथर्वणशाखाभेदज्ञानार्था इति
शब्दाः नकाश्चनेति आत्माभिन्नज्ञेयं नास्तीत्यर्थः ननु सर्वस्य ब्रह्माव्यतिरेकात्प्रतिज्ञाया अहानिरित्युक्तं तथापि जीवादिव
दन्यत्रस्यापि नभसो ब्रह्मणि कल्पितत्वेनाव्यतिरेकात्प्रतिज्ञासिद्धिः किं तस्मात्किमन्यमेतत्तत्राह शब्देभ्यश्चेति अवि

अपि च सर्वं कार्यमुत्पद्यमानमाकाशेनाव्यतिरिक्तदेशकालमेवोत्पद्यते ब्रह्मणा चाव्यतिरिक्तदेशकालमेवाकाशं
भवतीति अतो ब्रह्मणा तत्कार्येण च विज्ञातेन (सह विज्ञातं भ)मेवाकाशं भवति यथा क्षीरपूर्णे घटे कतिचिदुदबिंदवः प्रक्षिप्ताः
संतः क्षीरग्रहणेनैव गृहीता भवंति नहि क्षीरग्रहणादुदबिंदुग्रहणं परिशिष्यते एवं ब्रह्मणा तत्कार्यैश्चाव्यतिरि
क्तदेशकालत्वात् गृहीतमेव ब्रह्मग्रहणेन नभो भवति तस्माद्भाक्तं नभसः संभवश्रवणमिति एवं प्राप्ते इदमा
ह प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ५॥ येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यात्मनि खल्वरे दृष्टे श्रु
ते मते विज्ञाते इदं सर्वं विदितमिति कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति नकाश्चनमहद्धिधीविशालीति ॥
चैवंरूपा प्रतिज्ञा प्रतिवेदान्तं विज्ञायते तस्याः प्रतिज्ञाया एवमहानिरनुपरोधः स्यात् यद्यव्यतिरेकः कृत्स्नस्य वस्तुजात
स्य विज्ञेयाद्ब्रह्मणः स्यात् व्यतिरेके हि सत्येकविज्ञानेन सर्वविज्ञायत इतीयं प्रतिज्ञा हीयेत स चाव्यतिरेक एवमुपपद्यते
यदि कृत्स्नं वस्तुजातमेकस्माद्ब्रह्मण उत्पद्येत शब्देभ्यश्च प्रकृतिविकाराव्यतिरेकन्यायेनैव प्रतिज्ञासिद्धिरवगम्यते त
यथा हि येनाश्रुतं श्रुतं भवतीति प्रतिज्ञाय मृदादिदृष्टान्तैः कार्यकारणाभेदप्रतिपादनपरैः प्रतिज्ञैषा समर्थ्यते त
त्साधनायैव चोत्तरे शब्दाः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत तत्तेजोऽसृजत इत्येवं कार्यजातं ब्रह्मणः प्रदर्श्या
ऐ८ व्यतिरेकं प्रदर्शयंति ऐतदात्म्यमिदं सर्वमित्यारभ्याप्रपाठकपरिसमाप्तेः तद्यद्याकाशं न ब्रह्मकार्यं स्यात् न ब्रह्मणि विज्ञाते आ
काशं विज्ञायेत ततश्च प्रतिज्ञाहानिः स्यात् नच प्रतिज्ञाहान्या वेदस्याप्रामाण्यं युक्तं कर्तुं तथा च प्रतिवेदान्तं ते ते शब्दास्तेन
दृष्टान्तेन २ तेन तामेव प्रतिज्ञां स्थापयंति इदं सर्वं यदयमात्मा ब्रह्मैवेदममृतं पुरस्तादित्येवमादयः तस्माज्ज्वलनादिवदेव गगनम
प्युत्पद्यते यत्तूक्तमश्रुतेर्न वियदुत्पद्यत इति तदयुक्तं वियदुत्पत्तिविषयश्रुत्यंतरस्य दर्शितत्वात् तस्माद्वा एतस्मादात्मन
आकाशः संभूत इति ॥

तिरेक एव न्याय्यस्तेनेत्यर्थः अयं भावः जीवस्य तावदात्मत्वाद्ब्रह्माव्यतिरेकः अज्ञानतत्संबंधयोः कल्पितत्वेनाव्यतिरेकः स्वतंत्रज्ञाना
योगादज्ञानान्यजडद्रव्यस्य तु कार्यत्वेनैवाव्यतिरेकसिद्धिः तस्याकार्यत्वे प्रधानवत्स्वातंत्र्यादव्यतिरेकायोगात् यथाहुर्न्यायविदः
नित्यद्रव्याणि स्वतंत्राणि भिन्नान्यनाश्रितानीति तस्मात्प्रतिज्ञासिद्धये आकाशे कार्यत्वेनैवाव्यतिरेको वाच्य इति दृष्टांतेन ह
ष्टि सर्वोऽन्यः शब्दानाह तथाहीति तेन तेन दृष्टांतेनेति यजुषि दुंदुभ्यादिदृष्टांतेनाथर्वण ऊर्णनाभ्यादिदृष्टांतेनेत्यर्थः

स्प२

नं५ यजुषि प्रतिज्ञासाधकाः इदं सर्वमिति शब्दाः अथर्वणि ब्रह्मैवेदममिति शब्दा इति विभागः

एवमाकाशोत्पत्तिकथनादेकदेशिमते हृष्टे तेजःश्रुत्यप्रामाण्यवादिसौत्रं स्मारयति सत्यं दर्शितमिति मत्वा सिद्धान्त्याह नैकेति तत्तेजो
ऽसृजतेति सकृच्छ्रुतस्य सृष्टुराकाशतेजोभ्यां युगपत्संबंधाऽसंभवात् क्रमबाधात् क्रमेणाकाशस्रष्टुर्न तेजोऽसृजतेति संबंधे तेजःप्राथम्यभं
गाद्रस्तु निर्विकल्पासंभवेन तयोः शाखाभेदेन प्राथम्यव्यवस्थायां श्रयोगात्मैकवाक्यतेति प्रामेमध्यप्यैव दूषयति नैकोपदेश इति श्र
प्रामाण्यकल्पना दुरसमपोह्य यस्य श्रुतीनामेकवाक्यत्वेन प्रामाण्यकल्पनेन तच्चैकवाक्यत्वं बलवच्छ्रुत्या दुर्बलश्रुतेः कल्प्यं बलवती
तु४ च तित्तिरिश्रुतिः श्रुतान्यं च क्रमपौर्वापर्यादयक्रमस्य श्रुतित्वात् छान्दोग्यश्रुतिलङ्घ्ये बलात् तेजःप्राथम्यश्रुत्यभावात् तेजःसर्गमात्र
तश्रुतं तत्तृतीयत्वेन परिणामयमित्येकवाक्यतेत्यर्थः यद्वा एकदेशिनां छान्दोग्यश्रुत्याकाशोत्पत्तिवीर्यते इति तन्निरस्तं किंच साक्षा
तिः किं तेजोजन्मपरा तेन तेजोजन्म विधत्ते त्यति श्रुतेरुभयपराश्रायेन तद्वारणमित्याह नहीति अविरोधादित्यर्थः नहि तृतीयः श्रुत्य

सत्यं दर्शितं विरुद्धं तत्तेजोऽसृजतेत्यनेन श्रुत्यन्तरेण नैकवाक्यत्वाच्छ्रुतीनां भवत्वेकवाक्यत्वमविरुद्धानामिह तु विरोध उक्तः
सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयसंबंधासंभवाद्वयोः प्रथमजत्वासंभवाद्विकल्पासंभवाच्चेति नैष दोषः तेजःसर्ग
स्य तैत्तिरीयके तृतीयत्वश्रवणात् तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निरिति श्रुण
वा क्यापरिणे तु४ क्या हीयं श्रुतिरन्यथापरिणेतुं छान्दोग्यश्रुतिः तदाकाशवायू च सृष्ट्वा तत्तेजोऽसृजतेति नहीयं श्रुतिः तेजोजनिप्र
धाना सती श्रुत्यन्तरप्रसिद्धामाकाशस्योत्पत्तिं वारयितुं शक्नोति एकस्य वाक्यस्य व्यापारद्वयासंभवात् स्रष्टा त्वेको
पि क्रमेणानेकं स्रष्टव्यं सृजेत् इत्येकवाक्यकल्पनायां संभवत्यां न विरुद्धार्थत्वेन श्रुतिर्हातव्या नचास्माभिः सकृ
व च्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयसंबंधोऽभिप्रेयते श्रुत्यन्तरवशात् स्रष्टव्यान्तरोपसंग्रहात् यथा च सर्वं खल्विदं ब्रह्म तज्जलानि
त्यत्र समानादेव सर्वस्य वस्तुजातस्य ब्रह्मजत्वं श्रूयमाणं न प्रदेशान्तरविहितं तेजःप्रमुखस्योत्पत्तिक्रमं वारयत्येवं
तेजसोपि ब्रह्मजत्वं श्रूयमाणं न श्रुत्यन्तरविहितं नभःप्रमुखस्योत्पत्तिक्रमं वारयितुमर्हतीति ॥ ॥

तद्विरोधे नोभयपरत्वकल्पना योगाद्वाक्यभेदापत्तेश्चेत्याह एकस्येति नन्वेकस्य स्रष्टुरनेकार्थसंबंधवद्वाक्यस्याप्यनेकार्थता
किं न स्यादित्यत आह स्रष्टा त्विति एकस्य कर्तुरनेकासंबंधो दृष्टः न त्वेकस्य वाक्यस्य नानार्थकत्वं दृष्टं नानार्थकप्रयोगे तत्पयु
आनयेत्यादावावृत्त्या वाक्यभेद एवानयनस्य जलक्षीराभ्यां संबंधस्तथा इत्यर्थः फलितमाह इत्येकेति एकस्य शब्दस्यावृत्तिं वि
नानेकार्थत्वं नास्ति चेदसृजतेति शाखस्य छान्दोग्यउपसंहृताकाशादिसंबंधार्थमाह निर्दोषः स्यादित्यत आह नचेति छान्दोग्य
स्य तेजोजन्मादिकाशादिजन्मपूर्वकं तेजोजन्मत्वादिति निरस्य तेजोजन्मवदित्याकाशादिजन्मोपसंहारेण आकाशमसृजतेति
वाक्यान्तरस्यैव कल्पना न्याय्येति दोषपरिहार्य इत्यर्थः श्रुत्यन्तरस्थः क्रमः श्रुत्यन्तरे ग्राह्य इत्यत्र दृष्टान्तमाह यथा चेति ॥ ॥

शा.त.
टि.र.
५७

त्वैक्तात्पर्यात्तात्पर्याभ्यां दृष्टान्तस्तुतिर्वेयमसंगतेति नन्वित्यादिना तेजःप्राथम्यस्वीकारे आकाशस्य गौणधर्मीनवधर्मः प्राथम्यं वेति ।
हृदयस्थानं बाधनीयमिति गौरवमाकाशप्राथम्यस्य त्वार्थिके तेजःसर्गप्राथम्यमात्रबाध इति लाघवमिति मत्वाह नेत्युच्यत इति किं
च प्रधानधर्मित्यागाद्वरं गुणभूतस्य तेजःप्राथम्यस्य धर्मस्य त्याग इत्याह नहीति किंच किं स्रष्टिपरश्रुतिसिद्धत्वात्तेजःप्रा
थम्यं गृह्यते उत प्रथमस्थाने तेजसः सर्गश्रुत्यार्थिकप्राथम्यभावान्नाद्य इत्याह अपि चेति द्वितीयमन्त्रयहृदयति अर्थात्विति
यद्वत् व त्वं नि विकल्पासंभवाद्भयोः प्राथम्यपाठस्वाभेदेन व्यवस्थितेन भवतीत्याह उभयोर्हि हलाकुरवत्सम्भ्रितोत्पत्त्याप्रा
थम्यं वायुरग्निरिति क्रमबाधापातादिति तदिष्यत एवेत्याह विकल्पेति नैककलं श्रुतिद्वैधारविरोधः सोहार्दं चास्तीत्याह

ननु समविधानार्थमेतद्वाक्यं तज्जलानिति शान्त उपासीतेति अतेनैतस्य स्रष्टिवाक्यं तस्मादेतस्मादेशान्तरप्रसिद्धं क्र
ममनुवादमर्हतीति तत्तेजोऽसृजतेत्यस्य स्रष्टिवाक्यं तस्मादेत्रयत्याश्रुतिक्रमो गृह्यते नत्य इति नेत्युच्यते नहि तेजः
प्राथम्यानुरोधेन श्रुत्यन्तरप्रसिद्धो वियत्पदार्थः परित्यक्तव्यो भवति पदार्थधर्मत्वात्क्रमस्य अपि च न तेजोऽसृजतेति नव
क्रमस्य वाचकः कश्चिच्छब्दोऽस्ति अर्थात्तु क्रमो गम्यते स च वायोरग्निरित्यनेन श्रुत्यन्तरप्रसिद्धेन क्रमेणानिवार्यते विक
ल्पसमुच्चयौ तु वियत्तेजसोः प्रथमजत्वविषयाव संभवानभ्युपगमाभ्यां निवारितौ तस्मान्नास्ति श्रुत्योर्विप्रतिषेधः ।
अपि च छान्दोग्ये येनाश्रुतं श्रुतं भवतीत्येतां प्रतिज्ञां वाक्योपक्रमे श्रुत्वा तां समर्थयितुम समाम्नातमपि वियदुपसं
ख्यातव्यं किमंग पुनस्तैत्तिरीयके समाम्नातं न संगृह्यते यच्चोक्तमाकाशस्य सर्वेणानन्यदेशकालत्वाद्ब्रह्मणा तत्का
र्यस्य सह वृत्तित्वं भवतु तद्वत्सतो न प्रतिज्ञा हीयेत नचैकमेवाद्वितीयमिति श्रुतिकोपो भवति क्षीरोदकवत् ब्रह्मनभसोरव्य
तिरेकोपपत्तेरिति अत्रोच्यते न क्षीरोदकन्यायेनेदमेकविज्ञानेन सर्वविज्ञानं नेतव्यं मृदादिदृष्टान्तप्रणयनाद्धि प्रकृतिवि
कारन्यायेनैवेदं सर्वविज्ञानं नेतव्यमिति गम्यते क्षीरोदकन्यायेन च सर्वविज्ञानं कल्प्यमानं न सम्यग्विज्ञानं स्यान्नहि क्षीर
ज्ञानगृहीतस्योदकस्य सम्यग्विज्ञानगृहीतत्वमस्ति नच वेदस्य पुरुषाणामिव मायालीकवंचनादिभिरर्थावधारणमुपप
द्यते सावधारणा चेयमेकमेवाद्वितीयमिति श्रुतिः क्षीरोदकन्यायेन नीयमाना पीड्येत ॥

अपि चेति विपदुपसंग्राह्यमित्यन्वयः वियदनुत्पत्तिवादिनोक्तमनुपपत्तिरसाह द्वितीयश्रुतेरसमञ्जस्यार्थतात्पर्यावगमान्नेगौ
णार्थतेति हृदयति पूर्वोक्तमित्यादिना प्रकृतिविकारन्यायेन तदनन्यत्वन्यायः उदके क्षीरस्य मपि क्षीरज्ञानान्न गृह्यते भेदादिति भावः
मात्रुसम्यग्ज्ञानं श्रुतेर्भ्रान्तिमत्त्वप्रसंगवादित्याशंक्यापौरुषेयत्वान्नैवमित्याह नच वेदस्येति मायाभ्रान्तिः तथालीकमिथ्याभाषणेन
वंचनमयथार्थबोधनं आदिपदाद्विप्रलिप्सा प्रमादकरणापाटवानि गृह्यन्ते प्रतिज्ञामुख्यत्वमभिधायाद्वितीयश्रुतिमुख्यतामाह सावधा

न३ न२

उभयगौणत्वे स्तुतवहुप्रयासो मृदादिदृष्टान्तैस्तत्साधनं च न स्यादिति दोषान्तरमाह न चेत्यादित्यादिना कार्यमेव वस्त्वेकदेश आकाशो
नोत्पद्यते तामगौण्यश्रुत्वादित्याकाशो विकारः विभक्तत्वात् घटादिवदिति सप्रतिपक्षमाह यत्तु नेत्यादिना यो विभक्तः स विकार इ
त्यन्वयमुक्त्वा यस्त्वविकारः स विभक्तः यथात्मेति व्यतिरेकव्याप्तिमाह नन्वविकृतमिति दिगादिषु व्यभिचारमाशंक्य पक्षसमत्वान्मै
वमित्याह एतेनेति विभक्तत्वेनेत्यर्थः आत्मनि व्यभिचारं शंकते नन्विति धर्मिसमानसत्ताकविभागस्य हेतुत्वादात्मा मायात्मनि विभाग। २४
स्य कल्पितत्वेन समानसत्ताकत्वाव्यभिचार इत्याह नेति अत्र चाज्ञानान्यद्रव्यत्वं विशेषणं अतो नाज्ञाने तत्संबंधादौ व्यभिचारः नन्वात्मा

भिन्न। ना।

न च स्वकार्यापेक्षया पदं वस्त्वेकदेशविषयं सर्वविज्ञानमेकमेवाद्वितीयमवधारणं चेतित्यायं मृदादिष्वपि दिन तत्संभवात्।
नतरः सर्वं वहुप्रयासितव्यं संभवति श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यो ये
नाश्रुतं श्रुतं भवतीत्यादिना तस्मादशेषवस्तुविषयमेवेदं सर्वविज्ञानं सर्वस्य ब्रह्मकार्यत्वोपपत्त्योपन्यस्यत इति द्रष्टव्यं
यत्तु नरेन्द्र क्रमसंभवाद्गौणी गगनस्योत्पत्तिश्रुतिरित्यत्र ब्रूमः यावद्विकारं तु विभागो लोकवत् ६ तु शब्दो संभवा।
शंकाव्यावृत्त्यर्थः न खल्वाकाशोत्पत्तावसंभवाशंका कर्तव्या यतो यावत्किंचिद्विकारजातं दृश्यते घटघटिको
कद्दे दंचनादिवा कटकेयूरकुंडलादिवा सूचीनाराचनिस्त्रिंशादिवा तावानेव विभागो लोके लक्ष्यते नत्वविकृतं किंचि
त्कनचिद्विभक्तमुपलभ्यते विभागश्चाकाशस्य पृथिव्यादिभ्योऽवगम्यते तस्मात्सोऽपि विकारो भवितुमर्हति एतेन
दिक्कालमनःपरमाण्वादीनां कार्यत्वं व्याख्यातं नन्वात्माप्याकाशादिभ्यो विभक्त इति तस्यापि कार्यत्वं घटादिवत्प्रा
प्नोति न आत्मन आकाशः संभूत इति श्रुतेः यदि ह्यात्मापि विकारः स्यात् तस्मात्परमन्यत् अश्रुतमित्याकाशादि सर्वं
कार्यं निरात्मकमात्मनः कार्यत्वे स्यात् तथा च शून्यवादः प्रसज्येत आत्मत्वाच्चात्मनो निराकरणशंकानुपपत्तिः।

न ह्यात्मागन्तुकः कस्यचित्स्वयंसिद्धत्वात्

कार्यः विभक्तत्वात् वस्तुत्वाद्घटवदित्याभासतुल्यमिदं अनुमानमित्याशंक्यात्मनः परमकारणत्वेन श्रुतस्य कार्यत्वे शून्यता
प्रसंग इति बाधकसत्त्वान्नाभासत्वं नात्र किंचिद्बाधकमस्ति प्रत्युत आकाशस्याकार्यत्वे नित्यानेकद्रव्यकल्पना श्रौतप्रतिज्ञा
हान्यादयो बाधकाः संतीति नाभासतुल्यतेत्याह आत्मन इति इष्टप्रसंग इति वदन्तं प्रत्याह आत्मत्वादिति आत्माभावः के
न चिन्त्यो यतनवाक्यायोऽज्ञातास्य परिशिष्यत इति न स्वत्वतो हि तीर्थापि न स्वत्वतामानाभावादित्यर्थः किंच यद्विका
र्यं सत्तास्फूर्ती स्यातां पत्ते न निराकार्ये मात्मात्वकार्यो निरपेक्षत्वात्र बाधयोग इत्याह न ह्यात्मेत्यादिना कस्यचित्कार
णस्यागन्तुकः कार्यो न हि सत्तास्फूर्त्योः सिद्धौ रजन्यायतत्वादित्यक्षरार्थः राम ॥ राम ॥

शात्व॰
द्वि॰ र॰
५८

तत्र स्फूर्तेरनन्यायत्तत्वं विहन्येतेति नहीति तदुक्तं सुरेश्वराचार्यैः प्रमाता च प्रमाणं च प्रमेयं प्रमितिस्तथा यस्य प्रसादात्सिध्यन्ति तत्सि
द्धौ किमपेक्षते इति तथा श्रुतिरपि पुरुषः स्वयंज्योतिस्तस्य भासा सर्वमिदं विभातीति च ननु आत्मनः स्वतः सिद्धौ प्रमाणवैयर्थ्यं तत्रा
ह नेत्येति ननु प्रमेयस्यापि स्वप्रकाशत्वे किं न स्यादित्यत आह नहीति अतो न प्रमाणवैयर्थ्यमिति भावः आत्मापि मानाधीनसिद्धि
कः किं न स्यादित्यत आह आत्मा त्विति अयमर्थः निश्चितसत्ताकं हि ज्ञानं प्रमेयसत्तानिश्चायकं गेहे घटो दृष्टो न वेति ज्ञानसंश
ये न दृष्ट इति घटेऽनिश्चये चार्थस्वरूपानिश्चयात् ज्ञानसत्तानिश्चयश्च स्वतः कार्यः स्वप्रकाशत्वायोगात् ज्ञानान्तराद
नवस्थानादतः साक्षिण्येव ज्ञानसत्तानिश्चयो वाच्यः तत्र साक्षिणश्चेज्ज्ञानाधीनसत्तानिश्चयः अन्योन्याश्रयः स्यादतः सर्वसाधकत्वा
दात्मा स्वतः सिद्ध इति स्वप्रकाशस्यापि बाधः किं न स्यादित्यत आह नैवेति जडो हि परायत्तप्रकाशत्वादागन्तुकं बाधयोग्यं न स्वप्रका

न ह्यात्मात्मनः प्रमाणमपेक्ष्य सिध्यति तस्य हि प्रत्यक्षादीनि प्रमाणान्यप्रसिद्धप्रमेयसिद्धय उपादीयन्ते नह्याकाशा
दयः पदार्थाः प्रमाणनिरपेक्षाः स्वयंसिद्धाः केनचिदभ्युपगम्यन्ते आत्मा तु प्रमाणादिव्यवहाराश्रयत्वात्प्रागेव प्रमाणा
दिव्यवहारात्सिध्यति न चेदृशस्य निराकरणं संभवति आगन्तुकं हि वस्तु निराक्रियते न स्वरूपं य एव हि निराकर्ता तदेव
तस्य स्वरूपं न ह्यग्नेरौष्ण्यमग्निना निराक्रियते तथाहमेवेदानीं जानामि वर्तमानं वस्त्वहमेवातीतमतीततरं चाज्ञा
सि षमहमेवानागतमनागततरं च ज्ञास्यामीत्यतीतानागतवर्तमानभावेनान्यथाभवत्यपि ज्ञातव्ये न ज्ञातुरन्यथा
भावोऽस्ति सर्वदा वर्तमानस्वभावत्वात् तथा भस्मीभवत्यपि देहे नात्मन उच्छेदो वर्तमानस्वभावादन्यथास्वभावत्वं वा ॥
न संभावयितुं शक्यं एवमप्रत्याख्येयस्वभावत्वादकार्यत्वमात्मनः कार्यत्वं चाकाशस्य यत्तूक्तं समानजातीयमनेकं का
रणद्रव्यमात्मनो नास्तीति तत्प्रत्युच्यते न तावत्समानजातीयमेवारभते न भिन्नजातीयमिति नियमोऽस्ति नहि तन्तूनां तत्संयो
गानां च समानजातीयत्वमस्ति द्रव्यगुणत्वाभ्युपगमात् न च निमित्तकारणानामपि तुरीवेमादीनां समानजातीयत्वनि

वाथ

णात्मस्वरूपं तस्य सर्वसाक्षिस्वरूपस्य निराकर्तुरभावात्स्वस्य च स्वनिराकर्तृत्वायोगान्नहि सुनिपुणोऽपि स्वाभावो द्रष्टुं शक्यत इ ॥
त्यर्थः एवं स्वतःस्फूर्तित्वादात्मा न बाध्य इत्युक्तं स्वतः सत्तावत्त्वाच्च न बाध्यत इत्याह तथाहमेवेति ज्ञानज्ञेययोः सत्ताव्यभि
चारेऽपि ज्ञातुः सदैकरूपत्वान्न सत्ताव्यभिचार इत्यर्थः मास्तु जीवतो ज्ञातुरन्यथाभावः मृतस्य तु स्यादित्यत आह तथेति उच्छे
दो विनाशोऽन्यथास्वभावत्वं मिथ्यात्वं वा संभावयितुमपि न शक्यमहमस्मीत्यनुभवसिद्धसत्स्वभावस्य बाधकाभावादित्यर्थः एवमा
त्मनोऽसत्त्वनिरासेन स्वरूपतोऽप्रसंगस्यानिष्टत्वमुक्तं तत्रात्मनः कार्यत्वान्मानमाभासमित्याह एवमिति अकार्यात्मनः सि
द्धौ तस्याविद्यासहितस्योपादानस्यादृष्टादिनिमित्तस्य च सत्त्वादाकाशादीनामुत्पत्तिहेतोः सामग्र्यसत्त्वस्य स्वरूपासिद्धेरुक्तमति
पत्तबाधाश्चाकाशस्य कार्यत्वं निरवद्यमित्याह कार्यत्वं चेति आत्माविद्ययोर्विजातीयत्वाच्चाकाशारंभकत्वमित्युक्तमनूद्य निरस्य

किंकारणमात्रस्य साजात्यनियमः उत्तमसमवायिनः तत्राद्यं निरस्य द्वितीयं शंकते स्यादेतदिति किंसमवायितावच्छेदकधर्मेण सा
जात्यं उत सत्त्वादिना नाद्य इत्याह तदपीति नचरज्वादिनद्रव्यान्तरमिति वाच्यं पटादेरपि तथात्वापातात् द्वितीयस्य दिग्त्वात्मा
विषयार्वत्तत्वेन साजात्याभिप्रेत्याह मन्वेति उपादानस्य साजात्यनियमं निरस्य संयुक्तानेकत्वनियमं द्वितीयस्यांगस्याप्यात्म
न उपादानत्वसिद्धये निरस्यति नापीत्यादिना किमारंभकमात्रस्यायं नियम उत द्रव्यारंभकस्य नाद्य इत्याह आणिवेति आणुकस्य
ज्ञानस्य वा समवायिकारणसंयोगजनकमाद्यकर्मैव यथा दृष्टवदात्मसंयुक्ते आणमनसी आद्यकर्मारंभके तथापि कर्मसमवायिनए
कत्वादनेकत्वनियमभंग इत्याह एकैकाहीति द्रव्यान्तरे समवायिभिरित्यर्थः द्वितीयमस्याप्यारंभवादानंगीकारेण दूषयति उ
स्यादेतत्समवायिकारणविषय एव समानजातीयत्वाभ्युपगमो न कारणान्तरविषय इति तदपि नैकांतिकं सूत्रगोवा
लैर्हीनेकजातीयैरेकारज्जुस्समानाद्दृश्यते तथा सत्ते तूर्णादिभिश्रैर्विचित्रकंबलाभिव्यज्यते सत्त्वद्रव्यत्वायपेक्षया वास
मानजातीयत्वे कल्प्यमाने नियमानर्थकं सर्वस्य सर्वेण समानजातीयकत्वात् नाप्यनेकमेवारभते नैकमिति नियमोस्ति अ
णुमनसोराद्यकर्मारंभाभ्युपगमात् एकैको हि परमाणुर्मनश्चाद्यकर्मारभते न द्रव्यान्तरैः संहत्येत्यभ्युपगम्यते द्रव्यारंभ
एवानेकारंभकत्वनियम इति चेत् न परिणामाभ्युपगमाद्भवेदेष नियमो यदि संयोगसचिवं द्रव्यं द्रव्यान्तरस्यारंभ
कमभ्युपगम्येत तदेव तु द्रव्यं विशेषवदवस्थान्तरमापद्यमानं कार्यं नामाभ्युपगम्यते तच्च क्वचिदनेकं परिणमते मृत्स्वी
जादिकं क्वचिदेकं परिणमते क्षीरादि दध्यादिभावेन नेश्वरवचनमस्त्यनेकमेव कारणं कार्यं जनयतीति श्रु
तः स्मृति प्रामाण्यादेकस्माद्ब्रह्मण आकाशादिमहाभूतोत्पत्तिक्रमेण जगज्जातमिति निश्चीयते तथा चोक्तमुपसं
हारदर्शनान्नेति चेन्न क्षीरवद्धीति यच्चोक्तमाकाशस्यानुत्पत्तौ न पूर्वीपरकालयोर्विशेषः संभावयितुं शक्यत इति तद
युक्तं येनैव विशेषेण पृथिव्यादिभ्यो व्यतिरिच्यमानं नभः स्वरूपवदिदानीमध्यवसीयते स एव विशेषः प्रागुत्पत्तेर्नी

स्त्यादिना तत्वभ्युपगम्यते तस्मात्रेष नियम इति शेषः यत्तु क्षीरपरमाणुष्वसांतरोत्पत्तौ तैरेव दध्यारंभ इति तत्र क्षीरनाश
नाभावात् रसवद्दध्नोप्येकद्रव्यारंभत्वसंभवाच्च द्रव्यगुणसंकेतस्य पोषपक्षस्य कृत्यर्थनिर्णयाहेतुत्वादिति भावः
लोके कर्तुः सहायदर्शनाद सहाया ब्रह्मणः कथं सर्ग इति तत्राह तथा चोक्तमिति प्रागभावस्यास्य त्वहेतुरप्यसिद्ध इत्या
ह यच्चोक्तमित्यादिना शब्दाश्रयत्वं विशेषः शब्दादिमानाकाशः प्रलयेनास्तिनासीद्रजो नो व्योमेति श्रुतेः तत्त्वाकाशा
भावकाले न स्यादिति चिन्त्यमित्याहितोयं नैयायिकत्वनयः तद्याकाशाभावस्तद्धर्मो वाकाशाद्यन्यः किं तन्न तद्द्रव्यविशेषः तत्संयो

नविशेषाकाङ्क्षायां तत्र प्रलयेनाशीतिभावः ॥

आकाशशरीरं ब्रह्मेति श्रुतेरगौणत्वप्रत्यहं ब्रह्मस्वभावस्याकाशस्य तस्मिन्ब्रह्मणि कथमभावस्तत्राह यथा चेति विभुत्वादाकाशसमं ब्रह्मेति।
अत्यर्थः विभुत्वांशस्पर्शद्रव्यत्वनिरवयवद्रव्यत्वलिंगानां विभक्तत्वादिलिंगसहितागमबाधमाह यद पीत्यादिना धर्मिविकाराभावत्वगुण
यः स्वरूपासिद्धिमप्याह विभुत्वादीनां चेति सर्वमूर्त्तद्रव्यसंयोगः परिमाणविशेषो वा विभुत्वं निरवयवात्मनि रूपेण ते नास्ति स
योगस्य सावयवत्वनियतस्याजत्वसाध्यविरुद्धता च स्वरूपोपचयरूपं तु विभुत्वमात्माकाशयोर्न संभवति ज्यायानाकाशादिति
श्रुतेः क्वचिदाकाशसामान्यं ब्रह्मणो यत्किंचित्सर्वसंबंधनत्वमुपदिश्यते असत्त्वेन वा पंचीकरणादस्पर्शत्वमसिद्धं कार्यद्रव्य

यथा च ब्रह्मानस्थूलादिभिः पृथिव्यादिस्वभावैः स्वभाववदस्थूलमनणुहस्वमित्यादिश्रुतिभ्यः एवमाकाशस्वभावेनापि न
स्वभाववद्धनाकाशमिति श्रुतेरवगम्यते तस्मात्त्वागुणत्वेनाकाशमिति स्थितं यदप्युक्तं पृथिव्यादिवैधर्म्यादाकाश
स्याजत्वमिति तदप्यसत्कृतिविरोधे तत्प्रत्यक्षमनुमानस्याभासत्वापत्तेः उत्पत्त्यनुमानस्य च दर्शितत्वात् अनि
त्यमाकाशमनित्यगुणाश्रयत्वात् घटादिवदित्यादिप्रयोगसंभवाच्च आत्मत्वेनैकांतिकमिति चेत् न तस्योपनिष
दं प्रत्यनित्यगुणाश्रयत्वासिद्धेः विभुत्वादीनां चाकाशस्योत्पत्तिवादिनं प्रत्यसिद्धत्वात् यच्चोक्तमेतच्छब्दाच्चेति तत्रा।
स्तन्त्वश्रुतिस्तावद्वियत्सावरतादिवाक्यसदृतिवद्गण्या उत्पत्तिप्रलययोरुपपादितत्वात् आकाशवत्सर्वगतश्च
नित्य इत्यपि प्रसिद्धमहत्त्वेनाकाशेनोपमानं क्रियते निरतिशयमहत्त्वाय नाकाशसमत्वाय येपुरिव सविता धाव
तीति क्षिप्रगतित्वायोच्यते नेषुतुल्यगतित्वाय तद्वत् एतेनानंतत्वोपमानश्रुतिर्व्याख्याता ज्यायानाकाशादित्यादि
श्रुतिभ्यश्च ब्रह्मण आकाशस्योनपरिमाणत्वसिद्धिः न तस्य प्रतिमास्तीति च ब्रह्मणोऽनुपमानत्वं दर्शयति अतोन्यदार्त्तमि
ति च ब्रह्मणोऽन्येषामाकाशादीनामार्त्तत्वं दर्शयति तपसि ब्रह्मशब्दवत् आकाशस्य जन्मश्रुतेर्गौणत्वमित्यत दाका।
शसंभवश्रुत्यनुमानाभ्यां परिहृतं तस्माद् ब्रह्मकार्यं वियदिति सिद्धं ॥ ७२

त्वान्निरवयवत्वमप्यसिद्धं द्रव्यत्वजातिश्चात्मन्यसिद्धेत्यर्थः नित्यत्वं शेन सामान्येन विवक्षितं न तु सर्वथानंतो यथाकाश एवमनं
तश्चात्मेति श्रुतिर्नित्यत्वेन वसाम्यं ब्रूते नेत्याह एतेनेति आकाशस्य कार्यत्वेनानित्यत्वादित्यर्थः श्रुतिस्थापितकानन्त्यद्वारान
त्वान्तेत्यवोधयतीति भावः न त्वनाद्याकाशस्य नमुख्योपमानमित्याह ज्यायानिति मुख्योपमानासत्त्वे श्रुतिः न तस्येति तस्मादाकाश।
स्योपमानत्वमात्रेणानित्यत्वं नास्तीति भावः अनित्यत्वश्रुतिमाह अतोन्यदिति यत्वेकस्मिन्नेव शब्दे तपशब्दस्य गौणत्वं मुख्यत्वं चेति नत्र।
आकाशे तस्य मुख्यत्वसंभवादित्याह तपसीति वलवत्तिति श्रुत्यां छांदोग्यश्रुतेर्न यनादेकवाक्यतया सृष्टिर्ब्रह्मात्मनिसमन्वयद्रत्युपसं

एतेन मातरिश्वा व्याख्यातः ॥ अतिदेशत्वात् पृथक् संगत्याद्यपेक्षा ॥ तत्तेजोऽसृजतेति श्रुतेराकाशाद्वायुरिति श्रुत्या विरोधोऽस्ति न वेति एक वाक्यत्वभावाभावाभ्यां संशये गौणपक्षसिद्धान्तपक्षानतिदिशति ॥ तत्रापीत्यादिना सर्वत्र ह्याकाशानन्तरं तेजसः स्थापितत्वात् वायुतेजसोस्तुल्यवदानन्तर्ये वायोरग्निरिति श्रुतेन श्रुतिबाधात् तौ वा पर्यन्ते तेजः प्राथम्यभंगात्रैकवाक्यतेति एवं पक्षे गौणवायभिप्राय माह ॥ तत्सृष्टेति असत्त्वमयप्रतिषेधो नत्त्व्योत्पत्त्यसंभवे लिंगं वायुश्चान्तरिक्षं चैतदमृतमिति तस्येवलिंस्याभ्यासः वायुरेव व्य ष्टिः समष्टिश्चेति सर्वात्मत्वे लिंगान्तरमादि पदार्थः तथा संवर्गविद्यायां वायुर्हि वेतान्तो वा नग्न्योद्गीर्णस्त इह शीतिरिति श्रवमात्रे गौण स्यैव श्रवणं लिंगान्तरं ग्राह्यं एते लिंगे वायुरन्ताद्यनंततद्गतिप्रतीतेरुत्पत्तिर्गौणीत्यविरोधः श्रुत्योरिति प्राप्ते प्रतिपिपादयिषित

एतेन मातरिश्वा व्याख्यातः ॥ २ ॥ अतिदेशोऽयं एतेन वियद्व्याख्यानेन मातरिश्वापि वियदाश्रयो वायुर्व्याख्यातः ॥ तत्रापेतेत यायोगं पक्षारचयितव्याः तवायुरुत्पद्यते छंदोगानामुत्पत्तिप्रकरणे नाम्नानादित्येकः पक्षः अस्ति तु तैत्तिरीयाणामु त्पत्तिप्रकरणे आम्नानमाकाशाद्वायुरिति पक्षान्तरं ततश्च श्रुत्योर्वै प्रतिषेधसति गौणीवायोरुत्पत्ति श्रुतिरसंभवा दित्यपरोऽभिप्रायः असंभवश्चैषा नत्त्वमितीयं वायुरित्यस्त्वमयप्रतिषेधादमृतत्वादिश्रवणाच्च प्रतिज्ञानुपरोधा यावद्विकारं तु विभागाभ्युपगमादुत्पद्यते वायुरिति सिद्धान्तः असत्त्वमयप्रतिषेधः अपरविद्याविषयत्वापेक्षिक अ न्यादीनामिव वायोरस्तमयाभावात् न प्रतिविधानं चामृतत्वादिश्रवणं ननु वायोराकाशस्य च तुल्ययोरुत्प त्तिप्रकरणे श्रवणाश्रवणयोरेकमेवाधिकरणमुभयविषयमस्तु किमतिदेशेनासतिविशेषइत्युच्यते सत्यं मेवमेतत्तथापि मंदधियां शब्दमात्रकृतां शंकानिवृत्त्यर्थोऽयमतिदेशः क्रियते संवर्गविद्यादिषु ह्युपास्यं तया वायोर्महाभागत्वश्रवणात् असत्त्वमयप्रतिषेधादिभ्यश्च भवति नित्यत्वाशंका कस्यचिदिति ॥ ॥

प्रतिज्ञाश्रुतेर्वलीयस्त्वात्तत्साधकानां तत्रवायमुत्पत्तिवाक्यानां भूयस्त्वाद् उक्तविभक्तत्वादिलिंगान्तरग्रहाच्च मरुद्व्येव वा योरुत्पत्तिलघ्वाचाकाशं वायुश्चसृष्ट्वा तेजोऽसृजतेति श्रुत्योरेकवाक्यता पाव्रह्मणि समन्वयः लिंगानि तत्पास्यवायु प्लावकत्वादापेक्षिकतयाव्याख्येयानीति सूत्र्यसिद्धान्तमाह ॥ प्रतिज्ञेत्यादिना कृतप्रतिविधानमापेक्षिकत्वेन समा धानं यस्तत्तया अधिकरणारंभमाक्षिप्योक्तामपिकाशंकामाह ॥ नन्वित्यादिना वायुर्हि वेनास्तवीत्तं हं क्रोऽत्यादिश ब्दमात्रशंकान्तलनार्थं दृ तियोनतार्थमात्रपदं नामेवशंकामाह ॥ संवर्गेति व्यष्टिसमष्ट्युपास्तिर्वायुदिशावंतस्त्वेदेत्युपा

[illegible]

शान्त
द्वि २
६०

असंभवस्त्विति अनापन्नत्वं महतः परं ध्रुवं न चास्य कश्चिज्जनिता न चाधिप इत्यादिब्रह्मानादित्वश्रुतीनां त्वं जातो भवसि विश्वतोमुख इत्यु
त्पत्तिश्रुत्या विरोधोऽस्ति न वेत्येकवाक्यत्वाभावाभावाभ्यां संदेहे अस्ति विरोध इति पूर्वपक्षे यथा वाय्वादेरुत्पत्त्यादिकमत्यन्ति
श्रुतिबलादापेक्षितं कं तथा ब्रह्मानादित्वमापेक्षिकमिति दृष्टान्तसंगत्या एकदेशिपक्षं प्रापयति वियदिति ब्रह्मणोऽपि कुतश्चि
ज्जायते कारणत्वादाकाशवदित्यनुमानानुगृहीता जन्मश्रुतिर्बलीयसीत्याह तथेति न चानादिकारणाभावेनानवस्थाबीजा
ङ्कुरवदनादित्वोपपत्तेः तथा च दीपाद्दीपवद्ब्रह्मान्तरोत्पत्तिरस्तीति श्रुत्या चानादित्वश्रुतिर्नेतव्या नायं नेनन ब्रह्मसमन्वयासि
द्धिरिति प्राप्ते मुख्यसिद्धान्तमाह नात्मेति ब्रह्म न जायते कारणशून्यत्वान्नरविषाणवत् व्यतिरेकेण घटवच्चेत्यनुमानो

ति २

असंभवस्तु सतोऽनुपपत्तेः ९ वियत्पवनयोरसंभाव्यमानजन्मनोरप्युत्पत्तिमुपश्रुत्य ब्रह्मणोऽपि भवेत्कुतश्चिदुत्पत्ति
रिति स्यात्कस्यचिन्मतिः तथा विकारेभ्य एवाकाशादिभ्य उत्तरेषां विकाराणामुत्पत्तिमुपश्रुत्याकाशस्यापि विकारादे
व ब्रह्मण उत्पत्तिरिति कश्चिन्मन्येत तामाशंकामनेनेदं सूत्रमसंभवस्त्विति न तु खलु ब्रह्मणः सदात्मकस्य कुतश्चि
दन्यतः संभव उत्पत्तिराशंकितव्या कस्मात् अनुपपत्तेः सन्मात्रं हि ब्रह्म न तस्य सन्मात्रादेवोत्पत्तिः संभवत्यसत्यतिशा
ये प्रकृतिविकारभावानुपपत्तेः नापि सद्विशेषात् दृष्टविपर्ययात् सामान्याद्धि विशेषा उत्पद्यमाना दृश्यन्ते मृदादेर्घटाद
यो न तु विशेषेभ्यः सामान्यं नाप्यसतो निरात्मकत्वात् कथमसतः सज्जायेतेति चाक्षेपश्रवणात् स कारणं करणाधिपा
धिपो न चास्य कश्चिज्जनिता न चाधिप इति च ब्रह्मणो जनयितारं वारयति वियत्पवनयोः पुनरुत्पत्तिः प्रदर्शि
ता न तु ब्रह्मणः सा इति वैषम्यं न च विकारेभ्यो विकारान्तरोत्पत्तिदर्शनाद्ब्रह्मणोऽपि विकारत्वं भवितुमर्हति नीतिः
मूलप्रकृत्यनभ्युपगमेऽनवस्थाप्रसंगात् या मूलप्रकृतिरभ्युपगम्यते तदेव च नो ब्रह्मेत्यविरोधः ॥ ॥

न त्वग्रहाद्विपक्षे चाकारणककार्यवादप्रसंगाद्ब्रह्मानादित्वश्रुतय एव बलीयस्य इति कारणत्वलिंगबाधा जन्मश्रुतिः कार्या
भेदेन व्याख्येयेत्यनायनेन ब्रह्मसमन्वयसिद्धिरिति सिद्धान्तफलं न च हेत्वसिद्धिः कारणस्य निरूपणान्यथाहि किं सन्मा
त्रस्य ब्रह्मणः सन्मात्रमेव सामान्यं कारणमुत सद्विशेषो वा आद्ये सद्धानत्रेधापीत्याह सन्मात्रं हीत्यादिना दीपस्य दीपान्तरनिमित्त
मित्यनुदाहरणं वियत्पवनयोरन्यस्य विभक्तत्वाविभक्तत्वाभ्यां कारणभावाभावाभ्यां च वैषम्यं कारणत्वलिंगस्याप्रामाणि
कानवस्थातर्केणापि बाधमाह न च विकारेभ्य इत्यादिना कारणस्यानभ्युपगमे पटह्रादप्रसंगस्त्वनादिकारणानभ्यु
पगमे त्वनवस्थाप्रसंगः तदभ्युपगमे ब्रह्मवादप्रसंगः कारणान्तरस्य प्रधानादेर्निरस्तत्वादिति भावः ॥ ॥

वार

तेजोतस्तथा ह्याह तेजोऽत्र जातं वायोरग्निरिति च श्रुत्योर्विरोधोऽस्ति न वेति संदेहे सामान्यात्सामान्योत्पत्तिसंभवेपि ब्रह्मवाय्वोः सामा
न्ययोस्तेजोरूपविशेषोपादानत्वसंभवात्तत्त्वकल्पनयास्ति विरोध इति प्राप्ते दाहरणेन पूर्वपक्षः सर्वत्राध्यायसमाप्तेरेकवाक्यत्वा
संभवासंभवौ तेषां यद्वीजं एवं पक्षे श्रुतीनां विरोधादप्रामाण्ये फलं सिद्धांते प्रामाण्यमित्युक्तं न विस्मर्तव्यं एवं पूर्वपक्षे कार्यमा
त्रस्य विवर्तत्वात्कल्पितस्य वायोस्तेजःकल्पनाधिष्ठानत्वायोगात् ब्रह्मैव तेजस उपादानं सर्वकार्याणां ब्रह्मैवोपादानमित्यर्थे
श्रुतीनां भयत्वाच्च तदनुरोधाद्वायोरिति क्रमापंचमीत्यविरोध इत्येकदेशिसिद्धांतं प्रापयति प्राप्तं तावद्ब्रह्मयोनि तेज इ
त्यादिना श्रुतीनां विरोधमात्रोपन्यासेन पूर्वपक्षः अपि सिद्धांतेनाविरोधात्तावदेकदेशिपक्ष इति तेषां तदुभयमपि व्याख्याति

तः
तेजोतस्तथा ह्याह ॥ छांदोग्ये सन्मूलत्वं तेजसः श्रावितं तैत्तिरीयके वायुमूलत्वं तत्र तेजोयोनिं प्रति श्रुति विप्रति
पत्तौ सत्यां प्राप्तं तावद्ब्रह्मयोनि तेज इति कुतः सदेव सोम्येत्युपक्रम्य तत्तेजोऽसृजतेत्युपदेशात् सर्वविज्ञानप्रतिज्ञाया
श्च ब्रह्मप्रभवत्वे सर्वस्य संभवात् तज्जलानिति चाविशेषश्रुतेः एतस्माज्जायते प्राण इति चोपक्रम्य श्रुत्यंतरे सर्व
स्याविशेषेण ब्रह्मजत्वोपदेशात् तैत्तिरीयके च तत्तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंचेत्यविशेषश्रवणात् तस्मा
द्वायोरग्निरिति क्रमोपदेशो द्रष्टव्यः वायोरनंतरमग्निः संभूत इति एवं प्राप्त उच्यते तेजोऽतो मातरिश्वनो जायते
हितेः
इति कस्मात् तथा ह्याह वायोरग्निरिति अव्यवहिते तेजसो ब्रह्मजत्वे सत्यसति वायुजत्वे वायोरग्निरितीय श्रुतिः
कदर्थितास्यात् ननु क्रमार्थैषा भविष्यतीत्युक्तं नेति ब्रूमः तस्माद्वा एतस्मादात्मन आकाशः संभूत इति परस्मात्सं
भवत्युपादानस्यात्मनः पंचमीनिर्देशात् तेष्वेव संभवतेरिहाधिकारात्परस्तादपि तदधिकारे पृथिव्या औषधय
इत्युपादानपंचमीदर्शनात् वायोरग्निरित्युपादानपंचम्येवेति गम्यते

द्धांतापेक्षया पूर्वपक्षत्वेन व्यवह्रियते सिद्धांतयति एवं प्राप्त इति कदर्थिता बाधिता पंचमीति यावत् वायोस्तेजःप्रकृतित्वं
पंचमीश्रुत्या निर्धारितं न च कल्पितस्योपादानत्वासंभवः अधिष्ठानत्वासंभवेपि रज्ज्वादाविव परिणामित्वसंभवात्तत्तत्त्वब्र
ह्मणः छांदोग्ये तु सृष्टत्वमात्रश्रुतेर्नोपादानत्वं न च बहु स्यामिति कार्याभेदलक्षणलिंगादुपादानत्वसिद्धिः लिंगाच्छ्रुतेर्बली
यस्त्वेन लिंगस्यान्यपरत्वान्नयनेत्येवं वायोर्ब्रह्मानन्यत्वाद्वायुजस्यापि तेजसो ब्रह्मप्रकृतिकत्वमविरुद्धमिति सिद्धांतग्रंथा
र्थः इहाधिकारादिति वायोरग्निः संभूत इति वाक्ये तेवं धादित्यर्थः तदधिकारे संभूत्यधिकारे ॥ ॥

विभक्त्यपेक्षा२१ मि२

पा.त.
द्वि.स्त.
६१

निरपेक्षकारकविभक्तेः उपपदसापेक्षाया अबलत्वादुत्तरक्रमार्था पंचमीत्याह अपि चेति ऊर्ध्वमनन्तरमिति वोपपदं विना पंचमीमात्राद-
मानमातीतिकल्प्यः उपपदार्थप्रयोगः प्रकृत्यात्वपादानकारकं तु निरपेक्षं पंचम्याभाति विशेषतोऽत्र प्रकरणाद् अपादानार्थत्वं पं-
चम्याः क्रममात्रेण च कल्प्यमाने विरोधे बाध्यमिति स्थितिरित्यर्थः पारंपर्यजत्वमेवाह यद्यपीति तस्या धेनोः स्तनं तु क्षीरं साक्षा-
त्कार्यं दध्यादिकं पारंपर्यजमित्यर्थः दधि संहत एक कठिनत्वं क्षीरमात्राद्व्यस्यणोवायुभावमानमाह दर्शयति चेति पारंपर्यजस्यापि ते-
जस्त्वव्यपदेशोऽस्तीत्याह तथा चेति अन्तःकरणादिभोज्यमानबुद्ध्यादीनामत एवान्यवधारणांकप्यमित्यापेक्षाह यद्यपीत्यादिना ।

न२

अपि च वायोरूर्ध्वमग्निः संभवत इति कल्प्य उपपदार्थयोगः क्रमलक्षकारकार्थयोगः वायोरग्निः संभवत इति तस्मादेवाक्र-
तिर्वायुयोनित्वं तेजसो गमयति न त्वितरापि श्रुतिर्ब्रह्मयोनित्वं तेजसो गमयेत् तत्तेजोऽसृजतेति तस्याः पारंपर्यज-
त्वेऽप्यविरोधात् यदापि ह्याकाशं वायुं च सृष्ट्वा वायुभावापन्नं ब्रह्म तेजोऽसृजतेति कल्प्यते तदापि ब्रह्मजत्वं तेजसो न विरु-
पयः४ ध्यते यथा तस्याः शृतं तस्या दधि तस्या आमिक्षेत्यादि दर्शयति च ब्रह्मणो विकारात्मनावस्थानं तदात्मानं स्वयमकु-
रुतेति तथा च स्मरणं भवति बुद्धिर्ज्ञानमसंमोह इत्याद्युक्त्वा भवन्ति भावा भूतानां मत्त एव पृथग्विधा इति य-
द्यपि बुद्ध्यादयः स्वकारणेभ्यः प्रभवन्तो दृश्यन्ते तथापि सर्वस्य भावजातस्य साक्षात्प्रणाड्या वा ईश्वरवंशत्वात् प-
त्तेनाक्रमवत्सृष्टिवादिन्यः अन्तयोर्व्याख्याताः तासां सर्वेषामुपपत्तेः क्रमवत्सृष्टिवादिनीनां त्वन्यथानुप-
पत्तेः प्रतिज्ञापि सद्भूतमात्रमपेक्षते तेनाव्यवहितजन्यत्वमित्यविरोधः आपः १० अतस्तथा ह्याह तमन्व-
वर्तते आपो तेजसो जायते कस्मात् तथा ह्याह तदपोऽसृजतेत्यग्नेरापः इति च ॥

तज्ज्ञता

सृता आपरंपरया ईश्वरवंशत्वात्परमकारणात्तस्यानिरासार्थमवधारणं युक्तमिति शेषः एतत्पदार्थमाह तासामिति तज्ज-
लानित्यादिश्रुतीनां साक्षात्प्रणाड्या वा ब्रह्मजत्वमात्रेणोपपत्तेरित्यर्थः अक्रमश्रुतीनां बलवत्क्रमश्रुत्यनुसारेणैकवाक्य-
त्वाद्वियदादियुद्धाराते जः करणं ब्रह्मणः समन्वय इति सिद्धं आपः ११ अतिदेशायतयासर्वणमुद्दकग्रंथ एतस्माज्जायते प्राणो
मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीति मंत्रे अपां ब्रह्मजत्वश्रुतेरग्नेरापइतिश्रुत्या तस्य वि-
रोधोऽस्ति न वेति संदेहे तुल्यत्वादस्ति विरोध इति पूर्वपक्षे अपामग्निदाह्यत्वेन विरोधादग्निजत्वासंभवात्क्रमार्था पंचमी
ति विरोध इत्यधिकापोकायामत्तेजोन्यायमतिदिशव्याचष्टे अत इति ॥ रामायनमः ॥ ॥

श्रुत्यन्तविरोधे कथमन्निजन्यनिर्णय इत्यत आह सन्निवचन इति त्रिवृत्करणयोरप्तेजसोर्विरोधे प्यग्नेरापइतिवचनादन्नींद्रियोनी
स्ति विरोध इति निर्णीयत इत्यर्थः न केवलं श्रुत्यविरोधतानायमतिदेशः किंतु पंचमहाभूतोत्पत्तिक्रमनिर्णयार्थं चेत्याह
तेजस्त्विति तस्मात्तेजोभावापन्नं ब्रह्मणि समन्वय इति सिद्धं पृथिवीति विषयमुक्त्वा शब्दमहाभूतप्रकरणाभ्यां संशयमाह
ता इति अभ्यवहार्यभक्ष्य अत्र अतोयत्नमोदनादिकं [illegible] तदा अन्नः पृथिवीति श्रुत्याविरोधः यदि पृथिवी तदा न विरोध इ
ति फलबोध्य अपृथिव्योः कार्यकारणभावादधिकरणसंगतिः अत्र अन्निविषभिवन्त्वलिंगाभ्यां पूर्वपक्षः तदेव तत्रैवेति श्रु

तिवचनेनानासिंसणायः तेजसस्त्वसृष्टिं व्याख्याय पृथिव्यां व्याख्यातव्यायांतरीयमित्याप इति सूत्रयांबभूव पृथिव्य
धिकाररूपशब्दांतरेभ्यः ११ ता आप ऐक्षंत बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजंतेति श्रूयते तत्र संशयः कि
मनेनान्नशब्देन व्रीहियवाद्यभ्यवहार्यमोदनाद्युच्यते किं पृथिवीति तत्र प्राप्तं तावद्व्रीहियवाद्योदनादि वा परिगृह्य
तव्यमिति तत्र ह्यन्नशब्दः प्रसिद्धो लोके वाक्यशेषोप्येतमर्थमुपोद्बलयति तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं
भवतीति व्रीहियवाद्येव हि सति वर्षणे बहु भवति न पृथिवीति एवं प्राप्ते ब्रूमः पृथिव्येवेयमन्नशब्देनाद्
भ्यो जायमाना विवक्ष्यत इति कस्मात् अधिकाराद्रूपाच्छब्दांतराच्च अधिकारस्तावत्तत्तेजोसृजत तदपोसृजते
ति च महाभूतविषयो वर्तते तत्र क्रमप्राप्तां पृथिवीं महाभूतं विलंघ्य नाकस्माद्व्रीह्यादिपरिग्रहो न्याय्यः तथा
रूपमपि वाक्यशेषे पृथिव्यनुगुणं दृश्यते यत्कृष्णं तदन्नस्येति न ह्योदनादेरभ्यवहार्यस्य कृष्णत्वनियमोस्ति
पयःपांडुरस्यांगारलोहितस्य च क्षेत्रस्य दर्शनात् नायं दोषो बाहुल्यापेक्षत्वात् भूयिष्ठं हि पृथिव्याः कृष्णं रूपं
न तथा श्वेतलोहिते पौराणिका अपि पृथिवीच्छायां शार्वरीमुपदिशंति सा च कृष्णाभासेत्यतः कृष्णं रूपं
पृथिव्या इति श्लिष्यते श्रुत्यंतरमपि समानाधिकारमद्भ्यः पृथिवीति भवति तद्यदपां शर आसीत् तत्समह
न्यत सा पृथिव्यभवदिति च

नापि व्रीह्यादीनां ननु पृथिव्या अपि नैव कृष्णत्वनियमोस्ति ५५

त्यर्थः तथाच [illegible] पृथिवीत्वतोन्नमिति विरोधात्रैकवाक्यतेति प्राप्ते सिद्धांतयति एवं प्राप्त इति अधि
कारः प्रकरणं रूपं लिंगं पयः क्षीरं तद्वत्पांडुरश्वेतमंगारवल्लोहितं रक्तं शब्दांतरं व्याचष्टे श्रुत्यंतरमपी
ति अद्भ्यनंतरं पृथिव्याः स्थाने अन्नं त्वं तरतिष्ठते नाप्यन्नस्य पृथिवीत्वमित्यर्थः तत तत्र सृष्टिकाले यदपां शरः योमं
इव घनीभाव आसीत्तदेव समहन्यत कठिनसंघातो भूत्वा अपां कठिनपरिणतिः पृथिवी भवदित्यर्थः

शा॰ त॰
द्वि॰ २॰
६२

व्रीह्याद्यन्नसर्गः कस्मिन्स्यादिति विवक्षायामाह पृथिव्यास्त्विति पंचमीयं ब्रह्मभवत्वलिंगसहितान्नश्रुतेः कथं प्रकरणलिंगस्या
नेवाधकत्वाशंक्याह वाक्यशेषोपीति प्रबलदुर्बलप्रमाणसन्निपाते बहूनां दुर्बलानामत्यंतबाधाद्वरं प्रबलप्रमाणस्याल्पबा
धेन कथंचिन्नयनमिति न्यायेन श्रुतिलिंगयोरन्नमात्रनिष्ठत्वबाधित्वादन्नात्मकपृथिवीनिष्ठत्वं नीयते ताभ्यामन्नमात्रग्रहे प्र
करणादीनां पृथिवीमात्रविषयाणामत्यंतबाधापत्तेरिति भावः अन्नस्य व्रीहिजत्वान्निर्द्वारा पृथिव्याश्च जन्यत्वं लक्ष्यते पृथि
व्या एव पृथिवीत्वादन्नवदित्यनुमानादिसन्नतात्पर्यः एवं तित्तिरिश्रुत्यनुसारेण छान्दोग्यश्रुतेर्नयनाद्विरहो भूतसृष्टिश्रुतीना
ब्रह्मणि समन्वय इति सिद्धं संप्रति तानि भूतान्याश्रिताश्रयाश्रयिभावं गतानि तेषां स्वातन्त्र्यमाशंक्य निषेधति तदभिध्याना
दिति ३ भूतानामाश्रितत्वसंशये पूर्वपक्षं दर्शयति किमिमानीत्यादिना तेषां यवबीजांकुरो सर्वोत्तरपत्रयुक्तो यो बीजमिति तेषां
नन्वभूतानां किं स्वातंत्र्येणोपादानमाशंक्यते कर्तृत्ववानायः रचनानुपपत्तेरित्यादिन्यायविरोधादिति शंकते नन्विति न

तल्लिंगात्सः २ नो ।

पृथिव्यास्त्वव्रीह्यादेरुत्पत्तिं दर्शयति पृथिव्या ओषधयः ओषधीभ्योऽन्नमिति च एवमधिकारादिषु पृथिव्याः प्रति
पादकेषु सत्सु कुतो व्रीह्यादिप्रतिपत्तिः प्रसिद्धिरप्यधिकारादिभिरेव बाध्यते वाक्यशेषोऽपि पार्थिवत्वादन्नाद्यस्य तद्
द्वारेण पृथिव्या एवान्नः प्रभवत्वं सूचयतीति द्रष्टव्यं तस्मात्पृथिवीयमन्नशब्देति तदभिध्यानादेव तु तल्लिंगात्सः
१२ किमिमानि वियदादीनि भूतानि स्वयमेव स्वविकारान्सृजन्त्याहोस्वित्परमेश्वर एव तेन तेनात्मनावतिष्ठमानो
ऽभिध्यायंस्तं तं विकारं सृजतीति संदेहे सति प्राप्तं तावत्स्वयमेव सृजन्तीति कुतः आकाशाद्वायुर्वायोरग्निरित्यादि
स्वातंत्र्यश्रवणादिति ननु चेतनानां स्वतंत्राणां प्रवृत्तिः प्रतिषिद्धा नैष दोषः तेजोवत्तन्नापऐक्षतेति च भूता
नामपि चेतनत्वश्रवणादिति एवं प्राप्तेऽभिधीयते स एव परमेश्वरः तेन तेनात्मनावतिष्ठमानोऽभिध्यायंस्तं तं विका

नो । ना २ नि २

द्वितीयः अचेतनत्वादिति भावः यथा मनुष्यादिशब्दैस्तत्तद्देहाभिमानिनो जीवा उच्यन्ते तथाकाशाद्वायुरित्यादिश्रुतावाकाशादि
शब्दैस्तत्तद्भूताभिमानिदेवता उच्यन्ते तासां स्वकार्ये वाय्वादौ कर्तृत्वसंभवान्निरपेक्षं मितं तत्त्वं पंचम्यर्थः एवं तदात्मानं स्वयमकुरुते
ति श्रुतौ स्वयमिति विशेषणाद्ब्रह्मणोऽन्यानपेक्षं सर्वकर्तृत्वसंभवान्निरपेक्षनिमित्तत्वं न पाचमियो निरपेक्षेश्वरभूतकर्तृश्रुत्योर्वि
रोधात्तद्ब्रह्मणि समन्वय इति सफलं पूर्वपक्षमाह नेष इति भूतानां तदभिमानिदेवतानामित्यर्थः यथाकाशादिभावं प्राप्तं ब्रह्म
णः सर्वोपादानत्वं तथा तदभिमानिदेवताजीवभावमापन्नब्रह्मणः कर्तृत्वमिति परंपरयाऽऽईश्वरकर्तृत्वश्रुत्यविरोधः स्वयमि
ति विशेषणं ईश्वरान्तरनिरासार्थं न जीवभावापन्नानिरासार्थमित्येकदेशिसिद्धान्तदूहनीयः स्वव्यासिद्धान्तमाह एवं प्राप्त इति ॥

२१

आकाशादिशब्दैर्न देवतालक्षणा नरवाच्यार्थबाधकाभावात् अचेतनस्य प्रकृतित्वायोगात् तत्र रूढत्वात् तथा चाचेतनानां कर्तृत्वमेव नास्ति कुतः ईश्वरानपेक्षकर्तृत्वं यद्यपि देवतानां कर्तृत्वं संभवति तथापि ईश्वरानियम्यत्वश्रवणाच्चेतनानामपि नस्यात् अतः किमवाच्य मचेतनानां भूतानां न स्यात् अस्मिति मत्वाह तल्लिङ्गादिति तत्तद्वचेतनात्मना अवस्थितस्य ब्रह्मणः पादानत्वेऽपि जीवव्याप्तत्वमीश्वरत्वात् कारणवतात्मत्वे कर्तृत्वं न जीवत्वद्वारा तस्य सर्वनियन्तृत्वलिङ्गादित्यर्थः प्रकरणाच्च साक्षात्सर्वकर्तृत्वमित्याह तथेति पृ थिव्याः अन्तरो यमयतीति पृथिव्यादिभावेनावस्थानात् तद्गुणात् तेभ्यो ईक्षणश्रवणेनावतानां चेतनत्व स्यात् अत्र अवस्थः अनेन तदभिधानादिति पदं व्याख्यातमित्यस्य योजना सर्वेश्वरस्य तदात्मनावस्थितोऽपि सा च्चादेव सर्वकर्तृत्व स्यात् यामित्वलिङ्गाज्जीवत्वद्वारा कर्तृत्वनाम जीवस्यैव कर्तृत्वमित्यन्तर्यामिणः कर्तृत्वात् द्वितीयमित्वायोगात् तदभिधानादि

तल्लिङ्गं तथा हि शास्त्रं यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयती त्येवं जातीयकं साध्यत्वाणामेव भूतानां प्रवृत्तिं दर्शयति तथा सोऽकामयत बहु स्यां प्रजायेयेति सत्यं च अनृतं च सत्यमभवत् तदात्मानं स्वयमकुरुतेत्येवं च तत्सैवं च सर्वात्मभावं दर्शयति पृथिव्यादिश्रवणमप्यसोऽपरमेश्वराद्वेव पादावधारणादेव द्रष्ट व्यं नान्योऽतोऽस्ति द्रष्टेति नेति नेतरप्रतिषेधात् प्रकृततत्त्वात् तदिति तदेव तत्र बहु स्यां प्रजायेयेत्यत्र विपर्ययेण तु क्रमोऽत उ पपद्यते च २३ भूतानां नानुत्पत्तिक्रमश्चिन्तितो येदानीमप्ययक्रमश्चिन्त्यते किमनियतेन क्रमेणाप्ययः उत्पत्तिक्रमेण एवात तद्विपरीतेनेति त्रयोऽपि ह्युत्पत्तिस्थितिप्रलया भूतानां ब्रह्मायत्ताः श्रूयन्ते यतो वा इमानि भूतानि जायन्ते येन जा तानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीति तत्रानियमो विशेषाभावादिति प्राप्ते अथ वोत्पत्तेः क्रमस्य श्रुतत्वात् प्रलयस्यापि

क्रमाकांक्षिणः स एव क्रमः स्यादिति एवं प्राप्ते

ब्रूते तस्माद्देवभूतेभ्य श्रुतेस्तत्र पतेश्च इति तेजस्तत्रेति तेजः इति परमात्मैवेत्यत्र अन्तरा प्रकरणं त्वाह नान्य इति तस्मा दीश्वरपदादर्थलोपप्रसङ्गे नेश्वरव्दन्यस्य स्यात्तेजआद्यभावात् ईश्वरकर्तृत्वस्य तेभ्योऽनुत्पत्त्यादिविरोधः इति सिद्धं विपर्ययेणेति यद्यप्यत्र श्रुतिविरोधानपरिहृतिः तत्र इति संगतिस्तथाप्युत्पत्तिक्रमेनियतो लयक्रमो वा बुद्धिस्थो विचार्यते इति प्रासङ्गिकी अवधावपादानान्तरसं गतोऽनुमत्याह भूतानामिति अत्रोत्पत्तिक्रमाद्विपरीतक्रमनिर्णयात् सिद्धान्ते भूतानां प्रातिलोम्येन लयाध्यानपूर्वकं प्रत्यग्ब्रह्म णि मनःसमाधानं फलं पूर्वपक्षे तु कारणनाशे सति कार्यनाशाद्ब्रुतिसबलयाधारब्रह्मास्ति हेतुकसमाधिसिद्धिरिति भेदः स तिमहाभूतानां लयक्रमचिन्तासमय एवनास्तीति केचित्तन्नेत्याह त्रयोऽपीति अत्रेयमस्य नास्या यान्तः श्रीतस्य प्रलयस्य क्रमाकां

त्तिकारणे कार्यं न पश्यामो हि लोके दृश्यते तथा च श्रोतोऽप्युत्पत्तिक्रमो लयेन गृह्यते किंतु लौकिकक्रम एव गृह्यते अत एव लोके दृश्यदा
र्यवो धाधीनत्वेन श्रोतादृपि लौकिकस्यान्तरं गत्वा योग्यत्वाच्च कारणमेव हि कार्यस्य स्वरूपमिति तेन दन्तस्यत्वन्यायेन स्थापितं नहि स्वरूप
नाशे कार्यस्य क्षणमपि स्थितिर्युक्ता तस्माद् योग्य उत्पत्तिक्रमो लयस्य न ग्राह्यः लौकिकक्रमविरोधेन निराकांक्षत्वादिति सिद्धांत
यति ततो ब्रूमः इत्यादिना क्रमेण परंपरया सर्वकार्यलयाधारत्वं ब्रह्मणः किमित्याश्रीयते साक्षादेव तत्किं न स्यादित्यत आह
नहीति घटनाशे मृदनुपलब्धिप्रसंगादित्यर्थः वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते इति स्मृतिशेषः आदिपदार्थः योः

ततो ब्रूमः विपर्ययेण तु लयक्रमोऽत उत्पत्तिक्रमाद्विरुद्धो भवितुमर्हति तथा हि लोके दृश्यते येन क्रमेण सोपानमारूढः
स्ततो विपरीतक्रमेणावरोहतीति अपि च दृश्यते मृदो जातं घटशरावाद्युप्ययकाले मृद्भावमप्येति अद्भ्यश्च जा
तं हिमकरकाद्यब्भावमप्येतीति अतश्चोपपद्यत एतद्यत्पृथिव्यद्भ्यो जाता सती स्थितिकालव्यतिक्रान्तावपो पी
यादपश्च तेजसो जाताः सत्यस्तेजोऽपीयुः एवं क्रमेण सूक्ष्मं सूक्ष्मतरं चानन्तरं कारणमपीत्य सर्वं कार्यजातं
परमकारणं परमसूक्ष्मं च ब्रह्माप्येतीति वेदितव्यं नहि स्वकारणव्यतिक्रमेण कारणकारणे कार्याप्ययो न्याय्यः
 स्मृतावप्युत्पत्तिक्रमविपर्ययेणैवाप्ययक्रमस्तत्र तत्र दर्शितो जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ज्योतिष्या
पः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते इत्येवमादौ उत्पत्तिक्रमस्तूत्पत्तावेव श्रुतत्वात् नाप्ययेभवितुमर्हतीति न चासा
 वयोग्यत्वादप्ययेनाकाङ्क्ष्यते नहि कार्ये ध्रियमाणे कारणस्याप्ययो युक्तः कारणाप्यये कार्यस्यावस्थानानुपपत्तेः का
र्याप्यये तु कारणस्यावस्थानं युक्तं मृदादिष्वेवं दृष्टत्वात् अंतरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशे
षात् १५ भूतानामुत्पत्तिप्रलयावनुलोमप्रतिलोमक्रमाभ्यां भवत इत्युक्तमात्मादिरुत्पत्तिः प्रलयश्चात्मान्त इत्यु
क्तं सेन्द्रियस्य तु मनसो बुद्धेश्च सद्भावः प्रसिद्धः श्रुतिस्मृत्योः बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च इन्द्रियाणि हयानाहु
रित्यादिलिंगेभ्यः तयोरपि कस्मिंश्चिदन्तराले क्रमेणोत्पत्तिप्रलयावुपसंग्राह्यौ सर्वस्य वस्तुजातस्य ब्रह्मज

त्वाधीनत्वेऽपि अध्यायादयोग्यक्रमबाध इति सिद्धं अंतरा विशेषात् उत्क्रमो तोत्पत्तिलयक्रमस्यापजीव्यस्य किंकर
णोत्पत्तिक्रमेण विरुध्यते नवेति करणानाम भौतिकत्वभौतिकत्वाभ्यां संदेहे हि तान्नवाद पूर्वपक्षमाह भूतानामित्या
 दिना करणान्येवं नतंतीति विवदंते प्रत्याह सेन्द्रियस्येति मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः श्रोत्रादीनीन्द्रिया
एयन्य श्रुतिस्मृतिदृष्ट्वा अन्यपराः शाब्दाःलिंगानीत्युच्यन्ते करणानां क्रमाकांक्षामाह तयोरिति॥ राम ॥

क्रमेण २

आकाशाद्वायुरिति सिद्धः क्रमो ग्राह्य इत्याह अपि चेति विज्ञायते अनेनेति विज्ञानमिन्द्रियाणि बुद्धिः आत्मनो भूतानां चान्तराले मध्ये तल्लिङ्गात् सृष्टि-
वाक्यादेतस्माज्जायते प्राणो मन इत्यादिरूपाद्धि ज्ञानमनसी अनुक्रमेण ते तथा च करणोत्पत्त्या क्रमभङ्ग इति शङ्कार्थः न च करणानां
भौतिकत्वाद्भूतानन्तर्यमिति वाच्यं तेषां भौतिकत्वे मानाभावात् तथा चात्मनः प्रथममाकाशस्य जन्म पश्चाद्धीयोरित्युपक्रमः स्यात् म-
नः करणानि ततो भूतानीति क्रमेण विरोध इति तन्निर्णयपूर्वणास्य त्योर्विरोधात् ब्रह्मणि समन्वय इति एवं पक्षफले सिद्धान्तयति
नेति आत्मन आकाश इत्यादिनिर्दिष्टे तित्तिरिश्रुतौ पंचम्याः कार्यकारणभावेनार्थतः क्रमो भाति न तस्य पूर्वपाठेन बाधः अर्थक्र-
मविरोधिक्रमविशेषस्य बाधकत्वायोगात् अतः अर्थक्रमाविरोधेन पाठद्वयं नेयं त्वाद्भूतानन्तर्यं करणानामित्यर्थः किं-
च भौतिकत्वात् तेषां तदानन्तर्यमित्याह यदीति न च प्राणस्याविकारत्वायोगादन्नमयमित्यादिमयटो न विकारार्थतेति वाच्यं करणा

श्रुतेः पाठक्रमस्यार्थक्रमधीविरोधस्य २५

अपि चाथर्वणोदत्पत्तिप्रकरणे भूतानामात्मनश्चान्तराले करणान्यनुक्रम्यन्ते एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीति तस्मात्सर्वोत्पत्तिक्रमलयक्रमभंगप्रसंगो भूतानामिति चेन्न अवि-
शेषात् यदि तावद्भौतिकानि करणानि ततो भूतोत्पत्तिप्रलयाभ्यामेवैषामुत्पत्तिप्रलयौ भवत इति नैतयोः क्र-
मान्तरं मृग्यं भवति च भौतिकत्वे लिंगं करणानामन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागित्येवंजातीय-
कं व्यपदेशोऽपि क्वचिद्भूतानां करणानां च ब्राह्मणपरिव्राजकन्यायेन नेतव्यः अथ त्वभौतिकानि करणानि तथापि भूतो-
त्पत्तिक्रमो न करणैर्विशेष्यते प्रथमं करणान्युत्पद्यन्ते चरमं भूतानि प्रथमं वा भूतानि उत्पद्यन्ते चरमं करणानीति अथ-
र्वणे तु समाम्नायक्रममात्रं करणानां च न तत्रोत्पत्तिक्रम उच्यते ॥

क्रो २ म ४ भूतानां १ शे ३ य ४ त ४

नाविभक्तत्वेन कार्यतया कारणकांक्षायामन्नमयमित्यादिश्रुतेराकांक्षितो मयडर्थस्तत्र निर्बाधकमयटो विकारार्थता याप्र-
तत्वात् प्राचुर्यार्थत्वेन नाकांक्षितो क्लिष्टप्रसंगाच्छ्रुतेव तेजोऽबन्नप्राशने वाक्प्राणमनसां वृद्धिस्तदभावे तन्नाश इति विकारत्वस्य
दर्शितत्वान्न विवादावरः यद्वा स्थूलभूताधीनानां तेषां वृद्धिविकासमयडर्थः श्रूयमाणभौतिकत्वे लिंगं प्राणेन्द्रियमनो-
स्य भौतिकानि भूताधीनवृद्धिमत्त्वाद्देहवदिति भावः ननु तेषां भौतिकत्वे कथमथर्वणे पृथक्करणजन्मकथनं भूतजन्मनैव त-
ज्जन्मसिद्धेरित्यत आह व्यपदेशोऽपीति प्रौढवादेन तेषामभौतिकत्वमपेत्यापि श्रुत्यविरोधमाह अथ त्विति करणानां
पूर्वापरत्वे मानाभावान्नोक्तक्रमभंगः न चाथर्वणवाक्यं मानं पाठमात्रत्वादित्यर्थः ॥ ॥

वदिति २ भूतानां च १९

ननु लिंगदेहस्य मनोघटितत्वात् प्रजापतेश्च लिंगसमष्टिरूपत्वात्कथं प्रजापतिसृष्ट्यनंतरं मनः सृष्टिरिति विचारणीयं ॥१॥

म्रियते

तोय

शा.ब्र.
द्वि.३
६४

तर्हि कथं क्रमनिर्णय इत्याह तथेति इदं स्थूलं उच्यते प्राक् प्रजापतिः स आत्मासीत् अत्र सत्त्वप्रधानात्मकप्रजापतिसर्गः प्रथमः ततो मनआदिसर्ग इति क्रमो भातीति भावः एवं चभूतकरणोत्पत्तिक्रमस्याविरोधात् ब्रह्मणि समन्वयसिद्धिरिति सिद्धांतफलं गमयति तस्मादिति चराचरभाविन्वात् एवं तावत्तत्त्वद्वाच्यकारणनिर्णयाय भूतश्रुतीनां विरोधो निरस्तः इदानीमा पादसमाप्तेस्तत्पदार्थस्य जीवस्य श्रुतीनां विरोधो निरस्यते इह जीवो न जायते इत्यादि श्रुतेः जातेष्टिश्राद्धशास्त्रेण विरोधोस्ति न वेति संदेहे विरोधोस्तीति प्राप्ते लौकिकजन्मादिव्यपदेशात् जातेष्टिश्राद्धशास्त्रेण जीवाजत्वादिश्रुतिबाध इति पूर्वपक्षयति तत्र इति तथा च

जीवो
जीव

तथा तत्रापि एष पृथगेव भूतक्रमोत्करणक्रमस्याम्नायते प्रजापतिर्वा इदमग्र आसीत् स आत्मनि मेत्तन्मनोसृजत तन्मन एवासीत् तदात्मानमैक्षत तद्वाचमसृजतेत्यादिना तस्मान्नास्ति भूतोत्पत्तिक्रमस्य भंगः चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् १५ स्तो जीवस्याप्युत्पत्तिप्रलयौ जातो देवदत्तो देवदत्त इत्येवं जातीयकाल्लौ मृतो ३

१४ किकव्यपदेशाज्जातकर्मादिसंस्कारविधानाच्चेति स्यात्कस्यचिद्भ्रांतिः तामपनुदामः न जीवस्योत्पत्तिः प्रलयौ वा स्तः शास्त्रफलसंबंधोपपत्तेः शरीरानुविनाशिनि हि जीवे शरीरांतरगतेष्टानिष्टप्राप्तिपरिहारार्थौ विधिप्रतिषेधावनर्थकौ स्यातां श्रूयते च जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति ननु लौकिको जन्ममरणव्यपदेशो जीवस्य दर्शितः सत्यं दर्शितो भाक्तस्त्वेष जीवस्य जन्ममरणव्यपदेशः किमाश्रयः पुनरयं मुख्य इत्यपेक्षया भाक्त इति उच्यते च

१२ राचरव्यपाश्रयः स्थावरजंगमशरीरविषयौ जन्ममरणशब्दौ स्थावरजंगमानि हि भूतानि जायंते च म्रियंते च तद्विषयौ जन्ममरणशब्दौ मुख्यौ संतौ तत्स्थे जीवात्मन्युपचर्येते तद्भावभावित्वात् शरीरप्रादुर्भावतिरोभावयोर्हि सतोर्जन्ममरणशब्दौ भवतः नासतोः न हि शरीरसंबंधादन्यत्र जीवो जातो मृतो वा केनचिल्लक्ष्यते स वा अयं पुरुषो जायमानः

रणोत्पत्तिक्रमेणाभूतक्रमस्य बाधाभावेपि जीवोत्पत्तिक्रमेण बाधः स्यादिति प्रत्युदाहरणसंगतिः एवं पक्षे जीवब्रह्मैक्यासिद्धिः सिद्धांते तत्सिद्धिरिति भेदः चेतनजन्माद्युद्देशेन चेतनस्य जातस्य जन्मांतरीयफलसाधनं ज्ञातकर्मादि संस्कारो विधीयते तत्प्रत्युद्देश्यविधेयप्रयोर्मिथो विरोधे सति विधेयाविरोधेनोद्देश्यं नेयमिति न्यायाज्जन्मादिकं देहोपाधिकं न स्वत इति सिद्धांतयति नामेत्यादिना जीवापेतं जीवेन त्यक्तमिदं शरीरं जन्मादिव्यपदेशश्चराचरदेहविषयो मुख्यः जीवे तु भाक्तो गौणः औपाधिकजन्मादिविषयः साऽऽपाधिजन्मभावेभावादतत्भावादिति सूत्रार्थः जीवस्यौपाधिजन्ममरणयोः श्रुतिमप्याह

न्यायनिर्णय

६४

जायमानपदार्थमाह शरीरमिति म्रियमाणत्वं व्याचष्टे उत्क्रामन्निति ननु तर्हि जीवस्य जन्मादि निरस्यते अत्रापि तन्निरासे पुनरुक्तिरित्या
शंक्याह जीवस्येति तदेवं जातेष्ट्यादिशास्त्रस्यौपाधिकजन्मादिविषयत्वान्न जीवानामयत्नेन तत्त्वश्रुतिविरोध इति सिद्धं नात्मा ऽश्रुतेः। अग्नेः
विस्फुलिंगवदेतस्मात्परमात्मनः सर्वे जीवात्मनो व्युच्चरंतीत्यादि जीवोत्पत्तिश्रुतीनां स एष इह प्रविष्ट आनखाग्रेभ्यः अजो ह्यात्मेत्या
द्यनुत्पत्तिश्रुतीनां च मिथो विरोधात्संशये मा भूत् देहजन्मनाशयोर्जीवजन्मनाशौ देहांतरभोगपरलोकादिहेतुविधानासंभवात्

शरीरमभिसंपद्यमानः स उत्क्रामन्म्रियमाण इति च शरीरसंयोगनिमित्तावेव जन्ममरणशब्दौ दर्शयति जातकर्मादिवि
धानमपि देहप्रादुर्भावापेक्षमेव द्रष्टव्यमभावाज्जीवप्रादुर्भावस्य जीवस्य परस्मादात्मन उत्पत्तिर्वियदादीनामिवास्ति ना
स्तीत्येतदुत्तरेण वक्ष्यति देहाश्रयौ तावज्जीवस्य स्थूलावुत्पत्तिप्रलयौ न स्तः इत्येतदनेन सूत्रेणावाचत नात्मा ऽश्रुतेर्नित्य
त्वाच्च ताभ्यः १८ अस्त्यात्मा जीवाख्यः शरीरेंद्रियपंजराध्यक्षः कर्मफलसंबंधी स किं व्योमादिवदुत्पद्यते ब्रह्मण आहोस्वि
द्ब्रह्मवदेव नोत्पद्यत इति श्रुतिविप्रतिपत्तेर्विशयः कासुचिच्छ्रुतिष्वग्निविस्फुलिंगादिनिदर्शनैर्जीवात्मनः परस्माद्ब्रह्मण उत्प
त्तिराम्नायते कासुचित्त्वविकृतस्यैव परस्य ब्रह्मणः कार्यप्रवेशेन जीवभावो विज्ञायते न चोत्पत्तिराम्नायत इति तत्र प्रा
प्तं तावदुत्पद्यते जीव इति कुतः प्रतिज्ञानुपरोधादेव एकस्मिन्विदिते सर्वमिदं विदितमितीयं प्रतिज्ञा सर्वस्य वस्तुजातस्य ब्रह्मप्र
भवत्वे जीवस्य प्रतिज्ञेयमुपरुध्येत न चाविकृतः परमात्मैव जीव इति शक्यते वक्तुं लक्षणभेदात् अपहतपाप्मत्वादि
धर्मको हि परमात्मा तद्विपरीतो हि जीवः विभागाच्चास्य विकारत्वसिद्धिः यावान्साकाशादिः प्रविभक्तः स सर्वो विकारः तस्य चाका
शादेरुत्पत्तिरधिगता जीवात्मापि पुण्यापुण्यकर्मा सुखदुःखयुक् प्रतिशरीरं प्रविभक्त इति तस्यापि प्रपंचोत्पत्त्यवसरे
उत्पत्तिर्भवितुमर्हति अपि च यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्राणा इति प्राणादेर्भोग्यजात
स्य सृष्टिं शिष्ट्वा सर्व एत आत्मानो व्युच्चरंतीति भोक्तॄणामात्मनां पृथक्सृष्टिं शास्ति यथा सुदीप्तात्पावकाद्विस्फुलिंगाः
सहस्रशः प्रभवंते सरूपाः तथाक्षराद्विविधाः सोम्य भावाः प्रजायंते तत्र चैवापियंतीति च जीवात्मनामुत्पत्तिप्रलयावुच्येते

त्वापत्तयोर्नभस इव जीवस्यातो किं न स्यात् ततो भवादिति प्रत्युदाहरणेन पूर्वपक्षमाह तत्र प्राप्तं तावदिति फलं पूर्ववत् उपरोधो
बाधः ननु विकृतं ब्रह्मैवात्र प्रविष्टं जीवो न तत्त्वांतरमिति प्रतिज्ञासिद्धिरित्यत्राह न चेति जीवः परस्माद्भिन्नः स्याद्विकारत्वे प्रतिज्ञा
बाध इति तर्कोपेतविभक्तत्वलिंगानुगृहीतोत्पत्तिश्रुतेर्बलीयस्त्वात्प्रवेशश्रुतिर्जीवरूपविकारात्मना प्रविष्ट ईश्वर इति व्याख्ये
येति समुदायार्थः सरूपा इति दृष्टांतस्थेनोर्भावा जीवा इति निष्कीयते ॥

न्तः विरुद्धधर्मव
त्वात् भि २४

शा०भ०
द्वि०त०
६५

नित्यत्वात्तस्याकाशः संभवत इत्यादौ जीवस्योत्पत्त्यश्रवणाददनुत्पत्तिसिद्धिरित्याह न चेति एवं विकारत्वे सति विकारप्रपंचान्तर्गतात्मना स्वात्मनि मकुर
तेति विद्धिकारं जीवात्मनो प्रवेशादित्यर्थः अजत्वादिश्रुतिः कल्पमध्ये जीवस्यानुत्पत्त्यादि विषया न त्वमसीतीति श्रुतिस्त्वस्मद्दृष्टत्व
भेदवाक्यवद्वारव्य ये ति प्रामे सिद्धांतयति एवमिति धर्मिवस्तुन्यो विभागो हेतुरौपाधिको वा नायमसिद्धिरित्याह अत्रोच्यते नात्मे
न चक्कचिदस्य श्रवणमतत्र श्रुतं वारयत्तु मर्हतीति श्रुत्यंतरगात्तस्यापि विकहस्याधिकस्यार्थस्य सर्वत्रोपसंहर्तव्यत्वात्
प्रवेशश्रुतिरप्येवं सति विकारभावापत्त्येव व्याख्यातं तदात्मनि स्वमकुरुतेत्यादिवत् तस्मादुत्पद्यते जीव इति एवं प्राप्त
इत्ते: नात्मा जीव उत्पद्यत इति कस्मात् श्रुतेः न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति भूयः सुप्रदेशेषु ननु क्वचिदश्रवणमे
नमश्रुतं न वारयतीत्युक्तं सत्यमुक्तं उत्पत्तिरेव त्वस्य न संभवतीति वदामः कस्मान्नित्यत्वाच्च ताभ्यः चशब्दादजत्वा
दिभ्यश्च नित्यत्वं ह्यस्य श्रुतिभ्योवगम्यते तथा जनत्वमविकारित्वमविकृतस्यैव ब्रह्मणो जीवात्मनावस्थानं ब्रह्मात्म
ताचेति न चैवं रूपस्योत्पत्तिरुपपद्यते ताः काः श्रुतयो न जीवो म्रियत इति स वा एष महानज आत्माजरोमृतोभयो
ब्रह्म न जायते म्रियते वा विपश्चित् अजो नित्यः शाश्वतोयं पुराणः तत्सृष्ट्वा तदेवानुप्राविशत् अनेन जीवेनात्मनानु
प्रविश्य नामरूपे व्याकरवाणि स एष इह प्रविष्ट आनखाग्रेभ्यः तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा ब्रह्म सर्वानुभूरित्येव
माद्या नित्यत्ववादिन्यः सत्यो जीवस्योत्पत्तिं प्रबध्नंति ननु प्रविभक्तत्वाद्विकारो विकारत्वाच्चोत्पद्यत इत्युक्तं अत्रोच्य
ते नास्य प्रविभागः स्वतोस्ति एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मेति श्रुतेः बुद्ध्याद्युपाधिनिमित्तं त्वस्य प्रवि
भागप्रतिभानमाकाशस्येव घटादिसंबंधनिमित्तं तथा च शास्त्रं स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणम चक्षुर्मयः २
य इत्येवमादि ब्रह्मण एवाविकृतस्य सतोस्यैकस्यानेकबुद्ध्यादिमयत्वं दर्शयति तन्मयत्वं चास्य विविक्तस्वरूपानभि
व्यक्त्यातदुपरक्तस्वरूपत्वं स्त्रीमयो जाल्म इत्यादिवद्द्रष्टव्यं यदपि क्वचिदस्योत्पत्तिप्रलयश्रवणं तदप्यत एवोपा
धिसंबंधात्तन्नव्यं उपाध्युत्पत्त्यास्योत्पत्तिस्तत्प्रलयेन च प्रलय इति ॥

ति द्वितीये जीवस्य न स्वतो विकारत्वसिद्धिः अप्रयोजकत्वादित्याह बुद्ध्यादीति औपाधिकभेदे मानमाह तथा
चेति मयटो विकारार्थत्वमाशंक्याह तन्मयत्वं चेति जाल्मः कामजडः स्त्रीपरतंत्रः स्त्रीमय इतिवज्जीवस्य स्वरूपाज्ञा
नाद् बुद्ध्यादिपरतंत्रत्वेन भेदकर्तृत्वादिभाक्त्वात्प्राचुर्यार्थे मयट्प्रयोग इत्यर्थः लिंगं निरस्य तदनुप्रासद्भुतिमाह यदपीति

जीवं सोपाधिकं जन्मनाशयोः श्रुतिमाह यथेति एतेभ्यो देहात्मना परिणतेभ्यो भूतेभ्यः ताम्येतोत्थाय जनित्वा तान्येवलीमानान्य
नुपश्चाद्धि नश्यति प्रेत्योपाधिकमरणानंतरं संज्ञा नास्तीत्यर्थः ननु प्रज्ञानघनः संज्ञा नास्तीति च विरुद्धमित्यत आह यथेति उपा
धिलयाद्धि पोषज्ञानाभाव एव संज्ञाभावो नात्मस्वरूपविज्ञानाभाव इत्युत्तरं प्रतिपादयति श्रुतिरित्यन्वयः अत्रैवात्मनि विज्ञानघने
प्रेत्य संज्ञा नास्तीत्युक्त्या मा मोहांतं मोहमध्यं भ्रांतिमापीपदत् आपादितवान् निममर्थं न जानामि अहं इति वदंतं मैत्रेयी प्रत्याह अर्थः
मुनिराह नवा इति मोहं मोहकरं वाक्यं उच्छित्तिः पूर्वावस्थानाशो धर्मोऽस्य सुच्छित्तिधर्मा परिणामी सतेनस्यनुच्छित्तिधर्मा अपरिणा
मी तस्माद् विनाशीत्यर्थः तर्हि न प्रेत्य संज्ञेति कथमुक्तमत आह मात्रेति विषयैरसंसर्गो न योक्तमित्यर्थः विंबप्रतिविंबयोरिवावि
रुद्धधर्मभेदो ध्वस्त इत्यत्र हेतुमाह अतद्धर्मेति जीवस्य विकारित्वमुक्त्वा योगात् तत्वमसीति वाक्यमखंडार्थमिति वक्तव्ये तथाच

तथा च दर्शयति प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति तथोपाधिप्रलयए
वायं नाम विलय इत्येतदप्यत्रैव मा भगवान् मोहांतमापीपदत्र वा अहमिदं विजानामि न प्रेत्य संज्ञास्तीति प्रश्नपूर्वकं प्रति
पादयति न वा अरेऽहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवतीति प्रतिज्ञानुपरो
धोऽप्यविक्रियस्यैव ब्रह्मणो जीवभावाभ्युपगमात् लक्षणभेदोऽप्यनयोरुपाधिनिमित्त एव अतद्धर्मविमोक्षाय वक्ष्ये
ति च प्रकृतस्यैव विज्ञानमयस्यात्मनः सर्वं संसारधर्मं प्रत्याख्यानेन परमात्मभावं प्रतिपादनात् तस्मात्त्रैवात्मात्ययतेश
वलीयस्तेवेति ज्ञोऽत एव १८ न किं कारणभूतानामिवागंतुकं चैतन्यं स्वतस्त्वचेतनः आहोस्वित् सांख्यानामिव नित्यचैतन्यस्व
रूप एवेति वादिविप्रतिपत्तेः संशयः किं तावत्प्राप्तं आगंतुकमात्मनश्चैतन्यमात्ममनःसंयोगजमग्निघटसंयोगजरोहि
तादिगुणवदिति प्राप्ते नित्यचैतन्यत्वे हि सुप्तमूर्छितग्रहाविष्टानामपि चेतनं स्यात् ज्ञोऽत एव तः न किंचिद्वयमचेतयाम

फलवत्प्रधानवाक्यापेक्षितं जीवनित्यत्वश्रुतीनां च बलवत्त्वादुत्पत्त्यादिकमध्यस्तमन्वदंत्युत्पत्त्यादिश्रुतं यद्यन्यविरोध इति सिद्धं ज्ञो
ऽत एव अत्रायं पुरुषः स्वयंज्योतिरित्यादावात्मस्वप्रकाशत्वश्रुतीनां पूर्वपक्षे प्रत्याहतः स्वरणावन्नश्रोत्रमित्यनित्यज्ञानवत्वश्रुतिभिर्विरोधात्तेनि
रस्यते अस्य लोकस्य चक्षुर्दृष्टिश्रोत्रश्रोत्रेत्यर्थः प्रागुक्तजीवानुत्पत्तिहेतुमादाय स्वप्रकाशत्वसाधनाद्वैतसाध्याभावः संगतिः अनुत्प
त्तौ हि स्वप्रकाशब्रह्मैवोपाधिहितं जीव इति जीवस्य स्वप्रकाशनास्तिध्यति नैवं गतार्थता अनुत्पन्नस्यापि जीवस्य स्वप्रकाशत्वे ज्ञानसाधन
वैयर्थ्यमिति तर्के सति हि ज्ञानं नित्यज्ञानश्रुतिबलेन स्वप्रकाशत्वश्रुतेर्बाधितयात्रश्रुत्यन्तवशोकायां नेदं कथमपि तानि स्वप्रकाशत्वस्यात्रसाध
नात् तथा च सर्वपक्षे जीवस्य ब्रह्मैक्यायोग्यतासिद्धांते तद्योग्यतेत्यपादसमासेः फलमवगंतव्यं इत्याशंका निराचष्टे ज्ञोऽत एव इति॥

साधनाधीनज्ञानत्वात्स्वप्रकाशो जीवेर्व्यतिरेकेणास्त्वित्याह अतः कादाचित्केति यथा श्रुतिभाष्ये हेतोः साध्याविपर्यय इति मन्तव्यः अतो जीवस्य स्वप्रकाशत्वश्रुतिबाध्येति प्राप्ते सिद्धान्तयति एवमिति चक्षुर्वेत्यादिनिष्कृष्टार्थः न केवलं प्रकाशप्रत्यात्मकत्वं भेदाज्जीवस्य स्वप्रकाशता किं तु श्रुतितोपीत्याह विज्ञानमयेति योयं विज्ञानमय इति प्रकरणश्रुत्यर्थः अत्रसः स्वयं भासमान एवात्मा हि सर्वमालम्बत्वा पापान्यादीनभिलक्ष्य वाकशीति स्वमार्थान्वपश्यतीति यावत् अत्र स्वमे विज्ञानबुद्धिवृत्तस्य स्वात्मना विज्ञाने विनाशो नास्तीत्यर्थः घ्राणादिजन्यगंधादिज्ञानानुसंधानसिद्धये आत्मनो ज्ञानरूपत्वं वाच्यमिति ३५

अतः कादाचित्कचैतन्यत्वादागंतुकचैतन्य आत्मेति एवं प्राप्तेभिधीयते ज्ञो नित्यचैतन्योयमात्मात एव यस्मादेव नोत्पद्यते परमेव ब्रह्माविकृतमुपाधिसंपर्काज्जीवभावेनावतिष्ठते परस्य हि ब्रह्मणश्चैतन्यस्वरूपत्वमाम्नातं विज्ञानमानंदं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मानंतरोबाह्यः कृत्स्नः प्रज्ञानघन एवेत्यादिषु तदेव चेत्परं ब्रह्म जीवस्तस्माज्जीवस्यापि नित्यचैतन्यस्वरूपत्वमग्न्यौष्ण्यप्रकाशवदिति गम्यते विज्ञानमयप्रक्रियायां च श्रुतयो भवंति अस्तमितु मानभिवाक्ययोतीति अत्रायं पुरुषः स्वयंज्योतिर्भवतीति नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इत्येवंरूपाः अथ यो वेदेदं जिघ्राणीति स आत्मेति च सर्वैः करणद्वारैरिदं वेदेदं वेदेति विज्ञानेनानुसंधानात्तद्रूपत्वसिद्धिः नित्यस्वरूपचैतन्यत्वे घ्राणाद्यानर्थक्यमिति चेत् न गंधादिविषयपरिच्छेदार्थत्वात् तथा हि दर्शयति गंधाय घ्राणमित्यादि यत्तु सुप्तादयो न चेतयंत इति तस्य श्रुत्यैव परिहारोभिहितः सुषुप्तं प्रकृत्य यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेविनाशित्वात् ॥

विशेष२

श्रुत्यंतरेणाह अथेति आत्मनो नित्यचिद्रूपत्वेपि स्वतोसंगत्वाद्गंधाद्यसंबंधात्तत्संबंधघटनात्मकवृत्त्यर्थानि ज्ञानसाधनानीति न तेषां वैयर्थ्यमित्याह नगंधेति परिच्छेदो वृत्तिः गंधाद्यर्थगोचरांतःकरणवृत्तय इत्यर्थः स्वप्नाद्यवस्थास्वात्मसत्त्वेपि चैतन्याभावान्नात्मा चिद्रूप इत्युक्तमनूद्य परिहरति यत्त्विति तन्नेत्यादि मौनपश्यतीति यत्तत्पश्यत्येव वाल्मनाज्ञान एव सन्न पश्यतीत्यत्र हेतुः नहीति नाशायोग्यत्वादित्यर्थः ॥

किमिति न प्रपतीत्यत आह नान्विति वृत्तेः साधनाधीनत्वोक्त्या स्वरूपज्ञानस्य साधनाधीनत्वं हेत्वसिद्धिरित्युक्तं साधनवैयर्थ्यं न कोऽपि
निरस्तः स एव निमाय नित्यज्ञानश्रुतीनां गतिविषयत्वव्याख्यानेन आत्मा न ज्ञानं द्रव्यत्वात् इत्यादितर्कास्त्वागमबाधिताः फलव
त्प्रधानवाक्यापेक्षितत्वस्वप्रकाशत्वागमस्य बलवत्त्वात् किंच निरवयवात्मनो मनःसंयोगायोगान्नानित्यज्ञानगुणत्वात् समवायाभावा
च्चैवं स्वस्य तेनैव तज्ज्ञानवेद्यताकर्मकर्तृत्वविरोधाच्च किंच [illegible] ज्ञानत्वस्यैकत्वेऽपि तन्निवादात्मैव ज्ञानत्वे तेष्व
मनःपरिणामत्वश्रुत्या कामः संकल्प इत्याद्याजडत्वान्नास्माकं ज्ञानद्वैविध्यगौरवमित्यनवद्यमात्मनः स्वप्रकाशत्वमिति सिद्धि

ननु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदित्यादिना एतदुक्तं भवति विषयाभावादियमचेतयमानता न चैतन्याभावादि
ति यथा वियदाश्रयस्य प्रकाशस्य प्रकाश्याभावादनभिव्यक्तिर्न स्वरूपाभावात् तद्वत् वैशेषिकादितर्कस्य श्रुतिविरोधे आ
भासीभवति तस्मान्नित्यचैतन्यस्वरूप एवात्मेति सिद्धं नमः १२ उत्क्रान्तिगत्यागतीनां १८ इदानीं किंपरिमाणो जीव इ
ति चिन्त्यते किमणुपरिमाण उत मध्यमपरिमाण अहोस्विन्महत्परिमाण इति नन्वनात्मोत्पद्यते नित्यचैतन्यश्चाय
मित्युक्तं मतस्त्वपर एवात्मा जीव इत्यापतति परस्य चात्मनोऽनन्तत्वमाम्नातं तत्र कुतो जीवस्य परिमाणविचारावतार इति
उच्यते ममेतत् उत्क्रान्तिगत्यागतिश्रवणानि तु जीवस्य परिच्छेदं प्रापयन्ति स्वशब्देन चास्य क्वचिदणुपरिमाणत्व
माम्नायते तस्य सर्वस्यानाकुलत्वोपपादनायायमारम्भः तत्र प्राप्तं तावदुत्क्रान्तिगत्यागतीनां श्रवणादणुपरिमाणो जीव
इत्युत्क्रान्तिस्तावत् स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामतीति गतिरपि ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रम
समेव ते सर्वे गच्छन्तीति आगतिरपि तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण इति आसामुत्क्रान्तिगत्यागतीनां श्रवणा
त्परिच्छिन्नस्तावज्जीव इति प्राप्नोति नहि विभोश्चलनमवकल्पत इति सति परिच्छेदे शरीरपरिमाणत्वस्याहंतपरीक्षायां
निरस्तत्वादणुरात्मेति गम्यते

रं स्वप्रकाशत्वादात्मस्वरूपादीषद्बहिष्ठं परिमाणमेवाश्रित्याप्रयत्नेनान्तर्बहिर्भावेनास्य संगत्या विचारयति उत्क्रान्तिगत्याग
तीनां विषयसंशयौ दर्शयति इदानीमिति नात्मश्रुतेरित्यादिना गतार्थत्वमस्याशङ्क्यात्माणुत्वश्रुतीनां महत्त्वश्रुतीनां चा
विरोधकथनार्थमस्याधिकरणस्यारम्भ इत्याह नन्वित्यादिना न केवलं श्रुतोत्क्रान्त्याद्यनुपपत्त्यात्मनोऽणुत्वं किंत्वेषोऽणुरात्मेति
श्रुत्यापीत्याह स्वशब्देनेति एवं प्राप्ते जीवस्याणुत्वाद्विशेषक्यात्सिद्धिः सिद्धान्ते तत्सिद्धिरिति मत्वा सूत्रं व्याकुर्वन्नेव पक्षमा
ह तत्प्राप्तमित्यादिना श्रुतेरणुरित्युत्तरसूत्राच्छंकालक्ष्यस्यैव परितेऽउत्क्रान्तिः श्रूयत इति शेषः समसर्वैः जीवपदैर्वा आदिभिः

[illegible]

शात॰
द्वि॰ त्र॰
६७

उत्क्रान्तिरात्मनो देहान्निर्गमो न भवति येनाणुत्वं स्यात् किं तु स्वामित्वनिवृत्तिरिति किंचिदंगीकृत्याप्यणुत्वमावश्यकमित्याह स्वात्मनेति
उत्क्रान्तेरुत्तरयोर्गत्यागत्योः स्वात्मना कर्त्रा संबंधादणुत्वमिति सूत्रयोजना पाकानामाश्रयस्प[illegible]त्वात्त्ववृहत्पनाश्रयस्यापि गंतृत्वोक्तिः
किं न स्यादित्यत आह गमेरिति गमनस्य कर्तरि संयोगविभागहेतुस्पन्दतिशायदेहत्वात्कर्माश्रितत्वं लोकसिद्धमित्यर्थः जीवाणुत्वे मध्यम
परिमाणत्वे सति गतिमत्त्वानुमाणं वर्द्धित्याह अमध्यमेति अंगीकारं त्यजति सतोश्चेति तत्स्वाम्यनिवृत्तिमात्रमुत्क्रान्तिरित्यर्थः
देहान्निर्गम एवोत्क्रान्तिरित्यत्र लिंगान्तरमाह देहप्रदेशानामिति अपादानत्वमवधित्वं अन्येभ्यो वामदेवादिभ्यः पृथगात्मा।
स्वागमेस्य

स्वात्मना चोत्तरयोः ॥१९॥ उत्क्रान्तिः कदाचिदचलतोऽपि ग्रामस्वाम्यनिवृत्तिवद्देहस्वाम्यनिवृत्त्या कर्मक्षयेणावकल्प्येत उत्तरे तु
गत्यागती नाचलतः संभवतः स्वात्मना हि तयोः संबंधो भवति गमेः कर्तृस्थक्रियात्वात् अमध्यमपरिमाणस्य च गत्यागती अणु।
त्व एव संभवतः सत्योश्च गत्यागत्योरुत्क्रान्तिरप्यपसृप्तिरेव देहादिति प्रतीयते न ह्यनपसृप्तस्य देहाद्गत्यागती स्यातां देहप्रदे
शानां चोत्क्रान्तावपादानत्ववचनाच्चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्य इति स एतास्तेजोमात्राः समभ्याददानो हृद
यमेवान्ववक्रामति शुक्रमादाय पुनरेति स्थानमिति चान्तरेऽपि शरीरे शारीरस्य गत्यागती भवतः तस्मादप्यस्याणुत्वसि।
द्धिः नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥२०॥ अथापि स्यान्नाणुरयमात्मा कस्मादतच्छ्रुतेः अणुत्वविपरीतपरिमाण।
श्रवणादित्यर्थः स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु आकाशवत्सर्वगतश्च नित्यः सत्यं ज्ञानमनन्तं
ब्रह्मेत्येवंजातीयका हि श्रुतिरात्मनोऽणुत्वे विप्रतिषिध्येतेति चेत् नैष दोषः कस्मादितराधिकारात् परस्य ह्यात्मनः प्रक्रिया
यामेषा परिमाणान्तरश्रुतिः परस्यैवात्मनः प्राधान्येन वेदान्तेषु वेदितव्यत्वेन प्रकृतत्वात् विरजः पर आकाशादित्येवंविधा =
च परस्यैवात्मनस्तत्र तत्र विशेषाधिकारात् ननु योऽयं विज्ञानमयः प्राणेष्विति शारीर एव महत्त्वसंबन्धित्वेन प्रतिनिर्दि
श्यते शास्त्रदृष्ट्या त्वेष निर्देशो वामदेववत् द्रष्टव्यः तस्मात्प्राज्ञविषयत्वात्परिमाणान्तरश्रवणस्य न जीवस्याणुत्वं विरु

ग्र २
ध्दु

निष्क्रामतीति शेषः किं च देहमध्येऽपि जीवस्य गत्यागतिश्रुतेरणुत्वमित्याह स एतेति इंद्रियाणि गृहीत्वा स्वापादौ हृदये स जीवो गच्छति
शुक्रं प्रकाशकमिंद्रियमादाय पुनर्जागरितस्थानमागच्छतीत्यर्थः इतराधिकारात् ब्रह्मप्रकरणात् ननु महत्त्वश्रुतेः कथं परप्रकर
णस्थत्वमित्यत आह परस्येति यावद्वेदान्तश्रुतिः सा परप्रकरणस्थैव तु सर्वगतत्वस्य तत्र ब्रह्मण्यभ्याधीनत्वाद्वेत्याह विरज इति निर्दो
षत्वमित्यर्थः विज्ञानमयस्यात्मप्रकरणे वा [illegible]मिति शंकते नन्विति अणोर्जीवस्य ब्रह्मणाभेदांगीकाराच्छास्त्रीयाभेददृष्ट्या
महत्त्वोक्तिर्यथा वामदेवस्याहं मनुरिति सर्वात्मत्वोक्तिरित्यविरोधमाह शास्त्रेति ॥ श्रीकृष्णायनमः ॥

एवमुत्क्रान्त्यादिश्रुत्याणुत्वमनुमितं तत्र श्रुतिमप्याह स्वशब्देति वालाग्रादुद्धृतः शततमो भागस्तस्मादप्युद्धृतः शततमो भागो जीव इत्युद्धृत्य मानमस्मान्नमसं नाल्पत्वमित्यर्थः वालः केशः नेत्रप्रोतायः शलाकाग्रमाराग्रं तस्मादुद्धृता मात्रा मानं यस्य स जीवस्तथा। आत्मस्वपुक्त्यायाल्पत्वाद्देहव्यापिस्पर्शोपलब्धिकरणस्य महिम्नात्मनो व्यापिकार्यकारित्वमविरुद्धं त्वगात्मनोरिति संबंधस्य त्वगव यविनिष्टत्वादवयविनश्चैकत्वादात्मसंयोगस्याक्रान्तत्वद्धिः एतेनार्थः सिद्ध इति ननु सिद्धमित्यत्र लपनेनार्थः विशेषणमेव विशेषा

स्वशब्दोन्मानाभ्यां च २१ इतश्चाणुरात्मा यतः साक्षाद्देवास्याणुत्ववाची शब्दः श्रूयते एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पंचधा संविवेशेति प्राणसंबंधाच्च जीव एवायमणुरभिहित इत्यवगम्यते तथोन्मानमपि जीवस्याणिमानं गमयति वालाग्रशततधाकल्पितस्य भागो जीवः स विज्ञेय इति आराग्रमात्रो ह्यवरोऽपि दृष्ट इति चोन्मानान्तरं ननु अणुत्वे सत्येकदेशस्थस्य सकलदेहगतोपलब्धिर्विरुध्येत दृश्यते च जाह्नवीह्रदे निमग्नानां सर्वांगीणशैत्योपलब्धिः निदाघसमये च सकलशरीरपरितापोपलब्धिरिति अत उत्तरं पठति अविरोधश्चन्दनवत् २२ यथा हि हरिचन्दनविंदुः शरीरैकदेशसंबंधोऽपि सन्सकलदेहव्यापिनमाल्हादं करोत्येवमात्मापि देहैकदेशस्थः सकलदेहव्यापिनीमुपलब्धिं करिष्यति त्वक्संबंधाच्चास्य सकलशरीरगतावेदना न विरुध्यते त्वगात्मनोर्हि संबंधः कृत्स्नायां च त्वचि वर्तते त्वक्च कृत्स्नशरीरव्यापिनीति अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि २३ अथाह यदुक्तमविरोधश्चन्दनवदिति तद्युक्तं दृष्टान्तदार्ष्टान्तिकयोरतुल्यत्वात् सिद्धे ह्यात्मनो देहैकदेशस्थत्वे चन्दनदृष्टान्तो भवति प्रत्यक्षं तु चन्दनस्यावस्थितिवैशेष्यमेकदेशस्थत्वं सकलदेहाल्हादनं च आत्मनः पुनः सकलदेहोपलब्धिमात्रं प्रत्यक्षं नैकदेशवर्तित्वं अनुमेयं तु नोदितमिति पश्चात्तनं चात्रानुमानं संभवति किमात्मनः सकलशरीरगतावेदनात्वगिन्द्रियस्येव सकलदेहव्यापिनः सतः किं वा विभोर्नभस इवाहोस्विच्चन्दनविन्दोरिवाणोरेकदेशस्थस्येति संशयानिवृत्तेरिति अत्रोच्यते नायं दोषः कस्मात् अभ्युपगमात् अभ्युपगम्यते ह्यात्मनोऽपि चन्दनस्येव देहैकदेशवृत्तित्वमवस्थितिवैशेष्यं कथमित्युच्यते हृदि ह्येष आत्मा पठ्यते वेदान्तेषु हृदि ह्येष आत्मेह कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इत्याद्युपदेशेभ्यः तस्माद्दृष्टान्तदार्ष्टान्तिकयोरवैषम्याद्युक्तमेवैतदविरोधश्चन्दनवदिति ॥

चन्दनविन्दोरल्पत्वस्य प्रत्यक्षत्वात् त्वग्व्याप्त्या व्यापिकार्यकारित्वकल्पना युक्ता जीवस्य त्वणुत्वे संदेहाद्व्यापिकार्यदर्शनाद्व्यापित्वकल्पनमेव युक्तं व्यापिकार्यमयं व्यापी न्यस्तसर्गादिति स्तवपर्णकाभागार्थः आत्माल्पव्यापिकार्यकारित्वाच्चन्दनविन्दुवदित्यनुमानमयुक्तं त्वगादेर्विभिचारादित्याह नचात्रानुमानमिति पूर्वोक्तश्रुतिभिर्जीवस्याणुत्वनिश्चयाद्धृदिस्थत्वश्रुतिभिरेकदेशस्थत्वनिश्चयाच्च न दृष्टान्तवैषम्यमिति परिहारभागार्थमाह अत्रोच्यत इति ॥

हा

सवाएषआत्मा२

२९

८

शात० द्वि-त्र ६८

आत्मवत्तद्धर्मज्ञानस्याप्यणुत्वेऽस्तु नः कादाचित्कं तद्देहपरिमाणत्वमित्युक्तास्तत्र एव व्यापित्वमिति मतांतरमाह गुणाद्वेति वा शब्दे न चंदनदृष्टांतापरितोषः सूचितस्तमाह स्यादिति उत्तरस्य वा वर्त्यं पाकृते कथमिति तान न गुणाव्यतिरिक्तदेशव्यापिगुणत्वात् रूपवत् न च प्रभायां व्यभिचारः तस्या अपि द्रव्यत्वादिति प्राप्ते गंधे व्यभिचारमाह अत उत्तरमिति गुणस्य व्यतिरेकः स्वाश्रयविश्लेषो न न विश्लिष्टावयवानामल्पत्वाद्द्रव्यत्वे तया न भातीत्यत आह अतीयमाणमपीति अपि रवधारणे एवं वा वस्याल्लिंगेनातीयमाण मेव तद्द्रव्यमनुमीयत इत्यर्थः विमतं अविश्लिष्टावयवं एवं वा वस्थानो गंधहत्वात् पपवत् हीनत्वात् समतवदिति भावः शंकते स्यादेतदिति

पृ२ गुणा४

गुणाद्वालोकवत् २४ चैतन्यगुणव्याप्तेर्वाणोरपि सतो जीवस्य सकलदेहव्यापिकार्यं न विरुध्यते यथालोकमणिप्रदीप प्रभृतीनामपवरकैकदेशवर्तिनामपि प्रभापवरकव्यापिनी सती कृत्स्ने पवरके कार्यं करोति तद्वत् स्यात्कदाचिच्चंदनस्य सावयवत्वात्सूक्ष्मावयवविसर्पणेनापि सकलदेहआल्हादयितृत्वं न त्वणोर्जीवस्यावयवाः संति येरयं सकलदेहं विश्र सर्पेदित्याशंक्य गुणाद्वालोकवदित्युक्तं कथं पुनर्गुणो व्यतिरेकेणान्यत्र वर्तेत न हि पटस्य शुक्लो गुणः पटव्यतिरेकेणान्यत्र वर्तमानो दृश्यते प्रदीपप्रभावद्भवेदिति चेन्न तस्या अपि द्रव्यत्वाभ्युपगमात् निविडावयवं हि तेजो द्रव्यं प्रदीपः प्रविरलावयवं तु तेजो द्रव्यमेव प्रभेति अत उत्तरं पठति व्यतिरेको गंधवत् २५ यथा गुणस्यापि सतो गंधस्य द्रव्यव्यतिरेकेण वृत्तिर्भवति अप्राप्तेष्वपि कुसुमादिषु गंधवत्सु कुसुमगंधोपलब्धेरेवमणोरपि सतो जीवस्य चैतन्यगुणव्यतिरेको भविष्यति अतश्चानैकांति कमेतद्गुणत्वाद्रूपादिवदाश्रयविश्लेषानुपपत्तिरिति गुणस्यैव सतो गंधस्याश्रयविश्लेषदर्शनात् गंधस्यापि सहैवाश्रयेण विश्लेष इति चेन्न यस्मान्मूलद्रव्याद्विश्लेषस्तस्य क्षयप्रसंगात् अतीयमाणमपि तत्पूर्वावस्थातो गम्यते अन्यथा तत्पू र्वावस्थैर्गुरुत्वादिभिर्हीयेत स्यादेतत् गंधाश्रयाणां विश्लिष्टानामवयवानामल्पत्वात्सन्नपि विशेषो नोपलक्ष्यते सूक्ष्मा हि गंधपरमाणवः सर्वतो विप्रसृता गंधबुद्धिमुत्पादयंति नासिकापुटमनुप्रविशंतीति चेन्नातींद्रियत्वात्परमाणूनां स्फुटगंधोपलब्धेश्च नागकेशरादिषु न च लोकप्रतीतिर्गंधवत् द्रव्यमाघ्रातमिति गंध एवाघ्रात इति लौकिकाः प्रती ति

विश्लिष्टानामल्पत्वाद्विशेषो नोपलक्ष्यते इत्याह एवं तु विशेषो वयवानां विश्लेषप्रवेशाद्रूपः सन्नपि न जायते तथा च गुरुत्वापचयो न भवतीति हेत्वोरन्यथासिद्धिरिति शंकार्थः आगच्छंतो वयवाः परमाणव स्तस्मात्कारणाद्वो नाताय न दृष्टत्वतः पवद्गंधस्याप्यनुन्नत्वाद्विप्रसंगादिति परिहरति नेति द्वितीयं परस्याह स्फुटेति इत्युगंधश्चेत्स्फुटो न स्यादित्यर्थः अ तो गंधस्य पुष्पादिस्थस्यैव गुणस्य व्यतिरेको वाच्य इति भावः ॥ त्रस

गंधोनगुणीविशिष्टः गुणत्वानद्रूपवदितिशंकते रूपेति विभुत्वप्रसंगात्त्वात्तहोधदूत्याह नेति आत्मनश्चेतन्यगुणोनैवदेहव्या
प्तिवितत्वस्फतिमाहसूत्रकारः तथाचदर्शयतीति यथाचेष्ट हृदयेति तत्रेवश्रुतत्ततरार्थस्तत्र एषयोगीति विज्ञानमिंद्रियाणांज्ञा
नशक्तिविज्ञानेनतत्रतन्यगुणेनानायपोतद्रूपर्थः एतेचेतन्यगुणव्याप्तिगोचरमभिप्राय नत्रात्माणुत्वविभुत्वश्रुतीनां विरोधाद्ग्र
माणएवात्मावणुः जीवस्यविभुत्वमीश्वरस्यत्वविरोधइत्येकदेशिपक्षोदर्शितःसद्रूपयन्सिद्धांतसूत्रंव्याचष्टे तगुणइत्यादिना
तस्माद्ब्रह्माभिन्नत्वात्विभुजीवः ब्रह्मवदितिन्मानानुगृहीतेश्रुतिस्मृतीहि यथाचसवाएषइतिनित्यःसर्वगतःस्थाणुरि

रूपादिष्वाश्रयव्यतिरेकानुपलब्धेर्गंधस्याप्ययुक्त आश्रयव्यतिरेकइतिचेत नप्रत्यक्षत्वादनुमानाप्रवृत्तेःतस्मादयथा
लोकेदृष्टंतत्तथैवानुमंतव्यंतिरूपकैर्नान्यथा नहिरसोगुणोजिह्वयोपलभ्यतइति अतोरूपादयोपिगुणाजिह्वयैवोपल
भ्येरन्निति नियंतुशक्यते तथाचदर्शयति २६ हृदयायतनत्वमणुपरिमाणत्वंचात्मनोभिधायतस्यैवालोमभ्यआनखा
ग्रेभ्यइतिचेतन्येनगुणेनसमस्तशरीरव्यापित्वंदर्शयति पृथगुपदेशात २७ प्रज्ञयाशरीरंसमारुह्येतिचात्मप्रज्ञयोःक
र्तृकरणभावेनपृथगुपदेशातचेतन्यगुणेनैवास्यशरीरव्यापितागम्यते तदेषांप्राणानांविज्ञानेनविज्ञानमादायेतिच
कर्तुःशरीरात्पृथग्विज्ञानस्योपदेशएतमेवाभिप्रायमुपोद्बलयतितस्मादणुरात्मेतिएवंप्राप्तेब्रूमः तद्गुणसारत्वात्तुतद्व्य
पदेशःप्राज्ञवत २८ तुशब्दःपक्षंव्यावर्तयति नैतदस्त्यणुरात्मेति उत्पत्त्यश्रवणाद्धिपरस्यैवब्रह्मणःप्रवेशश्रवणात्तादात्म्यो
पदेशाच्चपरमेवब्रह्मजीवइत्युक्तं परमेवचेद्ब्रह्मतावानेवजीवःतस्माद्यावान्परंब्रह्मतावानेवजीवोभवितुमर्हतिपरस्यचब्र
ह्मणोविभुत्वमाम्नातंतस्माद्विभुर्जीवः तथाचसवाएषमहानजआत्मायोयंविज्ञानमयःप्राणेष्वितिवंजातीयकाजीवविष
यविभुत्ववादाश्रौताःस्मार्ताश्चसमर्थिताभवंति नचाणोर्जीवस्यसकलशरीरगतावेदनोपपद्यते त्वक्संबंधात्स्यादि
तिचेत नकंटकतोदनेपिसकलशरीरगतैववेदनाप्रसज्येत त्वक्कंटकयोर्हिसंयोगःकृत्स्नायांत्वचिवर्ततेत्वक्चकृ

त्स्नशरीरव्यापिनीतिपादतलएवतुकंटकतुन्नोवेदनांप्रतिलभते नचाणोर्गुणव्याप्तिरुपपद्यते गुणस्यगुणिदेशत्वात्
त्स्नायाःस्मार्तःवादाःएतेनजीवस्यब्रह्माभेदेनाणुत्वाभावधीःतस्यांतदित्यन्योन्याश्रयइतिनिरस्तं प्रधानमहावाक्यानुगुणश्रुति
भिरणुत्वाभावनिश्चयानंतरमभेदज्ञानात्प्रधानवाक्यविरोधेगुणभूतोणुत्वश्रुतीनामेपाधिकाणुत्वविषयत्वकल्पनायु
णात्वत्याप्यकल्पनेतिन्यायादितिभावः किंचसर्वदेहव्यापिशीतानुभवान्यथानुपपत्त्याणुत्वश्रुतयोध्यस्तगुणविषयत्वेननने
याःकिंकेचिदर्थवादत्वेननेयाः लौकिकन्यायादपितेषांदुर्बलत्वादितिमत्वाह नचाणोरिति शंकते त्वगितियथात्वा
त्वक्संबंधस्यात्वग्व्याप्याद्देहव्यापिनीवेदनास्यात्तर्हि तत्प्रसंगंतितिद्रूषयति नेति ॥ रामायनमः ॥

पा२ ३।

शा·भा·
द्वि·अ·
६५

प्रसंगस्यैकत्वं निरस्यति पादतलएवेति तस्मादल्पमहतोः संयोगो न महद्व्यापी कंटकसंयोगस्य देहव्याप्यदर्शनात् तथाव
एवात्मसंयोगस्त्वगेकदेशस्य एवेति देहव्यापिवेदनानुपपत्तेः नच सिद्धांते त्वगात्मसंबंधस्य व्यापित्वा[...] कंटकसंबंधे दे
हव्यापिवेदनाप्रसंग इति वाच्यं यावती विषयसंबद्धा त्वक्तावंत्यामात्मसंबंधस्तावद्व्यापिवेदनाहेतुरिति नियमात् नचैवं वि
षयत्वक्संबंध एव तु न हेतुरस्तु किमात्मव्याप्त्येति वाच्यम् वेदनादिहि सुखदुःखे न तदनुभवस्य नचैषां व्यापकानां कार्याणा
मल्पकपादाने संभवति कार्यसोपादानाद्विश्लेषात् उपपत्तेः नचैषां व्यापकत्वमसिद्धं स्वर्यते मस्य गंगानिमग्नस्य सर्वांग ३२
व्यापिदुःखसुखानुभवस्य दुरपह्नवत्वात् यदुक्तं गुणस्यापि गुणविश्लेषो गंधवदिति तन्नेत्याह नचाणोरिति गंधेना

पादतलएवतत्कंटकतन्त्रावेदनां प्रतिलभ्यते नचाणोर्गुणव्याप्तिरुपपद्यते गुणस्य गुण्येकदेशत्वात् गुणत्वमेव
हि गुणिनमनाश्रितस्य गुणस्य हीयेत प्रदीपप्रभायाश्च द्रव्यांतरत्वं व्याख्यातं गंधोपि गुणत्वाभ्युपगमात्साश्रयए
वसंचरितुमर्हतीति अन्यथा गुणत्वहानिप्रसंगात् तथा चोक्तं हेपायनेन उपलभ्याप्सु चेद्गंधं केचिद्ब्रूयुरनैपुणाः
पृथिव्यामेव तं विद्यादपो वायुं च संश्रितमिति यदि चेतनत्वं जीवस्य तमलं शरीरव्याप्नुयात् नाणुर्जीवः स्यात् चैतन्य
मेव ह्यस्य स्वरूपमग्नेरिवौष्ण्यप्रकाशौ नात्र गुणगुणिविभागो विद्यत इति शारीरपरिमाणत्वं च प्रत्याख्याने परिशे
षाद्विभुर्जीवः कथं तर्ह्यणुत्वादिव्यपदेश इत्यत आह तद्गुणसारत्वात्तु तद्व्यपदेशः इति तस्याबुद्धेर्गुणास्तद्गु
णाः इच्छा द्वेषः सुखं दुःखमित्येवमादयस्तद्गुणाः सारः तस्य भावस्तद्गुणसारत्वं नहि बुद्धेर्गुणैर्विना केवलस्यात्मनः सं
सारित्वमस्ति बुद्ध्युपाधिधर्माध्यासनिमित्तं हि कर्तृत्वभोक्तृत्वादिलक्षणं संसारित्वमकर्तुरभोक्तुश्चासंसारिणो नित्यमु
क्तस्य सत आत्मनः तस्मात्तद्गुणसारत्वाद्बुद्धिपरिमाणेनास्य परिमाणव्यपदेशः तदुत्क्रान्त्यादिभिश्चास्योत्क्रान्त्यादिव्य ।

प्रधानेपर्यवसितः शेला
दिवेदे भवति हतद्गु
णकारः

अयाद्विस्निग्धः गुणत्वात् रूपवदित्याशंक्याह तथा चोक्तमिति नच प्रत्यक्षवादः गंधस्य प्रत्यक्षत्वेपि निराश्रयत्वस्याप्र
त्यक्षत्वात् महतो [...] त्रसरेणूनामनल्पानां तस्य शीना[...]द्गंधानामागमनात्स्फुटगंधोपलंभसंभवश्चावयवांतरप्रवेशान्नस
र्वाणामल्पद्रव्यत्वात् इति भावः एवं चैतन्यस्य गुणत्वमपेक्ष्य तद्व्याप्त्यगुणत्वात्माणुत्वं निरस्तं संप्रति तस्य गुणत्वमसिद्धमित्या
ह यदि चेतनत्वमिति उक्तं त्रेधा विभुत्वप्रसाधनाणुत्वापुक्तेः ॰ गतिप्रदर्शनार्थं सूत्रं व्याचष्टे कथमित्यादिना अनेनाविज्ञा
नमननसी हृद्यं हीति च प्रकृतां बुद्धियोगित्वात् तच्छ्रवहे न परामृश्यते ॥ ॥ ॥

६५

बुद्धिगुणानामात्मन्यध्यासादणुत्वायुक्तेर्नस्वतः आनंत्यश्रुतिविरोधादित्याह तथा चेति अकार्यकारणद्रव्यसमानाधिकरणेन
यानन्दमयोनिवाकत्पसोयमितिवाक्यवदत्वं डार्थत्वादानंत्यं सत्यमणुत्वमध्यस्तमित्यर्थः उक्तं चैतद्गुणाधिकरणे प्रतिपाद्यवि
वक्षेत्यत्र विशेषणमविवक्षितमितिवालाग्रवाक्यमौको वेत्यस्मात्तद्भूयस्कं तत्राद्येनिरस्य द्वितीयं निरस्यति तथेतस्मि २
न्नपीति बुद्धेर्गुणानितेनात्मन्यध्यस्तो गुणोभवति तेनात्मगुणेनाध्यस्तेनेवाराग्रपरिमाणोपह्येश्व जीवो दृष्टः स्वतस्त्व

जीवस्य

तथा च बालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेयः स चानंत्याय कल्पते इत्यणुत्वं जीवस्योत्क्रांत्य
स्य वचनं तस्माह तथैव तथैव समं जसं स्यात् यथा पचारिकमणुत्वं भवेत् पारमार्थिकं चानंत्यं न तूभयं मुख्यमवक
ल्प्यते नचानंत्यमौपचारिकमितिपाक्यं विज्ञातं सर्वोपनिषत्स्वब्रह्मात्मभावस्य प्रतिपाद्यविषितत्वात् तथेतरस्मिन्न
भन्यथात्मगुणेन पुन्मानेवुद्धेर्गुणेन तेवाराग्रमात्रोह्यवरोपिदृष्टइतिबुद्धिगुणसंबंधेनेवाराग्रमात्रता शास्तिनस्वेनेवात्मनाएषाणुरात्मा
वेतसावेदितव्य इत्यत्रापिनजीवस्याणुपरिमाणत्वं शिष्यते परस्यैवात्मनस्त्वत्राद्य नवगाह्यत्वेन ज्ञानप्रसादगम्य
त्वेन प्रकृतत्वात् जीवस्यापि चमुख्याणुपरिमाणत्वानुपपत्तेः तस्मादुर्ज्ञानत्वाभिप्रायमिदमणुत्ववचनमु
पाध्यभिप्रायेवाद्रष्टव्यं तथायज्ञया शारीरेसमाहत इत्येवं जातीयकेष्वपिभेदापदेशेषु बुद्धोपाधिभ्रंतयाजीवः
शारीरं समाहत इत्येवं योजयितव्यं व्यपदेशमात्रंवाशिलापुत्रकस्य शरीरमित्यादिवत् नह्यत्रगुणगुणिवि
भागोपि विद्यत इत्युक्तं हृदयायतनत्ववचनमपि बुद्धेरेवतदायतनत्वात् तथोत्क्रांत्यादीनामप्युपाध्यायत्ततां
दर्शयति कस्मिन्न्वहमुत्क्रांतउत्क्रांतोभविष्यामि कस्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीति स प्राणमसृजतेति
उत्क्रांत्यभावेहिगत्यागत्योरप्यभावोविज्ञायते नह्यनपसृप्तस्यदेहाद्गत्यागतीस्यातां एवमुपाधिगुणसा
रत्वाज्जीवस्याणुत्वादिव्यपदेशः प्राज्ञवत्

नंतएवेत्यर्थः नचक्षुषागृह्यतेनापिवाचानान्यैर्देवैस्तपसाकर्मणावा ज्ञानप्रसादेनविशुद्धसत्वस्ततस्तंपश्यति
निष्कलंध्यायमानइत्युक्ताएषोणुरात्मेत्यत्रः परएवयोहिजीवः तथाप्यध्यस्ताणुत्वमणुपाद्यार्थइत्याह जीवस्यापीति य
उक्तं व्यपदेशाच्चेतस्यगुणेनेवात्मनोदेहव्याप्तिरितितत्राह यथाप्रज्ञयेति बुद्धिः प्रज्ञेत्यर्थः यदि चैतन्यं प्रज्ञातदाभेदो
पचारइत्याह व्यपदेशमात्रेवेति ननुचेतनं गुणइतिभेदोमुख्योस्तित्याह नह्यत्रेति निर्गुणत्वश्रुतेरित्यर्थः अनंतदायर्वोत्क्रबुद्ध्याद्यु

ब्रह्मसूत्र २ अ० ३ पा० आनंदगिरि

सोऽयं दृष्टान्तं विवृणोति यथेति असत्त्वमित्यापाततः असंसारित्वमापाद्य शेषं स्पष्टं तन्नत्वतः संसारित्वमस्ति किं तु बुद्ध्युपाधिनेत्यत
आह यावदेवेत्यादिना समानो बुद्धितादात्म्यापन्नः सन्नित्याह तन्विज्ञाने ब्रह्मतन्मयो विकारो गुणैरित्यर्थः किं तत्स्यादित्याह प्रदेशान्तरश्रुति
विज्ञानमयो बुद्धिप्रचुर इत्यर्थः केन समान इत्याकांक्षायामिति शेषः श्रुतिबलाद्बुद्धेर्यावत्संसारभावित्वं तत्र के सति मूले

यथा प्राज्ञस्य परमात्मनः सगुणोपासनेषूपाधिगुणसारत्वात् अणीयस्त्वादिव्यपदेशोऽणीयान् व्रीहेर्वा यवाद्वा मनो
मयः प्राणमयः प्राणशरीरः सर्वगन्धः सर्वरसः सत्यकामः सत्यसंकल्प इत्येवंप्रकारस्तद्वत् स्यादेतत् यदि बुद्धिगुणसार
त्वादात्मनः संसारित्वं कल्प्येत ततो बुद्ध्यात्मनोर्भिन्नयोः संयोगावसानमवश्यंभावीत्यतो बुद्धिवियोगे तस्यात्मनो विभ
क्तस्यानात्मत्वादसत्त्वमसंसारित्वं वा प्रसज्येतेति अत उत्तरं पठति यावदात्मभावित्वाच्च न दोषः तद्दर्शनादिति
नेयमनेतरनिर्दिष्टदोषप्राप्तिरित्याशंक्य आकस्मात् यावदात्मभावित्वाद्बुद्धिसंयोगस्य यावदात्मा संसारी भवति या
वदस्य सम्यग्दर्शनेन संसारित्वं न निवर्तते तावदस्य बुद्ध्या संयोगो न शाम्यति यावदेव चायं बुद्ध्युपाधिसंबन्धस्ताव
ज्जीवस्य जीवत्वं संसारित्वं च परमार्थतस्तु न जीवो नाम बुद्ध्युपाधिपरिकल्पितस्वरूपव्यतिरेकेणास्ति नहि नित्यमुक्तस्व
रूपात्सर्वज्ञादीश्वरादन्यश्चेतनधातुर्द्वितीयो वेदान्तार्थनिरूपणायामुपलभ्यते नान्योऽतोऽस्ति द्रष्टा श्रोता मन्ता विज्ञाता ना
न्यदतोऽस्ति द्रष्टृ श्रोतृ मन्तृ विज्ञातृ तत्त्वमसि अहं ब्रह्मास्मीत्यादिश्रुतिशतेभ्यः कथं पुनरवगम्यते यावदात्मभावी बुद्धिसंयो
ग इति तद्दर्शनादित्याह तथा हि शास्त्रं दर्शयति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोका
वनुसंचरति ध्यायतीव लेलायतीवेत्यादि तत्र विज्ञानमय इति बुद्धिमय इत्येतदुक्तं भवति प्रदेशान्तरे विज्ञानमयो म
नोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमय इति विज्ञानस्य मनआदिभिः सहपाठाद्बुद्धिमयत्वं च तद्गुणसारत्वमेवाभिप्रेयते
यथा लोके स्त्रीमयो देवदत्त इति स्त्रीरागादिप्रधानोऽभिधीयते तद्वत् स समानः सन्नुभौ लोकावनुसंचरतीति च लोकान्त
रगमनेऽप्यवियोगं बुद्ध्या दर्शयति केन समान इत्यपेक्षायां तयैव बुद्ध्येति गम्यते सन्निधानात् तच्च दर्शयति ध्यायतीव लेलायतीवेति तदुक्तं भवति ना
यं स्वतो ध्यायति नापि चलति ध्यायन्त्यां बुद्धौ ध्यायतीव चलन्त्यां चलतीवेति अपि च मिथ्याज्ञानपुरःसरोऽयमात्मनो बुद्ध्यु
पाधिसंबन्धः न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्तीत्यतो यावद्ब्रह्मात्मतानवबोधस्तावदयं बुद्ध्युपाधिसंबन्धो न
शाम्यति दर्शयति च वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽय

वलेलायतीव ४४

कार्यस्य वियोगासंभवाच्चेति पुनरप्याह अपि च मिथ्येति सम्यग्ज्ञानादेव बुद्ध्यादिबन्धध्वंस इत्यत्र श्रुतिमाह दर्शयतीति मृ
त्युमत्येतीत्यन्वयः आदित्यवर्णं स्वप्रकाशं तमसः परस्तादज्ञानास्पृष्टमित्यर्थः ॥ ॥ रामाय नमः ॥

यावदात्मभावित्वस्यासिद्धिं शंकते नन्विति सुषुप्तौ बुद्धिसत्त्वस्य ब्रह्मसंपत्तिर्नेत्यासौ प्रलये न तत्त्वप्रलय एवाह इति तिरस्यार्थः स्थूलसूक्ष्मात्मना
बुद्धेर्यावदात्मभावित्वमस्तीत्याह पुंस्त्वेति पुंस्त्वरेतः आदिपदेन श्मश्र्वादिग्रहः अस्य बुद्धिसत्त्वधर्मस्येत्यर्थः स्वापे बीजात्मना स्थि
तो बुद्ध्यादेः प्रबोधे भिव्यक्तिरित्यत्र श्रुतिमाह दर्शयतीति नवं तु रित्यविद्यात्मकबीजसद्भावोक्तिः तेषा प्रादयः पुनराविर्भवंतीत्य
भिव्यक्तिनिर्देशः बुद्धिसद्भावे मानमाह तस्मत्प्रकारः निष्पत्ति मनसा ह्येव पश्यति बुद्धिश्च न विचेष्टति विज्ञानं यज्ञं तनुते तेजसा वेदि
तव्यः चित्तं च चेतयितव्यं चेति तत्र तत्र श्रुतिष्व मन आदिपदवाच्या तावद्बुद्धिर्द्रव्यं प्रसिद्धमित्यर्थः कथमेकस्मान्नेकोक्तिरित्यत्रा

ननु सुषुप्तिप्रलययोर्नष्टायाः कथं ते बुद्धिसंबंधस्य आत्मनोभ्युपगंत्वं सतासोम्य तदा संपन्नो भवति स्वमपीतो भवतीति वचनात्
कृत्स्नविकारप्रलयस्याभ्युपगमाच्च तत्कथं यावदात्मभावित्वं बुद्धिसंबंधस्येत्यत्रोच्यते पुंस्त्वादिवत्त्वस्य सतोभिव्यक्तियो
गात् ३० यथा लोके पुंस्त्वादीनि बीजात्मना विद्यमानान्येव बाल्यादिष्वनुपलभ्यमानान्यविद्यमानवदभिप्रेयमाणा
नि यौवनादिष्वाविर्भवंति नाविद्यमानान्युत्पद्यंते षंढादीनामपि तदुत्पत्तिप्रसंगात् एवमयमपि बुद्धिसंबंधः शक्त्यात्मना
विद्यमान एव सुषुप्तिप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति एवं ह्येतद्युज्यते नह्याकस्मिकी कस्यचिदुत्पत्तिः संभ
७६ वति अतिप्रसंगात् दर्शयति च सुषुप्तादुत्थानमविद्यात्मकबीजसद्भावकारितं सति संपद्य न विदुः सति संपद्यामह
इति त इह व्याघ्रो वा सिंहो वेत्यादिना तस्मात्सिद्धमेतद्यावदात्मभावी बुद्ध्याद्युपाधिसंबंध इति नित्योपलब्ध्यनुपल
ब्धिप्रसंगोन्यतरनियमो वान्यथा ३१ तच्चात्मन उपाधिभूतमंतःकरणं मनो बुद्धिर्विज्ञानं चित्तमिति चानेकधा तत्र तत्रा
भिलप्यते क्वचिच्च वृत्तिविभागेन संशयादिवृत्तिकं मन इत्युच्यते निश्चयादिवृत्तिकं बुद्धिरिति तच्चैवंभूतमंतःक
रणमवश्यमस्तीत्यभ्युपगंतव्यं अन्यथा ह्यनभ्युपगम्यमाने तस्मिन्नित्योपलब्ध्यनुपलब्धिप्रसंगः स्यात् आ
त्मेंद्रियविषयाणामुपलब्धिसाधनानां सन्निधाने सति नित्यमेवोपलब्धिः प्रसज्येत अथ सत्यपि हेतुस
मवधाने फलाभावस्ततो नित्यमेवानुपलब्धिः प्रसज्येत नचैवं दृश्यते

इह कश्चिच्चेति गर्व इति कोहंकारो विज्ञानं चित्तप्रधानं वा चित्तमित्यपि द्रष्टव्यं यद्यपि शास्त्रसिद्धमंतःकरणं आत्म
त्वादितं चेत्तथापि प्रत्यक्षस्यात्मनोविवदमाने प्रतिव्यासेगानुपपत्त्या तत्साधयति नचेत्यादिना तत्त्रं योजयति अन्यथे
ति पंचेंद्रियाणां पंचविषयसंबंधे सति नित्यं चोपलब्धयः स्युः मनोतिरिक्तसामग्र्याः सत्त्वात् यदि सत्यामपि सामग्र्या
मनुपलब्ध्यभावस्तर्हि सदैवानुपलब्धिप्रसंग इत्यर्थः अतः कादाचित्कोपलब्धिनियामकं मन एष्टव्यमिति भावः ॥ ९

नन्वेतमपि करान्नित्यं योगेदाह कादाचित्कत्ववदुपलब्धिकादाचित्कत्वमस्तु किं मनसेत्याशंक्यात्मन्यनियमो वेत्येनेत्याचष्टे अथवे
ति सत्यामात्मन्यात्मेन्द्रियोपलब्धिर्योगीकार्याऽन्यतरस्य कारणस्य केनचिच्छक्तिप्रतिबंध नियमो वांगीकार्यः यथा मणिनाग्निशक्तेः
प्रतिबंध इति वाकारणेयः अस्तु प्रतिबंध इत्यत आह नचेति नचेन्द्रियस्यैवास्तु शक्तिप्रतिबंध इति वाच्यं प्रतिबंधकाभावात् नचाद-
ष्टमात्मन्यात्मनादृष्टं प्रतिबंधकमिति युक्तं अतिप्रसंगात् नचव्यासंगः प्रतिबंधकः मनोऽसत्वे तस्यासंभवात् तथाहि रसादीना
मुपलब्धिप्रमाणरसवभुत्सा रूपाद्यासंगा रूपाद्युपलब्धिप्रतिबंधको वाच्यः स च गुणत्वाद्रूपवद्गुणमपेक्ष्यत इत्यात्मनोसंगाति
रिक्ताद्रष्टव्यः स गुणोत्वाद्योगात्मन एव गुणत्वेन एष्यमिति व्यासंगानुपपत्त्या मनःसिद्धिरिति दृष्टिं प्रत्यापसंहरति तस्मादिति ।
अवधानं वुभुत्सानं चानेकेन्द्रियापि युगपद्धात्र्युपलब्धिमात्रवुभुत्सोपलब्धिनियामकेति वाच्यं अनेकविषयसन्निधौ क्वचिदेवतत्स्यनिय
मत्वांगीकारात् येषां मतेयुतेरिच्छादीनामात्मधर्मत्वं तेषां मनो दुर्लभमिति मतम् इच्छादिधर्मिणोवात्मनाव्यासंगोपपत्तेः सं
प्रति व्यासंगस्यमानसत्वेन श्रुतिमाह तथाचेति नकेवलं व्यासंगात्मनः सिद्धिः किंतु कामाद्याश्रयत्वेनापीत्याह कामायदश्चे

अयवान् तरस्यात्मनइन्द्रियस्यवा शक्तिप्रतिबंधोऽभ्युपगंतव्यः नचात्मनः शक्तिप्रतिबंधः संभवति अविक्रियत्वात् ना
पीन्द्रियस्य नहि तस्य सर्वेन्द्रियोः क्षणयोरप्रतिबद्धशक्तिकस्य सतो कस्माच्छक्तिः प्रतिबध्येत तस्माद्यस्यावधानावधाना
भ्यामुपलब्ध्यनुपलब्धी भवतस्तन्मनः तथा च श्रुतिः अन्यत्रमना अभवं नादर्शमन्यत्रमना अभवं नाश्रौषमिति म
नसा ह्येव पश्यति मनसा शृणोतीति कामादयश्चास्योपलब्धनयइति दर्शयति कामः संकल्पो विचिकित्सा श्रद्धा अश्रद्धा धृति
रधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति तस्मादयुक्तमेतत्तद्गुणसारत्वात्तद्व्यपदेश इति कर्ता शास्त्रार्थवत्त्वात् ३ शतेद्
गुणसारत्वाधिकारेणैवापरोऽपि जीवधर्मः प्रपंच्यते कर्ता चायं जीवः स्यात् कस्माच्छास्त्रार्थवत्त्वादेवं च यजेत जुहुयात् द
द्यादित्येवं विधिशास्त्रमर्थवद्भवति अन्यथा तदनर्थकं स्यात् ॥

ति बुद्धेः प्रामाणिकत्वोक्तिफलमाह तस्मादिति एवमात्मनस्तद्गुणत्वाध्यासो स्वाभाविकं सद्दत्वं स्याणितं संप्रति नेत्वोवहिरंक
र्तृत्वसाधयति कर्ता शास्त्रार्थवत्त्वात् स निःसंशयं चिद्रूपो महानात्मा कर्ता नेवेत्यसंगत्वश्रुतीनां च विप्रतिपत्त्या सत्यायेवुद्धि
कर्तृत्वे नेव विध्यादिशास्त्रोपपत्तेः कर्तात्मेति सांख्यपक्षप्राप्तौ सिद्धान्तयन्नेव तद्गुणसारत्वोक्त्यात्मनिकर्तृत्वाध्यासस्यापि सिद्धि
त्वात्पुनरुक्तिमाशंक्य सांख्यपक्षनिरासार्थमात्मनिकर्तृत्वाध्यासप्रपंचनार्थं पुनरुक्तिरित्याह तद्गुणेति अधिकारः प्रसं
गः वस्तुतोऽसंगात्मविषयाः कर्तृत्व मित्यसंगत्वकर्तृत्वश्रुतीनामविरोधोक्तेः कर्तृत्वविचारात्मकाधिकरणान्त्रयस्य पाद
संगतिः श्रुतीनामपि योविरोधाविरोधो पूर्वोत्तरपक्षयोः फलं यद्यत्र पूर्वपक्षे बंधाभावाच्छास्त्रवैयर्थ्यं फले सि
द्धान्ते कर्तृत्वादिसंबंधसत्त्वाच्छास्त्रार्थवत्त्वमिति भेदः

द्वि॰

ननु बुद्धेः कर्तृत्वेन शास्त्रार्थवत्त्वात् किं जीवकर्तृत्वेन तत्राह तद्धि कर्तुः सत इति मयेदं कर्तव्यमिति बोधसमर्थस्यैव कर्तृत्वं वाच्यं न त्वचेतनाया बुद्धेः किं च भोक्तुरात्मन एव कर्तृता वाच्या शास्त्रफलं प्रयोक्तरीति न्यायादिति भावः सूत्रस्थान स्वमः अस्त्वतः तत्राऽऽत्मा यथेष्टमीयते गच्छतीति विहारोपदेशादात्मा कर्ता प्राणानां मध्ये विज्ञानं बुद्ध्या विज्ञाने समर्थमिन्द्रियजातमादाय शेते इति श्रुतिः प्राणानां ग्रहीतृत्वापरिवर्तनं तदुपादानकर्तृत्वमात्मनः अकर्तृत्वे तदुपादानानुपपत्तेरिति भावः विज्ञानशब्दो जीवस्य निर्देशो न चेत्तदा प्रथमानिर्देशाद्धि पर्यः करणयोतितृतीयया निर्देशः स्यात्तस्मादिह श्रुतौ तनुत इत्याख्यातेन कर्तृवाचिना विज्ञानपदस्य सामा

तद्धि कर्तृत्वं सतः कर्तव्यविशेषमुपदिशति न चासति कर्तृत्वे तदुपपद्येत तथेदमपि शास्त्रमर्थवद्भवत्येष हि द्रष्टा श्रोता मंता बोद्धा कर्ता विज्ञानात्मा पुरुष इति विहारोपदेशात् ३३ इतश्च जीवस्य कर्तृत्वं यज्जीवप्रक्रियायां संध्ये स्थाने विहारमुपदिशति स ईयतेऽमृतो यत्र कामम् इति स्वे शरीरे यथाकामं परिवर्तत इति च उपादानात् ३४ इतश्चास्य कर्तृत्वं यज्जीवप्रक्रियायामेव करणानामुपादानं संकीर्तयति तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति प्राणान्गृहीत्वेति च व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ३५ इतश्च जीवस्य कर्तृत्वं यदस्य लौकिकीषु वैदिकीषु च क्रियासु कर्तृत्वं व्यपदिशति विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि चेति ननु विज्ञानशब्दो बुद्धौ समधिगतः कथमनेन जीवस्य कर्तृत्वं सूच्यत इति नेत्युच्यते जीवस्यैवैष निर्देशो न बुद्धेः न चेज्जीवस्य स्यान्निर्देशविपर्ययः स्याद्विज्ञानेनेत्येवं निरदेक्ष्यत् तथा ह्यन्यत्र बुद्धिविवक्षायां विज्ञानशब्दस्य करणविभक्तिनिर्देशो दृश्यते तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति इह तु विज्ञानं यज्ञं तनुत इति कर्तृसामानाधिकरण्यनिर्देशाद्बुद्धिव्यतिरिक्तस्यैवात्मनः कर्तृत्वं सूच्यत इत्यदोषः अत्राह यदि बुद्धिव्यतिरिक्तो जीवः कर्ता स्यात्स स्वतंत्रः सन् प्रियं हितं चैवात्मनो नियमेन संपादयेन्न विपरीतं विपरीतमपि तु संपादयन्नुपलभ्यते न च स्वतंत्रस्यात्मन ईदृशी प्रवृत्तिरनियमेनोपपद्यते इत्यत उत्तरं पठति उपलब्धिवदनियमः ३६ यथायमात्मोपलब्धिं प्रति स्वतंत्रोऽप्यनियमेनेष्टमनिष्टं चोपलभते एवमनियमेनैवेष्टमनिष्टं च संपादयिष्यति उपलब्धावप्यस्वातंत्र्यमुपलब्धिहेतूपादानोपलंभादिति चेत् न विषयप्रकल्पनामात्रप्रयोजनत्वादुपलब्धिहेतूनामनुपलब्धौ त्वनन्यापेक्षत्वमात्मनश्चैतन्ययोगात्

नाधिकरणनिर्देशात्क्रियायामतः कर्तृत्वं सूच्यत इति सूत्रभाष्ययोरर्थः सूत्रान्तरमवतारयति अत्राहेति जीवः स्वतंत्रश्चेदिष्टमेव कुर्यादस्वतंत्रश्चेन्न कर्ता स्वतंत्रः कर्तेति न्यायादित्यर्थः सत्यपि स्वातंत्र्ये कारकवैचित्र्यादनियता प्रवृत्तिरिति सूत्रेण परिहरति यथेति दृष्टान्तासंप्रतिपत्त्या शङ्कते उपलब्धावपीति चक्षुरादीनां चेतनं प्रति विषयसंबन्धार्थत्वात्स्वतंत्रो ह्युपलब्धौ चात्मनश्चैतन्यस्वभावत्वेन स्वातंत्र्याद् दृष्टान्तसिद्धिरित्याह नेति ॥

सात्र-
हित-
३२

नत्वात्माविषयत्वं ध्यायकरणात्स्वपेक्षते चेत्कथं स्वतंत्रत्वमाशंक्याह । अपि चेति स्वातंत्र्यं नाम न स्वात्मानपेक्षत्वमीश्वरस्यापि प्राणिकर्मापे
क्षत्वेनास्वातंत्र्यप्रसंगात् किंतर्ह्येतरकारकप्रयोक्तृत्वे सति कारकान्तराप्रयोज्यत्वं स्वातंत्र्यं तेन स्वतंत्रोऽपि जीव इष्टसाधनत्वं ज्ञात्वा नित्यसाध
नमपेक्षते इति तीव्रनियतायां प्रवृत्तिः स्वातंत्र्यं चेत्तद्विरुद्धमिति यः जीवस्य कर्तृत्वे हेत्वंतरं सूत्रं पाठयति बुद्धेः करणशक्तिवि
पर्यासाकर्तृशक्तिस्यादित्यर्थः ततः किं तत्राह यत्स्याच्च बुद्धेरिति योऽहमेवं मतः सकर्तास एव जीवोऽयं तदपेक्षितं कर्तृत्वं नोक्ति जीव
कर्तृत्वसिद्धिरिति भावः ज्ञानसाधनविधानस्यानुपपत्त्यात्मनः कर्तृत्वं वाच्यमित्याह समाधीति मोक्षफलमोक्षेरेवद्र्घायस
प्या॰ ॥ पा॰ ॥ नं॰

अपि तादर्थ्ये क्रियायामपि नात्मनः स्वातंत्र्यमस्ति देशकालनिमित्तविशेषापेक्षत्वात् न च तदपेक्षस्य कर्तृत्वं
स्वतंत्रत्वं निवर्तते भवति हि सापेक्षत्वस्यापि पक्तुः पक्तृत्वं सहकारिवैचित्र्यात्त्वे सा निष्ठायां क्रियायां नियमेन प्रवृत्ति॥ ३२
नात्मनो न विरुध्यते शक्तिविपर्ययात् ३७ इतश्च विज्ञानव्यतिरिक्तो जीवः कर्ता भवितुमर्हति यदि पुनर्विज्ञा॰ तु ३
नशब्दवाच्या बुद्धिरेव कर्त्री स्यात्ततः शक्तिविपर्ययः स्यात्करणशक्तिर्बुद्धेर्हीयेत कर्तृशक्तिश्चापद्येत सत्यां च बुद्धेः
कर्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वमभ्युपगन्तव्यं अहंकारपूर्विकैव प्रवृत्तेः सर्वत्र दर्शनात् अहं गच्छाम्यहं
मागच्छाम्यहं भुंजेऽहं पिबामीति तस्याश्च कर्तृशक्तियुक्तायाः सर्वार्थकारि करणमन्यत्कल्पयितव्यं शक्तोऽपि हि
सन्कर्ता करणमुपादाय क्रियासु प्रवर्तमानो दृश्यते अतश्च संज्ञामात्रे विवादः स्यान्न वस्तुभेदः कश्चित्करणव्य
तिरिक्तस्य कर्तृत्वाभ्युपगमात् समाध्यभावाच्च ३८ योऽप्ययमौपनिषदात्मप्रतिपत्तिप्रयोजनः समाधिरुपदिष्टो
वेदान्तेषु आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः ओमित्येवं
ध्यायथ आत्मानमित्येवं लक्षणः सोऽप्यसत्यात्मनः कर्तृत्वे नोपपद्येत तस्मादप्यस्य कर्तृत्वसिद्धिः यथा च तक्षो
३२ भयथा ३९ एवं तावच्छास्त्रार्थवत्त्वादिभिर्हेतुभिः कर्तृत्वं शारीरस्य प्रदर्शितं तत्पुनः स्वाभाविकं वा स्यादुपाधि
निमित्तं वेति चिन्त्यते तत्रैतैरेव शास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकं कर्तृत्वमपवादहेत्वभावादित्येवं प्राप्ते ब्रू
मः न स्वाभाविकं कर्तृत्वमात्मनः संभवति तक्षोभयथा॥

मापि कर्तृत्वं युक्तं अन्यथात्मनो कर्तृत्वे बुद्धेरपि अभोक्त्राः कर्तृत्वायोगात्समाध्यभावप्रसंगइत्यर्थः तथा चेति उक्तमात्मनः क
र्तृत्वमपजीव्य संशयपूर्वपक्षावाह एवमित्यादिना सांख्यनिरासेनात्मनः कर्तृत्वे साधिते बाधकाभावान्नित्यमिति मीमांसका
दिपक्षः प्राप्तः न चासंगत्वश्रुतिबाधः अहं कर्तेत्यनुभवसहितकर्तृत्वश्रुतिबलेन तस्यागमकत्वादिति प्राप्ते उक्तं सूत्रमे
गा॰

व शिष्टितयपि न स्वाभाविकमिति॥

३२

यदुक्तं बाधकाभावादिति तदसिद्धमित्याह अनिर्मोक्षेति ननु कर्तृत्वेनात्मक्रिया शक्तिरुक्ता व्यक्तित्व यापि शक्तिः कार्यस्य क्रियारूप
स्य त्यागाभावान्मुक्तेः पुरुषार्थत्वसिद्धिरिति शंकते ननु स्थितायामिति तस्याः शक्तेः कस्य कार्यपरिहारस्तत्राह तत्परिहारश्चेति न
ह्यग्निशक्तिसत्त्वे कार्यमपि स्यात् काष्ठाभावे शक्त्ययोगात् अस्ति हि प्रलये पि कार्यं पुनः उद्भवयोग्यं तत्तत्र यथा च शक्त्याधर्माद्विनिमि
त्तः परिहर्त्तव्यः तेषां चान्यत्रे लोपप्रवृत्तिर्वा परिहरति नेति निमित्तानामपीति सनिमित्तस्य कार्यस्य शक्त्या शाक्यत्वेन सर्वथा निमित्ताना
मपि परस्परत्वाच्छक्तिसंबद्धत्वमुक्तं मेनतं च संबंधेन संबंधिनेत्यर्थः यद्वा शक्तिलक्षणमापत्तकं यस्य कार्यस्य तेन कार्येणायं सं
बंधस्तेन निर्द्धारितकरणान्तनीये ननु नरस्य कर्मणा देवत्ववच्छास्त्रबलात्कर्तृत्वे वा कर्तृनास्सिद्धिरिति शंकते नन्विति ज्ञानादक

२१ अनिर्मोक्षप्रसंगात् कर्तृत्वस्वभावत्वे ह्यात्मनो न कर्तृत्वान्निर्मोक्षः संभवति अग्नेरिवौष्ण्यात् न च कर्तृत्वादनिर्मुक्त
स्यास्ति पुरुषार्थसिद्धिः कर्तृत्वस्य दुःखरूपत्वात् ननु स्थितायामपि कर्तृत्वशक्तौ कर्तृत्वकार्यपरिहारात्पुरुषार्थः से
त्स्यति तत्परिहारश्च निमित्तपरिहारात् यथाग्नेर्दहनशक्तियुक्तस्यापि काष्ठवियोगाद्दहनकार्याभावस्तद्वत् न निमि
त्तानामपि शक्तिलक्षणेन संबंधेन संबद्धानामत्यन्तपरिहारासंभवात् ननु मोक्षसाधनान्मोक्षः सेत्स्यति न साधनाय
त्तस्यानित्यत्वात् अपि च नित्यशुद्धबुद्धमुक्तात्मप्रतिपादनान्मोक्षसिद्धिरभिमता तादृगात्मप्रतिपादनं च न स्वाभावि
के कर्तृत्वेऽवकल्पेत तस्मादुपाधिधर्माध्यासेनैवात्मनः कर्तृत्वं न स्वाभाविकं तथा च श्रुतिः ध्यायतीव लेलायती
वेति आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति चोपाधिसंपृक्तस्यैवात्मनो भोक्तृत्वादिविशेषलाभं दर्शयति न
हि विवेकिनां परस्मादन्यो जीवो नाम कर्ता भोक्ता च विद्यते नान्योऽतोऽस्ति द्रष्टेति श्रवणात् पर एव तर्हि संसारी कर्ता भो द्वि २
क्ता च प्रसज्येत परस्मादन्यश्चेच्चितिमाञ्जीवो बुद्ध्यादिसंघातव्यतिरिक्तो न स्यात् नाविद्याप्रत्युपस्थापितत्वात्कर्तृत्व

न त्वाख्यमोक्षस्याकर्तृत्वमाविघ्नकं स्याद्यतो ज्ञान भोक्तृत्वयोः ॥ मज्ञानस्यैव निवर्तकं यदि कर्मणा मोक्षस्तत्राह नेति आत्मनः
स्वाभाविककर्तृत्वमभ्युपगम्यानिर्मोक्ष उक्तः संप्रत्यसंगनिर्विकारत्वानकस्माविद्याकोपात्तत्स्वाभाविकमित्याह अपि चेति नवा
भाव्लानकश्रुतीनास्वावकत्वकल्पनयुक्ते न चाहं कर्तेत्यनुभवो विरुध्यते न समस्तमिथ्योदासीनकर्तृत्वावगाहिनोध्यासत्वेनाप्यु
पपत्तेरित्यर्थः कर्तृत्वस्याध्यस्तत्वे श्रुतिमाह तथा चेति विरुद्धदनुभववाधितं कर्तृत्वमित्याह नहीति बुद्ध्यादिसंघातव्यति
रिक्तो यदि परस्मादन्यश्च न तनानस्यात्तदा पर एव संसारी प्रसज्येत न चानिष्टं परस्य नित्यमुक्तत्वव्याघातादिति शंकते पर एवेति न
वयं शुद्धस्य विद्यातोः परस्य संबंधवदामः किंतु तस्यैवाविद्याबुद्ध्यादिप्रतिबिंबितस्याविद्ययाभिन्नस्य जीवत्वमामसंबंधमो
तात्विति अतः कल्पितभेदोपि लोके बिंबप्रतिबिंबयोर्व्यवस्थापको दृष्ट इति परिहरति नाविद्येति ॥ ॥

शात्त-
हित-
७३

यदि वियोवदितेवं यो न स्यु ज्ञानमतीत्यत्र श्रुतिमाह तथा चेति कर्तृत्वस्य बुद्ध्युपाध्यन्वयव्यतिरेकानुविधायित्वाच्छ्रुते च न स्वाभाविकत्वमि
त्याह तथा च सति आत्मैव काम्यते आनंदत्वादित्यात्मकामस्वरूपस्यातिरिक्तकामासत्त्वादकामं आप्तकाममात्मकाममकामं विशोकान्तरमि
त्याह शोकेति शोकान्तरं दुःखास्पृष्टमित्यर्थः तस्यैव सुषुप्तात्मरूपस्य परमपुरुषार्थतामाह एषास्य गतिः प्राप्यस्थानं एषास्य परमो लो
को भोग्यस्थानं एतस्मादन्यन्नास्तीत्यर्थः आत्मा स्वतोऽकर्ता बुद्ध्याद्युपाधिना तु कर्तृत्वमयथाभावरूपमित्यर्थस्तत्र योजयति तदेतद
हेत्यादिना संप्रसादः सुषुप्तिः यथा स्फटिकस्य लौहित्यं कुसुमाद्युपाधिकं तथात्मनः कर्तृत्वं बुद्ध्याद्युपाधिकमन्वयव्यतिरेकाभ्यां सिद्ध

तथा च शास्त्रं यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यविद्यावस्थायां कर्तृत्वभोक्तृत्वे दर्शयित्वा विद्यावस्थायां त एव क
र्तृत्वभोक्तृत्वे निवारयति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति तथा स्वप्नजागरितयोरात्मन उपाधिसंपर्ककृतं श्रम
श्येनस्येवाकाशे विपरिपततः श्रावयित्वा तदभावं सुषुप्ते प्राज्ञेनात्मना संपरिष्वक्तस्य श्रावयति तद्वा अस्यैतदाप्तकाममा
त्मकाममकामं रूपं शोकान्तरमित्यारभ्य एषास्य परमा गतिरेषास्य परमा संपदेषोऽस्य परमो लोक एषोऽस्य परम आनन्द
इत्युपसंहारात् तदेतदाहाचार्यो यथा च तक्षोभयथेति न्यायवचः पठितः नैव मन्तव्यं स्वाभाविकमेवात्मनः कर्तृत्वं
अग्नेरिवौष्ण्यमिति यथा तु तक्षा लोके वास्यादिकरणहस्तः कर्ता दुःखी भवति स एव स्वगृहं प्राप्तः विमुक्तवास्यादिकर
णः स्वस्थो निर्वृतो निर्व्यापारः सुखी भवत्येवमविद्याप्रत्युपस्थापितद्वैतसंपृक्त आत्मा स्वप्नजागरितावस्थयोः कर्ता
दुःखी भवति स तच्छ्रमापनुत्तये स्वमात्मानं परं ब्रह्म प्रविश्य विमुक्तकार्यकरणसंघातोऽकर्ता सुखी भवति संप्रसादावस्था
यां तथा मुक्त्यवस्थायामप्यविद्याप्रदीपं विधूयात्मैव केवलो निर्वृतः सुखी भवति तक्षदृष्टान्तश्चैतावतांशेन द्रष्टव्यः
तक्षा हि विशिष्टेषु तक्षणादिव्यापारेष्वपेक्ष्यैव प्रतिनियतानि करणानि कर्ता भवति स्वशरीरेण त्वकर्तैवेति नत्वात्मन
स्तक्ष्ण इवावयवाः सन्ति यैर्हस्तादिभिरिव वास्यादीनि तक्षा मनआदीनि करणान्यात्मोपाददीत न्यस्येद्वा यत्तु शास्त्रार्थ
वत्त्वादिभिर्हेतुभिः स्वाभाविकमेवात्मनः कर्तृत्वमिति तत्र विधिशास्त्रं तावद्यथाप्राप्तं कर्तृत्वमुपादाय कर्तव्यविशे
तो
षमुपदिशति न कर्तृत्वमात्मनः प्रतिपादयति

ध्यांतेति
या४४

ब्रह्म
वा शपादीति२

ननु बुद्ध्यात्मकर्तृत्वे करणानां करणत्वविषययोर्नोपादानत्वविषयाविति युक्ते करणत्वात्कार्यत्वस्योपादानत्वस्यान्तरंगतया
विशेषितबुद्धेस्ताभ्यामुपादानत्वं स्वान्तरंगतया विशेषितबुद्धेस्ताभ्यामुपादानत्वेऽस्यैव सिद्धेः एवं चिदचिद्भेदाध्यस्तबुद्ध्या
त्वेन२ त्माहंकारस्य कर्तृत्वोपादानं महावाक्यसंगतिरिति भावः तक्षतन्त्वा स्वहस्तादिना वास्यादि[illegible] शक्तत्वात्स्वतः कर्तात्मा
तु निरवयवत्वादशक्त इति दृष्टान्तवैषम्यमाशंक्योपाधिकर्तृत्वांशेन विवक्षितेन साम्यमाह तक्षदृष्टान्तश्चेति ॥

शास्त्रे ज्ञानदृष्यमानेकर्तृत्वंस्वाभाविकमेववकिंनस्यादित्यतआह नचस्वाभाविकमिति उपाध्यभावकाले श्रुतंकर्तृत्वंस्वाभाविकमेवेति
शांकते नन्विति किंचकरणविशिष्टस्यकर्तृत्वेतेषांकर्तृत्वेनरभीवांतेष्वपिकर्तृविभक्तिःस्यात नचैवमस्तितेनतःकेवलात्मनःकर्तृत्वं
मित्याह तथेति स्वप्नविहारेतावदुपाध्यभावोऽसिद्धइत्याह नतावत्स्वप्नइति विहारस्यमिथ्यात्वात्तत्कर्तृत्वमपिमिथ्येत्याह विहा
रोपीति जाग्रद्देवानइवकरणविशिष्टस्यकर्तृत्वेकरणेष्वकर्तृविभक्तिःस्यात्करणविभक्तिरित्युक्तमित्याह भवतिचलोकइति

न्द्रु५

नचस्वाभाविकमस्यकर्तृत्वमस्ति ब्रह्मात्मनोपदेशादित्यवोचामतस्माद्विद्याकृतंकर्तृत्वमुपादायविधिशास्त्रंप्रवर्तिष्यतेक
र्तीविज्ञानात्मापुरुषइत्येवंजातीयकमपिशास्त्रमनुवादरूपत्वाद्यथाविधिप्राप्तमेवाविद्याकृतंकर्तृत्वमनुवदिष्यति एते
नविहारोपादानपरिहारौतयोरप्यनुवादरूपत्वात् नन्वसंध्येस्थानेप्रसुप्तेषुकरणेषुस्वेशरीरेयथाकामंपरिवर्ततइतिविहा
रउपदिश्यमानःकेवलस्यात्मनःकर्तृत्वमावहति तथोपादानेपितदेषांप्राणानांविज्ञानेनविज्ञानमादायेतिकरणेषुकर्म
करणविभक्तिश्रूयमाणाकेवलस्यात्मनःकर्तृत्वंगमयतीतिचोच्यते नतावत्संध्येस्थानेऽत्यंतमात्मनःकरणविरमणमस्तिसधीः
क्रम६ स्वप्नोभूत्वाइमंलोकमतिक्रामतीति तत्रापिधीसंबंधश्रवणात्तथाचस्मरंति इंद्रियाणामुपरमेमनोनुपरतंयदि सेवतेविषयान्वि
षयानेवतद्विद्यात्स्वप्नदर्शनमिति कामादयश्चमनसोवृत्तयइतिश्रुतिः तास्वप्नेस्वप्नेदृश्यंतेतस्मान्मनसाएवस्वप्नेविहरति ३६
विहारोपिचतत्रत्योवासनामयएवनतुपारमार्थिकोस्ति तथाचश्रुतिरिवकारानुबंधमेवस्वप्नव्यापारंवर्णयति उतेव
स्त्रीभिःसहमोदमानोजक्षदुतेवापिभयानिपश्यन्निति लौकिकाअपितथैवस्वप्नंकथयंति आरुक्षंगजमिवगिरिशृंगमद्रा
क्षमिववनराजिमिति तथोपादानेपियद्यपिकरणेषुकर्मकरणविभक्तिर्निर्देशः तथापितत्संपृक्तस्यैवात्मनःकर्तृत्वंद्रष्टव्यं
केवलेकर्तृत्वासंभवस्यदर्शितत्वात् भवतिचलोकेनेकप्रकाराविवक्षायोधायुध्यंतेयोधैराजायुध्यतइति अपिचास्मिन्नुपा
दानेकरणव्यापारोपरममात्रंविवक्ष्यतेनस्वातंत्र्यंकस्यचिद्बुद्धिपूर्वकस्याप्यभावेस्वापकरणव्यापारोपरमस्यदृष्टत्वात् यस्त्वयं
व्यपदेशोदर्शितोविज्ञानंयज्ञंतनुतेइतिसबुद्धेरेवकर्तृत्वंप्रापयतिविज्ञानशब्दस्यतत्रप्रसिद्धत्वान्मनोनंतरपाठाच्च तस्यश्र
द्धैवशिरइतिचविज्ञानमयस्यात्मनःश्रद्धाद्यवयवत्वसंकीर्तनाच्छ्रद्धादीनांचबुद्धिधर्मत्वप्रसिद्धेः

कर्तृत्वेपिकरणविभक्तिर्नविरुध्यतेदृष्टत्वात् अस्तिचकर्तृत्वप्रयोगः विज्ञानंयज्ञंतनुतइत्यादावितिभावः उपादानस्यतत्कर्तृत्वमंगी
कृत्यकेवलात्मनःकर्तृत्वंनिरस्तं इदानींतस्याक्रियात्वात्तत्कर्तृपेक्षेत्याह अपिचेति एवंविज्ञानंजीवइत्यंगीकृत्याजीवस्यकर्तृत्वेतनतत
इतिश्रुतिरुक्तास्रप्रतितत्रायाश्रुत्यानुपहितात्मनःकर्तृत्वमितिमामोविज्ञानंबुद्धिरेवतस्याएवात्रकर्तृत्वमुच्यते तदुपहितात्मनस्त
र्तृत्वसिद्धइत्यभिप्रेत्याह यस्त्विति योयंविज्ञानमय इत्यादिश्रुत्यादिश्रुतिषुविज्ञानशब्दस्यबुद्धौप्रसिद्धत्वादत्रचमनोमयकोशानं
५१ तरंपठितत्वाच्छ्रद्धादिलिंगाच्चबुद्धिरेवविज्ञानमित्यर्थः ॥ : ॥ : ॥

शात॰
टि॰
७८

तत्रैव लिंगांतरमाह विज्ञानं देवा इति । मह यत्तं प्रथमजमित्यादिश्रुतौ हिरण्यगर्भब्रह्मात्मकबुद्धेर्ज्येष्ठत्वोक्तेः अग्रे देवैरिद्धिये त्युपासना
त्ज्येष्ठं ब्रह्म विज्ञानं बुद्धिरेवेत्यर्थः ज्येष्ठ रज्जोक्तिश्च श्रुत्यंतरे यज्ञस्य बुद्धिकार्यत्वोक्तेः अत्रापि यज्ञकर्तृ विज्ञानं बुद्धिरित्याह स एष
इति विवेनेन्यान्यावाचामे जोक्तायज्ञो जायते तस्मिन्नेतस्या वाचः पर्वान्तराभावायत्रेत्यर्थः यत्त्वात्मा बुद्धेः कर्तृत्वे शक्तिवैपरीत्यप्रसंगइ
ति तत्र विविक्तियं ते तदुलाज्ज्वलतिका[illegible] विमति स्यालीतिस्वस्वव्यापारे भृत्यवत्कारकाणां कर्तृत्वस्वीकारादित्याह नचेति नहि बुद्ध्या
दीनां कर्तृत्वे करणत्वं व्याहतं तेनुत्स्यादि[illegible]तस्तमाह उपलब्धीति यथा काष्ठानां स्वव्यापारे कर्तृत्वेऽपि पाकापेक्षया करणत्वं तथा बुद्ध्या
दीनामप्येव मा यथा संकल्पादिक्रियाकर्तृत्वेऽपि उपलब्ध्यपेक्षया करणत्वमित्यर्थः ननु उपलब्धिः कस्य व्यापारः न तस्याह नचेति
उपलब्धेर्नित्यत्वे बुद्ध्यादीनां करणत्वमयुक्तमिति चेदुच्यते अखंडस्यापि चैतन्यस्य तद्विषयावच्छिन्नत्वेन जायते तथा चविषयावच्छिन्न
बुद्धिवृत्तिर्भिन्ना

नाचेति नहि तस्यामा
त्मा केवलः कर्त्ता स्या
त् यस्य यो व्यापारः स
तस्य कर्तेति स्थिते (
रिमतमाह २५ त्रुटि २

विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासत इति च वाक्यशेषात् ज्येष्ठत्वस्य च प्रथमजत्वस्य च बुद्धौ प्रसिद्धत्वात् स एष वाचस्त्विनस्त्रोत
रान्तरे ऽमोयं यज्ञ इति च श्रुत्यंतरे यज्ञस्य वाग्बुद्धिसाध्यत्वावधारणात् नच बुद्धेः शक्तिविपर्ययः करणानां कर्तृत्वाभ्युपगमे
को॰ भवति सर्व[illegible]कारणामेव स्वव्यापारेषु कर्तृत्वस्यावश्यंभावित्वात् उपलब्ध्यपेक्षया त्वेषां करणानां करणत्वं सा चात्म
नः नच तस्यामप्यस्य कर्तृत्वमस्ति नित्योपलब्धिस्वरूपत्वात् अहंकारपूर्वकमपि कर्तृत्वं नोपलब्धुर्भवितुमर्ह
ति अहंकारस्याप्युपलभ्यमानत्वात् नचैवं सति करणांतरकल्पनाप्रसंगः बुद्धेः करणत्वाभ्युपगमात् अभावस्तु शा तृसमा २९
स्त्रार्थवत्त्वेनैव परिहृतः यथाप्राप्तमेव कर्तृत्वमुपादाय समाधिविधानात् तस्मात्कर्तृत्वमप्यात्मन उपाधिनिमित्तमेवे
ति स्थितम् ॥

चैतन्यस्योपलब्धेर्बुद्ध्यादीनां करणत्वं बुद्ध्याद्युपहितस्यात्मनः कर्तृत्वं न केवलस्य नच बुद्धेरेव तत्कर्तृत्वं चैतन्यस्य जडव्यापारत्वा
योगादितिभावः यद्वा ननु बुद्धेः कर्तृत्वे स एवाहंधीगम्यो जीव इति तस्य करणांतरकल्पनीयं तथाचनाममात्रे विवाद इति न केव तर
लात्मनः कर्तृत्वमस्माभिरिति भ्रांतिं निरस्यति अहंकारेति सांख्यनिरासार्थं बुद्धिभेदेनात्मसिद्धिरात्मकाहंकारगते कर्तृत्वे
यदुक्तं तदहंधीगम्यस्य बुद्धिविशिष्टात्मन एव न केवलस्य साक्षिणो भवितुमर्हतीति दृष्टधर्मस्य साक्षिस्वभावत्वायोगात् एवं
विशिष्टात्मनः कर्तृत्वे विशेषणीभूतजडबुद्धेरेव करणत्वोपपत्तेर्न करणांतरकल्पनाप्रसंगः अथात्मे विना केवलबुद्धिक
र्तृत्ववादिनस्तु करणांतरप्रसंगो दुर्वार इत्यर्थः एवं शास्त्रार्थवत्त्वादिहेतूनामात्मनः कर्तृत्वमात्रसाधकत्वेऽपि स्वाभावि
ककर्तृत्वसाधनतामसत्या भावात् फलमेव कर्तृत्वे विध्यादिकर्तृत्वश्रुतीनामुपजीव्या तस्मादसंगत्वविध्यादिकर्तृत्वश्रुती
नामविरोध इति सिद्धं ॥ ॥ ~~[illegible]~~ ॥ ६ टीकाचेद

परात्तु तच्छ्रुतेः यथा स्फटिकलौहित्याध्यासे लोहितत्वस्य करणं तेनायं स्फटिको लोहित इत्यनुभवात् तथा कामादिपरिणामिबुद्धिरा-
त्मनि कर्तृत्वाध्यासकरणमित्युक्तं तदध्यस्तकर्तृत्वमुपजीव्य जीवस्य कारकसम्पन्नत्वादीश्वरस्य कारयितृत्वमुक्तं सूत्राशयमा-
ह यदिदमिति अत्र घटत्वेत्यादि श्रुतीनां कर्तृत्वानन्यथासिद्धत्वविध्यादिश्रुतिभिर्विरोधसमाधानात् स्यात् संगतिः कर्ममीमांसकम-
तेन सर्वं पत्तयति तत्रेत्यादिना बुद्ध्यादिकारकसम्पत्तावीश्वरव्यतिरेके कर्तृत्वव्यतिरेकानुपलब्ध्या नेश्वरः प्रयोजकः किंच प्रयोज-
कत्वेन वैषम्यादिप्रसंग इत्याह क्लेशात्मकेन चेति दत्तोत्तरमिदं चोद्यमिति शंकते नन्विति एवं जीवस्य धर्माधर्मत्वे सिद्धवत्कृत्य तत्सा-

द
परात्तु तच्छ्रुतेः ४० यदिदमविद्यावस्थायामुपाधिनिबंधनं कर्तृत्वं जीवस्याभिहितं तत्किमनपेक्ष्येश्वरं भवति आहो-
स्विदीश्वरापेक्षमिति भवति विचारणा तत्र प्राप्तं तावन्नेश्वरमपेक्षते जीवः कर्तृत्व इति कस्मात् अपेक्षाप्रयोजनाभा-
वात् अयं हि जीवः स्वयमेव रागद्वेषादिदोषप्रयुक्तः कारकान्तरसामग्रीसम्पन्नः कर्तृत्वमनुभवितुं शक्नोति तस्य
किमीश्वरः करिष्यति न च लोके प्रसिद्धिरस्ति कृष्यादिकासु क्रियास्वनडुहादिवदीश्वरोपेक्षितव्य इति क्लेशात्मके-
न च कर्तृत्वेन जन्तून् संसृजत ईश्वरस्य नैर्घृण्यं प्रसज्येत विषमफलं चैषां कर्तृत्वं विदधतो वैषम्यं ननु वैषम्यनै-
र्घृण्ये न सापेक्षत्वादित्युक्तं सत्यमुक्तं सति त्वीश्वरस्य सापेक्षत्वसंभवे सापेक्षत्वं चेश्वरस्य भवति सतोर्जन्तूनां धर्मा-
धर्मयोस्तयोश्च सद्भावः सति जीवस्य कर्तृत्वे तदेव चेत्कर्तृत्वमीश्वरापेक्षं स्यात् किंविषयमीश्व-
रस्य सापेक्षत्वमुच्यते अकृताभ्यागमश्चैवं जीवस्य प्रसज्येत तस्मात्स्वत एवास्य कर्तृत्वमिति ॥ ॥

धर्मा
स्वतन्त्राद् अकृतेति
अनपेक्षस्य प्रवर्तक २

पेक्षत्वाद्विषमजगत्कर्तृत्वमविरुद्धमित्युक्तं संप्रतीश्वराधीनत्वे जीवस्य कर्तृत्वे सिद्धे धर्माधर्मत्वसिद्धिः न द्वत्वसिद्धेस्तत्सापेक्षका-
रयितृत्वसिद्धिः ईश्वरस्य कारयितृत्वे सिद्धे जीवस्य कर्तृत्वसिद्धिरिति चक्रकापत्तेः कर्मसापेक्षत्वं न संभवतीत्युच्यतः
कृत्वा सत्यमिति अल्पकर्मानपेक्षस्य प्रवर्तकत्वं धर्मवतो नराद्युत्तमेनाधर्मवतः खरत्वेन योजयेत् कारुणिकत्वे वा सर्वं सुखि-
न एकरूपाः सृजेदिति जगद्वैचित्र्यविधायिशास्त्रवचनं स्यात् तस्माद्विध्यादिशास्त्रार्थवत्त्वाय रागद्वेषोपेतः स्वत एव जीवस्य
कर्तृत्वे वाच्ये न चाकारयितृत्वश्रुतिविरोधः ॥ ॥ ॥

ईश्वरत्वादिकावासामनिरितिप्राप्ते सिद्धांतयति एतामिति यथाचंदनादिसामग्र्यां सत्यां धर्मव्यतिरेकेस्वव्यतिरेकप्रद्वा भावेपि पुण्यावे पुण्येपत्नकर्मणामभवतीत्यादिशास्त्रप्रामाण्यादेवधर्मस्य हेतुत्वसिद्धिः एवमीश्वरस्यापि पात्रवलात्कारयितृत्व सिद्धिरितिभावः धर्माधर्माभ्यामेवफलवैषम्यसिद्धेरलमीश्वरेणेत्याशंकांवीजेरेवांकुरवैषम्यसिद्धेः पर्जन्यवैयर्थ्यस्यात्

सामग्रीसंपन्नश्चजीवः ४५

एतांप्राप्तिं तु शाब्दे न व्यावर्तयति प्रतिजानीते यदादिति अविद्यावस्थायांकार्यकरणसंघाताविवेकदर्शिनो जीवस्या विद्यातिमिरांधस्य सतः परस्मादात्मनः कर्माध्यक्षात्सर्वभूताधिवासात्साक्षिणश्चेतयितुरीश्वरात्तदनुज्ञयाकर्तृ त्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धिस्तदनुग्रहहेतुकेनैव च विज्ञानेन मोक्षस्य सिद्धिर्भवितुमर्हतीति कुतः तच्छ्रुतेः यद्यपिदोषप्रयुक्तः यद्यपि च लोके कृष्यादिषु कर्मसु नेश्वरकारणत्वं प्रसिद्धं तथापि सर्वास्वेव प्रवृत्तिष्वीश्वरो हेतुः कर्तेति श्रुतेरवसीयते तथाहि श्रुतिर्भवति एषह्येव साधुकर्मकारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवा साधुकर्मकारयति तं यमधो निनीषत इति य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीति चैवंजातीयका नन्वेवं मीश्वरस्य कारयितृत्वे सति वैषम्यनैर्घृण्ये स्यातामकृताभ्यागमश्च जीवस्येति नेत्युच्यते कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ४० तुशब्दश्चोदितदोषव्यावर्तनार्थः प्रयत्नाजीवस्य धर्माधर्मलक्षणः तदपेक्ष्य एवैनमीश्वरः कारयति ततश्चैते चोदिता दोषा न प्रसज्यन्ते जीवकृतधर्माधर्मवैषम्यापेक्ष एव तत्तत्फलानि विषमं विभजेत् पर्जन्यवदीश्वरो निमित्तत्वमात्रेण यथा लोके नानाविधानां गुच्छगुल्मादीनां व्रीहियवादीनां वासाधारणेभ्यः स्वस्वबीजेभ्यो जायमानानां साधारणं निमित्तं भवति पर्जन्यः न ह्यसति पर्जन्ये रसपुष्पफल पलाशादिवैषम्यं तेषां जायते नाप्यसत्सु स्वस्वबीजेषु एवं जीवप्रयत्नापेक्ष ईश्वरस्तेषां शुभाशुभं विदध्या दिति श्लिष्यते तन्नु कृतप्रयत्नमेव जीवस्य परायत्तकर्तृत्वेनोपपद्यते ॥ ॥

यदि विशेषहेतूनां साधारणहेत्वपेक्षत्वान्न वैयर्थ्यं तर्हीश्वरस्यापि साधारणहेतुत्वान्न वैयर्थ्यमित्याह पर्जन्यवदि ति दृष्टान्तं विवृणोति यथेति अतिदीर्घवल्लीप्रययोगुच्छाः पुष्पलवकावा गुल्मास्तु ह्रस्ववल्ल्य इति भेदः ॥

योलोकेभ्यो ६

किमीश्वरस्य कारयितृत्वे जीवस्य कर्तृत्वं न स्यादित्याशयेन उक्तं चोद्यं कापत्तिर्विनायेत्याह नैष दोष इति अध्यापकाधीनस्य पटोः स्वयमध्ययन
कर्तृत्ववद्दर्शनादिभावः चशब्दोक्तं निरस्यति अपि चेति अनेन यज्जीवस्य कर्तृत्वमीश्वरस्य कारयितृत्वं चेति शेषः ईश्वरस्य सापेक्षत्वं विध्यादि
शास्त्रप्रामाण्यान्यथानुपपत्त्या प्रमाणयति कथमित्यादिना एवं सापेक्षत्वे न तस्य वैयर्थ्यं भवति अन्यथानपेक्षत्वे वैयर्थ्यं प्रपंचयति ।
ईश्वर इति तयोः स्थाने स एतं नियुंज्यात् तस्याभिषिच्येत तयोः कार्यं स एव कुर्यादिति यावत् न च स्याज्जीवस्य निरपेक्षेश्वरपरतंत्रत्वाद्वि
ध्यादिशास्त्रस्य किंचित्करमनर्थकं स्यादिति संबंधः पुरुषकारः प्रयत्नः आदिशब्दार्थमाह तथेति एवं चोक्तदोषोक्ताभ्यागमादिः त
स्मात्कर्मसापेक्षेश्वरस्य कारयितृत्वाद्दोषाभावान्नादिसृष्टेर्विध्यादिश्रुत्यविरोध इति सिद्धं अंशापके नित्यः स्वप्रकाशोनादिरकर्ता ।
जीव इति शोधितं तत्त्वंपदार्थस्यास्य ब्रह्मांशकासाधनेन भेदाभेदश्रुतीनां विरोधसमाधानात्संगतिः एवं प्रत्यगभिन्नब्रह्मासिद्धिः सि

नैष दोषः परायत्तेऽपि हि कर्तृत्वे करोत्येव जीवः कुर्वंतं हि तमीश्वरः कारयति अपि च पूर्वप्रयत्नमपेक्ष्येदानीं कारयति पूर्वतरं च
प्रयत्नमपेक्ष्य पूर्वमकारयदिति अनादित्वात्संसारस्येत्यनवद्यं कथं पुनरवगम्यते कृतप्रयत्नापेक्ष ईश्वर इति विहितप्रतिषि
द्धावैयर्थ्यादिभ्य इत्याह एवं हि स्वर्गकामो यजेत ब्राह्मणो न हंतव्य इत्येवंजातीयकस्य विहितस्य प्रतिषिद्धस्य चावैयर्थ्यं भवति
अन्यथा तदनर्थकं स्यात् ईश्वर एव विधिप्रतिषेधयोर्नियुज्येत अत्यंतपरतंत्रत्वाज्जीवस्य तथा विहितकारिणमप्यनर्थेन संसृ
जेत प्रतिषिद्धकारिणमप्यर्थेन ततः प्रामाण्यं वेदस्यास्तमियात् ईश्वरस्य चात्यंतानपेक्षत्वे लौकिकस्यापि पुरुषकारस्य वै
यर्थ्यं तथा देशकालनिमित्तानां पूर्वोक्तदोषप्रसंगश्चेत्येवंजातीयकं [illegible] दोषजातमादिग्रहणेन दर्शयति अं
शो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ४२ जीवेश्वरयोरुपकार्योपकारकभाव उक्तः स च संबद्धयोरेव
लोके दृष्टः यथा स्वामिभृत्ययोर्यथा वाग्निविस्फुलिंगयोः ततश्च जीवेश्वरयोरप्युपकार्योपकारकभावाभ्युपगमात् किं स्वामिभृ
त्यवत्संबंधः आहोस्विदग्निविस्फुलिंगवदिति अस्यां विचिकित्सायामनियमो वा प्राप्नोति अथवा स्वामिभृत्यकारयेव वशि
त्रीशितव्यभावस्य प्रसिद्धत्वात्तद्विध एव संबंध इति प्राप्नोति अतो ब्रवीत्यंश इति जीव ईश्वरस्यांशो भवितुमर्हति यथाग्नेर्विस्फु

हौते नास्ति सिद्धिरिति भेदः पूर्वोक्तोपकार्योपकारकभावाद्दृष्टिमं जीवेशयोः संबंधं विषयीकृत्य तद्विविधदृष्टांतदर्शनात्संशयमाह ततश्चेति
प्रसिद्धस्वस्वामित्वसंबंधसंभवाद्यः कश्चित्संबंध इत्यानियमोऽनयुक्त इत्यरुचेराह अथवेति अनेन यद्यात्मनि नित्यत्वाश्रुतिप्रसिद्ध
भेदकोटिदर्शिना एवं तत्त्वमसीत्यादिश्रुतिसिद्धाभेदकोटिद्वेष्टा तथा च भेदाभेदश्रुतीनां समबलत्वाद्विरोधे सति संबंधानिश्चया
त्संशयापेक्षत्वात्पूर्वोक्तोपकार्योपकारकभावस्यासिद्धिरित्याक्षेपात्संगतिः लोकसिद्धात्मनात्मकभेदानुवादित्वेन भेदश्रुतीनां दुर्ब
लत्वादज्ञातफलवद्भेदश्रुतिस्यान्तसारेणाप्रकल्पितभेदनिर्णयनोंऽशांशीभावः संबंध इति सिद्धांतयति अंश इत्यादिना ॥ ॥

शा॰ त॰
हि॰ ट॰
७५

ईश्वरत्वादिकावासना स्मृतिरिति प्रागेव सिद्धान्तयति एतामिति यथा चन्दनादिसामग्र्यां सत्यां धर्मव्यतिरेकेऽस्त्वव्यतिरेकप्रश्न
भीवेषि पुण्यपापे पुण्येन कर्मणा भवतीत्यादिशास्त्रप्रामाण्याद्धर्मस्य हेतुत्वसिद्धिः एवमीश्वरस्यापि पापत्वबलात्कारयितृत्व
सिद्धिरिति भावः धर्माधर्माभ्यामेव फलवैषम्यसिद्धेरलमीश्वरेणेत्याशंकां बीजैरेवांकुरवैषम्यसिद्धेः पर्जन्यवैयर्थ्यं स्यात्

सामग्री संपन्नस्तु जीवः ४४

एतां प्राप्तिं तदागतेन व्यावर्त्य प्रतिजानीते यदादिति अविद्यावस्थायां कार्यकरणसंघाताविवेकदर्शिनो जीवस्या
विद्यातिमिरान्धस्य सतः परस्मादात्मनः कर्माध्यक्षात् सर्वभूताधिवासात् साक्षिणश्चेतयितुरीश्वरात् तदनुज्ञया कर्तृ
त्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धिः तदनुग्रहहेतुकेनैव च विज्ञानेन मोक्षस्य सिद्धिर्भवितुमर्हतीति कुतः तच्छ्रुतेः
यद्यपि दोषप्रयुक्तः यद्यपि च लोके कृष्यादिषु कर्मसु नेश्वरकारणत्वं प्रसिद्धं तथापि सर्वास्वेव प्रवृत्तिष्वीश्वरो हेतुः
कर्तेति श्रूयते एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवा
साधु कर्म कारयति तं यमधो निनीषत इति य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीति चैवं जातीयका ननु व
मीश्वरस्य कारयितृत्वे सति वैषम्यनैर्घृण्ये स्यातां अकृताभ्यागमश्च जीवस्येति नेत्युच्यते कृतप्रयत्नापेक्षस्तु
विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ४० तथाचेश्वरोदितदोषव्यावर्तनार्थाः प्रयत्नाज्जीवस्य धर्माधर्मलक्षणः तदपेक्ष
यैवैनमीश्वरः कारयति तत्रेश्वरे नैवोदिता दोषा न प्रसज्यन्ते जीवकृतधर्माधर्मवैषम्यापेक्ष एव तत्तत्फलानि वि
षमं विभजेत् पर्जन्यवदीश्वरो निमित्तत्वमात्रेण यथा लोके नानाविधानां गुच्छगुल्मादीनां व्रीहियवादीनां
वा साधारणेभ्यः स्वस्वबीजेभ्यो जायमानानां साधारणं निमित्तं भवति पर्जन्यः न ह्यसति पर्जन्ये रसपुष्पफल
पलाशादि वैषम्यं तेषां जायते नाप्यसत्सु स्वस्वबीजेषु एवं जीवप्रयत्नापेक्ष ईश्वरस्तेषां शुभाशुभं विदध्या
दिति श्लिष्यते ननु कृतप्रयत्नमेव जीवस्य परायत्ते कर्तृत्वे नोपपद्यते ॥ ॥

भोलोकेभ्योऽ६

यदि विशेषहेतूनां साधारणहेत्वपेक्षत्वात् तद्वैयर्थ्यं तर्हीश्वरस्यापि साधारणहेतुत्वान्न वैयर्थ्यमित्याह पर्जन्यवदि
ति दृष्टान्तं विवृणोति यथेति अतिदीर्घवल्लीग्रथयो गुच्छाः पुष्पस्तवका वा गुल्मास्तु ह्रस्वलता इति भेदः ॥

किमीश्वरस्स्कारयितृत्वे जीवस्य कर्तृत्वं न स्यादित्याशङ्कायां उक्तं चक्रकापत्तिर्विना इत्याह नैष दोष इति अध्यापकाधीनस्य पटोः स्वाध्यायन
कर्तृत्ववद्दर्शनादिभावः चक्रकं निरस्यति अपि चेति अनेनैव जीवस्य कर्तृत्व मीश्वरस्य कारयितृत्वं चेति शेषः ईश्वरस्य सापेक्षत्वे विध्यादि
शास्त्रप्रामाण्यानर्थक्यानुपपत्तिप्रमाणायति कथमित्यादिना एवं सापेक्षत्वे तत्स्वैयर्थ्यं भवति अन्यथानपेक्षत्वे वैयर्थ्यं प्रपञ्चयति ।
ईश्वर इति तयोः स्थाने स एव तानि युङ्क्ते तत्र अभिषिच्येत तयोः कार्यं स एव कुर्यादिति यावत् न यावज्जीवस्यानिरपेक्षेश्वरपरमत्वाद्धि
ध्यादिशास्त्रमकिञ्चित्करमनर्थकं स्यादिति संबंधः पुरुषकारः प्रयत्नः आदिशब्दार्थमाह तथेति एवं चोक्तदोषाङ्कनाभ्यागमादिः न
सात्कर्मसापेक्षेश्वरस्य कारयितृत्वादेषदोषवत्यायिश्रुतेर्विध्यादिश्रुत्यविरोध इति सिद्धं अपि पक्षे तिनः स्वपक्षापोनरुक्त्यं
जीव इति शोधितत्वंपदार्थस्य ब्रह्मैकत्वसाधनेन भेदाभेदश्रुतीनां विरोधसमाधानात्संगतिः एवं पक्षप्रत्यगभिन्नब्रह्मसिद्धिः सि

नैष दोषः परायत्तेऽपि कर्तृत्वे करोत्येव जीवः कुर्वन्तं हि तमीश्वरः कारयति अपि च पूर्वप्रयत्नमपेक्ष्येदानीं कारयति पूर्वतरं च
प्रयत्नमपेक्ष्य पूर्वमकारयदिति अनादित्वात्संसारस्येत्यनवद्यं कथं पुनरवगम्यते कृतप्रयत्नापेक्ष ईश्वर इति विहितप्रतिषि
द्धावैयर्थ्यादिभ्य इत्याह एवं हि स्वर्गकामो यजेत ब्राह्मणो न हन्तव्य इत्येवंजातीयकस्य विहितस्य प्रतिषिद्धस्य चावैयर्थ्यं भवति
अन्यथा तदनर्थकं स्यात् ईश्वर एव विधिप्रतिषेधयोर्नियुज्येत अत्यन्तपरतन्त्रत्वाज्जीवस्य तथा विहितकारिणमप्यनर्थेन संसृ
जेत प्रतिषिद्धकारिणमप्यर्थेन ततश्च प्रामाण्यं वेदस्यास्तमियात् ईश्वरस्य चात्यन्तानपेक्षत्वे लौकिकस्यापि पुरुषकारस्य वै
यर्थ्यं तथा देशकालनिमित्तानां पूर्वोक्तदोषप्रसङ्ग इत्येवंजातीयकं [illegible]दोषजातमापद्येत सोऽपि दूषयति अ
णोनानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ४२ जीवेश्वरयोरुपकार्योपकारकभाव उक्तः स च संबद्धयोरेव
लोके दृष्टो यथा स्वामिभृत्ययोर्यथा वाग्निविस्फुलिङ्गयोः ततश्च जीवेश्वरयोरुपकार्योपकारकभावाभ्युपगमात्किं स्वामिभृ
त्यवत्संबंधः आहोस्विदग्निविस्फुलिङ्गवदिति अस्यां विचिकित्सायामनियमो वा प्राप्नोति अथ वा स्वामिभृत्यप्रकारेष्वेवेशि
त्रीशितव्यभावस्य प्रसिद्धत्वात्तद्विध एव संबंध इति प्राप्नोति अतो ब्रवीत्यंश इति जीव ईश्वरस्यांशो भवितुमर्हति यथाग्नेर्विस्फु

लिङ्गो न तत्सिद्धिरिति भेदः पूर्वोक्तोपकार्योपकारकभावात्तिमं जीवेशयोः संबंधं विषयीकृत्य द्विविधदृष्टान्तदर्शनात्संशयमाह तत इति
प्रसिद्धत्वात्स्वामित्वसंबंधसंभवाच्च यः कश्चित्संबंध इत्यनियमो नयुक्त इत्यरुचेराह अथ वेति अनेन यश्चात्मनि तिष्ठन्नित्यादिश्रुतिप्रसिद्ध
भेदकोटिदर्शिता एवं तत्त्वमसीत्यादिश्रुतिसिद्धाभेदकोटिर्द्रष्टव्या तथा च भेदाभेदश्रुतीनां समबलत्वाद्धि विरोधे सति संबंधानिश्चया
त्संशयापत्तस्य पूर्वोक्तोपकार्योपकारकभावस्यासिद्धिरित्याक्षेपात्संगतिः लोकसिद्धानपेक्षकभेदानुवादित्वेन भेदश्रुतीनां दुर्ब
लत्वादज्ञातफलवदभेदश्रुतिं न सारेण प्रकल्पितभेदनिर्वचनो शांशीभावः संबंध इति सिद्धान्तयति अंश इत्यादिना ॥ ॥

शा०व० हि० रि० ७६

अनेनैतां शास्त्रे पि निष्कलेश्वरस्य कथं तां शाप्रमत आह अंश इति जीव इत्यनुषंगः भेद एव चेत्स्वस्वामिभावो युक्तो नांशांशिभाव इति शंकते न नु चेति अभेदस्यापि सत्वाद् अंशांशिभाव इत्याह अन्य इति पंचास्ति गच्छति यदा सैयो नाम रूपे निर्माय प्रविश्य व्यवहरत्स्वयं तेनेति विद्वानस्य तो भवतीति श्रुत्यर्थः श्रुतिसिद्धाभेदे युक्तिमाह चैतन्यं चेति जीवेश्वरयोरेव चेतनत्वादित्यर्थः अस्य सहस्रशीर्षा पुरुष इत्याद्य पंचो महिमा विभूतिः पुरुषस्त्वस्यात्मरूपः ज्यायान्महत्तरः भूतानि देहिनो जीवा इत्यर्थनियामकमाह अहिंसन्निति तीर्थानि शा

अंश इवांशः नहि निरवयवस्य मुख्योंशः संभवति कस्मात्पुनः निरवयवत्वात्स एव न भवति नानाव्यपदेशात् सोन्वेष्टव्यः स विजिज्ञासितव्य एतमेव विदित्वा मुनिर्भवति य आत्मनि तिष्ठन्नात्मानमंतरो यमयतीति चैवंजातीयको भेदनिर्देशो नासति भेदे युज्यते ननु चायं नानाव्यपदेशः सुतरां स्वामिभृत्यसारूप्ये युज्यत इति अत आह अन्यथा चापीति न नानाव्यपदेशादेव केवलादंशत्वप्रतिपत्तिः किं तर्ह्यन्यथा चापि व्यपदेशो भवत्यनानात्वस्य प्रतिपादकः तथा हि एके शाखिनो दाशकितवादिभावं ब्रह्मण आमनंत्याथर्वणिका ब्रह्मसूक्ते ब्रह्म दाशा ब्रह्म दासा ब्रह्मेमे कितवा इत्यादिना दाशा य एते कैवर्ताः प्रसिद्धा ये चामी दासाः स्वामिष्वात्मानमुपक्षिपंति ये चान्ये कितवा द्यूतकृतस्ते सर्वे ब्रह्मैवेति हीनजंतूदाहरणेन सर्वेषामेव नामरूपकृतकार्यकरणसंघातप्रविष्टानां जीवानां ब्रह्मत्वमाह तथान्यत्रापि ब्रह्मप्रक्रियायामेवायमर्थः प्रपंच्यते त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो दंडेन वंचसि त्वं जातो भवसि विश्वतोमुख इति सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन्यदास्ते इति नान्योतोस्ति द्रष्टेत्यादिश्रुतिभ्यश्चास्यार्थस्य सिद्धिः चैतन्यं चाविशिष्टं जीवेश्वरयोर्यथाग्निविस्फुलिंगयोरौष्ण्यं अतो भेदावगमाभ्यामंशत्वावगमः मंत्रवर्णाच्च ४४ मंत्रवर्णश्चैतमर्थमवगमयति तावानस्य महिमा ततो ज्यायांश्च पूरुषः पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीत्यत्र भूतशब्देन जीवप्रधानानि स्थावरजंगमानि निर्दिशति अहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्य इति प्रयोगात् अंशः पादो भाग इत्यनर्थांतरं तस्मादप्यंशत्वावगमः कुतश्चांशत्वावगमः अपि च स्मर्यते ४५ ईश्वरगीतास्वपि चेश्वरांशत्वं जीवस्य स्मर्यते ममैवांशो जीवलोके जीवभूतः सनातन इति तस्मादप्यंशत्वावगमः यत्तूक्तं स्वामिभृत्यादिष्वेवेशितव्यभावो लोके प्रसिद्ध इति यद्यप्येषा लोकप्रसिद्धिः तथापि शास्त्रात्त्वत्रांशांशित्वमी

५ कुतश्चांशत्वावगमः

स्थितिकर्माणि तेभ्योन्यत्र प्राणिहिंसामकुर्वन्ब्रह्मलोकमाप्नोतीत्यर्थः अत्र भूतपाठस्य प्राणिषु प्रयोगात्सोक्तमंत्रेपि तथेति भावः भूतानि पाद इत्येषांशत्वं कुतस्तत्राह अंशः पाद इति जीवस्य पुरुषस्तक्तमंत्रोक्तभगवदंशत्वे भगवद्गीतामुदाहरति तत्रकारः अपि चेति अत्यंतभिन्नेष्वीशितृशितव्यभावप्रसिद्धेरीशितव्यभावप्रसिद्धेरीशितव्यजीवस्य कथमीश्वरांशत्वमित्याशंका कल्पित भेदेनापीशितव्यत्वोपपत्तेरनन्यथासिद्धाभेदशास्त्रबलादंशत्वमित्याह यत्त्वित्यादिना ॥

औपाधिकेश्वरस्य नियंतृत्वे जीव एव तंत्रे नियंता किं न स्यादित्यत आह निरतिशयेति नितरां हीनः शरीराद्युपाधिरज्ञानिकोपाधिनारत-
म्यादीशेशितव्यव्यवस्थानवस्तुता नेत्युक्तं सुरेश्वराचार्यैः ईशेशितव्यसंबंधः प्रत्यगज्ञानहेतुजः सम्यग्ज्ञाने तमोध्वस्तावीश्वरा-
णामपीश्वरः कुत इति उक्तत्वमेव नारयति तत्राहेति ईश्वरांशो सांशदुःखे दुःखी अंशित्वाद्देवदत्तवदित्यर्थः ततः किं तत्राह ततश्चे-
ति ज्ञानात्सर्वांशदुःखसमष्टिप्राप्त्यपेक्षया संसारो वरं जन्मसु दुःखमात्रानुभवमात्रादित्यर्थः नैवं पर इति प्रतिज्ञां विभजते य-

निरतिशयोपाधिसंपन्नश्चेश्वरो निहीनोपाधिसंपन्नान्जीवान्प्रशास्तीति न किंचिद्विप्रतिषिध्यते अत्राह ननु जीवे-
श्वरयोरंशांशित्वाभ्युपगमादीयेन संसारदुःखोपभोगेनांशिन ईश्वरस्यापि दुःखित्वं स्यात् यथा लोके हस्तपाद्याद्यन्यत-
माङ्गगतेन दुःखेनाङ्गिनो देवदत्तस्य दुःखित्वेन तद्वत् ततश्च तत्प्राप्तानां महत्तरं दुःखं प्राप्नुयात् अतो वरं पूर्वावस्था संसा-
र एवास्त्विति सम्यग्दर्शनानर्थक्यप्रसंगः स्यादिति अत्रोच्यते प्रकाशादिवन्नैवं परः ४५ यथा जीवः संसारदुःखमनुभवति नै-
वं पर ईश्वरोऽनुभवतीति प्रतिजानीमहे जीवो ह्यविद्यावेशवशाद्देहाद्यात्मभावमिव गत्वा तत्कृतेन दुःखेन दुःखी-
त्यहमित्यविद्यया कृतं दुःखोपभोगमभिमन्यते नैवं परमेश्वरस्य देहाद्यात्मभावो दुःखाभिमानो वास्ति जीवस्यापि अवि-
द्याकृतनामरूपनिर्वृत्तदेहेन्द्रियाद्युपाध्यविवेकभ्रमनिमित्त एव दुःखाभिमानः न तु पारमार्थिकोऽस्ति यथा च स्वदेह-
गतदाहच्छेदादिनिमित्तं दुःखं तदभिमानभ्रान्त्यानुभवति तथा पुत्रमित्रादिगोचरमपि दुःखं तदभिमानभ्रान्त्यैवानु-
भवत्यहमेवं मित्रमित्येवं स्नेहवशेन पुत्रमित्रादिष्वभिनिविशमानः ततश्च निश्चितमेतदवगम्यते मिथ्याभिमानभ्रम-
निमित्त एव दुःखानुभव इति व्यतिरेकदर्शनाच्चैवमवगम्यते तथा हि पुत्रमित्रादिमत्सु बहुषूपविष्टेषु तत्संबंधाभि-
मानिष्वितरेषु च पुत्रो मृतो मित्रं मृतमित्येवमाद्युद्घोषिते येषामेव पुत्रादिमत्त्वाभिमानस्तेषामेव तन्निमित्तं दुःखमु-
त्पद्यते नाभिमानहीनानां परिव्राजकानां अतश्च लौकिकस्यापि पुंसः सम्यग्दर्शनार्थवत्त्वं दृष्टं किमु तद्विषयशू-
न्यादात्मनोऽन्यद्वस्त्वन्तरमपश्यतो नित्यचैतन्यमात्रस्वरूपस्येति तस्मान्नास्ति सम्यग्दर्शनानर्थक्यप्रसंगः ॥ ॥

पुत्रोहमेव मित्र ५४

श्री।

यथा जीवस्तिदेवदत्तदृष्टान्ते भ्रान्तिकात्मकमेकरूपदुःखसामग्रीमत्त्वमुपाधिः तदभावान्नेश्वरस्य दुःखित्वमासिद्धं चैतदभेदेऽपि विं-
योर्धर्मव्यवस्थैतीति भावः दुःखस्य भ्रान्तिकत्वं प्रपंचयति जीवस्यापीत्यादिना भ्रान्तौ सत्यां दुःखमिति तदन्वयमुक्त्वा भ्रान्त्यभावे दुः-
खाभावदर्शनाद्भ्रान्तिकं दुःखमिति निश्चीयत इत्याह व्यतिरेकेति इतरेषु अभिमानशून्येष्वित्यर्थः जीवस्यापि सम्यग्ज्ञाने दुःखाभावो दृष्टः किं-

वाचां नित्यसर्वज्ञेश्वरस्येत्याह अतश्चेति॥

शात॰
टि॰ २॰
७७

एवमंशित्वे हेतोः सोपाधित्वमुक्त्वा यो धर्मी स वस्तुतः सांशो धर्मवानिति व्याप्तिं स्थलत्रये व्यभिचारयति प्रकाशादिवदिति वक्तुं तः १
स्यांशाद्दुःखित्वसाध्यस्य देवदत्तदृष्टान्ते वैकल्पमप्याह जीवस्येति कल्पितदुःखित्वसाध्यं त्वभ्युपायाभावादीश्वरे नास्तीत्युक्तं किं च जीव
स्यावस्तुतो दुःखित्वानुमानेन युक्तं आगमबाधादित्याह तथा चेति दुःखितत्वाद्वाव्योपदेशानर्थक्यादित्यर्थः स्मरन्त्यपि चानुमानं बाध्यमित्या
ह स्मरन्ति चेति सूत्रं व्याचष्टे स्मरन्तीति तत्र जीवपरयोर्मध्ये कर्मात्मा कर्मात्मा कर्मी अयं जीवः दशेन्द्रियाणि पंच प्राणाः मनो बुद्धिश्च

प्रकाशादिवन्नेति निदर्शनोपन्यासः यथा प्रकाशः सौरश्चान्द्रमसो वा वियद्व्याप्यावतिष्ठमानोऽङ्गुल्याद्युपाधिसंबंधात्तेष्वृजु
वक्रादिभावं प्रतिपद्यमानेषु तद्भावमिव प्रतिपद्यमानोऽपि न परमार्थतस्तद्भावं प्रतिपद्यते यथा वाकाशो घटादिषु गच्छत्सु गच्छ
न्निव भाव्यमानोऽपि न परमार्थतो गच्छति यथा वोदशरावादिकम्पनात्तत्स्थे सूर्यप्रतिबिम्बे कम्पमानेऽपि न तद्वान्सूर्यः कम्पते एवमवि
द्याप्रत्युपस्थापिते बुद्ध्याद्युपहिते जीवाख्येंऽशे दुःखायमानेऽपि न तद्वानीश्वरो दुःखायते जीवस्यापि दुःखप्राप्तिरविद्यानिमित्ता
वेत्युक्तं तथा चाविद्यानिमित्तजीवभावव्युदासेन ब्रह्मभावमेव जीवस्य प्रतिपादयन्ति वेदान्तास्तत्त्वमसीत्येवमादयः तस्मान्नास्ति
जैवेन दुःखेन परमात्मनो दुःखित्वप्रसंगः स्मरन्ति च ४६ स्मरन्ति च व्यासादयः यथा जैवेन दुःखेन न परमात्मा दुःखायत इति तत्र यः
परमात्मा हि स नित्यो निर्गुणः स्मृतः न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैः स युज्यते स सप्त
दशकेनापि राशिना युज्यते पुनरिति च शब्दात्समामनन्ति चेति वाक्यशेषः तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति एकस्त
था सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्य इति चात्राह यदि तर्ह्येक एव सर्वेषां भूतानामन्तरात्मा स्यात्कथमनुज्ञापरिहा
रौ स्यातां लौकिकौ वैदिकौ चेति ननु चांशो जीव ईश्वरस्येत्युक्तं तद्भेदाच्चानुज्ञापरिहारौ तदाश्रयावव्यतिकीर्णावुपपद्येते किमत्रो
च्यत इत्युच्यते नैतदेवमनेनांशत्वमपि जीवस्याभेदवादिन्यः श्रुतयः प्रतिपादयन्ति तत्सृष्ट्वा तदेवानुप्राविशत् नान्योऽतोऽस्ति द्रष्टा मृत्योः स
मृत्युमाप्नोति य इह नानेव पश्यति तत्त्वमसि अहं ब्रह्मास्मीत्येवंजातीयकाः ननु भेदाभेदावगमाभ्यामंशत्वं सिध्यतीत्युक्तं स्या
देवं यद्युभावपि भेदाभेदौ प्रतिपादयिषितौ स्यातां अभेद एव त्वत्र प्रतिपादयिषितः ब्रह्मात्मत्वप्रतिपत्तौ पुरुषार्थसिद्धेः स्वा
भावप्राप्तस्तु भेदोऽनूद्यते न च निरवयवस्य ब्रह्मणो मुख्योंऽशो जीवः संभवतीत्युक्तं तस्मात्पर एवैकः सर्वेषां भूतानामन्तरात्मा ॥

ति समुदायः संख्या कोशराशिर्लिंगं सूत्रे च शब्दः श्रुतिसमुच्चयार्थ इत्याह च शब्दादिति यथादित्यः प्रकाशदोषैर्न लिप्यते तथेत्यर्थः यः १
तो वा ह्यासंगत्वात्तत्र लिप्यते एवमंशित्वमुक्तं तत्त्वमीश्वरे दोषं निरस्यांशाद् इत्युक्तजीवस्यांशत्वं देहाद्युपाधिकमिति स्फुटयितुमस्य न तस्वरूपैक्यमा
दावादिपति अथाह इत्यादिना कथं तर्हि तन्वयः तद्भेदादंशभेदाच्च निरवयवब्रह्मणो मुख्यांशो न संभवतीति वदन्नसिद्धांतिनाभेदोना

न वयं भेदं स्यात् त्वं नरस्य गवद्रूमः किं तर्हि मिथ्यात्वं वदामः तथा च देहाद्युपाधिभेदेनैकस्य जीवानामात्मब्रह्मबोधात्कल्पितभेदाद्देहव्यवहारोपपत्ति
रिति तत्रैव स्मनाधृते तामित्यादिना ननु भ्रांतेः कृतं त्वि तत्तोऽव्यवहारविच्छेदः स्यादित्यत आह न स स्यादित्यादिना प्रश्नेनास्तेन ज्ञावि
शेषाभेदः अनियोज्यत्वाद्ब्रह्मविदः शास्त्रानर्थक्यमिष्टमित्याह नस्यति नियोगविषयदेहाभावः द्वान्तस्साध्ये नियोगानुपपत्तेन ब्र
ह्मविन्नियोज्य इत्यर्थः ननु आमुष्मिकफलहेतुककर्मणि देहभिन्नात्मविवेकिन एवाधिकारो वाच्यः तथा च ब्रह्मविन्नियोज्यः विवेकित्वात्कृ
र्माधिकारिवदिति शंकते शरीरव्यतिरेकेति परोक्षविवेकस्यापरोक्षभ्रमाविरोधित्वात्कर्मणि देहाभेदभ्रमोऽस्ति तथा च भ्रमवाधि

तोऽभ्रमः अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवत् ४८ ऋतौ भार्यामुपेयादित्यनुज्ञा गुर्वंगनां नोपगच्छेदिति परिहारः त
थाग्नीषोमीयं पशुं संज्ञपयेदित्यनुज्ञा न हिंस्यात्सर्वा भूतानीति परिहारः एवं लोकेऽपि मित्रमुपसेवितव्यमित्यनुज्ञा शत्रुः परिह
र्तव्य इति परिहारः एवं प्रकारावनुज्ञापरिहारावेकत्वेऽप्यात्मनो देहसंबंधात् कः पुनर्देहसंबंधः देहादिरयं संघातोऽहमेवेत्यात्म
नि विपरीतप्रत्ययोत्पत्तिः दृष्टा च सर्वप्राणिनामहं गच्छाम्यहमागच्छाम्यहमंधोऽहमनंधोऽहं मूढोऽहममूढ इत्येवमात्मिका न
ह्यस्याः सम्यग्दर्शनादन्यन्निवारकमस्ति प्राक्तु सम्यग्दर्शनात्प्रततैषा भ्रांतिः सर्वजंतुषु तदेवमविद्यानिमित्तदेहाद्युपा
धिसंबंधकृताद्विशेषादैकात्म्याभ्युपगमेऽप्यनुज्ञापरिहारावेवकल्पेते सम्यग्दर्शिनस्तर्ह्यनुज्ञापरिहारानर्थक्यं प्राप्तं न त
स्य कृतार्थत्वान्नियोज्यत्वानुपपत्तेः हेयोपादेययोर्हि नियोज्यो नियोक्तव्यः स्यात् आत्मनस्त्वतिरिक्तं हेयमुपादेयं वा व
स्त्वपश्यन्कथं नियुज्येत न चात्मात्मन्येव नियोज्यः स्यात् शरीरव्यतिरेकदर्शिन एव नियोज्यत्वमिति चेत् न तत्संहतत्वा
भिमानात् सत्यं व्यतिरेकदर्शिनो नियोज्यत्वं तथापि व्योमादिवद्देहाद्यसंहतत्वमपश्यत एवात्मनो नियोज्यत्वा [illegible]
भिमानः न हि देहाद्यसंहतत्वदर्शिनः कस्यचिदपि नियोगो दृष्टः किमुतैकात्म्य
दर्शिनः न च नियोगाभावात्सम्यग्दर्शिनो यथेष्टचेष्टाप्रसंगः सर्वत्राभिमानस्यैव प्रवर्तकत्वात् अभिमानाभावाच्च
सम्यग्दर्शिनः तस्माद्देहसंबंधादेवानुज्ञापरिहारौ ॥

तिपरिहरति नेत्यादिना यथा व्योम देहाद्यसंहतं तद्वद्देहमित्यपश्यतामभ्रांतस्येत्यर्थः ब्रह्मविन्नियोज्यः अभ्रांतत्वात्सुषुप्त
वदित्याह नहीति देहाद्यसंहतत्वदर्शिनोऽसंहतत्वदर्शनस्यात्यन्तभेदभ्रांतिरहितस्य सुषुप्तस्येव यावत् अजस्याभिमान
भावकाले नियोज्यत्वं दृष्टं किमु वाच्यमात्मविद इत्यर्थः अनियोज्यत्वे बाधकं तर्कं प्रांतः परिहरति न चेति विषयवैराग्यस्य
ज्ञानार्थमभ्यस्तस्य ज्ञानानंतरमन्वृत्त्या विषयेषु प्रवर्तकरागनिवृत्तेर्नीतिप्रसंगाद्धूत्यर्थः तदुक्तं भगवता रसोऽप्यस्य
परं दृष्ट्वा निवर्तते इति एवमननुज्ञादिप्रसंगेनानियोज्यत्वं विद्वदत्कामकृतमुपसंहरति तस्मादिति ॥ ॥

संबंधात्स्यात्तो देहे संबंधो देह ३८

शा॰भा॰
टि॰
७८

एकस्याप्युपाधिभेदात् अन्तरावीतिहारयोर्दृष्टान्तमाह ज्योतिरादिवदिति कथं सन्ततीति कथावादोऽस्य विंशमशानाग्रिरित्यर्थः पांकोन्तरत्वेनस्त
म्बाचष्टे तानामित्यादिना यद्यपिस्थूलदेहसंबधाउपादानपरित्यागोस्यानां तथाप्यन्यकृतकर्मफलमित्र्शाणापि प्रजेयुते निकर्मफल
व्यतिकरः साकार्यस्यादेहविशिष्टस्यस्वर्गादिभोगादियोगतन्नविशिष्टात्मन एकस्यैवभोक्तृत्वात् तस्मात्स्वगी नरकी चेति व्यवस्थासि
द्धयस्मान्ममस्वरूपभेदोवाच्यइतिपांकार्थः भवतदासौ कार्यं यद्यनुपहितात्मन एवभोक्तृत्वस्यान्वत्वेनदर्शि तद्गुणसाधुत्वादि
सवत्रामोत्स्यापिबुद्ध्युपहितस्येवकर्तृत्वादिस्यापनात् तथा वबुद्धेः परदेहासंबधानुउपहितजीवस्यनास्ति परदेहसंबंधउ
तिबुद्धिभेदेनभोक्तृभेदान्नकर्मादिसांकार्यमिति तत्ताधानार्थः अंशो नानाव्यपदेशात् तत्रजीवस्याप्रांशत्वंघटाकाशस्येवोपाधावच्छेद
बुद्ध्यांशत्वं प्रतिएवकारेणावच्छेदपक्षातिचित्त्वचयन्नरूपप्रतिरूपावभवत्यादिश्रुतिसिद्धप्रतिबिंबपक्षमपन्यस्यतिभे

ज्योतिरादिवत् यथा ज्योतिषप्रकाशस्याग्निः कथादात्मादिक्रियतेनेनरः यथा चप्रकाशः एकस्यापिसवितरमेध्यदेशसं
बंधःपरिह्रियतेनेनरः स्तुचिभुमिष्टः तथा भौमाः प्रदेशाः वज्रवैदूर्यादयउपादीयन्ते भौमाअपिसंतोनरकलेवरादि
यःपरिह्रियन्ते [illegible] तथा सत्रपुरीषगवापवित्रतया परिगृह्यतेनदेवजातंतरेपरिवर्ज्यतेतद्वत् असंततेश्चा
व्यतिकरः ४८ स्यांतानामानुज्ञापरिहाराद्वकस्यात्मनो देहविशेषयोगात् यत्त्वयंकर्मफलसंबंधः सर्वैकात्म्याभ्युप
पमे व्यतिकीर्यन्त स्वामिकत्वादिति चेत् नेत्तदेवमसततेः नहिकर्तृभोक्तृश्चात्मनः संततिः सर्वशरीरैःसंबंधोस्ति
अधि॰५ पाधितंत्रोहिजीवइत्युक्तंउपाधिसंततानाच्चनास्तिजीवसंतानः ततश्चकर्मव्यतिकरःफलव्यतिकरोवानभविष्यति
आभासएवच ५० आभासएवचैषजीवः परस्यात्मनो जलसूर्यकादिवत्प्रतिपत्तव्यः नसएवसाक्षान्नापिवस्त्वंतरं
अतश्चयथानैकस्मिञ्जलसूर्यकेकंपमानेजलसूर्यकांतरंकंपते एवंनैकस्मिञ्जीवेकर्मफलसंबंधिनिजीवांतर
स्यतत्संबंधः एवमव्यतिकरएवकर्मफलयोः आभासस्यचाविद्याकृतत्वात् तदाश्रयस्यसंसारस्याविद्याकृतत्वोप
पत्तिस्तद्व्युदासेनचपरमार्थिकस्यब्रह्मात्मभावस्योपदेशोपपत्तिः॥

गवान्सूत्रकारः आभासएवचेति परमात्मैवान्तःपहितोजीवोनभवति उपाधिनभवात् नापितत्तोभिन्नः सएवरूहप्रविष्टः इ
त्यादिभेद श्रुतिस्मृति विरोधात् तस्मादविद्यातत्कार्यबुद्ध्यादिप्रतिबिंबएवजीवइत्यर्थः अस्मिन्पक्षे बुद्धिप्रतिबिंबभेदात्स्वर्गीन
रकीत्यादिव्यवस्थाजीवत्वस्याविद्यकत्वाद्विद्ययामोक्षश्चेत्युपपद्यतइत्याह अतश्चेत्यादिना यत्तुयंभास्करस्यप्रलापः प्रतिबिंब
स्यतोपाधिसंसृष्टत्वाकल्पितत्वेकिंतत्स्वरूपेणोवानःकल्पितप्रतिबिंबस्यसत्कोऽस्यिनयोगान्नजीवेत्वमिति तिद्धांतरहस्याज्ञानकृत
इत्युपेक्षणीयः यदिदर्पणोमुखमस्मुक्तारंजनवत्कल्पितंतर्हि नेदरंजनमिति स्वरूपबाधवन्नेदंमुखमितिबाधःस्यात्तोनास्तिदर्प
णेमुखमितिसमानत्वादान्नदीयमुखमेवेदमित्यबाधितप्रत्यभिज्ञानुभवात्सहरूपेत्वेनवकल्पितंप्रवेशावाक्येश्चाविकृतब्रह्म

७८

पातञ्जलिसूत्राणि सिद्धार्थस्त्रीत्यांशपत्नौवाऽत्यानामप्युपोषितेष्वप्याह्निकं भवति॥

नोभवति च अवगतम् वायौधिषणिका परिपूर्णम् ॥

ते

प्रदेशपक्षे दोषान्तरमाह प्रदेशेति यस्मिन्नात्मप्रदेशे अदृष्टोत्पत्तिः स किं चलः स्थिरो वा नाद्यः अचलैकदेशिन्यंशस्य चलनवि
भागयोरसंभवात् एवात्मवादपाताच्च द्वितीये तस्मिन्नेव प्रदेशे परस्पराविभागदर्शनाददृष्टमत्तोऽसकेनापि शरीरेणादृष्टयो-
गात्मनो भोगप्रसंगः यद्यात्मभेदात्प्रदेशयोर्भेदः तदापि योरेकदेहान्तर्भावाद्भोगसांकार्यं तदवस्थमावयवात्मवादप्रसं
गश्च किंच यत्तु यत्रात्मनः प्रदेशे शरीरादिसंयोगाददृष्टमुत्पन्नं तत्रैवाचलप्रदेशास्थितमिति स्वर्गादिशरीराव
च्छिन्नात्मनः दृष्टाभावाद्भोगो न स्यात् अतः प्रदेशभेदो न व्यवस्थापकः यत्तत्रोत्पन्नमदृष्टं स्वाश्रये यत्र कविद्भोगहेतुरि-
ति स्वर्गादिभोगसिद्धिरिति तत्र भोगशरीरादेरस्वादृष्टमानाभावादिति भावः यदपि केचिदाहुः मनस एकत्वेप्यात्म-

प्रदेशविशेषाभ्युपगमेपि द्वयोरात्मनोः समानसुखदुःखभाजोः कदाचिदेकैनेव तावच्छरीरेणोपभोगसिद्धिः।
स्यात् समानप्रदेशस्यापि द्वयोरात्मनोरदृष्टस्य संभवात् तथाहि देवदत्तो यस्मिन्प्रदेशे सुखदुःखमन्वभूत्तत्प्रदेशा स्मा२
दपक्रांते तच्छरीरे यज्ञदत्तशरीरे च तद्देशमनुप्राप्ते तस्यापीतरेण समानः सुखदुःखोत्पत्तिभवोदयेन तत्तस्या
त यदि देवदत्तयज्ञदत्तयोः समानप्रदेशमदृष्टं न स्यात् स्वर्गाद्युपभोगप्रसंगश्च प्रदेशवादिनः स्याद्ब्राह्म
णादिशरीरप्रदेशाददृष्टनिष्पत्तेः प्रदेशांतरवर्तित्वाच्च स्वर्गाद्युपभोगस्य सर्वगतत्वानुपपत्तिश्च बहूना
मात्मनां दृष्टान्ताभावात् यदनावतत्वे केवहवः समानदेशाः स्युरिति रूपादय इति चेन्न तेषामपि धर्मिणो ना
भेदात् लक्षणभेदाच्च न तु बहूनामात्मनां लक्षणभेदोस्ति ॥

नाभेदेन संयोगव्यक्तीनां भेदात् कयाचित्संयोगव्यक्त्या कस्मिंदेवात्मन्यदृष्टादिकमित्यसांकर्यमिति तत्र संयोगव्यक्तीनां वैजा
त्याभावेन सर्वासामेवैकदेहात्मस्य सर्वात्मदृष्टहेतुत्वापत्तेः यथा च सर्वात्मनामेकस्मिन्देहे भोक्तृत्वं दुर्वारं किंच बहूनावि
भुत्वमंगीकृत्य सांकर्यमङ्क्रसंप्रतिकर्तव्यं सा विभुत्वमसिद्धमहमिहैवास्मीत्यल्पत्वानुवादात् मानाभावाच्चेत्याह सर्वगत
त्वानुपपत्तिश्चेति किंच बहूनां विभुत्वे समानदेशत्वाच्च तच्चायुक्तमदृष्टत्वादित्याह यदेति ननु रूपरसादीनामेकत्र
दृष्टत्वं दृष्टमिति चेत् न अर्थेष्वमलक्षिमत्तो दृष्टान्तः रूपस्य तेजोमात्रत्वाद्रसस्य जलमात्रत्वाद्गंधस्य पृथिवीमात्रत्वात् उत्पत्तेन तल्लक्ष-
ण स्वस्वधर्मस्य शनाभेदात्तेजआदिधर्मातिरिक्तवत्वाभावात् किंचात्मनां बहुत्वमप्यसिद्धं आत्मत्वरूपलक्षणस्याभेदात्तथा
च देवदत्तात्मा यज्ञदत्तात्मा यज्ञदत्तात्मनो न भिन्नः आत्मत्वाद्यज्ञदत्तात्मवत् ॥ रामाय नमः ॥

अत्रवैशेषिकाःप्रकल्पते अन्त्यविशेषेति नित्यद्रव्यसमवेतयोर्विशेषास्तेचस्वयंस्वाश्रयव्यावर्तकाएवनस्वेषांव्यावर्त
कमपेक्षंतेइत्यभ्युपगच्छंते तथाचविशेषरूपलक्षणभेदाद्भवत्यात्मभेदइत्यर्थः नतावदात्मस्वनात्मनःसकाशा(
द्भेदज्ञानायविशेषकल्पना आत्मत्वादेवानात्मभेदसिद्धेः नाप्यात्मनामिथोभेदज्ञानार्थंतत्कल्पना आत्मभेदस्या
प्युपपत्तिसिद्धेः नचविशेषभेदकल्पनायुक्ताआत्मभेदत्तमावात्मस्थविशेषभेदसिद्धिस्तत्सिद्धौतद्भ्रितरेतरान्योन्याश्र
यादितिपरिहारार्थः यत्तुबहूनांविभुत्वेआकाशादिकालदृष्टांतइतिसोप्यसंमतइत्याह आकाशादीनामि(

ग२

अंत्यविशेषवशाद्भेदोपपत्तिरितिचेन्नभेदकल्पनाया अंत्यविशेषकल्पनायाश्चेतरेतराश्रयत्वात् आ
काशादीनामपिविभुत्वंब्रह्मवादिनोसिद्धंकार्यत्वाभ्युपगमात् तस्मादात्मैकत्वपक्षएवसर्वदोषाभाव
इतिसिद्धं ॥ इतिश्रीमच्छारीरकमीमांसाभाष्येशंकरभगवत्पादकृतौद्वितीयाध्यायस्यतृतीयःपा
दः॥३॥

तिविभुत्वस्यैकत्वनियतत्वंवाच्यम्विभुभेदः यथैकस्मिन्नाकाशेभेरीवीणादिभेदेनतारमंद्रादिशब्दव्यवस्थाएवमे
कस्मिन्नप्यात्मनिबुद्ध्युपाधिभेदेनसुखादिव्यवस्थोपपत्तेरात्मभेदंविनाव्यवस्थानुपपत्तेरहंकृत्वात्मसुधाभेदकल्पनेत्यप
स्तेहरति तस्मादिति एवंभोक्तृश्रुतीनांविरोधाभावात् ब्रह्मणएवायंसमन्वयइतिसिद्धं इतिश्रीमत्परमहंसपरि
व्राजकाचार्यश्रीगोविंदानंदभगवत्कृतौशारीरकमीमांसाव्याख्यायांभाष्यरत्नप्रभायांद्वितीयस्याध्यायस्यतृ(
तीयःपादः॥३॥

एवं स्वमते स्वरूपैक्येप्युपहितजीवभेदाद् असांकर्यमुक्तं संप्रति सूत्रे चकारसूचितं परेषां सांकार्यवत्त्वमुपक्रमते यथानित्यादिना वु
द्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाः नवात्मविशेषगुणास्तन्निधानादौ त्पाद्यपदादौ दासीनत्वमुक्तं सांख्यैः स्वाभिप्राय
यां केन स्यादेतदिति सर्वेषां पुंसां प्रकृतिस्तान्निध्याय विशेषेपि प्रकृतिरेव प्रतिपुरुषं नियमेन भोगापवर्गार्थं प्रवर्त्तते तथाचा
दृष्टपुरुषार्थनियता प्रधानप्रवृत्तिरिति भोगादिव्यवस्थान्यथानियमप्रवृत्त्यनंगीकारे स्वमाहात्म्यख्यापनार्थी प्रधानस्य प्र

येषां त्वद्वैत आत्मा नते पार्श्वे सर्वगतो सेषामेवैषव्यतिकरः प्राप्नोति कथं बहवो विभव आत्मानः केवलं तन्मात्र
स्वरूपा निर्गुणा निरतिशयाश्च तदर्थं साधारणं प्रधानं तन्निमित्ते यो भोगापवर्गसिद्धिरिति सांख्याः सति बहुत्वे
विभुत्वे च घटकुड्यादिसमानाः द्रव्यमात्रस्वरूपाः स्वतोऽचेतना आत्मानस्तदुपकरणानि चाणूनि मनांसि चे
तनानि तत्रात्मद्रव्याणां मनोद्रव्याणां च संयोगान्नवेच्छादयो वैशेषिका आत्मगुणा उत्पद्यन्ते ते चाव्यतिकरेणा
प्रत्येकमात्मसु समवयन्ति स संसारस्तेषां नवानामात्मगुणानामत्यन्तानुत्पादो मोक्ष इति काणादाः तत्र सां
ख्यानां तावच्चैतन्यस्वरूपत्वात्सर्वात्मनां संनिधानाद्यविशेषाच्चैकस्य सुखदुःखसंबंधे सर्वे सुखदुःखसंबन्धः प्राप्नोतीति स्यादेतत्प्रधा
नप्रवृत्तेः पुरुषकैवल्यार्थत्वाद्व्यवस्था भविष्यति अन्यथा हि स्वविभूतिख्यापनार्थं प्रधानप्रवृत्तिः स्यात्तथा
चानिर्मोक्षप्रसंगः प्रसज्येतेति नैतत्सारं नह्यभिलषितसिद्धिनिबंधना व्यवस्था शक्या विज्ञातुमुपपत्त्यात्
कयाचित्तु व्यवस्थोच्यते अस्तु तावत्पुनरुपतो कामस्तावदभिलषितपुरुषकैवल्यं प्राप्नोतीति तु व्यवस्याहेत्वभावाद्व्य
तिकरः काणादानामपि यदैकेनात्मना मनः संयुज्यते तदात्मान्तरैरपि नांतरीयकः संयोगः स्यात्संनिधानाद्य
विशेषात्तत्र हेत्वविशेषा[illegible]द्वैकस्यात्मनः सुखदुःखयोगे सर्वात्मनामपि समानसुखदुः
खित्वं प्रसज्येत स्यादेतददृष्टनिमित्तो नियमो भविष्यतीति ॥

इति तिरिच्यपदेश्यविद्यातः स्यादित्यर्थः जडप्रधानस्योदेश्याविवेकाभावात् पुरुषार्थस्याप्यनागतस्याचेतनस्यानियाम
कत्वान्न व्यवस्थामानपुंसां त्वमनन्तत्वादित्याह नैतदिति यो हि नियामकाभावेनोदेश्यविद्यातमापादयति नप्रतित
त्स्वापादनमिष्टमिति भावः तार्किकमतेपि भोगादितांकार्यमित्याह काणादानामिति हेतु मनःसंयोगः
फलं सुखादि यदात्मादृष्टकृतो यो मनःसंयोगः स तदात्मन एव सुखादिहेतुरिति व्यवस्थाशंकते स्यादेतत्

शा.भा. टि. ७१

स्त्रेणापरिहरति नेत्याह इतिपूर्ववत मनःसंयोगवददृष्टस्यापिसर्वात्मसाधारणत्वन्नव्यवस्थेत्यर्थः रागादिनियमान्न
ज्ञादृष्टनियमकृत्साशंकां तस्यतेन सम्बन्धत्वाति स्यादेतदित्यादिना अनियमः उक्तदोषः आत्मांतरप्रदेशस्य परदेहेनं तत्
भावाद्व्यवस्थितिशंकार्थः किंन तस्यासंयुक्तात्मैवात्मनादृदेशः उतकल्पितः आद्येसर्वात्मनां सर्वदेहेष्वन्तर्भावादव्यवस्था

२५

तेत्याह अदृष्टानियमात् ५० बद्धष्वात्मस्वाकाशवत्सर्वगतेषु प्रतिशरीरंबाह्याभ्यंतराविशेषेणसन्निहितेषु
मनोवाक्कायैर्धर्माधर्मलक्षणमदृष्टमुपार्ज्यते सांख्यानां तावत्तदनात्मसमवायिप्रधानवर्त्ति प्रधानस्यसाधारण
त्वप्रत्यात्मसुखदुःखोपभोगस्य नियामकत्वमुपपद्यते काणादानामपि पूर्ववत्साधारणेनात्ममनःसंयोगे
न निर्वर्तितस्यादृष्टस्यास्यैवात्मन इदमदृष्टमिति नियमहेत्वभावादेष एव दोषः स्यादेतत् अहमिदं फ
लंप्राप्नुवानीदं परिहराणीत्थं करवाणीत्येवं विधा अभिसंधयः प्रत्यात्मं प्रवर्त्तमाना अदृष्टस्यात्मनां च
स्वस्वामिभावं नियंस्यन्तीति तत्राह अभिसंध्यादिष्वपि चैवं ५१ अभिसंध्यादीनामपि साधारणेनैवात्मम
नःसंयोगेन सर्वात्मसन्निधौ क्रियमाणानां नियमहेतुत्वानुपपत्तेरुक्तदोषानुषंग एव प्रदेशादिति चेन्नान्त
र्भावात् ५२ अथोच्येत विभुत्वेप्यात्मनः शरीरप्रतिष्ठेन मनसा संयोगः शरीरावच्छिन्न एवात्मप्रदेशे भविष्य
ति अतः प्रदेशकृता व्यवस्था अभिसंध्यादीनामदृष्टस्य सुखदुःखयोश्च भविष्यतीति तदपि नोपपद्यते क
स्मादन्तर्भावात् विभुत्वाविशेषाद्धि सर्व एवात्मानः सर्वशरीरेष्वन्तर्भवन्ति तत्र न वैशेषिकैः शरीरावच्छिन्नोप्या
त्मनः प्रदेशः कल्पयितुं शक्यः कल्प्यमानोप्ययं निष्प्रदेशस्यात्मनः प्रदेशः काल्पनिकत्वादेव न पारमार्थि
ककार्यं नियंतुं शक्नोति शरीरमपि सर्वात्मसन्निधावुत्पद्यमानमस्यैवात्मनो नेतरेषामिति न नियंतुं शक्यं ॥

५४

द्वितीयं दूषयति तत्र न वैशेषिकैरिति सर्वात्मसान्निध्ये सति कस्यचिदेव प्रदेशः कल्पयितुमशक्यः नियामकाभावा
दित्यर्थः प्रदेशकल्पनामंगीकृत्याह कल्प्येति कार्यमभिसंध्यादिकं यस्यात्मनो यच्छरीरं तत्र तस्यैव भोग इति व्यवस्था माषे।

७१

ॐ श्रीगणेशाय नमः ॥ हरिः ओम् सर्वाधिकरणे कर्तुः स्वरूपं विचार्य तदुपकरणानामिन्द्रियाणामुत्पत्तिं साधयति तथा प्राणाः भूतभो
क्तृविचारानन्तरं भौतिकप्राणविचार इति हेतुहेतुमद्भावः पादयोः सङ्गतिमाह वियदादीति तमेव विप्रतिषेधमाह तत्रेत्यादिना यद्यपि प्रा
णानामुत्पत्तौ एकविज्ञानप्रतिज्ञानुपपत्तिर्वियदधिकरणन्यायात्तेषामुत्पत्तिः सिध्यति तथापि प्रलये प्राणसद्भावश्रुतेर्गतिः कथ्य
नार्थमेतदधिकरणमिमं पौनरुक्त्यं अत्र प्राणविषयाः किमुत्पद्यन्ते नवेति श्रुतीनां विप्रतिपत्त्या संशये तासामसमबलत्वादनिर्णय
इत्यप्रामाण्यमिति पूर्वपक्षः फलं तत्र गौणत्वादिसमाधानमाह अपवेति प्राणानां प्रलये सद्भावश्रुतेरेकवाक्यत्वेन वलीयस्त्वादुत्प

ओम् तथा प्राणाः ॥ वियदादिविषयश्रुतिविप्रतिषेधः तृतीयपादेन परिहृतः चतुर्थेनेदानीं प्राणविषयः परिह्रियते तत्र
तावत्तत्तेजोऽसृजत तस्माद्वा एतस्मादात्मन आकाशः संभूत इति चैवमादिषूत्पत्तिप्रकरणेषु प्राणानामुत्पत्तिर्नाम्नायते क्वचिच्चा
नुत्पत्तिरेवैषामाम्नायते असद्वा इदमग्र आसीत् तदाहुः किं तदसदासीदिति ऋषयो वाव तेऽग्रेऽसदासीत्तदाहुः के ते ऋषय इ
ति प्राणा वा ऋषय इत्यत्र प्रागुत्पत्तेः प्राणानां सद्भावश्रवणादन्यत्र तु प्राणानामप्युत्पत्तिः पठ्यते यथाग्नेः क्षुद्रा विस्फुलिङ्गा
वै५ व्युच्चरन्त्येवमेतस्मादात्मनः सर्वे प्राणा इति एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति सप्त प्राणाः प्रभवन्ति तस्मादिति सप्त प्राणा
सह जेत प्राणाश्चक्षुर्हाखं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमिति चैवमादिप्रदेशेषु तत्र तत्र श्रुतिविप्रतिषेधादन्यतरनिर्धार
णानिरूपणाद्वाऽप्रतिपत्तिः प्राप्नोतीति अथवा प्रागुत्पत्तेः सद्भावश्रवणाद्गौणी प्राणानामुत्पत्तिश्रुतिरिति प्राप्नोति अत इदं पठ
ति तथा प्राणा इति कथं पुनरत्र तथेत्यक्षरानुलोम्यं प्रकृतोपमानाभावात् सर्वगतात्मवहुत्ववादिदूषणमतीतानन्तरपादान्तेऽक्रान्तं
तत्र खलूपमानं संभवति सादृश्याभावात् सादृश्ये हि सत्युपमानं स्यात् यथा सिंहस्तथा वर्मेति अदृष्टसाम्यप्रतिपादनार्थमिति यदु
च्यते यथादृष्टस्य सर्वात्मसंनिधावुत्पद्यमानस्यानियतत्वं एवं प्राणानामपि सर्वात्मनः प्रत्यनियतत्वमिति तदपि देहानियमेनो
क्तत्वात् पुनरुक्तं भवेन्न च जीवेन प्राणा उपमीयेरन् सिद्धान्तविरोधात् जीवस्य ह्यनुत्पत्तिराख्याता प्राणानां तूत्पत्तिराचिख्यासिता तस्मात्
प्र३ तथेत्यसम्बद्धमिव प्रतिभाति न उदाहरणोपात्तेनाप्युपमानेन संबन्ध उपपद्यते अत्र प्राणोत्पत्तिवाक्यजातमुदाहरणं एतस्मादात्मनः
सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्तीत्येवं जातीयकं तत्र यथा लोकादयः परस्माद्ब्रह्मण उत्पद्यन्ते तथा प्रा
णा अपीत्यर्थः तथा एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीत्येवमादिष्वपि खादिव

ति श्रुतिर्जीवोत्पत्तिश्रुतिवद्गौणीत्यविरोध इत्यर्थः अप्रमाणपक्षवद्गौणपक्षोपि तुल्योपि ख्यासिद्धान्तितः पूर्वपक्ष एवेति ज्ञायता
र्थं यथेत्युक्तः सूत्रव्यासिद्धान्त्याह अत इति तथा शब्दमाक्षिपति कथमिति आनुलोम्यं सादृश्यमित्यर्थः साम्यं स्फुटयति यथादृष्ट
स्येति दूषणवत्प्राणानामुत्पत्तिं यद्यपि दृष्टवत्प्राणानामप्युत्पत्तिनियमा इति सूत्रमन्वेति तथापि पुनरुक्तं जीववत्प्राणानुत्प
त्तिरिति सूत्रार्थश्चेदपसिद्धान्त इत्याशंक्य तात्पर्यं समाधत्ते न उदाहरणेनेति ॥

लकारः६ उत्तरं७ प्र८ ल९

इत्यत्र तो दार्शैतिक सन्निहितो वाक्य इत्यंगीकृत्यैकवाक्यत्वेन साकांक्ष्यमत्र क्रमं प्रतिनायं नियमः जैमिनीनामभवतां व्यवहितानां व्यवहितं दृष्टं
न स्याश्रितत्वादित्याह अपि वेति अस्ति त्वतीयाध्याये प्रतिग्रहेष्ट्यधिकरणं तस्य द्विविषयवाक्यं यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्च
तुष्कपालान्निर्वपेदिति तदुत्तराधिकरणे किमियं वारुणीष्टिर्दानकृतप्रतिग्रहीतरि तद्विषया प्रतिगृह्णीयादिति श्रुतेः प्रतिग्रहीतरि
सा प्राजापत्यं निर्वरुणाया अश्वमनयदित्युपक्रम्य दातृकीर्तनालिंगाद् इतश्चदाते रेवस्यामिति अतः प्रतिगृह्णीयादित्यस्य पदस्याश्वस्य
प्रतिग्राहयेदित्यर्थः इत्याहिति यावयोऽश्वदाता स वारुणीमिष्टिं कुर्यादिति वाक्यार्थे स्थिते विंताश्वदाननिमित्तयमिष्टिः किं लौकि
केऽश्वदाने वैदिके नकेसरिणो ददातीति निषिद्धलौकिकाश्वदानदोषसंभवात् तन्निरासार्थं यमिष्टिरिति दोषात्विष्टिर्लौकिके स्यादिति सूत्रे
णाप्यमे सिद्धांतः अत्र हि वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णातीति दातुर्दोषसंकीर्तनेष्टिर्विहिता वरुणग्राहो जलोदराख्यरोगः सूत्रः न च

अपि वा पानव्यापच्च तद्वदिति एवमादिषु व्यवहितोपमानसंबंधस्याप्याश्रितत्वाय यातीनां तत्र पादे युक्ताविषयादाद्य परस्य ब्रह्म
णो विकारा समधिगतास्तथा प्राणा अपि परस्य ब्रह्मणो विकारा इति योजयितव्यं कः पुनः प्राणानां विकारत्वे हेतुः श्रुतत्वमेव
ननु केषुचित्प्रदेशेषु न प्राणानामुत्पत्तिः श्रूयत इत्युक्तं तद्युक्तं प्रदेशांतरेषु श्रवणात् नहि क्वचिदश्रवणमन्यत्र श्रुतं नि
वारयितुमुत्सहते तस्माच्छ्रुतत्वाविशेषादाकाशादिवत्प्राणा अप्युत्पद्यन्त इति सूत्र गौण्यसंभवात् २ यत्पुनरुक्तं प्रागुत्प
त्तेः सद्भावश्रवणात् गौणी प्राणानामुत्पत्तिश्रुतिरिति तत्प्रत्याह गौण्यसंभवादिति गौण्याः असंभवः नहि प्राणानामुत्पत्तिश्रुतिः
गौणी संभवति प्रतिज्ञाहानिप्रसंगात् कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञा
य तत्साधनायेदमाम्नायते एतस्माज्जायते प्राणो इत्यादि सा च प्रतिज्ञा प्राणादेः समस्तस्य जगतः ब्रह्मविकारत्वे सति प्र
कृतिव्यतिरेकेण विकाराभावात्सिध्यति गौण्यां तु प्राणानामुत्पत्तिश्रुतौ प्रतिज्ञा हीयेत

असंभवो गौण्य पक्ष

लौकिकेऽश्वदाने दोषो न भवतीति प्रसिद्धं न चानेनैव वाक्येन प्रसिद्धिः दाने दोषस्तन्निरासार्थं चेष्टिरित्यर्थभेदे वाक्यभेदात् न च दाने नीतिवृत्त्यस्या
वरुणग्राहो निषेधातिक्रमकृतदोषानुवादकत्वमिति युक्तं दृष्ट्यागापातात् त्यागे च वैदिके यदि दाने श्वतागजन्य दुःखं प्राप्तं तत्कृतमुत्पन्नस्या
वरुणग्राहवाच्यः स्यात् तस्मात्प्रामाण्यवाद्यर्थवादाय मितियत्तत्सर्वेष्टिरप्यश्वदाने दृष्टमिष्टिरित्येवं विचार्यति पानव्यापच्च तद्व
दिति सोमपाने क्रियमाणे व्यापद्वमनं यदि स्यात्तदा एतेन सोमेंद्रं सौमिकं चरुं निर्वपेदिति श्रूयते तत्राश्वप्रतिग्रहेष्ट्यधिकरणे
पूर्वपक्षन्यायो वदन्त्सूत्र व्यवहितत्वादिति परामृश्यते तद्वल्लौकिके धातुसाम्यार्थं पीतसोमस्य वमने यश्चरुः स्याद्वमननिमित्तेः
द्रियशोषाख्यदोषसमहरणस्येंद्रियेण वीर्येण व्यृध्यते यः सोमं वमतीत्यनुवादात् पूर्वपक्षसूत्रार्थः वैदिके तु सोमपाने दोषप्रति
पत्तेर्ज्ञातत्वाद्वमनेऽपि न दोष इति पूर्वपक्षे सिद्धांतः लोके वमनकृतेंद्रियशोषस्य पानसामर्थ्यकरत्वेन गुणत्वान्न दोषता वैदे तु मामेवा
द्यभिमानिगात्रदृशिसमुत्पन्नजरणार्थं मद्यलिंगाद्वमनकर्मैव गुणपानस्य दोषतानतस्माद्वैदिकसोमवमने सोमेंद्रश्चरुरिति स्थितमित्यपव्यम
ति २

वयाको स्तु
वदिते हिः २

ननु प्रतिज्ञाविरोधोऽपि किं न स्यादित्यत आह तथा च प्रतिज्ञार्थमिति उपक्रमोपसंहाराभ्यां प्रतिपिपादयिषिताद्द्वितीयत्वप्रतिज्ञानुरोधेन
प्राणानामपि सृष्टिर्वृत्तिभावः नेदं कवचनं तत्रैव प्रतिज्ञादर्शनात्सामर्थ्यमित्याह तथेति एषा प्रतिज्ञा प्राणोत्पत्तिमन्तरेणानुपपन्नेत्वेन द्रष्टव्येत्य
र्थः इदानीं प्रलये प्राणसत्त्वश्रुतेर्गतिं प्रश्नपूर्वकमाह कथमित्यादित्यादिना नेदं वाक्यं महाप्रलयपरं किन्तु सामस्त्यब्रह्मणः प्राणावत्त्वपरं
किं त्ववान्तरप्रलये हिरण्यगर्भाख्यावान्तरप्रकृतिरूपप्राणसद्भावपरमित्यर्थः ननु हिरण्यगर्भरूपविकारस्य सत्त्वे कथं तदाविकारसत्त्वकः
थनं तत्राह स्वविकारेति स्वस्य कार्यं ब्रह्मणो यत्कार्यं स्थूलं तस्योत्पत्तिरित्यर्थः ननु यथा श्रुतेर्महाप्रलये प्राणसद्भावरूपलिङ्गं प्राणानु
त्पत्तिसाधकं किमित्यवान्तरप्रलयपरतया नीयत इति चेदेतस्माज्जायते प्राण इत्यादिप्रबलजन्मश्रुतिबलादिति वदासः ननु कारस्य

तथा च प्रतिज्ञार्थमुपसंहरति पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतमिति ब्रह्मैवेदं विश्वमिदं वरिष्ठमिति च तथात्मनो
वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमित्येवं जातीयकासु श्रुतिष्वेषैव प्रतिज्ञा योजयितव्या कथं पुनः प्राग्

न॰

सृष्टेः प्राणानां सद्भावश्रवणं नेतन्मूलप्रकृतिविषयं प्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः पर इति मूलप्रकृतेः प्राणादिसम
स्तविशेषरहितत्वावधारणादवान्तरप्रकृतिविषयं चैतत् स्वविकारापेक्षं प्रागुत्पत्तेः प्राणानां सद्भावावधारणमिति द्रष्टव्य।
व्याकृतविषयाणामपि भूयसीनामवस्थानां श्रुतिस्मृत्योः प्रकृतिविकारभावप्रसिद्धेः वियदधिकरणे हि गौणप्रसंभवादिति
एवं पक्षं कृत्वा गौणी जन्मश्रुतिरसंभवादिति व्याख्याते प्रतिज्ञाहान्या च न प्रसिद्धान्तोऽभिहित इह तु सिद्धान्तं कृत्वा गौ
ण्या जन्मश्रुतेरसंभवादिति व्याख्यातं तदनुरोधेन त्विहापि गौणी जन्मश्रुतिरसंभवादित्याचक्षाणैः प्रतिज्ञाहानिरुपेक्षिता

स्यात् तत्प्राक्श्रुतेश्च ३ इतश्चाकाशादीनामिव प्राणानामपि मुख्यैव जन्मश्रुतिः यज्जायत इत्येकं जन्मवाचिपदं प्राणेषु प्रा

५४

क्श्रुतं सदुत्तरेष्वाकाशादिष्वनुवर्तते एतस्माज्जायते इत्यत्राकाशादिषु मुख्यं जन्मेति प्रतिष्ठापितं तत्सामान्यात्प्राणेष्वपि मु
ख्यमेव जन्म भवितुमर्हति न ह्येकस्मिन्प्रकरणे एकस्मिंश्च वाक्ये एकः शब्दः सकृदुच्चारितो बहुभिः संबध्यमानः क्वचिन्मुख्य
ः क्वचिद्गौण इत्यध्यवसातुं शक्यः वैरूप्यप्रसंगात् तथा स प्राणमसृजत प्राणाच्छ्रद्धामित्यत्रापि प्राणेषु श्रुतः सृजतिः
परेष्वप्युत्पत्तिमत्सु श्रद्धादिष्वनुषज्यते

ब्रह्मणः कथं प्रकृतित्वमित्यत आह व्याकृतेति हिरण्यगर्भः समवर्ततेत्यग्र इत्यादिश्रुतावादिकर्तासम्भूतानामिति स्मृतौ च
विकारात्मनामपि मूलकारणावस्थाप्रभृतीनां ब्रह्मविराडादीनां प्रकृतिविकारभावेन प्रसिद्धिरिति पूर्वापेक्षयाविकारस्यापुन
पेक्षया प्रकृतित्वमित्यर्थः केचित्तु यदधिकरणानुरोधेनेदं सूत्रं व्याचक्षते तान्दूषयति वियदिति तस्माज्जायत इति पदस्याका
शादिषु मुख्यत्वसम्पादनापेक्षया प्राचेतनेष्वपि श्रुतेर्मुख्यं जन्मेति सूत्रयोजना तत्सामान्यादिति तेनाकाशादिजन्मना सामान्येमेकश

दि॰ वे॰ कं॰ त॰ ... (margin, vertical)

ब्रा॰स॰ टि॰च॰ ८२

एकस्मिन्वाक्य एकस्य शब्दस्य सकृच्चिन्त्यमानत्वं कथं विज्ञानत्वमिति वैरूप्यं न युक्तमिति न्यायमन्यत्राप्यतिदिशति तथापि पूर्वाद्युक्तमिति पूर्वोक्तं
सौरोपप्राणानामुत्पत्तिनिश्रवणस्य तेरितिवाह तत्पूर्वकत्वाद्वाच इति अत्र तत्रैव वाक्यं दर्शयन्नन्नरूपत्वं वाक्प्राणमनसां तेजोवन्नप
र्वकत्वेनैव श्रवणमसिद्धमिति योजना तेजोवादिभिरुक्तरादीनां सामान्यकरणत्वे तत्सामान्यादित्यर्थः अत्र न यद्यप्युत्कारेणत्वाद्युपरि
त्वैवतितएव प्राणानां ब्रह्मकार्यत्वे तेजोवन्नानां ब्रह्मविकारत्वात् यदि प्राणस्यापाजेलविकारत्वायोगात् तदधीनस्थितिकत्वमात्रेणाभाक्त
त्वयापि प्राणानां विकारत्वे भक्ताधीनस्थितिकत्वलिंगमयप्रोक्तमिति सिद्धं ब्रह्मवार्यत्वं सप्राणमसृजतेत्यादिश्रुत्यन्तरेऽस्य ब्रह्मकार्यत्व
ब्रह्मकार्यत्वोक्तेः अत्र तस्मात्प्राणानामुत्पत्तिश्रुतीनां सद्भावश्रुत्यविरोधात्कारणब्रह्मणि समन्वय इति सिद्धं लिंगशरीरविचारात्मकाधिकरणं

ब्रह्मव्यतिरेक

तथापि पूर्ववद्युक्तं तदुत्पत्तिवचनतः शौवः पर्वैः संबंधते तत्रापेक्ष एवन्यायः यथा सर्वाणि भूतानि सृष्टानि तेजीत्यमंते पठितो व्युच्चरंति
शब्दः पर्वैरपि प्राणादिभिः तत्पूर्वकत्वाद्वाचः ८ यद्यपि तत्तेजोऽसृजतेत्यस्मिन्प्रकरणे प्राणानामुत्पत्तिर्न पठ्यते तेजोवन्नानामेव
त्पत्त्यामाभूतानामुत्पत्तिश्रवणात् तथापि ब्रह्मप्रकृतिकतेजोवन्नपूर्वकत्वाभिधानाद्वाक्प्राणमनसां तत्सामान्याच्च सर्वेषामेव प्राणानां
ब्रह्मप्रभवत्वं सिद्धं भवति तथा हि तस्मिन्नेव प्रकरणे तेजोवन्नपूर्वकत्वं वाक्प्राणमनसामाम्नायते अन्नमयं हि सोम्य मनः आपोमयः
प्राणः तेजोमयी वागिति तत्र यदि तावन्मुख्यमेवैषामन्नादिमयत्वं ततो वर्तत एव ब्रह्मप्रभवत्वमथ भाक्तं तथापि ब्रह्मकर्तृकायां
नामरूपव्याक्रियायां श्रवणादेनाश्रुतं श्रुतं भवतीति चोपक्रमाद्येन सर्वमिति चोपसंहाराच्छ्रुत्यन्तरप्रसिद्धेश्च ब्रह्मकार्यत्व
प्रपंचनार्थमेव मनआदीनामन्नादिमयत्ववचनमिति गम्यते तस्मादपि प्राणानां ब्रह्मविकारत्वसिद्धिः सप्तगतेर्विशेषितत्वाच्च
५ उत्पत्तिविषयः श्रुतिविप्रतिषेधः प्राणानां परिहृतः संख्याविषय इदानीं प्रतिहियते तत्र मुख्यप्राणमुपरिष्टाद्वक्ष्यति संप्रतितु कतीन
रे प्राणा इति संप्रधारयति श्रुतिविप्रतिपत्तेश्चात्र विमृश्यः क्वचित्सप्त प्राणाः संकीर्त्यन्ते सप्त प्राणाः प्रभवंति तस्मादिति क्वचिदष्टौ प्राणा
ग्रहत्वेन गुणेन संकीर्त्यन्ते अष्टौ ग्रहा अष्टावतिग्रहा इति क्वचिन्नव सप्त वै शीर्षण्याः प्राणा द्वाववांचाविति क्वचिद्दश नव वै पुरुषे प्राणा ना
भिर्दशमीति क्वचिदेकादश दशेमे पुरुषे प्राणा आत्मैकादश इति क्वचिद्द्वादश सर्वेषां स्पर्शानां त्वगेकायनमित्यत्र क्वचित्त्रयोदश चक्षुश्च
द्रष्टव्यं चेत्यत्र एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः किं तावत्प्राप्तं सप्तैव प्राणा इति कुतः गतेः यतस्तावन्तो वगम्यंते सप्त प्राणाः
नोलिंगात्वे पदार्थभेदधीः फलमिति द्रष्टव्यं एवं जन्मलब्धसत्ताकानां प्राणानामुपजीव्योपजीवकत्वसंगत्यासंख्याविरोधेश्रुतीनां विरोधात्संशयेपूर्व
पक्षयति सप्तगतेरिति विशेषितत्वाच्च विषयः इंद्रियाण्यत्र विषयः पंचधीन्द्रियाणि वाक्प्रश्नेष्वितिसप्त प्राणास्त एवं हस्तेन सहाष्टौ ग्रहत्वं बंधकत्वं ग्रहतिव
बंधंतीति ग्रहा इंद्रियाणि तेषां बंधकत्वं विषयाधीनमित्यतिग्रहा नतिक्रान्ता विषया इत्यर्थः द्वयोश्चक्षुषोर्द्वयोः श्रोत्रयोर्द्वयोर्घ्राणयोर्वाकि त सप्त शीर्षण्या भवाः
प्राणा द्वाववांचौ पायूपस्थौ चेतिनवज्ञानकर्मेंद्रियाणि दश एवमेव पुरुषे देहे प्राणा आत्मा मन एकादशः प्राणा इति सिद्धान्तकोटिरुक्ता अत एव
बुद्धिर्द्वादशी अहंकारस्त्रयोदश इति सप्तत्वे सुषुम्नाया देशेन त्रयोदश प्राणा अभिहिताः सप्ततावगतेः सप्त वै शीर्षण्याः प्राणा इति शीर्षण्यप्रादेशेन प्राणत्वविशेष

८३

समत्ववीप्साविरुद्धमिति शंकते नन्विति गुहाशयांदद्ध्येयोरन्तु इति गुहाशयाः स्वस्थाने षुनिहितानिति माइत्यर्थः चिन्तेनचतुर्दशत्वं
मतव्यमेवंपक्षोपरिहरति नैषदोष इति सिद्धान्तिनाप्येकादशास्तु मनोवृत्तिभेदान्तःस्थप्राणिकाबुद्धिर्गर्वात्मकोऽहंकारः स्मरणात्मकं चि
त्तमिति बुद्ध्यादयः एकादशसंख्यान्तर्भावनीयाः ततोधिकं प्रायमिकसमन्वेनतरभावः लाघवादिति प्राप्ते सिद्धान्तयति अथेति आदानेन कर्मणा गृही

संबंधः १ — तः संबंधमेवाह हस्ताभ्यामिति अन्तोपिकसंख्यायाः न्यूनायामन्तर्भावयोगात्स्येव प्राणाः स्युर्लाघवान्तरोधादित्येवं न मन्तव्यमि

नर — सप्तर — सप्त२२

सप्त२ — तत्र प्राणा गुहाशया निहिताः सप्त सप्तेति वीप्सा स्यात्त सास सप्ताभ्योरिति क्रान्ताः प्राणानामयुतीति नैषदोषः पुरुषभेदाभिप्राये
यवीप्सा प्रतिपुरुषं सप्त प्राणा इति तत्त्वभेदाभिप्रायोपसंख्ये प्राणा इति न त्वष्टत्वादिकापि संख्या प्राणेष्वदाहृताकुत्स्नमेव
सः सप्तप्रदाह ताविरोधात्ततः सप्तमास्त्वया ध्यवसातव्या तत्रस्तोककल्पनोपरोधात्समसंख्याध्यवसानेवृत्तिभेदायेत्तं चसंख्या
नर — तरस्त्रवणमिति मन्यते अत्रोच्यते हस्तादयस्तु स्थितेतोनैवं इहस्ताद्यत्त्वपरेसप्तभ्योतिरिक्ताः प्राणाः श्रूयन्ते हस्तोवै ग्र
हः सकर्मणा तिग्रहेण गृहीतः हस्ताभ्यां हिकर्मकरोतीत्येवमाद्यास्त्रश्रुतिषु स्थितेतुचसप्तत्वातिरेके सप्तत्वमन्तर्भावाच्छ
क्यतेसभावयितुं हीनाधिकसंख्याविप्रतिपत्तौ ह्यधिकासंख्यासंग्राह्याभवति तस्याहीनानन्तर्भवति नतुहीनायामधिका
अतश्चनैवंमन्तव्यं स्तोककल्पनानुरोधात्सप्तैव प्राणाः स्युरिति उत्तरसंख्यानुरोधात्त्वेकादशैवते प्राणाः स्युरिति तथाचोदाह
ताश्रुतिः दशेमेपुरुषे प्राणा आत्मैकादश इत्यात्मशब्देनचान्तःकरणं परिगृह्यते करणाधिकारात् ननु एकादशत्वादप्यधि
केद्वादशत्रयोदशत्वेउदाहृते सत्यमुदाहृते तेनत्वेकादशभ्यः कार्यजातंभ्योधिकंकार्यजातमस्ति यदर्थमधिकं करणंकल्प्य
ते शब्दस्पर्शरूपरसगंधविषयाः पंचबुद्धिभेदास्तदर्थानि पंचबुद्धीन्द्रियाणि वचनादानविहरणोत्सर्गानंदाः पंचकर्मभे
दास्तदर्थानि पंचकर्मेन्द्रियाणि सर्वार्थविषयंत्रैकाल्यवृत्तिमनस्त्वेकमनेकवृत्तिकंतदेवतु वृत्तिभेदात्क्वचिद्भिन्नवद्व्यपदिश्यते
नर — मनोबुद्धिरहंकारश्चित्तं चेति तथाचश्रुतिः कामः संकल्पो विचिकित्सेत्याद्यनुक्रम्याह एतत्सर्वं मनएवेति अपिचसप्तैवशी
र्षण्यान्प्राणानभिमन्यमानस्य चत्वारएवप्राणाअभिमताः स्युः स्थानभेदाद्ध्येते चत्वारःसन्तः सप्तगण्यन्ते द्वेश्रोत्रेद्वे
चक्षुषीद्वेनासिकेएकावागिति ॥

सन्वयः तर्हि कतीन्द्रियाणीत्याकांक्षायामाह उत्तरेति श्रुतीनां मिथोविरोधेसतिमानान्तरानुगृहीताश्रुतिर्बलीयसी
तिन्यायेनकार्यलिंगानुगृहीतैकादशप्राणश्रुत्यनुसारेणान्याश्रुतयो नेयाइत्यभिसंधायाह तत्त्वमिति एकादशका
र्यलिंगान्याह शब्देति त्रयःकालास्त्रैकाल्यं तद्विषयावृत्तिर्यस्य तत् त्रैकाल्यवृत्तिइन्द्रियाणां वर्तमानमात्रग्राहित्वाद
तीतादिज्ञानाय मनोंगीकार्यमित्यर्थः विप्रतिपत्त्यादिस्वयं निरस्यति अपिचसप्तेति ॥ श्रीरामायनमः ॥

तर

न च तावत्त्वमिति आदानादीनां श्रोत्रादिभ्यो ऽन्यत्वं तेषां जात्यादित्यर्थः तेषां तद्वृत्तित्वे वधिरादीनामादानादिन स्यादिति भावः कथं तर्हि छिद्रे प्राणशब्दप्रयोगः कृच्छ्र इत्याशङ्क्यालक्षणयेत्याह लक्षणाप्रयुक्तस्त्विति तत्र प्राणाः प्रभवंतीत्युपासनार्थं श्रेष्ठप्रहाइति श्रुतिस्तु उपलक्षणार्थापाद्यपा दानामपि वधकत्वाद्विशेषादिति विवेकः न चेदं तत्रत्याख्यानमसंगतं पंचधीन्द्रियवाच्यं न संमतत्वावगतेः शीर्षण्यानां चक्षुरादीनां विशेषितत्वमिति हि तत्वं यदधिकरणाद्रूपपरितस्त्यादोषाश्चेत्यह वेत्याह इयमपरेति इन्द्रियाणि कतीति संदेहे सप्तैव पक्षस्तत्रैव योजयति सप्तेति तेजीवात्मानं येनाः सह गच्छंति तेषामेव भोगहेतुत्वादिन्द्रियत्वमित्यर्थः यत्रावस्थायामेव चादृष्ठप्रवृत्तिः स्थितो ऽन्वग्राहक

प्रा॰
न च तावतामेव वृत्तिभेदादुत्तरे प्राणा इति शंकोतेव कर्महस्तादिवृत्तीनामन्यन्तविजातीयत्वात्तयानव वेशद्वेषप्राणानामिदं शा॰ मीत्यत्रापि देहच्छिद्रमेदाभिप्राये णैव दशप्राणा उच्यंते न प्राणत्वाभिप्रायेणाभि दशामीति वचनात् न हि नाभिर्नामकश्चि
स॰ प्राणः प्रसिद्धो ऽस्ति सरच्येत प्राणस्संभवति नाभिरप्येकं विशेषायतनमित्यतो नाभिर्दशमीत्युच्यते ऽकश्चिदुपासनार्थं कतिचि त्सदर्शनार्थं तदेवं विचित्रे प्राणे यतास्थाने संतिकाकिं परमान्नानमिति विवेकः एकादशत्वेकादशत्वाम्नानं प्राणोमि नि स्थित इयमपरासत्कहृदययोजनासमेव प्राणाः स्युः यतः समानामेव गतिः श्रूयते तमुत्क्रामंतं प्राणोनूत्क्रामति प्राणमनू त्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीत्यत्र तत्र सर्वशब्दो ऽत्र प्रकृतेकृयं समानामेवगतिर्ज्ञायत इति विशेषितत्वादित्याह सप्तैवेति प्राणाश्चत्वारादयस्त्वकार्यं तावि शेषतात्याह प्रकृतास्तयत्रैषचाक्षुषः पुरुषः पराङ् पर्यावर्ततेथारूपज्ञो भवत्येकीभ वति न पश्यतीत्याहुरित्येवमादिना नुक्रमणेन प्रकृतगामी च सर्वशब्दो भवति यथा सर्वे ब्राह्मणा भोजयितव्या इति येनि मंत्रिताः प्रकृता ब्राह्मणास्तएव सर्वशब्देनोच्यंते नान्ये एवमिहापि ये प्रकृताः सप्त प्राणास्तएव सर्वशब्देनोच्यंते ना न्य इति न च तत्र विज्ञानमष्टममनुक्रांतं कथं सप्तानामेवानुक्रमणं नैष दोषः मनोविज्ञानयोस्तत्वाभेदाद्वृत्तिभेदेपि सप्तत्वोपपत्तेः तस्मात्सप्तैव प्राणा इत्येव प्राप्तेब्रूमः हस्तादयस्तु परे सप्तभ्योतिरिक्ताः प्राणाः प्रतीयंते हस्तौ वै ग्रह इत्यादिश्रुतिषु ग्रहत्वं च बंधनभावापद्यते वध्यते क्षेत्रज्ञो ऽनेन ग्रहसंज्ञकेन बंधनेनेति स च क्षेत्रज्ञो नैकस्मिन्नेव शरीरे वध्यते शरीरांतरेष्वपि तुल्यत्वाद्बंधनस्य तस्माच्छरीरान्तरं संचारीदं ग्रहसंज्ञकं बंधनमित्यर्थादुक्तं भवति तथा

प्राणगणे ऽपि तेष्व विरम विषयं प्रमाण ४५

प्र६

चाक्षुषः पुरुषः पराङ् पर्यावर्तते वहि र्देशात्स्वांशिनं सूर्यं प्रतिगच्छति अथ तदानीमयं तु मुमूर्षुररूपज्ञो भवति देवां शेदेवं प्रविष्टे लिंगात्मा स्वहृदये मनस्येकीभवति तदायं न पश्यतीति पार्श्वस्था आहुरित्यर्थः आदिपदात्ब्रजिघ्रति न वदति न रसयते न स्पृशति न मनुते न स्पृशति न विजानातीति गृह्यते सप्तानामेव जीवेन सह गतिरित्यसिद्धं ग्रहत्वश्रु त्या हस्तादीनामपि गतिप्रतीतेरिति सिद्धांतयति एवं प्राप्ते हस्तादिना ॥ ॥ ॥

हस्तादिबंधस्य प्राणोत्क्रान्तस्य ह गतोस्मृतिमाह पुर्यष्टकेति प्राणादिपंचकं भूतसूक्ष्मपंचकं ज्ञानेंद्रियपंचकं कर्मेंद्रियपंचकमंतःकरण-
चतुष्टयमविद्याकामः कर्म चेति पुर्यष्टकमात्मनो ज्ञापकत्वाल्लिंगं सति संभवे सर्वश्रुति संकोचो न युक्त इत्याह सर्वशब्दोपीति त-
स्मात्संख्याश्रुतीनामविरोधादेकादशेंद्रियकारणे ब्रह्मणि समन्वय इति सिद्धम् अणवश्च प्राणाः सर्वेऽनंता इति श्रुतेरिंद्रियाणां
विभुत्वात्तेषां मृत्क्रांतिर्यसिद्धा किंतु तत्तद्देहे तेषामभिव्यक्तिरूपाः प्रादेशिका वृत्तयः संतितेन तासामुत्क्रांत्यादिरिति सांख्यानां

पुर्यष्टकेन लिंगेन प्राणाद्येन स युज्यते तेन बद्धस्यैवं बंधो मोक्षो मुक्तस्य तेन च इति प्राज्ञोत्तात्मुह संज्ञकेन बंधनेनाविद्यो-
गदर्शयति आचष्टे च विषये द्रियान्क्रमेण चक्षुश्च द्रष्टव्यं च तत्र तल्लत्वबद्धुत्वादीनीन्द्रियाणि सविषयाण्युक्तानीति हस्तौ
चादातव्यं चोपस्थ आनंदयितव्यं च पायुश्च विसर्जयितव्यं च पादौ च गंतव्यं चेति तु पादशमेषु ह च प्राणमात्मैकादशः ते पंच
स्माच्छरीरात्मस्योत्क्रामन्त यदोद यतीसेकादशानां प्राणानामुत्क्रांतिदर्शयति सर्वशब्दोपि च प्राणशब्देन संबध्यमानो
ऽवधान प्राणानभिदधातीन प्रकरणविशेषेन समस्तेष्ववस्थापयितुं शक्यते प्रकरणाच्छ्रवण बलीयस्त्वात्सर्वे ब्राह्मणा भोजयि-
तव्या इत्यत्रापि सर्वशब्देनैवावनिवर्तितानां ब्राह्मणानां ग्रहणं या च सर्वशब्दस्समाप्त्या सर्वे भोजनासंभवात्तत्र निमंत्रितमा-
त्रविषयात्सर्वशब्दस्य तत्रिसाश्रितमात्र इह तु न किंचित्सर्वशब्दार्थसंकोचकारणमस्ति तस्मात्सर्वेषामेकादशानां प्राणानां
परिग्रहः प्रदर्शनार्थं च सप्तानामनुक्रमणमित्यतस्तस्मादेकादशैव प्राणाः शब्दतः कार्यतश्चेति सिद्धं अणवश्च ७
अधुना प्राणानामेव स्वभावांतरमभ्युपैति तित्यण एव चैते प्रकृताः प्राणाः प्रतिपत्तव्याः अणुत्वं चैषां सौक्ष्म्यपरिच्छेदौ न परमाणु-
तुल्यत्वं कृत्स्नदेहव्यापिकार्यानुपपत्तिप्रसंगात् सूक्ष्मा एते प्राणाः स्थूलाश्चेत्स्युः मरणकाले शरीरान्निर्गच्छन्तो बिलादहिरिवो-
पलभ्येरन् म्रियमाणस्य पार्श्वस्थैः परिच्छिन्नाश्चैते प्राणाः सर्वगताश्चेत्स्युः उत्क्रांतिगत्यागतिश्रुतिव्याकोपः स्यात् तद्गुण-
सारत्वं च जीवस्य न सिध्येत् सर्वगतानामपि [illegible] वृत्तिलाभः शरीरदेशस्यादिति चेन्न वृत्तिमात्रस्यैव करणत्वोपपत्तेः यदेव ह्युपल-
ब्धिसाधनं तत्र तिः अन्यद्वा तस्य वनः करणत्वे संज्ञामात्रे विवादः इति करणानां व्यापित्वकल्पनानिरर्थिका तस्मात्सूक्ष्माः परिच्छिन्ना-
श्च प्राणा इत्यध्यवस्यामः श्रेष्ठश्च ८ मुख्यश्च प्राण इतरप्राणवद् ब्रह्मविकार इत्यतिदिशति तद्वा विशेषेण च सर्वप्राणाभ्या-
ब्रह्मविकारत्वं व्याख्यातमेतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति सेंद्रियमनोव्यतिरेकेण प्राणस्योत्पत्तिश्रवणात्त सप्रा-

मानोपेतस्तं सत्याप्राणा किं परिमाणा इति संदेहे सिद्धांतयति अधुनेत्यादिना उत्पत्तिसंख्यानिर्णयानंतरं परिमाणं निरूप्यत इत्य-
र्थः अनेकतरूपस्य सर्वत्वं सूक्ष्मत्वं परिच्छेदोल्पत्वं बुद्ध्यादीनां विभुत्वे तदुपाधिकमात्मनोणुत्वादिकं न सिध्येदित्युक्त्वा यविरोधमाह
तद्गुणसारत्वमिति श्रुत्वा चोपमन्न परिसरतीति सर्वगतानामिति आनंत्यश्रुतेरुपासनार्थत्वाद्वोत्क्रांत्यादिश्रुतीनां नयाविरोध इति सि-
द्धं श्रेष्ठश्च अनिर्देशात्तत्र संगत्याद्यपेक्षानन्यप्रमाण इत्युक्त्वापोनास्ति दिष्यते ॥

२४४

शा०भा०
टि०च०
८४

ननु प्राणो जायते न वेति संशयाभावाद् तिदेशो न युक्त इत्यादि शंकते किमर्थ इति निश्चितमाह प्रलये प्राणसद्भावश्रुत्यादिका शंकामाह ना
सदासीदिति नासदासीदित्यारभ्याधीते इत्यर्थः तर्हि तदा प्रलयकाले मृत्युर्मोक्षो मृत्युमत्कार्यं वानासीदस्ते चदेवभोग्यनासीत रा
त्र्याः प्रकेतः चिह्नरूपसूर्य इः अहः प्रकेतः सूर्यस्तु नासीत् स्वधया सहेत्यन्वयः पितृभ्यो देयमन्नं स्वधापदस्तेन च तामायास्वधा तया
सहैतदेकं ब्रह्मानीदासीदिति परमार्थः अवातीदिति न चेष्टाकृत वदिति पूर्वपक्षार्थः तस्माद्ब्रह्मणः परः परमुत्कृष्टमन्यच्च किम

किमर्थः पुनरतिदेश आशंकावारणार्थः नासदासीये हि ब्रह्मप्रधाने सूक्ते मंत्रवर्णो भवति नमत्यु रासीदमृतं न तर्हि तदा आत्र
ह्न आसीत् प्रकेतः आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किंचनास आनीदिति प्राणकर्मोपादानात्प्राग्उत्पत्तेः सत्तमिव
प्राणस्य चयति तस्मादजः प्राण इति जायनेकस्य चिन्नतिः नामतिदेशेनापनुदति आनीदवेदोपिन प्राग्उत्पत्तेः प्राणसद्भाव
सूचयति अवातमिति विशेषणात अप्राणो ह्यमनाः शुभ्र इति च मूलप्रकृतेः प्रादिसमस्त विशेषरहितत्वसदर्शितत्वात न
सा कारणसद्भावप्रदर्शनार्थं एवायमानीच्छब्द इति श्रेष्ठ इति च मुख्यं प्राणमभिदधाति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्चेति श्रु
तिनिर्देशात् ज्येष्ठश्च प्राणः शुक्रनिषेककालादारभ्य तस्य वृत्तिलाभात्र चेत्रा त्सनदानीं वृत्तिलाभः स्यात् योनौ निषिक्त
कं पर्येत न संभवेद्वा श्रोत्रादीनां तु कर्णशष्कुल्यादिस्थानविभागनिष्पत्तौ वृत्तिलाभादज्येष्ठत्वं श्रेष्ठश्च प्राणः गुणाधिकात्
वै पात्यामनुत्क्रन्तेजीविनमिति श्रुतेः नवायुक्रिये पृथगुपदेशात् ९ स पुनर्मुख्यः प्राणः किंस्वरूप इतीदानीं जिज्ञास्य
ते तत्र प्राप्तं तावच्छ्रुते वायुः प्राण इति एवं हि श्रूयते यः प्राणः स वायुः स एष वायुः पंचविधः प्राणोऽपानो व्यान उदानः
समान इति अथवा तंत्रांतरीयाभिप्रायात्समस्तकरणवृत्तिः प्राण इति प्राप्तं एवं हि तंत्रांतरीया आचक्षते सामान्यकरणवृत्ति
ः प्राणाद्या वायवः पंचेति अत्रोच्यते न वायुः प्राणो नापि करणव्यापारः कुतः पृथगुपदेशात् वायोस्तावत्प्राणस्य पृथग्
उपदेशो भवति प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति च तपतीति न हि वायुरेव सन्वायोः पृथगुपदिश्येत ॥

च न प्र०

पित्वमस्येत्यर्थः परिहार सु बोधः ननु श्रेष्ठपावृत्तस्य प्राणप्रसिद्ध्यभावात्कथं सूत्रमिति तत्राह श्रेष्ठ इति चेति श्रुतिं व्याच
ष्टे ज्येष्ठश्च प्राण इत्यादिना पर्येत न पर्यभवेत्र संभवेत्र गर्भो न भवेदित्यर्थः वागादिजीवनहेतुत्वं प्राणस्य गुणपवमानीच्छु
त्यविरोधात्प्राणोत्पत्तिश्रुतीनां ब्रह्मणि समन्वय इति सिद्धं इंद्रियाणि विचार्य तद्व्यापारात्प्राणं पृथक्कृत्य तत्स्वरूपनिरूपयति दिह्वा सं
त्य० प्रस्तुत प्राणस्वरूपं पृथक्करोति नवायुक्रिये पृथगुपदेशात् मुख्यः प्राणः किं वायुमात्रमुत करणानां साधारणव्यापारः आहोस्वित्तत्त्वां
तरमिति वायुप्राणयोर्भेदाभेदश्रुतीनां मिथो विरोधात्संशये पूर्वपक्षमाह तत्रेति द्वितीयं सांख्यपूर्वपक्षमाह अथवेति सिद्धांतं त्वे
न सूत्रमाहते अत्रोच्यत इति मनोरूपत्र सवाक्प्राणचक्षुः श्रोत्रेश्च तद्धयात्मकस्ताबुक्तं न च प्राणो वायुना पिंदैवकेन भास्यभिव्य
णो०

न्तेऽभिव्यक्तः संकल्पनिकार्यत्वमोभवतीत्यर्थः पं० ५
८५

श्रुतिषु तत्र तत्र प्राणवागादीनां च मिथः संवादलिंगेन पृथक्त्वश्रुतिलिंगेन चेंद्रियतदभिन्नव्यापारेभ्योपि भिन्नत्वमित्याह तथेति प्राणस्येंद्रियव
त्त्वं श्रुत्या निरस्य युक्त्यापि निरस्यति नचेति समस्तानामिति यावत् साध्या वृत्तिः सेवन श्रोत्रादिसाध्या करणानां प्रत्येकमेकैककल्पग्रहा
दिवृत्तावेव हेतुत्वात्र च तत्समुदायस्य वृत्तिः संभवति तस्यासत्वादित्यर्थः प्रमाणाभावादिति श्रोत्रादीनामेकप्राणनाख्यवृत्तान्यतु
ल्पपरिस्पंदेषु मानाभावाच्चक्षुरादीनामपरिस्पंदत्वेन विजातीयत्वात्परिस्पंदरूपप्राणनानुकूलत्वादर्शनाच्च व्यापाराभावान्नस

२२

तथा करणवृत्तेरपि पृथगुपदेशो भवति वागादीनि करणान्यनुक्रम्य तत्र तत्र पृथक् प्राणस्यानुक्रमणात् हृदिवृत्तिमतो
श्चाभेदात्तु हि करणव्यापारस्य वसंकरणोभ्युः पृथगुपदेशेन तत्पेनस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च खं वायु
रित्येवमादय्यापि वायोः करणेभ्यश्च प्राणस्य पृथगुपदेशाश्च नेतव्याः नच समस्तानां करणानामेका वृत्तिः संभवति प्रत्ये
कमेकैकवृत्तित्वात्समुदायस्य चाकारकत्वात् ननु पंजरचालनन्यायेन एतद्भविष्यति यथैकपंजरवर्तिनः एकादशपक्षि
प्र णः प्रत्येकं प्रतिनियतव्यापाराः संतः संभूयैकं पंजरं चालयंति एवमेकशरीरवर्तिनः एकादशप्राणाः प्रत्येकं प्रतिनि
यतवृत्तयः संतः संभूयैकां प्राणाख्यां वृत्तिं प्रतिलप्स्यंत इति नेत्युच्यते युक्तं तत्र प्रत्येकवृत्तिभिरवांतरव्यापारैः पंजर
चालनानुरूपैरेवोपेताः पक्षिणः पंजरं चालयेयुरिति तथा दृष्टत्वादिह तु श्रवणाद्यवांतरव्यापारोपेताः प्राणा
न संभूय प्राण्युरिति युक्तं प्रमाणाभावादत्यंतविजातीयत्वाच्च श्रवणादिभ्यः प्राणस्य तथा प्राणस्य श्रेष्ठत्वादि
वा६ वो गुणभावोपगमश्च तं प्रति वागादीनां न करणवृत्तिमात्रे प्राणो वकल्पते तस्मादन्यो वायुक्रियाभ्यां प्राणः कथ
तर्हीयं श्रुतिः यः प्राणः स वायुरिति उच्यते वायुरेवाध्यात्ममापन्नः पंचव्यूहो विशेषात्मनावतिष्ठमानः प्राणो ना
भे३० म भण्यते न तत्त्वांतरेणापि वायुमात्रं मतस्मादुभयोरपि भेदश्रुतीन निरुध्येते स्यादेतत्प्राणोपि तर्हि जीववदस्मिञ्छरी
रे स्वातंत्र्यं प्राप्नोति श्रेष्ठत्वात् गुणभावोपगमाच्च तं प्रति वागादीनां तथा हि अनेकविधा विभूतिः प्राणस्य त्र
श्राव्यते सुप्तेषु वागादिषु प्राण एको हि जागर्ति प्राण एको मृत्युनानाप्तः प्राणः संवर्गः वागादीन्संवृंक्ते प्राण इ
तरान्प्राणान्रक्षति मातेव पुत्रानिति तस्मात्प्राणस्यापि जीववत्स्वातंत्र्यप्रसंगस्तं परिहरति ॥ राम ॥

मस्तकरणवृत्तिः प्राण इत्यर्थः किंच प्राणस्य वृत्तित्वे वागादीनामेव प्रधान्यं वाच्यं नैतदस्तीत्याह तथा प्राणस्येति यथाग्नेः दो
षु देनवत्तत्त्वांतरेणापि स्वन्मात्रे तद्विकारत्वात् तथा वायोर्विकारः प्राण इति भेदश्रुतेर्गतिमाह उच्यत इति देहस्यान्तः पंचाव
स्थो विकारात्मनास्थितो वायुरेव प्राण इत्यर्थः प्राणस्य करणवृत्तित्वाभावे जीववद्द्रोहत्वं स्यादिति शंकते स्यादेतदिति ॥

प्राणेन भोक्तृभोगोपकरणत्वाच्चक्षुरादिवदिति सूत्रार्थमाह तथा चेत्यादिना यथाहुरद्रष्यं नरयोः सर्वत्र सह प्रयुज्यमानत्वेन सामन्त्वेन वा
साम्यात्तद्वदुपादस्य व्याकरणे । सहोपकरणत्वेन साम्यात्प्राणस्य पाठ इति न हेत्वसिद्धिरित्यर्थः किंच प्राणेन भोक्तृसाधनवत्वाज्जडत्वाद्भौ
तिकत्वाच्चक्षुर्देहवत् न त्वयं द्रोणोपकरणानन्तस्य विषयं दृष्टं यथा चक्षुरादिकं प्राणस्य तु निर्विषयत्वात् साधारणकार्यभावाच्चनोपकरणत्वमि
ति शंकते स्यादेतदिति उत्क्रान्त्या मेः शरीरे व्यभिचारादेहेन्द्रियधारणोत्क्रान्त्यादि साधारणकार्यमुक्तत्वाच्च निर्विषयस्यापि प्राणस्य शरीरवद्भो
क्तृत्वादिवन्न तत्स्वहृषिष्यादिभ्यः २० तथा चः प्राणस्य स्वातंत्र्यमावर्तयति यथा च चक्षुरादीराजमक्षत्रियवज्जीवस्य वर्तित्वं भोक्तृ
त्वे प्रत्युपकरणानि न स्वतंत्राणि तथा मुख्योपि प्राणो राजमंत्रिवत् जीवस्य सर्वार्थकत्वेन उपकरणमेव तो न स्वतंत्र कुतः
तत्सहशिष्यादिभ्यः तैश्चक्षुरादिभिः सहैव प्राणः शिष्यते प्राणसंवादादिषु समानधर्माणां च सह शासनं युक्तं बृहद्रथ
न्तरादिवत् आदिशब्देन संहतत्वाचेतनत्वादीन्प्राणस्य स्वातंत्र्यनिराकरणहेतून् दर्शयति स्यादेतद्यदि चक्षुरादिवत् प्रा
णस्य जीवं प्रतिकरणभावोभ्युपगम्येत विषयान्तरं रूपादिवत्प्रसज्येत रूपालोचनादिभिर्वृत्तिभिर्यथा स्वचक्षुरादीनां जी
वं प्रतिकरणभावो भवति अपि चैकादशैव कार्यजातानि रूपालोचनादीनि परिगणितानि यदर्थमेवादश प्राणाः सं
गृहीताः नन्वृ द्वादशमपरं कार्यमवगम्यते यदर्थमयं द्वादशः प्राणः प्रतिज्ञायत इत्यत उत्तरं पठति अकरणत्वाच्च
न दोषस्तथाहि दर्शयति ११ न तावद्विषयान्तरप्रसंगो दोषः अकरणत्वात्प्राणस्य न हि चक्षुरादिवत्प्राणविषयपरिच्छे
देन करणत्वमभ्युपगम्यते न चास्य तावता कार्याभाव एव कस्मात्तथा हि श्रुतिः प्राणान्तरेषु असंभाव्यमानं मुख्यप्राणस्य वै
शेषिकं कार्यं दर्शयति प्राणसंवादादिषु यत्र ह प्राणा अहं श्रेयसे व्युदिरे तत्र यस्मिन्नुत्क्रान्त इदं शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठ इति प्रत्येकं वागादि उत्क्रमणेन तद्वृत्तिमात्रहीनं यथा पूर्वं जीवनं दर्शयित्वा प्राणोच्चिक्रमिषा
यां वागादिशैथिल्यापत्तिं शरीरपातप्रसंगं च दर्शयति श्रुतिः प्राणनिमित्तां शरीरेन्द्रियस्थितिं दर्शयति तान्वरिष्ठः प्राण उवाच
मा मोहमापद्यथाहमेवैतत्पंचधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति चेतमेवार्थं श्रुतिरहं प्राणेन रक्षन्नवरं
कुलायमिति स एष चक्षुरादिषु प्राणनिमित्तां शरीररक्षां दर्शयति यस्मात्कस्माच्चांगात्प्राण उत्क्रामति तदेव तच्छुष्यतीति तेन यद
श्नाति यत्पिबति तेनेतरान्प्राणानवतीति च प्राणनिमित्ताः शरीरेन्द्रियपुष्टिं दर्शयति कस्मिन्न्वहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति प्राणनिमित्ते जीवस्योत्क्रान्तिप्रतिष्ठे दर्शयति

क्रान्त उ २.

गोपकरणत्वमस्त्येतन्न चक्षुरादिवज्ज्ञानकर्मकरणत्वमस्ति येन सविषयत्वं स्यादिति परिहरति न तावदित्यादिना अहं श्रे
यसे व्युदिरे एतन्निमित्तं व्युदिरे विवादं चक्रिरे तद्वृत्तिमात्रहीनमितिमूकादिभावेन स्थितमित्यर्थः अवरं नीचं कुलायं देहा
ख्यं गृहं प्राणेन रक्षन्जीवः स्वपितीत्यर्थः तदेव तदानीमेव तेन प्राणेन यदश्नाति जीवस्तेन प्राणकृतापानेनेतिपावत ॥ राम

एवं श्रुतेः प्राणस्य साधारणं कार्यमस्तीत्युक्तं नत्वैवं देहं तत्तरार्यं स्तंत्रं व्याचष्टे इतश्चेत्यादिना वृत्तिरवस्था अग्निमथनादिकं वीर्यवत्क
र्मकामास्ति वृत्ति वज्ज्ञानेपि पंचत्वनियमो नास्तीत्याह चित्तस्य पंचवोद्वावुपपत्तान्तरं गृह्णाति नन्वत्रापीत्यादिना प्रमाणं प्रमितिः विपर्ययो
भ्रमः शशविषाणादिज्ञानं विकल्पः तामसी वृत्तिर्निद्रा स्मृतिः प्रसिद्धा भ्रमनिद्रयोरविद्यावृत्तित्वान्न मनोवृत्तित्वमित्यरुच्यास्मत
माह वक्ष्यतीति तत्रस्यापातरमाह जीवेति तदेवं प्राणवाय्वोर्भेदाभेदश्रुत्योरविरोध इति सिद्धं एवं मुख्यप्राणस्यास्य तत्स्वरूपं चोक्त्वाप
रिमाणं सदेहगत्वमुपदिशति अणुश्चेति अधिकाराशंकामाह नन्वविभुत्वमपीति स्वविमर्शकादपि स्वसोजेतुः प्रतीकेऽत्युच्यते ना

पंचवृत्तिर्मनोवद्व्यपदिश्यते १२ इतश्चास्ति मुख्यप्राणस्यैव शेषिकं कार्यं यत्कारणं पंचवृत्तिरयं व्यपदिश्यते श्रुतिषु प्राणोपा
व्यानउदानः समान इति भेदस्थायं कार्यभेदात्पत्तः प्राणः प्राग्वृत्तिरुच्छ्वासादिकर्मा अपानोर्वाग्वृत्तिर्निःश्वासादिकर्मा व्यानस्त
योः संधौ वर्तमानो वीर्यवत्कर्महेतुरुदानः ऊर्ध्ववृत्तिरुत्क्रान्त्यादिहेतुः समानः समं सर्वेष्वंगेषु योऽन्नरसान्नयतीति एवं पंचवृ
त्तिः प्राणः मनोवत् यथा मनसः पंचवृत्तयः एवं प्राणस्यापीत्यर्थः श्रोत्रादिनिमित्ताः शब्दादिविषयाः मनसः पंचवृत्त
यः प्रसिद्धाः ननु कामः संकल्प इत्याद्याः परिपठिताः तेषां संख्यातिरेकात् नन्वत्रापि श्रोत्रादिभिरपेक्षा भूतभविष्यदा
दिविषया परा मनसो वृत्तिरस्तीति समानः पंचसंख्यातिरेकः एवं तर्हि परमतमप्रतिषिद्धमनुमतं भवतीति न्यायादिहा
पि योगशास्त्रप्रसिद्धा मनसः पंचवृत्तयः परिगृह्यन्ते प्रमाणविपर्ययविकल्पनिद्रास्मृतयो नाम बहुवृत्तित्वमात्रेण वा मन
नः प्राणस्य निदर्शनमिति द्रष्टव्यं जीवोपकरणत्वमपि प्राणस्य पंचवृत्तित्वान्मनोवदिति योजयितव्यं अणुश्च १३ अ
णुश्चायं मुख्यः प्राणः प्रत्येतव्यः इतरप्राणवदणुत्वं चेहापि सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वं पंचभिर्वृत्तिभिः कृत्स्नशा
रीरव्यापित्वात् सूक्ष्मः प्राण उत्क्रान्तौ पार्श्वस्थेनानुपलभ्यमानत्वात् परिच्छिन्नश्चोत्क्रान्तिगत्यागतिश्रुतिभ्यः ननु विभुत्वम
पि प्राणस्य समाम्नायते समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेणेत्येवमादिप्रदेशेषु
तदुच्यते आधिदैविकेन समष्टिव्यष्टिरूपेण हैरण्यगर्भेण प्राणात्मना एतद्विभुत्वमाम्नायते नाध्यात्मिकेन अपि च समः प्लु
षिणेत्यादिना साम्यवचनेन प्रतिप्राणिवर्तिनः प्राणस्य परिच्छेद एव प्रदर्श्यते तस्माददोषः ॥ ॥

गोहस्ती प्राण उत्क्रामतीति श्रुत्याल्पत्वं प्राणस्य भाति समोऽनेन सर्वेणेति श्रुत्या विभुत्वमिति विरोधे आध्यात्मिकप्राणस्याल्पत्वमाधिदै
विकस्य विभुत्वमिति विषयभेदाच्छ्रुत्योरविरोध इति समाधत्ते तदुच्यत इति किंचोपक्रमे प्राणस्य प्लुष्यादिसमत्वेनाल्पत्वोक्तेः सम ए
भिस्त्रिभिर्लोकैरिति विराड्देहसाम्यं समोऽनेनेति हिरण्यगर्भात्मत्वमिति विषयव्यवस्थास्तीत्याह अपि चेति प्राणाश्चेत्यत्र सर्वेन्नताइन्द्री
द्रियानं तस्य प्राणस्यनार्थमिति समाहितमत्र तु प्राणविभुत्वमाधिदैविकमिति समाधानांतरोक्तेरपौनरुक्त्यं अन्ये तु प्रसंगात्तसंख्यादोषोऽनिरस्तः

शात्र॰
द्वि॰ च॰
८६

रं वं प्राणस्याध्यात्मिकाधिदैविकविभागेनावस्थाद्वयविभुत्वव्यवस्थोक्ता तत्प्रसंगेनाध्यात्मिकानां प्राणानामाधिदैविकाधीनत्वमाह ज्योति
रिति वाचा हि नामान्यभिवदन्ति चक्षुषा रूपाणि पश्यतीति श्रुतौ याऽऽत्यान्वयव्यतिरेकवत्त्वाद्वागादीनां निरपेक्षसाधनत्वोक्तेर्वि
रोधादग्निर्वाग्भूत्वेत्यादिश्रुतिस्तेषामचेतनानामुपादानकत्वपरा न तु तेषामधिष्ठातृदेवतापरा न च स्वस्वकार्ये प्राज्ञानामपि वागा
दीनामचेतनत्वादधिष्ठात्रपेक्षा न विरुध्यत इति वाच्यं जीवस्याधिष्ठातृत्वात् किं च देवानामधिष्ठातृत्वे जीववद्भोक्तृत्वमस्मिन्देहे
स्यात् न चैकत्रानेकभोक्तृणां विरोधाद्दुर्बलस्य भोक्तृत्वं न स्यादिति पूर्वपक्षार्थः सिद्धान्तयति एवं प्राप्ते ब्रूम इत्यादिना अग्निर्वाग्भू

ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ १४ ॥ ते पुनः प्रकृताः प्राणाः किं स्वमहिम्नैव स्वस्मै कार्याय प्रभवन्ति आहोस्विद्देवताधि
ष्ठिताः प्रभवन्तीति विचार्यते तत्र प्राप्तं तावद्यथास्वकार्यशक्तियोगात्स्वमहिम्नैव प्राणाः प्रवर्तेरन्निति अपि च देवताधिष्ठि
तानां प्राणानां प्रवृत्तावभ्युपगम्यमानायां तासामेवाधिष्ठात्रीणां देवतानां भोक्तृत्वप्रसंगात् शारीरस्य भोक्तृत्वं प्रतीये
त अतः स्वमहिम्नैवैषां प्रवृत्तिरिति एवं प्राप्त इदमुच्यते ज्योतिराद्यधिष्ठानं त्विति तु शब्देन पूर्वपक्षो व्यावर्त्यते ज्यो
२५ तिरादिभिरग्न्याद्यभिमानिनीभिर्देवताभिरधिष्ठितं वागादिकरणजातं स्वकार्येषु प्रवर्तत इति प्रतिजानीते हेतुं चाचष्टे
तदामननादिति तथा ह्यामनन्त्यग्निर्वाग्भूत्वा मुखं प्राविशदित्यादि अग्नेश्चायं वाग्भावो मुखप्रवेशश्च देवता
त्मनाधिष्ठातृत्वमंगीकृत्योच्यते न हि देवतासंबन्धं प्रत्याख्यायाग्नेर्वाचि मुखे वा कश्चिद्विशेषसंबन्धो दृश्यते तथा वा
युः प्राणो भूत्वा नासिके प्राविशदित्येवमाद्यपि योजयितव्यं तथान्यत्रापि वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा
भाति च तपति चेत्येवमादिना वागादीनामग्न्यादिज्योतिष्ट्वादिवचनेन तमेवार्थं द्रढयति स वै वाचमेव प्रथमामत्यवहत्साय
दा मृत्युमत्यमुच्यत सोऽग्निरभवदिति चैवमादिना वागादीनामग्न्यादिभावापत्तिवचनेन तमेवार्थं द्योतयति सर्वत्र चाध्यात्मा
धिदैवतविभागेन वागाद्यग्न्याद्यनुक्रमणमनयैव प्रत्यासत्त्या भवति स्मृतावपि वागध्यात्ममिति प्राहुर्ब्राह्मणास्तत्त्वदर्शिनः
वक्तव्यमधिभूतं च वह्निस्तत्राधिदैवतमित्यादिना वागादीनामग्न्यादिदेवताधिष्ठितत्वं सप्रपंचं दर्शितं यत्तूक्तं स्वकार्यशक्ति
योगात्स्वमहिम्नैव प्राणाः प्रवर्तेरन्निति तदयुक्तं शक्तानामपि शकटादीनामनडुहाद्यधिष्ठितानां प्रवृत्तिदर्शनात् ॥

त्वाविश्यश्रुतौ भूत्वेति च तद्भावोऽग्न्याद्यधिदेवताधिष्ठेयत्वरूप एव संबन्धो न तदुपादानकत्वरूपो हि अस्यादित्यमण्डलादेर्नखस्य च तदु
पादानत्वासंभवादित्याह अग्नेश्चायमिति वायुः प्राणोऽधिष्ठाता भूत्वा नासापुटे प्रविशदिति व्याख्येयमित्याह तथेति भातिदीप्यते त
पति स्वकार्यं करोतीत्यर्थः एतस्मिन्नधिष्ठानत्वधिष्ठेयत्वरूपार्थे लिंगान्तरमाह स वै वाचमिति स प्राणो वाचं प्रथमामत्यवहत् द्वितीयेष्वपि प्रधाना
मन्त्रादिपापमरूपमृत्युमतीत्यावहत् मृत्युनाशकोऽकृत्वाग्निदेवतात्मत्वेन प्रापितवानित्यर्थः किं च मनस्यादित्यवागाद्येतिवानं प्राणांश्चत्रत्र

ननु शकटादीनां वलीवर्दादिप्रेरितानां प्रवृत्तिर्दृष्टा स्त्रीशूद्रादीनां त्वनधिष्ठितानामपि दृष्ट्यादिप्रवृत्तिर्दृश्यते तथा चोभयथासंभवे
कथं नियम इत्यत आह उभयथोपपत्तेश्चेति उक्तदोषान्तरनिरासाय सूत्रमवतारयति यदपीति शारीरेणैवेति भोक्त्रेति शेषः सं
बन्धो भोक्तृभोग्यभावः अयं देहप्राणप्रवेशानन्तरं यद्गोलके एतच्छिद्रमनुप्रविश्य चक्षुरिन्द्रियं तत्र चक्षुष्यभिमानी स आत्मा
चाक्षुषः तस्य रूपदर्शनाय चक्षुः संयुक्तमाकरणमेव तेन तथापि तेषामज्ञानतदा अयमहंकारो नो वेदस्तस्मादात्मा विदूपए
वकरणानि तद्गोधादिद्रव्यं तेषां पत्योऽतेनेच ननु त्यागे इति श्रुत्यर्थः किं च योऽहं रूपमद्राक्षमेव अहं शृणोमीति प्रतिसंधानादेकः
शरीर एव भोक्ता न वह वो देवा इत्याह अपि चेति कदाचिद्देवानामत्र भोक्तृत्वं कदाचिज्जीवस्येति अनियमोऽस्त्वित्याशंक्य सर्वं

उभयथोपपत्तेश्चागमाद्देवताधिष्ठितत्वमपि निश्चीयते यदप्युक्तं देवतानामेवाधिष्ठातॄणां भोक्तृत्वप्रसंगो न शारीरस्ये
ति तत्परिह्रियते प्राणवता शब्दात् सतीष्वपि प्राणानामधिष्ठात्रीषु देवतासु प्राणवता कार्यकरणसंघातस्वामिना
शारीरेणैवैषां प्राणानां संबन्धः श्रुतेरवगम्यते तथा हि श्रुतिः अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय
चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमिति आत्मा गन्धाय घ्राणमित्येवं जातीयका शारीरेणैव प्राणानां
संबन्धं श्रावयति अपि चानेकत्वात् प्रतिकरणमधिष्ठात्रीणां देवतानां न भोक्तृत्वमस्मिंच्छरीर अवकल्पते एको ह्ययमस्मि
ञ्छरीरे शारीरो भोक्ता प्रतिसंधानादिसंभवादवगम्यते तस्य च नित्यत्वात् १६ तस्य च शारीरस्यास्मिञ्छरीरे भोक्तृत्वे
नैव नित्यत्वं पुण्यपापोपलेपसंभवात् सुखदुःखोपभोगसंभवाच्च न देवतानां ता हि परस्मिन्नैश्वर्ये पदेऽवतिष्ठमाना न हीने
ऽस्मिञ्छरीरे भोक्तृत्वं प्रतिलब्धुमर्हन्ति श्रुतिश्च भवति पुण्यमेवामुं गच्छति न ह वै देवान्पापं गच्छतीति शारीरेणैव च
नित्यः प्राणानां संबन्धः उत्क्रान्त्यादिषु तदनुवृत्तिदर्शनात् तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं
सर्वे प्राणा अनूत्क्रामन्तीत्यादिश्रुतिभ्यः तस्मात् सतीष्वपि करणानां नियन्त्रीषु देवतासु न शारीरस्य भोक्तृत्व

ते देहे जीवस्य भोक्तृत्वनियमो नास्त्येवेत्याहस्तु चकारः तस्य चेति उत्क्रमणादिषु जीवस्य प्राणाद्यभिचारात्तस्यैव प्राणस्वामित्वं देवता
नां तु परस्वामिकरथसारथ्यवदधिष्ठातृत्वमात्रमिति व्याख्यातं तदाह शारीरेणैव च नित्य इति यथा प्रदीपादिः करणोपकारकस्तथा
करणपतयः सूर्यादयो देवाः करणोपकारिण एव न भोक्तार इत्यर्थः जीवस्य रथादिद्वारा करणाधिष्ठातृत्वाद्रथस्वामिवद्भोक्तृ
त्वे देवानां तु करणोपकारामित्तत्तयासारथ्यवदधिष्ठातृत्वमिति न जीवेनान्यथासिद्धिः देवानामधिष्ठातृत्वेन नास्मिन्देहे भोक्तृत्वा
स्मान्न तु न ह वै देवान्पापं गच्छतीति श्रुत्यादिना बाधितं तस्माच्चक्षुरपाद्रिक्तपाणि पश्यतीति श्रुतेः साधनत्वमात्रबोधित्वादस्मिन्कोऽप्यभ
त्वे तथाप्यधिष्ठातृदेवतापेक्षा वोधकश्रुतिभिरविरोध इति सिद्धं सत्स्विन्द्रियेषु तदधिष्ठातृदेवतासु चेतनान्येव प्राणश्रुतिव्यतिरेकेणानेतानी

५१

सचाक्षुषः ३४

ब्रा॰ सू॰
द्वि॰ च॰
८७

प्राणादीन्द्रियाणां भेदाभेदश्रुतिभ्यां संशयं वदन्पूर्वपक्षयति मुख्यश्चेत्यादिना हन्त इदानीमस्यैव मुख्यप्राणस्य सर्वे वयं स्वरूपं
भवामेति संकल्पात्ते वागादयस्तस्यैव भवन्नित्यभेदश्रुत्यर्थः। ते प्राणा इति भिन्नाः प्राणपदवाच्यत्वान्मुख्यप्राणवदित्याह प्राणेति ते प्रा
णाः श्रेष्ठादन्यत्रान्य इति प्रतिज्ञा यत्वेन पदद्वयं व्याचष्टे तत्त्वान्तराण्येवेति तद्व्यपदेशादित्यत्र तच्छब्दः प्रतिज्ञातान्यत्वपरामर्श
ति प्राण इन्द्रियाणीत्यपर्यायशब्दाभ्यामन्यत्वोक्तेरिति हेतूपपादनार्थत्वेन पुनस्तानि सूत्रपदानि योजयति कथमित्यादिना ।
सूत्रस्य विस्पष्टत्वादुभयार्थत्वमलंकार एव न तु दूषणं एतेन प्रतिज्ञाध्याहारस्तच्छब्दस्य प्रकृतभेदपरामर्शित्वं चेति
दोषद्वयमपास्तं यावद्भेदाद्धेतुभेदसाधनेतिप्रसंगं शंकते नन्विति प्राणवन्मनसोपीन्द्रियेभ्यो भेदः स्यादित्यर्थः अपर्यायश

त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥

मुख्यश्चैकस्तदितरे चैकादश प्राणा अनुक्रान्ताः तत्रेदमपरं संदिह्यते किं मुख्यस्यैव प्राणस्य वृत्तिभेदा इतरे प्राणा आ
होस्वित्तत्त्वान्तराणीति किं तावत्प्राप्तं मुख्यस्यैवेतरे वृत्तिभेदा इति कुतः श्रुतेः तथाहि श्रुतिः मुख्यमितरांश्च प्रा
णान्संनिधाप्य मुख्यात्मतामितरेषां ख्यापयति हन्तास्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवन्निति प्रा
णैकशब्दत्वाच्चैकत्वावगमः इतरथा ह्यन्याय्यमनेकार्थत्वं प्राणशब्दस्य प्रसज्येत एकत्र वा मुख्यमितरत्र लाक्ष
णिकत्वमापद्येत तस्माद्यथैकस्यैव प्राणस्य प्राणाद्याः पञ्च वृत्तयः एवं वागाद्याश्चैकादशेत्येवं प्राप्ते ब्रूमः तत्त्वान्त
राण्येव प्राणाद्वागादीनीति कुतः व्यपदेशभेदात् कोयं व्यपदेशभेदः ते प्रकृताः प्राणाः श्रेष्ठं वर्जयित्वावशिष्टा
एकादशेन्द्रियाणीत्युच्यन्ते श्रुतावेवं व्यपदेशदर्शनात् एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति एवंजाती
यकेषु प्रदेशेषु पृथक्प्राणो व्यपदिश्यते पृथक्चेन्द्रियाणि ननु मनसोप्येवं सति वर्जनमिन्द्रियत्वेन प्राणवत्स्या
न्मनः सर्वेन्द्रियाणि चेति पृथग्व्यपदेशदर्शनात् सत्यमेतत् स्मृतौ त्वेकादशेन्द्रियाणीति मनसोपीन्द्रियत्वेन श्रोत्रादि
वत्संग्रहात् प्राणस्य त्विन्द्रियत्वं न श्रुतौ वा प्रसिद्धमस्ति व्यपदेशभेदश्चायं तत्त्वभेदपक्ष उपपद्यते तत्त्वैकत्वे तु स ए
वैकः सन्प्राण इन्द्रियव्यपदेशं लभते न लभते चेति विप्रतिषिद्धं तस्मात्तत्त्वान्तरभूता मुख्यादितरे कुतश्च तत्त्वान्त

स्मृतौ २॥

नाभेदात्स्वतन्त्रसंज्ञवत्तभेदश्रुत्युत्सर्गः स च मनःषष्ठानीन्द्रियाणीत्यादिस्मृतिबाधान्मनस्यपोद्यते प्राणे तद्बाधकाभावादुत्सर्ग
सिद्धिरिति समाधत्ते सत्यमित्यादिना मन इन्द्रियाणि चेति भेदोक्तिर्गोबलीवर्दन्यायेनेनेया सिद्धान्ते मनसः प्रमोपादानत्वात्तस्य
वदनिन्द्रियत्वमिष्टं ततो नोत्सर्गबाध इति केचित् किंच एतस्माज्जायते प्राण इन्द्रियाणि चेति पृथग्जन्मव्यपदेशात्स्वतन्त्रवस्तु
भेद इत्याह व्यपदेशभेदश्चायमिति एकस्मिन्वाक्ये प्राण इन्द्रियपदं न लभते किं तु मात्र लभते चेति व्याघातादित्यर्थः
एवं भेदेनापर्यायसंज्ञाभ्यामुक्तः पृथग्जन्मोक्तेश्चेति तद्व्यपदेशादिति हेतुर्व्याख्यातः भेदश्रुतेरिति सूत्रेण भेदो हेतूकृतः

॥ द्वि॰ च॰ ब्रा॰ ॥

नदेवाऽस्याः स्त्रीयेंद्रियमनोवृत्तिरूपाश्रमस्तराणां पापवृत्तिरूपाणां जयार्थमुद्गीथकर्मणि प्रयमंत्र्याः एतां वाचमस्तु चक्षुस्त्वमुद्गायेत्युद्गाना
यार्थं मिति नयास्वितन्यमीक्षत्वोद्गा यतीवाचमनस्तादिदोषणविध्वंसितवतोसुरा इमे वक्रमेणपरे वेषिंद्रियेषु पश्चादयतिप्रकार
णाविद्धि यप्रसिद्धनोसमवमामस्तमस्वाप्राणमस्तुचक्षुस्त्वमुद्गायेति तत्र प्राणेनोद्गात्रा निर्विषयतयासंगदोषमस्पृश्यतासुरान्हाइत्यसु
राणां विध्वंसितेनास्य मुख्यप्राणस्योत्कर्षभेदसिद्धिरित्याह तेइति तानित्रीणपान्ताम्यात्मनेस्वार्थं प्रजापतिः कृतवानित्यर्थः विरुद्धधर्म
वत्वाच्च भेद इत्याह वैलक्षण्याच्चेति मस्तुरासंगदोषः वागादिष्वनपत्न वतीत्यर्थः वक्र्मभिभेदलिंगेविरोद्धागादीनां प्राणरूपभव
नेहवाचमस्तुचक्षुरित्युपक्रम्य वागादीनसुरपाप्मविधुस्तानुपन्यस्योपसंहृत्य वागादिप्रकरणमथहेममासन्यं प्राणमस्तुचक्षुरित्यसुरवि
ध्वंसितेनामुख्यस्य प्राणस्य प्रथगुपक्रमणात्तथा मनोवाचं प्राणं तान्यात्मनेकुरुतेत्येवमाद्याश्रुभेदश्रुतयः उदाहर्त्तव्याः त
स्मादपितत्वांतरभूताममुख्यादितरेकृतस्य तत्वांतरभूता वैलक्षण्याच्च १९ वैलक्षण्यं च भवति मुख्यस्येतरेषां च सुप्तेषु वा
गादिषु मुख्य एको जागर्त्ति स एव चैको मृत्युनानाप्तः आप्तास्त्वितरे तस्यैव च स्थित्युत्क्रांतिभ्यां देहधारणपतनहेतुत्वं नेंद्रिया
णां विषयालोचनहेतुत्वं चेंद्रियाणां न प्राणस्येत्येवं जातीयको भूयान्लक्षणभेदः प्राणेंद्रियाणां तस्मादप्येषां तत्वांतर
भावसिद्धिः यदुक्तं एतस्यैव सर्वे रूपमभवन्निति श्रुतेः प्राण एवेंद्रियाणीति तदयुक्तं तत्रापि पौर्वापर्यालोचनाद्भेदप्र
तीतेः तथाहि वदिष्याम्येवाहमिति वागदध्रे इति वागादीनींद्रियाण्युपक्रम्य तानि मृत्युः श्रमोभूत्वोपयेमे तस्माच्छ्राम्य
त्येव वागिति च श्रमरूपेण मृत्युनाग्रस्तत्वं वागादीनामभिधायाथेममेव नाप्नोद्योयं मध्यमः प्राण इति पृथक्प्राणं मृत्युनान
भिभूतमनुक्रामति अयं वैनः श्रेष्ठ इति च श्रेष्ठतामस्यावधारयति तस्मात्तदविरोधेन वागादिषु परिस्पंदलाभस्य प्राणा
यत्तत्वं तद्रूपभवनं वागादीनामिति मंतव्यं न तात्त्विकमतएव च प्राणशब्दस्येंद्रियेषु लाक्षणिकत्वसिद्धिः तथा च श्रुतिः एत
स्यैव सर्वे रूपमभवन् तस्मादेत एतेनाख्यायंते प्राणा इति मुख्यप्राणविषयस्यैव प्राणशब्दस्येंद्रियेषु लाक्षणिकवृत्तिं द
र्शयति तस्मात्तत्वांतराणि प्राणादिंद्रियाणीति संज्ञामूर्त्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् २० सत्प्रक्रियायां तेनजीव
नप्राणाधीनस्थितिकत्वरूपं व्याख्येयं एतदेव प्राणशब्दस्येंद्रियेषु लक्षणाबीजं श्रुतौ तस्मादेतत्पते नाख्यायंते इति परामृ
ष्टमिति न भेदाभेदश्रुत्योर्विरोध इति सिद्धं उत्पत्तिरुत्पादनेति च कार्यकर्त्रोर्व्यापारौ प्रसिद्धौ तत्र जगदुत्पत्तिश्रुतिविरोधः प्र
नेन पादद्वयेन निरस्तः संप्रत्युत्पादनश्रुतिविरोधो निरस्यते तत्रापि सत्त्वमभनोत्पादनं परमेश्वरमेवेति श्रुतिषु विप्रतिपन्न
स्थूलभूतोत्पादनेत्वस्ति श्रुतिविप्रतिपत्तिरिति तन्निरासायेमाह संज्ञाउपदेशादिति नामरूपभेदात्कारणाभिन्नः प्राणइत्य
के तत्र संयोगेन स्थूलनामरूपक्लृप्तिः किंकर्तृकेति चिंतनमत्यवांतरसंगतिः प्रक्रियाप्रकरणं॥ श्रीरामायनमः॥ ॥

मूर्त्तिक्लृप्तिस्तु त्रिवृत्कुर्वत २५

छान्द. विव. ८८

ईक्षणमेवाह हंतेत्यादिना हंतेदानीं देवताः सत्त्वाऽनुप्रविश्येति संबंधः तासां तिसृणां देवतानामेकैकां देवतां तेजोबन्नात्मनाव्याप्ति
कोकरिष्यामीति श्रुतिः पंचीकरणोपलक्षणार्था छांदोग्ये प्याकाशवाय्वोरनुपसंहारस्योक्तत्वादेवं स्थूलीकृतेषु भूतेषु प्राणिनां व्य
वहारः सेत्स्यतीति परदेवतायास्तात्पर्यं जीवेनेति परस्य व्याकरवाणीत्यनेन संबंधसंभवासंभवाभ्यां संशयमाह तत्रेति पूर्वपक्षे जी
वस्यैव भौतिकस्रष्टृत्वब्रह्मणः सर्वस्रष्टृत्वासिद्धिः सिद्धांते न तत्सिद्धिरिति फलं जीवेनेत्यस्य व्याकरवाणीति प्रधानक्रियापदेन संबंध इति
तात्

हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणी
ति तत्र संशयः किं जीवकर्तृकमिदं नामरूपव्याकरणमुत परमेश्वरकर्तृकमिति तत्र प्राप्तं तावज्जीवकर्तृकमेवे
दं नामरूपव्याकरणमिति कुतः अनेन जीवेनात्मनेति विशेषणात् यथा लोके चारेणाहं परसैन्यमनुप्रविश्य संकल
यानीत्येवंजातीयके प्रयोगे चारकर्तृकमेव सत्संकलनं हेतुकर्तृत्वाद्राजात्मन्यध्यारोपयति संकलयानीत्युत्तम
पुरुषप्रयोगेण एवं जीवकर्तृकमेव सन्नामरूपव्याकरणं हेतुकर्तृत्वाद्देवतात्मन्यध्यारोपयति व्याकरवाणीत्युत्तमपु
रुषप्रयोगेणापि च डित्थकपित्थादिषु नामसु घटशरावादिषु च रूपेषु जीवस्यैव व्याकर्तृत्वं दृष्टं तस्माज्जीवकर्तृक
मेवेदं नामरूपव्याकरणमित्येवं प्राप्ते अभिधत्ते संज्ञामूर्तिक्लृप्तिस्त्विति तुशब्देन पक्षं व्यावर्तयति संज्ञामूर्तिक्लृप्तिरि
ति नामरूपव्याक्रियेत्येतत् त्रिवृत्कुर्वत इति परमेश्वरं लक्षयति त्रिवृत्करणे तस्य निरपवादकर्तृत्वनिर्देशात् येयं
संज्ञाक्लृप्तिर्मूर्तिक्लृप्तिश्चाग्निरादित्यश्चन्द्रमा विद्युदिति तथा मूर्तिक्लृप्तिः कुशकाशपलाशादिषु पशुमृगमनुष्यादिषु च प्र
त्याकृति प्रतिव्यक्ति चानेकप्रकारा सा खलु परमेश्वरस्यैव तेजोबन्नानां निर्मातुः कृतिर्भवितुमर्हतीति कुतः उपदेशात् तथा
हि सेयं देवतेत्युपक्रम्य व्याकरवाणीत्युत्तमपुरुषप्रयोगेण परस्यैव ब्रह्मणो व्याकर्तृत्वमिहोपदिश्यते ननु जीवेनेति
विशेषणाज्जीवकर्तृत्वं व्याकरणस्याध्यवसितं नैतदेवं जीवेनेत्येतदनुप्रविश्येत्यनेन संबध्यते आनंतर्यात् न व्याक
रवाणीत्यनेन तेन हि संबंधे व्याकरवाणीत्ययं देवताविषय उत्तमपुरुषप्रयोग औपचारिकः कल्प्येत न च गिरिन
दीसमुद्रादिषु नानाविधेषु नामरूपेष्वनीश्वरस्य व्याकरणसामर्थ्यमस्ति येष्वपि चास्ति सामर्थ्यं तेष्वपि परमेश्वरायत
मेव तत्

पूर्वपक्षमाह तत्र प्राप्तमिति परदेवताया अकर्तृत्वे कथमुत्तमपुरुषप्रयोग इत्याशंक्य प्रयोजककर्तृत्वात्कर्तृत्वोपचार इत्या
ह यथा लोक इति सिद्धांतयति तुशब्देत्यादिना प्रत्याकृतीति प्रतिजातीत्यर्थः अनेन स्थूलसर्वसर्गे जीवस्यासामर्थ्यं द्यो
तितं तथा च पदान्वयस्य पदार्थयोग्यताधीनत्वाज्जीवरूपेण प्रविश्याहमेव व्याकरवाणीत्यन्वयः न तु जीवेन व्याकरवाणीति ॥

॥ ननु तर्हि अनेव शक्तिया जीवकर्तृकं व्याकरणमीश्वरकर्तृकमिति कर्तृभेदात्कथं सत्ययोनस्यादित्यत आह नच जीवो नामेति वस्तु
तस्तत्स्वरूपेण जलप्रतिबिम्बवदिति प्रतिबिम्बभावाख्यप्रवेशस्य सर्वस्यैव कर्तृत्वमयोगाज्जीवात्मना प्रवेशेपीश्वर एव कुरुते तित्का स्तुतियुक्तेति
वोध्यं ननु भेदस्य जीव एव व्याकृतो किं न स्यादित्याशंक्य कल्पनया भिन्नस्य तस्याशक्तत्वात्तु ति विरोधाच्च नैवमित्याह परमेश्वर इति
प्रत्येकं न हाभूतसर्गस्य प्रागुक्तत्वादिह व्याकरणवाक्ये यत्नपूर्वकस्थूलभौतिकसर्ग उच्यते इति पाठव्यत्ययेन सूत्रं सूचितं स्फुटयति
माह त्रिवृत्करणपूर्वकमिति ईश्वरकृतत्वमात्मत्वकृतमित्यत आह नचेति इदानीं नामरूपव्याकरणक्रममाह तत्राग्निरिति यद

नच जीवो नाम परमेश्वरात् स्वतन्त्रस्य व्यावर्तकः आत्मनेति विशेषणादुपाधिमात्रनिबन्धनत्वाच्च जीवभावस्य तेन नतः
मपि नामरूपव्याकरणं परमेश्वरकृतमेव भवति परमेश्वर एव च नामरूपयोर्व्याकर्तेति सर्वोपनिषत्सिद्धान्तः आकाशो ह
वै नाम रूपयोर्निर्वहिता इत्यादिश्रुतिभ्यः तस्मात्परमेश्वरस्यैव त्रिवृत्कुर्वतः कर्म नामरूपयोर्व्याकरणं त्रिवृत्करणपूर्वकमेव
वेदं नामरूपव्याकरणं विवक्ष्यते प्रत्येकं नामरूपव्याकरणस्य तेजोबन्नोत्पत्तिवचनेनैवोक्तत्वात् नच त्रिवृत्करणमन्यादि च
इति पुरस्तान्निर्दर्शयति यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येत्यादिना तत्राग्निरिति द्रव्यव्याक्रि
यते सतिरूपव्याकरणं विषयप्रतिलम्भादग्निरिति हीदं नाम व्याक्रियते एवमेवादित्यचन्द्रविद्युत्स्वपि द्रष्टव्यं अनेन चाग्न्युदा
हरणेन भौमाम्भसतैजसेषु त्रिष्वपि द्रव्येष्वविशेषेण त्रिवृत्करणमुक्तं भवति उपक्रमोपसंहारयोः साधारणत्वात् तथाहि अ
विशेषेणैवोपक्रमः इमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवतीति अविशेषेणैव चोपसंहारो यदु रोहितमिवाभूदिति तेजसस्त
द्रूपमिति एवमादिः यद्विज्ञातमिवाभूदित्येतासामेव देवतानां समास इत्येवमन्तः तासां तिसृणां देवतानां बहिस्त्रिवृत्कृतानां स
तीनामध्यात्ममपरं त्रिवृत्करणमुक्तं इमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवतीति तदिदानीमाचार्यो यथाश्रुत्यैवो
पदर्शयत्यापादितदोषं परिहरिष्यन् मांसादिभौमं यथाशब्दमितरयोश्च ॥ २१ ॥ भौमेति त्रिवृत्कृतायाः पृथिव्याः पुरुषेणोपभुज्यमाना
याः मांसादिकार्यं यथाशब्दं निष्पद्यते तथाहि श्रुतिः अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्य

स्तन्मांसं भवतीत्यत्र वेदशब्दः सर्वविकारोपलक्षणार्थः त्रिवृत्कृतानां त्रयाणामेव भूतानां त्रैरूप्याद्बहिः सर्वत्र दृष्टं तथाभिव्यक्तिः तेषाम्
विरोधः ननु न्यायदेहानां तेजसा नामेवकारेणाबुदाहरणाज्जलयोः स्वात्मकत्वं न विवक्षितमित्यत आह अनेन चेति उपक्रमेतासाम
ध्यदिति दोषः यत्कपोतरूपादिकं कस्मात्वादि विज्ञानं विज्ञातमिव भवति तद्देवतानां समुदायरूपमित्यर्थः बाह्यं त्रिवृत्करण
मुक्त्वा आध्यात्मिकमपरं सर्वोक्तलक्षणं वदन्नतरसूत्रमवतारयति तासामित्यादिना पुरुषशरीरं प्राप्यैकैका त्रिवृद्भवति कार्य

रत्न·
द्वि·च
८९

ननु त्र्यात्मकं मांसादिकं चेद्भौममित्यत आह त्रिवृत्कृतायामपीति प्राणस्य वायोरपकार्यत्वमौपचारिकं द्रष्टव्यं एवं विषमत्वादोषं शंकते अत्राहेति तदुत्तरत्वेन सूत्रं व्याचष्टे तुशब्देनेति स्वभागाधिक्यं वैशेष्यं किमर्थं कृतमित्यत आह।

मां२ ते३ अ१

त्रिवृत्कृतायामपि इरैवेषा व्रीहियवाद्यन्नरूपेणाद्यत इत्यभिप्रायः तस्याश्चाद्यमानायाः स्थविष्ठं रूपं पुरीषभावेन वहिर्निर्गच्छति मध्यममध्यात्मं मांसं वर्धयति अणिष्ठं मन एवमितरयोरपि तेजसोर्यथाशब्दं कार्यमवगन्तव्यं एवं मूत्रं लोहितं प्राणश्चापां कार्यमस्थि मज्जा वाक् तेजस इति अत्राह यदि सर्वमेव त्रिवृत्कृतं भूतभौतिकमविशेषश्रुतेः तासां त्रिवृतं त्रिवृतमेकैकामकरोदिति किंकृतस्तर्हि अयं विशेषव्यपदेशः इदं तेज इमा आप इदमन्नमिति तथाध्यात्ममिदमन्नस्याशितस्य कार्यं मांसादीदमपां पीतानां कार्यं लोहितादीदं तेजसोऽशितस्य कार्यमस्थ्यादीत्यत्रोच्यते वैशेष्यात्तु तद्वादस्तद्वादः २२ तुशब्देन चोदितदोषमपनुदति विशेषस्य भावो वैशेष्यं भूयस्त्वमित्यर्थः सत्यपि त्रिवृत्करणे क्वचित्कस्यचिद्भूतधातोर्भूयस्त्वमुपलभ्यते अग्नेस्तेजोभूयस्त्वमुदकस्याब्भूयस्त्वं पृथिव्या अन्नभूयस्त्वमिति व्यवहारप्रसिध्यर्थं चेदं त्रिवृत्करणं व्यवहारश्च त्रिवृत्कृतरज्जुवदेकत्वापत्तौ सत्यां न भेदेन भूतत्रयगोचरो लोकस्य प्रसिध्येत् तस्मात्सत्यपि त्रिवृत्करणे वैशेष्यादेव तेजोवन्नविशेषवादो भूतभौतिकविषय उपपद्यते तद्वादस्तद्वाद इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति इति श्रीशारीरकमीमांसाभाष्ये द्वितीयाध्यायस्य चतुर्थपाद अध्यायश्च ॥४॥ ॥

पं·६

व्यवहारप्रसिध्यर्थमिति एवं सर्वन्यायमतानां तरश्रुतिशिरोविरोधो ब्रह्मणि वेदान्ततात्पर्यमेवेति सिद्धं इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दानन्दभगवत्पादकृतौ शारीरकमीमांसाव्याख्यायां द्वितीयाध्यायस्य चतुर्थः पादः अध्यायश्च ४ ॥

IV

missing 2, 34

ॐ
आ° भा°
टी° प्र°
१

ॐ श्रीगणेशाय नमः ॐ यमिह कारुणिकं शरणं गतो यदि सहोदरमाप महत्पदं तमहमाशु हरिं परमाश्रये जनकजांकम
नंतसुखाकृतिं १ श्रीगौर्यास कलार्थदं निजपदांभोजेन मुक्तिप्रदं प्रोद्यद्विघ्नवनं हरंतमनघं श्रीदं दितं ज्ञसिता वंदे च मैक
पालिकोपकरणं वैराग्यसौख्यात्परं नास्तीति प्रदिशंतमंतविधुरं श्रीकाशिकेशं शिवं २ यत्कृपालवमात्रेण मूको भवति पंडि
तः वेदशास्त्रपुरीणां तां वाणीं वीणाकरां भजे ३ कामाक्षीदत्तदुग्धप्रचुररसरसत्प्राज्यभोज्याधिपूज्यश्रीगौरीनायकाभिख्यक
टनशिवरामाग्रेलब्धात्मबोधैः श्रीमद्गोपालगीर्भिः प्रकटितपरमाद्वैतभासा सितास्य श्रीमद्गोविंदवाणीचरणकमलयो।
र्निर्वृतोहं ययालिः ४ सोत्तपूर्णीकाच्चा श्रीकामाक्ष्या दत्तं पायसं देवैरपि स्तुतं प्राज्यं संपूर्णं प्रकृष्टान्नयुक्तं वा यद्भोज्यमन्नं ते।
नाधिपूज्याः श्रीशिवरामयोगिनः किंच शिवश्चासौ रामश्चेति स्वनाम्ना श्रीगौरीनायकयोरभेदं प्रकटयतीति तेभ्यो गुरुभ्यो लब्धा
त्मबोधैः श्रीमद्गोपालसरस्वतीभिस्तैरित्यर्थः श्रीशंकरं भाष्यकृतं प्रणम्य व्याख्यं हरिहरब्रह्मकृते च वच्मि श्रीभाष्यतीर्थपरहंस
तत्त्वैवाग्जालबंधच्छिदमभ्युपायं ५ अत्र भाष्ये कुटिलवाग्रूपेण जालेन यो बंधः जालबद्धपक्षिणामिव परमहंसानां क्लेश
करः तन्नाशकमभीष्टमुपायं वच्मीत्यर्थः विस्तीर्णग्रंथवीक्षायामलसं यस्य मानसं व्याख्यातदर्पसारव्याभाष्यरत्नप्रभाभिधा ६
श्रीमच्छारीरकं भाष्यं प्राप्यवाकुण्डिमाम्ययात् इति श्रमोमिमसफलो गंगारथ्योदकं यथा ७ यदज्ञानसमुद्भूतमिंद्रजालमिदं।
जगत् सत्यज्ञानसुखानंतं तदहं ब्रह्म निर्भयं ८ इह खलु स्वाध्यायोध्येतव्य इति नित्याध्ययनविधिनाधीतसांगस्वाध्यायैर्द्विजि
ज्ञासस्वरूपोन्वेष्टव्यः स विजिज्ञासितव्यः आत्मा वा अरे द्रष्टव्यः श्रोतव्य इति श्रवणविधिरुपलभ्यते तस्य र्थः अमृतत्वकामे
नाद्वैतात्मविचार एव वेदांतवाक्यैः कर्तव्य इति तेन काम्यत्वनियमविधिनापाद्विज्ञातस्य शास्त्रप्रवृत्तिर्दैदकानां पुराणादि।

१

श्रोतव्यश्रुतिविहितश्रवणात्मकं वेदान्तमीमांसाशास्त्रं विषयप्रयोजनसंभवासंभवाभ्यां संशयः तत्र वाहं ब्रह्मेति भेदग्राहि
प्रत्यक्षेण कर्तृत्वाकर्तृत्वादिविरुद्धधर्मवत्त्वलिंगकानुमानेन च विरोधेन ब्रह्मात्मनोरैक्यस्य विषयस्यासंभवात् सप्रपंचबंधस्य ज्ञा
नान्निवृत्तिरूपफलासंभवाच्चानारंभणीयमिति प्राप्ते सिद्धांतः अथातो ब्रह्मजिज्ञासेति अत्र श्रवणविधिसमानार्थत्वाय कर्तव्ये
ति पदमध्याहर्तव्यं अध्याहृतं च भाष्यकृता ब्रह्मजिज्ञासा कर्तव्येति तत्र प्रकृतिप्रत्ययार्थयोः ज्ञानेच्छयोः कर्तव्यत्वान्वया
यात् इच्छाफलीभूतं ज्ञानमजहल्लक्षणयोच्यते प्रत्ययेनेच्छासाध्यो विचारोऽजहल्लक्षणया तथा च ब्रह्मज्ञानाय विचारः
कर्तव्य इति सूत्रस्य श्रौतोऽर्थः संपद्यते तत्र ज्ञानस्य स्वतः फलत्वायोगात् प्रमातृत्वकर्तृत्वभोक्तृत्वात्मकानर्थनिवर्तकत्वेने
व फलत्वं वक्तव्यं तस्मादनर्थस्य सत्यत्वे ज्ञानमात्रान्निवृत्त्ययोगाद् अध्यस्तत्वं वक्तव्यमिति बंधस्याध्यस्तत्वमर्थात्सूचितं तच्चाध्या
सस्य विषयप्रयोजनवत्त्वसिद्धिहेतुः तथाहि शास्त्रमारंभणीयं विषयप्रयोजनवत्त्वात् भोजनादिवत् शास्त्रं प्रयोजनव
त् बंधनिवर्तकज्ञानहेतुत्वात् रज्जुरियमित्यादिवाक्यवत् बंधो ज्ञाननिवर्त्यः अध्यस्तत्वात् रज्जुसर्पवदिति प्रयोजनसि
द्धिः एवमध्यासस्याज्ञानात् जीवगतानर्थभ्रमनिवृत्तिफलस्य च यज्जीवब्रह्मणोरैक्यं विषयमप्यर्थात्सूचयति अध्यस्ता
नादन्यत्र भ्रमानिवृत्तेः जीवो ब्रह्माभिन्नः तज्ज्ञाननिवर्त्याध्यासाश्रयत्वात् यदित्थं तत्तथा यथा शुक्त्यभिन्न इदमंश इति वि
षयसिद्धिहेतुरध्यास इत्येवं विषयप्रयोजनवत्त्वाच्छास्त्रमारंभणीयमिति अत्र पूर्वपक्षे बंधस्य सत्यत्वेन ज्ञानान्न निवृत्ते
र्ध्यानादिसाध्या मुक्तिरिति फलं सिद्धांते ज्ञानादेव मुक्तिरिति विवेकः एवमर्थं वृत्तिनाय ब्रह्मसूत्राणि व्याख्यातुकामो
भगवान्भाष्यकारः सूत्रेण विचारकर्तव्यतारूपश्रौतार्थान्यथानुपपत्त्यार्थात्सूचितं विषयप्रयोजनवत्त्वं उपोद्घातत्वा

तस्मिन्हि दिदव्यासावेपसमाधानमाभाष्याभ्यां प्रथमं वर्णयति युष्मदस्मत्प्रत्ययगोचरयोरिति एतेन सूत्रार्थास्पर्शित्वात् अथा
सग्रंथोनध्यासमिति निरस्तम् आर्थिकार्थस्पर्शित्वात् एतन्मंगलाचरणाभावाद्व्याख्येयमिदं भाष्यमिति तन्नस्मरतामितिवेलभा।
वानुपपत्तिरित्यंतभाष्यरचनार्थेनर्थस्य सर्वोपप्लवरहितविज्ञानघनप्रत्यगर्थस्य तत्त्वस्य स्फुरत्वात् अतो निर्दोषत्वादिदं
भाष्यं व्याख्येयं लोकेऽस्मृतौऽदंरजतमितिभ्रमः सत्यरजतऽदंरजतमित्यर्थयज्ञानसमान्यारोपविशेषौ येभेक्यप्रमाहितसं
स्कारजन्योऽहृष्टइति अत्रात्मानात्मनोरैकाध्यासपूर्वप्रमावाध्यासाचात्मानात्मनोर्वास्तवैक्यमपेतमेवेनहितदृष्टि तथा
हि आत्मानात्मानावैकास्मोपास्यौ काध्यासपत्वात् तमःप्रकाशवदितिमत्वाहेतभ्रजेविरोधं वस्तुतः प्रतीतितोव्यवहा।
रतश्चसाधयति युष्मदस्मत्प्रत्ययगोचरयोरिति नच प्रत्ययोत्तरपदयोश्चेतिहेत्वाप्रत्ययेचोत्तरपदेचपरतोयुष्मदस्मदोर्म
पर्यंतस्यत्वमादेशौस्तइतिविधानात् त्वदीयंमदीयंत्वत्पुत्रोमत्पुत्रइतिवत् त्वन्मत्प्रत्ययगोचरयोरितिस्यादितिवाच्यं त्वमावे
कवचनेऽस्येकवचनाधिकारात् अत्रचयुष्मदस्मत्पदयोरेकार्थवाचित्वाभावादनात्मनोयुष्मदर्थानांबहुत्वात् अस्मदर्थ।
चैतन्यस्याप्युपाधितोबहुत्वाच्च नन्वेवंमतिकथमत्रभाष्येविग्रहः नचयूयमितिप्रत्ययोयुष्मत्प्रत्ययः वयमितिप्रत्ययोस्म
त्प्रत्ययः तद्गोचरयोरितिविग्रहइतिवाच्यं प्राकृसाधुत्वेप्यर्थासाधुत्वात् नह्यहंकाराद्यनात्मनोयूयमितिप्रत्ययविषयत्वम
स्तीतिचेन्नगोचरपदस्ययोग्यपरत्वात् चिदात्मातावदस्मत्प्रत्ययोग्यः तत्प्रयुक्तसंशयादिनिवृत्तिफलभाक्त्वात् नता
वदयमेकांतेनाविषयः अस्मत्प्रत्ययविषयत्वादितिभाष्योक्तेश्च यद्यप्यहंकारादिरपितद्योग्यस्तथापिचिदात्मनःसकाशा
दत्यंतभेदसिद्ध्यर्थंयुष्मत्प्रत्ययपदयोरन्यतरत्त्याज्यं आश्रमश्रीचरणास्तट्टीकायोजनायामेवमाहुः ॥ ॥ ॥

वि

संबोध्यश्चेतनो युष्मत्पदवाच्यः अहंकारादिविशिष्टश्चेतनोऽस्मत्पदवाच्यः तथा च युष्मदस्मदोः स्वार्थे प्रयुज्यमानयोरेव त्वमादेश
नियमेन लाक्षणिकयोः युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावितिसूत्रासांगत्यप्रसंगात् अत्रशब्दलक्षणयोरविवचि
न्मात्रस्तु मात्रलक्षणयोरपि न त्वमादेशः लक्षकत्वाविशेषादिति यदि न योः शब्दबोधकत्वे सत्येव त्वमादेशाभावस्त्विनेन सूत्रे।
णत्वापितं तदास्मिन्भाष्ये युष्मत्पदेन युष्मच्छब्दजन्यप्रत्ययविषयः पराग्र्थो लक्ष्यते अस्मच्छब्देनास्मच्छब्दजन्यप्रत्ययविषयः प्रत्य
गात्मा तथा च लक्ष्यतावच्छेदकतया शब्दोऽपि विवक्षितः इति न त्वमादेशः न च पराक्त्वप्रत्यक्त्वयोरेव लक्ष्यतावच्छेदकत्वे न श
ब्दयोरप्यंशस्योरवादिति वाच्यं पराक्प्रतीचोर्विरोधस्फुरणार्थे विरुद्धशब्दोपस्थितत्वस्यापि वक्तव्यत्वात् अतएवेदमस्मत्प्र।

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमः ॥ ॐनम

यगोचरयोरिति वक्तव्येऽपीदंशब्दोऽस्मदर्थे लोके वेदे च बहुशः इमे वयमास्महे इमे विदेहा अयमहमस्मीति च प्रयोगदर्शनात् ना
स्मच्छब्दो विरोधीति मत्वा युष्मच्छब्दः प्रयुक्तः इदंशब्दप्रयोगे विरोधास्फूर्तेः एतेन चेतनवाचित्वादस्मच्छब्दः पूर्वं प्रयोक्तव्यः।
अभ्यर्हितं पूर्वमिति न्यायात् त्यदादीनि सर्वैर्नित्यमिति सूत्रेण विहितएकशेषप्रसङ्गादिति निरस्तं युष्मदस्मदोरिति सूत्रेऽत्रा
पि पूर्वनिपातैकशेषयोः प्राप्तमेकशेषे विवक्षितविरोधास्फूर्तेश्च इहात्र युष्मदर्थादनात्मनोऽतिः कृष्णस्य हस्यचिह्नातोऽध्या।
रोपापवादन्यायेन ग्रहणं द्योतयितुं आदौ युष्मद्ग्रहणमित्याहुः तत्र युष्मदस्मत्पदाभ्यां पराक्प्रत्यक्तेनात्मानात्मनोर्वस्तुतः वि
रोध उक्तः ॥

शा॰ भा॰
टी॰ प्र॰
४

प्रत्ययपदेन प्रतीतितो विरोधः प्रतीयत इति प्रत्ययोऽहंकारादिरनात्मा इदम्पतया भाति आत्मा तु प्रतीतिमात्रस्वरूपः स्वप्रकाशतया भाति गोचरपदेन व्यवहारतो विरोध उक्तः युष्मदर्थः प्रत्यगात्मतिरस्कारेण कर्ताहमित्यादिव्यवहारगोचरः अस्मदर्थस्त्वनात्मप्रविलापनेनाहं ब्रह्मेति व्यवहारगोचर इति त्रिधा विरोधः स्फुटीकृतः युष्मच्चास्मच्च युष्मदस्मदी ते एव प्रत्ययौ च तौ गोचरौ चेति युष्मदस्मत्प्रत्ययगोचरौ तयोस्त्रिधा विरुद्धस्वभावयोरितरेतरभावोऽत्यन्ताभेदस्तादात्म्यं वा तदनु।

प्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां ॥

पपत्तौ सिद्धायामित्यन्वयः ऐक्यासंभवेऽपि शङ्कोच्चदस्त्वादिवत्तादात्म्यं किं न स्यादित्यत आह विषयविषयिणोरिति विरुद्धयोर्विषयविषयित्वाद्दीपघटयोरिव न तादात्म्यमिति भावः युष्मदस्मदी पराक्प्रत्यग्वस्तुनी ते एव प्रत्ययस्य गोचरस्ते इति वा विग्रहः अत्र प्रत्ययगोचरपदाभ्यामात्मानात्मनोः प्रत्यक्पराग्भावे चिदचित्त्वे हेतुरुक्तः तत्र हेतुमाह विषयविषयिणोरिति अनात्मनो ग्राह्यत्वादचित्त्वं आत्मनस्तु ग्राहकत्वाच्चित्त्वं वाच्यं अचित्त्वे स्वस्य स्वेन ग्रहस्य कर्मकर्तृत्वविरोधेनासंभवात् अप्रत्यक्तापत्तेरित्यर्थः यद्येवं वा हेतुहेतुमद्भावः ॥

४

नन्वेवमात्मानात्मनोः पराक्प्रत्यक्त्वेनचिदचित्त्वेनग्राह्यग्राहकत्वेनचविरोधात्तमः प्रकाशवदैकस्यतादात्म्यस्यैवानुपपत्तेरस
संगतत्वमित्यभावेनाध्यासाभावेपितद्धर्माणां चैतन्यसुखजाड्यदुःखादीनांविनिमयेनाध्यासोस्त्वित्यत आह तद्धर्माणामपी।
ति तयोरात्मानात्मनोः धर्मास्तद्धर्मास्तेषामपीतरेतरभावानुपपत्तिः इतरत्रधर्मितोरेकतरेषांधर्मिणांभावः संसर्गः तस्यानुप
पत्तिरित्यर्थः नहिधर्मिणाः संसर्गविनाधर्माणांविनिमयोस्ति स्फटिकलोहितवस्त्रसंनिधानाल्लौहित्यधर्मसंसर्गः असं
गात्वधर्मिणः केनाप्यसंसर्गान्नधर्मिसंसर्गपूर्वकोधर्मसंसर्गः अतस्त्वादित्यभिप्रेत्योक्तं सुतरामिति नन्वात्मानात्मनोस्ता
दात्म्यसतद्धर्मसंसर्गस्यचाभावेप्यध्यासः किंनस्यादित्यत आह इत्यत इति इत्युक्तरीत्यातादात्म्याद्यभावेनततश्चमायाप्यभा।

तद्धर्माणामपिसुतरामितरेतरभावानुपपत्तिरित्यतोस्मत्प्रत्ययगोचरेविषयिणिचिदात्मके ॥ ॐत्रमः

वादतः प्रमाजन्यसंस्कारस्याध्यासहेतोरभावादध्यासोमिथ्येतिभवितुंयुक्तमित्यन्वयः मिथ्याशब्दोद्व्यर्थः अपह्नववचनोऽ।
निर्वचनश्चेत्यत्रचापह्नवार्थः ननुकुत्रकस्याध्यासोपह्नूयतेत्याशंक्यात्मन्यनात्मतद्धर्माणामनात्मन्यात्मतद्धर्माणामध्यासो।
निरस्यत इत्याह अस्मत्प्रत्ययगोचरइत्यादिना अहमितिप्रत्यययोग्यत्वंबुद्ध्यादेरप्यस्तीतिमत्वानतत्आत्मानंविवेचयति विष
यिणीति बुद्ध्यादिसाक्षिणीत्यर्थः साक्षित्वेहेतुश्चिदात्मक इति अहमितिभासमानेचिदंशात्मनीत्यर्थः युष्मत्प्रत्ययगोचरस्ये
ति त्वंकारयोग्यस्येदमर्थस्येविषयावत् नन्वहमितिभासमानबुद्ध्यादेः कथमिदमर्थत्वमित्यत आह विषयस्येति साक्षिभा
स्यस्येत्यर्थः साक्षिभास्यत्वबुद्ध्यपरत्वानायोगाद्बुद्ध्यादेश्चघटादिवदिदमर्थत्वेनप्रतिभासतइतिभावः ॥ ॥ ॥ ॥

शा॰ भा॰
प्र॰ टी॰ प्र॰
५

5

अथवा परात्मनो मुख्यं सर्वान्तरत्वरूपं प्रत्यक्त्वं प्रतीतित्वमहं ब्रह्मास्मीति व्यवहारगोचरत्वं चोक्तं तदसिद्धमहमिति प्रतीयमा
नत्वात् अहंकारवदित्याशंक्याह अस्मत्प्रत्ययगोचर इति अस्मच्चासौ प्रत्ययश्चासौ गोचरश्चेति तस्मिन्नित्यर्थः अहमिति व्यंगा।
स्फुरणत्वे स्फुरणविषयत्वं वा हेतुः आद्ये दृष्टान्ते हेत्वसिद्धिः द्वितीये तु पक्षे तदसिद्धिरित्यात्मनो मुख्यं प्रत्यक्त्वादि युक्तमिति
भावः ननु यदात्मनो विषयित्वं तदसिद्धमनुभवामीति शब्दवत्त्वात् अहंकारवदित्यत आह विषयिणीति वाच्यत्वं लक्ष्य
त्वं वा हेतुः नाद्यः पक्षे तदसिद्धेः नान्त्यः दृष्टान्ते तद्वैकल्यादिति भावः देहं जानामीति देहाहंकारयोः विषयविषयित्वेपि स

युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः॥

नन्वन्धोहमित्यभेदाध्यासवत् आत्माहंकारयोरप्यध्यासः स्यादित्यत आह चिदात्मक इति तयोर्जडाजडत्वाभ्यां सादृश्यात्।
ध्यासेपि चिदात्मन्यनवच्छिन्ने जडस्याहंकारादेर्नाध्यास इति भावः अहमिति भास्यत्वादात्मवदहंकारस्यापि प्रत्यक्त्वा
दिकं मुख्यमेव ततः पूर्वोक्तपराक्त्वाद्यसिद्धिरित्याशंक्याह युष्मदिति अहंवृत्तिभास्यत्वमहंकारेनास्ति कर्तृकर्मत्वविरो
धात् चिद्भास्यत्वं चिदात्मनि नास्तीति हेत्वसिद्धिः अतो बुद्ध्यादेः प्रतिभासतः प्रत्यक्त्वेपि पराक्त्वादिकमेव मुख्यमिति भावः
युष्मत्पराक्चासौ प्रतीयमानत्वात् प्रत्ययश्चासौ कर्तृत्वादिव्यवहारगोचरश्चेति विग्रहः तस्य हेयत्वार्थमाह विषयस्येति।

चित्त्वं चेतोगिनाविषयत्वमित्यविषयः अविषये ॥

५

आत्मन्यनात्मतद्धर्माध्यासो मिथ्या भवतु अनात्मन्यात्मतद्धर्माध्यासः किं न स्यात् अहं स्फुरामि स्फुरणवानस्मीत्याद्यनुभवादित्याशंक्याह तद्वि-
पर्ययेणेति तस्मादनात्मनो विपर्ययो विरुद्धस्वभावश्चेतनत्वं तस्य भावे तत्तायां चैतन्यात्मनः विषयिणः तद्धर्माणां च प्रीहकारादौ
विषयेऽध्यासः सभिध्येति नास्तीति भवितुं युक्तमध्यासस्यासम्भवात् नष्वत्र पूर्वप्रमाहितसंस्कारः सादृश्यमज्ञानं चास्ति नि-
रवयवनिर्गुणस्वप्रकाशात्मनि गुणावयवसादृश्यस्य चाज्ञानस्य चायोगात् नन्वात्मनो निर्गुणत्वे तद्धर्माणामिति भाष्यं कथमि-
ति चेदुच्यते बुद्धिवृत्त्याभिव्यक्तं चैतन्यं ज्ञानं विषयाभेदेनाभिव्यक्तं स्फुरणं सुखकर्मजन्यवृत्तिव्यक्तमानंदः एवं वृत्त्युपाधिकृतभे-
दज्ञानादीनामात्मधर्मत्वव्यपदेशः तदुक्तं टीकायां आनंदो विषयानुभवो नित्यत्वं चेति संति धर्माः अपृथक्त्वेऽपि चैतन्यात् पृ

तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तं. तथाप्यन्योन्यस्मिन्नन्योन्यात्म ॥ ॥ ॥

धर्मिवृभासंतः अनिश्चितो निर्गुणत्वेऽप्यात्मतस्य मतिरहं करोमीत्यादिप्रतीतेरर्थस्य चाध्यासस्यायोगात्तम्मात्त्वं वाहंत्वं अविसामानाधिकर-
ण्यस्य गौणत्वमिति मतमास्थेयं तत्राच्चेवं धस्य सत्य तयाज्ञानान्निवृत्तिरूपफलासंभवात् बद्धस्तकर्योर्जीवब्रह्मणोरैक्यापित्ति-
नविषयासंभवाच्छास्त्रनारंभणीयमिति पूर्वपक्षभाष्यतात्पर्यं युक्तग्रहणात् सर्वपक्षस्य दुर्बलत्वं सूचयति तथा हि किं अध्या-
सस्य नास्तित्वमयुक्तत्वात् अमानत्वाद्वा कारणाभावाद्वा अत्र यद्यत्याह तथापीति एतदन्तरोधादिदोषत्रयमीति पदितव्यं अध्यास-
स्यासंगत्वप्रकाशात्मत्वमुक्तत्वं अलंकारः इति भावः नहि तीयत्याह अयमिति अत्र: कर्तामनुष्योऽहमिति प्रत्यक्षानुभवात्
अध्यासस्याभानमसिद्धमित्यर्थः नचेदं प्रत्यक्षं कर्तृत्वादौ प्रमेति वाच्यम् ॥ ॥

अपौरुषेयतया निर्दोषेणोपक्रमादिलिंगावधृततात्पर्येण च तत्त्वमस्यादिवाक्येनाकर्तृब्रह्मत्वबोधनेनासंभवनिश्चयात्
न चैतस्य प्रत्यक्षविरोधादागमप्रमाणस्यैव बाध इति वाच्यं देहात्मवादप्रसंगात् मनुष्योऽहमिति प्रत्यक्षविरोधेनाप्ययमशरीरत्वा
दिश्रुत्यादेर्देहान्यात्मासिद्धेः तस्मादिदं रजतमितिवत् सामानाधिकरण्यप्रत्यक्षस्य भ्रमत्वशंकाकलंकितस्य नागमात्प्राबल्य
मित्याशयेयं किंच प्रत्यक्षत्वे पूर्वभावित्वे वा आगमतात्प्रत्युपजीव्यत्वे वा आम्नायेन प्राबल्यं प्रत्यक्षस्यापि रजतभ्रमस्य प्राग्भाविनः शु
क्तिकाज्ञानेन बाधदर्शनात् न द्वितीयः आगमतात्पर्यतो प्रत्यक्षादिमूलकत्वेऽप्यवहारे च सङ्गतिग्रहद्वारा शब्दोपलब्धिद्वारा च
प्रत्यक्षादेर्व्यावहारिकप्रामाण्यस्योपजीव्यत्वेऽपि तात्त्विकप्रामाण्यस्यानपेक्षितत्वात् अतएवोक्तं शास्त्रागमेन बाधसंभवादिति

कतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेनात्यंतविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः
सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः ॥ ॥ ॥

यत्तु लौकिकयागस्य श्रुतिबलात्कालांतरभाविफलहेतुत्ववत् तथा विद्वान्नामरूपाद्विमुक्त इति श्रुतिबलात्सत्यस्यापि ज्ञाना
न्निवृत्तिसंभवादध्यासवर्णनं व्यर्थमिति तत्तु ज्ञानमात्रनिवर्त्यस्य क्वापि सत्यत्वादर्शनात्सत्यस्य चात्मनो निवृत्त्यदर्शनाच्च श्र
योरप्यतानि श्रेयस्सतिसत्यत्वं यस्य ज्ञानान्निवृत्तिः श्रुतेर्बोधकत्वायोगात् न चैतद्दर्शनात्सत्यस्यापसनश्यादर्शनान्न्यायोप
त्तानिश्चय इति वाच्यं तस्य प्रत्यक्षान्नियमादिसापेक्षज्ञानत्वान्नाशरूपत्वात् बंधस्य च नान्यः पंथा इति श्रुत्याज्ञानमात्रान्निवृत्तिप्रती
तेः अतः श्रुतज्ञाननिवर्त्यत्वान्निर्वाहार्थमध्यासवर्णनीयं किंच ज्ञानैकनिवर्त्यस्य किं नाम सत्यत्वं न तावदज्ञानाजन्यत्वमा

नापिस्वाधिष्ठानेस्वाभावसत्यत्वं अस्थूलमित्यादिश्रुतिविरोधात् नापिव्यवहाराधारोपत्वंतानान्विद्भूतिश्रुतिविरोधात् अथव्यव
हारकालेबाधशून्यत्वंतद्धिव्यावहारिकमेवसत्यत्वमित्यागतमिथ्यात्वं तुच्छश्रुत्यर्थयोग्यताज्ञाननार्थवर्णनीयमेवृथाप्रासाद
वेहारावचन नचतदनन्यत्वाधिकृणात्मसत्त्वानात्वेनकृत्वंतत्रोकाध्यासमेवप्रवृत्त्यंगविषयादिसिद्ध्यर्थमादोस्यार्थमाणत्वा
दितिदिक् अध्यासंहेत्वादर्शयति लोकव्यवहारइति लोकानेमनुष्योहमितिवाभिमन्यतेइतिलोकोर्थाध्यासः तद्विषयोव्यवहारो।
भिमानइतितात्पर्यध्यासोदर्शितः द्विविधाध्यासस्वरूपलक्षणमाह अन्योन्यस्मिन्नित्यादिना धर्मधर्मिणोरित्येतेनतादात्म्यचेतन्या।
दिधर्मीणांधर्मिणावहंकारात्मनोश्चैतन्ययोरप्यत्यंतभिन्नयोरितरेतरभेदाग्रहेणान्योन्यस्मिन्नन्योन्यतादात्म्यमन्योन्यधर्मांश्चाध्यास।
नाध्यस्यलोकव्यवहारइतियोजना अतः सोयमितिप्रमायांनाध्यासत्वंतदिदमर्थयोःकालभेदेनकल्पितभेदेप्यत्यंतभेदाभावा।
दितिवक्तमयुक्तंतेनोक्तंनचधर्मितादात्म्याध्यासेधर्माध्याससिद्धेर्धर्माध्यासेनिरर्थमितिवाच्यं अंधत्वादीनामिंद्रियधर्माणांच।
मैध्यासास्फुटत्वेप्यंधोहमितिस्फुटोध्यासइतितायनार्थत्वात् नन्वात्मानात्मनोः परस्पराध्यस्तत्वेशून्यवादःस्यादित्याशंकाह
सत्यानृतेमिथुनीकृत्येति सत्यमनिदंचैतन्यंतस्यानात्मनिसंसर्गमात्राध्यासोनस्वरूपस्य अनृतंयुष्मदर्थः तस्यस्वरूपतोप्य-
ध्यासात् तयोर्मिथुनीकरणमध्यासइतिनशून्यतेत्यर्थः नन्वध्यासमिथुनीकरणलोकव्यवहारशब्दानामेकार्थत्वेप्यसमि-
थुनीकृत्येतिपूर्वकालत्ववाचिक्त्वाप्रत्ययादेशभ्यस्यपः कथंप्रयोगइतिचेन्न अध्यासव्यक्तिभेदात् तत्रपूर्वपूर्वाध्यासस्योत्तरो
त्तराध्यासंप्रतिसंस्काराद्वारापूर्वकालत्वेनहेतुत्वद्योतनार्थस्यप्रयोगः तदेवस्पष्टयति नैसर्गिकइति प्रत्यगात्मनिहेतुदेतु।
सद्भावेनाध्यासप्रवाहोनादिरित्यर्थः ननुप्रवाहस्यावस्तुत्वादध्यासव्यक्तीनांसादित्वात्कथमनादित्वमितिचेदुच्यते अध्यास
त्वावच्छिन्नव्यक्तीनांमध्येन्यतमयाव्यक्त्याविनानादिकालस्यावर्तनं कार्यत्वादित्यनुमितिसंगीकारात् एतेनकारणाभावादिति।

शा॰ भा॰
प्र॰ टी॰
७

कल्पितो रजतः संस्कारस्यानिमित्तस्यैव नैसर्गिकपदेनोक्तत्वात् न च पूर्वप्रमाजन्य एव संस्कारो हेतुरिति वाच्यं लाघवेन पूर्वानुभव-
जन्यसंस्कारस्यैव हेतुत्वात् अतः पूर्वाध्यासजन्यः संस्कारोऽस्तीति सिद्धं अध्यासस्योपादानमाह मिथ्याज्ञाननिमित्त इति मिथ्या च तदज्ञा-
नं चेति मिथ्याज्ञानं तन्निमित्तं तदुपादानं यस्य स तन्निमित्तस्तदुपादान इत्यर्थः अज्ञानस्योपादानत्वेऽपि संस्कारदोषनिमित्तवाचकतया
दोषत्वेनाहंकाराध्यासकर्तृत्वादिकार्यस्योपाधित्वेन संस्कारकालकर्मादि निमित्तपरिणामित्वेन च निमित्तत्वमिति योजयितुं निमि-
त्तपदं स्वप्रकाशात्मन्यसंगे कथमविद्यासंसर्ग इति शंकानिरासार्थं मिथ्यापदं प्रचंडमार्तंडमंडलेऽपि घूकानुभवसिद्धांधका-
रवत् अहमज्ञ इत्यनुभवसिद्धमज्ञानं दुरपह्नवं कल्पितस्याधिष्ठानास्पर्शित्वात् नित्यस्वरूपज्ञानस्याविरोधित्वाच्चेति यद्वाऽज्ञा-
नेऽज्ञानाभाव इति शंकानिरासार्थं मिथ्यापदं मिथ्यात्वे सति साक्षाज्ज्ञानस्य लक्षणं मिथ्याज्ञानपदेनोक्तं ज्ञानेनेच्छाप्रागभावः
साक्षान्निवर्त्यत इति वदंतं प्रति मिथ्यात्वे सतीत्युक्तं अज्ञाननिवृत्तिद्वारा न निवर्त्यत्वं चेति व्याप्तिनिरासार्थं साक्षादिति अनाद्युपा-
दानत्वे सति मिथ्यात्वं वा लक्षणं ब्रह्मनिरासार्थं मिथ्यात्वमिति घटादिनिरासार्थमनादीति अविद्यात्मनोः संबंधनिरासा-
र्थमुपादानत्वे सतीति संप्रत्यध्यासं दर्शयितुमभिलपति अहमिदं ममेदमिति आध्यात्मिककार्याध्यासे अहमिति प्रथमो-
ऽध्यासः न चाधिष्ठानारोप्यांशद्वयानुपलंभान्नायमध्यासः इति वाच्यं अयो दहतीतिवद्दहनमुपलंभेऽनिदंकरूपयांशयोरु-
पलंभादिदंपदेन भोग्यः संघात उच्यते तत्राहमिदमित्यनेन मनुष्योऽहमिति तादात्म्याध्यासो दर्शितः ममेदं शरीरमिति संस-
र्गाध्यासः ननु देहात्मनोस्तादात्म्यमेव संसर्ग इति तयोः को भेद इति चेत् सत्यं सतोर्भेदेऽपि सविशेषो भेदस्तादात्म्यं तत्र मनु-
ष्योऽहमित्यैक्यांशभानं ममेदमिति भेदांशरूपसंसर्गभानमिति भेदः एवं सामग्रीसत्वादनुभवसत्वादध्यासोऽस्तीत्युक्तो।
अध्यासो विरोधाभावेन विषयप्रयोजनयोः सत्वाच्छास्त्रमारंभणीयमिति सिद्धांतभाष्यतात्पर्यं ॥ ॥ ॥

एवंसूत्रेणार्थात्सूचितेविषयप्रयोजनेप्रतिपाद्यतद्धेतुमध्यासंलक्षणासंभवनाप्रमाणैःसाधयितुंलक्षणंपृच्छति आहेति किंलक्ष
णकोध्यासइत्याह पूर्ववादीत्यर्थः अस्यशास्त्रस्यतत्वनिर्णयप्रधानत्वेनवादकथात्वाभावेनतन्नार्थे आहेतिपरोक्तिः आहेत्यादिक
थयुक्तः प्रत्यगात्मनीत्यतः प्रागध्यासलक्षणपरभाष्यं तदारभ्यसंभावनापरंतमेतमविद्यात्मेत्यारभ्यसर्वलोकप्रत्यक्षेत्यंतं
प्रमाणपरमितिविभागः लक्षणमाह उच्यतेऽस्मततद्रूपइति अध्यासइत्यनुषंगः अत्रपरत्रावभासइत्येवलक्षणंशिष्टंपदद्वयं
ततदुपपादनार्थं तथाहि अवभासतइत्यवभासोऽज्ञानतापर्यः तस्यायोग्यमधिकरणंपरत्रपदार्थः अधिकरणस्यायोग्यत्वमारो
प्यात्यंताभाववत्त्वंतद्वत्त्वंवा तथाचैकावच्छेदेनस्वसंसृज्यमानेस्वात्यंताभाववदवभासत्वमध्यस्तत्वमित्यर्थः इदंचस्वपनाध्यास

आह कोयमध्यासोनामेत्युच्यते ॥

साधारणंलक्षणंसंयोगेतिव्याप्तिनिरासायैकावच्छेदेनेतिसंयोगस्यस्वसंसृज्यमानेवृक्षेस्वात्यंताभाववदवभासत्वेपिस्वसात्यं
ताभाववयोर्मूलाग्रावच्छेदकभेदान्नातिव्याप्तिः पूर्वंस्वाभाववतिभूतलेघटस्यइदानींतोघटोभातीतिधीरितिव्याप्तिनिरासायस्व
संसृज्यमानइतिपदं तेनस्वाभावकालेप्रतियोगिसंसर्गस्यवर्तमानतोच्यतइतिनातिव्याप्तिः भूतलावच्छेदेनावभासगंधेतिव्या
प्तिवारणायस्वात्यंताभाववतीतिपदंशुक्ताविदंतावच्छेदेनरजतसंसर्गकालेऽत्यंताभावोऽस्तीतिनाव्याप्तिः नन्वस्यलक्षणस्यासं
भवः शुक्तौरजतस्यसामग्र्यभावेनसंसर्गासत्त्वात् नचस्मर्यमाणमत्यरजतस्येवपरत्रशुक्तावभासत्वेनाध्यस्तत्वोक्तिरितिवा।

अन्यथाख्यातिप्रसंगादित्यत आह स्मृतिरूप इति स्मर्यत इति स्मृतिः सत्यरजतादिः तस्य रूपमिव रूपमस्येति स्मृतिरूपः स्मर्यमाण
सदृश इत्यर्थः सादृश्येनात्मा स्मर्यमाणाद्भेदाग्रहान्यथाख्यातिरित्युक्तं भवति सादृश्यमुपपादयति पूर्वदृष्ट इति दृष्टं दर्श
नं संस्कारद्वारा पूर्वदर्शनादवभासत इति पूर्वदृष्टावभासः तेन संस्कारजन्यज्ञानविषयत्वं स्मर्यमाणारोप्ययोः सादृश्यमुक्तं भ
वति स्मृत्यारोपयोः संस्कारजन्यत्वात् नच संस्कारजन्यत्वादारोपस्य स्मृतित्वापत्तिरिति वाच्यं दोषसंप्रयोगजन्यत्वस्यापि
विवक्षितत्वेन संस्कारमात्रजन्यत्वाभावात् अत्र संप्रयोगशब्देनाधिष्ठानसामान्यज्ञानमुच्यते अहंकाराध्यासे इन्द्रियसंप्रयो
गाभावात् एवं च दोषसंप्रयोगसंस्कारबलात्कृतत्वादारोपजन्यत्वमस्तीति परत्र पूर्वदृष्टावभास इति लक्षणमुपपन्नमिति स्मृति

स्मृतिरूपः परत्र पूर्वदृष्टावभासः

रूपपूर्वदृष्टपदाभ्यामुपपादितं अन्येतु ताभ्यां दोषादित्रयजन्यत्वं कार्याध्यासलक्षणमुक्तमित्याहुः अपरे तु स्मृतिरूपः स्मर्य
माणसदृशः सादृश्यं च प्रमाणाजन्यज्ञानविषयत्वं स्मृत्यारोपयोः प्रमाणाजन्यत्वात् पूर्वदृष्टपदं तज्जातीयपरं अभिनव
रजतादेः पूर्वदृष्टत्वाभावात् तथा च प्रमाणाजन्यज्ञानविषयत्वे सति पूर्वदृष्टजातीयत्वं प्रातीतिकाध्यासलक्षणं नाभ्य
स्तरूपाद्यवभासस्याहंध्यासमात्रलक्षणं ध्यासख्यातमेव तत्र स्मर्यमाणांशारोपयोरभिन्नत्वं वदेच्चाविद्याभिनेति समाधा
प्रमाणत्वादिपदद्वयमित्याहुः तत्रार्थाध्यासे स्मर्यमाणसदृशः परत्र पूर्वदर्शनादवभासत इति योजना ज्ञानाध्यासे तु स्मृ
तिसदृशः परत्र पूर्वदर्शनादवभासत इति वाक्यं योजनीयमिति संक्षेपः ॥

ध्यासेवादिविप्रतिपत्तेः कथमुक्तलक्षणसिद्धिरित्याशंक्याधिष्ठानारोप्यस्वरूपविवादेपि परत्रपरावभासइतिलक्षणेसंवा
दायुक्तिभिः सत्याधिष्ठानेमिथ्यार्थावभाससिद्धेः सर्वतंत्रसिद्धंतत्इदंलक्षणमितिमत्वान्यथात्मख्यातिवादिनोमतमाह तंकेचिदि
ति केचिदन्यथाख्यातिवादिनोन्यत्रशुक्त्यादावन्यधर्मस्यस्वावयवधर्मस्यदेशांतरस्थरूप्यादेरध्यास इतिवदंति आत्मख्यातिवा
दिनस्त्ववास्तेशुक्त्यादौबुद्धिरूपात्मनोधर्मस्यरजतस्याध्यासः अंतस्थरजतस्यबहिर्वदवभासइतिवदंतीत्यर्थः आख्यातिमतमा
ह केचिदिति यत्रयस्याध्यासोलोकसिद्धः तयोर्धर्मधर्मिणोस्तद्धियोश्चभेदाग्रहेसतिनन्मूलोभ्रमः इदंरूप्यमितिविशिष्टव्यवहार

तं केचिदन्यत्रान्यधर्माध्यासइतिवदंति केचित्तुयत्रयदध्यासस्तद्विवेकाग्रहणनिबंधनोभ्रमइति अन्येतुयत्रयदध्या
सस्तस्यैवविपरीतधर्मत्वकल्पनामाचक्षते सर्वथापित्वन्यस्यान्यधर्मावभासतांनव्यभिचरति ॥ ॥ श्रीराम

इतिवदंतीत्यर्थः तैरपिविशिष्टव्यवहारान्यथानुपपत्त्याविशिष्टभ्रांतेःस्वीकार्यत्वात् परत्रपरावभाससंमतिरितिभावः शून्या
मतमाह अन्येत्विति तस्यैवाधिष्ठानस्यशुक्त्यादेर्विपरीतोविरुद्धोधर्मोयस्यतद्भावः तस्यरजतादरत्यंतासतःकल्पनामाचक्ष
तइत्यर्थः एतेषुपक्षेषुपरत्रपरावभासत्वलक्षणंसर्ववादिसंमतमाह सर्वथापीतिति अन्यथाख्यातिवादिप्रकारविवादेप्यध्या
सः परत्रपरावभासत्वलक्षणंनजहातीत्यर्थः शुक्त्यावयवरूपस्यरजतस्यदेशांतरेबुद्ध्यादौवासत्वायोगात् शून्यत्वेप्रत्यक्षत्वायोगा
च्चकौ सत्वेवाधायोगान्मिथ्यात्वमेवेतिभावः ॥ ॥ ×तद्धर्मत्वकल्पनांविपरी× २ ॥ ॥ ॥

भा॰ भा॰
प्र॰ टी॰
४

ारोप्यमिथ्यात्वेन प्रत्यपेक्षणान् स्वानुभवसिद्धत्वादित्याह तथा चेति बाधानंतरकालीनोयमनुभवः तत्पूर्वं तु किंकारणतानायो।
गाद्दुत्पस्याबाधप्रत्ययत्वासिद्धेः मिथ्यात्वं चैव स्फुटं हि नोच्यते आत्मनि निरुपाधिके ऽहंकाराध्यासे दृष्टांतमनुपलभ्यमानो जीवांतरभेदस्याधि
गापरुपाधिकस्याध्यासे दृष्टांतमाह एक इति द्वितीयचंद्रसहितवदेकपयोगुल्याद्विविधाभातीत्यर्थः तत्र प्रकरणोपसंहा
राधी इति शाहुः भवगद्ध्यासः शुक्त्यादावास्मनि तत्र व संभवतीत्याक्षिपति कथं पुनरिति यत्रापरोक्ष्याध्यासाधिष्ठानत्वं तत्रेंद्रियसं

तथा च लोकेऽनुभवः शुक्तिका हि रजतवदवभासते एकश्चंद्रः सद्वितीयवदिति कथं पुनः प्रत्यगात्मन्यविषयेऽध्या
सो विषयतद्धर्माणां सर्वो हि पुरोऽवस्थिते विषये विषयांतरमध्यस्यति युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं।
ब्रवीषि ॥

क्तत्वं विषयत्वं चेति व्याप्तिः शुक्त्यादौ दृष्टान्तस्याप्यकाभावात् मनोधिष्ठानत्वं न संभवतीत्यभिप्रेत्याह प्रत्यगात्मनीति प्रतीचि
सर्वांतरे इंद्रियाग्राह्ये विषयस्याहंकारादेस्तद्धर्माणां चाध्यासः कथमिति उक्तव्याप्तिमाह सर्वो हीति पुरोऽवस्थितमिंद्रियसं
युक्तत्वं तत्रात्मनोऽध्यधिष्ठानतायै विषयत्वादिकमस्तित्यत आह युष्मदिति इदंप्रत्ययानर्हस्य प्रत्यगात्मनो न चक्षुराद्य
स्यादिसंयुक्तिमत्त्वमस्त्यतस्तु विषयत्वं ब्रवीषि संप्रत्यध्यासतो भेनविषयत्वं गीकार्यमिति सिद्धांतयोर्व्याघातः स्यादित्यर्थः ॥

४

न्यथासंभावनां प्रतिजानीते उच्यत इति अधिष्ठानारोप्ययोरेकस्मिञ्ज्ञाने भासमानत्वमात्रमध्यासव्यापकं तच्च भानप्रयुक्त
संशयनिवृत्त्यादिफलभाक्त्वे सत्येव भानमित्यत्र चेदिदं त्वविषयत्वे तत्राव्यापके गौरवादित्यत आह नन्वावदिति अयमात्मास्मि विषयो नावि
षयो न भवति तत्र हेतुमाह अस्मदिति अस्मत्प्रत्ययोऽहमित्यध्यासस्तत्र भासमानत्वादित्यर्थः अस्मदर्थश्चिदात्मा प्रतिबिंबत्वेन
यत्र प्रतीयते सोऽस्मत्प्रत्ययोऽहंकारस्तत्र भासमानत्वादिति वार्थः न चाध्यासे स्फुरति भासमानत्वं तस्मिन्सति सर्वतिप्रसंगादध्यस्त इति वाच्यं
अनादित्वात्तत्त्वतोऽध्यासे भासमानात्मन उत्तराध्यासाधिष्ठानत्वेन संभवात् नन्वहमित्यहंकारविषयकभानरूपस्यात्मनो भासमान
त्वे कथं तद्विषयत्वं विना तत्फलभाक्त्वायोगादित्यत आह अपरोक्षत्वाच्चेति चशब्दः शंकानिरासार्थः स्वप्रकाशत्वादित्यर्थः स्वप्र

श्चेति न तावदयमेकांतेनाविषयोऽस्मत्प्रत्ययविषयत्वादपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः न चायमस्ति नियमः
पुरोऽवस्थित एव विषये विषयांतरमध्यसितव्यमिति अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यंति।

काशत्वं साधयति प्रत्यगिति आबालपंडितमात्मनः संशयादिशून्यत्वेन प्रसिद्धेः स्वप्रकाशत्वमित्यर्थः अतः स्वप्रकाशत्वेन भास
मानत्वादात्मनोऽध्यासाधिष्ठानत्वं संभवतीति भावः यदुक्तमपरोक्षाध्यासाधिष्ठानत्वस्येंद्रियसंप्रयुक्तत्वप्रयोज्यत्वं व्यापकमिति त
त्राह न चायमिति तत्र हेतुमाह अप्रत्यक्षेऽपीति इंद्रियाग्राह्येऽपीत्यर्थः बालाः अविवेकिनः तलं इंद्रनीलकटाहकल्पत्वं मलिनत्वं
पीतत्वमित्येवमपरोक्षमध्यस्यंति तत्रेंद्रियग्राह्यत्वं नास्तीति व्यभिचारान्न व्याप्तिः एतेनात्मनोऽस्मात्स्वरूपाभावान्नाध्यास इत्यपास्तं नी
लत्वभ्रमे नास्मदभावेऽप्यध्यासदर्शनात् सिद्धांते ह्यालोकाकारचाक्षुषवृत्त्यभिव्यक्ताकाशादिविषयत्वं नभस इति ज्ञेयं ॥

र्मभावत्वं निरस्यति एवमिति तत्त्वज्ञानेनाध्यस्तवैपरीत्येऽनुभूतत्वविद्याहिताध्यासः किमिति वर्ण्यते इत्यत आह तमेतमिति आ
हितमेवमाहितमुक्तलक्षणलक्षितमध्यासमविद्याकार्यत्वादविद्येति मन्यन्त इत्यर्थः विद्यानिवर्त्यत्वाच्चास्याविद्यात्वमित्याह तद्वि
वेकेनेति अध्यस्तनिषेधेनाधिष्ठानस्वरूपनिर्धारणं विद्यामध्यस्तनिवर्तिकामाहुरित्यर्थः तथापि कारणविद्यां त्यक्त्वा कार्याविद्या
द्यां किमिति वर्ण्यते तत्राह तत्रैवमिति तस्मिन्नध्यासे उक्तन्यायेनाविद्यात्मके सतीत्यर्थः मूलाविद्यायाः सुषुप्तावनर्थत्वादर्शनात्का
र्यात्मनानर्थस्याध्यासस्य अनर्थत्वज्ञापनार्थं तद्वर्णनमिति भावः अध्यस्तकृतगुणदोषाभ्यामधिष्ठानं न लिप्यत इत्यक्षरार्थः एवमध्यास

एवमविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यासः तमेतमेवंलक्षणमध्यासं पंडिता अविद्येति मन्यंते तद्विवेकेन च वस्तुस्वरूपा
वधारणं विद्यामाहुः तत्रैवं सति यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वाणुमात्रेणापि स न संबध्यते तमेतमविद्याख्य
मात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिकाः वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि
विधिनिषेधमोक्षपराणि कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि ॥ एवं लक्षणसंभावने उक्त्वा प्रमाणमाह तमेतमिति

तं वर्णितमेतं साक्षिप्रत्यक्षसिद्धं पुरस्कृत्य हेतुं कृत्वा लौकिकः कर्मशास्त्रीयो मोक्षशास्त्रीयश्चेति त्रिविधो व्यवहारः प्रवर्तत इत्य
र्थः तत्र विधिनिषेधपराणि कर्मशास्त्राणि आदिवेदीनि विधिनिषेधशून्यप्रत्यग्ब्रह्मपराणि मोक्षशास्त्राणि वेदान्तवाक्यानीति
विभागः एवं व्यवहारहेतुत्वेनाध्यासे प्रत्यक्षसिद्धेऽपि प्रमाणं तर्कं पृच्छति कथं पुनरिति अविद्यावानहमिति अध्यासवानात्मा प्रमाता
स विषयः आश्रयो येषां तान्यविद्यावद्विषयाणीति विग्रहः तत्र प्रमेयव्यवहारहेतुत्वे प्रमातुराश्रयाध्यासात्मकप्रमातृत्वाश्रित
प्रमाणप्रमाणानामविद्यावद्विषयत्वं यद्यपि प्रत्यक्षं तथापि पुनःपि कथं केन प्रमाणेनाविद्यावद्विषयत्वमिति ज्ञेना ॥ ॥ ॥
यो

ब्र॰ भा॰
प्र॰ टी॰
१

१

विद्यावद्विषयाणि कथं प्रमाणानि स्युः आश्रयदोषादप्रामाण्यापत्तेरित्याक्षेपः तत्र प्रमाणप्रमेयव्यवहारस्य पतितं हि लिंगकारण।
आत्मत्वं चाह उच्यत इत्यादिना तस्मादित्यंतेन देवदत्तकर्तृको व्यवहारः तदीयदेहादिष्वहंममाध्यासमूलः तदन्वयव्यतिरेकानु
सारित्वात् यदित्थं तत्तथा यथा मृल्लोहादिप्रयोगः तत्र व्यतिरेकं दर्शयति देहेति देवदत्तस्य सुषुप्तावध्यासाभावो दृष्टः जा
ग्रत्स्वप्नयोरध्यासे सति व्यवहार इत्यन्वयः स्फुटत्वान्नोक्तः अनेन लिंगेन कारणतयाध्यासः सिध्यतीति व्यवहाररूपकार्यानुपप
त्त्यैवेति भावः तत्र मनुष्यत्वादिजातिमति देहे अहमित्यभिमानमात्राद्व्यवहारः सिध्यतु किमिंद्रियादिषु ममाभिमानेनेत्याशं
क्याह नहीति इंद्रियपदं लिंगादेरप्युपलक्षणं प्रत्यक्षादीत्यादिपदप्रयोगात् तथा च प्रत्यक्षलिंगादिप्रयुक्तो यो व्यवहारः द्रष्टा

प्रमाणानि शास्त्राणि चेत्युच्यते देहेंद्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः नहींद्रि
याण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति न चाधिष्ठानमंतरेणेंद्रियव्यापारः संभवति न चानध्यस्तात्मभावेन देहेन
कश्चिद्व्याप्रियते ॥

ऽनुमाता श्रोताहमित्यादिरूपः स इंद्रिया॰ तीति ममतास्पदान्यगृहीत्वा न संभवतीत्यर्थः यद्वा तानि समवे
तान्यनुपादाय यो व्यवहारः स नेति योजना पूर्वत्रानुपादानसंभवक्रिययोरेको व्यवहारः कर्तेति क्त्वाप्रत्ययः साधुः उत्तरत्रानु
पादानव्यवहारयोरेकात्मकर्तृकत्वात् तत्साधुत्वमिति भेदः इंद्रियादिषु ममेत्यध्यासाभावे यादेरिव द्रष्टृत्वादिव्यवहारो न स्यादि
ति भावः इंद्रियाध्यासेनैव व्यवहारात् अलं देहाध्यासेनेत्यत आह न चेति इंद्रियाणामधिष्ठानमाश्रयः शरीरमित्यर्थः ननु त्वा
त्मना संयुक्ते शरीरे तद्व्यापारसंभवः किमध्यासेनेत्यत आह न चानध्यस्तात्मभावेनेति आत्मतादात्म्यप्रसिद्धेरिति अनध्यस्तात्मभावः
आत्मतादात्म्यं यस्मिन्न तेनेत्यर्थः असंगो हीति श्रुतेरनाध्यासिकस्य देहात्मनोः संबंधो न संयोगादिरिति भावः

ब्र॰ भा॰
र॰ टी॰
११

नन्वात्मनो देहादिभिराध्यासिकसंबंधोपि मास्तु स्वतश्चेतनत्वेन तस्य प्रमातृत्वोपपत्तेः न च सुषुप्तौ प्रमातृत्वापत्तिः करणोपरमादित्यत आह नचैतस्मिन्निति प्रमाश्रयत्वं हि प्रमातृत्वं प्रमा यदि नित्यचिन्मात्रं तर्हि तदाश्रयत्वायोगः करणवैयर्थ्यं च यदि वृत्तिमात्रं जडाया प्रसंगः वृत्तेर्जडत्वात् अतो वृत्तीद्धो बोधः प्रमा तदाश्रयत्वमसंगस्यात्मनो वृत्तिमन्मनस्तादात्म्याध्यासं विना न संभवतीति भावः देहाध्यासे तद्धर्माध्यासे वाऽसतीत्यक्षरार्थः तर्ह्यात्मनः प्रमातृत्वं मास्त्विति वदंतं प्रत्याह नचेति तस्मादात्मनः प्रमातृत्वादिव्यवहारार्थमध्यासोंगीकर्तव्य इत्यनुमानार्थापत्त्योः फलमुपसंहरति तस्मादिति प्रमाणमस्त्वादित्यर्थः यद्वा प्रमाणप्रश्नसमाधानेयं परिहरति तस्मादिति अहमित्यध्यासस्य प्रमात्रंतर्गतत्वाददोषत्वादविद्यावदाश्रयाण्यपि प्रमाणान्येवेति योजना सति

नैतस्मिन्सर्वस्मिन्नसत्यसंगस्यात्मनः प्रमातृत्वमुपपद्यते नच प्रमातृत्वमंतरेण प्रमाणप्रवृत्तिरस्ति ।
तस्मादविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च पश्वादिभिश्चाविशेषात् ॥ ॥

प्रमातरि यस्मादुद्भवन्दोषो निश्चीयते यथा काचादिः अविद्या तु प्रमात्रंतर्गतत्वान्न दोषो येन प्रत्यक्षादीनामप्रमाणत्वं भवेदिति भावः ननु यदुक्तमन्वयव्यतिरेकाभ्यां व्यवहारोऽध्यासकार्य इति तदयुक्तं विदुषामध्यासाभावेपि व्यवहारदर्शनादित्यत आह पश्वादिभिश्चेति चशब्दः शंकानिरासार्थः किं विद्वत्त्वं ब्रह्मास्मीति साक्षात्कारः उत यौक्तिकमात्मनो नात्मभेदज्ञानं आद्ये बाधिताध्यासानुवृत्त्या व्यवहार इति समन्वयस्त्वेव वक्ष्यते द्वितीये परोक्षज्ञानस्यापरोक्षभ्रांत्यनिवर्तकत्वात् विवेकिनामपि व्यवहारकाले पश्वादिभिरविशेषात् अध्यासवत्त्वेन तुल्यत्वाद्व्यवहारोऽध्यासकार्य इति युक्तमित्यर्थः अत्रायं प्रयोगः विवेकि।
नोऽध्यासवंतः व्यवहारवत्त्वात् पश्वादिति

११

तत्संग्रहवाक्यं व्याकुर्वन् दृष्टान्तेन हेतुं स्फुटयति यथा हीति विज्ञानस्यानुकूलत्वं प्रतिकूलत्वं चेष्टानिष्टसाधनगोचरत्वं तद्देवो-
दाहरति यथेति अयं दंडो मदनिष्टसाधनं दंडत्वात् अनुभूतदंडवत् इदं तृणमिष्टसाधनं अनुभूततृणजातीयत्वात् अनुभूत-
तृणवदित्यनुमाय व्यवहरतीत्यर्थः अभुतो हेतोः पक्षधर्मतामाह एवमिति व्युत्पन्नचित्ता अपीत्यन्वयः विवेकिनोपीत्यर्थः
फलितमाह अत इति अनुभववलादित्यर्थः समान इति अध्यासकार्यत्वेन तुल्य इत्यर्थः नन्वस्माकं प्रवृत्तिरध्यासादिति न
पश्वादयो ब्रुवंति नापि परेषामेतत्प्रत्यक्षं अतः साध्यविकलो दृष्टान्त इति नेत्याह पश्वादीनां चेति तेषामात्मानात्मनोर्वि-

यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां संबंधे सति शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्तंते अनुकूले च प्रवर्तं-
ते यथा दंडोद्यतकरं पुरुषमभिमुखमुपलभ्य मां हंतुमयमिच्छतीति पलायितुमारभंते हरिततृणपूर्णपाणिमु-
पलभ्य तं प्रत्यभिमुखीभवंति एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान् बलवत उपल-
भ्य ततो निवर्तंते तद्विपरीतान् प्रत्यभिमुखीभवंति अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः
पश्वादीनां च प्रसिद्ध एवाविवेकपूर्वकः प्रत्यक्षादिव्यवहारः तत्सामान्यदर्शनाद्व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षा

न्मात्रमस्ति न विवेकः उपदेशाभावात् अतः सामग्रीसत्त्वादध्यासस्तेषां प्रसिद्ध इत्यर्थः निगमयति तत्सामान्येति तैः पश्वादि-
भिः सामान्यं व्यवहारवत्त्वं तस्य दर्शनाद्विवेकिनामप्ययं व्यवहारः समान इति निश्चीयत इति संबंधः समानत्वं व्यवहारा-
ध्यासस्य कार्यत्वेनेत्युक्तं पुरस्तात् एककालत्वं व्यतिरेकेण साधयति तत्काल इति तस्याध्यासस्य काल एव कालो यस्य स तत्का-
लः यदाध्यासस्तदा व्यवहारस्तदभावे सुषुप्तौ तदभाव इत्युक्तान्वयादिमानितियावत् अतो व्यवहारलिंगाद्विवेकिनामपि।

ॐ
भा॰भा॰
प्र॰टी॰
२२

ननु लौकिकव्यवहारस्याध्यासिकत्वेपि ज्योतिष्टोमादिव्यवहारस्यानाध्यासिकत्वं तस्य देहातिरिक्तात्मज्ञानपूर्वकत्वादित्याशंक्य देह
संगीकरोति शास्त्रीयेति तर्हि कथं वैदिककर्मणोध्यासवत्त्वसिद्धिरित्याशंक्य किं तत्र देहाद्यात्मबोधमात्रमपेक्षितं उतात्मतत्त्व
ज्ञानं आद्ये तस्याध्यासाबाधकत्वात् तत्सिद्धिरित्याह तथापीति न द्वितीय इत्याह न वेदांतवेद्यमिति क्षुत्पिपासादिशून्यज्ञानात्मविशि
ष्टत्वात् तदहं संसारीति ज्ञानं कर्मण्यपेक्षितं तत्तद्विपरीतात्मज्ञानं च तत्प्रयोगात्प्रवृत्तिबाधाच्चेत्यर्थः शास्त्रीयकर्मणोध्यासवत्त्व
न्यत्वेन निगमयति प्राक्चेति अध्यासस्याप्रमाणाश्रयत्वमाह तथाहीति यथा प्रत्यक्षानुमानाद्यपि तद्योध्यासे प्रमाणं तथागमोपीत्यर्थः
शास्त्रीयेति व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वात्मनः परलोकसंबंधमधिक्रियते तथापि न वेदांतवेद्यमशनायाद्य
तीतमपेतब्रह्मक्षत्रादिभेदमसंसार्यात्मतत्त्वमधिकारेपेक्ष्यते तत्प्रयोगादधिकारविरोधाच्च प्राक्च तथाभूतात्मविज्ञा
नात् वर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्तते तथा हि ब्राह्मणो यजेतेत्यादीनि शास्त्राण्यात्मनि वर्णाश्रमवयो
वस्थादिविशेषाध्यासमाश्रित्य प्रवर्तंते अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम तद्यथा पुत्रभार्यादिषु विकलेषु सकलेषु
वा अहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यति तथा देहधर्मान् स्थूलोहं कृशोहं गौरोहं तिष्ठामि गच्छामि लंघयामि चे
ब्राह्मणो यजेतेत्यत्र हवेत्याद्यभिहितं अष्टवर्षमुपनयीत कृष्णकेशोग्नीनादधीतेत्याश्रमो ब्राह्मणादिदेहेऽधिकारिणां वर्णाद्यभिमा
निनस्तत्कृतं त्वध्यासं गमयतीति भावः एवमध्यासे प्रमाणसिद्धे किंस्वरूपोध्यास इति जिज्ञासायां तत्स्वरूपमुदाहरणेन स्मारय
ति अध्यासो नामेति उदाहरति तद्यथेति तद्गुणाध्यासे भवति तयोर्दाढ्र्यमित्यर्थः स्वदेहाद्भिन्नेन प्रत्यक्षाः पुत्रादयो बा
ह्याः तद्धर्मान् साकल्यादीन् देहविशिष्टात्मन्यध्यस्यति तद्धर्मज्ञानात्वस्मिन्नुनत्वपर्माणध्यस्यतीत्यर्थः भेदापरोक्षज्ञाने तद्बा
धाभासयोगात् अन्यथा व्याप्यव्यापकाभावाच्चेदिष्टत्वं देहेन्द्रियधर्मानात्मनो विशिष्टस्याध्यस्यतीत्याह तथेति कृशत्वादिधर्म

॥ २२

अज्ञानप्रत्यक्षरूपेसाक्षिणिमनोधर्माध्यासमाह तथांतःकरणेति धर्माध्यासमुक्त्वाहंदेवधर्माध्यासमाह एवमिति अंतःकरणं
साक्षिणमभेदेनाध्यस्य तद्धर्मान्कामादीनध्यस्यतीतिमंतव्यं स्वप्रचारमनोवृत्तयः प्रतिप्रातिलोम्येनासज्ञरूढः स्वात्मकाहंकार
इति विलक्षणतयासंज्ञितस्वात्मविनोचतिप्रकाशतप्रतित्युप्रक्तु एवमात्मस्यनात्मस्यतद्धर्माध्यासमुदाहृत्यानात्मन्यात्मनोपि अंश
ध्वेनाध्यासमाह तं चेति अहमित्यध्यासे चिदात्मनो भानवाच्यं अन्यथाजगदांध्यापत्तेनचात्तद्भस्त्वसाध्यासेन भानमस्ति ता
स्मादुक्ततादात्म्यमः स्वात्मनः संसर्गाध्यासः स्वप्नः तद्विपर्ययेणेति तस्याध्यस्तस्य जडस्य विपर्ययो धिष्ठानत्वं चैतन्यं च तदात्म
नास्थितमितियावत् तथात्तानेकेवलात्मनः संसर्गः मनस्यज्ञातोपहितस्य देहादौ मनउपहितउपतस्येति विशेषः एवमात्माने

तथांतःकरणधर्मान्कामसंकल्पविचिकित्साध्यवसायादीनेवमहंप्रत्ययिनिअशेषस्वप्रचारसाक्षिणिप्रत्यगात्मन्य
ध्यस्यतेचप्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणांतःकरणादिष्वध्यस्यति एवमयमनादिरनंतोनैसर्गिकोध्यासोमिथ्याप्र
त्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षोस्यानर्थहेतोः प्रहाणाय ॥

बुद्ध्यायध्यासात्कर्तृत्वादिलाभः बुद्ध्यादा
वात्मभ्यासाच्चैतन्यलाभ इतिभावः वर्णिताध्यासमुपसंहरति एवमयमिति अनादिविद्यात्मतया कार्याध्यासस्यानादित्वम
ध्यासात्संस्कारस्ततोध्यासइतिप्रवाहतोनैसर्गिकत्वं एवमुपादाननिमित्तं चोक्तं भवति ज्ञानं विनाध्वंसाभावक्षदानंत्यं तदुक्तं
भगवद्गीतासु नरूपमस्येहतथोपलभ्यते नांतो नचादिरिति हेतमस्कास्वरूपमाह मिथ्येति मिथ्याभूतयातत्याप्रतीयत इ
तिप्रत्ययः कार्यप्रपंचस्तत्प्रतीतिश्चोभे वंरूपस्तत्त्वर्थः तस्मकार्यमाह कर्तृत्वेतिप्रमाणेतिगमयति सर्वेति साक्षिप्रत्यक्ष
मेवाध्यासस्य धर्मिग्राहकमानमनुमानादिकं तु संभावनार्थमित्यभिप्रेत्यप्रत्यक्षोपसंहारः कृतः एवमध्यासं वर्णयित्वा त।

कर्त्तव्यतयानर्थहेतोरध्यासस्य समूलस्यात्यंतिकनाशो मोक्षः स केनेत्यत आह श्रमैरिति ब्रह्मात्मैकत्वसाक्षात्कारस्य प्रतिबंधिः श्रवणादि
भिः प्रतिबंधेन लाभः तस्माद् इत्यर्थः विद्यायां कारणमाह सर्वेऽपि अधीत्य विचार्यंत इत्यर्थः विचारितवेदांतानां वस्मात्मैकं विषयो
मोक्षः फलमित्युक्तं भवति अर्थाद्विद्विचारात्मकशास्त्रस्यापि तदेव विषयप्रयोजने इति ज्ञेयं ननु वेदांतेषु प्राणाद्युपास्तीनां भाना
त्वात्मैकत्वमेव तेषामर्थ इति कथमित्यत आह यथा चेति शरीरमेव शारीरकं कुत्सितत्वात् तन्निवासी शारीरको जीवः तस्य ब्रह्म
त्वविचारो मीमांसा तस्या इत्यर्थः उपास्तीनां चित्तैकाग्र्यद्वारात्मैकत्वज्ञानार्थत्वात् तद्वाक्यानामपि महातात्पर्यं ऐक्य इति वक्ष्यते ए
वमध्यासमात्मकत्वात् ब्रह्मात्मैक्यविरोधाभावेन विषयप्रयोजनवत्त्वात् शास्त्रमारंभणीयमिति दर्शितं प्रथमवर्णकं विचारस्य साक्षाद्

ब्रह्मैकत्वविद्याप्रतिपत्तये सर्वे वेदांता आरभ्यंते यथा चायमर्थः सर्वेषां वेदांतानां तथा वयमस्यां शारीरकमीमांसायां प्रद
र्शयिष्यामः वेदांतमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रं अथातो ब्रह्मजिज्ञासेति तत्राथशब्द आनंतर्यार्थः प
रिगृह्यते

यथा वेदांताः तेषां गतार्थत्वात् गतार्थत्वाभावात् आरंभसंदेहे कृत्स्नवेदस्य विधिपरत्वात् विधेश्चाथातो धर्मजिज्ञासेत्यादिना पूर्वतंत्रे।
ण विचारितत्वात् श्रवणगतार्थ एव वेदांता इत्यव्यवहितविषयाभावात् आरंभ इति प्राप्ते ब्रूते वेदांतेति वेदांतविषयकपूजितवि।
चारात्मकशास्त्रस्य व्याख्यातुमिष्टस्य सूत्रं दर्शितं प्रथमसूत्रमित्यर्थः स्यात् तदा सर्वेऽपि वादरायणोऽथातो ब्रह्मजिज्ञासेति न ब्रूयाद् ब्र।
ह्मणो मानाभावात् अथातो ब्रह्मजिज्ञासेत्यस्मात्ताकेनापि तंत्रेणानवगतब्रह्मपरवेदांतविचारस्यारंभणीयत्वमिति सूत्रकृद् दर्श
यति तद्व्याचिख्यासितस्येति पदेन भाष्यकारोऽपि च भाष्यकृदिति द्वितीयवर्णकं एवं वर्णकद्वयेन वेदांतविचारस्य कर्तव्यतायां विष
यप्रयोजनवत्त्वमगतार्थत्वं चोक्तमिदानीं तद्वयं स्वसार्थकार्थव्याख्यामाश्रमाणः पुनरप्यधिकारिभावाभावाभ्यां शास्त्रारंभसंदेहे

१३

ऽनंतरारंभप्रश्नकार्त्स्न्येष्विति अथशब्दस्य बहवोऽर्थाः संति तत्राथ योगानुशासनमित्यत्रेव यथाथशब्दस्यारंभार्थकः
योगशास्त्रमारभ्यत इति तद्वदत्र किं न स्यादित्यत आह नाधिकारार्थ इति अयमाशयः किं जिज्ञासापदं ज्ञानेच्छापरं उत विचारल
क्षकं आद्ये अथशब्दस्यारंभार्थत्वे ब्रह्मज्ञानेच्छारभ्यत इति शब्दार्थः स्यात् सा चासंगतः तस्या अनारभ्यत्वात् नहि प्रत्यधिकरणमिच्छा
क्रियते किं तु तया विचारः नहि द्वितीयः कर्तव्यपदाध्याहारं विना विचारलक्षणायोगात् अध्याहृते च तेनैवारंभोक्तेरथशब्दवैयर्थ्या
त् किं त्वधिकारित्वसिद्ध्यर्थं साधनानंतर्यार्थ एव युक्तेति अधुना संभावितमर्थांतरं दूषयति मंगलस्येति वाक्यार्थे विचारकर्तव्यतानन्वि
तत्र मंगलस्य कर्तव्यादिनान्वयो नास्तीत्यर्थः ननु ब्रह्मज्ञानशास्त्रादौ मंगलं कार्यमिति अथशब्दः प्रयुक्त इति चेत् सत्यं न तस्यार्थो

नाधिकारार्थो ब्रह्मजिज्ञासाया अनधिकार्यत्वात् मंगलस्य च वाक्यार्थे समन्वयाभावात् अर्थांतरप्रयुक्त एव ह्यथशब्दः
श्रुत्या मंगलप्रयोजनो भवति पूर्वप्रकृतापेक्षायाश्च फलतश्चानंतर्याव्यतिरेकात्॥ मंगलं किं न तत्राह वाद्यश्रवणं मंगलकृ

त्यं करोतीति तदर्थत्वानंतर्यमेवेत्याह अर्थांतरेति अर्थांतरमानंतर्यं कृत्वा श्रवणेन पुंसः वीणादिनादश्रवणवदोंकारस्याथश
ब्दयोः श्रवणं मंगलफलकं ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा कंठं भित्त्वा विनिर्यातौ तस्मान्मांगलिकावुभौ इति स्मृ
णादिति भावः ननु प्रपंचो मिथ्येति प्रकृते सति अथमतः प्रपंचः सत्यः सत्यत्वं च पूर्वप्रकृतार्थोऽत्र तन्मात्राधीयशब्दो दृष्टस्तथात्रापि किं
न स्यात्तस्मादाह पूर्वेति फलत इति फलतोऽसमर्थः ब्रह्मजिज्ञासायाः पूर्ववृत्तविशेषः प्रकृतो नास्ति यस्मात्तस्मादर्थांतरं तमथशब्दे
त नोच्यते कुतश्चिदर्थांतरत्वं तु तत्प्रकृतानवकंप्यफलाभावात् यदि फलस्य जिज्ञासापेक्षा कर्तव्यविचारस्येह ते तेन यत्पूर्व
प्रकृते तदपेक्षास्तीत्यपेक्षावलोक्ये प्रकृतहेतुमाविष्कृततोऽर्थांतरत्वमस्य तत्तदार्थांतरत्वमानंतर्यानिर्भवति हेतुफलभावस्याना
नंतर्यसाव्यभिचारात् तस्मादिदमर्थांतरमित्युक्ते तस्य हेत्वप्रतीतेः तस्मादिदमानंतर्यमित्युक्ते भवेत्स्वहेत्वप्रतीतिः

ॐ
भा. भा.
प्र. टी.
२५
15

नचास्यानंतर्येण नियमहेतुत्वभानादपि तन्निवाच्यम् । तयोर्देशतः कालतो वाव्यवधानेनानंतर्यस्यासंभवात् अतः सामग्रीफलयो
रेवसमव्याप्तानंतर्यम् अव्यवधानात् तस्मिन्नुक्तेसत्यर्थानंतरं तत्र वाच्यं ज्ञानत्वमाह फल्यात्वेति भावः फलस्यविचारस्य पूर्वप्रकृतहेतुपे
क्षायाः फलापेक्षोंदृत्तत्वं तस्यानंतर्यो भेदात् अर्थ्यमाप्यशब्दार्थत्वमित्यथ्याहृत्य भाष्यं योजनीयं यद्वा एवं प्रकृतेर्थे प्रेक्षापूर्वकस्यार्थात
रं तायात्मनः फलेनावेतद्धर्मानंतर्यं व्यतिरेकात् ममनुज्ञानेनस्यः ज्ञानेन तांनभींचन्नाथशब्दार्थे ने तथ्यः तत्वानंतर्यो यकेवचा
नंतर्यस्यावधिकः तत्प्राप्तं आह सतिचेति यत्नियमेन एवं वृत्तं पूर्वभावि पुष्कलकारणमिति यावत् तदेवावधितिनिवक्तव्य ।
मित्यर्थः ननु धर्मविचारवत् ब्रह्मविचारोऽपि वेदाध्ययनं पुष्कलकारणमित्यत आह स्वाध्यायेति समानं त्वातं विचारसा
धारणकारणं न पुष्कलकारणमित्यर्थः ननु संयोगपृथक्त्वन्यायेन यज्ञेन दानेनेत्यादि श्रुत्यायज्ञानाय विधीयत इति सर्वा ।

म विचारानंतर्यं तथा धर्मजिज्ञासापूर्ववृत्तं वेदाध्ययनं नियमेनापेक्षते एवं ब्रह्मजिज्ञासापि यत् पूर्ववृत्तं नियमे ।
नापेक्षते तद्वक्तव्यं स्वाध्यायानंतर्यं तु समानं ननु इह कर्मावबोधानंतर्यं विशेषः इति चेन्न धर्मजिज्ञासायाः प्रा
येतव्यधिकरणे वक्ष्यतेत्थाचपूर्ववृत्तं त्रैवर्णिकमितिशंकते नन्विति इह ब्रह्म १ गपि अधीतवेदांतस्य ब्रह्मजिज्ञासोपपत्तेः ॥
जिज्ञासायां विशेषः असाधारणं कारणं परिहरति नेत्यादिना अयमाशयः न तावत् पूर्ववृत्तं त्रैस्यस्याध्ययनं स्वब्रह्मज्ञानेन त
द्विचारे वा पुष्कलकारणं तस्य धर्मनिर्णयमात्रहेतुत्वात् नापि कर्मनिर्णयफलस्यानुष्ठानहेतुत्वात् नहि मुमुक्षोरिवधर्म
ब्रह्मणोर्व्याप्तिरस्तिधर्मज्ञानाद्ब्रह्मज्ञानं भवेत् यद्यपि शुद्धिविवेकादिद्वाराकर्माणिहेतवः तथापि तेषां नाधिकारि
विशेषणत्वं अज्ञातानां तेषां नस्यंतरवृत्तानामपि फलहेतुत्वात् अधिकारिविशेषणं ज्ञायमानं प्रवृत्तिपुष्कलकारणम
नंतर्यावधित्वेन वक्तव्यं अतः कर्मावबोधस्य विचारो वा नावधिरिति न ब्रह्मजिज्ञासायाः धर्मजिज्ञासानंतर्यमि

हि २५

ननु धर्मब्रह्मजिज्ञासयोः कार्यकारणताभावेप्यानंतर्यं किंचिदस्ति क्रमस्तावार्थो यथाशब्दः हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ
वक्षस इत्यवदानानां क्रमस्तावार्थो यथाशब्दवदित्याशंक्याह यथेति अवदानानामानंतर्यनियमः क्रमो यथा यथाशब्दार्थस्तस्य
विवक्षितत्वात् न तथात्रेह धर्मब्रह्मजिज्ञासयोः क्रमो विवक्षितः एककर्तृकत्वाभावेन तयोः क्रमानपेक्षणात् अतो
न क्रमार्थोऽथशब्द इत्यर्थः ननु तयोरेककर्तृकत्वं कुतो नास्तीत्यत आह शेषेति येषामेकप्रधानशेषत्वं यथावदाना
नां प्रयाजादीनां च ययोश्च शेषशेषित्वं यथा प्रयाजदर्शयोर्यस्य चाधिकृताधिकारत्वं यथाग्नेयस्य दर्शपूर्णमासांग
माश्रित्य गोदोहनेन पशुकामस्येति विहितस्य गोदोहनस्य यथा वा दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति दर्शादिकृतवतः का
ले विहितस्य सोमयागस्य दर्शाद्यधिकृताधिकारत्वं तेषामेककर्तृकत्वं भवति न तत्रैकप्रयोगवचनं गृहीतानां तेषां पुन

यथा च हृदयाद्यवदानानामानंतर्यनियमः क्रमस्य विवक्षितत्वात्तथे
ह क्रमो विवक्षितः शेषशेषित्वेऽधिकृताधिकारत्वे वा प्रमाणाभावाद्धर्मब्रह्म

पदनष्टानासंभवात् क्रमाकांक्षायां श्रुत्यादिभिः क्रमो बोध्यते नैवं जिज्ञासयोः शेषशेषित्वे श्रुतिलिंगादिकं मानमस्ति
ननु ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेदिति श्रुत्याश्रमविधिवदेतदनुष्ठानानुष्ठाय धर्मं ततश्च शक्ति
तोयजेत् मैत्रं मोक्षे मनो निवेशयेदिति स्मृत्या चाधिकृताधिकारत्वं भातीति तत्र ब्रह्मचर्यादेव प्रव्रजेत् आसादयति गृहा
त्वा मोक्षे चैव प्रत्यक्षमाश्रमत्रयं श्रुतिस्मृतिभ्यां त्वयोदाहृतश्रुतिस्मृत्योः शुद्धचित्तविषयत्वावगमात् एतदुक्तं भवति यदि
जन्मांतरकृतकर्मभिः शुद्धचित्तस्तदा ब्रह्मचर्यादेव संन्यस्य ब्रह्म जिज्ञासितव्यं यदि न शुद्धमिति रागेणाज्ञायते तदा गृही
न भवेत्तत्राप्यशुद्धो वनी भवेत्तत्राप्यशुद्धो नष्टैव कालमाकलयेत् वने शुद्धो प्रव्रजेदिति तथा श्रुतिः यदहरेव विर

शा॰ भा॰
प्र॰ टी॰
१५

ननु मीमांसयोः शेषशेषित्वमधिकृताधिकारत्वं च मास्त्वेककर्मोक्तफलकत्वेनैककर्तृकत्वं स्यादेव वदन्ति ज्ञानकर्मभ्यां मुक्तिरि
ति समुच्चयवादिनः एवमेकवेदार्थजिज्ञासकत्वाच्चैककर्तृकत्वं तथा चाग्नेयादिषड्यागानामेकस्वर्गफलकानां द्वादशा
ध्यायानां चैककर्तृकत्वं जिज्ञासकानां क्रमवत्तयोः क्रमो विवक्षितः अतिक्रमार्थोऽथशब्द इत्याशङ्क्याह फलेति फलभेदाच्च न क्र
मो विवक्षितस्तत्र दृष्टान्तः यथा सौर्यप्राजापत्यचरूणां ब्रह्मवर्चसस्वर्गपुः फलभेदात् यथा वा कामचिकित्सातन्त्र
योर्जिज्ञास्यभेदात् क्रमापेक्षा न तद्वन्मीमांसयोर्न क्रमापेक्षेति भावः तत्र फलभेदं विवृणोति अभ्युदयेति विषयाभिमुख्ये
नोदेतीत्यभ्युदयो विषयाधीनं सुखं स्वर्गादिकं तच्च धर्मज्ञानहेतोर्मीमांसायाः फलमित्यर्थः न केवलं फलस्य स्वरूपतो भे

फलजिज्ञास्यभेदाच्च अभ्युदयफलं धर्मज्ञानं तच्चानुष्ठानापेक्षं निःश्रेयसफलं तु
ब्रह्मविज्ञानं न चानुष्ठानान्तरापेक्षं भव्यश्च धर्मो जिज्ञास्यो न ज्ञानकालेऽस्ति पु
रुषव्यापारतंत्रत्वादिह तु भूतं ब्रह्म जिज्ञास्यं नित्यत्वात् न पुरुषव्यापारतंत्रं॥

दः किं तु हेतुतोऽपीत्याह तच्चेति ब्रह्मज्ञानहेतोर्मीमांसायाः फलं त्वत्र हि रुद्धमित्याह निःश्रेयसेति नितरां निःशेषं श्रेयो निः
श्रेयसं मोक्षस्तत्फलमित्यर्थः ब्रह्मज्ञानं च स्वोत्पत्तिव्यतिरिक्तमनुष्ठानं नापेक्षत इत्याह न चेति स्वरूपतो हेतुतश्च फलभे
दान्न समुच्चय इति भावः जिज्ञास्यभेदं विवृणोति भव्यश्चेति भवतीति भव्यः साध्य इत्यर्थः साध्यत्वे हेतुमाह नेति तर्हि
तत्कदेत्यत आह पुरुषेति पुरुषव्यापारः प्रयत्नः तत्तंत्रहेतयस्तत्वादित्यर्थः कृतिसाध्यत्वात्कृतिजनकज्ञानका
ले धर्मस्यासत्त्वं न तु ब्रह्मत्वादित्यर्थः ब्रह्मणो धर्माद्वैलक्षण्यमाह इह त्विति उत्तरमीमांसायामित्यर्थः भूतं सिद्धं साध्यं तत्र
हेतुः नित्येति सदा सत्त्वादित्यर्थः साध्यासाध्यत्वेन धर्मब्रह्मणोः स्वरूपभेदमुक्त्वा हेतुतोऽप्याह नेति धर्मवत्कृत्यधी

१५

न्नतोऽपि भेदमाह चोदनेति अज्ञातज्ञापकं वाक्यमत्र चोदनाशब्दार्थः प्रवृत्तिबोधकत्वं तद्धेतुलक्षणाच्च निमित्तभेदः उत्पत्त्यर्थः
संग्रहवाक्यं विवृणोति याहीति लक्षणं प्रमाणं स्वर्गकामो यजेतेत्यादिवाक्यं हि स्वविषयभूतं धर्मं यागादिकं स्वर्गादिफल
कं भावनारूपं फलहेतुं यागादिगोचरं नियोगं वा हितसाधनं यागादौ वा पुरुषं प्रवर्तयद्वेदं वा अवबोधयति अथ मात्मा द्रष्टव्य
इत्यादिवाक्यं तत्त्वमस्यादि केवलमप्रपंचं ब्रह्म स्वबोधयत्येव न प्रवर्तयति निर्विषयाभावादित्यर्थः ननु अवबोधपर्यवसितत्वमाह
न पुरुषं इति ब्रह्मचोदना पुरुषोऽवबोधेन प्रवर्तते इत्यत्र हेतुं पूर्ववाक्येनाह अवबोधस्येति स्वजन्यज्ञानेन स्वयं प्रमाणं
न प्रवर्तकमित्यत्र दृष्टान्तमाह यथेति मानादिना बोधे स्व प्रवर्तते तात ज्ञाते च विषयेऽयोगान्न वाक्यार्थज्ञाने पुरुषप्रवृत्तिः

चोदनाप्रवृत्तिभेदाच्च याहि चोदना धर्मस्य लक्षणं सा स्वविषये नियुंजाना नैव पुरुषमवबोधयति ब्रह्मचोदना
तु पुरुषमवबोधयत्येव केवलमवबोधस्य चोदनाजन्यत्वाच्च पुरुषोऽवबोधे नियुज्यते यथाक्षार्थसंनिकर्षेण
अर्थावबोधे तद्वत् तस्मात्किमपि वक्तव्यं यदनंतरं ब्रह्मजिज्ञासोपदिश्यत इत्युच्यते नित्यानित्यवस्तुविवेक इहामु
त्रार्थभोगविरागः शमदमादिसाधनसंपन्मुमुक्षुत्वं च ॥ तथा च प्रवर्तकमानमेयो धर्मः उदासीनमानमेयं
ब्रह्मेति विभिन्नविषयभेदात् ननु मीमांसयोः क्रमार्थो यथशब्द इति भावः एवमथशब्दस्यार्थान्तरासंभवादानन्तर्यवाचित्वे
तु पुष्कलकारणं वक्तव्यमित्याह तस्मादिति अपदिश्यत इत्युच्यते इति शेषः तत्किमित्यत आह उच्यत इति विवेकादीनां सा
धनिकत्वेन साधारणत्वं पुरस्ताद्वक्ष्यति लौकिकव्यापारान्मनउपरमः शमः बाह्यकरणानामुपरमो दमः ज्ञानार्थं
विहितनित्यादिकर्मसंन्यास उपरतिः शीतोष्णादिद्वंद्वसहनं तितिक्षा निद्रालस्यप्रमादत्यागेन मनःस्थितिः समा
धानं सर्वत्रास्तिकता श्रद्धा एतत्षट्कप्राप्तिः शमादिसंपत् अत्र विवेकादीनामुत्तरोत्तरहेतुत्वेनाधिकारविशेषणं

शा· भा·
ब्र· टी·
१९

तेषामन्वयव्यतिरेकाभ्यां ब्रह्मजिज्ञासाहेतुत्वमाह तेष्विति अथकथंचिदकृतेन्द्रस्यैतनया ब्रह्मविचारे हतस्यापि फलपर्यन्तता नानन्तर्यानन्वयव्यतिरेकसिद्धिः अथशब्दव्याख्यामुपसंहरति तस्मादिति नन्वस्य विवेकादिकं न संभवत्यतस्तदर्थं हेतुं व्याचष्टे अतःशब्द स्याजितः स्वहृतमित्याकर्मफलस्यानित्यत्वेन ततो वैराग्यसिद्धेः जीवस्य ब्रह्मत्वरूपमोक्षस्याप्युक्तः भेदात् तुल्ये लोष्ठा दिवत्पुरुषार्थत्वासंभवात् ततो न मुमुक्षासंभव इत्याक्षेपपरिहारार्थोऽतःशब्दः तं व्याचष्टे अतःशब्द इति अथशब्देनानन्त र्यवाचिना धीविवेकादिचतुष्टयस्य ब्रह्मजिज्ञासाहेतुत्वं पञ्चकं तस्यार्थिकहेतुत्वस्यापेक्षया निरासेऽयमनवादको अतःशब्द

तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं न च विपर्यये तस्मादथशब्देन यथोक्तसाध नसंपत्त्यानन्तर्यमुपदिश्यते अतःशब्दो हेत्वर्थो यस्माद्वेद एवाग्निहोत्रादीनां श्रेयःसाधनानामनित्यफलतां दा र्शयति तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादिः तथा ब्रह्मविज्ञाना दपि परं पुरुषार्थं दर्शयति ब्रह्मविदाप्नोति परमित्यादि तस्माद्यथोक्तसाधनसंपत्त्यनन्तरं ब्रह्मजिज्ञासा कर्त व्या ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा ॥

इत्यर्थः उक्तं विवृणोति यस्मादिति तस्मादित्युत्तरेण संबन्धः यदल्पं तन्मर्त्यं यत्कृतकं तदनित्यमिति न्यायवती तद्यथेहेत्यादिश्रुतिः कर्मफलानामल्पत्वकृतत्वबोधिका तस्माद्दतोऽस्य दार्तीमिविश्रुत्व नानात्मानित्यविवेकात् वैराग्यलाभ इति भावः मुमुक्षां संभावयति तथेति यथा वेदः कर्मफलानित्यत्वं दर्शयति तथा ब्रह्मज्ञानात्प्रशान्तशोकानन्दस्य प्रपञ्चस्य परंज्योतिरानन्दं दर्शयतीत्यर्थः जीवत्वादेर्मिथ्यात्वाद्ब्रह्मत्वसंभवउक्तपवित्र भावः एवमथातः शब्दाभ्यां पुष्कलकारणवत्त्वोपिकारिणः समर्थनात्क्वास्तामारभ्यमित्याह तस्मादिति स्वत्रवा

१९

धर्माय जिज्ञासेतिवत् ब्रह्मणे जिज्ञासेति चतुर्थीसमासः किं न स्यादिति चेत् उच्यते जिज्ञासापदसमभिव्याहारार्थ इच्छायाः प्र
धानं कर्म कारकमपेक्षितं तत्प्रसादौ कर्मत्वानार्थं षष्ठीसमासो युक्तः कर्मणा कृते सम्यर्थात् फलत्वं किं भवतीत्याकाङ्क्षायाः कर्मण एव
फलत्वात् यथा स्वर्गस्य फलत्वं तत्त्वमवेतह्नत् अत एव धर्मजिज्ञासेत्यत्रापि समभिहितत्वात् निकटीकारदृष्टोत्वात् षष्ठीसमा
सादर्शितः विचारलक्षणायात्र विचारस्य तेज्ञानमेकतया प्रथमं फलकांक्षत्वात् धर्माय जिज्ञासेति चतुर्थीसमास उक्तः त
था त्विह कोऽर्थ ब्रह्मणो जिज्ञासेत्युक्तं चेदब्रह्मतो न त्वेन ब्रह्मणः फलत्वादिति अधुना ब्रह्मपदार्थमाह ननु ब्रह्मशब्देन ब्रह्मार्थ
त्वि ब्रह्मस्वयंभूर्ब्रह्मप्रजापतिरिति विष्णुरिति श्रुतिलोके च ब्राह्मणजातिर्नानावेदे कमलासने च ब्रह्मशब्दः प्रयुज्यत इत्याशंक्य

ब्रह्म च वक्ष्यमाणलक्षणं जन्माद्यस्य यत इति अत एव न ब्रह्मशब्दस्य जात्याद्यर्थान्तरमाशंकितव्यं ब्रह्मण इति कर्म
णि षष्ठी न शेषे जिज्ञास्यापेक्षत्वाज्जिज्ञासायाः जिज्ञास्यान्तराणिर्देशाच्च ननु शेषषष्ठीपरिग्रहेऽपि ब्रह्मणो जिज्ञा
सा कर्मणि न विरुध्यते संबंधसामान्यस्य विशेषनिष्ठत्वात् ॥ ह अत एवेति जगत्कारणप्रतिपादकसूत्रासंगत्यप्रसंगा

देवेत्यर्थः ब्रह्मसंबंधस्य ब्रह्मकर्मत्वं च सकर्मकक्रियायाः कर्मज्ञानं विज्ञानात्तमप्राकारत्वात् इच्छाया विषयज्ञानं जन्यत्वाच्च प्र
थमापेक्षितं कर्मैव षष्ठ्या वाच्यं न शेष इत्यर्थः ननु प्रमाणादिकमन्यदेव तत्कर्मास्तु ब्रह्म तु शेषितया संबध्यतामित्याह जि
ज्ञास्यान्तरेति श्रुतं कर्म त्यक्त्वाऽन्यदश्रुतं कल्पयन्निदं हस्तस्थमपि लेढीति न्यायमनुसरतीति भावः सद्वाभिसंधिः श्रुतके
नान्वितं षष्ठीशेषत्वविधानात् षष्ठ्या संबंधमात्रं प्रतीतमपि विशेषाकांक्षायां सकर्मकक्रियासन्निधानात् कर्मत्वपर्य
ः रेशेषषष्ठीत्युक्तं ह यद्यपि ब्रह्मण इति संबंधसामान्यं शेषः जिज्ञासेत्यत्र सन्प्रत्ययवाच्याया इच्छायाः ज्ञानं कर्म तत्सजात ः ध

एवमपीति कर्मलाभेपि प्रयत्नं कर्तृकर्मणोः कृतीति सूत्रेण जिज्ञासापदस्याकारांतत्वेन कृदंतस्य योगे विहितं प्रथमोपवि
तं च कर्मत्वं तत्कापरोत्वमशुब्राह्मकल्पयत इत्यर्थः शेषवादी स्वाभिसंधिमुद्घाटयति शेषेषष्ठ्यां ब्रह्मसंबंधिनी जिज्ञासा प्रति
ज्ञाता भवति तत्र यानि ब्रह्माश्रितानि लक्षणप्रमाणयुक्तिज्ञानसाधनफलानि तेषामपि विचारः प्रतिज्ञातो भवति तज्जिज्ञासा
याश्चापि ब्रह्मज्ञानार्थत्वेन ब्रह्मसंबंधित्वात् कर्मणिषष्ठ्यां तु ब्रह्मकर्मक एव विचारः प्रतिज्ञातो भवतीत्यभिसंधिना शेषषष्ठी
स्वच्यते ग्रंथमत्प्रयासेनत्यर्थः ब्रह्मतत्संबंधिनां सर्वेषां विचारप्रतिज्ञानमर्थफलेपस्मतमादित्यर्थः तत्प्रयासस्यैफल

एवमपि प्रयत्नं ब्रह्मणः कर्मत्वमूलत्वस्य सामान्यषष्ठ्या गौणपरोक्षकर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यात्तदर्थो ब्रह्मणश्शे
षाशेषविचारप्रतिज्ञानार्थत्वादिति चेन्न प्रधानपरिग्रहे तदपेक्षितानामप्यर्थाक्षिप्तत्वात् ब्रह्म हि ज्ञानेनाप्तुमिष्ट
तमत्वात्प्रधानं तस्मिन् प्रधाने जिज्ञासाकर्मणि परिगृहीते येर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति तान्यर्था
क्षिप्तान्येवेति न पृथक्सूत्रयितव्यानि यथा राजासौ गच्छतीत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति तद्वत् श्रु
त्यनुगमाच्च यतो वा इमानि भूतानि जायंत इत्याद्याः श्रुतयः तद्विजिज्ञासस्व तद्ब्रह्मेति प्रत्यक्षमेव ब्रह्मणो जिज्ञासा
कर्मकत्वं दर्शयंति तच्च कर्मषष्ठीपरिग्रहे सूत्रेणानुगतं भवति तस्माद्ब्रह्मण इति कर्मणि षष्ठी ज्ञातुमिच्छा जि

नप्रयुक्तं सूत्रेणेत्यावृत्तः प्रधानस्य ब्रह्मणो विचारे प्रतिज्ञाते सति तदुपकरणानां विचारस्यार्थिकप्रतिज्ञा प्राप्तादितत्राभिद
त्याह सिद्धांतेन प्रधानेति संगृहीतमर्थं सदृष्टांतं व्याकरोति ब्रह्म हीत्यादिना तद्धि जिज्ञासस्वेति मूलश्रुत्यनुसाराच्च
कर्मणि षष्ठीत्याह श्रुत्यनुगमाच्चेति श्रुतिसूत्रयोरेकार्थत्वलाभाच्चेत्यर्थः जिज्ञासापदस्यावयवार्थमाह ज्ञातु
मिति ननु नवगते वस्तुनीच्छायाददर्शनात्तस्याः मूलं विषयज्ञानं वक्तव्यं ब्रह्मज्ञानं तु जिज्ञासायाः फलं तदेव मूलं

ननुगमनस्यग्रामः कर्मत्वंप्राप्तिः फलमितिभेदात्कर्मैवफलमित्ययुक्तंतत्राह फलेति क्रियांतरे तयोर्भेदेपीच्छायाः
फलविषयत्वात्कर्मैवफलमित्यर्थः ननुज्ञानावगत्योर्भेदाद्वैत्युक्तिरयुक्तेत्यतआह ज्ञानेनेति ज्ञानंहविः अवगतेस्तत्फ
लमित्यभेदइतिभावः अवगंतुमभिव्यंजयितुं अवगतेः फलत्वंस्फुटयति अस्येति हिशब्दोक्तंहेतुमाह निःशेषेति।
वीजमविद्याद्यादिरर्थस्यानर्थस्यतत्त्वाप्राकत्वादित्यर्थः अवयवार्थमुक्त्वावाक्यस्यार्थमाह तस्मादिति अतस
त्वत्पदस्यविचारलक्षकत्वेनतव्यप्रत्ययेनेत्यस्यचपदि अथातः शब्दाभ्यामधिकारिणःसाधितत्वात् तेनब्रह्मज्ञानाय
विचारः कर्तव्यइत्यर्थः इतितृतीयवर्णकं प्रथमवर्णकेबंधस्याध्यासत्वोक्त्याविषयादिसिद्धावपिब्रह्मप्रसिद्धोर्वि
फलविषयत्वादिच्छायाज्ञानेनहिप्रमाणेनावगंतुमिष्टंब्रह्मब्रह्मावगतिर्हिपुरुषार्थोनिःशेषसंसारबीजा
विद्याद्यनर्थनिवर्हणात्तस्माद्ब्रह्मजिज्ञासितव्यं तत्पुनर्ब्रह्मप्रसिद्धमप्रसिद्धंवास्याद्यदिप्रसिद्धंनजिज्ञासितव्यम
थाप्रसिद्धंनैवशक्यंजिज्ञासितुमिति उच्यते अस्तितावद्ब्रह्मनित्यशुद्धबुद्धमुक्तस्वभावंसर्वज्ञंसर्वशक्तिसमन्वितं।
विषयादिसंभवाभावोपन्यासारंभसंदेहेपूर्वपक्षमाह तत्पुनरिति पुनःशब्दोवर्णकांतरद्योतनार्थः यदिवेदांतविचारात्प्रा।
गेवब्रह्मज्ञातंतर्हिज्ञातत्वान्नतद्रूपविषयत्वंनास्ति अज्ञानाभावेनतन्निवृत्तिरूपफलमपिनास्तीतिनविचारयितव्यं अथाज्ञा
तंकेनापितर्हितदुद्देशेनविचारःकर्तुंनशक्यते अज्ञातस्योद्देशायोगात् तथाचबुद्धावनारूढस्यविचारात्मकशास्त्रे।
णवेदांतैरप्रतिपादनायोगात् तदप्रतिपाद्यत्वरूपः संबंधोनास्तीति ज्ञानानुत्पत्तेः फलमपिनास्तीत्यनारंभणी।
यमित्यर्थः अथवाप्रसिद्ध्याविषयादिलाभात् आरंभणीयमितिसिद्धांतयति उच्यतइत्यादिनाप्रसिद्धत्वादित्यर्थः अ
स्तितस्याप्रकृतत्वेनास्तिपदस्यप्रसिद्धिपरत्वात्

ब्र॰ भा॰ प्र॰ टी॰ ८

ननु केन मानेन ब्रह्मणः प्रसिद्धिः तच्च सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुत्या सिद्धमिति वाच्यम् ब्रह्मपदस्य लोके संगतिग्रहाभावेन तत्त
द्घटितवाक्यस्याबोधकत्वादित्याशंक्य ब्रह्मपदव्युत्पत्त्या प्रथमं तस्य निर्गुणस्य सगुणस्य च प्रसिद्धिरित्याह ब्रह्मशब्दस्य ही
ति अस्यार्थः स्फुटोऽस्त्वेव च ब्रह्मपदस्य प्रयोगान्यथानुपपत्त्या कश्चिदर्थोऽस्तीति ज्ञायते प्रमाणवाक्ये निरर्थकपदप्रयोगा
दर्शनात् स चार्थो महत्त्वरूपः श्रुतिव्याकरणाभ्यां निश्चीयते बृहि वृद्धाविति स्मरणात् सा च वृद्धिर्निरवधिकमहत्त्वमिति सं
कोचकाभावादवगतावनन्तपदेन सह प्रयोगाच्च ज्ञायते निरवधिकमहत्त्वं चाज्ञत्वादितज्ज्ञादिदोषवत्त्वे सर्वज्ञत्वादिगुण
हीनत्वे च न भवति लोके गुणहीने दोषवति चाल्पत्वप्रसिद्धेरतो बृंहणाद्ब्रह्मेति श्रुतत्वात् देशकालवस्तुतः परिच्छेदाभाव

ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते बृंहतेर्धातोरर्थानुगमात् सर्वस्यात्मत्वाच्च ब्र
ह्मास्तित्वप्रसिद्धिः सर्वो ह्यात्मास्तित्वं प्रत्येति न नाहमस्मीति यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्सर्वो लोको ना

रूपं नित्यत्वं प्रतीयते अविद्यादिदोषशून्यत्वं ज्ञानादिरहितं शुद्धत्वं बोधका (अ)हमस्मीति प्रतीयात् आत्मा च ब्रह्म
ले पि स्वतो बंधाभावो मुक्तत्वं च प्रतीयते एवं सकलदोषशून्यं निर्गुणं प्रसिद्धं तथा सर्वज्ञत्वादिगुणकं च तत्पदवा
च्य प्रसिद्धं तेऽपस्य कार्यस्यापरिशेषेत्वप्रसंगेन सर्वज्ञत्वप्रसंगेन सर्वज्ञत्वस्य सर्वकार्येषु किमनत्वस्य च लाभा
दिति एवं तत्पदार्थप्रसिद्धेः प्रमाणत्वेनाध्याहृत्वादत्वं नाविवर्तकत्वाज्जिज्ञासोपपत्तिरिति त्वंपदार्थात्मना पि ब्र
ह्मणः प्रसिद्ध्या तदुपपत्तिरित्याह सर्वस्येति सर्वस्य लोकस्य योऽयमात्मा तदभेदाद्ब्रह्मणः प्रसिद्धिरित्यर्थः न
न्वात्मनः प्रसिद्धिः केत्यत आह सर्वो हीति अहमस्मीति न प्रत्येतीति न किं तु प्रत्येत्येवमेव सच्चिदात्मनः प्रसिद्धि
रित्यर्थः आत्मनः ज्ञानः सतो नित्यत्वमनुमानमाह यदि हीति आत्मनः शून्यस्य प्रतीतावहं नास्मीति लोको जा

प्रसिद्धपदोक्तं दोषं पूर्ववादी स्मारयति यदीति ज्ञातत्वाभावेन विषयाद्यभावात् अविचार्यत्वं प्राप्तमित्यर्थः यथेदं रजतमि
ति वस्तुतः शुक्तिः प्रसिद्धा तद्वदहमस्मीति सर्वचेतनानुभवसामान्येन वस्तुतो ब्रह्मणः प्रसिद्धिः न तु पूर्णानंदब्रह्मत्वरूप
विशेषगोचरा वादिनां विवादाभावप्रसंगात् न हि शुक्तित्वविशे[illegible]दिसिद्धिरिति सिद्धांतयति) दर्शने सति रजतभ्रमवद्देहेति
विप्रतिपत्त्यनुपपत्त्या सामान्यतः प्रसिद्धावपि विशेषस्याज्ञातत्वाद्विषयादिसिद्धिरिति सिद्धांतयति नेत्यादिना सा
मान्यविशेषभावस्त्वात्मनि सच्चिदानंदादिपदवाच्यभेदात्कल्पित इति मंतव्यः तत्र स्थूलसूक्ष्मक्रमेण विप्रतिपत्तीरुप

यदि तर्हि लोके ब्रह्मात्मत्वेन प्रसिद्धमस्ति ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नं न तद्विशेषं प्रति विप्रतिपत्तेः
देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लोकायतिकाश्च प्रतिपन्नाः इंद्रियाण्येव चेतनान्यात्मेत्यप
रे मन इत्यन्ये विज्ञानमात्रं क्षणिकमित्येके शून्यमित्यपरे अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्य
परे भोक्तैव केवलं न कर्तेत्येके अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचिदात्मा स भो
क्तुरित्यपरे ॥

न्यस्यति देहमात्रमित्यादिना शास्त्रज्ञानशून्याः प्राकृताः वेदबाह्यमतान्युक्त्वा तार्किकादिमतमाह अस्तीति सांख्य
मतमाह भोक्तेति किमात्मा देहादिरूपः उत तद्भिन्न इति विप्रतिपत्तिकोटित्वेन देहेंद्रियमनोबुद्धिशून्यान्युक्तानि भिन्नो
पि कर्तृत्वादिमान्न वेति विप्रतिपत्तिकोटित्वेन तार्किकसांख्यपक्षावुपन्यस्य कर्तापीश्वराद्भिन्नो न वेति विवादकोटित्वेन
योगिमतमाह अस्ति तद्व्यतिरिक्त ईश्वर इति निरतिशयसंसाररहित ईश्वरः सर्वज्ञत्वादिसंपन्न इति योगिनो वदंति भेदकोटि
मुक्त्वा सिद्धांतकोटिमाह आत्मा स भोक्तुरिति भोक्तुर्जीवस्याकर्तुः सर्वेश्वर आत्मा स्वरूपमिति वेदांतिनो वदंतीत्यर्थः ॥

विप्रतिपत्तीरुपसंहरति एवं बहव इति विप्रतिपत्तीनां प्रपंचो निरासश्च विवरणोपन्यासे दर्शितः सुखबोधायेतीदमप
स्यते तत्र युक्तिवाक्याभासाश्रयाः सिद्धांतिनः जीवो ब्रह्मैव आत्मत्वात् ब्रह्मवत् इत्यादियुक्तेः तत्त्वमसीत्यादिश्रुतेश्चाबा
धितायाः सत्त्वात् अन्ये तु देहादिरात्माहंप्रत्ययगोचरत्वाद्व्यतिरेके घटादिवदित्यादियुक्त्याभासं स एष वा एष पुरुषो
ऽन्नरसमयः इंद्रियसंवादे चक्षुरादयः ते ह वाचमूचुः मन उवाच योऽयं विज्ञानमयः असदेवेदमग्र आसीत् कर्ता बोद्धाम
लश्रवनः आत्मानमंतरो यमयतीति वाक्याभासं चाश्रिता इति विभागः देहादिरनात्मा भौतिकत्वाद्दृश्यत्वादित्याद्ये
गं तदमयोऽभ्यासादित्यादिसूत्रैश्चाभासत्वं वदंति ननु संतु विप्रतिपत्तयस्तथापि यस्य यन्मतं तेऽस्य हानं तदाश्रयणा
तस्य स्वार्थः संत्वाति किं ब्रह्मविचारारंभेणेत्यत आह तत्राविचार्येति ब्रह्मात्मैकत्वज्ञानादेव मुक्तेरिति वस्तुगतिः
एवं बहवो विप्रतिपन्नाः युक्तिवाक्यतदाभाससमाश्रयाः संतः तत्राविचार्य यत्किंचित्प्रतिपद्यमानो निःश्रेय
सात्प्रतिहन्येतानर्थं चेयात् तस्माद्ब्रह्मजिज्ञासोपन्याससुखेन वेदांतवाक्यमीमांसा तदविरोधितर्कोपक
सतां तदाश्रयणे तदभावान्मोक्षसिद्धिः किंचात्मानमन्यथाज्ञात्वा तत्पापेन संसारांधकूपे पतेत् अंधंतमः प्रविशंति
ये के चात्महनो जना इति स्मृतेः योऽन्यथा संतमात्मानमन्यथा प्रतिपद्यते किं तेन न कृतं पापं चोरेणात्मापहारिणा
इति वचनाच्चेत्यर्थः अतः सर्वेषां मुमुक्षूणां निःश्रेयसफलाय वेदांतविचारः कर्तव्य इति सूत्रार्थमुपसंहरति तस्मा
दिति बंधस्याध्यस्तत्वेन विषयादिसद्भावात् अगतार्थत्वादधिकारिलाभादापातप्रसिद्ध्या चाविषयादिसंभवाच्च वेदां
[illegible]षयामीमांसा पूजिता विचारणा वेदांताविरोधिनो ये तर्कास्तेऽत्रांतरंगास्तान्युपकरणानि यस्याः सा निःश्रेयसाया
[illegible]इत्यर्थः ननु सूत्रे विचारवाचिपदाभावात्तदारंभः कथं सूत्रार्थ इत्यत आह ब्रह्मेति ब्रह्मज्ञानेच्छोक्तिद्वारा विचारं लक्ष

...दं स्वं शास्त्राद्दृष्टिः स्थिता शास्त्रमारंभणीयमिति अत्र तदर्थज्ञानाय प्रयोजनसंदेहयोः शास्त्रासंबंधात् द्वितीयेन सूत्रारंभकं वाच्यं न च स्वयमेवारंभके
...ज्ञानस्यानुपपत्तेरित्याशंक्याह न चारंभकाले पूर्वपक्षमात्रमुच्यते श्रवणविधिनार्थ्यमिदं शास्त्रं शास्त्रारंभं प्रतिपादयति यथाध्ययन
विधिर्वेदान्तगतएव कृत्स्नवेदस्याध्ययनं प्रयुंक्ते तद्वदिहापि तद्वत्प्रथमसूत्रं समाप्तं प्रथमसूत्रेण शास्त्रारंभमुपपाद्य शास्त्रमारभमा
णः पूर्वोत्तराधिकरणयोः संगतिं वक्तुं वृत्तं कीर्तयति अथेति सूत्रेण ब्रह्मज्ञानाय वेदान्तविचारः कर्तव्य इत्युक्ते ब्रह्मणो विचा
र्यत्वोक्त्या प्रमाणादिविचारणा प्रतिज्ञाता तेषु ब्रह्मप्रमाणं ब्रह्मयुक्तेरित्यादिविशिष्टविचारणां विशेषणाद्ब्रह्मज्ञानं विनाकर्तुमश।
क्यत्वात्स्वरूपज्ञानायादौ लक्षणं वक्तव्यं तत्र संभवतीत्याक्षिप्य सूत्रकृतं प्रजयत्येवं लक्षणसूत्रमवतारयति किं लक्षणमिति किमाक्षे।
पेनास्त्येव लक्षणमित्यर्थः आक्षेपेणास्योत्थानादाक्षेपसंगतिः लक्षणयोर्विवदंतां नामस्त्यर्थब्रह्मलिंगानां लक्ष्यब्रह्मणि समन्वयो

ब्रह्मजिज्ञासितव्यमित्युक्तं किंलक्षणं पुनस्तद्ब्रह्मेति अत आह भगवान्सूत्रकारः जन्माद्यस्य यतः इति ॥ ॥ ॥

के: श्रुतिशास्त्राध्यायपादसंगतयः तथाहि यतो वा इमानि भूतानि जायंते इत्यादिवाक्यं विषयः तत्किं ब्रह्मणो लक्षणं वक्ति नवे।
ति संदेहे तत्र पूर्वपक्षे ब्रह्मस्वरूपासिद्ध्या समन्वयासिद्धिः फलं सिद्धांते तत्सिद्धिरिति भेदः अत्राक्षेपसंगतेः पूर्वाधिकरणफलमेव।
फलमिति द्रष्टव्यं पृथक्कृत्वं वक्तव्यं तदुक्तं आक्षेपे चापवादे च प्राप्त्यां लक्षणकर्मणि प्रयोजनं न वक्तव्यं यत्कृत्वा प्रवर्तते इति तथ
पि स्पष्टार्थमुक्तमिति मंतव्यं पूर्वपूर्वाधिकरणसिद्धांतेन पूर्वपक्षस्यापवादिकी संगतिः प्राप्तिस्तद्दर्शिचिंता तत्र न वक्तीति प्राप्ते
जन्मादेर्जगद्धर्मत्वेन ब्रह्मलक्षणत्वायोगात् न च जगदुपादानत्वेन सविकारत्वं लक्षणमिति वाच्यं कर्तृरूपादानत्वे दृष्टांताभावेना
नुमानाप्रवृत्तेः न च श्रौतस्य ब्रह्मणः श्रुत्यैव लक्षणसिद्धिः किमनुमानेनेति वाच्यं अनुमानस्य श्रुत्यनुग्राहकत्वेन तदभावे तद्विरो
धेनाश्रुतार्थासिद्धेः न च जगत्कर्तृत्वेकत्वमुपादानत्वं वा प्रत्येकं लक्षणमस्त्विति वाच्यं कर्तृमात्रस्योपादानाद्भिन्नत्वेन ब्रह्मलक्षणायोगाद्ब्रह्मणः

३

परिक्षेवादितिप्रमेयपुरुषार्थमुद्दिष्टमात्रस्यानेनमानस्याप्रतिष्ठितस्यांतीद्रियार्थस्वातंत्र्यायोगात् अपौरुषेयतयानिर्दोषस्य श्रुत्युक्तोभयकारणत्व
लक्षणादिदृष्टांतेनसंभावयितुंशक्यत्वात्तदेवलक्षणमितिसिद्धांतयति जन्माद्यस्ययतइति अत्रजगज्जन्मस्थितिलयकारणत्वलक्ष
णंप्रतिपाद्यते तस्याप्यग्रेप्रकृतिश्चेत्यधिकरणेनकारणत्वंनकर्तृमात्रं किंतुकर्तृत्वोपादानत्वोभयरूपमितिवक्ष्यमाणंसिद्धवत्कृत्यो
भयकारणत्वंलक्षणमित्युच्यतेइतिनयोजनकृतं ननुजिज्ञास्यतिर्गुणब्रह्मणः कारणत्वंकथंलक्षणमितिचेदुच्यते यथाजगत्येकं
लक्षणंयद्यनंतंसामुक्तिरितितथापज्जगत्कारणत्वंब्रह्मत्वेनकल्पितकारणत्वेनतटस्थंसदेवब्रह्मणोलक्षणमित्यनवद्यंसूत्रंव्याचष्टे
जन्मस्थितिभंगं वहुव्रीहिरेयंपदार्थाः सर्वेवाक्यार्थस्यान्यपदार्थस्यविशेषणानि यथाचित्रगोर्देवदत्तस्यचित्रागावः तद्वदत्रापिजन्मादी
तिनपुंसकैकवचनंयोनिनस्यसमाहारस्यजन्मस्थितिभंगस्यजन्मविशेषणंतथाचजन्मनः समासार्थैकदेशस्यगुणत्वेनसंविज्ञा
जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानोवहुव्रीहिर्जन्मस्थितिभंगंसमासार्थः जन्मनश्चादित्वंश्रुतिनिर्देशापेक्षंवस्तुवृ
त्त्यपेक्षंचश्रुतिनिर्देशस्तावत् यतोवाइमानिभूतानिजायंतइत्यस्मिन्वाक्येजन्मस्थितिप्रलयानांक्रमदर्शनात्वस्तुवृत
मपिजन्मनालब्धात्मकस्यधर्मिणः स्थितिप्रलयसंभवात् अस्येति प्रत्यक्षादिप्रमाणसन्निधापितस्यधर्मिणइदमानिर्देशः
षष्ठीजन्मादिधर्मसंबंधार्थायतइतिकारणनिर्देशः ॥ तत्पुरुषस्त्वहुव्रीहौसतद्गुणसंविज्ञानइत्यर्थः तत्रप्रजन्मकारणंतद्ब्र
ह्मेतिवाक्यत्वविभागमयुक्तं स्थितिलयकारणाद्वित्रत्वेनतत्तत्तद्ब्रह्मत्वस्यहानप्रसंगाकत्वात् अतोजन्मस्थितिभंगैर्निरूपितानि
त्रीणिकारणानिमिलितान्येवलक्षणमितिमत्वासूत्रेसमाहारोयोनितइतिषेष्यं तत्रादित्वंजन्मनः कथमत्रास्यसंसारस्योत्पादि
त्वमत्राह जन्मनश्चेति मूलभूतानावस्तुगत्यावादित्वंलाभात्तदपेक्षसूत्रकृतांजन्मनआदित्वमुक्तमित्यर्थः इदमः प्रत्यक्षार्थमा
त्रवाचित्वमाशंक्योपस्थितसर्वकार्यवाचित्वमाह अस्येति वियदादिजगतोनित्यमात्रजन्मादिसंबंधइत्यतआह षष्ठीति वियता

अस्य जगतो जन्मादेर्वाक्यसंबंधाभावात् लक्षणमित्याशंक्य तत्कारणत्वं लक्षणमिति पंचम्यर्थमाह यत इति यच्छब्देन सत्यज्ञानानंतं
मानंदरूपं वक्ष्यते ज्ञानेदाये वेति निर्णीतत्वात् तथा च स्वरूपलक्षणसिद्धिरिति मंतव्यं पदार्थमुक्त्वा पूर्वसूत्रस्थब्रह्मपदानुषंगेण
लक्षणद्वयाहीणि(?) च सूत्रवाक्यस्यार्थमाह अस्येत्यादिना कारणस्य सर्वज्ञत्वादिसंभावनार्थानि जगतो विशेषणानि यथा कुंभकारः प्र
थमं कुंभशब्दाभेदेन विकल्पितं पृथुबुध्नोदराकारं स्वरूपं बुद्धावालिख्य तदात्मना कुंभं व्याकरोति बहिः प्रकटयति तथा परमेश्वर
कारणमपि सविकल्पितनामरूपात्मना व्याकरोतीत्यनुमीयते अनिमित्ताह नामरूपाभ्यामिति इत्थंभावे तृतीया आद्यं कार्यं चेतनकर्तृकं
कार्यत्वात् कुंभवदिति प्रधानस्य यथा निरासः हिरण्यगर्भादिजीवत्वं निरस्यति अनेकेति इत्थंभावे तृतीया आह देवस्यानेष(?)

अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसा
प्यचिंत्यरचनारूपस्य जन्मस्थितिभंगं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति तद्ब्रह्मेति वाक्यशेषः अन्येषामपि भावविा
काराणां त्रिष्वेवांतर्भाव इति जन्मस्थितिनाशानामिह ग्रहणं ॥

देवपितापुत्रयोः(?) कर्तृभोक्त्रोर्भेदात्पृथगुक्तिः योग्यस्थानानि
दर्थानि पूर्वं सर्वमपि तस्यात्मनो भुंजंतीति भोक्तारः स्थूलसूक्ष्मदेहोपाधिद्वारा जीवानां कार्यत्वेन जगन्मध्यपातिता तज्जगत्कारणस्य
सर्वज्ञत्वं संभावयति प्रतिनियतानि व्यवस्थितानि देशकालनिमित्तानि येषां क्रियाफलानां तदाश्रयस्येत्यर्थः स्वर्गस्य कि
याफलस्य मेरुपृष्ठं देशः देहपातादूर्ध्वकाल उत्तरायणमरणादिनिमित्तं प्रतिनियतं एवं राजसेवाफलग्रामादेर्देशादिव्यव
स्थेया तथा च यथा सेवाफले देशाद्यभिज्ञदातृकं तथा कर्मफलं फलत्वादिति सर्वज्ञत्वसिद्धिरिति भावः सर्वशक्तित्वं संभावय
ति मनसापीति ननु षडपि वृद्धिपरिणामादयो भावविकाराः संति किमिति जन्मादीत्यादिपदेन न गृह्यंते तत्राह अन्येषामिति

वृद्धिपरिणामयोर्जन्मन्यपक्षयस्य नाशेऽन्तर्भाव इति भावः ॥

शा॰
भा॰ प्र॰
२१

देहो जायते ऽस्ति वर्द्धते विपरिणमते ऽपक्षीयते नश्यतीति यास्कमुनिवाक्यं एतत्सूत्रमूलं किं न स्यादित्यत आह यास्केति या
स्कमुनिः किल महाभूतानामुत्पन्नानां स्थितिकाले भौतिकेषु प्रत्यक्षेण जन्मादिषट्कमुपलभ्य निरुक्तवाक्यं चकार तन्मू
लीकृत्य जन्मादिषट्ककारणत्वं लक्षणं सूत्रार्थ इति ग्रहणे सूत्रकृता ब्रह्मलक्षणं न संगृहीतं किन्तु महाभूतानां लक्षणमुक्त
मिति शंका स्यात्तामपाकर्तुमाह उदितियेष्वक्षेत्रकाजन्मादयस्त एव ग्रसूत्रहर इत्यर्थः यदि निरुक्तस्यापि सृष्टिस्थितिलयमिति महाभूतजन्मा
दिकमर्थस्तर्हि सा प्रकृतिर्वक्तव्या उपलभ्यत किं संगतं गजं नानिरुक्तेर्विभावः यदि जगतो ब्रह्मातिरिक्तकारणं स्यात् तदा ब्रह्म
लक्षणस्य तत्रातिव्याप्त्यादिदोषः स्यात् तन्निरासाय लक्षणसूत्रेण ब्रह्म विना जगज्जन्मादिकं न संभवति कारणान्तरा
णां कल्परियदिता नाम जायते लीलाद्रीनां ग्रहणे तेषां जगतः स्थितिकाले ऽपि संभाव्यमानत्वात् मूलकारणाद्व्युत्प
त्तिस्थितिनाशग्रहणे तेन स्पृहीताः सुमितप्पशंकेत तन्माशंकीति यो ऽत्पत्तिर्ब्रह्मणस्तत्रैव स्थितिः प्रलयश्चेति गदी
ते. तत्र यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मन्वकान्यतः प्रधानादचेतनाद भावाभावाद्वाऽसंसारि
णो वा ऽणुत्वादिकं संभावयितुं शक्यं नच स्वभावतो विशिष्टदेशकालनिमित्तानामिहोपादानात् ॥
भवादिति युक्तिः सर्वज्ञत्वासाधनं कार्यविविक्तेषु वक्ष्यते अधुना संक्षेपेणावतारयति तत्र यथोक्तेत्यादिनाऽसचेतनानां
स्वतः प्रवृत्त्ययोगात् जीवानामसर्वज्ञत्वात् परमाणूनां प्रधानेन अनुमानात्सर्वज्ञेश्वरासिद्धिः इति प्रकाभावात् जगदारम्भकत्वासंभ
व इति भावः स्वभावादेव विचित्रं जगदिति लोकायतमतमाह नचेति जगतः पूर्णत्वाद्वा संभावयितुं शक्यमित्यन्वयः
किं स्वयमेव स्वस्य हेतुरिति स्वभावः उत कारणात् स्वयं तत्र नाद्यः प्रात्माश्रयात् तद्वितीयं दूषयति विशिष्टेति विशिष्टत्वं
स्वभावात् निदेशकालनिमित्तानि तेषां कार्यार्थिभिरुपादीयमानत्वात् कार्यस्य कारणानपेक्षत्वं न युक्तमित्यर्थः अतएव

*नामरूपाभ्यां व्याकृतस्येत्यादीनां च वर्णितं जगद्विशेषणानां व्याख्यानावसरे प्रधानस्य त्वपोः संसारिणां दर्शितः परमाणूनां * ५ पं

२१

ओंक सर्वज्ञत्वादिविशेषणमीश्वरं मुक्त्वा जगदुत्पत्त्यादिकं न संभवतीति भाष्येण कर्तारं विना कार्यं नास्तीति व्यतिरेक उक्तः तेन यत्कार्यं
तत्सकर्तृकमिति व्याप्तिर्दर्शिता एतेन एतदेव व्याप्तिज्ञानं तर्क इति पूर्वे कर्तारं साधयत्सर्वज्ञत्वं साधयतीति किं स्फुटेनेति तार्किकाणां मतं निरूप
यतीति एतदेवेति एतदेवानुमानमेव साधनत्वेन सूत्रितमिति मन्यंत इत्यत्र योजना अथवा एवं व्याप्तिज्ञानमेव प्रकृत्य तद्ग्राहकयुक्तिम्
त्वेनास्मन्मतं मदनुमानं स्वतंत्रमिति मन्यंत इत्यर्थः सर्वज्ञत्वमादिशब्दार्थः यद्वा व्याप्तिज्ञानसहकृतमेव लक्षणमेवानुमानं मम
तदृत्यर्थः तत्रायं विभागः व्याप्तिज्ञानं जगतः कर्तास्तीत्यादिलिंगसिद्धिः पश्चात्सकर्मसर्वज्ञः जगत्कारणत्वाद्व्यतिरेकेण कुलालादिवदि
ति सर्वज्ञत्वसिद्धिर्लक्षणादिवि अत्र मन्यंत इत्यनुमानसाभासत्वं सूचितं तथाहि अंकुरादेर्नात्र जीवः कर्ता न भवति जीवाद्भिन्नस्य

एतदेवानुमानं संसारिव्यतिरिक्तेश्वरसिद्ध्यादिसाधनमीश्वरकारणिनो मन्यंते नन्विहापि तदेवोपन्यस्तं जन्मादिसूत्रे न वेदां
तवाक्यसमन्वयवाचित्वात्तत्राणि वेदांतवाक्यानि हि सूत्रैरुदाहृत्य विचार्यं वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावग
तिर्नानुमानादिप्रमाणांतरनिर्वृत्ता ॥ एवं वदचेतनत्वनियमादन्यकर्ता नास्त्येवेति व्यतिरेकनिश्चयात्सकर्तृकमिति व्याप्तिज्ञा
नासिद्धिः लक्षणलिंगकानुमानेन वायुः शरीरस्य जन्यत्वात्मयोगात् यद्यपि तत्तनोऽन्यमिति व्याप्तिविरोधे न विपक्षज्ञानासिद्धे
तीत्वाभावनिश्चयात् तस्माद्दतीन्द्रियार्थे श्रुतिरेव शरणं अत एव संभावनार्थत्वेनानुमानं युक्तिमात्रेण स्वतंत्रमिति भावः नन्विद
मयुक्तं श्रुतेरनुमानात्सर्वमभिप्रेत्य भवदीयपदे श्रुतत्वानुमानस्यैवोपन्यस्तत्वादिति विशेषकः तन्विति ततो मन्यंत इत्यनुमान
साभासोक्तिरयुक्तेति भावः यदि श्रुतीनां स्वतंत्रमानत्वं न स्यात्तर्हि तत्समन्वयादिसिद्धादिनावास्तोतात्पर्ये स्वत्रकृतत्वविचारापेत् न
स्यादुत्तरसूत्राणां श्रुतिविचारार्थत्वाज्जन्मादिसूत्रेऽपि श्रुतिरेव स्वातंत्र्येण विचार्यते नानुमानमिति परिहरति नेति किं च मन्तव्योक्तेः
वगतिरभीष्टपर्यवसानस्वारंभः सा च वानुमानात्तं त्वौपनिषदमिति श्रुतेः अतो नानुमानं विचार्यमित्याह वाक्यार्थेति

शा॰ भा॰
प्र॰ टी॰
२२

22

वाक्यतदर्थस्य च विचारात्प्रागप्यवमानेनापूर्वविषयः प्रमेयसंभवविषयः तेन ज्ञाताज्ञातावगतिः न कथं भवतीत्यर्थः संभवो
बाधाभावः केन किमन्नमात्रेणापेक्षितमेवनेत्याह सम्यक्त्वेति विमतमभिन्ननिमित्तोपादानेककार्यत्वात् अणुनाच्याप्यावनेना
दिवत् विमतं चेतनप्रकृतिकं कार्यत्वात्सुखादिवदिति अत्र मानं श्रुत्यर्थेऽस्यापेक्षितमित्यर्थः ह्लादसंशयविपर्ययमनिवृ
त्ति संतव्य इति श्रुत्यर्थफले कैण संभावनीय इत्यर्थः यथा कश्चिद्गान्धारदेशस्थः स्वग्रामेन्नगतारणोपवहनेनव्यपवतस्करः केनचित्स्व
कबंधनत्रस्तं मार्गग्रहणसमर्थः पंडितः स्वपुनर्कजशलो मेधावी स्वदेशानेव गमयेदेवमेवेहाविद्याकामादिभिः स्वग्रा
पाविंदात्मच्याप्यासितेनाहत्वेससारेतिमः केनचिद्दयाळवशेनाचार्येणनासितं संसारी किं तत्त्वमसि त्वमुपदिष्टरूपः स्वय

सन्न तत्त्वेदांतवाक्येषु गतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्याय मानमपि वेदांतवाक्याविरोधिप्रमा
णं भवन्ननिवार्यते श्रुत्यैव च सहायत्वेन तर्कस्याभ्युपेयत्वात् तथाहि श्रोतव्यो मंतव्य इति श्रुतिः पंडितो मेधावी गंधा
रानेवोपसंपद्येतैवमेवेहाचार्यवान्पुरुषो वेदेति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति न धर्मजिज्ञासायामिव
श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायां किन्तु श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणमनुभवावसानत्वा
द्भूतवस्तुविषयत्वाच्च ब्रह्मविज्ञानस्य कर्तव्ये हि विषये नानुभवापेक्षास्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात् ॥ ॥

तर्ककुशलश्चेत्स्वरूपं जानीयात्तथा तथेति श्रुतिः स्वस्याः पुरुषमतिरूपतर्कापेक्षां दर्शयति इत्याह पंडित इति श्रोतव्यः श्रुते
रित्यर्थः न च ब्रह्मणो मननाद्यपेक्षा न युक्ता वेदार्थत्वात् धर्मवत् किंतु श्रुतिलिंगवाक्यादय एवापेक्षिता इत्यत आह नेति जिज्ञा
स्यधर्मवज्जिज्ञास्ये ब्रह्मणीति व्याख्येयं अनुभवो ब्रह्मसाक्षात्कारस्त्वाविहदनुभवः आदिपदान्मनननिदिध्यासनयोर्ग्रहः न
नु केतमाह अनुभवेति मुक्त्यर्थब्रह्मज्ञानस्य साक्षात्कारावसानत्वापेक्षणाव प्रत्यक्षवत्सिद्धब्रह्मगोचरत्वेन साक्षात्कारफलकत्व

गीपवित्रं विशारदयत्नश्रुत्यंतर्गतानायवश्रुतिमूलान्तर्गतो ॥

श्रोतृप्रेरितत्वेनापेक्षितं तेन तादृशः अन्वययोगादित्यर्थः निषेधः शब्दः अक्रिः शब्दस्यार्थप्रकाशनसामर्थ्यं लिंगं पदं योगे तत्र पदाकांक्षे
वाक्यस्थानां वाक्यसापेक्ष्यं प्रधानवाक्यप्रकरणाक्रमणादि नाताभ्यर्थानां क्रमप्रदिर्तत्वे यथाक्रमं संबंधः स्थानं पूर्वोद्दिष्टादयः ३ एषां दशाक्षं
मेयाप्रविशा दशमं त्रेस्ते द्वाग्नी रोचनादिवस्त्यादयस्तत्र प्रथमे छेप्रथममंत्रस्य विनियोगस्याप्रहतीयसंज्ञा सामर्थ्य समाख्यायथाध
यं व मंत्रकानां मंत्राणां माधुर्यं व मंत्रके कर्मणा विनियोगः इति विवेकः एवं तावद्रुक्तं नममननापेक्षं वेदार्थवादर्म यैव दित्यव
मानेन साध्यत्वे नत्यर्मस्यानुभवादयोपत्वमनुपेक्षित्वानुभवतं चोपाधिरित्युक्तमपाधिख्यातिरेकान्तस्तानि मनत्सायपेतत्त्वं चोक्तं
अपदिवेदार्थमात्रेणात्वस्माणां धर्मणा सामर्थ्यं तयोच्येत तर्हि क्रतिसाध्यत्वं विधिनिषेधविकल्पोत्सर्गापवादाश्च त्रयाणां धर्म एव तस्योदिति

पुरुषार्थीभूतात्मलाभवत्ताच्च कर्तव्यस्य कर्तव्यमन्यथा वाकर्तव्यमन्यथा वार्तं शास्त्रं लौकिकं वैदिकं च कर्म यथाश्वेन गच्छ
तीति पद्भ्यामन्यथा वा नत्वा गच्छतीति तथातिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति तेन होत्यन्न दितेत
होतीति विधिप्रतिषेधाभ्यां त्रायर्थवंतः स्यु विकल्पोत्सर्गापवादाश्च ॥ विधेर्बाधकमाह पुरुषेत्यादिना पुरुषकृत्याधीना
त्मलाभत्वं निर्वत्य तद्भावाच्च धर्मस्य त्यादीनामेव प्रामाण्यमित्यन्वयः धर्मस्य साध्यत्वं लौकिककर्मदृष्टांतेन स्फुटयति कर्त
मिति लौकिकवैदिकत्वं स्पष्टं दृष्टान्तस्फुटयति यथेति रात्रौ लौकिकमाह तथेति तदुद्दमेध कर्तेमकर्तव्यं शास्त्रकर्तामाह अतिरात्रे इति
धर्मस्य साध्यत्वमुपपादयन्नन्त्र निष्पादियोग्यतामाह विधीति विधिप्रतिषेधाभ्यां विकल्पादयश्च धर्मसाध्यपेक्षार्थवंतः सावर्क
शास्त्र एवेति तेषु स्मृतापि स्मृतिरित्यर्थः यथैतन्न त्रयोऽपि वेदितव्यादयो विधिनिषेधाः व्रीहिभिर्यवैर्वा यजेतेति संभाविततो विकल्पः यद
णात्रदुणायौ ऽक्ष्णिकः उदितानुदितहोमयोर्व्यवस्थितविकल्पः नहिंस्यादित्युत्सर्गः अग्नीषोमीयं पशुमालभेतेत्यपवादः
तथाहवनीये जुहोतीत्युत्सर्गः अश्वस्य पदे पदे जुहोतीत्यपवाद इति विवेकः ॥ ॥ ॥

पेते बुद्धिगुणाः स्मृतिस्त्वेते ज्ञापयितीवाध्यवसि नेत्यादिना भ्रान्तवस्तुविषयत्वादित्यं तेन शब्दं वस्तु वं नैवं च यः । पदेविनिप्रकारप्रविकल्पः
अस्ति नास्ति वेति सतास्वरूपविकल्पः न तु वस्तुन्यप्यात्मादौ अदिनामस्ति नास्तीत्यादिविकल्पाद्दृष्टं तेनेत्याह विकल्पनास्तीति
अस्तित्वादिकोटिस्मरणपुरुषबुद्धिस्तत्स्वमनः संदितमात्राः संशयविपर्ययविकल्पात् प्रमाणरूपात्वतार्थः अपभावः । य
सोहि यथा यथाज्ञापतेतथा तथाकर्तृशक्तत्वविषयत्वात्स्वपुरुषबुद्ध्युपेता विकल्पाः सर्वप्रमाणरूपापवभवेत्ति तत्वात्मेना
वस्तुगतपि सर्वैर्विकल्पयथार्थास्मृतिवि त — प्रमिति निवदंतं प्रत्याह नेति यदि सिद्धवस्तुज्ञानमपि साध्यज्ञानवत् पुरुषबुद्धि
मपेक्षत्वायेत तदा सिद्धे विकल्पाः यथार्थाः स्युः न सिद्धवस्तुज्ञानं पौरुषं किं तर्हि प्रमाणवस्तुजन्यं तथा च वस्तुन एकरूपत्वा
न तु वस्त्वेवं नैव सदस्ति नास्तीति वा विकल्प्यते विकल्पनास्तु पुरुषबुद्ध्यपेताः न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षं तत्
हि वस्तुतंत्रमेव न तु ब्रह्हि स्थाणावेकस्मिन् स्थाणुर्वा पुरुषो न्यो वेति तत्त्वज्ञानं भवति तत्र पुरुषो न्यो वेति मिथ्याज्ञानं स्था
णुरेवेति तत्त्वज्ञानं वस्तुतंत्रत्वात् एवं भूतवस्तुविषयाणां प्रमाणानां वस्तुतंत्रं तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतंत्रमेव वस्तु
विषयत्वात् न तु भूतवस्तुत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणानर्थकैव प्राप्ता ॥
देवमेकज्ञानं प्रमाणमस्ते विकल्पास्त्वयथार्थाः एवेत्यर्थः अत्र दृष्टान्तमाह न हि स्थाणावेति स्थाणौ एवेत्यवधारणे सिद्धे सर्वे
विकल्पा यथार्था न भवंतीत्यर्थः तत्र यद्वस्तु तत्र ज्ञानं तत्यथार्थं यत्पुरुषतंत्रं तन्मिथ्येति विभज्यते तदेव नि स्थाणाविव्यर्थः
स्थाणावुक्तन्यायेन कूटादिष्वतिदिशति एवमिति प्रकृतमाह तत्रैवं सतीति सिद्धेऽर्थे ज्ञानप्रमाणस्य वस्त्वधीनत्वे सति ब्रह्म
ज्ञानमपि वस्तुजन्यमेव यथार्थं न पुरुषतंत्रं भूतार्थविषयत्वात् स्थाणुज्ञानादित्यर्थः अतः साध्ये धर्मे विकल्पाः एतेन ज्ञानसि
ध्येऽर्थे ति वैलक्षण्यात्र धर्मामात्सब्रह्मणा अनिमनन्तापेक्षासिद्धे न भावः नवनर्हि ब्रह्म प्रत्यक्षादिगोचरं धर्मविलक्षणात्

...सर्वपदार्थप्रश्नः किं यत्कार्यं तद्ब्रह्मजन्मेत्यनुमानं ब्रह्मसाधकं किं वा यत्कार्यं तत्सकारणकमिति नाद्यः व्याप्त्यसिद्धेरित्याह नेन्द्रि-
याग्राह्यत्वात् तस्य तेन व्याप्तिग्रहायोगात् तत्प्रमाणान्तरविषयत्वमित्यर्थः इन्द्रियाग्राह्यत्वं कुत इत्यत आह स्वभावत इति पराञ्चि वि-
निः [illegible] श्रुतेः ब्रह्मणो रूपादिहीनत्वाच्चेत्यर्थः इन्द्रियाग्राह्यत्वेऽपि व्याप्तिग्रहः किं न स्यादित्यत आह सति हीति तत्रास्ति
विशेषः इदं कार्यं ब्रह्मजन्मेति व्याप्तिग्रहः स्यात् ब्रह्मणोऽतीन्द्रियत्वान्न संभवतीत्यर्थः द्वितीये कारणांशसिद्धावपि कारणस्य ब्रह्मत्वं क्व-
[illegible] नाशक्यमित्याह कार्यमात्रमिति संबन्धग्रहणे [illegible] जगत्कारणं ब्रह्मेति निश्चयाभावात् [illegible]
[illegible] विचारणीयानुमानं [illegible] ब्रह्मणः स्वकार्यात्मकत्वादिशोधनार्थं संभावनार्थं गुणत्व-
नेन्द्रियाविषयत्वे संबन्धाग्रहात् स्वभावतो विषयविषयाणीन्द्रियाणि न ब्रह्मविषयाणि मनिन्द्रियविषयत्वे ब्रह्मण इद-
ब्रह्मणा संबद्धं कार्यमिति निश्चयेन कार्यमात्रमेव गृह्यमाणं किं ब्रह्मणा संबद्धं किमन्येन केनचिद्वा संबद्धमिति न शक्यं नि-
श्चेतुं तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थं किं तर्हि वेदान्तवाक्यप्रदर्शनार्थं किं पुनस्तद्वेदान्तवाक्यं यस्य सूत्रेणेह लिलक्ष-
यिषितत्वे भृगुर्वै वारुणिर्वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति तस्मा एतत्प्रोवाच यतो वा इमानि भूतानि जायन्ते येन
जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति [illegible] विचार्यमित्युपसंहरति तस्मादिति एतत्सूत्रस्य विषय-
वाक्यं पृच्छति किं पुनरिति इह ब्रह्मणो लक्षणार्थत्वेन विचार्यत्वेनेष्टं वाक्यं किमित्यर्थः अत्र हि प्रथमसूत्रे विशिष्टाधिकारिणो
ब्रह्मविचारं प्रतिज्ञाय ब्रह्मज्ञानकामस्य हि तीयसूत्रेण लक्षणमुच्यते तत्र च प्रकृते ब्रह्मणि तज्ज्ञानकामस्य जगत्कारणत्वोपलक्ष-
णानुवादेन ब्रह्म [illegible] समानसामर्थ्यस्य सदर्शितस्योपक्रमं वाक्यं पठति भृगुरिति अधीहि स्मारय उपदिश इत्यर्थः
अत्रोपन्यस्यकर्तृविवक्षितं नान्यविषयत्वेनायोगात् प्रत्यगात्मकारणत्वं देकमित्यवान्तरवाक्यं तावत् यदेकं कारणं तद्ब्रह्मेति वा

तस्माच्चेति यः सर्वज्ञस्तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते विज्ञानमानंदं ब्रह्मेत्यादिशास्त्रांतरीयवाक्यानां स्वस्वविषयत्वादाह अन्यान्यपि वि
षयं तज्जातीयकमेवाह निःश्वसितेति वेदं च सर्वान्तःशास्त्रोक्तलक्षणहृदयवाक्यानि जिज्ञास्ये ब्रह्मणि समन्वितानीति द्वितीयाध्याये किंचिदिति निर्दिष्टे २
यमानि स्वमितवेदाः सर्वार्थज्ञानशक्तयः श्रीपाणमसर्ववेत्तारो वेदवेद्यमहं भजे । ज्ञानं नवादेनसंगतिं वदवृत्तात्तरं चमवनायायति जग
दिति चेतनस्य ब्रह्मणोऽनेककारणत्वोक्त्या सर्वज्ञत्वमर्थात्प्रतिज्ञातं स्त्र्युक्तं चेतनस्येक्षितृत्वेन सर्वकर्तृत्वं तथा च ब्रह्मणस्तत्सर्वं तत्सर्वज्ञ
त्वाद्यं योयकत्वोमतत्वं प्रधानाद्युक्तदूषणं तत्रेस्थितं ते सविषकेसर्वज्ञत्वं प्रधानादित्वसाध्यं वेदकलं तदिह सन्नाद्दयमुक्ता हेत्वर्थं हे
तद्धि सेकार्यसाधनत्वोदेकविषयत्वमेवोक्तं संगतिः यद्वा वेदस्यानित्यत्वाद्ब्रह्मणः सर्वहेतुत्वान्न स्ती त्यातिपसंगस्याद्वेदहेतुत्वमप्य
ते अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इति वाक्यविषयः तत्किं वेदहेतुत्वेन ब्रह्मणः सर्वज्ञत्वम
तस्य श्रुतिर्यथा वाक्यमानंदाद्ध्येव खल्विमानि भूतानि जायंते आनंदेन जातानि जीवंति आनंदं प्रयंत्यभिसंविशंतीत्यस्याः
स्येव जातीयकानि विनिःश्वसितहृद्बृहत्त्वभावस्वभावसर्वज्ञस्य रूपकारणविषयाण्युदाहृतेष्वपि जगत्कारणत्वप्रदर्शनेन सर्वज्ञ
ब्रह्मेत्युपदिष्टं च वेदे वदंदयत्राद्द शास्त्रयोनित्वात् इति ॥ यद्यपि उतन श्रुतिसंदेहः तत्र व्याकरणादिवद्धि दृष्टपौरुषेयत्वेन प्रमाण
सापेक्षत्वेन प्रामाण्यापातात् ब्रह्मा यतत्यपि इति पूर्वपक्षे ज्यद्दहे तो भेत नत्वासिद्धिः फलसिद्धांते तत्सिद्धिः अस्य वेदात्मवाक्यस्य स्पष्टब्रह्म
लिंगस्य वेदकर्तारि समन्वयोक्तेः श्रुतिशास्त्राध्यायपादसंगतयः पूर्वमापादश्रुत्यादिसंगतयः स्फुटाः वेदेहि सर्वार्थप्रकाशनशक्ति
रुपलभ्यते यातद्गुपादानब्रह्मणस्तच्छक्तिमत्पूर्वविकारहृतावप्रकाशनशक्तिमत्वात् कार्यगतशक्तिमत्वाद्धा प्रदीपशक्तिवदितिवेदो
पादानत्वेन ब्रह्मणः स्वसंबद्धाशेषार्थप्रकाशनसामर्थ्यरूपं सर्वज्ञत्वसिद्धिरिति यद्वा यथा अस्ता स एवकृतसंज्ञात्वा वेदकर्तृत्वेति
तथापि चित्रगुणमायामहायोनाद्धतानं तत्स्वप्रकाशचिन्मात्रः परमेश्वरः स्वकृतपूर्वकल्पीयक्रमसजातीयक्रमवंतं वेदराशि
तत्सर्वाश्च युगपज्ज्ञानविवेककरोतीति नवेदस्यापौरुषेयत्वा यत्र सर्वज्ञानपूर्वकं वाक्यत्वानेवाक्यस्यैककारणं तत्रपौरुषेयत्वाद्वेदे

गपयाद्वसा अतो वेदकर्ता वेदमिव तदर्थमपि सम्यग्वहं नांतरीयकतया जानातीति सर्वज्ञ इति शास्त्रेति ॥

शास्त्रं प्रति हेतुत्वाद्ब्रह्मणः सर्वज्ञं सर्वकारणं चेति संगतिं द्योतयन्सभाष्यसूत्रयोजनामभिप्रेत्य पदानि व्याचष्टे महत इति हेतोः सर्वज्ञत्वसिद्धये वे
दस्य विशेषणानि तत्र ग्रंथतोऽर्थतश्च महत्त्वं हि वर्णसमनाच्छास्त्रशब्दः शब्दमात्रोपलक्षणार्थ इति मत्वाह अनेकेति पुराणन्यायमीमांसाध
र्मशास्त्राणि शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमिति षडंगानीति दश विद्यास्थानानि वेदार्थज्ञानहेतुत्वैस्तैरुपकृतस्येत्यर्थः अने
कत्वादिभिः परिरक्षितेन तु वेदस्य प्रामाण्यं सूचितं अबाधकत्वाभावादपि प्रामाण्यमित्याह प्रदीपवदिति सर्वार्थप्रकाशनशक्तिमत्वे
प्यचेतनत्वात्सर्वज्ञकल्पत्वं योनिरुपादानं कर्त्ता च न तु सर्वज्ञस्य यो गुणः सर्वार्थज्ञानशक्तिमत्वं वेदस्य तदन्वितत्वेपि तद्योनेः सर्वज्ञत्वं
कुत इत्यत आह न हीति उपादानेन तत्कर्त्रा किं विना कार्ये तदयोगात् वेदोपादानस्य सर्वज्ञत्वमनुमानेनुक्त्वा पूर्ववदर्शितं तच्चाविद्याप्यल्पदा

महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म न ही
दृशस्य शास्त्रस्यर्ग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोस्ति यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषा
त्संभवति यथा व्याकरणादि पाणिन्यादेर्ज्ञेयैकदेशार्थमपि स ततोप्यधिकतरविज्ञान इति प्रसिद्धं लोके किमु वक्तव्यमने
कशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोर्ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्याप्रयत्नेनैव ॥ ॥

यतिः शक्तिमत्वेप्यचेतनत्वादिति भावः वेदः स्वविषयादधिकार्थज्ञानवज्जन्यः प्रमाणवाक्यत्वाद्व्याकरणादिवदित्य
नुमानांतरं तत्र व्याप्तिमाह यद्यदिति विस्तरः शाखाद्यधिकं स एतेनार्थतोऽल्पत्वं वक्तुर्ज्ञानसाध्यधिकं तच्च यतिदश्यते गार्थवाद
धिकं वेदग्रंथप्रयोजनात् यद्यच्छास्त्रं यस्मात्पुरुषात्संभवति स ततः शास्त्रादधिकार्थज्ञान इति प्रसिद्धं यथा शास्त्रं पाणिन्यादेर्ज्ञेयैकदे
शार्थमपि सत् तदपि व्याकरणादि पाणिन्यादेरधिकार्थज्ञानात्संभवति यदल्पार्थमपि शास्त्रमधिकार्थज्ञानात्संभवति तदा सुमहत इत्या
दिश्रुतेः यस्मान्महतोऽपरिच्छिन्नात्स्वप्रकाशात्तस्माद्योनेः सकाशादनेकशाखादिविशिष्टस्य वेदस्य पुरुषनिःश्वासवत् अप्रयत्नेनैव संभ

ब्रह्म॰ प्रदीप॰ २५

तत्र वेदस्य पौरुषेयत्वशंकानिरासार्थं श्रुतिस्थनिश्वसितपदार्थमाह अप्रयत्नेनेति प्रमाणांतरेणार्थज्ञानप्रयासं विनानिमेषादिन्यायेनेत्यर्थः अत्रानुमानेनयः सर्वज्ञ इति श्रुत्युक्तसर्वज्ञत्वदार्ढ्याय पाणिन्यादिवद्वेदकर्तृत्वं यदि कार्यज्ञानसत्तामात्रसाध्यं तेन तदर्थज्ञानस्य वेदहेतुत्वा निश्वसितश्रुतिविरोधाद्वेदज्ञानमात्रेणाध्येतृवद्वेदकर्तृत्वोपपत्तेश्चेत्यत्र विशेषः अध्येता पूर्वपठितं ईश्वरस्तु स्वकृतं वेदानुपूर्वीं स्वयमेव स्मृत्वा तथैव कल्पादौ ब्रह्मादिभ्य आविर्भावयन्ननावृतज्ञानत्वात्तदर्थमप्यावर्जनीयतया जानातीति सर्वज्ञ इत्यनवद्यं अधुना ब्रह्मणो लक्षणानंतरं प्रमाणजिज्ञासायां वर्णकांतरमाह अथवेति लक्षणप्रमाणयोर्ब्रह्मनिर्णयार्थत्वादेकफलत्वं संगतिः तं त्वौपनिषदं पुरुषमिति ब्रह्मणो वैदिकत्वं प्रतिज्ञातं न वेति संशये कार्यलिंगेनैव लाघवात्कर्त्रैकस्य सर्वज्ञस्य ब्रह्मणः सिद्धेर्न श्रुतिरिति प्राप्ते वेदप्रमाणक

लीलान्यायेन पुरुषनिश्वासवद्यस्मान्महतो भूताद्योनेः संभवः अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिश्रुतेः तस्य महतो भूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं चेति अथवा यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत्स्वरूपाधिगमे शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः शास्त्रमुदाहृतं पूर्वसूत्रे यतो वा इमानि भूतानि जायंत इत्यादि किमर्थं तर्हीदं सूत्रं यावता पूर्वसूत्र एवैवंजातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितं।

तत्र ब्रह्मणो न प्रमाणांतरवेद्यत्वमिति सिद्धांतयति शास्त्रयोनित्वादिति सप्रसंग उपोद्घातो हेतुतावसरस्तथा निर्वाहकैककार्यत्वे षोढा संगतिरिष्यते इति तद्व्याचष्टे यथोक्तमिति सर्वज्ञपूर्वोत्तरपक्षयुक्तिद्वयं संशयबीजं द्रष्टव्यं अत्र पूर्वपक्षेऽनुमानस्यैव विचार्यता सिद्धिः फलं सिद्धांते वेदांतानामिति भेदः अनुमानादिना ब्रह्मसिद्धिः पूर्वसूत्रे प्रसंगान्निरस्ता किं च विचित्रप्रपंचस्य प्रासादादिवदेककर्तृकत्वाद्यभावात्र लाघवावतारः न च सर्वज्ञताकर्त्रैकत्वसंभव एकत्वज्ञानात्मत्वसवसरसानुगततत्त्वादित्यन्योन्याश्रयमभिप्रेत्याह शास्त्रादेवेति किं शास्त्रमित्यत आह शास्त्रमिति पृथगारंभमाक्षिपति किमर्थमिति येन हेतुना दर्शितं ततः किमर्थमित्यर्थः ॥ ॥

२५

...दिलिंगकावमानमसत्यात्तेचोदितोपास्यायसंकाशिनामार्थपृथक्करणमित्याह न्वयस्तु इति वेदांताः सिद्धब्रह्मपराः उत कार्यपराः इति
...फलत्वप्राप्तेत्तयोः प्रसंगाप्रसंगाभ्यां संशये पूर्वपक्षस्त्वद्वितीयवर्णकेनाक्षेपसंगत्या पूर्वपक्षमाह कथं पुनरित्यादिना सदेव
सोम्येत्यादीनां सर्वोत्सूत्रादिसर्वब्रह्मलिंगानां ब्रह्मणि समन्वयोक्तेः स्मृत्यादिसंगतयः पूर्वपक्षे वेदांतेषु मनन्त्वप्रवृत्त्यसिद्धिः सि-
द्धांते तत्सिद्धिरिति विवेकः कथमित्यादिपद्धेतुः यतो वेति यतो जैमिनिसूत्रेण शास्त्रस्य वेदस्य क्रियापरत्वं दर्शितमतो क्रिया-
परत्वाद्वेदांतानामानर्थक्यं फलवदर्थस्यैव प्रामाण्यमित्यन्वयः सूत्रस्यायमर्थः प्रथमसूत्रेणावबोद्धस्य प्रवर्तनकारणकभावना-
विधिभाव्यस्य फलवदर्थपरत्वमुक्तं चोदनालक्षणोऽर्थो धर्म इति द्वितीयसूत्रेण धर्मे कार्ये चोदना प्रमाणमिति वेदप्रामाण्यव्यापकं

उच्यते तत्र सूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानाज्जन्मादि केवलमनुमानमुपन्यस्तमित्याशंक्येत तामाशं-
कां निवर्तयितुमिदं सूत्रं प्रववृते शास्त्रयोनित्वादिति कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते यावताम्नायस्य क्रि-
यार्थत्वादानर्थक्यमतदर्थानामिति क्रियापरत्वं शास्त्रस्य दर्शितमतो वेदांतानामानर्थक्यमक्रियार्थत्वात् ॥ = ॥

कार्यपरत्वमवसितं तेनैव पूर्वेण विधिशेषत्वादर्थवादानां धर्मे प्रमाणमस्ति नवेति संशये आम्नायप्रामाण्यस्य क्रियार्थत्वेन व्या-
प्तत्वादर्थवादेषु धर्मस्याप्रतीतेः क्रियार्थानां तेषामानर्थक्यं निष्फलार्थत्वेन चाध्ययनविधिगृहीतानां निष्फले सिद्धेऽर्थे प्रामाण्ये-
ऽयुक्तं तस्मादनित्यमेषां प्रामाण्यमनुच्यते व्यापकाभावाद्व्याप्यप्रामाण्यं नास्त्येवेति यावत् एवं पूर्वपक्षे विधिना त्वेकवाक्यत्वात्
स्तुत्यर्थेन विधीनां स्युरिति सूत्रेण सिद्धान्तमाह क्रियापरत्वमिति अनित्यमिति पूर्वपक्षे दर्शितमित्यर्थः वायुर्वै क्षिप्रतमस्यामिती
देवतातद्देवताकं कर्म क्षिप्रमेव फलं दास्यतीति स्तुत्वं विधेयार्थानां स्तुतिरूपार्थेन तद्द्वारेण वायव्यं श्वेतमालभेतेत्यादिविधिगृही-
तवाक्येनैकवाक्यत्वात् अर्थवादाः सफलाः स्तुतिलक्षणया सफलकार्यपरत्वात्प्रमाणमर्थवादा इति यावत् तत्त्वध्ययन

विधिरहीतमिति वेदान्तानामतदर्थकं तत्पुरुषमित्यत आह ॥

ब्र० भा०
सू० टी०
२६

कर्त्रेति न वयं वेदान्तानामानर्थक्यं साधयामः किं तु लोके सिद्धस्य मानान्तरवेद्यत्वान्निष्फलत्वाच्च सिद्धब्रह्मपरत्वे तेषां मानान्तरसा
पेक्षत्वनिष्फलत्वयोः प्रसङ्गात् प्रामाण्याय तात्कार्यविशेषकर्तृदेवताफलानां प्रकाशनद्वारा कार्यपरत्वं वक्तव्यमिति ब्रूमः तत्रा
त्वं तत्पदार्थवाक्यानां कर्तृदेवतात्वावकत्वं विविदिषादिवाक्यानां फलत्वावकत्वं ननु कर्मविशेषमनारभ्य प्रकरणान्तरस्थी
तानां वेदान्तानां कथं तच्छेषत्वं मानाभावादित्यरुच्या पक्षान्तरमाह उपासनेति मोक्षकामो ब्रह्मात्मभेदसाक्षात्काराय ब्रह्मास्मीत्यु
पासीतेत्युपासनाविधिः श्रोतव्यादिश्रवणादयः तत्कार्यपरत्वं वा वक्तव्यमित्यर्थः ननु श्रुतब्रह्मविहायाश्रुतकार्यपरत्वे
किमर्थं वक्तव्यमिति तत्राह नहीति परितः समन्तात्त्रिकाये न स्थितं परिनिष्ठितं कृत्यनपेक्षं सिद्धमिति यावत् तस्य प्रति

कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वं उपासनादिक्रियान्तरविधानार्थत्वं वा न हि परिनिष्ठितवस्तु
स्वरूपप्रतिपादनं संभवति प्रत्यक्षादिविषयत्वात् परिनिष्ठितवस्तुनस्तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्था
भावात् तदेव सोऽरोदीदित्यादीनामानर्थक्यं मा भूदिति विधिनैकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरिति त्वावक

पादनमज्ञातस्य वेदेन ज्ञापनं तत्र संभवति मानान्तरयोग्यार्थवाक्यसंवादे स्यादनुवादकत्वात् अग्निर्हिमस्य भेषजमितिवा
क्यवत् विसंवादे चाबोधकत्वादादित्यो यूप इति वाक्यवदित्यर्थः सिद्धो न वेदार्थः सिद्धो न वेदार्थः मानान्तरयोग्यत्वात्
घटवन्निष्फलत्वाच्चेत्यत आह न हीति सिद्धज्ञापने हेयोपादेयागोचरे फलाभावाच्च तत्र संभवतीत्यर्थः फलं हि स
त्वावाप्तिः दुःखहानं च तच्च प्रवृत्तिनिवृत्तिसाध्यं ते चोपादेयस्य प्रवृत्तिप्रयत्नकार्यस्य हेयस्य निवृत्तिप्रयत्नकार्यस्य ज्ञानाभ्यां
जायेते न सिद्धज्ञानादिति भावः नहि सिद्धबोधि वेदवाक्यानां साफल्यं कथमित्याशङ्क्याम्नायस्येत्यादिसंग्रहकारोक्तिं विवृणो
ति अत एवेति देवैर्निरुद्धः सोऽग्निररोदीदिति वाक्यस्यानृतत्वेन रजतस्य निंदाद्वारा बर्हिषि न देयमिति सफलनिषेधशेषः।

२८

ननुतथापिमंत्रवत्स्यात्तेऽप्यमस्तत्वार्थवादवद्विध्येकवाक्यत्वमित्याशंक्य दृष्टांतमसिद्धमाह मंत्राणांचेति प्रमाणलक्षणेऽर्थवादचिंतानंतरंमंत्रे
षुचिंताकृता इषेत्वाइतिमंत्रेछिनद्मीत्यध्याहाराच्छाखाच्छेदनक्रियाप्रतीतेः अग्निर्मूर्धेत्यादौचक्रियासाधनदेवताभिप्रतीतेर्मंत्राः क्रत्वादि
भिःक्रतौविनियुक्तास्तेकिमुच्चारणमात्रेणादृष्टंकुर्वंतःक्रतावुपकुर्वंत्युतदृष्टेनैवार्थस्मारणेनेति संदेहेचिंतादिनाध्ययनकाला
वगतमंत्रार्थस्मृतिसंभवाददृष्टार्थामंत्राइतिप्राप्तेसिद्धांतः अविशिष्टस्तुवाक्यार्थइतिलोकवेदयोर्वाक्यार्थस्याविशेषात् मंत्रवाक्या
नांदृष्टेनैवस्वार्थप्रकाशनेनक्रतूपकारकसंभवात् दृष्टेसंभवत्यदृष्टकल्पनानुपपत्तेः फलवदनुष्ठानापेक्षितेनक्रियातत्साध
नस्मरणेनमंत्राणांकर्मांगत्वंमंत्रैरेवार्थःस्मर्तव्यइतिनियमस्त्वदृष्टार्थइति तथाचार्थवादानांस्तुतिपदार्थद्वारापदैकवाक्यत्वंवि

मंत्राणांचेषेत्वादीनांक्रियातत्साधनाभिधायित्वेनकर्मसमवायित्वमुक्तं नक्वचिदपिवेदवाक्यानांविधिसंस्पर्शमंतरेणार्थ
वत्तादृष्टा उपपन्नावानचपरिनिष्ठितेवस्तुस्वरूपेविधिःसंभवति क्रियाविषयत्वाद्विधेस्तस्मात्कर्मापेक्षितकर्तृस्वरूपदे
वतादिप्रकाशनेनक्रियाविधिशेषत्वंवेदांतानामन्यप्रकरणगतभयात्त्वेतदभ्युपगम्यतेतथापिस्ववाक्यगतोपासनादि
कर्मपरत्वं तस्मान्नब्रह्मणः शास्त्रयोनित्वमित्येवंप्राप्तउच्यते भिसमंत्राणांतुवाक्यार्थत्वात्तद्द्वारातैर्विध्येकवाक्यत्वमितिभावः
ननुतत्कर्मप्रकरणस्थवाक्यानांविध्येकवाक्यत्वंवेदांतानांतुसिद्धेप्रामाण्यंकिंनस्यादित्यतआह नक्वचिदिति वेदांताविध्येकवा
क्यत्वेनैवार्थवंतःसिद्धार्थवेदकत्वान्मंत्रार्थवादादिवदित्यर्थः अन्यत्रादृष्टस्यापिवेदांतेषुकल्पनास्यादित्यतआह उपपन्नावेति न
त्वनुष्ठानंसिद्धेफलाभावस्योक्तत्वादितिभावः नहिब्रह्मण्येवस्वार्थेविधिःकल्प्यतांकृतेर्वेदांतानांविध्यंतरशेषत्वेनेत्यतआह
नचेति ननुभावनाहेतोर्नीतिसिद्धेदध्निविधिर्दृष्टइत्यतआह क्रियासाधनस्यप्रयुज्यमानतयासाध्यत्वाद्विधेयतानिष्क्रियवस्तु
नः कथमप्यसाध्यत्वान्नविधेयत्वमित्यर्थः महमतमुपसंहरति ॥ तस्मादिति ॥ ॥ राम ॥ ॥

शा॰ भा॰
प्र॰ दी॰ प्र॰
२०
21

स्वयमेवाह किंचिदन्यत्तांतरमाह अथेति सिद्धांतसूत्रं व्याचष्टे तत्त्विति तद्ब्रह्मवेदांतप्रमाणकमिति प्रतिज्ञातार्थे हेतुं पृच्छति कथ
मिति हेतुमाह समिति अन्वयत्वात्तात्पर्यविषयत्वात्तस्मादित्यवहेतुः तात्पर्यस्य सम्यक्त्वं अखंडार्थविषयकत्वं सूचयितुं संप्रदं प्रति
तां तर्गतमेव तत्पर्याचाखंडं ब्रह्म वेदांतजप्रमाविषयः वेदांततात्पर्यविषयत्वात् योयद्वाक्यतात्पर्यविषयः सतद्वाक्यप्रमेयः य
थाकर्मवाक्यप्रमेयो धर्म इति प्रयोगः वाक्यार्थस्याखंडत्वमसंसृष्टत्वं वाक्यस्य चाखंडार्थकत्वं स्वपदोपस्थिताये पदार्थास्तेषां यः संस
र्गस्तदगोचरप्रमाजनकत्वं न चेदमप्रसिद्धं प्रकृष्टप्रकाशश्चंद्र इत्यादिलक्षणवाक्यानां लोके लक्षणकचंद्रादिव्यक्तिमात्रप्रमाहेतुत्वा
त् सर्वपदलक्षणा चाविरुद्धा सर्वैरप्युवादपदैरेकसाः स्वतेलेन तत्त्वांगीकारात् तथा सत्यज्ञानादिपदैरखंडब्रह्मभातीति न प्रत्यासिद्धिः
नापि हेत्वसिद्धिः उपक्रमादिलिंगैर्वेदांतानामद्वितीयाखंडब्रह्मणि तात्पर्यनिश्चयात् तत्र छांदोग्यषष्ठे उपक्रमं दर्शयति स
तत्तु समन्वयात् ४ तुः शंकुः पूर्वपक्षव्यावृत्त्यर्थः तद्ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदांतशास्त्रादव
गम्यते कथं समन्वयात् सर्वेषु हि वेदांतेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि सदेव सोम्येदमग्र
देवेति उद्दालकः पुत्रमुवाच हे सोम्य प्रियदर्शन इदं सर्वं जगत् अग्रे उत्पत्तेः प्राक्काले सदवाधितं ब्रह्मैवासीत् एवकारेण जगा
तः पृथक्सत्ता निषिध्यते सजातीयविजातीयस्वगतभेदनिरासार्थं एकमेवाद्वितीयमिति पदत्रयं एवमद्वितीयब्रह्मोपक्रम्य ऐ
तदात्म्यमिदं सर्वमित्युपसंहरति इदमुपक्रमोपसंहारैकरूप्यं तात्पर्यलिंगं तथा तत्त्वमसीति नवकृत्वोभ्यासः रूपादिहीनाद्वि
तीयब्रह्मणो मानांतरायोग्यत्वादपूर्वत्वमुक्तं अत्र वाव किल सत्सोम्य न निभालयसे इति संघाते स्थितं सत्यं ब्रह्म न जानासीत्यर्थः
तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति ब्रह्मज्ञानात्फलमुक्तं विदुषः तस्य यावत्कालं देहो न विमोक्ष्यते तावदेव देहपातप
र्यंतं विलंबः अथ देहपातानंतरं विद्वान्ब्रह्म संपत्स्यते विदेहकैवल्यमनुभवतीत्यर्थः अनेन जीवेनात्मनानुप्रविश्येत्यादिश्रुतिद्वितीय

एवं षड्विधानि तात्पर्यलिंगानि व्यस्तानि समस्तानि वा प्रतिवेदांतं दर्शयंतः तैत्तिरेयकोपक्रमवाक्यं पठति आत्मा वा इति
बृहदारण्यके मधुकांडोपसंहारवाक्यं सदात्मनो निर्विशेषत्वार्थमाह तदेतदिति मायाभिर्बहुरूपं तद्ब्रह्मैतदपरो।
ऽनेकमपूर्वं कारणरहितं अनपरं कार्यरहितं अनंतरं जात्यंतरमस्य नास्तीत्यनंतरं एकरसमित्यर्थः अबाह्यमद्वितीयं तस्य
परोक्षत्वं व्यापादयति अयमिति सर्वमनुभवतीति सर्वानुभूः चिन्मात्रमित्यर्थः अथर्वणः साम्यवाक्यान्याह आथर्वणा वा

आत्मा वा इदमेक एवाग्र आसीत् तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यं अयमात्मा ब्रह्म सर्वानुभूः ब्रह्मैवेदममृतं पुर
स्तादित्यादीनि वचनानि गतानां पदार्थानां ब्रह्मस्वरूपविषये निःशेषसमन्वये अवगम्यमाने सति । कल्पनायुक्ता अ
नेहायमनृतकल्पनाप्रसंगात् न च तेषां कर्तृस्वरूपप्रतिपादनपरत्वमवसीयते तेनैके न कं यस्येपदित्यादिक्रियाक
रकफलनिराकरणाच्च तेनैव परिनिष्ठितवस्तुस्वरूपत्वेपि प्रत्यक्षादिविषयत्वं तत्त्वमसीति ब्रह्मात्मभावस्य शा
स्त्रमंत ॥ ॥

कामाह ब्रह्मैवेदमिति प्रियत्वमुपलब्धापूर्वदिविवर्त्तजगदिदमब्रह्मैवाविदुषां भाति तद
मृतं ब्रह्मैव वस्त्वित्यर्थः आदिपदेन सत्यं ज्ञानमित्यादिवाक्यानि संगृह्यंते ननु खलु ब्रह्मणस्तात्पर्यविषयत्वे वेदांतानां का
र्यमेवार्थः किं न स्यादिति तत्राह न चेति वेदांतानां ब्रह्मणि तात्पर्ये निश्चीयमाने कार्यार्थत्वं न युक्तं परत्वं शब्दः सश
ब्दार्थ इति न्यायादित्यर्थः प्रवृत्तिसमर्थवादन्यायेन वेदांतानां कर्त्रादिस्तावकत्वमिति तत्राह न च तेषामिति तेषां
कर्मशेषत्वावकत्वं न भातीति किं तर्हि ज्ञानद्वारा कर्मत्वसाधनत्वप्रकाशकत्वमेव ॥ रामायनमो नमः ॥ ॥

ततत्रविद्याकालेकः कर्ताकेनकरणेनकं विषयं प्रपश्येदितिकृतेरित्यर्थः अर्थवादानां तु स्वार्थे फलाभावान्न तिलक्षणे
तिभावः यदुक्तं सिद्धत्वेन मानान्तरवेद्यं ब्रह्म न वेदार्थ इति तत्राह नचपरीति तत्त्वमसीतिशास्त्रमंतरेणेतिसंबंधः धर्मो
नवेदार्थः साध्यत्वेन पाकवन्मानान्तरवेद्यत्वात् यदि वेदं विना धर्मस्य निर्णयान्न मानान्तरवेद्यता तदा ब्रह्मणोपि तत्त्वं
यच्चोक्तं निष्फलत्वाद्ब्रह्म न वेदार्थ इति तदनूद्य परिहरति यागेत्यादिना रहितत्वाद्भिन्नत्वाद्ब्रह्मणः श्रुतिशेषः यद
पुक्तमुपासनापरत्वं वेदान्तानामिति तत्र किं प्राणपञ्चाग्न्यादिवाक्यानामुत सर्वेषामिति तत्राद्यमंगीकरोति देव

रेणानवगम्यमानत्वाद्यत्न हेयोपादेयरहितत्वाद् उपदेशानर्थक्यमिति नैष दोषः हेयोपादेय
शून्यब्रह्मात्मावगमादेव सर्वक्लेशप्रहाणात्पुरुषार्थप्रसिद्धेः देवतादिप्रतिपादनपरस्य तु स्व
वाक्यगतोपासनार्थत्वेपि न कश्चिद्विरोधः न तु तथा ब्रह्मण उपासनाविधिशेषत्वं संभव
त्येकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः ॥ ॥ ॥

तादीति नेष्टत्वादिगुणः फलं चादिशब्दार्थः न द्वितीयः विधिशून्यानां सत्यंज्ञानमित्यादीनां स्वार्थफलवत्तामुपासा
नापरत्वकल्पनायोगात् किं च तदर्थस्य ब्रह्मणस्तच्छेषत्वं ज्ञानात्प्रागूर्ध्वं वा आद्येप्यहंगणावतस्तच्छेषत्वेपि न
द्वितीय इत्याह न तु तथेति प्राणादिदेवतावदित्यर्थः अहं ब्रह्मास्मीत्येकत्वे ज्ञाते सति हेयोपादेयशून्यतया ब्रह्म
...नः फलाभावादुपास्योपासकद्वैतज्ञानस्य कारणस्य नाशाच्च नोपासनाशेषत्वमित्याह एकत्वेति ॥ ॥

ज्ञानस्य संस्कारभवत्वात् न तद्द्वये विधानमिति नेत्याह नहीति दृष्टस्य विशेषः भ्रान्तित्वान्निरसयोदार्ढ्यसंस्कारोत्पत्त्यं तद्भ्रान्तित्वेन
तन्निवर्तनविधिनिमित्तं येनेति उपासनायाकारणस्य संबन्धेनेत्यर्थः वेदप्रामाण्यस्य व्यापकं क्रियार्थकत्वमनुवृत्ति येयपी।
ति कर्मकाण्डेऽर्थवादादीनामित्यर्थः तथा च व्यापकाभावाद्वेदान्तेषु व्याप्याभावानुमानमिति भावः वेदान्तानस्वार्थमात्रं मक्रि
यार्थत्वात्सोऽरोदीदित्यादिवदित्यनुमाने निष्फलार्थत्वमुपाधिरित्याह तथापीति अर्थवादानां निष्फलस्वार्थमात्रज्ञानविषयत्व

त

तदेकत्वविज्ञानेनोत्पादितस्यैहिकविज्ञानस्य पुनः संभवोऽस्तीति येनोपासनविधि
शेषत्वेन ब्रह्मप्रतिपादनपरत्वमत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेणाप्रमाण्य
त्वं दृष्टं तथाप्यस्य विज्ञानस्य फलपर्यन्ततानन्तद्विषयस्य शास्त्रस्य प्रामाण्यं श।
कं प्रत्याख्यातुं ॥

र्थः तद्विषयस्य तत्करणस्य स्वार्थे प्रमाणमिति विशेषः सफलज्ञानकरणत्वेन वेदान्तानां स्वार्थे मानत्वसिद्धेर्न क्रियार्थकत्वं त
द्व्यापकमिति भावः ननु मास्तु वेदप्रामाण्यस्य व्यापकं क्रियार्थकत्वं व्याप्यं तु भविष्यतीति तदभावाद्वेदान्तानामप्रामाण्यं दुर्वारा
मिति नेत्याह नचेति येन वेदप्रामाण्यं स्यादुपमानगम्यत्वेनान्यत्र क्वचिद्दृष्टं दृष्टान्तमपेक्षेत तदेव नास्तीत्यर्थः वक्तृरा
दिवद्वेदस्य स्वतः प्रामाण्यं स्यान्नात उपाधिलिङ्गाद्यपेक्षं प्रामाण्यं संभवेत् फलवदर्थावबोधितार्थत्वात् प्रामाण्यनिश्चयो

शा॰ भा॰
प्र॰ टी॰
२५

योनक्रियार्थत्वेनरूपेयतेदितिवाक्येव्यभिचारादितिभावः वर्णकार्थमुपंहरति तस्मादिति समन्वयादित्यर्थः विधिवाक्यानामपि
फलवदज्ञानार्थत्वेनप्रामाण्यंतत्त्वंवेदांतानामपीतिस्थितं एवंपदानां सिद्धेर्थेः व्युत्पत्तिसिद्धतांब्रह्मनास्तिकानांमतंब्र
ह्मणोमानांतरायोग्यत्वात्सफलत्वाच्च वेदांतैकमेयत्वमित्युक्त्वानिरस्तंसंप्रतिसर्वेषांपदानांकार्यान्वितार्थेशक्तिसिद्ध
तांविधिशेषत्वेनप्रत्यग्ब्रह्मवेदांतैर्बोध्यतेनस्वातंत्र्येणेतिवदतांवृत्तिकाराणांमतनिरासायसूत्रस्यवर्णकांतरमारभ्यते

नचानुमानगम्यंशास्त्रप्रामाण्यंयेनान्यत्रदृष्टंनिदर्शनमपेक्षेत तस्मात्सि
द्धंब्रह्मणःशास्त्रप्रमाणकत्वं अत्रापरेप्रत्यवतिष्ठंतेयद्यपिशास्त्रप्रमाणकं
ब्रह्मतथापिप्रतिपत्तिविधिविषयतयैवशास्त्रेणब्रह्मसमर्प्यते ॥ ॥

तत्रवेदांताःकिमुपासनाविधिशेषत्वेनब्रह्मबोधयंत्युतस्वातंत्र्येणेति सिद्धेव्युत्पत्त्यभावभावाभ्यांसंशयेपूर्वपक्षमाह
अत्रापरइति ब्रह्मणोवेदांतवेद्यत्वेकोवृत्तिकाराः पूर्वपक्षयंतीत्यर्थः उपासनातोमुक्तिः पूर्वपक्षेतत्त्वज्ञानादेवेतिसि
द्धांतेफलं विधिनियोगस्तस्यविषयःप्रतिपत्तिरुपासना अस्याःकोविषयइत्याकांक्षायांसत्यादिवाक्यैर्विधिपरैरेवसम
र्प्यतइत्याह प्रतिपत्तीति विधिविषयप्रतिपत्तिविषयतयेत्यर्थः ॥

२५

[illegible]पराह्याख्यातत्वेष्वेव न भेद इत्यत आह यूप इति यूपे पशुं बध्नाति आहवनीये जुहोतीत्यनेन विधिषु केयं यूपादयः न्यायका
[illegible] यूपं तक्षति अष्टाश्रीकरोतीति तक्षणादिसंस्कृतं दारु यूपः अग्नीनादधीतेत्याधानसंस्कृतोऽग्निराहवनीयः वज्रहस्तः पुरं
दरश्च तौ विधिवाक्यैरेव वाक्यैः समर्प्यते तद्वत्स्तत्यर्थः विधिपरवाक्यस्याप्यन्यार्थत्वेपि तेवाक्यभेदः स्यादिति शंकानिरासार्थमपि
प्राहुः मानान्तरप्राप्तान्यपि विशेषतया विधीयन्ते न प्रधानत्वेनेति न वाक्यभेदः प्रधानार्थभेदस्यैव वाक्यभेदत्वादिति भावः नन्वक

यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिविशेषणतया शास्त्रेण समर्प्यन्ते तद्वत् एतत्सर्वं प्रयोजनत्वाका
स्य तथा हि प्रशस्ततात्पर्यविद आहुः दृष्टो हि तस्यार्थः कर्मावबोधनं नाम चोदनेति क्रियायाः प्रवर्तकं वचनं
तस्य तान्नमपदेशः तद्भूतानां क्रियार्थेन समाम्नायः आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति चा
नः ॥

वह्निपरितेर्लौतात्पर्यविषयस्य ब्रह्मणः कुतो विधिविशेषत्वमिति शंकते कुत इति वृद्धव्यवहारेण हि शास्त्रतात्पर्यमि
ष्यते वृद्धव्यवहारे च प्रयोजकः प्रवृत्तिनिवृत्तिहेतुः प्राप्तप्रयोजकः दृश्यते अतः शास्त्रस्यापि तत्प्रयोजनेन कार्ये तात्
पर्ये इति कार्यपरत्वं शास्त्रस्य ततः कार्यशेषत्वं ब्रह्मणः इत्याह प्रवृत्तीति शास्त्रस्य नियोगपरत्वे वृद्धसंमतिमाह तथा
हीत्यादिना क्रियाकार्यं नियोगो विधिः धर्माप्रवृत्तिमित्यनर्थान्तरं को वेदार्थ इत्यपेक्षायां भाष्यकृतोक्तं दर्शिहीति व
स्य वेदस्य कार्यं वेदार्थ इत्यत्र चोदनासूत्रस्थं भाष्यमाह ॥

चोदनेति क्रियायानियोगस्सत्तानद्वारा प्रवर्तकंवाक्यंचोदनेत्युच्यतेइत्यर्थः शाबरस्वामिसंमतिमुक्त्वाजैमिनिसंमतिमाह त
स्यज्ञानमिति तस्यधर्मस्यज्ञापकंअपौरुषेयविधिवाक्यमुपदेशः तस्यधर्मगणव्यतिरेकादित्यर्थः पदानांकार्यान्विता
र्थेशक्तिरित्यत्रसूत्रंपठति तद्भूतानांसिद्धार्थनिष्ठानांपदानांक्रियार्थेनकार्यवाचिनालिंगादिपदेनसमाम्नायःस
होच्चारणंकर्तव्यंपदार्थज्ञानस्यवाक्यार्थरूपकार्यधीनिमित्तत्वादित्यर्थः कार्यान्वितार्थेप्रोक्तानिपदानिकार्यवाचिपदे

शु० त०
प्रदीप०
३०

पुरुषंकंचिद्विषयविशेषेप्रवर्तयन्क्वचित्तस्माद्विषयविशेषान्निवर्तयच्चार्थवच्छास्त्रंतच्छेषतयाचान्यत्रउपयुक्तंता
त्सामान्याद्वेदांतानामपितथैवार्थवत्त्वस्यात् मतिचविधिपरत्वेयथास्वर्गादिकामस्याग्निहोत्रादिसाधनंविधीय
तएवममृतत्वकामस्यब्रह्मज्ञानंविधीयतइतियुक्तं ॥ ॥

...मसदपदार्थस्यसिद्धाराकार्यमेववाक्यार्थंबोधयंतीतिभावः फलितमाह अतइति यतोऽद्धाएवमाद्वः ...तोविधिनिषेधा
...त्मकमेवशास्त्रमर्थवादादिकंतत्तच्छेषतयोपन्नीणंतेनकर्मशास्त्रेणसामान्यंशास्त्रत्वंतस्माद्वेदांतानांकार्यपरत्वेनैवा
र्थवत्त्वंस्यादित्यर्थः ननुवेदांतेषुनियोज्यस्यविधेयस्यचादर्शनात्कथंकार्यधीरितितत्राह सतिचेति ॥

३०

ननुधर्मब्रह्मजिज्ञासयोः सूत्रकाराभ्यामिह कांडद्वयेर्थभेद उक्तः एककार्यार्थत्वे शास्त्रभेदानुपपत्तेः तत्र कांडद्वये जिज्ञास्यभेदे सति
फलभेदेन लक्षणं वाच्यं तथा च न मुक्तिफलाय ज्ञानस्य विधेयता मुक्तेर्विधेयक्रियाजन्यत्वे कर्मफलादविशेषप्रसंगात् अविशे
षे जिज्ञास्यभेदासिद्धेः अतः कार्यफलविलक्षणत्वात् नित्यसिद्धमुक्तेः तद्व्यंजकज्ञानविधिरयुक्त इति शंकते नन्विहेति मु
क्तेः कर्मफलाद्वैलक्षण्यमसिद्धमिति तदर्थं ज्ञानं विधेयं न च तर्हि सफलकार्यमेव वेदांतेष्वपि जिज्ञास्यमिति तद्भेदासिद्धिः

नन्विदं जिज्ञास्यवैलक्षण्यमयुक्तं कर्मकांडे भव्यो धर्मो जिज्ञास्य इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यमिति तत्र धर्मज्ञानफ
लादनुष्ठानापेक्षाद्विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति नार्हत्येवं भवितुं कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्य
मानत्वात् आत्मा वा अरे द्रष्टव्यः य आत्मापहतपाप्मा सोन्वेष्टव्यः स विजिज्ञासितव्यः आत्मेत्येवोपासीत आत्मानमेव लोक
मुपासीत ब्रह्म वेद ब्रह्मैव भवतीत्यादिषु विधानेषु सत्सु कोसावात्मा किं तद्ब्रह्मेत्याकांक्षायां तत्स्वरूपसमर्पणेन
सर्वे वेदांता उपयुक्ताः नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमानंदं ब्रह्मेत्येवमादयस्त
दुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यतीति कर्त्तव्यविध्यननुप्रवेशे वस्तुमात्रकथने हानोपादानासं

भवितिवाच्यं इष्टत्वात् न च ब्रह्मणो जिज्ञास्यत्वसूत्रविरोधः ज्ञानविधिशेषत्वेन सूत्रकृता ब्रह्मप्रतिपादनादिति परिहरति नेति ब्र
ह्मणो विधिप्रयुक्तत्वं स्फुटयति आत्मा वा इति ब्रह्म वेदेत्यत्र ब्रह्मभावकामो ब्रह्म वेदनं कुर्यादिति विधिः परिणम्यत इति द्र
ष्टव्यं लोकं ज्ञानस्वरूपं वेदांता नैवार्पयतीति दर्शयति नित्य इति ननु किं विधिफलमिति तत्राह तदुपासनादिति प्रत्यग्ब्रह्मो
पासनात् ब्रह्मविदाप्नोति परमिति शास्त्रतो मोक्षः स्वर्गवल्लोकाप्रसिद्धः फलमित्यर्थः ब्रह्मणः कर्त्तव्योपासनाविषयकवि

विशेषत्वात्तेनांगीकारेबाधकमाह कर्त्तव्येति विध्यसंबंधस्य सिद्धबोधे प्रवृत्त्यादिफलाभावाद्वेदांतानां वैफल्यं स्यादित्यर्थः नन्विति शंकास्पष्टा
र्थो दृष्टांतवैषम्येण परिहरति स्यादिति एतदर्थवत्त्वं एवं चेत्स्यादित्यर्थः एवं शास्त्रार्थमाह यदीति किंच यदि ज्ञानोदयमुक्तिस्तदा श्रव

भवानयमस्मद्द्वीपवस्समस्ती राजा सो गच्छतीत्यादिवाक्यवद्वेदांतवाक्यानामप्यनर्थकमेव स्यान्ननु वस्तुमात्रकथने ।
पि रज्जुरियं नायं सर्प इत्यादौ भ्रांतिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टं तथेहाप्यसंसार्यात्मवस्तुकथनेन सं ।
सारित्वभ्रांतिनिवर्तनेनार्थवत्त्वं स्यात् स्यादेतदेवं यदि रज्जुस्वरूपश्रवण इव सर्पभ्रांतिः संसारित्वभ्रांतिः ब्र
ह्मस्वरूपश्रवणमात्रेण निवर्तेत न तु निवर्तते श्रुतब्रह्मणोपि यथापूर्वं सुखदुःखादिसंसारधर्मदर्शना
च्छ्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्दर्शनात् तस्मात्प्रतिपा
त्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगंतव्यमिति ॥ ॥ ॥ ॥ ॥ ॥

णजन्यज्ञानानंतरं मनननादिविधिर्न स्यात् तद्विधेश्च कार्यसाध्यमुक्तिरित्याह श्रोतव्य इति शब्दानां कार्यान्वितशक्तेः प्रवृत्त्यादिफला ।
सैव प्रमात्वनाशिद्धे फलाभावात् मनननादिविधेश्च कार्यपरा वेदांता इति सर्वपक्षमुपसंहरति तस्मादिति ॥ ॥ ॥

वेदांतानविधिपराःस्वार्थेफलवत्वेसतिनियोज्यविधुरत्वान्नायंसर्पइतिवाक्यवत् स्वर्गादीत्स्वर्गकामोयजेतेतिवाक्ययोर्निरा
काङ्क्षहेतोर्विशेषणाद्द्वयमितिसिद्धांतयति अत्रेति यदुक्तंमोक्षकामस्यनियोज्यस्यलाभंविधेमितितन्नेत्याह नेति मोक्षेण
विधिजन्यःकर्मफलविफलक्षणत्वात् आत्मवदित्यर्थः उक्तहेतुज्ञानायकर्मतत्फलेप्रपंचयति शारीरमित्यादिनावर्णि
तंसंसाररूपमनुवदतीत्यंतेन अथवेदाध्ययनानंतरं अतोवेदस्यफलवदर्थपरत्वात् धर्मनिर्णयायकर्मवाक्यविचारः

अत्राभिधीयते नकर्मब्रह्मविद्याफलयोर्वैलक्षण्याच्छारीरंवाचिकंमानसंचकर्मश्रुतिस्मृतिसिद्धंधर्माख्यंयद्विष
याजिज्ञासासूत्रयातेथातोधर्मजिज्ञासेतिसूत्रितः अधर्मोपिहिंसादिप्रतिषेधचोदनालक्षणत्वाज्जिज्ञास्यः परिहारायतो
योश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोःफलेप्रत्यक्षेसुखदुःखेशरीरवाङ्मनोभिरेवोपभुज्यमानेविषयें
द्रियसंयोगजन्येब्रह्मादिस्थावरांतेषुप्रसिद्धेमनुष्यत्वादारभ्यब्रह्मांतेषुदेहवत्सुतारतम्यमनुश्रूयतेततश्च

कर्तव्यइतिसूत्रार्थः नकेवलंधर्माख्यंकर्मकिंत्वधर्मोपीत्याह अधर्मोपीति निषेधवाक्यप्रमाणकत्वादित्यर्थः कर्मोक्त्वा
फलमाह तयोरितिमोक्षस्त्वतींद्रियोविशोकः शरीराद्यभोग्योविषयाद्यजन्योनात्मवित्त्वप्रतिषिद्धइतिवैलक्षण्यज्ञानायप्र
त्यक्षत्वादीनिविशेषणानिसामान्येनकर्मफलमुक्त्वाधर्मफलंपृथक्प्रपंचयतिमनुष्यत्वादिति सयएकोमानुष्यआनंदस्ततः
शतगुणोगंधर्वादीनामितिश्रुतेरनुभवानुसारत्वमनुश्राव्यार्थः ततश्चसवितारतम्यादित्यर्थः मोक्षस्तुनिरतिशयत्वात्साधनंच

वैलक्षण्यं किंच साधनचतुष्टयसंपन्नएकरूपएवमोक्षविद्याधिकारी कर्मणितुनानाविधइतिवैलक्षण्यमाह यत्रेतिगम्यतेनकेवा-
लंकिंतुप्रसिद्धंचेत्यर्थः अर्थित्वंफलकामित्वं सामर्थ्यंलौकिकंपुत्रादिकंआदिपदाद्विद्वत्वंशास्त्रानिंदितत्वंचकिंचकर्मफलंमार्ग-
प्राप्यंमोक्षस्तुनित्यात्मरूपइतिभेदमाह तत्रेति उपासनायांचित्तस्थैर्यप्रकर्षात् अर्चिरादिमार्गेणब्रह्मलोकगमनंतेर्चिषमित्यादि-
नाश्रूयतेइत्यर्थः अग्निहोत्रंतपः सत्यंवेदानांचानुपालनं आतिथ्यंवैश्वदेवंचइष्टमित्यभिधीयते वापीकूपतडागादिदेवता-

यतेधर्मतारतम्यादधिकारितारतम्यंप्रसिद्धंचार्थित्वसामर्थ्यादिकृतमधिकारितारतम्यं तथाचयागाद्यनुष्ठायिनामे-
वविद्यासमाधिविशेषादुत्तरेणाध्वनागमनंकेवलेष्टापूर्तदत्तसाधनैर्धूमादिक्रमेणदक्षिणेनाध्वनागमनंतत्रा-
पिसर्वतारतम्यंतत्साधनतारतम्यंचशास्त्राद्यावत्संपातमुषित्वेत्यस्माद्गम्यते ॥

यतनानिच अन्नप्रदानमारामः पूर्तमित्यभिधीयते २ शरणागतसंत्राणंभूतानांचाप्यहिंसनं बहिर्वेदिंचयद्दानंदत्तंतदभि-
धीयते तत्रापिचंद्रलोकेपीत्यर्थः संपतन्तिगच्छन्त्यस्माल्लोकादमुंलोकमनेनेतिसंपातः कर्मयावत्कर्मभोक्तव्यंतावत्स्थित्वा-
पुनरायांतीत्यर्थः ॥ ॥

मनुष्यत्वादूर्ध्वगतेषु सुखस्य तारतम्यमुक्त्वाधोगतेषु तदाह तथेति इदानीं दुःखतद्धेतुतदनुष्ठायिनां तारतम्यं वदन्नधर्मफलं प्र-
पंचयति तयोर्धर्ममिति द्विविधं कर्मफलं मोक्षस्तद्धेतुलक्षणज्ञानाय प्रपंचितमुपसंहरति एवमिति अस्मिता कामक्रोधभ-
यान्यादिशब्दार्थः ते तं भुक्त्वा स्वर्गलोकं विशालमित्याद्या स्मृतिः काष्ठोपचयाज्ज्वालोपचयदर्शनात् फलतारतम्येन साधना-
तारतम्यानुमानं न्यायः श्रुतिमाह तथाहीति मोक्षो न कर्मफलं कर्मफलविरुद्धातीन्द्रियत्वविशोकत्वशरीराद्यभोगत्वा-

तथा मानुष्यादिषु नारकस्थावरान्तेषु सुखलवश्चोदनालक्षणधर्मसाध्य एवेति गम्यते तारतम्येन वर्तमानस्तथोर्ध्वग-
तेष्वधोगतेषु च देहवत्सु दुःखतारतम्यदर्शनात्तद्धेतोरधर्मस्य प्रतिषेधचोदनालक्षणस्य तदनुष्ठायिनां च ता-
रतम्यं गम्यते एवमविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखदुःखतारतम्यमनित्यं सं-
साररूपं श्रुतिस्मृतिन्यायप्रसिद्धं तथाहि श्रुतिर्न ह वै शरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति यथावर्णितं संसा-
ररूपमनुवदति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षणधर्मकार्य॥

दिधर्मवत्त्वाद्व्यतिरेकेण स्वर्गादिवदिति न्यायानुग्राह्यां श्रुतिमाह अशरीरमिति वावेत्यवधारणे तत्त्वतो विदेहं सन्तमात्मानं वै-
षयिके सुखदुःखे नैव स्पृशत इत्यर्थः मोक्षश्चेदुपासनारूपधर्मफलं तदेव प्रियमस्तीति तन्निषेधायोग इत्याह धर्मकार्यं चेदि-
ति ननु प्रियं नाम वैषयिकं सुखं तन्निषिध्यते मोक्षस्तु धर्मफलमेव कर्मणां विचित्रफलदानसामर्थ्यादिति शंकते अशरीरत्व

मेवेति आत्मनो देहासंगित्वमशरीरत्वं तस्यानादित्वान्न कर्मसाध्यमित्याह नेति अशरीरं स्थूलदेहशून्यं देहेष्वनेकेष्वनित्येष्वेकं
नित्यमवस्थितं महान्तं व्यापिनं आपेक्षिकमहत्त्वं वारयति विभुमिति तमात्मानं ज्ञात्वा धीरः सञ्छोकोपलक्षितं संसारं नानुभवा
तीत्यर्थः सूक्ष्मदेहाभावे श्रुतिमाह अप्राण इति प्राणमनसोः क्रियाज्ञानशक्त्योर्निषेधात्तदधीनानां कर्मज्ञानेन्द्रियाणां निषेधो हि

त्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते धर्मकार्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्यते अशरीरत्वमे
व धर्मकार्यमिति चेन्न तस्य स्वाभाविकत्वादशरीरं शरीरेष्वनवस्थितं महान्तं विभुमात्मानं मत्वा धीरो न शोचति अप्रा
णो ह्यमनाः शुभ्रो असंगो ह्ययं पुरुष इत्यादिश्रुतिभ्योऽत एवानुष्ठेयफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धं
तत्र किंचित्परिणामिनित्यं यस्मिन्विक्रियमाणेऽपि तदेवेदमिति बुद्धिर्न विहन्यते यथा पृथिव्यादि जगन्नित्यवादिनां य
था च सांख्यानां गुणाः ॥

यतः अतः शुद्ध इत्यर्थः देहद्वयाभावे श्रुतिः असंगो हीति निर्दुःखात्मस्वरूपमोक्षस्यानादिभावत्वे सिद्धे फलितमाह अत एवेति नि
त्यत्वेऽपि परिणामितया धर्मकार्यत्वं मोक्षस्येत्याशंक्य नित्यं द्वेधा विभजते तत्र किंचिदिति नित्यवस्तुमध्य इत्यर्थः परिणामि च ता
न्नित्यं चेति परिणामिनित्यं ॥

आत्मा तु कूटस्थनित्य इति न कर्मसाध्य इत्याह इदं त्विति परिणामिनो नित्यत्वं प्रत्यभिज्ञाकल्पितं मिथ्यैव कूटस्थस्य तु नाशकाभावा
न्नित्यत्वं पारमार्थिकं कूटस्थत्वसिध्यर्थं परिस्पंदाभावमाह व्योमवदिति परिणामाभावमाह सर्वविक्रियारहितमिति फलानपे
क्षित्वान्न फलार्थापि विक्रियेत्याह नित्यतृप्तमिति तृप्तिरनपेक्षत्वं विशेषकं सावयवं वा निरवयवत्वान्न क्रिया तस्य भानार्थमपि न
क्रिया स्वयंज्योतिष्ट्वात् अतः कूटस्थत्वान्न कर्मसाध्यो मोक्ष इत्युक्तं कर्मतत्कार्यासंगित्वाच्च तथेत्याह यत्रेति कालानवच्छिन्नत्वं

इदं तु पारमार्थिकं कूटस्थनित्यं व्योमवत्सर्वव्यापि सर्वविक्रियारहितं नित्यतृप्तं निरवयवं स्वयंज्योतिःस्वभावं यत्र धर्माध
र्मौ सह कार्येण कालत्रयं च नोपावर्तेते तदशरीरत्वं मोक्षाख्यम् अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतादन्यत्र भूताच्च भ
व्याच्चेत्यादिश्रुतिभ्यः अतस्तद्ब्रह्म यस्येयं जिज्ञासा प्रस्तुता तद्यदि कर्तव्यशेषत्वेनोपदिश्येत तेन च कर्तव्येन साध्यश्चेन्मोक्षो॥

भुप ॥

च्चेत्याह कालेति कालत्रयं च नोपावर्तत इति योग्यतया संबंधनीयं धर्माद्यवच्छेदे मानमाह अन्यत्रेति अन्यदित्यर्थः कृताकार्या
दकृतात्कारणात् भूताद्भव्याच्च चकाराद्वर्तमानाच्चान्यद्यत्पश्यसि तद्वदेत्यर्थः ननु काः श्रुतयो ब्रह्मणः कूटस्थासंगित्वं वदन्त्व
मोक्षस्य नियोगफलत्वं किं न स्यादिति तत्राह अत इति तत्कैवल्यं ब्रह्मैव कर्मफलविलक्षणत्वादित्यर्थः ब्रह्माभेदान्मोक्षस्य कूट

स्यत्वं धर्माधर्मसंगित्वं चेति भावः यद्वा यज्जिज्ञास्यं तद्ब्रह्म अतः पृथग्जिज्ञास्यत्वाद्धर्माधर्मादृष्टमित्यर्थः अतः शुष्काभावपाठे ऽप्ययमेवार्थः।
ब्रह्मणो विधिस्पर्शे शास्त्रपृथक्त्वं न स्यात्कार्यविलक्षणानधिगतविषयालाभात् नहि ब्रह्मात्मैक्यं भेदप्रमाणेनावगतिविधिपरवाक्या
त्तत्पृथक्त्वं न वा तद्धि नाविधेरनुपपत्तिः यो विधिदर्शने कोपास्तिविधिदर्शनादिति भावः अथवा मोक्षस्य नियोगासाध्यत्वे फलितसूत्रार्थ

गम्येतानित्य एव स्यात् तत्रैवं सति यथोक्तकर्म।
फलेष्वेव तारतम्यावस्थितेषु कश्चिदतिशयो मोक्ष इ
ति प्रसज्येत नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्य
ते अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः

माह अत इति यदत्र जिज्ञास्यं ब्रह्मतत्त्वं त्वमेव वेदान्तेषूपदिश्यते समन्वयादित्यर्थः विपक्षे दण्डं पातयति तद्यदीति तत्रैवं सतीति
मोक्षे साध्यत्वे नानित्ये सतीत्यर्थः अत इति मुक्तेर्नियोगासाध्यत्वेन नियोज्यालाभात् कर्तव्यनियोगाभावादित्यर्थः ॥ ॥

प्रदीपात्तमोनिवृत्तिवज्ज्ञानादज्ञाननिवृत्तिरूपमोक्षस्यदृष्टफलत्वाच्चननियोगसाध्यत्वमित्याह अपिचेति योब्रह्माहमस्मीतिवेदसब्रह्मै
वभवति परंकारणमवरंकार्यंतद्रूपेतदधिष्ठानेतस्मिन्दृष्टेतस्यादृष्टस्यारब्धफलानिकर्माणिनश्यंति ब्रह्मणःस्वरूपानंदंवि
द्वान्निर्भयोभवतिद्वितीयाभावात् अभयंब्रह्मप्राप्नोत्यज्ञानहानात् तज्जीवात्मंब्रह्मसद्गुरूपदेशाद्दात्मानमेवाहंब्रह्मास्मीत्यवेत्
विदितवान्तस्मात्तद्विदनाद्ब्रह्मसर्वमभवत् परिच्छेदभ्रांतिहानादेकत्वमहंब्रह्मेत्यनुभवतः तत्रानुभवकालेमोहशोकौना

अपिचब्रह्मवेदब्रह्मैवभवतिक्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चनअभयं
वैजनकप्राप्तोसितदात्मानमेवावेदहंब्रह्मास्मीतितस्मात्तत्सर्वमभवत्तत्रकोमोहःकःशोकएकत्वमनुपश्यतस्तस्यैवा
मायाः श्रुतयोब्रह्मविद्यानंतरंमोक्षंदर्शयंत्योमध्येकार्यांतरंवारयंति तद्यथातद्धैतत्पश्यन्नृषिर्वामदेवःप्रतिपेदेअहं
मनुरभवंसूर्यश्चेतिब्रह्मदर्शनसर्वात्मभावयोर्मध्येकर्तव्यांतरवारणायउदाहार्यंयथातिष्ठन्गायतीतितिष्ठतिगायति।

स्त इतिश्रुतीनामर्थः तासांतात्पर्यमाह ब्रह्मेतिविद्यातत्फलयोर्मध्यस्थत्यर्थः मोक्षस्यविधिफलत्वेस्वर्गादिवत्फलांतरभावित्वं
स्यात् तथाचश्रुतिवाधइतिभावः अतस्समोक्षोवैधोनेत्याह तथेति तद्धैतत्तदहमस्मीतिपश्यन्ब्रह्मसाक्षाज्ज्ञानाद्वामदेवोऋ
षिःअहंब्रह्मप्रतिपेदेज्ञातवान्ज्ञानेतिष्ठन्दृष्टवानात्ममंत्रान्सर्वात्मकत्वप्रकाशकानहंमनुरित्यादीन्मंत्रान्ददर्शेत्यर्थः
यद्यपिस्थितिर्गायनक्रियायालक्षणंब्रह्मदर्शनंतुब्रह्मप्रतिपत्तिक्रियायाहेतुरितिवैषम्यमस्तितथापिलक्षणाहेत्वोःक्रिया

प्रश्नभा॰
प्रदीप॰
३५

हृत्वेणक्रियांप्रतिलक्षणहेत्वोरर्थयोर्वर्तमानाद्धातोः परस्मैलटः शतृशानचावादेशौ भवत इति विहितशतृप्रत्ययसामर्थ्या
त्तिष्ठन्नापतीत्यस्मिंकेतत्र केकेकार्याततं मध्येनभातीत्येतावतापश्यन्नाप्नोति पेदेइत्यस्य दृष्टांतमाह यथेति किंचज्ञानादज्ञान
निवृत्तिः श्रूयतेज्ञानस्यविधेयत्वे कर्मत्वादविद्यानिवर्तकत्वंनयुक्तं अतोबोधकाएव वेदांताः नविधायकाइत्याह त्वंही
ति भरद्वाजादयः षड्ऋषयः पिप्पलादंगत्वातत्पादयोः प्रणम्य ऊचिरे त्वंखल्वस्माकंपितायस्त्वमविद्यामहोदधेःपरंपुनरावृत्तिरहि

तमीतिवाक्यमेते त्वंहिनःपितायोऽस्माकमविद्यायाःपरंपारंतारयसि श्रुतंह्येवमेभगवद्दृशेभ्यस्तरति
शोकमात्मविदितिसोऽहंभगवः शोचामितंमांभगवाञ्छोकस्यपारंपारंतारयत्वितस्मैमृदितकषा
यायतमसः परंपारंदर्शयतिभगवान्सनत्कुमारइतिचैवमाद्याः श्रुतयोमोक्षप्रतिबंधनिवृत्ति
मात्रमेवात्मज्ञानस्यफलंदर्शयंति ॥ ॥ ॥

त्वंपारंब्रह्मविद्यास्त्वेवनास्मान्तारयसिप्रापयसिज्ञानेनात्मानंना
नाप्रापयसीतिर्याबन्नप्रश्नव्याख्यामूलकाकांक्षोदयमाह श्रुतमिति अत्रतारयत्वित्यंतमुपक्रमस्यंश्लोकमुपसंहारस्यमितिभेदः
आत्मविच्छोकंतरतीतिभगवत्तुल्येभ्योमयाश्रुतमेवहिंवदृष्टं सोऽहमज्ञत्वाद्धेभगवः शोचामितंशोचंतंमांभगवानेवज्ञानप्लो
वेनशोकसागरस्यपारंपारंप्रापयत्विति नारदेनोक्तः सनत्कुमारस्तस्मैतपसादग्धकिल्बिषायनारदायतमसः शोकनिदानात्ज्ञा
नस्यज्ञानेननिवृत्तिरूपंपारंब्रह्मदर्शितवानित्यर्थः एतयोवेदमोविद्याग्रंथिंविकरतीतिवाक्यमादिशब्दार्थः ॥ ॥ ॥

35

३५

एवं श्रुतेस्तत्त्वप्रमा मुक्तिहेतुर्न केवलमित्युक्तं तन्न्यायादप्युक्तिसंमतमाह तथा चेति गौरोऽहमिति मिथ्याज्ञानस्यापाये रागद्वेषमोहादिदोषा
णां नाशः दोषापायाद्धर्माधर्मरूपप्रवृत्तेरपायः प्रवृत्त्यपायात्पुनर्देहप्राप्तिरूपजन्मापायः एवं पाठक्रमेणोत्तरोत्तरस्य हेतुनाशा
न्नाशे सति तस्य प्रवृत्तिरूपहेतोरनंतरस्य कार्यस्य जन्मनोऽपायाद्दुःखध्वंसरूपोऽपवर्गो भवतीत्यर्थः ननु पूर्वं त्वद्वैततत्त्वज्ञानान्निःश्रेयसा
धिगम उक्ते सतीतरपदार्थभिन्नात्मतत्त्वज्ञानं कथं मोक्षं साधयतीत्याकांक्षायां मिथ्याज्ञाननिवृत्तिद्वारेणावश्यमिदं प्रवृत्तं त

तथा चाचार्यप्रणीतं न्यायोपबृंहितं सूत्रं च दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतरापायादपवर्ग
इति मिथ्याज्ञानापायमेव मोक्षं दर्शयति मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति नचेदं ब्रह्मात्मैकत्वविज्ञा
नं संपद्रूपं यथानंतं वै मनोऽनंता विश्वेदेवा अनंतमेव स तेन लोकं जयतीति ॥ ॥ ॥

या च भिन्नात्मज्ञानान्मुक्तिं वदतस्त्वं संमतं चेत्परमतानुज्ञा स्यादित्यत आह मिथ्येति तत्त्वज्ञानान्मुक्तिविषयं प्रोक्तं संमतिरुक्ता भेदज्ञा
नं तु यत्र हि द्वैतमिव भवतीति श्रुत्या भ्रांतित्वात् मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति श्रुत्यानर्थहेतुत्वाच्च न मुक्तिहेतु
रिति भावः ननु ब्रह्मात्मैकत्वविज्ञानमपि भेदज्ञानवत्प्रमासंपदादिरूपत्वेन भ्रांतित्वादित्यत आह नचेदमित्यादिना श्रुत्यात
व न तिरस्कारेणोत्कृष्टवस्तुभेदज्ञानं संपत् यथा मनः स्ववृत्त्यानंत्यादनंतं तत उत्कृष्टा विश्वेदेवा अप्यनंता इत्यनंतत्वसाम्याद्धि

छा॰ भा॰
प्र॰ दी॰ प्र॰
३६

36

ष्येदेवाप एवमनश्रुतिसंपत् तयाऽनंतफलप्राप्तिर्भवति तयाचेतनत्वसाम्याज्जीवे ब्रह्माभेदं संपादितिनचेत्पर्यः आलंबनस्यप्रा
धान्येन ध्यानं प्रतीकोपासनिरध्यासः यथाब्रह्महदृष्ट्यामनस्यादित्यस्यवा तथादेवब्रह्मेति ज्ञानमध्यासो नेत्याह नचेति आदेश
उपदेशः क्रियाविशेषो विशिष्टक्रियातयायोगोनिमित्तं यस्य ध्यानस्य तथाय यथाप्रलयकाले वायुरग्न्यादीन्संहरणोति संहरती।

नचाध्यासरूपं यथा मनो ब्रह्मेत्युपासीतादित्यो ब्रह्मेत्यादेशश्रुतिषु मनआदित्यादि
ष्वब्रह्मदृष्ट्यध्यासो नापि विशिष्टक्रियायोगनिमित्तं वायुर्वाव संवर्गः प्राणो वा
व संवर्ग इति वर्गवत्तु ध्यानं ज्ञेयं वेदनादिवत्कर्मांगसंस्काररूपम् ॥ रामः ॥

ति संवर्गः स्वापकाले प्राणो वागादीन्संहरतीति संहारक्रियायोगात्संवर्ग इति ध्यानं छांदोग्ये विहितं तथा बृहद्क्रियायोगाज्जी
वो ब्रह्मेति ज्ञानमिति नेत्याह नापीति यथा पत्न्यवेक्षितमाज्यं भवतीति उपांशुयागांगस्याज्यस्य संस्कारकमेवावेक्षणं विहि
तं तथा कर्मणि कर्तृत्वेनांगस्यात्मनः संस्कारार्थं ब्रह्मज्ञानं नेत्याह नाध्यासेति

३६

प्रतिज्ञाचतुष्टयेहेतुमाह संपदादीति उपक्रमादिलिंगैर्ब्रह्मात्मैकत्वेवस्तुनिश्चमितिशेषः यः समानाधिकरणवाक्यानांपदनिष्ठः स-
समन्वयः तात्पर्यनिश्चितंतत्पीड्येत किंचैकत्वज्ञानादात्मानिकस्यहृदयस्यांतःकरणस्ययोगरागादिग्रंथिभिन्नस्यनस्तादात्म्यरूपाहं-
कारग्रंथिर्वानश्यतीत्यज्ञाननिवृत्तिफलवाक्यमर्थवादः स्यात्संपदादिज्ञानस्याप्रमात्वेनाज्ञाननिवर्तकत्वात्किंचजीवस्यब्रह्मत्वसं-

संपदादिरूपेहिब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमानेतत्त्वमस्यहंब्रह्मास्म्ययमात्माब्रह्मेत्येवमादीनांवाक्यानांब्रह्मात्मै-
कत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत भिद्यतेहृदयग्रंथिः छिद्यंतेसर्वसंशयाः इतिचैवमादीन्यविद्यानिवृ-
त्तिफलश्रवणान्युपरुध्येरन् ब्रह्मवेदब्रह्मैवभवतीतिचैवमादीनितद्भावापत्तिवचनानिसंपदादिपक्षेनसामंजस्ये-
नोपपद्येरंस्तस्मान्नसंपदादिरूपंब्रह्मात्मैकत्वविज्ञानमतोनपुरुषव्यापारतंत्रा ॥

पदाकथंतद्भावः सर्वरूपेस्थितेनष्टेवान्यस्यान्यात्मतायोगात्तस्मान्नसंपदादिरूपमित्यर्थः संपदादिरूपताभावे फलितमाह अ-
तइति प्रमात्वान्नकृतिसाध्याकिंतर्हिनित्यैवनप्रमाणसाध्येत्यर्थः उक्तरीत्यासिद्धब्रह्मरूपमोक्षस्यकार्यसाध्यत्वंतज्ज्ञानस्यानि-
योगविषयत्वंचकल्पयितुमशक्यंकृत्यसाध्यत्वादित्याह ॥

केना॰
प्रदीप॰
३०

37

एवंभूतस्येति ननु ब्रह्मकार्याणां कारकत्वात्तस्य वेदनाकर्मकारकान्यवदिति चेत्किं तेनेवब्रह्मणः कर्मकारकत्वमतोपासनायां ना
यइत्याह नेवेति श्रुमहत्तान्नेविदिक्रियमाहार्थः विदितं कार्यमविदितं कारणं तस्मादन्यदित्यर्थः येनात्मनाइदं सर्वं दृश्यं लोको
जानाति तं केन करणेन जानीयात् तस्माद्विषयत्वात्मेत्यर्थः नहितीयइत्याह नयेति यन्मनसा न मनुतइति क्रत्वा लोको म

ब्रह्मविद्यां किं तर्हि प्रत्यक्षादिप्रमाणाविषयवस्तुज्ञानवद्ब्रह्मतं नैवैवंभूतस्य च ब्रह्मणस्तज्ज्ञानस्य च नकयाचिद्युक्त्याश्रा
कः कार्यानुप्रवेशः कल्पयितुं नच विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः अन्यदेव तद्धि विदितादथो अविदिता
दपीति विदिक्रियाकर्मत्वप्रतिषेधाय येनेदं सर्वं विजानाति तं केन विजानीयादिति च तथोपास्तिक्रियाकर्मत्वप्रतिषे
धोपि भवति यद्वाचानभ्युदितं येन वागभ्युद्यत इति विषयत्वं ब्रह्मणउपन्यस्य तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इ
ति॥

नमायद्ब्रह्म न जानातीत्यविषयत्वमुक्त्वा न देवावेद्यं ब्रह्म त्वं विद्धि यत्तदुपाधिविशिष्टं देवतादिकमिदमित्युपासते जनाः नेदं ब्रह्मे
त्यर्थः ॥ ॥ श्रीरामायनमोनमः ॥ ॥ राम ॥ ॥ राम ॥ ॥ ॐ नमः शिवाय ॥ ॥ रामः

ब्रह्मणः शास्त्रबोध्याविषयत्वे प्रतिज्ञाहानिरिति शंकते अविषयत्व इति वेदांतजन्यवृत्तिकृताविद्यानिवृत्तिफलशालितया शास्त्रप्रमाण-
कत्वं वृत्तिविषयत्वेऽपि स्वप्रकाशब्रह्मणो वृत्त्यभिव्यक्तस्फुरणाविषयत्वादप्रमेयत्वमिति परिहरति नेति परमात्फलत्वादित्यर्थः निवृ-
त्तिरूपब्रह्मतात्पर्यादिति वार्थः उक्तं विवृणोति नहीति चिद्विषयत्वमिदंत्वमविषयतयानिदंतयादृश्यत्वेऽङ्गीकृतमाह तथाचेति
यस्य ब्रह्म अमतं चैतन्याविषय इति निश्चयस्तेन सम्यगवगतं यस्य त्वज्ञस्य ब्रह्म चैतन्यविषय इति मतं स न वेद उक्तमेव दार्ढ्यार्थमनुव-

अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेन्नाविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य न हि शास्त्रमिदंतया विषय-
भूतं ब्रह्म प्रतिपिपादयिषति किं तर्हि प्रत्यगात्मत्वेन विषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपना-
यति तथा च शास्त्रं यस्यामतं तस्य मतं मतं यस्य न वेद सः अविज्ञातं विजानतां न दृष्टेर्द्रष्टारं पश्येर्न विज्ञातेर्विज्ञातारं विजानी-
या इति चैवमादि अतोऽविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः ॥

दति अविज्ञातमिति अविषयतया ब्रह्म विजानतामविज्ञातमदृश्यमिति पक्षः अज्ञानां तु ब्रह्म विज्ञातं दृश्यमिति पक्ष इत्यर्थः दृ-
ष्टेर्द्रष्टारं चाक्षुषमनोवृत्तेः साक्षिणं अन्यथादृश्यत्वापातान्न पश्येः विज्ञातेर्बुद्धिवृत्तेः निश्चयरूपायाः साक्षिणं तया न विषयीकुर्या-
इत्याह नेति नन्वविद्यादिनिवर्तकत्वेन शास्त्रस्य प्रामाण्येऽपि निवृत्तेरागंतुकत्वात् ॥

मोक्षस्यानित्यत्वं स्यादिति अत इति तत्त्वज्ञानादित्यर्थः ध्वंसस्यानित्यत्वादात्मस्वरूपत्वाच्च नानित्यत्वप्रसंग इत्यर्थः उत्पत्तिविकाराप्तिसंस्कारभू
पंचविधमेव क्रियाफलं तद्भिन्नत्वान्मोक्षस्य नोपासनासाध्यत्वमित्याह यस्य त्वित्यादिना तस्माज्ज्ञानमेकं मुक्त्वेत्यत्र तेन न तथोत्पाद्यत्वा
वत् विकार्यत्वे चापेक्षेत इत्युक्तमित्यन्वयः दूषयति तयोरिति स्थितस्यावस्थांतरं विकारः नन्वनित्यत्वनिरासाय क्रियमाणस्थित

यस्मात्त्वाद्यो मोक्षस्तस्य मानसं वाचिकं कायिकं वा कार्यमपेक्षित इत्युक्तं तथा विकार्यत्वे च तयोः पक्षयोर्मोक्षस्य ध्रुवमनि
त्यत्वं न हि दध्यादि विकार्यमुत्पाद्यं वा घटादि नित्यं दृष्टं लोके न चाप्यत्वेनापि कार्यापेक्षा स्वात्मस्वरूपत्वे सत्यनाप्यत्वात् स्वरू
पव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वं सर्वगतत्वेन नित्याप्तस्वरूपत्वात् सर्वेण ब्रह्मण आकाशस्येव नापि संस्कार्यो मोक्षो येन व्या
पारमपेक्षेत संस्कारो नाम संस्कार्यस्य गुणाधानेन वा स्याद्दोषापनयेन वा न तावद्गुणाधानेन संभवत्यनाधेयातिशयब्रह्म
स्वरूपत्वान्मोक्षस्य नापि दोषापनयेन नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य ॥

स्यैव ब्रह्मणो ग्रामवदाप्तिरस्त्वित्यत आह नचेति ब्रह्मजीवाभिन्नं न वा उभयथाप्याप्तत्वान्न क्रियापेक्षेत्याह स्वात्मेत्यादिना यथा व्रीही
णां संस्कार्यत्वेन प्रोक्षणापेक्षा तथा मोक्षस्य वेत्याह नापीत्यादिना गुणाधानं व्रीहिषु प्रोक्षणादिना क्षालनादिना वस्त्रादौ मलापन
यः शंकते ॥

स्वात्मधर्मइति ब्रह्मात्मस्वरूपएवमोक्षोनाद्यविद्यामलावृतः उपासनयामलेनशेषमभिव्यज्यते इत्यत्रदृष्टांतः यथेति संस्कारोमल
नाशः किमात्मनिमलः सतः कल्पितोवाद्वितीयेत्वानादेवतन्नाशेनक्रियया स्याद्येक्रियाकिमात्मनिष्ठा अन्यनिष्ठावा नाद्यइ
त्याह नक्रियेति अनुपपत्तिंस्फुटयति यदिति क्रियाहिस्वाश्रयेसंयोगादिविकारमकुर्वतीनजायतइत्यर्थः तच्चवाऽवयवा

स्वात्मधर्मएवसंछिन्नोभूतोमोक्षः क्रिययात्मनिसंस्क्रियमाणेऽभिव्यज्यते यथादर्शेनिघर्षणक्रिययासंस्क्रिय
माणेभास्वरत्वंधर्मइतिचेन्नक्रियाश्रयत्वानुपपत्तेरात्मनोयदाश्रयाक्रियातमविकुर्वतीनैवात्मानंलभते यद्या
त्माक्रिययाविक्रियेतानित्यत्वमात्मनः प्रसज्येताविकार्योयमुच्यतइतिचैवमादीनिवाक्यानिबाध्येरंस्तच्चानिष्टं
तस्मान्नस्वाश्रयाक्रियात्मनः संभवति अन्याश्रयायास्तुक्रियायाअविषयत्वान्नतयात्मासंस्क्रियते ननुदेहा
श्रययास्नानाचमनयज्ञोपवीतादिकयाक्रिययादेहीसंस्क्रियमाणोदृष्टः ॥

यवं नद्वितीयइत्याह अन्येति अविषयत्वात्क्रियद्रव्यासंयोगित्वादितियावद्दर्पणंतुसावयवंक्रियाश्रयेष्टकाचूर्णादिद्र
व्यसंयोगित्वात्संस्क्रियतइतिभावः स्नानक्रिययान्योनसंस्क्रियतइत्यत्रव्यभिचारंशंकते ॥

ब्रभा॰
प्रदीप॰
३५

नलिति आत्मनोमूलाविद्याप्रतिबिंबितेनसहीतस्यनरोहमितिभ्रांत्यादेहतादात्म्यमापन्नस्यक्रियाश्रयत्वभ्रांत्यासंस्कार्यत्वभ्र
मात्रव्यभिचारइत्याह नेति कश्चिदिति अनिश्चितब्रह्मस्वरूपइत्यर्थः यत्रात्मनिविषयेआरोग्यबुद्धिरुत्पद्यतेतस्यदेहसं
हतस्यैवारोग्यफलमित्यर्थः ननुदेहाभिन्नस्यकथंसंस्कारः तस्यामुष्मिकफलभोक्तृत्वायोगादित्यतआह नेनेति देह

नदेहादिसंहतस्यैवाविद्यासहीतस्यात्मनः संस्क्रियमाणत्वात्स्नानादिस्नानाचमनादेर्देहसमवायित्वंतथादेहा
श्रययातत्संहतएवकश्चिदविद्ययात्मत्वेनपरिगृहीतः संस्क्रियतइत्युक्तंयथादेहाश्रयचिकित्सानिमित्ते
नधातुसाम्येनतत्संहतस्यतदभिमानिनआरोग्यफलमहमरोगइतियत्रबुद्धिरुत्पद्यतएवंस्नानाचमनय
ज्ञोपवीतादिनाहं शुद्धः संस्कृतइतियत्रबुद्धिरुत्पद्यतेसः संस्क्रियतेसचदेहेनसंहतएवतेनैवसंहंकर्त्राहं
प्रत्ययविषयेणप्रत्ययिनासर्वाःक्रियानिर्वर्त्यंतेतत्फलंचसएवाश्नाति ॥

संहतेनैवांतः करणप्रतिबिंबात्मनाकर्त्राहमितिभासमानेनप्रत्ययाः कामादयोमनसस्तादात्म्यादस्यसंतीतिप्रत्ययि
नाक्रियाफलंभुज्यतइत्यर्थः मनोविशिष्टस्यामुष्मिकभोक्तुः संस्कारोयुक्तइतिभावः ॥

विशिष्टस्य भोक्तृत्वं न केवलस्य साक्षिण इत्यत्र मानमाह तयोरिति प्रमातृसाक्षिणोर्मध्ये सत्वसंसर्गमात्रेण कल्पितकर्तृत्वा
दिमान्प्रमाता पिप्पलं कर्मफलं भुंक्ते स एव श्रेयितत्विनान्यः साक्षितया प्रकाशत इत्यर्थः आत्मादिहः देहादियुक्तं प्रमाणात्मा
नमित्यर्थः एवं सोपाधिकस्य चिद्धातोर्मिथ्यासंस्कार्यत्वमुक्त्वा निरुपाधिकस्यासंस्कार्यत्वे मानमाह एक इति सर्वभूतेषु
द्वितीय एको देवः स्वप्रकाशस्तथापि मायावृतत्वान्न प्रकाशत इत्याह गूढ इति ननु जीवेनासंबंधाद्भिन्नत्वाद्वा देवस्याभानं

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति मंत्रवर्णात् आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति च।
तथाप्येको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो
निर्गुणश्चेति स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धमिति चैतौ मंत्रावनापेयातिशयत्वं नि
त्यशुद्धतां च ब्रह्मणो दर्शयतः

नत्वमायया गूढत्वाद्भिन्नत्वेनेत्याह सर्वव्यापी सर्वभूतान्तरात्मेति देवस्य विभुत्वात्सर्वप्राणि
प्रत्यक्त्वाच्चावरणादेवाभानमित्यर्थः प्रत्यक्ते कर्तृत्वं स्यादिति चेन्न कर्माध्यक्षः क्रियासाक्षीत्यर्थः तर्हि साक्ष्यमस्तीति द्वैता
पत्तिः न सर्वभूतानामधिष्ठानभूतः साक्षी भवति साक्ष्यमधिष्ठाने साक्षिणि कल्पितमिति भावः साक्षिशब्दार्थमाह
चेता केवल इति बोद्धृत्वे सत्यकर्तृत्वं साक्षित्वमिति लोकप्रसिद्धं चकारो दोषाभावसमुच्चयार्थः ॥ ॥ ॥

निर्गुणत्वान्निर्दोषत्वाच्च गुणाधानदोषनाशो वा संस्कारो नेत्यर्थः। स इत्युपक्रमाच्छुक्रादिशब्दः पुंस्त्वेन वाच्यः। स आत्मा परि सर्वमगाद्व्याप्तः। शुक्रो दीप्तिमान् अकायो लिङ्गशून्यः अव्रणोऽक्षतः अस्नाविरः शिराविधुरः अनश्वर इति वा आभ्यां पदाभ्यां स्थूलदेहशून्यत्वमुक्तं शुद्धो रागादिमलशून्यः अपापविद्धः पुण्यपापाभ्यामसंस्पृष्ट इत्यर्थः। अत इति। उत्पत्त्याप्तिविकारसंस्कारेभ्यो

ब्रह्मभावश्च मोक्षस्तस्मान्न संस्कार्योऽपि मोक्षः। अतोऽन्यन्मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनचिद्दर्शयितुं तस्मा-
ज्ज्ञानमेकं मुक्त्वा क्रियाया गंधमात्रस्याप्यनुप्रवेश इह नोपपद्यते। ननु ज्ञानं नाम मानसी क्रिया। न वैलक्षण्या-
त्क्रिया हि नाम सा यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते पुरुषचित्तव्यापाराधीना च॥

न्यसंचसंक्रियायाफलंनाश्रिया।
न्मोक्षस्य क्रियासाध्यत्वे द्वारं भवेदित्यर्थः। ननु मोक्षस्यासाध्यत्वे शास्त्रारंभो वृथा। न ज्ञानार्थत्वादित्याह तस्मादिति। द्वाराभा-
वादित्यर्थः। व्याघातं शंकते नन्विति। तथा च मोक्षे क्रियानुप्रवेशो नास्तीति व्याहतमिति भावः। मानसमपि ज्ञानं न विधियो-
ग्यक्रियावस्तुतंत्रत्वात्। कृतसाध्यत्वाच्चेत्याह नेति वैलक्षण्यं प्रपंचयति क्रियाहीति। यत्र विषये तदनपेक्षैव या चोद्यते।

विषयवस्त्वनपेक्षाकृतिसाध्या च क्रियेत्यत्र दृष्टांतमाह यथेति गृहीतमध्वर्युणेति शेषः नवह्वरिष्यन्होतारं ध्यायेद्देवतामि
ति चैवमादिवाक्येषु यथा या दृशी ध्यानक्रिया वस्त्वनपेक्षा पुंतंत्रा च चोद्यते ता दृशी क्रियेत्यर्थः ध्यानमपि मानसत्वाज्ज्ञानवन्ना
क्रियेत्यत आह ध्यानमित्यादिना तथापि क्रियैवेति शेषः कृत्यसाध्यत्वमपाविहितिभावः ध्यानक्रियासुक्ता ततो वैला

यथा यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्निति संध्यां मनसा ध्यायेदिति चैवमादिषु ध्यानं चिं
तनं यद्यपि मानसं तथापि पुरुषेणाकर्तुमकर्तुमन्यथा वा कर्तुं शक्यं पुरुषतंत्रत्वात् ज्ञानं तु प्रमाणजन्यं प्रमा
णं च यथाभूतवस्तुविषयमतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यं केवलवस्तुतंत्रमेव तन्न चोदनातंत्रं ना
पि पुरुषतंत्रं तस्मान्मानसत्वेपि ज्ञानस्य महद्वैलक्षण्यं यथा च पुरुषो वाव गौतमाग्निर्योषा वाव गौतमाग्नि
रित्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति ॥

ज्ञापयंत्ज्ञानमस्फुरद्यति ज्ञानं चिति अतः प्रमाणत्वान्न चोदनातंत्रं न विधेर्विषयः पुरुषः कृतिद्वारा तंत्रं हेत्वर्थस्य तत्पुरु
षतंत्रं तस्माद्व्यवस्वव्यभिचारादपुंतंत्रत्वाच्च ध्यानाज्ज्ञानस्य महान् भेद इत्यर्थः भेदमेव दृष्टांतांतरेणाह यथा चेति अ
भेदासत्वेपि विधितो ध्यानं कर्तुं शक्यं न ज्ञानमित्यर्थः ननु प्रत्यक्षज्ञानस्य विषयजन्यतया ततंत्रत्वेपि पाहूवोपस्य तद्भा

वा० विधिप्रक्रियाविवेकः ॥

ब्रा·भा·
प्र·टी·प्र·
५१

एवंमेवेति प्रत्यक्षानुमानाद्यर्थेष्वपि ज्ञानमविधेयक्रियात्वेन ज्ञातव्यं तत्रापि मानादेव ज्ञानस्य प्राप्तेर्विध्ययोगादित्यर्थः तत्रैवं स
ति लोके ज्ञानस्याविधेयत्वे सतीत्यर्थः यथाभूतत्वमबाधितत्वं नन्वात्मानं पश्येद्ब्रह्म त्वं विद्धि आत्मा द्रष्टव्य इति ज्ञाने लि
ङ्लोट्तव्यप्रत्यया विधायकाः श्रूयन्ते ततो ज्ञानं विधेयमित्यत आह तद्विषय इति तस्मिञ्ज्ञानरूपविषये विषयः पु

केवलचोदनाजन्यत्वात् किं विधेयवत्पुरुषतन्त्रा च यागप्रसिद्धेर्यावग्निवृद्धिर्न सा चोदनातन्त्रा नापि पुरुषतन्त्रा
किं तर्हि प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेव तन्न क्रिया एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यं तत्रैवं सति नियो
याभूतब्रह्मात्मत्वविषयमपि ज्ञानं न चोदनातन्त्रं तद्विषये लिङादयः श्रूयमाणा अप्यनियो
ज्यविषयत्वात् कुण्ठीभवन्त्युपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिव
देहयानुपादेयवस्तुविषयत्वात् ॥

कथं प्रवर्तयितव्यमशक्या भवन्ति अनियोज्यं कृत्यसाध्यं नियोज्यमूर्त्यं वा ज्ञानं तद्विषयत्वादित्यर्थः ममायं नियोग इति बोद्धा
नियोज्यस्तदविषयस्य विधेर्नास्तीति भावः तर्हि किं तेषां ब्रह्म विधीयतां नेत्याह अहेयेति वस्तुस्वरूपे विषये सत्त्वाद्ब्रह्मणो निर
तिशयस्यासाध्यत्वान्न विधेयत्वमित्यर्थः उदासीनवस्तुविषयकत्वाच्च ज्ञानं न विधेयं प्रवृत्त्यादिफलाभावादित्यर्थः ॥

विधिपदानां गतिं पृच्छति किमर्थानीति विधिच्छायानि प्रसिद्धयागादिविधितुल्यानीत्यर्थः विधिप्रत्ययैः आत्मज्ञानं परमपुरु
षार्थसाधनमिति लक्ष्यते लक्षणाश्रात्यंतिके इष्टहेतुत्वभ्रोमाया विषयेषु प्रवृत्तिः आत्मश्रवणादिप्रतिबंधिका तन्निवृत्तिफला
नि विधिपदानीत्याह स्वाभाविकेति विहन्तीति यो हीत्यादिना तत्र विषयेषु संघातस्य या प्रवृत्तिस्तत्संकोचाच्छब्दादेरित्य।

किमर्थानि तर्ह्यात्मा वा अरे द्रष्टव्य इत्यादीनि विधिच्छायानि वचनानि स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्था
नीति ब्रूमः यो हि बहिर्मुखः प्रवर्तते पुरुषः इष्टं मे भूयादनिष्टं मा भूदिति न च तत्रात्यंतिकं पुरुषार्थं लभते तमा
त्यंतिकपुरुषार्थवांछिनं स्वाभाविककार्यकारणसंघातप्रवृत्तिगोचराद्विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्त
यंत्यात्मा वा अरे द्रष्टव्य इत्यादीनि तस्यात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चात्मतत्त्वमुपदिश्यते इदं सर्वं यद
यमात्मा यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्केन कं

र्थः स्रोतश्चित्तवृत्तिप्रवाहः प्रवर्तयंति ज्ञानसाधनश्रवणादा
विति शेषः श्रवणस्वरूपमाह तस्येति अन्वेषणं ज्ञानं यदिदं जगत्तत्सर्वमात्मैवेति नात्मबाधेनात्मा बोध्यते द्वितीयाऽप्र
पणात्मबोधे कं विधिस्तपस्वी हेतवेनोपजीवतः स्यादस्तीति भावः आत्मज्ञानिनः कर्तव्याभावमाह ॥

तयाचेति अयंस्वयंप्रभानंदः परमात्माहमस्मीति यदिकश्चित्पुरुषः आत्मानंजानीयात्तदा किंफलमिच्छन्कस्य वा भोक्तुः
प्रीतये प्रभोगं तप्यमानं अनुसंज्वरेत् तेष्यत भोक्तृभोग्ययोः हेत्वाभावात्कृतकृत्य आत्मविदित्यभिप्रायः ज्ञानवैलभ्यार्थश्चे

विजानीयाद्विज्ञातारमरे केन विजानीयादयमात्मा ब्रह्मेत्यादिभिर्यदप्यकर्तव्यप्रधानमात्मज्ञानं ह्यानायोपादाना
यवान्न भवतीति वक्तव्यैवेत्यभ्युपगम्यते लकारोऽयमस्माकं यद्यात्मावगतौ सत्यां सर्वकर्तव्यताहानिः कृतकृ
त्यतावेति तथा च श्रुतिः आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्व
रेत् एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारतेति स्मृतिः तस्मात्प्रतिपत्तिविधिविषयतया ब्रह्मसमर्पणं
यदपि केचिदाहुः प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण केवलवस्तुवादी वेदभागो नास्तीति ॥ ॥

च्छन्दः एवमुक्तरीत्या मतं तत्त्वं वृत्तिकारमतनिरासमुपसंहरति तस्मादिति प्राभाकरोक्तमुपन्यस्यति यदपि केचिदिति क
तीत्मालोकासिद्धत्वात् न वेदान्तार्थस्तदन्यत् ब्रह्म नास्त्येव वेदस्य कार्यपरत्वे नमानाभावादित्यर्थः ॥

मानाभावोसिद्धइत्याह नत्वेति स्वतात्मस्यफलस्वरूपस्यात्मनः उपनिषदेकवेद्यस्याकार्यशेषत्वात्कृत्स्नवेदस्यकार्यपरत्वमसि
द्धं नचप्रवृत्तिनिवृत्तिभ्यांलिंगाभ्यांश्रोतस्तद्धेतुकार्यबोधमनुमायवक्तृवाक्यस्यकार्यपरत्वंनिश्चित्यवाक्यस्यपदानांका
र्यान्वितेशक्तिग्रहात्प्रसिद्धस्यपदार्थस्यवाक्यार्थत्वमितिवाच्यं पुत्रस्तेजातइतिवाक्यश्रोतुःपितुर्हर्षलिंगेनेष्टपुत्रजन्मा
नुमायपुत्रादिपदानांसिद्धेसंगतिग्रहात्कार्यान्वितापेक्षयान्वितार्थेशक्तिरित्यंगीकारेलाघवात्सिद्धस्यापिवाक्यार्थो

तत्त्वौपनिषदस्यपुरुषस्यानन्यशेषत्वात् योसावुपनिषत्स्वेवाधिगतः पुरुषोसंसारीब्रह्मोत्पाद्यादिचतुर्विध
द्रव्यविलक्षणः स्वप्रकरणस्थोनन्यशेषोनासौनास्तिनाधिगम्यतइतिवाशक्यंवदितुंसएषनेतिनेत्यात्मेत्यात्मश
ब्दादात्मनश्चप्रत्याख्यातुमशक्यत्वात् नत्वात्माहंप्रत्ययत्वादुपनिषत्स्वेवविज्ञायतइत्यनुपपन्नं नतत्सा
क्षित्वेनप्रत्युक्तत्वान्नह्यहंप्रत्ययविषयकर्तृव्यतिरेकेणतत्साक्षीसर्वभूत ॥

त्वादित्यलं किंचब्रह्मणोनास्तित्वादेवकृत्स्नवेदस्यकार्यपरत्वंउक्तवेदांतेषुतस्याभानात् अथवाकार्यशेषत्वात्किंवा
लोकसिद्धत्वात् आद्येस्विन्मानांतरविरोधात् तत्रायंपदत्रयंनिराचष्टेयोसाविति अनन्यशेषार्थमसंसारीत्यादिविशे
षणं नास्तित्वाभावेहेतुंवेदांतमानसिद्धमुक्त्वाहेत्वंतरमात्मत्वमाह सएषइति इतिरिदमर्थेइदंनइदंनेतिसर्वदृश्य
निषेधेनयआत्माउपदिष्टःसएषइत्यर्थः चतुर्थंशंकते नत्वात्माहमिति ॥

प्र॰भा॰
प्रदीप॰
४३

43

आत्मनोऽहंकारादिसाक्षित्वेनाहंधीविषयत्वस्य निरस्तत्वाल्लोकसिद्धतेत्याह नेति यं तीर्थकराश्चापि न तत्त्वं तितस्यालौकि
कत्वं किमु वाच्यमित्याह नहीति समस्तावृतमवर्जितः ततस्तत आत्मानधिगतिद्योतकानि विशेषणानि पंचमं निरस्य
ति अत इति केनचिच्छब्दादिना प्रमाणेनेत्यर्थः अगम्यत्वान्मानांतरविरोधशंकाभावः सात्त्विकमार्गं चेत नत्वात्कर्तृवादि
तिवत्राह विपीति अज्ञातत्वाद्विशेषानुपयोग्यज्ञातस्याज्ञातकत्वान्न कर्मशेषत्वमित्यर्थः सात्त्विकः सर्वशेषित्वाद्देयात्व

स्यः समस्तः कूटस्थनित्यः पुरुषो विधिकांडे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मातः स न केनचित्प्र
त्याख्यातुं शक्यो विधिशेषत्वं वा नेतुं आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः सर्वं हि विनश्यद्विकारजा
तं पुरुषांतं विनश्यति पुरुषो न विनश्यति पुरुषो विनाशहेत्वभावादविनाशी विक्रियाहेत्वभावाच्च कूटस्थ
नित्यः अत एव नित्यशुद्धबुद्धमुक्तस्वभावस्तस्मात्पुरुषान्न परं किंचिदस्ति सा काष्ठा सा परा गतिः ॥ ॥

पायेत्वाच्च न कर्मशेषमित्याह आत्मत्वादिति अनित्यत्वेनात्मनो हेयत्वमाशंक्याह सर्वं हीति परिणामित्वेन हेतुत्वय
तां निराचष्टे विक्रियेति उपादेयत्वं निराचष्टे अत एवेति निर्विकारत्वादित्यर्थः उपादेयत्वं हि साध्यस्य न त्वात्मनः
नित्यसिद्धत्वादित्यर्थः परप्राप्त्यर्थमात्मा हेय इत्यत आह तस्मात्पुरुषान्न परमिति काष्ठा सर्वस्यावधिः ॥ ॥

एवमात्मनोनन्यशेषत्वादबाधितत्वादपूर्वत्वाद्वेदांतेषुस्फुटभानाच्चवेदांतैकवेद्यत्वमुक्तंतत्रभ्रान्तिमाह तंत्वेति तंस्वकारणसूत्र
स्याधिष्ठानंपुरुषंपूर्णंहिशाकल्यत्वात्वांपृच्छामीत्यर्थः अतइति उक्तलिंगैःश्रुत्याचवेदांतानामात्मवस्तुपरत्वनिश्चयादित्य
र्थः पूर्वोक्तमनुवदति यद्यपीति वेदस्यानैरर्थक्येशंकितेतस्यार्थवत्तायामिदंभाष्यं दृष्टोहीति तत्रफलवदर्थावबोध
नमितिवक्तव्येधर्मविचारप्रक्रमात्कर्मावबोधनमित्युक्तं नैतावतावेदांतानांब्रह्मत्वनिरासः अतएवानुपलब्धेर्थेतत्प्र
माणंसूत्रमितिसूत्रकोधर्मस्यफलवत्त्वात्तेनैववेदार्थतांदर्शयति तथाविशिष्टंब्रह्मणइतितद्वाक्येविरोध

तंत्वौपनिषदंपुरुषंपृच्छामीतिचोपनिषदत्वविशेषणंपुरुषस्योपनिषत्स्वेवप्राधान्येनप्रकाशमानत्वादुप
पद्यते अतोवस्तुपरोवेदभागोनास्तीतिवचनंसाहसमात्रंयदपिशास्त्रतात्पर्यविदामनुक्रमणंदृष्टोहितस्या
र्थः कर्मावबोधनमित्येवमादि तद्धर्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशास्त्राभिप्रायंद्रष्टव्यमपिवाम्नायस्य
क्रियार्थत्वादानर्थक्यमतदर्थानामिति

इत्याह तद्धर्मेति निषेधशास्त्रस्यापिनिवृत्तिकार्यपरत्वमस्तितत्सूत्रभाष्यवाक्यंकर्मकांडस्यकार्यपरत्वाभिप्रायमित्या
र्थः वस्तुतस्तुलिङर्थेकर्मकांडस्यतात्पर्येलिङर्थश्चलोकेप्रवर्तकज्ञानगोचरत्वेनलब्धःसंयागादिक्रियागतमिष्टसा
धनत्वमेवतत्क्रियातोतिरिक्तंकार्यंतस्यकूर्मलोमवदप्रसिद्धत्वादितितस्यापिपराभिमतकार्यत्वलक्षणेसिद्धेप्रामाण्यं
किमुतज्ञानकांडस्येतिमंतव्यं किंचवेदांताःसिद्धवस्तुपराःफलवद्भूतपाठत्वाद्रथ्यादिशब्दवदित्याह ॥

अपि चेति किमक्रियार्थकशब्दानामानर्थक्यमभिधेयाभावः फलाभावो वा आद्य आह आम्नायस्येति इति न्यायेनैतदभिधे
यराहित्यं नियमेनांगीकुर्वतां सोमेन यजेत दध्ना जुहोतीत्यादिवाक्येषु दधिसोमादिशब्दानामर्थशून्यत्वं स्यादित्यर्थः ननु
केनोक्तमभिधेयराहित्यमित्याशंक्याह प्रवृत्तीति कार्यातिरेकेणाभव्यार्थत्वेन कार्यशेषत्वेन दध्यादिशब्दो भूतं वक्ति
चेत्तर्हि सोमादिशब्दः कूटस्थं न वक्तीत्यत्र को हेतुः किं कूटस्थस्याक्रियत्वात् उताक्रियाशेषत्वाद्वेति प्रश्नः ननु दध्यादेः

तदेकान्तेनाभ्युपगच्छतां भूतोपदेशानर्थक्यप्रसंगः प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतं चेद्वस्तूपदिशति भव्यार्थ
त्वेन कूटस्थनित्यं भूतं नोपदिशतीति को हेतुः नहि भूतमुपदिश्यमानं क्रिया भवति अक्रियात्वेपि भूतस्य क्रि
यासाधनत्वात्क्रियार्थ एव भूतोपदेश इति चेन्नैष दोषः क्रियार्थत्वेपि क्रियानिर्वर्तनशक्तिमद्वस्तूपदिष्टमेव

कार्यान्वयित्वेन कार्यत्वादुपदेशः न कूटस्थस्याकार्यत्वादित्याद्यमाशंक्य निरस्यति नहीति दध्यादेः कार्यत्वेन कार्या
भेदे शेषत्वहानिः अतो भूतस्य कार्याद्भिन्नस्य शब्दार्थत्वं लब्धमिति भावः द्वितीयं शंकते अक्रियात्वेपीति क्रियार्थः कार्य
शेषपरः कूटस्थस्य कार्यशेषत्वान्नोपदेश इति भावः भूतस्य कार्यशेषत्वं शब्दार्थत्वाय फलाय वा नाद्य इत्याह नैष दोष
इति दध्यादेः कार्यशेषत्वेप्यपि शब्देन वस्तुमात्रमेवोपदिष्टं न कार्यान्वयी शब्दार्थः अन्वितार्थमात्रे शब्दानां शक्तिग्रह
णादित्यर्थः ॥

द्वितीयमंगीकरोति क्रियार्थत्वं चेति तस्य भूतविशेषस्य दध्यादेः क्रियाशेषत्वं फलमुद्दिश्यांगीक्रियत इत्यर्थः नूनं ब्रह्मणा इति तु
शङ्कार्थः ननु भूतस्य कार्यशेषत्वांगीकारे स्वतंत्रेण कथं शब्दार्थतेति तत्राह नचेति फलार्थशेषत्वांगीकारमात्रेण शब्दार्थत्वम
योग्यनास्तीत्यर्थः अनर्थकं फलाभाव इति परिशंकते यदीति यद्यपि दध्यादि स्वतो निष्फलमपि क्रियाद्वारा सफलत्वादुपदिष्टं
तथापि कूटस्थब्रह्मवादिनः क्रियाद्वाराभावेन न दृश्यते न किं फलं स्यादित्यर्थः भूतस्य साफल्ये क्रियैव द्वारमिति न नियमः

क्रियार्थत्वं तु प्रयोजनं तस्य नचैतावताऽवस्तु उपदिष्टं भवति यदि नामोपदिष्टं किं तव तेन स्यादिति उच्य-
ते अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्र-
योजनं क्रियत इत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन ॥ ॥ ॥ ॥ ॥

इज्यतावन्मात्रेण साफल्यादर्शनादित्याह उच्यत इति तथैव दध्यादिवदेवेत्यर्थः दध्यादेः क्रियाद्वारा साफल्यं ब्रह्मणस्तु स्व-
त इति विशेषे सत्यपि वेदान्तानां सफलभूतार्थकत्वमात्रेण दध्याद्युपदेशसाम्यमित्यनवद्यं इदानीं वेदान्तानां निषेधवाक्या-
वत्सिद्धार्थपरत्वमित्याह अपि चेति जनः प्रकृत्यर्थेन सम्बन्धाद्धननाभावो न तु अर्थः इष्टसाधनत्वं तथ्यादि प्रत्ययार्थः इष्टश्चात्र

नरकदुःखाभावस्तत्परिपालकोहननाभावइतिनिषेधवाक्यार्थोहननाभावोदुःखाभावेहेतुरित्येकावर्याद्धननस्यदुःखसा
धनत्वधियापुरुषोनिवर्तते नात्रनियोगःकश्चिदस्तितस्यक्रियातत्साधनद्रव्यादिविषयत्वात् नचहननाभावरूपानञ्
वाच्यानिवृत्तिःक्रियाभावत्वान्नापिक्रियासाधनमभावस्याभावार्थाऽहेतुत्वात्कार्यत्वाच्चेत्यर्थः अतोनिषेधशास्त्रस्यसिद्धा
र्थप्रामाण्यमितिभावः विपरीतंदंडमाह अक्रियेति ननुस्वभावतोरागतःप्राप्तेनहंतव्यर्थेनानुरागेणनञःसंबंधेनहननाद्धा

अपिचब्राह्मणोनहंतव्यइतिचैवमाद्यानिवृत्तिरुपदिश्यतेनचसाक्रियानापिक्रियासाधनमक्रियार्थानामुपदेशो
नर्थकस्त्वेब्राह्मणोनहंतव्यइत्यादिनिवृत्त्युपदेशानांसार्थक्यंप्राप्तंतच्चानिष्टं नचस्वभावप्राप्तहंतव्यर्थानुरागेण
नञःशक्यमप्राप्तक्रियार्थत्वंकल्पयितुंहननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण ॥

ननुविरोधिनीसंकल्पक्रियाबोध्यतेसाचनञर्थरूपातत्राप्राप्तत्वाद्विधीयते अहननंकुर्यादितितथाचकार्यार्थकमिदंवा
क्यमित्याशंक्यनिषेधयति नचेति औदासीन्यंपुरुषस्यस्वरूपंतच्चहननक्रियानिवृत्त्युपलक्षितंनिवृत्त्यौदासीन्यंहननाभा
वइतियावत् तद्व्यतिरेकेणनञःक्रियार्थकत्वंकल्पयितुंनचशक्यमितियोजना स्वाभाव्यार्थस्याभावस्यनञर्थत्वसंभवेन
हिंसादिक्रियालक्षणायाअन्याय्यत्वात् निषेधवाक्यस्यापिकार्यार्थकत्वेविधिनिषेधभेदविप्लवापत्तेश्चेतिभावः ॥

नन्वेतदभाववतदन्यतद्धिरुद्धयोरपिनञः शक्तिः किंनस्यात् अब्राह्मणः अधर्म इतिप्रयोगदर्शनादितिचेन्नानेकार्थत्वस्यान्याय्य
त्वादित्याह नञस्त्वेति गवादिशब्दानांत्वगत्यानानार्थकत्वंस्वर्गेषुवाग्वज्रादीनांशक्यपशुसंबंधाभावेनलक्षणानवता
रात् अन्यविरुद्धयोस्तुलक्षणत्वंयुक्तंशक्यसंबंधात्ब्राह्मणादन्यस्मिन्क्षत्रियादौधर्मविरुद्धेवापापेब्राह्मणाद्यभावस्यतन्त्रश
क्यसंबंधात् प्रकृतेचाख्यातायोगान्नञ्प्रसज्यप्रतिषेधकएवनपर्युदासलक्षकइतिमंतव्यं यद्वानञःप्रकृत्यानसं
बंधः प्रकृतेःप्रत्ययार्थोपसर्जनत्वात्प्रधानसंबंधश्चाप्रधानानांकिंतुप्रकृत्यर्थनिष्ठेनप्रत्ययार्थेनेष्टसाधनत्वेनसंबंधोनञः

नञर्थैषस्त्वभावोयत्स्वसंबंधिनोऽभावंबोधयति अभावबुद्धिश्चौदासी
न्यकारणंसाचदर्प्येधनाग्निवत्स्वयमेवोपशाम्यति ॥ ॥ ॥

इष्टंचस्यापेक्षयाबलवदनिष्टाननुसंबंधियत्तदेवन्ताकालिकस्वमात्रं विषसंपृक्तान्नभोगस्यापीष्टत्वापत्तेः तथाचनहं
तव्यः हननंबलवदनिष्टसाधनत्वेसतीष्टसाधनंनभवतीत्यर्थः अत्रचहंतव्यइतिहननेविशिष्टेष्टसाधनत्वभ्रांतिप्राप्तस्या
नूद्यनेत्यभावबोधनेबलवदनिष्टसाधनंहननमितिबुद्धिर्भवतिहननेतात्कालिकेष्टसाधनत्वरूपविशेष्यसत्वेनविशिष्ट
भावबुद्धेर्विशेषणाभावपर्यवसानाद्विशेषणंबलवदनिष्टसाधनत्वंवनञर्थइतिपर्यवसन्नंतद्बुद्धिरौदासीन्यपरिपालकेत्या
ह अभावेति चोप्यर्थः यत्नांतरयोतीप्रकृत्यर्थाभावबुद्धिवत्प्रत्ययार्थाभावबुद्धिरपीत्यर्थः ॥

बुद्धेः क्षणिकत्वात्तदभावे सत्यौदासीन्यात्मच्युतिः तु पादहननादौ प्रवृत्तिः स्यादिति तत्राह प्राचेति यथाग्निरिंधनं दग्ध्वा शाम्यति
एवं मानजन्याभावबुद्धिर्हननादिविष्टसाधनत्वभ्रान्तिमूलं रागेंधनं दग्ध्वैव शाम्यतीत्यन्वयार्थः रागनाशे कुतः प्रच्युतिरिति
भावः यद्वा रागतः प्राप्तस्य क्रियाया रागनाशे स्वयमेव शाम्यतीत्यर्थः एवं पदेन हननविरोधिक्रियाकार्यत्वोक्तेपि हननस्ये
ष्टसाधनत्वभ्रान्त्यनिरासात्प्रच्युतिर्दुर्वारा तस्मात्तदभावो नञर्थस्तु परं हरति तस्मादिति भावार्थाभावेन तद्विषयककृत्य
भावात्कार्याभावस्तच्छब्दार्थः यद्वेत्युक्तपदेन निवृत्त्युपलक्षितं सौदासीन्यं यस्माद्धि विशिष्टाभावात्मकमेवेति व्याख्येयं स्वतः

तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव ब्राह्मणो न हन्तव्य इत्या
दिषु प्रतिषेधार्थं मन्यामहे अन्यत्र प्रजापतिव्रतादिभ्यः ॥ ॥

सिद्धस्यौदासीन्यस्य नञर्थत्वासंभवोपपादनार्थं निवृत्त्युपलक्षितत्वमिति ध्येयं तस्य व्रतोद्यन्तमित्यनुष्ठेयक्रियावाचि व्रतशब्दे
न कार्यस्योपक्रमस्यानेक्षेतोद्यन्तमादित्यमिति प्रजापतिव्रतमुक्तं अत उपक्रमबलात्तत्र नञा ईक्षणविरोधिसंकल्पक्रियाल
क्षणांगीकृता एवमग्रेऽप्यर्थमित्यादौ नाम धात्वर्थयुक्तस्य नञः प्रतिषेधवाचित्वायोगात् अन्यविरुद्धलक्षकमेतो
भ्यः प्रजापतिव्रतादिभ्योऽन्यत्राभावमेव नञर्थं मन्यामहे इत्यर्थः इष्टाभावफलके नञर्थे सिद्धे निषेधशास्त्रमानत्वव
द्वेदान्तानां ब्रह्मणि मानत्वमिति भावः ॥

तर्हि क्रियार्थानामानर्थक्यमिति सूत्रं किंविषयमिति तत्राह तस्मादिति वेदांतानां स्वार्थे फलवत्त्वाद्यर्थकथाविषयं तदित्यर्थः यद
पीत्यादि स्पष्टार्थं श्रवणाज्ज्ञानमात्रात्संसारानिवृत्तावपि सात्त्वाकाराजीवत एव मुक्तिर्दृष्टपक्षे वेति स्पष्टं दृष्टांतमाह अत्रोच्यत इत्या
दिना ब्रह्माहमिति साक्षात्कारविरोधादित्यर्थः तत्त्वविदो जीवन्मुक्तौ मानमाह तदुक्तं श्रुतेति जीवतोऽशरीरत्वं विरुद्धमि

तस्मात्स्वरूपार्थानुपयोगपारम्पर्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यं यदप्युक्तं कर्तव्यविध्यनुप्रवेशमं
तरेण वस्तुमात्रमुच्यमानमनर्थकं स्यात्सप्तद्वीपा वसुमतीत्यादिवदिति तत्परिहृतं रज्जुरियं नायं सर्प इति वस्तुमात्रका
थनेऽपि प्रयोजनस्य दृष्टत्वान्ननु श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्त
मत्रोच्यते नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुं वेदप्रमाणजनितब्रह्मात्मभावविरोधा
त्नहि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति तस्यैव वेदप्रमाणजनितब्रह्मावगमे तदभिमाननिवृ
त्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुं ॥

निःशंकते शरीरइति आत्मनो देहसंबंधस्य भ्रांतिप्रयुक्तत्वात्तत्त्वधिया तन्नाशादूर्ध्वमशरीरत्वं जीवतो युक्तमित्याह नेत्यादिना।
असंगात्मस्वरूपत्वाच्छरीरत्वं भ्रांत्याहंतत्त्वधिया जीवतोऽप्यस्तीत्याह नित्यमिति देहात्मनोः संबंधः सत्य इति शंकते ना
त्हृतेति तत्राशरीरकार्यापेक्षेति भावः ॥

आत्मनः शरीरसंबंधे जाते धर्माधर्मोत्पत्तिस्तस्यां सत्यां संबंधः इत्यन्योन्याश्रयो ह्येकस्यासिद्धौ द्वितीयस्याप्यसिद्धिः स्यादि
ति परिहरति नेत्यादिना ननु तत्तद्देहजन्यधर्माधर्मकर्मणा पूर्वतद्देहसंबंध इति तत्त्वेऽस्यादन्योन्याश्रयः पूर्वदेहकर्मणा पूर्व
देहसंबंधोत्पत्तिः पूर्वदेहस्य तत्कर्मणा इति बीजांकुरवदनादित्वान्नायं दोष इत्यत आह अंधेति अप्रामाणिकीत्यर्थः

नहि धनिनो गृहस्थस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनविमुक्तस्य
धनित्वाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति न च कुंडलिनः कुंडलित्वाभिमाननिमित्तं सुखं दृष्टमि
ति तस्यैव कुंडलवियुक्तस्य कुंडलित्वाभिमानहीनस्य कुंडलित्वनिमित्तं सुखं भवति तदुक्तं श्रुत्या अशरीरं
वाव संतं न प्रियाप्रिये स्पृशत इति शरीरे पतिते शरीरत्वं स्यान्न जीवत इति चेन्न सशरीरत्वस्य मिथ्याज्ञाननि
मित्तत्वात् न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वान्यतः सशरीरत्वं शक्यं कल्पयितुं नित्यमश
रीरत्वमकर्मनिमित्तत्वादित्यवोचाम तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेन्न शरीरसंबंधस्यासिद्धत्वा
धर्माधर्मयोरात्मकृतत्वासिद्धेः शरीरसंबंधस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसंगादंधपरं

नहि बीजादंकुरस्तस्माद्बीजांतरं च यथा प्रत्यक्षेण गृह्यते न तथात्मनो देहसंबंधः पूर्वकर्मकृतः प्रत्यक्षो नाप्यस्ति का
श्चिदागमः प्रत्युतासंगो ह्ययमित्यादिश्रुतिः सर्वकर्तृत्वं वारयतीति भावः ॥ ॥

तत्रयुक्तिमाह क्रियेति कूटस्थस्यस्वकृत्ययोगान्नकर्त्तृत्वमित्यर्थः स्वतोनिष्क्रियस्यापिकारकसन्निधिनात्कर्त्तृत्वमितिशंकांदृष्टांते।
वैषम्येणनिरस्यति नेति राजादीनांस्वकृतभृत्यकार्येकर्त्तृत्वंयुक्तंनात्मनइत्यर्थः देहकर्मणोरविद्याभूमौवीजांकुरवदावर्त्तमा
नयोरात्मनासंवंधोभ्रांतिकृतएवेत्याह मिथ्येति ननुयजेतेतिविध्यनुपपत्त्यात्मनः कर्त्तृत्वमेष्टव्यमितितत्राह एतेनेति श्रो

क्रियासमवायाभावाच्चात्मनः कर्तृत्वानुपपत्तेः सन्निधानमात्रेणराजप्रभृतीनांदृष्टंकर्त्तृत्वमितिचेन्नधनदानाद्युपार्जित
भृत्यसंवंधित्वात्तेषांकर्त्तृत्वोपपत्तेर्नत्वात्मनोधनदानादिवत्स्वशरीरादिभिः स्वस्वामिसंवंधनिमित्तंकिंचिदुक्तंकल्पा
यितुंमिथ्याभिमानस्तुप्रत्यक्षः संबंधहेतुः एतेनयजमानत्वमात्मनोव्याख्यातम् अत्राहुर्देहादिव्यतिरिक्तस्यात्म
नस्त्वात्मीयेदेहादावभिमानोगौणोनमिथ्येति नप्रसिद्धवस्तुभेदस्यगौणत्वमुख्यत्वप्रसिद्धेर्यस्यहिप्रसिद्धोवस्तुभेदोयथा
केसरादिमानाकृतिविशेषोन्वयव्यतिरेकाभ्यांसिंहशब्दप्रत्ययभाङ्मुख्योन्यः प्रसिद्धः सिंहस्ततश्चान्यः पुरुषः प्रायिकैः
क्रौर्यशौर्यादिभिःसिंहगुणैः संपन्नः ॥

तिकृतेनदेहादिसंवंधेनयागादिकर्त्तृत्वमाब्रह्मबोधाद्व्याख्यातमित्यर्थः अत्राहुः
प्रभाकराइत्यर्थः भ्रांत्यभावादेहसंवंधादिकंसत्यमितिभावः भेदज्ञानाभावान्नगौणइत्याह नेति ॥ ॥ ॥ ॥

प्रसिद्धोज्ञातोवस्तुनोभेदोयेनतस्यगौणमुख्यज्ञानाभ्यांप्रसिद्धेरित्यर्थः यस्यतस्यपुंसोगौणौभवतउत्पन्नयःश्रोत्रा
दिजन्यज्ञानविषयावित्यर्थः तस्यत्विति भेदज्ञानशून्यस्यपुंसइत्यर्थः शब्दप्रत्ययाविति शब्दः शब्दबोधश्चेत्यर्थः संशया

सिद्धस्तुस्यपुरुषेसिंहशब्दप्रत्ययौगौणौभवतोनाप्रसिद्धवस्तुभेदस्यतस्यत्वन्यत्रान्यशब्दप्रत्ययौभ्रांतिनिमित्तावे
वभवतोनगौणौयथामंदांधकारेस्थाणावयमित्यगृह्यमाणेविशेषेपुरुषशब्दप्रत्ययौस्थाणुविषयौयथावा
सूक्तिकायामकस्माद्रजतमिदमितिनिश्चितौ शब्दप्रत्ययौतद्वद्देहादिसंघातेहमितिनिरुपचारेणशब्दप्रत्य
यावात्मानात्माविवेकिनउत्पद्यमानौकथंगौणौशक्यौवदितुंआत्मानात्मविवेकिनामपिपंडितानामंगना
विपालानामिवाविविक्तौशब्दप्रत्ययौभवतः तस्माद्देहादिव्यतिरिक्तात्मास्तित्ववादिनांदेहादावहंप्रत्य
यामिथ्यैवनगौणस्तस्मान्मिथ्याप्रत्ययनिमित्तत्वात्सशरीरत्वस्य सिद्धंजीवतोपिविदुषोशरीरत्वम् ॥

मूलोक्तौतावुदाहरति यथामंदेति यदासंशयमूलयोर्नगौणत्वंतदाभ्रांतिमूलयोः किंवाच्यमित्याह यथावेति अका
स्मादिति अतर्कितात्सदृशादिनासंस्कारोद्बोधेसतीत्यर्थः निरुपचारेणगौणत्वानंविनेत्यर्थः व्यतिरिक्तास्तित्ववा
दिनामितिदेहात्मवादिनांतुप्रमैवेत्यभिमानइतिभावः ॥

जीवन्मुक्तोप्रमाणमाह तथाचेति ततत्रजीवन्मुक्तस्यदेहेयथादृष्टांतः अहिनिर्ल्वयनीसर्पत्वक्वल्मीकादौप्रत्यस्तानिक्षिप्तामृ
तासर्पेणात्मत्वाभिमाना वर्ततएवमेवेदंविदुषात्मत्वाभिमानंशरीरंतिष्ठति अथतथात्ववानिर्मुक्तसर्पवदेवायंदेहस्थोऽशरीरः
विदुषोदेहेसर्पस्येवत्वचीवाभिमानाभावादशरीरत्वादमृतः प्राणतीतिप्राणोजीवन्नपिब्रह्मैवतिरानंदएवेत्यर्थः वक्ष्यतेचव्ह

किंतद्ब्रह्मतेजः स्वयंज्यो १

तथाचब्रह्मविद्विषयाश्रुतिस्तद्यथाहिनिर्ल्वयनीवल्मीकेमृताप्रत्यस्ताशयीतैवमेवेदंशरीरंशेतेथायमशरीरोमृ
तःप्राणोब्रह्मैवतेजएवेतिसचक्षुरचक्षुरिवसकर्णोकर्णइवसवागवागिवसमनाअमनाइवसप्राणोप्राणइवेति
चस्मृतिरपिस्थितप्रज्ञस्यकाभाषेत्याद्यास्थितप्रज्ञलक्षणान्याचक्षाणाविदुषःसर्वप्रवृत्त्यसंबंधंदर्शयति तस्मात्त्वा
वगतब्रह्मात्मभावस्ययथापूर्वंसंसारित्वंयस्यतुयथापूर्वंसंसंसारित्वंनासावगतब्रह्मात्मभाइत्यनवद्यंयत्पुना-
ति रुक्तंश्रवणात्पराचीनयोर्मनननिदिध्यासनयोर्दर्शनाद्विधिशेषत्वंब्रह्मणोनस्वरूपपर्यवसायित्वमितिनावगतपर्यंता

दपिवाधितचक्षुरायतुवृत्त्यासचक्षुरिवेत्यादियोज्यमिति अनवद्यमिति ब्रह्मज्ञानात् मुक्तिलाभात्सिद्धंवेदांतानांप्रामाण्यं
हितशासनाच्छास्त्रंचनिर्दोषतयास्थितमित्यर्थः ब्रह्मज्ञानमुद्दिश्यश्रवणवत्मनननिदिध्यासनयोरप्यवांतरवाक्यभेदेन
विध्यंगीकारात्त्रब्रह्मणोविधिशेषत्वमुद्देश्यज्ञानलभ्यतयाप्राधान्यादित्याह नेति ॥

श्रीभा·
प्रदीप्र·
४९

श्रवणं ज्ञानकरणं वेदांतगोचरत्वात्तथानं मननिदिध्यासनयोः प्रमेयगोचरत्वात्तदंगत्वं नियमः दृष्टस्य ज्ञानोपयोगः सर्वा
पेक्षामायायादितिमंतव्यं तर्हि ज्ञाने विधिः किमितित्यक्तस्तत्राह यदिहीति यदि ज्ञाने विधिमंगीकृत्य वेदांतैरवगतं ब्रह्म वि
विधेयज्ञाने कर्मकारकत्वेन विनियुज्येत तदा विधिशेषत्वं स्यान्नत्ववगतस्य विनियुक्तत्वमस्ति प्रमाणावगत्याफललाभे विध्य

मननिदिध्यासनयोः यदि स्ववगतं ब्रह्मान्यत्र विनियुज्येत भवेत तदा विधिशेषत्वं न तत्तदस्ति मननिदिध्या।
सनयोरपि श्रवणावदवगत्यर्थत्वात्तस्मान्न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवती-
त्यतः स्वतंत्रमेव ब्रह्मशास्त्रप्रमाणकं वेदांतवाक्यसमन्वयादिति सिद्धमेवं च सत्यथातो ब्रह्मजिज्ञासेति।
शास्त्रारंभउपपद्यते प्रतिपत्तिविधिपरत्वे ह्यथातो धर्मजिज्ञासेत्येवारब्धत्वान्न पृथक् शास्त्रमारभ्येत आरभ्यमा
णं चैवमारभ्येत ॥

योगादित्यर्थः तस्माद्विध्यसंभवादतः शेषत्वासंभवात् सूत्रं योजयति स्वतंत्रमिति एवं च सतीति योवधारणउक्त
रीत्या ब्रह्मस्वातंत्र्ये सत्येव भगवतो बादरायणस्य पृथक् शास्त्रकृतिर्युक्ता धर्मविलक्षणप्रमेयलाभाद्वेदांतानां कार्यपरत्वे तत्प्रमे-
याभेदान्न युक्तेत्यर्थः नन्वनुमानस्य धर्मविचारार्थं पृथगारंभस्तत्राशंक्याह आरभ्यमाणं चेति ॥

अथवास्माथनधर्मविचारानंतरमतोवास्यधर्मस्यशुद्धिद्वाराज्ञानसोपानत्वाद्धर्महेतुत्वात्परिशिष्टोस्मन्मनसोधर्मोजिज्ञास्यइतिसूत्रं
स्यादित्यत्रदृष्टांतमाह अथेति तृतीयाध्यायेक्रत्वादिभिःशेषशेषित्वनिर्णयानंतरंशेषिणःशेषस्यप्रयोगसंभवात्कःक्रतुशे
षःकोवापुरुषशेषइतिजिज्ञास्यतइत्यर्थः एवमस्मिन्नेतनतावद्भुक्तस्मादात्मधर्मोर्थमात्मंभइत्ययुक्तमितिमाधःस्वमते
सूत्रानुसरणमस्तीत्याह ब्रह्मेति जैमिनिनाब्रह्मनविचारितमिति तज्जिज्ञास्यत्वसूत्रणंयुक्तमित्यर्थः वेदांतार्थस्येद

अथातःपरिशिष्टधर्मजिज्ञासेत्यथातःक्रत्वर्थपुरुषार्थयोर्जिज्ञासेतिवद्ब्रह्मात्मैकत्वावगतिस्त्वप्रतिज्ञातेतितदर्थो
युक्तःशास्त्रारंभोथातोब्रह्मजिज्ञासेति तस्मादहंब्रह्मास्मीत्येतदवसानाएवसर्वेविधयःसर्वाणिचेतराणिप्रमा
द्ब्रह्मेतिवेदचेत् अस्तिब्रह्मेतिचेद्वेदसंतमेनंततोविदुरितिअस्मिन्श्लोकेनत्वानंदमयंब्रह्मणएव
भावाभावेवेदनयोर्गुणदोषाभिधानाच्चमप्यतेब्रह्मपुच्छंप्रति

त्यत्रैवब्रह्मशब्दस्यावयवलक्षकत्वादित्याह नैषदोषइति पुच्छमित्याधारत्वमात्रमुक्तंप्रतिष्ठेत्येकनीडत्वंपकं
मुख्यंनीडंअधिष्ठानंसोपादानमनुगतइत्यर्थः ननुइतिकारेदर्पितेतित्तिरीयकवाक्यंब्रह्मणिसमन्वितमिष्टं तत्रकि-
मुदाहरणमेतेनत्यागंकाह अपिचेति यत्रसविशेषत्वंनत्वाङ्मनोगोचरत्वमिति वोमरत्रव्यापकाभावोत्वानिर्वि

शेषमुच्यतइत्याह निर्विशेषमिति ॥

निवर्तंतेअप्राप्यमनसासहेत्यर्थः सविशेषस्यसर्वेषामवादमयंचाप्युक्तं अतोनिर्विशेषत्वान्नार्थस्यपुच्छवाक्यमेवोदाहरणमितिभावः
प्राचुर्यार्थकमयटासविशेषितोनिर्विशेषस्फूर्तिबाधउक्तः दोषांतरमाह अपिचेति प्रत्ययार्थत्वेनप्रधानस्यप्राचु-

प्रा०भा०
७२

र्यस्यब्रह्मणएवस्यप्रधानत्वमिति नचानंदमयस्यात्मनोभावाभावशंकायुक्ता प्रियमोदादिविशेषस्य स-
र्वलोकप्रसिद्धत्वात्कथंपुनः स्वप्रधानेसद्ब्रह्मानंदमयस्यपुच्छत्वेन निर्दिष्टंतेब्रह्मपुच्छंप्रतिष्ठेत्येषदोषः पु-
च्छवत्पुच्छंप्रतिष्ठापरायणमेकंनीडं लौकिकस्यानंदजातस्यब्रह्मानंदइत्येतदनेनविवक्ष्यतेनावयवत्वमेत-
स्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीतिश्रुत्यंतरादपिचानंदमयस्यब्रह्मत्वेपिप्रियाद्यवयवत्वेनसवि-
शेषंब्रह्माभ्युपगंतव्यंनिर्विशेषंतद्ब्रह्मवाक्यशेषेश्रूयतेवाङ्मनसयोरगोचरत्वाभिधानाद्यतोवाचोनिवर्तं-
तेअप्राप्यमनसासह आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चनेति अपिचानंदप्रचुरइत्युक्तेदुःखाल्पत्वम-
पिगम्यते प्राचुर्यस्यलोकेप्रतियोग्यल्पापेक्षत्वात् ॥

र्यस्यप्रकृत्यर्थोविशेषणंविशेष्यस्तस्यच प्रतियोगेविरोधीनस्याल्पत्वमेवापेक्ष्यते यथाविप्रमयोग्रामइतिशूद्राल्पत्वं

७२

अस्तुकोदोषस्तत्राह तथाचेति प्रकृत्यर्थप्राधान्येनत्वयंदोषोनास्ति प्रचुरप्रकाशः सवितेत्यत्रतमसोऽल्पस्याप्यभावात्तर्हि।
त्वानंदमयपदस्यप्रचुरानंदेलक्षणादोषः स्यादितिमंतव्यं किंचभिन्नत्वात्तदवलक्षणब्रह्मतेत्याह प्रतिशरीरमिति न

तथाचश्रुतिः यत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमेतिभूम्निब्रह्मणिनश्रुतिविकाभावश्चा
तिरूपरूपत्वेनप्रतिशरीरंचप्रियादिभेदादानंदमयस्यापिभिन्नत्वंब्रह्मणस्तुनप्रतिशरीरंभिद्यतेसत्यंज्ञानमनंतं
ब्रह्मेत्यनंतत्वश्रुतेरेकोदेवः सर्वभूतेषुगूढः सर्वव्यापीसर्वभूतांतरात्मेतिश्रुतेस्तत्रान्नचानंदमयाभ्यासः श्रू
यतेप्रातिपदिकार्थमात्रमेवाहिसर्वत्राभ्यस्यंतेयदेषआकाशआनंदोनस्यात्सैषानंदस्यमीमांसाभवत्यानंदंब्रह्म
णोविद्वान्नबिभेतिकुतश्चनानंदोब्रह्मेतिव्यजानादितिच यदिचानंदमयशब्दस्यब्रह्मविषयत्वंनिश्चितंभवेत्त
तउत्तरेष्वानंदमात्रप्रयोगेष्वप्यानंदमयाभ्यासः कल्प्येतनत्वानंदमयस्यब्रह्मत्वमस्तिप्रियशिरस्त्वादिभिर्हे
तुभिरित्युक्तंवाचामतस्मात्कुत्रचिन्तेविज्ञानमानंदंब्रह्मेत्यानंदप्रतिपादकस्यब्रह्मणिप्रयोगदर्शनात् यदेषआ
काशआनंदोनस्यादित्यादिब्रह्मविषयःप्रयोगोनत्वानंदमयोभ्यासइत्यवगंतव्यं यस्त्वयंमयडंतस्यैवानंद

त्वमयस्यमानानानंदयदर्ंलक्षणयानंदमयपरिमित्यभ्यासस्सिद्धिरित्यतआह यदिचेति आनंदमयस्यब्रह्मत्वेनिर्णीतेसत्या
नंदपदस्यतत्परत्वज्ञानादभ्यासस्सिद्धिस्तन्निर्णयोतनिर्णयश्चतिपरस्पराश्रयइतिभावः अयमभ्यासः पुच्छब्रह्मणोरत्याह

तस्मादिति उपसंक्रमणं बोध्यः ननु सयएवंविदिति ब्रह्मविदं प्रक्रम्योपसंक्रमणवाक्येन फलं निर्दिश्यते न तस्माद्ब्रह्मत्वेन
सिध्यतीति शंकते नन्विति उपसंक्रमणं प्राप्तिरित्यंगीकृत्य विशिष्टप्राप्त्युक्त्या विशेषणप्राप्तिफलमुक्तमित्याह नैष

संक्रामतीति न तस्य ब्रह्मविषयत्वमस्ति विकारात्मनामेवान्नमयादीनामनात्मनामुपसंक्रमयितव्यानां श्रवा
हेयहितत्वात् ननु आनंदमयस्योपसंक्रमयितव्यत्वादन्नमयादिवदब्रह्मत्वे सति नेवंविद्वेषो ब्रह्मप्राप्तिः फलं नि
र्दिष्टं भवेत् नैष दोषः आनंदमयोपसंक्रमणनिर्देशेनैव पुच्छप्रतिष्ठाभूतब्रह्मप्राप्तेः फलस्य निर्दिष्टत्वात् त
दप्येषः श्लोको भवति यतो वाचो निवर्तन्ते इत्यादिना प्रपंच्यमानत्वात् तथा आनंदमयसंनिधाने सोकामयत बहु
स्यां प्रजायेयेति यं प्रकृतिरुदात्त तामाब्रह्मपुच्छं प्रतिष्ठेत्यनेन संनिहितत्वेण ब्रह्मणा संवक्ष्यमानानंदमयस्या
ब्रह्मत्वं प्रतिबोधयति ॥

इति ज्ञानेन काशानां वा यस्मादिति सिद्धांते वा यावधिप्रत्यगानंदलाभो यः इति कउत्तरश्लोकेन स्फुटीकृत इत्याह तदयी

तदपेक्षत्वादिति कामयितृपुच्छब्रह्मविषयत्वादित्यर्थः यदुक्तं पंचमस्थानस्थत्वमानंदमये ब्रह्मवल्लीसमाम्नानभृगु-
वल्लीवदिति तत्राह यतिति पाक्षिकत्यर्थः मयट्प्रकृत्या सावयवत्वादिलिंगेन च स्थानं बाध्यमिति भावः गोचरमिति।

तदपेक्षत्वाच्चेत्तत्परग्रंथस्य रसो वै स इत्यादेर्नानंदमयविषयत्वात् तु सोकामयतेति ब्रह्मणः पुल्लिंगनिर्दे-
शो नोपपद्यते नायं दोषस्तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यत्र पुल्लिंगेनात्मशब्देन ब्रह्मणः प्र-
कृतत्वात् भार्गवी वारुणी विद्यानंदो ब्रह्मेति व्यजानादिति तस्यां मयडश्रवणात् प्रियशिरस्त्वाद्यश्रवणा-
च्च पुच्छमानंदमयं ब्रह्म तत्तस्मादण्डमात्रमपि विशेषमनाश्रित्य न स्वत एव प्रियशिरस्त्वादि ब्रह्मण उपप-
द्येत न चेदमविशेषं ब्रह्म प्रतिपिपादयिषितं वाङ्मनसगोचरातिक्रमश्रुतेः तस्मादन्नमयादिष्विवानं-
दमयेपि विकारार्थ एव मयड्विज्ञेयो न प्राचुर्यार्थः सूत्राणि त्वेवं व्याख्येयानि ब्रह्मपुच्छं प्रतिष्ठेत्यत्र किमा-
नंदमयस्यावयवत्वेन ब्रह्म विवक्ष्यत उत स्वप्रधानत्वेनेति पुच्छशब्दादवयवत्वेनेति प्राप्त उच्यते ॥

क्रमेणोक्तादिति युक्त्याप्रायपाठेन निश्चायक इत्युक्तं तदयुक्तं पुच्छपदस्याधारावयवयोर्लक्षणसामान्यसंभवेऽपि अ-
वयवप्रायपाठेन निश्चायक इति पूर्वाधिकरणसिद्धांतयुक्त्याभावेन पूर्वपक्षयति पुच्छशब्दादिति तथा च प्रस्तुतादवा।

वशत्वाभावः
पूर्वपक्षित
तैः स्प
याभा
१

पूर्वपदेसगुणोपास्तिः सिद्धांतेनिर्गुणप्रमितिः फलंवेदांतवाक्यसमन्वयोक्तेः अन्नादिसंगतयः स्फुटाएवमग्रे आनंदम
यपदेनतद्वाक्यस्थंब्रह्मपदंलक्ष्यते विक्रियतेऽनेनेतिविकारोऽवयवः प्रायापत्तिरिति अवयवकमसत्त्वबुद्धेःप्राप्तिरित्यर्थः

सू॰भा॰
प्रदीप॰
७४

५५

आनंदमयोऽभ्यासात् आनंदमयआत्मेत्यत्रब्रह्मपुच्छंप्रतिष्ठेतिस्वप्रधानमेवब्रह्मोपदिश्यते अभ्यासात् अस
न्नेवसभवतीत्यस्मिन्निगमनश्लोकेब्रह्मणएवकेवलस्याभ्यस्यमानत्वात् विकारशब्दान्नेतिचेन्नप्राचुर्यात्
विकारशब्देनावयवशब्दोऽभिप्रेतः पुच्छमित्यवयवशब्दात्स्वप्रधानत्वंब्रह्मणइतियदुक्तंतस्यपरिहारोऽ
वक्तव्यः अत्रोच्यतेनायंदोषः प्राचुर्यादप्यवयवशब्दोपपत्तेः प्राचुर्यंप्रायापत्तिरवयवप्रायेवचनमित्यर्थो
न्नमयादीनांहिशिरआदिषुपुच्छांतेष्ववयवेषूक्तेष्वानंदमयस्यापिशिरआदीन्यवयवांतराण्युक्त्वावयवप्रा
यापत्त्याब्रह्मपुच्छंप्रतिष्ठेत्याहनावयवत्वविवक्षयायत्कारणमभ्यासादितिस्वप्रधानत्वंब्रह्मणः समर्थितं॥

अत्रहिप्रकृतस्यब्रह्मणोज्ञानार्थंकोशाः प्रविष्टत्वेनकल्प्यंतेनात्रतात्पर्यमस्तितत्रानंदमयस्याप्यवयवांतरोक्त्वा तं
तदंकस्मिंश्चित्पुच्छेवक्तव्येप्रकृतंब्रह्मपुच्छपदेनोक्तंतस्यानंदमयावयवत्वेनावयवरूपंवक्तव्यत्वात्यर्थः ॥

७५

तद्धेतुव्यपदेशाच्च तस्य ब्रह्मणः सर्वकार्यहेतुत्वस्य व्यपदेशात् प्रियादिविशिष्टत्वात् कोशाणामानंदमयस्य जीवस्य कार्यत्वा-
त् प्रतिशेषत्वं ब्रह्मणो न युक्तमित्यर्थः मांत्रवर्णिकमेव च गीयते ब्रह्मविदाप्नोति परमिति यत्सत्यज्ञानानंत्यमित्युक्तायत्सं-
तत्तानमिति मंत्रोक्तं ब्रह्म तदेवैव पुच्छवाक्ये गीयते ब्रह्मपदसंयोगात् आनंदमयवाक्ये इत्यर्थः नेतरोनुपपत्तेः इतरः
आनंदमयो जीवोत्र न प्रतिपाद्यः सर्वस्रष्टृत्वाद्यनुपपत्तेरित्यर्थः भेदव्यपदेशाच्च अयमानंदमयो ब्रह्मरसं लब्ध्वानं-

तद्धेतुव्यपदेशाच्च सर्वस्य च विकारजातस्यानंदमयस्य कारणत्वेन ब्रह्मपदिश्यते इदं सर्वमसृजत यदि-
दं किंचेति न च कारणस्य ब्रह्मणो विकारस्यानंदमयस्य मुख्यया वृत्त्यावयवत्वमुपपद्यते पराण्यपि सूत्राणि या-
न्यस्मिन् पुच्छवाक्यानि निष्ठस्यैव ब्रह्मण उपपादकानि द्रष्टव्यानि अंतस्तद्धर्मोपदेशात् २१ इदमाम्नायते
अथ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णस्तस्य
यथा कप्यासं पुंडरीकमेवमक्षिणी

दी भवतीभेदोक्तेश्च तस्याप्रतिपाद्यतेत्यर्थः आनंदमयो ब्रह्मैव तैत्तिरीयकपंचमस्थानस्थत्वादानंदवद्विषयाशंकामाह का-
माच्च नानुमानापेक्षा कामयत इति कामस्य आनंदः तस्य भृगुवल्ल्यां पंचमस्य ब्रह्मत्वदृष्टेरानंदमयस्यापि ब्रह्मत्वानुमा-
नापेक्षा न कार्या विकारार्थकमयट् हि रोयादित्यर्थः भेदव्यपदेशश्चान्नमयादीनां ब्रह्मात्र वेद्यं स्यादित्याशंकामाह अस्मिन्नस्य
च तद्योगं शास्ति अस्मिन्नानंदमये निर्दिष्टत्वेन प्रतीचिमपकरमुपसंक्रते पुच्छवाक्ये के ब्रह्मण एव हमेव परं ब्रह्मेति प्रबोधयत आनं-

छा॰ भा॰
७५

वंशानामित्यतो निर्गुणाद्ब्रह्मैकत्वज्ञानार्थजीवभेदानुवाद इत्यभिप्रेत्याह आप्रणखादपीति अंतस्तद्धर्मोपदेशात् छांदोग्यभा-
ष्यमुदाहरति अथ य इति अथेत्यस्यासित्प्रारंभार्थः हिरण्मयो ज्योतिर्विकारः पुरुषः पूर्णोपि मूर्तिमानुपासकैर्दृश्यते
मूर्तिमाह हिरण्येति प्रणखेनखाग्रं तेन सहेत्यभिविधावाङ् नेत्रयोर्विशेषमाह तस्येति कपेर्मर्कटस्यासः पृष्ठभागो

णीतस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्यपि देवतमध्यात्म
मथ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यत इत्यादि तत्र संशयः किं विद्याकर्मातिशयवशात्प्राप्तोत्कर्षः कश्चित्संसारी
सूर्यमंडले चक्षुषि चोपास्यत्वेन श्रूयते किं वा नित्यसिद्धः परमेश्वर इति किं तावत्प्राप्तं ॥

त्यंततेजस्वीतन्नालं पुंडरीकं यथा दीप्तिमदेवं तस्य पुरुषस्याक्षिणी सद्यो विकसितरक्तांभोजनयने इत्यर्थः उपासनार्थ
मादित्यमंडलस्थानं रूपं चोक्त्वा नाम करोति तस्येति उदिति नाम निर्वक्ति स इति उदित उद्गतः सर्वपाप्मास्पृष्ट इत्यर्थः
उपासनार्थं नाम ज्ञानफलमाह उदेतीति देवतास्थानमादित्यमधिकृत्योपास्यत्वं नेत्रमात्मानं देहमधिकृत्या
पि तदुक्तिरित्याह अथेति

पूर्वत्र ब्रह्मपदमानंदमयपदमानंदपदाभ्यासश्चेति सूत्रयित्वा तयादिवद्वप्रमाणवशान्निर्णीतानिर्णीयवद्रूपत्वादिवद्वप्रमाणवशाज्जी।
वोहिरण्मय इति पूर्वसिद्धांतदर्शनसंगत्या पूर्वसूत्रसंगतः सिद्धनिर्णीतस्यमन्वयस्यापवादार्थं पूर्वपक्षयति संसारीति अत्रह्या
वीतरपतयोर्जीवब्रह्मणोरुपास्तिः फलमविशिष्टत्वात् अस्यश्रवणाच्च संसारीति संबंधः श्रुतिमाह स एष इति आदित्यस्थः पुरु

संसारीति श्रुतेः रूपवत्त्वश्रवणादादित्यपुरुषेतावद्धिरण्यश्मश्रुरित्यादिरूपमुदाहृतमक्षिपुरुषेपितद्देवातिदिश्यते।
तस्यैतस्य तदेव रूपं यदमुष्य रूपमिति नचपरमेश्वरस्य रूपवत्त्वं युक्तम् अशब्दमस्पर्शमरूपमव्ययमि
तिश्रुतेः आयामश्रवणाच्च यएषोंतरादित्ये यएषोंतरक्षिणीति नचानाधारस्य स्वमहिमप्रतिष्ठस्य सर्वव्यापिनः परमे
श्वरस्याधारउपदिश्यते समभगवः कस्मिन्प्रतिष्ठितः इति स्वेमहिम्नीति आकाशवत्सर्वगतश्च नित्यः इति च श्रुतिभ्यः
ऐश्वर्यमर्यादाश्रुतेश्च सएषयेचामुष्मात्पराञ्चोलोकास्तेषां चेष्टे देवकामानां चेत्यादित्यपुरुषस्यैश्वर्यमर्यादा सए
षयेचैतस्मादर्वाञ्चोलोका ॥

षः अमुष्मादादित्यादूर्ध्वगा येकेचनलोकास्तेषामीश्वरो देवभोगानां चेत्यर्थः सए
षोक्षिस्थः पुरुषः एतस्मादक्ष्णोधस्तनायेलोकाः येचमनुष्यकामाभोगास्तेषामीश्वर इति मर्यादा श्रूयते अतः श्रुतेश्च
संसारीत्यर्थः एषसर्वेश्वर इत्यविशेषश्रुतेरिति संबंधः भूताधिपतिः यमः भूतपालः इत्यादिश्चैषएव ॥ ॥ ॥

भूताधिपतिः यमः भूतपाल ईश्वरादिश्चैष एव किंच जलानामसंकराय लोके विधारको यथा सेतुरेवमेषां लोकानां वर्णाश्र
मादीनां मर्यादाहेतुत्वात्सेतुरेष एवात्मा सर्वस्येत्यर्थः सूत्रं व्याचष्टे य एष इति यद्येकस्मिन्नात्मे प्रथममक्षरं तात्

सू.भा.
१८

76

तेषां चेष्टमनुष्यकामानां चेत्यादिश्रुतेरुषस्तन च परमेश्वरस्य मर्यादावेदैश्वर्ययुक्तमेष सर्वेश्वर एष भूताधिपति
रेष भूतपाल एष सेतुर्विधारण एषां लोकानामसंभेदायेत्यविशेषश्रुतेस्तस्मात्तत्रात्मादित्ययोरंतः परमेश्वर इते
वं प्राप्ते ब्रूमः अंतस्तद्धर्मोपदेशादिति य एषोंतरादित्य एषोंतरक्षिणीति च श्रूयमाणः पुरुषः परमेश्वर एव न
संसारी कुतस्तद्धर्मोपदेशात्तस्य हि परमेश्वरस्य धर्मा इहोपदिष्टास्तथा तस्योदिति नामेति श्रावयित्वास्यादित्यपुरु
षस्य नाम स एष सर्वेभ्यः पाप्मभ्य उदित इति श्रुतिः सर्वपाप्मापगमेन निर्वक्ति तदेव च कृतनिर्वचनं नामादित्यपुरुष
स्याप्यतिदिशति यन्नाम तन्नामेति

स एष गायत्रमंनेयं तथाप्यत्र प्रथमं स्फुतं रूपवत्तं निष्फलं ध्यानार्थमीश्वरेणेतं एकं च सर्वपाप्मासंगितं सर्वात्मैकत्वमफ
लं जीवेनेतमश्नात्कं चेति प्रबलं न च नन्दवे देवान्यायं गच्छतीति श्रुतेरादित्यजीवस्यापि पाप्मास्पर्शित्वमिति वाच्यं ॥

७५

क्षतेऽधुनाकर्मानधिकारिणांदेवानांक्रियमाणपापासंबंधेतत्फलस्पर्शोवातात्पर्यातेषांसंचितपापाभावेक्षीणेपुण्येमर्त्यी-
लोकंविशंतीत्ययोगादित्यभिप्रेत्याह सर्वपाप्मापगमस्त्वपरमात्मनएवेति सर्वात्मत्वमाह तथेति अत्रतच्छब्देस्याद्वा-
षपुरुषउच्यते ऋगाद्युपेतयालिंगव्यत्ययः उक्थंशस्त्रविशेषः तत्साहचर्यात्सामस्तोत्रं उक्थादन्यच्छस्त्रमत्रोच्यते

सर्वपाप्मापगमस्त्वपरमात्मनएवसूर्यस्थात्मापहतपाप्मेत्यादौ तथाचात्रैषैसैवर्क्तत्सामतदुक्थंतद्यजुस्त-
द्ब्रह्मेत्यृक्सामाद्यात्मतांनिर्दिशतिसाचपरमेश्वरस्योपपद्यतेसर्वकारणत्वात्सर्वात्मत्वोपपत्तेः पृथिव्यग्न्याद्यात्म-
केचाधिदैवतमृक्सामैवाक्षण्याद्यात्मिकेचाध्यात्ममनुक्रम्याह तस्यर्क्सामचगेष्णावित्यधिदैवतंतथाध्यात्म-
मपियावमुष्यगेष्णौतौगेष्णाविति तच्चसर्वात्मत्वेसत्येवोपपद्यते तद्यइमेवीणायांगायंत्येतंतेवतेगायंति
तस्मात्तेधनसनयइतिचलौकिकेष्वपिगानेष्वस्यैवगीयमानत्वंदर्शयति ॥

यजुर्वेदोयजुः ब्रह्मत्रयोवेदाइत्यर्थः पृथिव्यग्न्याद्यात्मकेऽपि अधिदैवतमृक्पृथिव्यंतरिक्षद्युनक्षत्रादिगतशुक्लभा-
रूपापंचविधाऋगुक्ता सामचअग्निवाय्वादित्यचंद्रादित्यगतातिकृष्णरूपमुक्तंपंचविधे अध्यात्मंतुवाक्चक्षुःश्रो-
त्रादिस्थशुक्लभारूपाचतुर्विधासामचप्राणाच्छायात्ममनादि ॥

गताविनीलत्वरूपं चतुर्विधमुक्तं एवं क्रमेणात्मनोऽनुक्रम्याह अहमित्यात्मेति यो सर्वात्मक आत्मा आत्मकोऽणेस्तावदनुप्रा-
दित्यस्यसतो वैवादिस्वमगैयोपवर्णीत्यर्थः तत्त्वेति आत्मसम्बन्धित्वमित्यर्थः सर्वगतत्वेन ज्ञेयत्वं लिङ्गान्तरमाह यद्यदि-
ति तत्र त्रैलोक्ये धनस्यास्य निर्लोभो येषां तेषु धनमन्वयो विभूतिमत्तमित्यर्थः ननु लोके राजानो नागीयन्ते नेश्वरस्यापत्यमाह

नन्वेवं परमेश्वरापरिग्रहे चेद्वदति यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवमिति
भगवद्गीतादर्शनाल्लोकस्य मे शितृत्वमपि निरंकुशं श्रूयमाणं परमेश्वरं गमयति यत्तूक्तं हिरण्यश्मश्रुत्वा-
दिरूपश्रवणात् परमेश्वरेऽनोपपद्यत इत्यत्र ब्रूमः स्यात्परमेश्वरस्यापीच्छावशान्मायामयं रूपं साधकानुग्रहार्थं
माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद सर्वभूतगुणैर्युक्तं नैवं त्वं द्रष्टुमर्हसीति स्मरणात् अपि च यत्र निरस्तस-
र्वविशेषं पारमेश्वरं रूपमुपदिश्यते भवति तत्र शास्त्रमशब्दमस्पर्शमरूपमव्ययमित्यादि ॥

यद्यदिति पशुवित्तादिविभूतिः श्रीः कान्तिः ऊर्जितत्वं बलं तद्युक्तं सत्त्वं राजादिकं मदंश एवेति तज्ज्ञानमीश्वरस्यैवेत्यर्थः
निरंकुशमनन्याधीनं एषा विचित्ररूपा मूर्तिर्मायाविकृतित्वान्मायामया सृष्टेत्यर्थः यदुक्तमशब्दमित्यादिवाक्यं तत्
तज्ज्ञेयपरमित्याह अपि चेति

तर्हिद्रूपं कुतस्तत्राह सर्वेति यत्रद्रूपासत्वेनोच्यते तत्रेत्यध्याहृत्य सर्वकारणत्वमत्रापि रूपवत्त्वं सर्वकर्मेत्यादिश्रुत्या निर्दिश्यत इति।
योजना मर्यादावदैश्वर्यमीश्वरस्येत्युक्तं निराकरोति ऐश्वर्येति अध्यात्माधिदैवतध्यानयोर्विभागः पृथक्त्वयोगः तदपेक्षमेवन
त्वैश्वर्यस्य परिच्छेदार्थमित्यर्थः नन्दूपासोद्देशेन उपास्तिविधिर्विधेयक्रियाकर्मणो व्रीह्यादिवदन्यतः सिद्धिर्वाच्येत्याशंक्याह भेदे

सर्वकारणत्वात् विकारधर्मैरपि कैश्चिद्विशिष्टः परमेश्वर उपास्यत्वेन निर्दिश्यते सर्वकर्मा सर्वकामः सर्वगंधः सर्वरस
इत्यादिना तथा हिरण्यश्मश्रुत्वादिनिर्देशोपि भविष्यति यदप्याधारश्रवणात्परमेश्वरस्योच्यते स्वमहिम्नि प्रतिष्ठस्या
प्याधारविशेषोपदेश उपासनार्थो भविष्यति सर्वगतत्वाद्ब्रह्मणो व्योमवत्सर्वान्तरत्वोपपत्तेः ऐश्वर्यमर्यादाश्रवा।
णमप्यध्यात्माधिदैवतविभागापेक्षमुपासनार्थमेव तस्मात्परमेश्वर एवादित्ययोरन्तरुपदिश्यते भेदव्यपदे।
शाच्चान्यः २१ अस्ति चादित्यादिशरीराभिमानिभ्यो जीवेभ्योन्य ईश्वरोन्तर्यामी य आदित्ये तिष्ठन्नादित्यादन्तरो यमादि
त्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इति श्रुत्यन्तरे भेदव्यपदेशात् तत्राप्या

ति आदित्यजीवादीश्वरस्य भेदोक्तेः श्रुत्यन्तरे जीवादन्य ईश्वरः सिद्ध इति सूत्रार्थमाह अस्तीति आदित्ये स्थितस्तदभिमानिनिरासार्थमा
दित्यादन्तर इति जीवं निरस्यति यमिति अशरीरस्य कथं नियन्तृत्वं तत्राह यस्येति अन्तर्यामिपदार्थमाह य इति तस्यानात्म।
त्वनिरासायाह एष इति चेतनवस्तुरूपमित्यर्थः आदित्यान्तरत्वश्रुतेः समानत्वादित्यर्थः तस्मात्पर एवादित्यादिस्थाक उद्गीथ

शा.भा.
७८
प्रदीप.

उपास्यमितिसिद्धं भवतु तद्रूपवत्त्वादिर्ब्रह्मलिंगानां मायोपास्यशिष्टत्वाद्व्यभिचारिब्रह्मलिंगैरन्यथायनमिहत्वाकाशपदश्रुतिः
लिंगाद्बलीयसीतिप्रत्युदाहरणेन प्रासंगिकमाह आकाशस्तल्लिंगादिति छांदोग्यवाक्यमुदाहरति इदमिति शालावत्यो
ब्राह्मणोजैवलिंराजानंपृच्छति अस्यपृथिवीलोकस्याप्यन्यस्यचकस्याधारइतिराजाहते आकाशइतिहेति यदेषस्मा

दित्योनवेदेतिवेदितुरादित्याद्विज्ञानात्मनोन्योंतर्यामीस्पष्टंनिर्दिश्यते सएवायंतरादित्येपुरुषोभवितुमर्हतीति
श्रुतिसामान्यात्तस्मात्परमेश्वरएवेहोपदिश्यतेइतिसिद्धं आकाशस्तल्लिंगात् २२ इदमामनंत्यस्यलोकस्यका
गतिरित्याकाशइतिहोवाचसर्वाणिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंते आकाशंप्रत्यस्तंयंत्याकाशो
ह्येवैभ्योज्यायानाकाशः परायणमितितत्रसंशयः किमाकाशशब्देनपरंब्रह्माभिधीयतउतभूताकाशमितिकु
तःसंशयः उभयत्रप्रयोगदर्शनाद्भूतविशेषेतावत्प्रसिद्धोलोकवेदयोराकाशशब्दः ब्रह्मण्यपिक्वचित्प्रयु
ज्यमानोदृश्यते यत्रवाक्यशेषवशादसाधारणगुणश्रवणाद्वानिर्धारितंब्रह्मभवतियथा ॥

काशादुत्पत्त्यानंदत्वस्यासाधारणस्यश्रवणादाकाशोब्रह्मैवयथावितमाकाशोवैनामेत्यत्रतद्ब्रह्मेतिवाक्यशेषादितिविभागः
निर्वहिताउत्पत्तिस्थितिहेतु तेनामरूपेयदंतरायस्माद्भिन्नेयत्रकल्पितत्वेनमध्येस्तइतिवार्थः अत्रपूर्वपक्षेभूताका
शमनोदृष्टिर्ध्येयास्ति सिद्धांतेब्रह्मात्मनेतिफलंउपास्ये स्पष्टब्रह्मलिंगवाक्यसमन्वयोक्तेरायादंश्रुत्यादिसंगतयः स्पष्ट

७८

तेजः प्रभृतिषु वाय्वादेरपि कारणत्वादेव कारणश्रुतिर्वा यः सर्वश्रुतेस्त्वाकाशातिरिक्तविषयत्वेन संकोचः स्यादित्याह सर्वंद
र्शितमिति ब्रह्मणस्तु सर्वात्मकत्वात् तस्मादेव सर्वमिति श्रुतिर्युक्तेति भावः तथा सर्वलयाधारत्वे निरतिशयमहत्वं स्थितावपिप
रमाश्रयत्वनिमित्तैतानि स्पष्टानि ब्रह्मलिंगानीत्याह तथाकाशमित्यादिना एतैर्थैर्न स्यादतः एतानिति पाठे वेंपुरित्यर्थः लिं

यदेष आकाश आनंदो न स्यादिति आकाशो वै नामरूपयोर्निर्वहिता ते यदंतरा तद्ब्रह्मेति चैवमादावतः संशयः किं
पुनरत्र युक्तं भूताकाशमिति ऊतस्तु हि प्रसिद्धतरेण प्रयोगेण शीघ्रं बुद्धिमारोहति नचायमाकाशशब्द उभयोः साधा
रणः शब्दो विज्ञातमनेकार्थत्वप्रसंगात् तस्माद्ब्रह्मणि गौण आकाशशब्दो भवितुमर्हतीति विभुत्वादिभिर्हि बहुभिर्धर्मैः
सदृशमाकाशेन ब्रह्म भवति न च मुख्यसंभवे गौणार्थग्रहणमर्हति संभवति चेह मुख्यस्यैवाकाशस्य ग्रहणं
ननु भूताकाशपरिग्रहे वाक्यशेषो नोपपद्यते सर्वाणि ह वा इमानि भूतान्याकाश(संभूत आकाशाद्वायुर्वायोः)
देव समुत्पद्यंते इत्यादि नैष दोषो भूताकाशस्यापि वाय्वादिक्रमेण कारणत्वोपपत्तेः विज्ञायते हि यस्माद्वा एतस्मादा
त्मन आकाशः संभूत आकाशाद्वायुर्वायोरग्निरित्यादि ज्यायस्त्वपरायणत्वे अपि भूताकाशस्यापेक्षयोपपद्येते भूता
काशस्यापि तस्मादाकाशशब्देन भूताकाशस्य ग्रहणमित्येवं प्राप्ते ब्रूमः आकाशस्तल्लिंगात् आकाशशब्देने

गांतरमाह अपि चेति दाल्भ्यशालावत्यौ ब्राह्मणौ राजा चेति त्रय उद्गीथविद्याकुशला विचारयामासुः किमुद्गीथस्य परा
यणमिति तत्र स्वर्गादागताभिर्ऋग्भिर्जीवितेन प्राणेन ॥ ॥ ॥ ॥ ॥ ॥

क्रियमाणोद्गीथस्य स्वर्गपरायणतामिति दाल्भ्यपक्षमप्रतिष्ठादोषेण शालावत्यो निंदित्वा स्वर्गस्यापि कर्मफलाश्रयहेतुत्वं

छा॰भा॰
७५

79

ब्रह्मणश्चेदं लिंगं सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते इति यस्माद्धि ब्रह्मणो भूतानामुत्पत्तिरि
ति वेदांतेषु मर्यादा न तु भूताकाशस्यापि वाय्वादिक्रमेण कारणत्वं दर्शितं समुत्पद्यं दर्शितं तत्तथापि मूलकारण
स्य ब्रह्मणोऽपरिग्रहादाकाशादेवेत्यवधारणं सर्वाणीति च भूतविशेषाणां नानुकूलत्वात् तथाकाशं प्रत्य
स्तं यंतीति ब्रह्मलिंगम् आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणमिति ज्यायस्त्वपरायणत्वे ज्यायस्त्वं सर्वापेति
केषु सर्वात्मत्वेनैवैकस्मिन्नात्मनि तं ज्यायान् पृथिव्या ज्यायानंतरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्य इति तथा प
रायणत्वमपि परमकारणात्मत्वेनैवोपपन्नतमं श्रुतिश्च भवति विज्ञानमानंदं ब्रह्म रातेर्दातुः प
रायणमिति अपि चांतवत्त्वदोषेण शालावत्यस्य पक्षं निंदित्वानंतं किंचिद्वक्तुकामेन जैवलिना आकाशः परि
गृहीतः ॥

७५

लोकः प्रतिष्ठेत्युवाच तं शालावत्यस्य पक्षमंतवद्वै ते किल शालावत्य साम मेति राजा निंदित्वाऽनंतमेवाकाशं वक्ति भूता
काशो ह्यंतवत्त्वदोषनाद्वस्य्यादिनर्थः ॥

नन्वाकाशोऽनंतइतिनश्रुतमित्याशंक्याह तंचेति उद्गीथमाकाशएवेतिसंपादनादुद्गीथस्यानंतत्वादिकंनस्वतइतिभावः सउ-
द्गीथावयवः ओंकारएषआकाशात्मकः परः रसतमत्वादिगुणोत्कृष्टः अतोवरात्परेभ्योवरीयान्श्रेष्ठइत्यर्थः परइति अय
यंप्रकारांतरेणपरः कृत्स्नमितिप्रयोगात्परस्मात्सोवरेभ्योऽतिशयेनवरः परोवरीयानित्यर्थः प्राथम्याच्छ्रुतिवाच्याकाशशब्दोऽव
लीयानित्युक्तंस्मारयति यस्मादिति एवकारसर्वशब्दानुगृहीतानंत्यादिबहुलिंगानामनुग्रहाययत्नेदेकंज्ञलस्यार्थश-

तंचाकाशमुद्गीथेसंपाद्योपास्ते इतिसएषपरोवरीयानुद्गीथः सएषोऽनंतइतितच्चानंत्यंब्रह्मलिंगंयत्तुनकल्पंभूता-
काशंप्रसिद्धित्वेनप्रथमतःप्रतीयतेइत्यत्रब्रूमः प्रथमतःप्रतीतमपि सर्वाकाशेष्वगतान्ब्रह्मगुणान्दृष्ट्वान
परिगृह्यतेदर्शितश्चब्रह्मण्याकाशशब्दः आकाशोवैनामनामरूपयोर्निर्वहितेत्यादौतथाकाशपर्यायवाचि
नामपिब्रह्मणिप्रयोगोदृश्यते ऋचोअक्षरेपरमेव्योमन्यस्मिन्देवा ॥

तिन्यायेनैकस्याःश्रुतेर्वाध्योयुक्तइत्याह अत्रब्रूमइति आकाशपदाद्भूताकाशस्यैवप्रथमप्रतीतिरितिनियमोनास्तीत्यपिशब्देना-
योजितंतत्रयुक्तिमाह दर्शितश्चेति आकाशपदाज्ञोणार्थस्यब्रह्मणोऽपिप्रथमप्रतीतिरस्तितस्यतत्पर्यायाणांचब्रह्म-
णिप्रयोगप्राचुर्यादितिभावः अतोऽस्फुटस्थेव्योमन्व्योम्नि

ऋचोवेदाःमंत्रिप्रमाणत्वेनयस्मिन्नवेदेविशेषेदेवाश्चप्रतिष्ठिताइत्यर्थः ओंकारःकंखंब्रह्मव्यापकमस्तुपासीतस्मात्तं
तत्प्रयोगमाह खंपुराणमिति व्यापनादिब्रह्मेत्यर्थः कंब्रह्मखंब्रह्मेतिछांदोग्ये ओंखंब्रह्मखंपुराणमितिबृहदार-
ण्यकमितिभेदः।किंचतत्रैवप्रथमाध्यायमोक्षेणातत्नेनेयंयत्रतत्रैतत्रशाकल्यत्रतशाकल्यतत्रोतमानुमोक्षेणप्रथमंतेनेयमित्याह

यिविश्वेनिषेद्धुः सैषाभार्गवीवरुणीविद्यापरमेव्योमन्प्रतिष्ठिताओंकंब्रह्मखंपुराणमितिचैवमादौवाक्यो-
पक्रमेऽपिवर्त्तमानस्याकाशशब्दस्यवाक्यशेषवशात्फलकाब्रह्मविषयत्वावधारणमग्निरथीतेतुवाक्यो-
मितिहिवाक्योपक्रमगतोप्यग्निशब्दोमाणवकविषयोदृश्यते तस्मादाकाशशब्दोब्रह्मेतिप्रसिद्धंअतए-
वप्राणः २३ उद्गीथेप्रस्तोतर्यादेवताप्रस्तावमन्वायत्तेत्युपक्रम्यश्रूयतेकतमासादेवतेति ॥

वाक्येति तस्मादुपास्येब्रह्मणिवाक्यंसमन्वितमित्युपसंहरति तस्मादिति आकाशवाक्योक्तन्यायंतदुत्तरवाक्येतिदि-
शति अतएवप्राणः उद्गीथप्रकरणमितिज्ञापनार्थमुद्गीथइतिभाष्यपदंउद्गीथप्रकरणेश्रूयतेइत्यन्वयः ॥

कश्चिदृषिश्चाक्रायणः प्रस्तोतारमुवाच हे प्रस्तोतर्या देवता प्रस्तावं साम्नभक्तिमनुगता ध्यानार्थं तां चेद्दत्वा वा मम विदुषो
निकटे प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति ततो भीतः सन् स प्रच्छ तां कतमा सा देवतेत्युत्तरं प्राण इति प्राणमभिलक्ष्य सम
स्तानि भूतानि संविशंति निलीयंते तमभिलक्ष्य उज्जिहत उत्पद्यंत इत्यर्थः अतिदेशात्पूर्ववत्संशयादि द्रष्टव्यमित्युक्तं विवृणोति प्र

अ १ पा १ ॥

प्राण इति होवाच सर्वाणि ह वा इमानि प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायते
ति तत्र संशयनिर्णयौ पूर्ववदेव द्रष्टव्यौ प्राणबंधनं हि सोम्य मनः प्राणस्य प्राणमिति चैवमादौ ब्रह्मविषयः
प्राणशब्दो दृश्यते वायुविकारे तु प्रसिद्धतरो लोकवेदयोरतः इह प्राणशब्देन कतरस्योपादानं युक्तमिति भव
ति संशयः किं पुनरत्र युक्तं वायुविकारस्य पंचवृत्तेः प्राणस्योपादानं युक्तं तत्र हि प्रसिद्धतरः प्राणशब्द इत्य
वोचाम ननु पूर्ववदिहापि तल्लिंगाद्ब्रह्मणः परिग्रहणं युक्तमिहापि वाक्यशेषे भूतानां संवेशनोद्गमने पारमे

ब्रह्मसूत्रवृत्तिः

ब्रह्मसूत्रवृत्तिः ॥

णोति मन उपाधिको जीवः प्राणेन ब्रह्मणा बध्यते सुषुप्तावेकीभवति प्राणस्य वायोः प्राणं प्रेरकं तस्य सत्तास्फूर्तिप्रदमा
त्मानं ये विदुस्ते ब्रह्मविद इत्यर्थः पूर्वेणागतार्थत्वात्पृथक्सूत्रं व्यर्थमिति शंकते ननु पूर्ववदिति अधिकशंकानिरासा
र्थमतिदेशसूत्रमिति मत्वा परिशंकामाह न सुप्तेऽपीति नहि तदा चक्षुराद्यपीति सर्वत्र संबंधः नन्वत्रेंद्रियाणां प्राणे लयोदयौ
क्तौ

यादिप्रतिपादकवाक्यशेषोपपत्तिः कथमित्यत आह इंद्रियमात्रत्वादिति इत्यस्यैवैषम इति श्रुतेः इंद्रियाणि लिंगात्मरू
पाणि पंचीकृतभूतानां मारणानि तेषां लयात्कृत्स्नाभूतानामपि प्राणे लयादिसिद्धेः वाक्यशेषोपपत्तिरित्यर्थः अब्रह्मस्व
रूपत्वाच्च प्राणो न ब्रह्मेत्याह अपि चेति अत्र प्रतिदर्भ्यामुद्गीथप्रतिहारे चकादेवते तिष्ठेत् न चाक्रमणो नादित्यो

भूतसंवेशनोद्गमनस्य दर्शनादेवं ह्याम्नायते यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रो
त्रं प्राणं मनः स यदा प्रबुध्यते प्राणादेवाधि पुनर्जायंत इति प्रत्यक्षं चैतत्स्वापकाले प्राणवृत्तावपरिलुप्यमा
नायामिंद्रियवृत्तयः परिलुप्यंते प्रबोधकाले च प्रादुर्भवंतीति इंद्रियमात्रत्वाच्च भूतानामविरुद्धो मुख्ये प्राणे
ऽभिभूतसंवेशनोद्गमनवादी वाक्यशेषः अपि चादित्याच्चोद्गीथप्रतिहारयोर्देवते प्रस्तावदेवतायाः प्राणस्या
नंतरं निर्दिष्टे तेन च तयोर्ब्रह्मत्वमसिद्धं तत्सामान्याच्च प्राणस्यापि न ब्रह्मत्वमित्येवं प्राप्ते सूत्रकार आह ॥

त्वं च निर्धानुगृहीतप्रथमश्रुतप्राणश्रुत्या मुख्यप्राणो निर्णीयते दृष्टा प्रस्तावोपास्तिरिति पूर्वपक्षफलं सिद्धांते ब्रह्म
दृष्ट्युपासनाः अस्याधिकरणस्यातिदेशत्वमेव पूर्वेणास्य संगतिरिति विभागः ॥
ः द्विष्टे ते स्यादित्यत इति होवाचात्रमिति होवाचेति श्रुतावित्यर्थः सामान्यसन्निधानं सन्नि ः २ ॥ ॥

भवंतीति भूतानीति श्रुत्यस्यापि किंचिद्भवनधर्मकं कार्यमात्रं तस्य लयोदयौ वायुविकारे प्राणे न युक्तौ विरुक्तौ भूतशब्दस्य ब्रह्मा-
र्थग्रहेपि लयादेर्ब्रह्मलिंगनिर्णायकत्वमित्याह यदापीति भौतिकप्राणस्य भूतयोनित्वायोगादित्यर्थः तस्य तद्योनित्वं श्रुत्या

अत एव प्राण इति तल्लिंगादिति पूर्वसूत्रे निर्दिष्टमत एव तल्लिंगात्प्राणशब्दमपि परं ब्रह्म भवितुमर्हति प्राणस्या-
पि हि ब्रह्मलिंगसंबंधः श्रूयते सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहते इति प्राण-
निमित्तौ सर्वेषां भूतानामुत्पत्तिप्रलयावुच्यमानौ प्राणस्य ब्रह्मतां गमयतः ननु नूक्तं मुख्यप्राणपरिग्रहेपि सं-
वेशनोद्गमनदर्शनमविरुद्धं स्वापप्रबोधयोर्दर्शनादित्यत्रोच्यते स्वापप्रबोधयोरिंद्रियाणामेव केवलानां
प्राणाश्रयं संवेशनोद्गमनं दृश्यते न सर्वेषां भूतानामिह तु सेंद्रियाणां सशरीराणां च जीवाविष्टानां भूतानां स-
र्वाणि ह वा इमानि भूतानीति श्रुतेः यदापि भूतश्रुतिर्महाभूतविषया परिगृह्यते तदापि ब्रह्मलिंगत्वमविरु

शंकते नन्विति अथ यदा सुषुप्तौ जीवः प्राणे ब्रह्मण्येकीभवति तदा एनं प्राणं सविषया वागादयोपि यंतीत्यर्थः अत्रा-
जीवभिन्नत्वसर्वलयाधारत्वलिंगान्न मुख्यः प्राण ॥

इत्याह तत्रापीति वाक्यांतरसन्निधापेक्षया स्ववाक्यगतं लिंगं बलीय इत्याह तदयुक्तमिति एकवाक्यत्वं वाक्यशेषः तस्मा
बलं तद्गतं लिंगं तेनेत्यर्थः प्राणमेवेत्यवधारणेन सर्वभूतप्रकृतित्वलिंगेन च प्राणपदेन तत्कारणं ब्रह्मलक्ष्यमित्याह

प्रा॰भा॰
८२

प्रबोधयोः प्राणोप्ययं प्राणाच्च प्रभवं स्मरणमः यदा सुप्तः स्वप्नं न किंचन पश्यत्यथास्मिन्प्राण एवैकधा भवतीत
देवेन वाक्यशेषेणोन्नमिभिः सहाप्येतीत्यत्र तत्रापि तल्लिंगात्प्राणशब्दं ब्रह्मैव यत्तु नरवत्वादित्यसन्निधानात्प्राणस्य ब्रह्म
त्वमिति तदयुक्तं वाक्यशेषबलेन प्राणशब्दस्य ब्रह्मविषयतायां प्रतीयमानायां संनिधानस्याकिंचित्करत्वाय
त्तुनः प्राणशब्दस्य पंचवृत्तौ प्रसिद्धत्वेन तदाकाशशब्दस्येव प्रतिविधेयं तस्मात्सिद्धं प्रस्तावदेवतायाः प्राण
स्य ब्रह्मत्वं अत्रैके विद्वदाहंति प्राणस्य प्राणं प्राणबंधनं हि सोम्य मन इति च तदयुक्तं शब्दभेदात्प्रकरणा
च्च संशयानुपपत्तेर्यथा पितुः पितेति प्रयोगेन्यः पिता षष्ठीनिर्दिष्टोन्यः प्रथमानिर्दिष्टः पितुः पितेति गम्यते तत्
द्वत्प्राणस्य प्राणमिति शब्दभेदात्प्रसिद्धात्प्राणादन्यः प्राणस्य प्राण इति निश्चीयते न हि स एव तस्येति भेदनिर्दे
शार्हो भवति ॥

८२

तदाकाशशब्दस्येवेति द्वित्वकृतामुदाहरणां संशयाभावेनायुक्तमित्याह अत्रेत्यादिना ॥

शब्दभेदमुक्त्वा प्रकरणं प्रपंचयति यस्य चेति ज्योतिरिति छांदोग्यमेवोदाहरति इदमिति गायत्र्युपाधिकब्रह्मोपास्त्यानंतर्यार्थोयं
शब्दः अतो दिवो द्युलोकात्परः परस्माद्यज्ज्योतिर्दीप्यते तद्यदिदमिति ज्ञानदशायामवश्यमस्ति तेजः तद्दीप्यते तत्राह विश्वत इति विश्वस्मा
त्सर्वाणि वर्णाद्युपरि सर्वस्माद्भूरादिलोकादुपरि ये लोकास्ते इति तमेषु न विद्यंते उत्तमाः येभ्य इत्युत्तमेषु सर्वसंसारमंडलातीतं परं

यस्य च प्रकरणे यो निर्दिश्यते नामांतरेणापि स एव तत्र प्रकरणी निर्दिष्ट इति गम्यते यथा ज्योतिष्टोमाधिकारे वसंते वसं
ते ज्योतिषा यजेतेत्यत्र ज्योतिः शब्देन ज्योतिष्टोमविषयो भवति तथा परस्य ब्रह्मणः प्रकरणे प्राणबंधनं हि सोम्य म
न इति श्रुतः प्राणशब्दो वायुविकारमात्रं कथमवगमयेदतः संशयाविषयत्वान्नेतदुदाहरणं युक्तं प्रस्तावदेवा
तायां तु प्राणे संशयपूर्वपक्षनिर्णया उपपादिताः ज्योतिश्चरणाभिधानात् २४ इदमाम्नायते यदतः परो दिवो
ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति तत्र
संशयः किमिह ज्योतिः शब्देनादित्यादिज्योतिरभिधीयते किं वा परमात्मेति अर्थांतरविषयस्यापि शब्दस्य तल्लिं

ज्योतिरिदमेव यत्किंचिद्दृश्यमित्यर्थः अस्य पूर्वेणागतार्थत्वं वदन्नत्रोदाहरणसंगतिमाह अर्थांतरेति अत्र स्ववाक्ये सा
क्षाद्ब्रह्मलिंगाभावेपि ॥ रामायनमोनमः ॥ ॥ ॥ ॥ ॥ ॥

पादोस्येति पूर्ववाक्ये भूतपादत्वं लिंगमस्तीति पादसंगतिः पूर्वोत्तरपक्षयोर्जडब्रह्मज्योतिषोरुपास्तिः फलमिति भेदः न
दः नन्वज्ञानतमोविरोधित्वाद्ब्रह्मापि ज्योतिःपदशक्यतया प्रसिद्धमस्तीत्यत आह चक्षुरिति शार्वर्यां रात्रौ भवं शार्वरं तमस्त

गाद्ब्रह्मविषयत्वमुक्तमिह तत्तल्लिंगमेवास्ति नास्तीति विचार्यते किं तावत्प्राप्तमादिकमेव ज्योतिः शब्देन पा
विगदस्य तद्रूतिरूतः प्रसिद्धेस्तमोज्योतिविति तद्धीमोशब्दोपरस्परप्रतिद्वंद्विविषयोप्रसिद्धौ चक्षुर्वृत्तिनिरोध
कं शार्वरादिकं तम उच्यते तस्यापवानुग्राहकमादित्यादिकं ज्योतिस्तथा दीप्यत इतीयमपि श्रुतिरादित्यादि
विषया प्रसिद्धा न हि रूपादिहीनं ब्रह्म दीप्यत इति मुख्यो श्रुतिमर्हतीति फमर्यादत्वश्रुतिश्च न हि चराचरवी
जस्य ब्रह्मणः सर्वात्मकस्य द्योर्मर्यादायुक्ता कार्यस्य तज्ज्योतिषः परिच्छिन्नस्य द्योर्मर्यादा स्यात् ॥

सितियावत् अनेनावरकत्वात्तद्रूपत्वाच्च ऊर्ध्वस्वऽग्नावद्रूपं तमः इत्यर्थाद्दुक्तं भवति ज्योतिःश्रुतेरनुग्राहकलिंगान्याह त
द्येत्यादिना भास्वररूपात्मिकादीप्तिर्लिजमपरवलिंगमित्याह नहीति ॥

ज्योतिषो जडत्वे लिंगांतरमाह तदेतदिति ज्योतिरित्यर्थः चक्षुषश्च दर्शितः संदेशः श्रुतो विख्यातः न चान्यदपीति ब्रह्मलिंगमपि किंचिदत्र नास्तीत्यन्वयः ननु त्रिपादस्यामृतं दिवीति पूर्ववाक्योक्तं ब्रह्मात्र ज्योतिःपदेन गृह्यतामित्याशंक्याह नेत्यादि ननु सर्वात्मकत्वामृतत्वाभ्यां ब्रह्मोक्तमित्यत आह अथापीति कथंचिच्छब्दो ह्यध्येत्यर्थः दिविदिवश्रुति विभक्तिभेदान्न प्रत्यभिज्ञेत्यर्थः प्रकृतेर्जातं प्राकृतं कार्यमित्यर्थः आधारं निरस्यति पादेति गायत्री वा इदं सर्वं भूतं वाग्वै गायत्री

तदेतद्दृष्टं च श्रुतं चेत्युपासीतेति च श्रुतेश्च दृष्टः श्रुतो भवतीति य एवं वेदेति चाल्पफलश्रवणाद्ब्रह्मत्वे महते हि फलाय ब्रह्मोपासनमिष्यते न चान्यदपि किंचित्स्ववाक्ये प्राणाकाशवज्ज्योतिषोऽस्ति ब्रह्मलिंगं न च पूर्वस्मिन्नपि वाक्ये ब्रह्म निर्दिष्टमस्ति गायत्री वा इदं सर्वं भूतमिति छंदोनिर्देशात् अथापि कथंचित्पूर्वस्मिन्वाक्ये ब्रह्म निर्दिष्टं स्यादेवमपि न तस्येह प्रत्यभिज्ञानमस्ति तत्र हि त्रिपादस्यामृतं दिवीति द्यौरधिकरणत्वेन श्रूयते अत्र पुनः परो दिवो ज्योतिरिति द्यौर्मर्यादात्वेन तस्मात्प्राकृतं ॥

येयं पृथिवी यदिदं शरीरं यदस्मिन्पुरुषे हृदयमिमे प्राणा इति भूतवाक्पृथिवीशरीरहृदयप्राणात्मिका षड्विधा चैव तत्षट्पदा गायत्रीति यदुक्तं तावानन्तस्य विमाणः सर्वः प्रपंचोऽस्य गायत्र्यनुगतस्य ब्रह्मणो महिमा विभूतिः पुरुषः सर्वाब्रह्म ह्यपोततः प्रपंचाज्ज्यायानधिकः अधिकत्वमेवाह पादइति सर्वं जगदेकः पादोंशः विश्वभ्यादमि-
देकत्वमेकांशात्

शा०भा०
प्रदीप०
८५

85

तोजगदितिसत्वेः अस्य पुरुषस्यादिवित्वप्रकाशस्वरूपे त्रिपादस्यतं रूपमस्ति दिवि सूर्यमंडले च यथा नार्थमस्ति कल्पिता
तोजगतो ब्रह्मस्वरूपमनंतमस्तीत्यर्थः यथा लोके पादात्पादत्रयमधिकं तथेदमधिकमिति बोधनार्थं त्रिपादस्यता
मित्युक्तं न तु त्रिपात्वं विवक्षितमिति मंतव्यं यदतः परमिति यच्छब्दस्य प्रसिद्धार्थवाचित्वात्पूर्ववाक्यप्रसिद्धं ब्रह्मग्राह्य

ज्योतिरिह ग्राह्यमित्येवं प्राप्ते ब्रूमः ज्योतिरिह ब्रह्मग्राह्यं कुतः चरणाभिधानात् पादाभिधानादित्यर्थः पूर्वस्मि
न्हि वाक्ये चतुष्पाद्ब्रह्म निर्दिष्टं तावानस्य महिमा ततो ज्यायांश्च पूरुषः पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दि
वीत्यनेन मंत्रेण तत्र यच्चतुष्पदो ब्रह्मणः त्रिपादमृतं द्युसंबंधि रूपं निर्दिष्टं तदेवेह द्युसंबंधान्निर्दिष्ट
मिति प्रत्यभिज्ञायते तत्परित्यज्य प्राकृतं ज्योतिः कल्पयितः प्रकृतहानाप्रकृतप्रक्रियेप्रसज्येयातां ॥

मित्याह तत्रेति ननु यदाग्नेयोऽष्टाकपाल इत्यत्र यत्पदस्याप्रकृतार्थकत्वं दृष्टमित्यत आह तत्परित्यज्येति तत्र या
गस्यानुपादानात् प्रसिद्धेरभावेनापूर्वत्वाद्गत्या यदोऽप्रसिद्धार्थत्वमाश्रितं इह तु पूर्ववाक्यप्रसिद्धस्य ब्रह्मणो द्युसंबंधेन
प्रत्यभिज्ञानात्तस्य यदर्थत्वविनिश्चयात्तदेकार्थकज्योतिः पदस्यापि स एवार्थ इत्यर्थः ॥

संदंशन्यायादप्येवमित्याह नकेवलमिति सर्वं खल्विदं ब्रह्मेत्युत्तरत्र ब्रह्मानुवृत्तेः मध्यस्थं ज्योतिर्वाक्यं ब्रह्मपरमि
त्यर्थः प्रकरणादिति प्रकृतापि तया यत्पदश्रुत्या प्रसंबंधभूतपादत्वालिंगेनेत्यर्थः अतः प्रकरणादितिज्योतिः
श्रुतिर्बाधेनयुक्तइतिनिरस्तं अविशेषकत्वादिति ब्रह्मव्यावर्तकत्वाभावादित्यर्थः येनतेजसाचेतन्येनेद्धः प्र

नकेवलंज्योतिर्वाक्यएवब्रह्मानुवृत्तिः परस्यामपिशांडिल्यविद्यायामनुवर्तिष्यतेब्रह्मतस्मादिहज्यो
तिरितिब्रह्मप्रतिपत्तव्यंयदुक्तंज्योतिष्पदइतिचेत्तौप्रसिद्धेःकार्यज्योतिषिप्रसिद्धावितिनायंदोषः प्रकर
णाद्ब्रह्मावगमेसत्यनयोःशब्दयोरविशेषकत्वाद्दीप्यमानकार्यज्योतिरुपलक्षितेचब्रह्मण्यपिप्रयोगसं
भवात्येनसूर्यस्तपतितेजसेद्धइतिचमंत्रवर्णात् यद्वानायंज्योतिःशब्दश्चक्षुर्वृत्तेरेवानुग्राहकेतेजा
सिवर्ततेन्यत्रापिप्रयोगदर्शनाद्वाचैवायंज्योतिषास्तेमनोज्योतिर्जुषतामितिच तस्माद्यद्यत्कस्यचिदव
भासकंतत्तज्ज्योतिःशब्देनाभिधीयतेतथासतिब्रह्मणोपिचैतन्यरूपस्य

काशितःसूर्यस्तपतिप्रकाशयतितंहनंतमवेदविन्मनुतइत्यर्थः ज्योतिःशब्दस्यकार्यज्योतिष्येवशक्तिरितं
गीकृत्यकारणब्रह्मलक्षकत्वमुक्त्वाब्रह्मण्यपिशक्तिमाह यद्वेति गाढंयकोरवाचैवज्योतिषायंलोकआ
सन्नादिव ॥

छा॰ भा॰
८९

वहारं करोतीत्यर्थः आत्मानं जगत्यं यि वतां प्रवेशि ... ज्योतिः प्रकाशकं भवतीत्यात्मज्योतिः गच्छंतमनुगच्छतः स्वस्यापि गति
रहितत्वात्सर्वस्य स्वनिष्ठभानं स्यादित्याशंक्याह तस्य भासेति तत्कालानवच्छिन्नं ब्रह्म सूर्यादिज्योतिषां सादिभूतमात्म

द
समस्तं जगदवभासयेत्तत्वादुपपन्नो ज्योतिः शब्दः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति तं दे।
ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमित्यादिश्रुतिभिश्च यद्गुणकं परममर्याद्वं सर्वगतस्य ब्रह्मणो नोपपद्यत
इत्यत्रोच्यते सर्वगतस्यापि ब्रह्मण उपासनार्थः प्रदेशविशेषपरिग्रहो न विरुध्यते ननूक्तं निः प्रदेशस्य ब्र
ह्मणः प्रदेशविशेषकल्पना नोपपद्यत इति नायं दोषः निः प्रदेशस्यापि ब्रह्मण उपाधिविशेषसंबंधात्प्रदे
शविशेषकल्पनोपपद्यते तथा चाह आदित्ये चक्षुषि हृदय इति प्रदेशविशेषसंबंद्धानि ब्रह्मण उपासनानि श्रू।
यंते प्रकृतेन विस्मृतः दृष्टेश्चिंत्याया बहुत्वमुपपाद्यादितं यदप्युक्तमर्मोऽस्य घोषानुमितः कौक्षेये कार्यज्योति
ष्यध्यस्यमानत्वात्परमपि दिवः कार्यज्योतिरेवेति तदयुक्तं ॥

८९

ष्मत्वमिति चेदेवाध्यासत इत्यर्थः योषितोऽग्निवद्व
त्प्रकृतमर्यादत्वादिकं ध्यानार्थकल्पितं ब्रह्मणो युक्तमित्याह अत्रोच्यत इत्यादिना दिवः परमपीत्यन्वयः ॥ ॥

श्रोतव्यस्य ध्येयस्यालंबनस्य स्वरूपनियमो नास्तीत्याह परस्यापीति भविष्यन्ति ब्रह्मज्योतिष्श्रुतिशेषः तं यथा यथो
पासते तथा तथा फलं भवतीति श्रुतेरित्याह नहीयत इति ज्ञानफलवदुपास्तिफलमेकरूपं किं न स्यादत आह

परस्यापि ब्रह्मणो नामादिप्रतीकत्ववत् कौशितकी यज्योतिः प्रतीकत्वोपपत्तेर्दृष्टं च श्रुतं चेत्युपासीतेति प्रतीक
द्वारकं दृष्टं श्रुतं तत्तं च भविष्यन्ति यदल्पफलस्त्रवणात् ब्रह्मेति तदनुपपन्नं न हीयते फलाय ब्रह्माश्रा
यमियते नेति नियमे हेतुमस्ति यत्र हि निरस्तसर्वविशेषसंबंधं परं ब्रह्मात्मत्वेनोदिश्यते तत्रैकरूपमेव फ
लं मोक्षाख्यमवगम्यते यत्र तु गुणविशेषसंबद्धं प्रतीकविशेषसंबद्धं वा ब्रह्मोपदिश्यते तत्र संसारगोचा
राण्येवोच्चावचानि फलानि दृश्यन्ते अन्नादो वसुदानो विंदते वसु य एवं वेदेत्याद्यासु श्रुतिषु यद्यपि न स्व
वाक्ये किंचिज्ज्योतिषो ब्रह्मलिंगमस्ति तथापि पूर्वस्मिन्वाक्ये दृश्यमानं ग्रहीतव्यं भवति

यत्र हीति नैयेकत्वादित्यर्थः ध्येयं तन्नानेत्याह यत्र त्विति ईश्वरो जीवरूपेणान्नमत्तीत्यन्नादः अन्नस्य समंताद्दाता
वा वसुदिशांपं ददातीति वसुदानः इति गुणविशेषसंबंधं यो वेद स यथनं विंदते दीप्ताग्निश्च भवति नाम्नो वाग्भूमा मनो

छांदो

कं वाचोऽमृतमिति प्रतीकविशेषणं यथा न स्मृतिसंग्रहार्थमादिपदं सन्निधेः श्रुतिर्बलीयसीति शंकते कथं पुनरिति प्र
यमश्रुत्यनुसारेण चरमश्रुतिर्नेया इत्याह नैष इति सर्वनाम्नां स्वसामर्थ्येन स्वस्य सर्वनाम्नः सामर्थ्यं सन्निहि

तदुक्तं सूत्रकारेण ज्योतिश्चरणाभिधानादिति कथं पुनर्वाक्यांतर्गतेन ब्रह्मसंनिधानेन ज्योतिः श्रुतिः
स्वविषयाच्छक्या व्यावर्तयितुं नैष दोषः यदतः परो दिवो ज्योतिरिति प्रथमतरपठितेन यच्छब्देन सर्वनाम्ना
द्युसंबंधात्प्रत्यभिज्ञायमाने पूर्ववाक्यनिर्दिष्टे ब्रह्मणि स्वसामर्थ्येन परामृष्टे सत्यर्थाज्ज्योतिः शब्दस्यापि ता
द्विषयत्वोपपत्तेस्तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यं छंदोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्त
था हि दर्शनं २५ अथ यदुक्तं पूर्वस्मिन्नपि वाक्ये न ब्रह्माभिहितमस्ति गायत्री वा इदं सर्वं भूतं यदिदं किंचे
ति गायत्र्याख्यस्य छंदसोऽभिहितत्वादिति तत्परिहर्तव्यं कथं पुनः छंदोभिधानान्न ब्रह्माभिहितमिति शक्य
ते वक्तुं यावता तावानस्य महिमेत्येतस्यामृचि चतुष्पा।

तथाचितत्वं तद्बलेन परामृष्टे सतीति योजना अर्थादित्यस्य सामा
नाधिकरण्यादित्यर्थः छंदोभिधानादिति ब्रह्मप्रकृतं नास्तीति शंकामेकदेशी दूषयति कथमिति ॥ ॥ ॥

ग्रंकां स्थापयति नैतदित्यादिना चतुष्पदत्वादिकं पूर्वमेव व्याख्यातं यत्तामेवमिति वेदरहस्यभूतां मधुविद्यामेवमुक्तरीत्या
यः कश्चिद्वेद तस्मिन्दद्यात्स मय इति ब्रह्मप्राप्तिर्भवतीत्यर्थः तथा चैवंविदे ज्ञायमानं ब्रह्मशब्दोऽप्युक्त इति भावः गायत्रीशब्दे
न तदुपादानत्वेनानुगतब्रह्मलक्षणायां बीजमनुपपत्तिमाह नहि स्वेति ब्रह्मणोऽपि कथं सर्वात्मकत्वं तत्राह कार्यं चे

नैतदस्ति गायत्री वा इदं सर्वमिति गायत्रीमुपक्रम्य तामेव भूतपृथिवीशरीरहृदयवाक्प्राणप्रभेदैर्व्याख्याय
सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यनूक्तं तावानस्य महिमेति तस्या एव व्याख्यातरूपायां गायत्र्यामुदा
हृतो मंत्रः कथमेकस्माद्ब्रह्म चतुष्पादभिदध्यायीति तत्र यद्वै तद्ब्रह्मेति ब्रह्मशब्दः सोऽपि छंदसः प्रकृतत्वा
च्छंदोविषय एव तामेवं ब्रह्मोपनिषदं वेदेत्यत्र दिवेदोपनिषदमिति व्याचष्टे तस्माच्छंदोभिधानान्न ब्रह्मणः
प्रकृतत्वमिति चेन्नैष दोषस्तया चेतोऽर्पणनिगदात् तथा गायत्र्याख्यच्छंदोद्वारेण तदनुगते ब्रह्मणि चेतसोऽर्पणा
चित्तसमाधानमनेन ब्राह्मणवाक्येन निगद्यते

ति न च गायत्र्याख्यानार्थं सर्वात्मत्वारोपश्रुतिवाच्यं स्वतः सर्वात्मनो ध्यानसंभवेनासदारोपायोगादिति भावः तथा दि
दर्शनमिति स्तत्रशेषे व्याचष्टे तथान्यत्रेति दृश्यत इति दर्शनं दृष्टमित्यर्थः एतं परमात्मानं बह्वृचा महत्युक्थे
शस्त्रे तदनुगत

मुपासतेएतमेवाग्निरहस्येतमेतमग्निरित्यध्वर्यवउपासतइतिऋग्यजुर्वेदिनोग्नौउपासतएतमेवछांदोगाः सामवेदिनो
महाव्रतेक्रतौउपासतइत्येतेष्वेकैरहष्टमित्यर्थः गायत्रीशब्दोब्रह्मलवइतिव्याख्यायगौणत्वमाह अपरइति साक्षादेववा
च्यार्थग्रहणंविनेतियावत्तूंवैतद्यास्यतयागायत्रीपदेनात्रब्रह्मलक्षणायागायत्रीब्रह्मणीहेअपिलक्षिते नचगायत्रीसर्व

गायत्रीवाइदंसर्वमितिनह्यक्षरसंनिवेशमात्रायागायत्र्याः सर्वात्मत्वंसंभवतितस्माद्गायत्र्याख्यविकारेणा
गतेजगत्कारणंब्रह्मतदिदंसर्वमित्युच्यतेयथासर्वंखल्विदंब्रह्मेति, कार्यंचकारणाद्व्यतिरिक्तमितिवक्ष्याम
स्तदेवमात्रमात्रंभगाणशब्दादिभ्यउच्यतेतथान्यत्रापिविकारद्वारेणब्रह्मणउपासनंदृश्यते एतंह्येवबह्वृचामह
त्युक्थेमीमांसंतेएतमग्नावध्वर्यवएतंमहाव्रतेछंदोगाइतितस्मादस्तिछंदोभिधानेपिपूर्वस्मिन्वाक्येचतथ्यात्।
ब्रह्मनिर्दिष्टंतदेवज्योतिर्वाक्येपिपरामृश्यतेउपासनांतरविधानायापरआह साक्षादेवगायत्रीशब्देनब्रह्मप्रा
तिपाद्यतेसंख्यासामान्याद्यथागायत्रीचतुष्पदाषड्विधैः पादैस्तथाब्रह्मचतुष्पात ॥

मित्यन्वयासंभवः वृद्धोक्तंपैतिपदार्थैकदेशेव्यक्तौरूपान्वयवत्गायत्रीपदार्थैकदेशेगायत्र्यनुगतेब्रह्मणिप्रधानेसर्वात्म
कत्वान्वयसंभवादितिभावः ॥ ॥ ॥

तथाचसूत्रेसिद्धांतभागस्यायमर्थः तथागायत्रीवत्त्वतः यावत्गणासाम्यात्वेनेब्रह्मणिसमर्थ्यंतेयेनसचेतोपिणोगायत्रीशा
ब्देनब्रह्मणएवाभिगदाच्छंदोभिधानाच्छंदोभिधानमसिद्धमिति अधुनातथाहिदर्शनमितिसूत्रंव्याचष्टे तथेतिसंवर्ग
विद्यायामधिदैवमग्निसूर्यचंद्रांभांसिवायौलीयंतेअध्यात्मंवाक्चक्षुःश्रोत्रमनांसिप्राणमप्ययंतीत्युक्तेनवायतेपंचान्ये
आधिदैविकाः पंचान्यआध्यात्मिकास्तेमिलित्वादशसंख्याकाः सतः कृतमित्युच्यंतेसंतिहिकृतत्रेताद्वापरकलिसंज्ञ
कानिचत्वारिद्यूतानिक्रमेणचतुरंकत्र्यंकद्व्यंकैकांकानितत्रकृतंदशात्मकंभवतिचतुर्थेकेषुत्रयाणांत्रिषुद्वयोः

तथान्यत्रापिच्छंदोभिधायीशब्दोर्थांतरेसंख्यासामान्यात्प्रयुज्यमानोदृश्यतेतद्यथातेएवापतेपंचान्येदशसंत
स्तत्कृतमित्युपक्रम्याह सैषाविराडन्नादीत्यस्मिन्नपिवेब्रह्मणैवाभिहितमितिनच्छंदोभिधानंसर्वथाप्यस्मिन्पू
र्वस्मिन्वाकेप्रकृतंब्रह्मेति भूतादिपादव्यपदेशोपपत्तेश्चैवं २८ इतश्चैवमभ्युपगंतव्यमस्मिन्पूर्वस्मिन्वाकेप्र

द्वयोरेकस्यचांतर्भावात्तथाचदशात्मकेनवाय्वादयः कृतशब्देनोच्यंते एवंकृतत्वंवाय्वादीनामुपक्रम्याह सैषेति
विधेयापेक्षयास्त्रीलिंगनिर्देशः विराट्पदंछंदोवाचकंदशाक्षराविराडितिश्रुतेः दशत्वसाम्येनवाय्वादयोविराडि
त्युच्यंते एवंचदशत्वद्वारावाय्वादिषुकृतत्वंविराट्त्वंचध्येयंतत्रविराट्त्वध्यानात्सर्वमस्यान्नंभवतिअन्नंविराडितिश्रु
तेः कृतत्वध्यानादन्नादोभवतिकृतयुगस्यात्रादित्वात्कृतंहिस्वीयचतुरंकेषुत्र्यंकादिकमंतर्भावयदन्नमतीवलद्य
तेअतएवकृतजयादिद्यूतजयः कृत्स्नकः कृतायविजितायाधेया संयंतीति ॥

छा॰ भा॰
८४

अयोऽपूर्तं कृतमसंतोयः कृतायः स विजितो येन तस्मै अधरेयाः त्रेतादयः अयाः संयंति उपनमंते तेन जितमभवंतीत्य
र्थः एवं च सा वा वाचादिदमात्मिका एषा कृतश्रुतिवित्तादिङ्गत्वं कृतत्वादन्नादिनीत्यर्थः सर्वथापीति गायत्रीतिपदा
सत्वकत्वगोणत्वेपीत्यर्थः अन्नाय अश्वादेत्यपरे पदेन गोणत्वं स्वमतेनेति द्योतयति अग्रजहल्लक्षणापत्तेर्हि वागेवे
गायत्रीति वाग्गात्मत्वं गायति च त्रायते चेति निरुक्तनामकत्वं च गायत्र्या उपाधित्वेनोपास्यत्वादुपपत्तेरं गौणपदेन गाय

एतो भूतादीनां दत्वेन व्यपदिशति भूतपृथिवीशरीरहृदयादीनि हि निर्दिष्टानि हि मे षा च तत्पदार्थद्विधा गाय
त्रीति ब्रह्मणो नाम्नोऽयं पाणो केवलस्य छंदसो भूतादयः पादा उपपद्यंते ॥

त्रीत्यागादुभयं सर्वात्मकत्वमात्रेणोपपादनीयं एवं गायत्रीपदस्य स्वार्थत्यागो प्रसिद्ध च तत्प्रायात्वगणाद्वारा विप्रकृष्टल
क्षणा चेति विवक्षन्सन्नसं ननु गायत्री वा इदं सर्वमिति प्रथमगायत्रीश्रुतिः कथं लक्षणेत्याशंक्य वाक्यशेषतः सर्वा
त्मत्वायनेकवलवन्माणसंवादेन ब्रह्मणि तात्पर्यावगमादित्याह भूतादियादेति चैवं पदार्थमाह इतश्चेति हृ
दि पदार्थं दर्शयति भूतपृथिवीति ॥

अत्र सूत्रभाष्यकारयोर्भूतादिभिः चतुष्पदा गायत्रीति संमतं षड्वैरेव तु व्याख्यातं वृत्तिकारोक्तमप्रसिद्धं चकारसूचितं प्रकटयता-
माह अपि चेति ब्रह्मपरत्वेऽस्य कोऽत्यन्नवाच्च तस्मात्तत्परत्वमित्याह पूरुषेति ब्रह्मपदस्य छन्दोवाचित्वमुक्तं निरस्यति यद्वै तद्ब्र-
ह्मेति एवं सामस्त्येन ब्रह्मलोकाविनार्थः हृदयस्य चतुर्दिक्षूर्ध्वं च पंच सुषयः संति तेषु ब्रह्मस्थानत्वं गमयस्य प्रागादिद्वारेषु का-

अपि च ब्रह्मणो नाम्नो ये ते नैयमस्त्वेकं बध्येते तावानस्य महिमेति मन्त्रे अनुयायस्त्वास्तरसेन ब्रह्मैवाभिधीयते पादोऽस्य स-
र्वा भूतानि त्रिपादस्यामृतं दिवीति सर्वात्मनोपपत्तेः पुरुषसूक्तेऽपीयमृग्ब्रह्मपरतयैव समाम्नायते स्मृतिश्च
ब्रह्मणः एवं रूपतां दर्शयति विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति यद्वै तद्ब्रह्मेति च निर्देश एवं स-
ति मुख्यार्थ उपपद्यते पंच ब्रह्मपुरुषा इति च हृदयसुषिरेषु ब्रह्मपुरुषश्रुतिर्ब्रह्मसंबंधितायां विवक्षितायां सं-
भवति तस्मादस्मिन्वाक्ये ब्रह्म प्रकृतं तदेव ज्योतिर्वाक्ये द्युसंबंधात्प्रत्यभिज्ञायमानं परामृश्यत इति स्थितं उपदे-

शेषाः प्राणव्यानापानसमानोदानाः पंच द्वारपाला इति व्याख्यानार्थमाकृत्याकल्पितं तत्र हृदयच्छिद्रस्थप्राणेषु ब्रह्मपुरुषत्व-
श्रुतिर्दिगायत्र्याख्यब्रह्मण उपासनासंबंधितायां ब्रह्मणो द्वारपालत्वाद्ब्रह्मपुरुषा इति संभवंतीत्याह पंच ब्रह्मेति दिवि-
दिव इति विभक्तिभेदात्प्रकृतिप्रत्यभिज्ञानासिद्धिरिति नोपेक्षणीयमित्याह तत्पदिदर्नेव ॥

पा॰ भा॰ ९०

मिति यमिच्छथं प्रतिजानीते अत्रेति सूत्रेणेत्यर्थवदन्यपरिहारमाह नायमिति एवं सर्वत्र माख्येयं प्रधानप्रातिपदिकार्थयुक्तं
त्वं येन प्रत्यभिज्ञायाविभक्त्यर्थभेदो न प्रतिबन्धकः कथंचिदपादानस्यापि मर्यादात्वसंभवाद्यथाह वृक्षाग्रं हलमग्रभागावच्छिन्न
रूपेणस्याथमः मन्त्रेवस्तालग्रभागावच्छिन्नस्यतस्यैव मर्यादा भवति एवं दिविहर्षे दार्दीका शेवामुख्येऽप्याधारे सक्छन्दिवोम

मिन्नप्यविरोधात् २० यद्यप्येतदुक्तं पूर्वत्र त्रिपादस्यामृतं दिवीति सप्तम्यायोगाधारत्वेनोपदिष्टं स पुनरथ एदतः
पुरो दिव इति पञ्चम्यायो मर्यादात्वेन तस्मादुपदेशभेदात्स एव प्रत्यभिज्ञानमस्तीति तत्परिहर्तव्य मतोच्यते ना
यं दोषः उभयस्मिन्नप्यविरोधादुभयस्मिन्नपि सप्तम्यंते पंचम्यंते चोपदेशेन प्रत्यभिज्ञानं विरुध्यते यथा लोके
वृक्षाग्रं संबद्धोपि रूपेण उभयथोपदिश्यमानो दृश्यते वृक्षाग्रे रूपेणो वृक्षाग्रात्परतः रूपेण इति च एवं दिव्येव सम्ब
न्दिवः परमित्युपदिश्यते अपरस्त्वाह यथा लोके वृक्षाग्रेणासंबद्धोपि रूपेण उभयथोपदिश्यमानो दृश्य
ते वृक्षाग्रे रूपेणो वृक्षाग्रात्परतः रूपेण इति च एवं

र्यादात्वं तदलग्नाकाशमवच्छिन्नब्रह्मप्रतिकल्पयित्वादिवः परमित्युच्यते इत्यर्थः यथाकाशेनाप्यनवच्छिन्नं ब्रह्मगृ
हीत्वा पंचम्या दिवो मर्यादात्वमेवमुक्तं तदा गंगायां घोष इतिवत् सप्तम्या सामीप्यलक्षणयाधारत्वं व्याख्येयमित्या
ह परइति ॥

९०

संबंधप्रत्यायकत्वं मुख्यं पूर्वमुक्तं द्विष्ठेव सर्वदित्यि असंबंधप्रतिमर्यादात्वं मुख्यमधुनोच्यते दिवः परमपीति भेदः तस्माज्ज्योतिर्वाक्या
नुपास्यब्रह्मणि समन्वितमिति सिद्धं प्राणस्तथानुगमात् दिवोदासस्यापत्यं दैवोदासिः प्रतर्दनो नाम राजा युद्धेन पुरुषकारेण
च काशीनेन्द्रस्य प्रेतमाम दंगरहं जगाम तं हेन्द्र उवाच प्रतर्दन वरं ते ददामीति स होवाच प्रतर्दनो यं त्वं मर्त्याय हिततमं मन्यसे तं वरं त्वा

दिवः परमपि मद्ब्रह्म दिवीत्युपदिष्टं तेन तस्मादस्ति पूर्वनिर्दिष्टस्य ब्रह्मणः इह प्रत्यभिज्ञानमतः परमेव ब्रह्म ज्योतिः शा
द्दमिति सिद्धं प्राणस्तथानुगमात् २९ अस्ति कौषीतकिब्राह्मणोपनिषदीन्द्रप्रतर्दनाख्यायिका प्रतर्दनो ह वै दैवो
दासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण चेत्यारभ्याम्नाता तस्यां श्रूयते स होवाच प्राणोस्मि प्रज्ञात्मा तं मा
मायुरमृतमित्युपास्स्वेति तथोत्तरत्राप्यथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति तथा न वाचं वि
जिज्ञासीत वक्तारं विद्यादित्यन्ते च स एष प्राण एव प्रज्ञात्मानन्दोऽजरोऽमृत इत्यादि तत्र संशयः किमिह प्रा० ॥

मेवालोच्यमत्यं देहीति तत इन्द्र इदमाह प्राणोस्मीत्यादि मुख्यं प्राणं निरस्यति तं प्रज्ञात्मत्वं निर्विशेषचिन्मात्रं निरस्यति तं मामिति
इदं प्राणस्येन्द्रदेवतात्वे लिंगं मुख्यप्राणत्वे लिंगमाह अथेति वागादीनां देहधारणशक्त्यभावनिश्चयानंतरमित्यर्थः प्राण
स्य देहधारकत्वमुत्थापकत्वं च प्रसिद्धमिति वक्तुं खल्वित्युक्तं प्रा०

प्रा॰ भा॰
५१

णस्य जीवत्वेव वक्तृत्वं लिंगमाह नवाचमिति आनंदत्वादिकं ब्रह्मलिंगमाह अंते चेति अनेकेषु लिंगेषु दृश्यमानेषु बला
बलनिर्णयार्थमिदमधिकरणमित्यगतार्थतामाह अनेकलिंगेति पूर्वत्र प्रकृतब्रह्मवाचकयच्छब्दबलाज्ज्योतिः श्रु
तिर्ब्रह्मपरेत्युक्तं न तथेह प्राणश्रुतिभंगे किंचिद्बलमस्ति मिथो विरुद्धानेकलिंगानामनिश्चायकत्वादिति प्रत्युदाह

णशब्देन वायुमात्रमभिधीयत उत देवतात्मा उत जीवोऽथवा परं ब्रह्मेति नन्वत एव प्राण इत्यत्र वर्णितं प्राणश
ब्दस्य ब्रह्मपरत्वमिहापि च ब्रह्मलिंगमस्त्यानंदोऽजरोऽमृत इत्यादि कथमिह पुनः संशयः संभवति अने
कलिंगदर्शनादिति ब्रूमः न केवलमिह ब्रह्मलिंगमेवोपलभ्यते संति हीतरलिंगान्यपि मामेव विजानी
हीतीन्द्रस्य वचनं देवतात्मलिंगमिदं शरीरं परिगृह्योत्थापयतीति प्राणलिंगं न वाचं विजिज्ञासीत वक्तारं विद्या
दित्यादि जीवलिंगमत उपपन्नः संशयस्तत्र प्रसिद्धेर्वायुः प्राण इति प्राप्ते उच्यते प्राणशब्दं ब्रह्म विज्ञेयं कुतस्तथा
नुगमात्तथा हि पौर्वापर्येण पर्यालोच्यमाने वाक्ये पदार्थानां समन्वयो ब्रह्मप्रतिपादनपर उपलभ्यते ॥

णसंगत्या पूर्वपक्षयति तत्रेति पूर्वं प्रधानप्रातिपदिकार्थबलाद्विभक्त्यर्थबाधवद्वाक्यार्थज्ञानं प्रति हेतुत्वेन प्रधाना
नेकपदार्थबलादेकवाक्यताभंगश्रुतिदृष्टांतसंगतिर्वा अत्र पूर्वपक्षे प्राणाद्यनेकोपास्तिः सिद्धांते प्रत्यग्ब्रह्मधीरिति वि
वेकः तथा ब्रह्मपरत्वेन पदानामन्वयावगमादिति हेत्वर्थमाह तथा हीति ॥

५१

५

हिततमत्वकर्मत्वयादिपदार्थानांसंबंधोब्रह्मणोतात्पर्यनिश्चायकउपलभ्यतइत्युक्तंविवृणोति उपक्रमइत्यादिनायंमा
न्यमेतंवांतमेवप्रच्छेत्यर्थः सयः कश्चिन्मांब्रह्मरूपंवेदसात्ताद्दृनुभवतितस्यविड्ढयोलोकोमोदोमद्दृताऽपियातकेनन

उपक्रमेतावद्दर्शब्रह्मणीश्रुतौद्रष्टणोक्तः प्रतर्दनः परमपुरुषार्थंवरमुपाचिक्षेपत्वमेवमेवृणीष्वयंत्वंमनुष्यायहि
ततमंमन्यसइतितस्मैहिततमत्वेनोपदिश्यमानः प्राणः कथंपरमात्मानस्यात्त्वत्राह्यन्यत्रपरमात्मज्ञानाद्धिततं
मशक्तिरस्तितमेवविदित्वातिमृत्युमेतिनान्यः पंथाविद्यतेयनायेत्यादिश्रुतिभ्यस्तथामांयोमांवेदनहवैतस्य
केनचकर्मणालोकोमीयतेनस्तेयेनभ्रूणहत्ययेत्यादिचब्रह्मपरिग्रहेघटतेब्रह्मविज्ञानेनहिसर्वकर्मक्ष
यः प्रसिद्धः क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरइत्यादायांस्मृतिषुप्रज्ञात्मत्वंचब्रह्मपक्षएवउपपद्यते
नह्यचेतनस्यवायोः प्रज्ञात्मत्वंसंभवति तथोपसंहारेप्यानंदोजरोमृतइत्यानंदत्वादीनिब्रह्मणोन्यत्रसम्य
क्संभवंतिसनसाधुनाकर्मणाभूयान्भवति

कनीयतेनैवहिंस्यतेनप्रतिबध्यतेस्तानाग्निनाकर्मत्फलरागेर्द्दुग्ध
त्वादित्याह सइति साध्वसाधुनीपुण्यपापेताभ्यामस्पृष्टत्वंतत्कारयितृत्वंनिरंकुशैश्वर्यंचसर्वमेतदित्यर्थः ॥ ॥

अहंकारवादेन स्वात्मवाचकशब्देन वचदे उक्तवानित्यर्थः वाक्यसंदर्भो पासनापरत्वे लिंगांतरमाह तथाविग्रहेति त्रीणि शीर्षाणि यस्येति त्रिशीर्षा त्वष्टुः पुत्रो विश्वरूपो नाम ब्राह्मणः तं हतवानस्मीति यथार्थं शंसतीति कृत्वेदं तत्वाक्यं तत्स्तुत्येव यथा

नो एवासाधुना कर्मणा कनीयानेष ह्येव साधु कर्म कारयति एष उ एवासाधु कर्म कारयति एष लोकपाल एष लोकाधिपतिरेष लोकेश इति च सर्वमेतत्परस्मिन्ब्रह्मण्याश्रीयमाणेऽनुगंतुं शक्यते न मुख्ये प्राणे तस्मात्प्राणो ब्रह्म न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबंधभूमा ह्यस्मिन् २९ यदुक्तं प्राणो ब्रह्मेति तदसिद्ध्यते न प्राणशब्दं ब्रह्म कस्मात् वक्तुरात्मोपदेशात् वक्ता हीन्द्रो नाम कश्चिद्विग्रहवान्देवताविशेषः स्वमात्मानं प्रतर्दनायाचचक्षे मामेव विजानीहीत्युपक्रम्य प्राणोऽस्मि प्रज्ञात्मेत्यहंकारवादेन स एव वक्तुरात्मत्वेनोपदिश्यमानः प्राणः कथं ब्रह्म स्यात् न हि ब्रह्मणो वक्तृत्वं संभवत्यवागमना इत्यादिश्रुतिभ्यः तथा विग्रहसंबंधिभिरेव ब्रह्मण्यसंभवद्भिर्धर्मैरात्मानं तुष्टाव त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान्यतीन्शालावृकेभ्यः प्रायच्छमित्येवमादिभिः ॥

तेहन्मुखावास्तिभ्योन्यान्वेदांतवहिर्मुखान्यतीन्शालावृकेभ्यो दत्तवानस्मीत्यर्थः ॥ ॥ ॥ ॥

इंद्रेप्राणशब्दोपपत्तिमाह प्राणत्वंचेति पठंतिलोकिकाअपीत्यर्थः बलवाचिनाप्राणशब्देनबलदेवतालक्षणश्रुतिभा
वः इंद्रोहितप्रदातृत्वाद्धिततमः कर्मानधिकारादपापइत्येवंव्याख्येयानीत्याह निश्चितेचेति किमिंद्रपदेनविग्रहोपा
लतितंचिन्मात्रमुच्यतेउतविग्रहः आद्येवाकाम्यब्रह्मपरत्वंसिद्धंनद्वितीयइत्याह अथात्मेति आत्मनिदेहेपिगतः।

प्राणत्वंचेंद्रस्यबलवत्त्वादुपपद्यतेप्राणोवैबलमितिहिविज्ञायतेबलस्यचेंद्रोदेवताप्रसिद्धायाचकाचिद्बलकृ
तिरिंद्रकर्मैवतदितिहिपठंतिप्रज्ञात्मत्वमप्यप्रतिहतज्ञानत्वाद्देवतात्मनःसंभवत्यप्रतिहतज्ञानादेवताइ।
हिवदंतिनिश्चितेचैवंदेवतात्मोपदेशेहिततमत्वादिवचनानियथासंभवंतस्मिन्नपियोजयितव्यानि।
तस्माद्वक्तुरिंद्रस्यात्मोपदेशात्प्राणोब्रह्मेत्यादिप्रतिसमाधीयते अध्यात्मसंबंधभूमाह्यस्मिन्निति अध्या
त्मसंबंधः प्रत्यगात्मसंबंधस्तस्यभूमाबाहुल्यमस्मिन्नध्यायउपलभ्यतेयावद्ध्यस्मिञ्छरीरेप्राणोवसतिता ॥

त्यध्यात्मंप्रत्यगात्मासंबध्यतेयैः शरीरस्थत्वाभिरिंद्रतनावसंभावितैर्धर्मैस्तेअध्यात्मसंबंधास्तेषांभूमेत्यर्थः आयुरत्र
देहेप्राणवायुसंचारः अस्तित्वेप्राणस्थितौप्राणानामिंद्रियाणांस्थितिरित्यर्थः श्रुतिमाह अस्तित्वेति अथातोनिःश्रेया
सादानमित्याद्याश्रुतिः इंद्रियस्याप॰

कृ॰भा॰
प्रदीप॰
५३

९३

कर्तृत्ववद्विदेहोन्यापकत्वमाह तयेति वक्तृत्वमुक्तमासर्वाधिष्ठानत्वं दर्शितमित्याह इति चोपक्रमस्येति तत्तत्र नानाप्रपंचस्यात्मनिक
ल्पनायां यथा दृष्टांतः लोके प्रसिद्धस्य रथस्यारेषु नेमिर्नाभ्यां मध्यस्य शलाकारूपस्य चक्रोपांतरूपा नेमिरर्पिता नाभौ चक्रपिंडिकायाम
राश्चार्पिता एवं भूतानि पंच पृथिव्यादीनि मीयंत इति मात्राः भोग्याः शब्दादयः पंचेति दश भूतमात्राः प्रज्ञामात्रास्तु दशस्वर्पि-

वदायुरिति प्राणो ह्येव प्रज्ञानात्मनः प्रत्यग्भूतस्यायुः प्रदानोपसंहारयोः स्वातंत्र्यं दर्शयति तद्देवताविशेषस्य
पराचीनस्य तथास्मिंश्च प्राणानां निःश्रेयसमित्यथात्ममिवेंद्रियाश्रयं प्राणं दर्शयति तथा प्राण एव प्रज्ञात्मे
दं शरीरं परिगृह्योत्थापयतीति न वाचं विजिज्ञासीत वक्तारं विद्यादिति चोपक्रमस्य तद्यथा रथस्यारेषु नेमिरर्पिता
नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेर्पिताः स एष प्राण एव प्रा-
ज्ञात्मानंदोजरोमृत इति विषयेंद्रियव्यवहारारनाभिभूतं प्रत्यगात्मानमेवोपसंहरति ॥

पिता इंद्रियजाः पंच शब्दादिविषयप्रज्ञाः मीयंते आभिरिति मात्रा यं च धीइंद्रियाणि नेमिवज्ज्ञात्वं ग्राहकेष्वरेषु कल्पितमि-
त्युक्ता नाभिस्थानीये प्राणे सर्वं कल्पितमित्याह प्राणेर्पिता इति ॥

५३

स प्राणो मम स्वरूपमित्याह समस्विति तर्हि प्रत्यगात्मनि सममन्वयो न तु ब्रह्मणीत्याह अयमिति अहंकभवादस्य गतिं पृच्छति

ममस्वात्मेति विद्यादिति चोपसंहारः प्रत्यगात्मपरिग्रहे सामर्थ्युर्नपराचीनपरिग्रहे अयमात्मा ब्रह्म सर्वानुभूरिति च
श्रुतेः तं तं तस्मादध्यात्मसंबंधबाहुल्याद्ध्यात्मोपदेश एवायं न देवतात्मोपदेशः कथं तर्हि वक्तुरात्मोपदेशः शास्त्रदृ
ष्ट्या तूपदेशो वामदेववत् ३० इंद्रो नाम देवतात्मा स्वमात्मानं परमात्मत्वेनाहमेव परं ब्रह्मेत्यार्षेण दर्शनेन यथा।
शास्त्रं पश्यन्नुपदिशति स्म मामेव विजानीहीति यथा तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति तद्य।
ह तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवदिति श्रुतेर्यत्तु न उक्तं मामेव विजानीहीत्युक्त्वा विग्रहधर्मैरिंद्र आ।
त्मानं तष्ट्रावत्वाष्ट्रवधादिभिरिति तत्परिहर्तव्यमत्रोच्यते न त्वाष्ट्रवधादीनां विज्ञेयेंद्रस्तुत्यर्थत्वेनोपन्यासो यस्मा।
देवं कर्माहं तस्मान्मां विजानीहीति कथं तर्हि विज्ञानस्तुत्यर्थत्वेन यत्कारणं च त्वाष्ट्रवधादीनि साहसानि मम ॥

कथमिति स्तुत्वमंतर्वंदिनास्मिंजन्मनि स्वतःसिद्धं दर्शनमार्षं विज्ञेयेंद्रस्तुत्यर्थ उपन्यासो न चेत्कथं तर्हि स इति पृच्छति क
ः तद्व्याख्याति इंद्र इति जन्मांतरकृतश्रवणात् ३० १
थमिति ॥

ब्रह्मज्ञानस्तुत्यर्थः सइत्याह विज्ञानेति नियामकं ब्रूते यदिति येनेणास्य मे इत्यादिना वाक्येनेत्यन्वयः स्तुतिमाह यत

९५

स्य परेणाविज्ञानस्तुतिमनुसंदधातितस्य मेतत्र लोम च न मीयते स यो मां वेद न ह वै तस्य केन च कर्मणा लोको।
मीयते इत्यादिना एतदुक्तं भवति यस्मादीदृशान्यपि क्रूराणि कर्माणि कृतवतो मम ब्रह्मभूतस्य लोमापि न हिं
स्यते स यो न्योपि मां वेद न तस्य केन चिदपि कर्मणा लोको हिंस्यत इति विज्ञेयं तद्ब्रह्मैव प्राणोस्मि प्रज्ञात्मेति वक्ष्य
माणात्स्याद्ब्रह्मवाक्यमेतत् जीवमुख्यप्राणलिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ३१ य
द्यप्यध्यात्मसंबंधभूमदर्शनान्न पराचीनस्य देवतात्मन उपदेशस्तथापि न ब्रह्मवाक्यं भवितुमर्हतीति कुतः।
जीवलिंगान्मुख्यप्राणलिंगाच्च जीवस्य तावदस्मिन्वाक्ये विस्पष्टं लिंगमुपलभ्यते न वाचं विजिज्ञासीत वक्तारं
विद्यादित्यादिना हि वागादिभिः करणैर्व्याप्ततस्य कार्यकरणाध्यक्षस्य विज्ञेयत्वमभिधीयते तथा मुख्यप्राण
लिंगमप्ययवल्लप्राणएव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति ॥

इतमिति तस्माज्ज्ञानं श्रेष्ठमिति शेषः स्तुत्यज्ञानविषयं दर्शयतस्त्याह विज्ञेयं त्विति ॥ ॥ ॥ ॥

देहोत्थापनंजीवलिंगंकिंनस्यात्तत्राह शरीरधारणंचेति सर्वेवागादयः प्राणाअहमहंश्रेष्ठइतिविवदमानाःप्रजापति
मुपजग्मुः सचतानुवाचयस्मिन्नुत्क्रांतेशरीरंपापिष्ठतरंपतिष्यतिसवैश्रेष्ठइतितथाक्रमेणवागादिषूत्क्रांतेष्वपिमूका
दिभावेनशरीरंस्वस्थमस्थात्मुख्यप्राणस्यतूच्चिक्रमिषायांसर्वेषांव्याकुलतामीतान्वागादीन्वरिष्ठःप्राणउवाचमा

शरीरधारणंचमुख्यप्राणस्यधर्मः प्राणसंवादेवागादीन्प्राणान्प्रकृत्यतान्वरिष्ठः प्राणउवाचमामोहमापद्यथाह्यहमे
वैतंपंचधात्मानंप्रविभज्य तद्बाणमवष्टभ्यविधारयामीतिश्रवणाच्चेतियंशरीरंपरिगृह्येतिपठंतितेषामिमो
जीवमिंद्रियग्रामंवापरिगृह्यशरीरमुत्थापयतीतिव्याख्येयंप्रज्ञात्मत्वमपिजीवेतावच्चेतनत्वादुपपन्नंमुख्येपिप्रा
णेप्रज्ञासाधनप्राणांतराश्रयत्वादुपपन्नमेवजीवमुख्यप्राणपरिग्रहेचप्राणप्रज्ञात्मनोः सहवृत्तित्वेनाभेद
निर्देशः स्वरूपेणचभेदनिर्देशइत्युभयथानिर्देशउपपद्यते योवैप्राणः साप्रज्ञायावैप्रज्ञासप्राणः सहह्येतावस्मि

यंमोहमापद्यथयतोहमेवैतत्करोमिकिंतत्पंचधाप्राणापानादिभावेनात्मानंविभज्यएतद्दातिगच्छतीतिवानंतदेववा
णमस्थिरंशरीरमवष्टभ्याश्रित्यधारयामीत्यर्थः द्विवचनसहवासोत्क्रांतिश्रुतेश्चनब्रह्मग्राह्यमित्याह जीवमुख्येति
अभेदनिर्देशमाह योवाइति भेदमाह सहेति यदिजीवमुख्यप्राणयोर्लिंगाद्उपास्यत्वंनहिब्रह्मणोपिलिंगानामुक्त

प्र॰भा॰
५५

९५

त्वाद्युपासनं स्यात्त्वचेशापत्तिः उपक्रमादिन्यायनिश्चितैकवाक्यताभंगप्रसंगश्चेत्याह नैतदेवमित्यादिना न च स्वतंत्रपदार्थभे
दाद्वाक्यभेदः किं न स्यादिति वाच्यं जीवमुख्यप्राणयोरुक्तलिंगानां ब्रह्मणि नेतुं शक्यतया स्वातंत्र्यासिद्धेः अफलपदार्थ

च्छरीरे वसतः सहोत्क्रामत इति ब्रह्मपरिग्रहे तत् किं कस्माद्गृह्यते तस्मादिह जीवमुख्यप्राणयोरन्यतरस्योभयोर्वा प्र
तीयमानं न ब्रह्मेति चेन्नैतदेवमुपासात्रैविध्यादेवं सति त्रिविधमुपासनं प्रसज्येत जीवोपासनं मुख्यप्रा
णोपासनं ब्रह्मोपासनं चेति न चैतदेकस्मिन्वाक्येऽभ्युपगन्तुं युक्तमुपक्रमोपसंहाराभ्यां हि वाक्यैकत्वमव
गम्यते मामेव विजानीहीत्युपक्रम्य प्राणोऽस्मि प्रज्ञात्मानं मामायुरमृतमित्युक्त्वान्ते स एष प्राण एव प्रज्ञात्मानं
दोऽजरोऽमृत इत्येकरूपावुपक्रमोपसंहारौ दृश्येते तत्रार्थैकत्वं युक्तमाश्रयितुं न च ब्रह्मलिंगमन्यपरत्वेन प
रिणेतुं शक्यं दश नो भूतमात्राणां प्रज्ञामात्राणां च ब्रह्मणोऽन्यत्रार्पणानुपपत्तेः ॥

स्याफलत्वद्वाक्यार्थशेषत्वेन प्रधानवाक्यानुसारेणान्यलिंगनयनस्योचितत्वाच्च न हि प्रधानवाक्यार्थं ब्रह्मलिंगमन्यथा
नेतुं शक्यं न वा तदुचितमित्याह न च ब्रह्मलिंगमिति ॥ ॥

५५

सूत्रशेषं व्याचष्टे आश्रितत्वाच्चेति अन्यत्रात एव प्राणादुत्पादो हृतेराश्रितत्वादिहापि तस्य ब्रह्मलिंगस्य प्रयोगाद्ब्रह्मपर एव प्राणशब्द इत्यर्थः प्राणादिलिंगानि सर्वात्मके ब्रह्मण्येवानायासेन नेतुं शक्यानीत्याह यदि वेत्यादिना यस्मिन्नेतौ प्रेर्यत्वेन स्थितौ तेनैव कोणब्रह्मणा सर्वे प्राणादिव्यापाराः भवंतीत्यर्थः विशेषं परिच्छेदाभिमानमित्यर्थः वक्तारं विद्यादिति न वक्तृत्वे यस्मृच्यते तस्य लोकसिद्धत्वा

आश्रितत्वाच्चान्यत्रापि ब्रह्मलिंगवशात्प्राणशब्दस्य ब्रह्मणि प्रवृत्तेरिहापि च हितत्वमो प्रत्यासादि ब्रह्मलिंगयोगाद्ब्रह्मोपदेशपरत्वमिति गम्यते यत्तु मुख्यप्राणलिंगं दर्शितमिदं शरीरं परिगृह्योत्थापयतीति तदसत्प्राणव्यापारस्यापि परमात्मायत्तत्वात्परमात्मन्युपचरितुं शक्यत्वात् न प्राणेन नापानेन मर्त्यो जीवति कश्चन इतरेण तु जीवंति यस्मिन्नेतावुपाश्रिताविति श्रुतेः यदपि न वाचं विजिज्ञासीत वक्तारं विद्यादित्यादि जीवलिंगं दर्शितं तदपि न ब्रह्मपक्षं निवारयति न हि जीवो नामात्यंतभिन्नो ब्रह्मणस्तत्त्वमस्यहं ब्रह्मास्मीत्यादिश्रुतिभ्यो बुद्ध्याद्युपाधिकृतं तु विशेषमाश्रित्य ब्रह्मैव सन् जीवः कर्ता भोक्ता चेत्युच्यते तस्योपाधिकृतविशेषपरित्यागेन स्वरूपं ब्रह्म दर्शयितुं न वाचं विजिज्ञासीत वक्तारं विद्यादित्यादिना प्रत्यगात्माभिमुखीकरणार्थोपदेशो न विरुध्यते यद्वाचानभ्यु॰

किं तत्तस्य ब्रह्मत्वं बोध्यते तद्देवाभिमुखाय लिङ्गादस्त्यस्य श्रुत्यंतरमाह यद्वाचेति येन चैतन्येन वागभ्युद्यते स्वकार्याभिमुखे न प्रेर्यते तदेव वागादेरगम्यं ब्रह्मेत्यर्थः तत्त्वंपदवाच्ययोः स्वरूपतो भेदस्ताभ्यामुपलक्ष्यात्मस्वरूपाभेदादेका

त्वं निर्दिश्यत इत्याह नैष दोष इति सूत्रमतेन सूत्रं व्याख्याय वृत्तिकृन्मतेन व्याचष्टे अथवेति उपासनत्रैविध्यप्रसंगादिति
पूर्वसूत्रमत्र त्रिप्रकारकस्यैकब्रह्मविशेषकस्यैकस्योपासनस्य विवक्षितत्वादित्यर्थः अतो न वाक्यभेद इति भावः देहे

पू॰ भा॰
५८

दितें येन वाग्भ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इत्यादि च श्रुत्यंतरं वचनादिक्रियाः व्याहृतस्यैवा
त्मनो ब्रह्मत्वं दर्शयति प्राणस्य नेत्युक्तं यद्वा एतस्मिन्नस्मिन् शरीरे वसतः सहोत्क्रामत इति प्राणप्रज्ञात्मनोर्भेदद
र्शनं ब्रह्मवादिनो नोपपद्यत इति नैष दोषो ज्ञानक्रियाशक्तिद्वयाश्रययोर्बुद्धिप्राणयोः प्रत्यगात्मोपाधिभूतयो
र्भेदनिर्देश उपपद्यते उपाधिद्वयोपहितस्य तु प्रत्यगात्मनः स्वरूपेणाभेद इत्यतः प्राण एव प्रज्ञात्मेत्येकीकरणमविरु
द्धमथवा नोपासात्रैविध्यादाश्रितत्वादिह तद्योगादित्यस्यायमन्योऽर्थः न ब्रह्मवाक्येऽपि जीवमुख्यप्राणलिंगं विरुध्य
ते कथमुपासात्रैविध्यात् त्रिविधमिह ब्रह्मण उपासनं विवक्षितं प्राणधर्मेण प्रज्ञाधर्मेण स्वधर्मेण च तत्रायुरमृतमि
त्युपास्स्व आयुः प्राण इतीदं शरीरं परिगृह्योत्थापयति तस्मादेतदेवोक्थमुपासीतेति च प्राणधर्मः

५८

वेशात्मकजीवनहेतु
त्वं प्राणस्यायुष्ट्वं देहापेक्षया तस्यामुत्क्रेरवस्थानादमृतत्वं उक्थापयतीत्युक्थत्वमिति प्राणधर्मः ॥ ॥ ॥ ॥

जीवधर्मानाह अथेति बुद्धिप्राणयोः सहस्थितत्वात्क्रांतोत्सनंतरमित्यर्थः अत्रप्रज्ञापदेन साभासा जीवाख्या बुद्धिरुच्यते तस्याः
संबंधीनि दृश्यर्णानि सर्वाणि भूतानि येयेकं भवंत्यपि शानचिदात्मना तथाख्याख्यास्यामः उत्तुपक्रम्योक्तं वा मे वेत्यादि चत्वारो वा
स्या एकमंगमदूदुहदित्यादिपर्यायाणां संदितत्वार्थमुच्यते उत्पन्नायास्तु सत्कल्पायाः साभासबुद्धेर्नामप्रपंचविषयित्वमर्थशारी
रमर्थात्मकरूपप्रपंचविषयित्वमर्थः शारीरमिति तामिलिता विषयत्वात्स्पर्शांशरमिंद्रियस्याध्यंतत्र कर्मेंद्रियेषु वागेवास्याः प्र

या
अथयथैस्यैप्रज्ञायै सर्वाणि भूतान्येकीभवंति तद्व्याख्यास्यामः उत्तुपक्रम्य वागेवास्या एकमंगमदूदुहत् तस्यै नाम च पर
स्तात्प्रतिविहिता भूतमात्रा प्रज्ञया वाचं समारुह्य वाचा सर्वाणि वा नामान्याप्नोतीत्यादि प्रज्ञार्थमस्त्वा वायत्ता दशै
व भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतं यद्धि भूतमात्रा न स्युः न प्रज्ञामात्राः स्युः यद्वा प्रज्ञामात्रा न स्युः न भूतमा
त्राः स्युः नह्यन्यतरतो·

स्या एकमंगं देवाई मदुदुहत्स्ययामास वागिंद्रियद्वारा नामप्रपंचविषयित्वं बुद्धिर्लभत इत्यर्थः चतुर्थी षष्ठ्यर्था तस्याः
पुनर्नाम किल वक्तरादिना प्रतिविहिता ज्ञापिता भूतमात्रा रूपाद्यर्थरूपा परस्तादपरार्धे कारणां भवति ज्ञानकरणाद्वा
रार्थप्रपंचविषयत्वं बुद्धिः प्राप्नोतीत्यर्थः एवं बुद्धेः सर्वार्थग्रहत्वमुपपाद्यं ॥

तन्निश्चिन्वन्निति किंबहुनासामान्तिलिङ्गशरीराध्यासमाह प्रज्ञेयेति बुद्धिद्वारा चिदात्मा वाचमिंद्रियं समाहृत्य तस्याः प्रेरको भूत्वा
वाचाकरणेन सर्वाणि नामानि वक्तव्यत्वेनाप्नोति चक्षुषा सर्वाणि रूपाणि पश्यतीत्येवं द्रष्टा भवतीत्यर्थः तथा च सर्वद्रा-
ष्टृत्वं चिदात्मनि द्रष्टृत्वाध्यासनिमित्तकं चक्षुर्देर्धर्मरूपमुक्तं भवति सर्वाधिष्ठानत्वानंदत्वादिः ब्रह्मधर्मश्चेत्याह तावा इति
दष्टृत्वं व्याख्यातं प्रज्ञा इंद्रियजाः तान्यधिकृत्य ग्राह्या भूतमात्रा वर्तन्ते प्रज्ञामात्रा इंद्रियाणि ग्राह्यं भूतजातमधिकृत्य व-

रूपं किंचिन्न सिद्ध्येन्नोपतन्त्रानात तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञा-
मात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मेत्यादिर्ब्रह्मधर्मः तस्माद्ब्रह्मण एवैतदुपा-
धिद्वयधर्मेण स्वधर्मेण चैकमुपासनं त्रिविधं विवक्षितं ॥

र्त्तते इति ग्राह्यग्राहकयोर्मिथः सापेक्षत्वमुक्तं साधयति यदीति तदेव स्फुटयति नहीति ग्राहिणा ग्राह्यस्वरूपं ना-
सिध्यतीति किं तु ग्राहकेणैवं ग्राहकमपि ग्राह्यमनपेक्ष्य न सिध्यति तस्मात्सापेक्षत्वादेतद्ग्राह्यग्राहकद्वयं वस्तुतो न
भिन्नं किं तु चिदात्मन्यारोपितमित्याह नो इति तद्यथेत्यादिकृतव्याख्यानं सूत्रार्थमुपसंहरति तस्मादिति ॥

अन्यधर्मेणान्यस्योपासनं कथमित्याशंक्याश्रितत्वादित्याह अन्यत्रापीति उपाधिर्जीवस्तद्धर्मेणोपासनमिह संगतमित्य
र्थः तथाहि न तावदारुण्याद्यनेकगुणविशिष्टप्राणकथनवत् उपासात्रयविशिष्टस्य ब्रह्मणो विधिः संभवति सिद्धस्या
विधानर्हत्वात् नापि ब्रह्मानुवादेनोपासात्रयविधिः संभवति वाक्यभेदात् न च नानार्थं विशिष्टमेकमुपासनं विधीयत इति
वाच्यं तादृशविधिवाक्यस्यात्राश्रवणात् न च तं मामायुरमृतमित्युपास्स्वेत्यत्र मामिति जीवेनायुरिति प्राणेनामृतमि

अन्यत्रापि मनोमयः प्राणशरीर इत्यादावुपाधिधर्मेण ब्रह्मण उपासनमाश्रितमिहापि तद्युज्यते वाक्यस्योपक्रमो
पसंहाराभ्यामेकार्थत्वावगमात् प्राणप्रज्ञाब्रह्मलिंगावगमाच्च तस्माद्ब्रह्मवाक्यमेतदिति सिद्धं ॥ इति श्रीम
च्छारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ प्रथमस्याध्यायस्य प्रथमः पादः १ ॥ ॥ ॥ ॥

ति ब्रह्मणास्वस्वधर्मवत्ताविशिष्टोपासनाविधिरिति वाच्यं सर्वेषां धर्माणामश्रवणात् ब्रह्मश्रुतेश्च प्राणो वा अमृतत्व
श्रुतेः अत उपासनाविधिलिंगेन वक्तारं विद्यादिति तदेवोक्थमुपासीतेत्यस्य आत्मेति विद्यादिति जीवप्राणब्रह्मोपासनविध
यः अन्येनागुणविधय इति स्वीकृत्यैकवाक्यत्वं न्याय्यं तत्राप्युपक्रमादिनैकवाक्यतानिर्णयात्तस्माज्जीवप्रश्नाद्ब्रह्मपरमि
दं वाक्यमित्युपसंहरति तस्मादिति इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविंदानंदभगवत्पादकृतौ श्रीमच्छारीरकमी

मीमांसाव्याख्यायां भाष्यरत्नप्रभायां प्रथमस्याध्यायस्य प्रथमः पादः

शा॰ भा॰
५८

श्रीरामसिद्धमतानंगद्धाशायिनमंतरं अंतर्यामिणमत्तेयं वैश्वानरमहंभजे १ पूर्वपादेनोत्तरपादयोः संगतिं वक्तुं वृत्तमनुवद
ति प्रथमइति जगत्कारणत्वोत्याव्यापित्वादिकमर्थात्सिद्धं तदुपजीव्योत्तरं पादद्वयं प्रवर्तते इति हेतुमद्भावः संगतिःक

प्रथमे पादे जन्माद्यस्य यत इत्याकाशादेः समस्तस्य जगतो जन्मादिकारणं ब्रह्मेत्युक्तं तस्य समस्तजगत्कारण
स्य ब्रह्मणो व्यापित्वं नित्यत्वं सर्वज्ञत्वं सर्वशक्तित्वं सर्वात्मत्वमित्येवंजातीयका धर्मा उक्ता एव भवंति अर्थांतर
प्रसिद्धानां च केषांचिच्छब्दानां ब्रह्मविषयत्वहेतुप्रतिपादनेन कानिचिद्वाक्यानि संदिह्यमानानि ब्रह्मपरत
यानिर्णीतानि पुनरप्यस्पष्टानि वाक्यान्यस्पष्टब्रह्मलिंगानि संदिह्यंते किं परं ब्रह्म प्रतिपादयंत्याहोस्विदर्थांतरं
किंचिदिति तन्निर्णयाय द्वितीयतृतीयपादावारभ्येते ॥

यं पादभेद इत्याशंक्य पादानां प्रमेयभेदमाह अर्थांतरे इति आकाशादिशब्दानां स्पष्टब्रह्मलिंगैर्ब्रह्मणि समन्वयो दर्शितः
अस्पष्टब्रह्मलिंगवाक्यसमन्वयः पादद्वये वक्ष्यते प्रायेणोपास्यज्ञेयब्रह्मलिंगभेदात्पादयोरवांतरभेद इति भावः ॥

५८

छांदोग्यमुदाहरति इदमिति तस्माज्जायत इति तज्जं तस्मिंल्लीयत इति तल्लं तस्मिन्ननिति चेष्टत इति तदनं तज्जं च तल्लं च तदनं चेति ।
तज्जलान्कर्मधारयेऽस्मिन्शाकपार्थिवन्यायेन मध्यमपदस्य तच्छब्दस्य लोपः तज्जलानमिति वाच्ये छांदसो यवलोपः इति श
ब्दितो सर्वमिदं जगद्ब्रह्मैव तद्विवर्तत्वादित्यर्थः ब्रह्मणि मिथ्यामिथ्याभेदाभावाच्छांतो रागादिरहितो भवेदिति गुणविधिः स

र्वत्र प्रसिद्धोपदेशात १ इदमाम्नायते सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीताथ खलु क्रतुमयः पुरुषो
यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूपः इत्यादि तत्र सं
शयः किमिह मनोमयत्वादिधर्मैः शारीर आत्मोपास्यत्वेनोपदिश्यते आहोस्विद्ब्रह्मेति किं तावत्प्राप्तं शारीर इ
ति कुतः तस्य हि कार्यकरणाधिपतेः प्रसिद्धो मनआदिभिः संबंधो न तु परस्य ब्रह्मणः अप्राणो ह्यमनाः शुभ्र इत्या
दिश्रुतिभ्यः ननु सर्वं खल्विदं ब्रह्मेति स्वशब्देनैव ब्रह्मोपात्तं कथमिह शारीर आत्मोपास्य आशंक्यते नैष दोषो
नेदं वाक्यं ब्रह्मोपासनाविधिपरं किंतर्हि शमविधिपरं यत्कारणं सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपा १

क्रतुमुपासनं कुर्वीतेति विहितोपासनस्योपासीतेत्यनुवादात्फलमाह अथेति संकल्पविकार इत्यर्थः पुरुषस्य ध्यान
विकारत्वं स्फुटयति यथेति इह यद्ध्यायति मृत्वा ध्यानमहिम्ना तद्ध्येयरूपेण जायत इत्यर्थः क्रतुमयः संकल्पप्रधान
इतिवार्थः क्रतोर्विषयमाह मन इति ब्रह्मेत्युपक्रमात् मनोमयं प्राणशरीरं भारूपं सत्यसंकल्पमंतर्हृदये ध्येयमित्यर्थः

शा॰भा॰
प्रदीप
९९
९९

एवंत्रब्रह्मलिंगैरब्रह्मलिंगबाधउक्तः ननुवेदोपक्रमेब्रह्मणोलिंगमस्तिकिंतुप्रकरणंतच्चशांतिगुणविधानार्थमन्य
थासिद्धमतोजीवलिंगंबलीयइतिप्रत्युदाहरणेनपूर्वपक्षयति प्राणशरीरइत्यादिनाश्रुतिमाशंक्यान्यथासिद्ध्यापरिहर

रतीत्याह एतदुक्तंभवति यस्मात्सर्वमिदंविकारजातंब्रह्मैवतज्जत्वात्तल्लत्वात्तदनत्वाच्च नचसर्वस्यैकात्मत्वे
रागादयः संभवंतितस्माच्छांतउपासीतेति नचशमविधिपरत्वेमत्यनेनवाक्येनब्रह्मोपासनेनियंतुंशाक्य
तउपासनंतत्सक्रतुंकुर्वीतेत्यनेनविधीयते क्रतुः संकल्पोध्यानमित्यर्थः तस्यचविषयत्वेनश्रूयतेमनोम
यः प्राणशरीरइतिजीवलिंगमतोन्नमोजीवविषयमेतदुपासनमिति ॥ ॥

ति नैषदोषइति शमविधिपरत्वेहेतुमाह यत्कारणमिति यतएवमाह तस्माच्छमविधिपरमित्यन्वयः नचश
मेति शमध्यानयोर्विधौवाक्यभेदापत्तेरित्यर्थः ॥

९९

जन्मपरंपरयात्तीवस्यापिसर्वकर्मत्वादिसंभवमाह सर्वकर्मेति सर्वाणिकर्माणियस्यसर्वकामाभोगायस्यसर्वगंधः सर्व
रसइत्यादिशब्दार्थः आराग्रमात्रस्येति तोत्रप्रोतायःशलाकाग्रपरिमाणस्येत्यर्थः सर्वत्रप्रसिद्धब्रह्मणएवात्रोपास्यत्वो
पदेशान्नजीवउपास्यइतिसूत्रार्थमाह सर्वत्रेति यत्रफलंनोच्यते तत्रपूर्वोक्तस्यपदस्यसिद्धिःफलमितिमंतव्यं यद्यपिनि

सर्वकर्मासर्वकामइत्याद्यपिश्रूयमाणंपर्यायेणजीवविषयमुपपद्यते एषमआत्मांतर्हृदयेऽणीयान्व्रीहेर्वा
यवाद्वाइतिचहृदयायतनत्वमणीयस्त्वंचाराग्रमात्रस्यजीवस्यावकल्पतेनापरिच्छिन्नस्यब्रह्मणः ननुज्यायां
न्पृथिव्याइत्याद्यपिनपरिच्छिन्नेऽवकल्पतइति अत्रब्रूमोनतावदणीयस्त्वंचोभयमेकस्मिन्समाश्रयितुंशक्यं
विरोधात्अन्यतराश्रयणेप्रथमश्रुतत्वादणीयस्त्वंयुक्तमाश्रयितुंज्यायस्त्वंतुब्रह्मभावापेक्षयाभविष्यति इतिनि
श्चितेचजीवेयदंतेब्रह्मसंकीर्तनमेतद्ब्रह्मेतितदपिप्रकृतपरामर्शार्थत्वाज्जीवविषयमेवतस्मान्मनोमयत्वा
दिभिर्धर्मैर्जीवउपास्यइत्येवंप्राप्तेब्रूमः परमेवब्रह्मेहमनोमयत्वादिभिर्धर्मैरुपास्यंकुतः ॥

राकांक्षंब्रह्मतथापिमनःप्रचुरमुपाधिरस्यप्राणाःशरीरमस्येतिसमासांतर्गतसर्वनाम्नःसन्निहितविशेष्याकांक्षत्वाद्ब्र
ह्मसंबध्यतेस्योनंतेसदनंकरोमीति संस्कारार्थसदनस्यनिराकांक्षस्यापितस्मिन् ॥

मीदेतिमाकांक्षात्तच्छब्देनपरामर्शदर्शनादित्याह अत्रोच्यतइति स्योनंपात्रंतेपुरोडाशस्येतिश्रुत्यर्थः जीवोपिलिंगात्सन्नि
हितइत्यतआह जीवस्त्विति इहंदहिलिंगद्वयंलोकसिद्धंजीवंनसन्निधापयतिइः स्विनउपास्त्ययोग्यत्वात्फलाभावाच्चेति

सर्वत्रप्रसिद्धोपदेशाद्यत्सर्वेषुवेदांतेषुप्रसिद्धंब्रह्मशब्दस्यालंबनंजगत्कारणमिहग्रहसर्वंखल्विदंब्रह्मेतिवाक्यो
पक्रमेश्रुतंतदेवमनोमयत्वादिधर्मविशिष्टमुपदिश्यतइतियुक्तं एवंप्रकृतहानाप्रकृतप्रक्रियेनभविष्य
तः ननुवाक्योपक्रमेशमविधिविवक्षयाब्रह्मनिर्दिष्टंनस्वविवक्षयेत्युक्तमत्रोच्यते यद्यपिशमविधिविवक्ष
याब्रह्मनिर्दिष्टं तथापिमनोमयत्वादिषूपदिश्यमानेषुतदेवसंनिहितंभवति जीवस्तुनसंनिहितोनचस्व
शब्देनोपात्तइत्यवैषम्यं विवक्षितगुणोपपत्तेश्च २ वक्तुमिष्टाविवक्षिताः यद्यप्यपौरुषेयेवेदेवक्तुरभावान्नेष्ट
र्थःसंभवति

विश्वजिन्न्यायेनसर्वाभिलषितमानंदरूपंब्रह्मैवोपासनाक्रियानुबंधीतिभावः किंचब्रह्मपदश्रुत्यालिंगबाधइत्याह
नचेति अन्यतरानुकालानुगृहीतंफलवत्प्रकरणंविफललिंगाद्बलीयइतिसमुदायार्थः ॥

वस्तुनो विवक्षया: फलमुपादानं स्वीकारः स च प्रकृतेषु गुणेष्वस्तीति विवक्षोपचार इत्याह तथाप्युदानेनेति ननु इदं ग्राह्यमिदं त्या
ज्यमिति धीर्विवक्षाधीना विदेकृतः स्यादित्यत आह उपादानानुपादानेनेति तात्पर्यं नाम फलवदर्थप्रतीत्यनुकूलत्वं शब्दस्य

तथाप्युपादानेन फलेनोपचर्यते लोके हि यच्छब्देनाभिहितमुपादेयं भवति तद्धि विवक्षितमित्युच्यते यदनुपादेयं तदा
विवक्षितमिति तद्वदिहेदमुपादेयत्वेनाभिहितं विवक्षितं भवति तदविवक्षितं उपादानानुपादानेन तद्वेदवाक्ये
तात्पर्याभ्यामवगम्यते तदिह ये विवक्षिता गुणा उपासनायामुपादेयत्वेनोपदिष्टाः सत्यसंकल्पप्रभृतयः ते पर
स्मिन्ब्रह्मण्युपपद्यन्ते सत्यसंकल्पत्वं हि सृष्टिस्थितिसंहारेष्वप्रतिहतशक्तित्वात्परमात्मन एवावकल्पते परमा
त्मगुणत्वेन च य आत्मापहतपाप्मा इत्यत्र सत्यकामः सत्यसंकल्प इति श्रुते आकाशात्मेत्यादिना आकाशवदात्मा
इत्यर्थः सर्वगतत्वादिभिर्धर्मैः संभवत्याकाशेन साम्यं ब्रह्मणो ज्यायान्पृथिव्या इत्यादिना चैतदेव दर्शयति
यदाप्याकाश आत्मा इति व्याख्यायते तदापि संभवति सर्वजगत्कारणस्य सर्वात्मनो ब्रह्मण आकाशात्मत
मत एव सर्वकर्मेत्यादि ॥ ॥

त्पर्यम् उपक्रमादिना तत्स्य तात्पर्ययोरवगम इत्यर्थः तदिहेति ततस्मात्ता
त्पर्यवत्त्वादित्यर्थः सर्वात्मत्वे प्रमाणमाह तथा चेति जीर्णः स्थविरो दण्डेन वंचति गच्छति सोऽपि त्वमेव यो जातो ॥

ब्र० भा०
१०१

वालः सत्वमेव सर्वतः सर्वासु दिक्षु श्रुतयः श्रोत्राणि यस्येति सर्वतः श्रुतिमत् सर्वजंतूनां प्रसिद्धाः पाणपादयस्तस्येति।

एवमिहोपास्यतया विवक्षिता गुणा ब्रह्मण्युपपद्यंते यदुक्तं मनोमयः प्राणशरीर इति जीवलिंगं न तद्ब्रह्म
ण्युपपद्येत इत्यत्र ब्रूमः सर्वात्मत्वाद्धि ब्रह्मणो जीवसंबंधीनि मनोमयत्वादीनि ब्रह्मसंबंधीनि भवंति
तथा च ब्रह्मविषये श्रुतिस्मृतिभिर्भवतः त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो दंडेन वंचसि
त्वं जातो भवतीति च अप्राणो ह्यमनाः शुभ्र इतिः शुद्धब्रह्मविषया श्रुतिरियं तु मनोमयः प्राणशरीर इति सगुणब्र
ह्मविषयेति विशेषो नो विवक्षितगुणोपपत्तेः परमेव ब्रह्मोपास्यत्वेनोपदिष्टमिति गम्यते अनुपपत्तेस्तु न।

५ ५ सि विश्वतोमुख इति सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखं सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठ ५ २ ॥

सर्वात्मत्वोक्तिः ननु जीवधर्माश्चेद्ब्रह्मणि योज्यंते तर्हि ब्रह्मधर्मा एव जीवे किमिति न योज्यंते तत्राह अनुपपत्तेरिति ॥

सूत्रं व्याचष्टे पूर्वेणेति सर्वात्मत्वादिरूपकन्यायः कल्पितस्य धर्मास्त्वधिष्ठानेन संबध्यंते नाधिष्ठानधर्माः कल्पित इति भावः। वा
गेव वाकः सोस्यास्तीति वाकी न वाकी अनिंद्रिय इत्यर्थः ऊत्राप्यादरः कामोस्य नास्तीत्यनादरः नित्यतृप्त इत्यर्थः न्यायत्वा

पूर्वेणसूत्रेण ब्रह्मणो विवक्षितानां गुणानामुपपत्तिरुक्तानेन शारीरे तेषामनुपपत्तिरुच्यते न शारीर एवधारणा
र्थो ब्रह्मैवोक्तेन न्यायेन मनोमयत्वादिगुणा न तु शारीरो जीवो मनोमयत्वादिगुणो यत्कारणमस्य सत्यसंकल्पस्या
काशात्मावाक्यनादर इत्यादयो ज्यायान्पृथिव्या इत्यादि च वंजातीयका गुणा न शारीरे ञ्जसोपपद्यंते शारीर इति शरीरे भ
व इत्यर्थः ननु ईश्वरोपि शरीरे भवति सत्यं शरीरे भवति न तु शरीर एव भवति ज्यायान्पृथिव्या ज्यायानंतरिक्षा।
दाकाशवत्सर्वगतश्च नित्य इति च व्यापित्वश्रवणात् जीवस्तु शरीर एव भवति तस्य भोगाधिष्ठानाच्छरीरादन्यत्र वृ
त्त्यभावात् कर्मकर्तृव्यपदेशाच्च ४ इतश्च न शारीरो मनोमयत्वादिगुणो यस्मात्कर्मकर्तृव्यपदेशो भवत्येत।
मितः प्रेत्याभिसंभवितास्मीति एतमिति प्रकृतं मनोमयत्वादिगुणमुपास्यमात्मानं कर्मत्वेन प्राप्य ॥

यत्नुपपत्तेः शरीर इति परिच्छेदो हेतुः सूत्रोक्तः स तु जीवस्यैव न स्वरूपस्येत्याह सत्यमित्यादिना प्रापकत्वेन व्यपदिश्यते।
ति संबंधः कर्मकर्तृव्यपदेशपदस्यार्थांतरमाह तथोपास्येति एकार्थत्वं प्रकरणस्य समम् ॥

नत्वमंतरात्मन्त्रितिविभक्तिलोपः छांदसः शब्दयोर्विशेषो विभक्तिभेदः तस्मात्तदर्थयोर्भेद इति सूत्रार्थः स्मृतेर्हृदिस्थस्यजी

तेन व्यपदिशत्यभिसंभवितास्मीति शारीरस्योपासकं कर्तृत्वेन प्रापकत्वेनाभिसंभवितास्मीति प्राप्तास्मीत्यर्थः न
च सत्यां गतावेकस्य कर्मकर्तृव्यपदेशो युक्तः तथोपास्योपासकभावोपि भेदाधिष्ठान एव तस्मादपि न शारीरो
मनोमयत्वादिविशिष्टः शब्दविशेषात् ५ इतश्च शारीरादन्यो मनोमयत्वादिगुणो यस्माच्छब्दविशेषो भवति
समानप्रकरणे श्रुत्यंतरे यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतंडुलो वैवमयमंतरात्मन् पुरुषो हिरण्मा
य इति शारीरस्यात्मनो यः शब्दोभिधायकः सप्तम्यंतोंतरात्मन्निति तस्माद्विशिष्टोन्यः प्रथमांतः पुरुषशब्दो
मनोमयत्वादिभिर्विशिष्टस्यात्मनोभिधायकस्तस्मात्तयोर्भेदोधिगम्यते स्मृतेश्च ६ स्मृतिश्च शारीरपरमा
त्मनोर्भेदं दर्शयति ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ॥

वान्निर्देशो केवलापि हृदि स्थो मनोमयश्चिदस्त्यात्र स्मृतेश्चेति भूतानि जीवान् यंत्रं शरीरं ॥ ॥ ॥

अत्र सूत्रकृता सत्यभेद उक्त इति भ्रांतिनिरासायेदं तत्पदिकरणे निरस्तमपि चोद्यमुद्भाव्य निरस्यति अत्राहेत्यादिना वक्ष्यतीत्याव
स्तवएकत्वमेव भेदस्तु कल्पितः सूत्रे भ्रान्त्यत इत्याह सत्यमिति अर्भकमोको यस्य सोर्भकौकाः तस्य भावस्तत्वं तस्माद्धार्थि।

अत्राह कः पुनरयं शारीरो नाम परमात्मनोन्यो यः प्रतिषिध्यते नुपपत्तेस्तु न शारीर इत्यादिना श्रुतिस्तु नान्योतो
स्ति द्रष्टा नान्योतोस्ति श्रोतेत्येवं जातीयका परमात्मनोन्यमात्मानं वारयति तथा स्मृतिरपि क्षेत्रज्ञं चापि मां विद्धि
सर्वक्षेत्रेषु भारतेत्येवं जातीयकेत्यत्रोच्यते सत्यमेवमेतत्पर एवात्मा देहेंद्रियमनोबुद्ध्युपाधिभिः परिछिद्यमा
नो बालैः शारीर इत्युपचर्यते यथा घटकरकाद्युपाधिवशादपरिछिन्नमपि नभः परिछिन्नवदवभासते तद्वत्
तदपेक्षया च कर्मकर्तृत्वादिभेदव्यवहारो न विरुध्यते प्राक्तत्वमसीत्यात्मैकत्वोपदेशग्रहणात् गृहीते त्वात्मैकत्वे
बंधमोक्षादिसर्वव्यवहारपरिसमाप्तिरेव स्यात् अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमव
च्च ७

कमल्पत्वं अणीयानित्यल्पत्ववाचकशब्देनापि श्रुतमित्याह नायं दोष इत्युक्तं विवृणोति न तावदिति कथमपि

यमपि ब्रह्मभावापेक्षयापीत्यर्थः परिच्छेदत्यागं विना ब्रह्मत्वासंभवात्तत्यागे च ब्रह्मण एवोपास्यत्वमायातीति भावः वि

अर्भकमल्पमोको नीडमेष म आत्मान्तर्हृदय इति परिच्छिन्नायतनत्वात्स्पष्टत्वेन चाणीयान्व्रीहेर्वा यवाद्वेत्या
णीयस्त्वव्यपदेशाच्छारीर एवाराग्रमात्रो जीव इहोपदिश्यते न सर्वगतः परमात्मेति यदुक्तं तत्परिहर्तव्यम
त्रोच्यते नायं दोषो न तावत्परिच्छिन्नदेशस्य सर्वगतत्वव्यपदेशः कथमप्युपपद्यते सर्वगतस्य तु सर्वदेशेषु
विद्यमानत्वात्परिच्छिन्नदेशव्यपदेशोऽपि कयाचिदपेक्षया संभवति यथा समस्तवसुधाधिपतिरपि सन्न
योध्यापतिरिति व्यपदिश्यते कया पुनरपेक्षया सर्वगतः सन्नीश्वरोऽर्भकौका अणीयांश्च व्यपदिश्यत इति नि
चाय्यत्वादेवमिति ब्रूमः एवमणीयस्त्वादिगुणगणोपेत ईश्वरः

भोः परिच्छेदोक्तौ दृष्टान्तमाह यथा समस्तेति सर्वेश्वरस्यायोध्यायां स्थित्यपेक्षया परिच्छेदोक्तिवदल्पहृदि ध्येयत्वेनतयो

ननुकिमितिहृदयमेवप्रायेणोच्यतेतत्राह तत्रेति हृदयेपरमात्मनोबुद्धिवृत्तिग्राहिकाभ्यन्तरस्याभिव्यक्तिस्थानत्वा
त्तद्भक्तिरित्यर्थः व्योमदृष्टान्तासिद्ध्याशंकाल्पतापिकाचिच्छिन्नेत्याह तत्रयदाशंक्यतइत्यादिना भिन्नायतनेऽपिव्योम्नःसम

तत्रहृदयपुंडरीकेनिचाय्योद्रष्टव्यउपदिश्यतेयथाशालग्रामेहरिस्तत्रास्यबुद्धिविज्ञानंग्राहकंसर्वगतोपीश्व =
रस्तत्रोपास्यमानःप्रसीदतिव्योमवच्चेतितत्दृष्टव्यंयथासर्वगतमपिसद्व्योमसूचीपाशाद्यपेक्षयार्भकौकोऽणी
यश्चव्यपदिश्यतएवंब्रह्मापितदेवंनिचाय्यत्वापेक्षंब्रह्मणोर्भकौकस्त्वमणीयस्त्वंचनपारमार्थिकं तत्रयदाशं
क्यतेहृदयायतनत्वाद्ब्रह्मणोहृदयानांचप्रतिशरीरंभिन्नत्वाद्भिन्नायतनानांचशुकादीनामनेकत्वसावयव
त्वानित्यत्वादिदोषदर्शनाद्ब्रह्मणोपितत्प्रसंगइतितदपिपरिहृतंभवति संभोगप्राप्तिचेन्नवैशेष्यात ॰
व्योमवत्सर्वगतस्यब्रह्मणः सर्वप्राणिहृदयसंबन्धाच्चिद्रूपतयाचशारीरेणाविशिष्टत्वात्सुखदुःखादिसं
भोगोप्यविशिष्टः प्रसज्येतैकत्वाच्च नहिपरस्मादात्मनोन्यः कश्चिदात्मासंसारीविद्यतेनान्योतोस्तिवि

भेदाद्यभावादितिभावः ब्रह्मणोहार्दत्वेऽनिष्टसंभोगापत्तेर्जीवएवहार्दउपास्यइतिशंकांव्याचष्टेव्योमवदिति ब्रह्मभो
क्तृस्याद्धार्दत्वेसतिचेतनत्वाज्जीवाभिन्नत्वाच्च ॥

जीववदित्युक्तं निरस्यति नवैशेष्यादिति धर्माधर्मवत्त्वमुपाधिरित्यर्थः अयमेव विशेष्यं स्वार्थे ष्यञ्प्रत्ययः विशेषस्य
तिशयार्थो वा धर्मादेः स्वाश्रये फलहेतुत्वमतिशयः तस्मादिति सूत्रार्थः किंच विभवो बहवश्चात्मान इति वादिना

स्यात्परस्येव संसारसंभोगप्राप्तिरिति चेन्न वैशेष्यान्न तावत्सर्वप्राणिहृदयसंबंधाच्छारीरवद्ब्रह्मणः संभोग-
प्रसंगो वैशेष्यात् हि विशेषो हि भवति शारीरपरमेश्वरयोरेकः कर्त्ता भोक्ता धर्माधर्मसाधनसुखदुःखादिमां-
श्चैकस्तद्विपरीतोऽपहतपाप्मत्वादिगुणः एतस्मादनयोर्विशेषादेकस्य भोगो नेतरस्य यदि च संनिधानमा-
त्रेण वस्तुशक्तिमनाश्रित्य कार्यसंबंधोऽभ्युपगम्येत आकाशादीनामपि दाहादिप्रसंगः सर्वगतानेकात्मवा-
दिनामपि समावेतौ चोद्यपरिहारौ यदप्येकत्वाद्ब्रह्मण आत्मांतराभावाच्छारीरस्य भोगेन ब्रह्मणो भोगप्रा-
संग इति अत्र वदामः इदं तावद्देवानांप्रियः प्रष्टव्यः कथमयं त्वयात्मांतराभावोऽध्यवसित इति तत्त्वमसि
अहं ब्रह्मास्मि नान्योऽतोऽस्ति विज्ञाता इत्यादिशास्त्रेभ्य इति चेत् ॥

मेकस्मिन्देहे सर्वात्मनां भोक्तृत्वप्रसंगात् स्वकर्मार्जित एव देहे भोग इति परिहारश्च तुल्य इति न च वयं पर्यनुयोज्या
इत्याह सर्वगतेति वस्तुतस्तेषामेव भोगसांकार्यमित्यग्रे वक्ष्यते ॥

ब्रह्मणो जीवाभिन्नत्वं कृत्वा निश्चित्य तेन भोक्तृत्वानुमाने उपजीव्य शङ्कते वा प्रमाद यथा प्राप्तमिति अर्थं सुखमात्रं जना-
त्याहृद्यायाः कामायते नांगानीतिन्यायेनार्धजरतीयः सचात्रायुक्तः नत्वभेदमंगीकृत्याभोक्तृत्वं पक्षं युक्तं शङ्कते वी भेद सिद्ध्य-
र्थं भोक्तृत्वकारणादित्याह शास्त्रं चेति नन्वेकत्वं मयाशङ्क्यानङ्गीकृतं येनोपजीव्य शङ्क्यावाधः स्यात् किं त्वङ्गतागृही-

यथा शास्त्रं हि तर्हि शास्त्रीयोर्थः प्रतिपत्तव्यो न तत्रार्धजरतीयं लभ्यं शास्त्रं च तत्त्वमसीत्यपहतपाप्मत्वादिवि-
शेषणं ब्रह्म शारीरस्यात्मत्वेनोपदिशच्छारीरस्यैव तावदुपभोक्तृत्वं वारयति कुतस्तदुपभोगेन ब्रह्मण उप-
भोगप्रसंगो यावदगृहीतं शारीरस्य ब्रह्मणो कत्वं तदा मिथ्याज्ञाननिमित्तः शारीरस्योपभोगो न तेन परमार्थरूप-
स्य ब्रह्मणः संस्पर्शो न हि बालैस्तलमलिनतादिभिर्व्योम्नि विकल्प्यमाने तलमलिनतादिविशिष्टमेव पर-
मार्थतो व्योम भवति तदाह न वैशेष्यादिति

प्रतिबिंब १

नमित्याशंक्य बिंबयोः कल्पितभेदेन भोक्तृत्वाभोक्तृत्वव्यवस्थोपपत्तेरप्रयोजकोयं देहत्वमित्याह अथागृहीतमित्यादि
ना कल्पितासंगित्वमपि विशानस्यैवैशेष्यामित्यस्मिन्नर्थेपि सूत्रं पातयति तदाहेति ब्रह्मणो हार्दत्वे वाधका ॥

पू॰ भा॰ १०४

भावाच्छांदसं विद्यावांब्रह्मणोपासेसमन्वितमितिसिद्धं अत्ताचराचरग्रहणात् यस्यब्रह्मक्षत्रादिजगतोदनः मृत्युः सर्व
प्राणिमारकोपियस्योपसेचनमोदनसंस्कारकमृतप्रायः सोतायस्मात्तर्हि चिन्मात्रेभेदकल्पनयावर्ततेतच्छुद्धंब्रह्मइत्या
त्यमीश्वरस्याप्यधिष्ठानभूतंकोवेदचितश्चाम्बुपायंविनाकोपिनजानातीत्यर्थः संशयबीजमाह विशेषेति मत्स्यमग्नि

१०५

नैकत्वेपिशारीरस्योपभोगेन ब्रह्मणउपभोगप्रसंगोवैशेष्याद्धिशेषोहिभवतिमिथ्याज्ञानसम्यक्ज्ञानयोः मि-
थ्याज्ञानकल्पितउपभोगः सम्यक्ज्ञानदृष्टमेकत्वं नचमिथ्याज्ञानकल्पितेनोपभोगेनसम्यक्ज्ञानदृष्टंवा-
स्तसंस्पृश्यतेतस्मान्नोपभोगगंधोपिशक्यईश्वरस्यकल्पयितुं अत्ताचराचरग्रहणात् ॥ कठवल्लीषुपठ्यतेयस्य
ब्रह्म चक्षत्रंचउभेभवतओदनः मृत्युर्यस्योपसेचनंकइत्थावेदयत्रसइत्यत्रकश्चिदोदनोपसेचनसूचितोत्ता प्र-
तीयतेतत्रकिमग्निरत्तास्यादुतजीवोथवापरमात्मेतिसंशयः विशेषानवधारणात्त्रयाणांचाग्निजीवपरमा-
त्मनामस्मिन्ग्रंथेप्रश्नोपन्यासोपलब्धेः ॥

प्रकृतोऽत्यग्नेः येयंप्रेतेविचिकित्सेतिजीवस्यान्यत्रधर्मादितिब्रह्मणः
प्रश्नः लोकादिमग्निंतमुवाचेत्यग्नेः हंततइदंप्रवक्ष्यामीतीतरयोः प्रतिवचनमुपलभ्यतइत्यर्थः ॥ ॥ ॥

१०५

पूर्वत्र ब्रह्मणो भोक्तृत्वं नास्तीत्युक्तं तदुपजीव्य पूर्वपक्षयति किं तावदिति अग्निप्रकरणमतीतमित्यरुचेराह जीवो वेति पूर्वप
क्षे जीवोपास्तिः सिद्धान्ते निर्विशेषब्रह्मज्ञानमिति फलभेदः ओदनशब्दो भोग्यवाचीति पूर्वपक्षः सिद्धान्ते तु ब्रह्मक्षत्रशब्दोदितस्या

किं तावत्प्राप्तमग्निरिति निरुक्तोऽग्निरन्नाद इत्यादिश्रुतिप्रसिद्धिभ्यां जीवो वा तास्यात्तयोरन्यः पिप्पलं स्वाद्वत्तीति दर्शनान्न
परमात्मानश्नन्नन्यो अभिचाकशीतीति दर्शनादित्येवं प्राप्ते ब्रूमोऽत्ताऽत्र परमात्मा भवितुमर्हति अत्ता चराचरग्रहणाच्चराच
रं हि स्थावरजंगमं मृत्यूपसेचनमिहाद्यत्वेन प्रतीयते तादृशस्य चाद्यस्य न परमात्मनोऽन्यः कार्त्स्न्येनात्ता संभवति प
रमात्मा तु विकारजातं संहरन्सर्वमत्तीत्युपपद्यते ननु चेह चराचरग्रहणं नोपलभ्यते कथं सिद्धवच्चराचरग्रहणं
हेतुत्वेनोपादीयते नैष दोषः मृत्यूपसेचनत्वेन सर्वस्य प्राणिनिकायस्य प्रतीयमानत्वाद्ब्रह्मक्षत्रयोश्च प्राधान्यात्प्र
दर्शनार्थत्वोपपद्यते यत्तु परमात्मनोऽपि नात्तृत्वं संभवत्यनश्नन्नन्यो अभिचाकशीतीति दर्शनादित्युच्यते ॥ ॥

पितकार्यमात्रे गौण ओदनशब्दः मृत्युश्चात्र मृत्यूपसेचनपदेन सन्निधापितं प्रसिद्धौदनगतं विनाश्यगुणत्वं गदयतीति गौणशब्दस
संनिहितगुणग्राहित्वात्तथा च सर्वस्य विनाश्यत्वेन भानाल्लिंगादीश्वरोऽत्ता स्याद् ॥

नैष दोषोऽस्ति तस्य संनिहितत्वादिति पिप्पलं स्वाद्वत्तीति भोगस्य पूर्वोक्तत्वादित्यर्थः ऋतवाक्यानंतरवाक्यस्यापि ज्ञेयात्मा-
निसमन्वयमाह गुहामिति ऋतमवश्यंभाविकर्मफलं पिबंतौ भुंजानौ सुकृतस्य कर्मणो लोके कार्ये देहे परस्य ब्रह्मणोऽर्ध-
स्थानमर्हतीति परार्द्धं हृदयं परमे श्रेष्ठे तस्मिन्यागहानभोरूपा बुद्धिरूपा वा तां प्रविश्य परिस्थितौ छायातपवन्मिथो विरुद्धौ

कर्मफलभोगस्य प्रतिषेधकमेतद्दर्शनं तस्य संनिहितत्वात् न विकारसंहारस्य प्रतिषेधकं सर्ववेदांतेषु सृष्टि-
स्थितिसंहारकारणत्वेन ब्रह्मणः प्रसिद्धत्वात् तस्मात्परमात्मैव ज्ञाता भवितुमर्हतीति प्रकरणाच्च १ ॥ तस्य परमा-
त्मैव ज्ञाता भवितुमर्हतीति प्रकारणं प्रकरणमिदं परमात्मनो न जायते म्रियते वा विपश्चिदित्यादि प्रकृतग्रहणां-
त्याख्यं करणावेदयस्य इति चेद्रुक्तेन तत्परमात्मलिंगं गुहां प्रविश्य वात्मानो हितदर्शनात् ॥ कठवल्लीषु
वं पठन्ते ऋतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे छायातपौ ब्रह्मविदो वदंति पंचाग्नयो ये च त्रिणा-

तौ च ब्रह्मविदः पंचाग्नयः कर्मिणो वदंति त्रिणाचिकेतोऽग्निश्चितो यैस्ते त्रिणाचिकेता अग्निश्चिताः तेऽपि वदंतीत्यर्थः नाचि-
केतवाक्यानामध्ययनं तदर्थज्ञानं तदनुष्ठानं चेति त्रित्वं बोध्यं ॥

१०६

बुद्ध्यवच्छिन्नजीवस्य परमात्मनश्च प्रकृतत्वात्संशयमाह तत्रेति पूर्वोत्तरपक्षयोः फलं स्वयमेवाह यदीत्यादिना तदपि जी
वस्य बुद्धिवैलक्षण्यमपीत्यर्थः मनुष्ये प्रेते मृते सतीति येयं विचिकित्सा संशयः परलोके भोक्तास्तीत्येके नास्तीत्यन्ये तत्त्वयो
पदिष्टोऽहमेतदात्मतत्त्वं जानीयामित्यर्थः तदपीति परमात्मस्वरूपमपीत्यर्थः उभयोर्भोक्तृत्वायोगेन संशयमाक्षिपति

तत्र संशयः किमिह बुद्धिजीवौ निर्दिष्टावुत जीवपरमात्मानाविति यदि बुद्धिजीवौ ततो बुद्धिप्रधानात्कार्यकार
णसंघाताद्विलक्षणो जीवः प्रतिपादितो भवति तदपीह प्रतिपादयितव्यं येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके
नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय इति पृष्टत्वात् अथ जीवपरमात्मानौ ततो जीवा
द्विलक्षणः परमात्मा प्रतिपादितो भवति तदपीह प्रतिपादयितव्यमन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृ
तादन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति पृष्टत्वात् अत्राहाक्षेप्ता उभावप्येतौ पक्षौ न संभवतः कस्मादृतपा
नं कर्मफलोपभोगः सुकृतस्य लोक इति लिङ्गाच्चेतनस्य तदेतस्य संभवति नाचेतनाया बुद्धेः पिबन्ताविति च द्वि

अत्राहेति क्वचित्पदेन गृहीतावपि विशेषदेनाजहल्लक्षणया प्रविष्टावुच्येते इत्याह अत्रोच्यत इति पानकर्तृत्वावच्छेदेन पाना
नुकूलोपात्तपाययितारौ वा लक्षणावित्याह येनेति नियतपूर्वभाविकृतिमत्त्वरूपमनुकूलत्वं कर्तृकारयित्रोः साधारणं
यः कारयति स करोत्येवेति न्यायादिति भावः ॥

अत्र प्रकृतिर्मुख्यार्थाप्रत्यये लक्षणामिश्रास्तु कृतिः प्रत्ययार्थोऽमुख्यः प्रकृत्या तद्गतलक्षणया यापादनं लक्ष्यमिति प्राहुः ॥४१॥
र्थपक्षेपि वंता वितिकर्तृत्वाविशात्प्रत्ययेन बुद्धिजीवसाधारणं कारकत्वं लक्ष्यमित्याह बुद्धीति यथाग्निकाष्ठानि पचंतीत्या

शा०भा०
१०७

पानं दर्शयतीत्यर्थः अतो बुद्धिक्षेत्रज्ञपक्षस्तावन्न संभवति अत एव क्षेत्रपरमात्मपक्षोऽपि न संभवति चेतनेऽपि प
रमात्मनि ऋतपानासंभवादनश्नन्नन्योऽभिचाकशीतीति मंत्रवर्णादित्याशंक्यते नैष दोषः छत्रिणो गच्छंतीत्येके
नापि छत्रिणा बहूनां छत्रित्वोपचारदर्शनादेवमेकेनापि पिबता द्वावपि पिबंतावुच्येयातां यद्वा जीवस्तावत्पिबति
ईश्वरस्तु पाययन्नपि पिबतीत्युच्यते याचयितर्यपि पक्तृत्वप्रसिद्धिदर्शनात् बुद्धिक्षेत्रज्ञपरिग्रहेऽपि संभवत्यकरणे
कर्तृत्वोपचारादेधांसि पचंतीति प्रयोगदर्शनान्न चाध्यात्माधिकारेऽन्यौ कौचिद्द्वावृतं पिबंतौ संभवतः तस्माद्बुद्धि
जीवौ स्यातां जीवपरमात्मानौ वेति संशयः ॥ ॥

१०७

द्यौतेन कारकत्वं लक्ष्यं प्रकृतिस्तु मुख्यैवेति भावः मुख्यपाने तयोरप्रसिद्धेः पदिशोर्गौण्यापत्तिरित्यत आह नचेति ॥ ॥

ब्रह्मवत्रैस्मसन्निहितमन्यदादनित्यवस्तुपात्रवदिहापिपिवतम्दस्यसंनिहितगुहापदाद्बुद्धिजीवपरेतेतिदृशंतेनपूर्वपदा
यंति किंतावदिति गोचरः फलमेकस्मिन्जातिमतिल्लक्ष्मेसमजातीयमेवद्वितीयंग्राह्यंव्यक्तिमात्रग्रहेत्वाचवा त्रविजातीयं

किंतावत्प्राप्तंबुद्धिक्षेत्रज्ञाविति कुतः गुहांप्रविष्टाविति विशेषणात् यदिशरीरंगुहायदिवाहृदयमुभयथापिबु
द्धिक्षेत्रज्ञौगुहांप्रविष्टावुपपद्येते नचसतिसंभवेसर्वगतस्यब्रह्मणोविशिष्टदेशत्वंयुक्तंकल्पयितुंसुकृतस्य
लोकेइतिचकर्मगोचरानतिक्रमंदर्शयतिपरमात्मातुनसुकृतस्यदुःकृतस्यवागोचरेवर्ततेनकर्मणावर्द्धते
नकनीयानितिश्रुतेः छायातपावितिचचेतनाचेतनयोर्निर्देशउपपद्यतेछायातपवत्परस्परविलक्षणत्वात
स्माद्बुद्धिक्षेत्रज्ञाविहोच्येयातामित्येवंप्राप्तेब्रूमोविज्ञानात्मपरमात्मानाविहोच्येयातांकस्मादात्मानौहितावु
भावपिचेतनौसमानस्वभावौसंख्याश्रवणेचसमानस्वभावेष्वेवलोकेप्रतीतिर्दृश्यतेऽस्यगोर्द्वितीयोन्वेष्टव्य ॥

जातिव्यक्त्युभयकल्पनागोचरत्वात् नचास्मत्कारकत्वेनसजातीयबुद्धिरेवजीवस्यद्वितीयेतिवाच्यं चेतनत्वस्यजीवस्व
भावस्यकारकत्वादंतरं

गतातयाचलोकेद्वितीयस्यांतरंगजातिमत्त्वदर्शनात जीवस्यद्वितीयस्येतनप्रवेतित्वज्ञार्थमाह संगाश्रवाणोचेतिगुहा
यांबुद्धौस्थितंगह्वरेनेकानर्थसंकुलेदेहेस्थितंपुराणमनादिपुरुषंविदित्वाहर्षशोकौजहातिपरमेश्रेष्ठेव्योमनिहार्दाका

प्रा भा॰
९८

६४

इतिस्फुरकेगौरेवद्वितीयोन्वेष्यतेनास्वः पुरुषोवा तदिदमुक्तप्रायेननलिंगेननिश्चितेविज्ञानात्मनिद्वितीयान्वेषा
णायांसमानस्वभावस्येतरः परमात्मैवप्रतीयते ननूक्तंद्विगुहाहितत्वदर्शनाच्चपरमात्माप्रत्येतव्यइतिगुहा
हितत्वदर्शनादेवपरमात्माप्रत्येतव्यइतिवदामोगुहाहितत्वंहिश्रुतिस्मृतिषुअसकृत्परमात्मनएवदृश्यतेगु
हाहितंगह्वरेष्ठंपुराणंयोवेदनिहितंगुहायांपरमेव्योमन्नात्मानमन्विच्छगुहायांप्रविष्टमित्याद्यासुसर्वगतस्या
पिब्रह्मणउपलब्ध्यर्थोदेशविशेषोपदेशोनविरुध्यतेइत्येतदप्युक्तमेवसकृतलोकवर्तित्वंतच्छत्रिवदेकस्मिन्न
पिवर्तमानस्यउभयोरविरुद्धंछायातपावित्युभयविरुद्धेछायातपवत्परस्परविलक्षणत्वात्संसारित्वासंसारित्वयो
रविद्याकृतत्वात्संसारित्वस्यपारमार्थिकत्वाच्चासंसारित्वस्यतस्माद्विज्ञानात्मपरमात्मानोगुहांप्रविष्टौगृह्येतेऊत
स्वविज्ञानात्मपरमात्मानौगृह्येते

१०८

शेयाग्रज्ञबुद्धिस्थस्यांनिहितंब्रह्मयोवेदसोश्नुतेसर्वान्कामानित्यन्वयः अन्विच्छविचारयेत्यर्थः ॥ ॥ ॥

विशेषणांगांतरंगंतव्यत्वादिकं लिंगमाह विशेषणाच्चेति सजीवोध्वनः संसारमार्गस्य पारं पारमैकं तत विष्णोर्व्यापनशीला
स्य परमात्मनः पदं स्वरूपमाप्नोतीत्यर्थः दुर्दर्शं दुर्ज्ञानं तत्र हेतुर्गूढं मायाछन्नं मायामनुप्रविष्टं पश्चाद्गुहाहितं गह्वरे ह्यागह्व
रेष्ठमेवं विदितमात्मानमध्यात्मयोगः स्थूलसूक्ष्मकारणादेहत्रयक्रमेणाप्रत्यगात्मनि चित्तसमाधानं तेनाधिगमो मा

विशेषणाच्च १२ विशेषणं च विज्ञानात्मपरमात्मनोरेव भवत्यात्मानं रथिनं विद्धि शरीरं रथमेव तु इत्यादिना परेण
ग्रंथेन रथिरथ्यादिरूपकल्पनया विज्ञानात्मानं रथिनं संसारमोक्षयोर्गंतारं कल्पयति सोध्वनः पारमाप्नोति तद्वि
ष्णोः परमं पदमिति परमात्मानं गंतव्यं कल्पयति तथा तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति पूर्वस्मिन्नपि ग्रंथे मंतृमंतव्यत्वेनैतावेव विशेषितौ।
प्रकरणं चेदं परमात्मनो ब्रह्मविदो वदंतीति च वक्तृविशेषोपादानं परमात्मपरिग्रहे घटते तस्मादिह जीव
परमात्मानावुच्येयातां पवप॰

हावाकाज्यहृतिस्तयाविदितत्वेत्यर्थः ऋतपानमंत्रे जीवानुवादेन वाक्यार्थज्ञानाय तत्पदार्थो ब्रह्म प्रतिपाद्यत इत्युपसं
हरति तस्मादिहेति अत्र न्यायमतिदिशति एवमिति द्वाहैच्छांदमोऽहि वचनस्याकारः सुपर्णाविव सदेहवृक्षे ते निय
म्यनियामकभावेनेति सयुजौ

मु॰ भा॰
१०५

सखायौ चेतनत्वेन तुल्यस्वभावौ समानमेकं वृक्षं छेदनयोग्यं शरीरमाश्रित्य स्थिताविति अर्थः गुहां प्रविष्टाविति यावत् एता
वात्मानौ तल्लिंगदर्शनादित्याह तयोरन्य इति विशेषणाच्चेत्याह अन्यस्तु चेति अनीशया स्वस्य स्वरूपाप्रतीत्या देहे निमग्नः
पुरुषो जीवः शोचति निमग्नपदार्थमाह मुह्यमान इति नरोहमिति भ्रान्त इत्यर्थः जुष्टं ध्यानादिना सेवितं यदा।

१०७

न्यायो द्वा सुपर्णा सयुजा सखाया इत्येवमादिषूपि तत्रापि स्वध्यात्माधिकारान्न प्राकृतौ सुपर्णौ
उच्येते तयोरन्यः पिप्पलं स्वाद्वत्तीत्यदनलिंगाद्विज्ञानात्मा भवति अनश्नन्नन्यो अभिचाकशी
तीत्यनशनचेतनत्वाभ्यां परमात्मा अनंतरे च मंत्रे तावेव द्रष्टृद्रष्टव्यभावेन विशिनष्टि समाने
वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमेति
वीतशोक इति ॥

न परिपाकदशायामीशमन्यं विशिष्टरूपाच्छिन्नं शोधितचिन्मात्रं प्रत्यक्त्वेन पश्यति तदास्य महिमानं स्वरूपमेति प्राप्नोतीव
ततो वीतशोको भवतीत्यर्थः ॥ रामाय नमः ॥

१०५

ह्यस्यपर्योनिवाकं जीवस्य स्वरूपं कृत्वा चिंतितं अधुनाऽकृत्वा चिंतामुक्तां दर्शयति अथ इति अन्यथा बुद्धिविलक्षणत्वं पदल
क्षणत्वेनेत्यर्थः सत्त्वं बुद्धिः शंकते सत्त्वशब्द इति बुद्धिर्जीवो वेत्पूर्वपक्षार्थः स्यादित्यत आह नापीति पूर्वपक्षार्थस्य
दास्यायं युक्त बुद्धिभिन्नः संसारी प्रतिपाद्यते न ह्यत्र संसारी विवक्ष्यते किं तर्हि परमात्मैवेत्यर्थः क्षेत्रज्ञमपि चे

अथ स्पष्टतरस्य पर्योनिति नैयायिकस्य सांख्यसिद्धांतं भजते येषां जीवस्य ब्रह्मणो नान्यथा व्याख्यानत्वात् तयो
रन्यः पिप्पलं स्वाद्वत्तीति सत्त्वमनश्नन्नन्योऽभिचाकशीत्यनश्नन्नन्योऽभिपश्यतीति तस्मात् वेत्तौ सत्त्वक्षेत्रज्ञाविति
सत्त्वशब्दो जीवः क्षेत्रज्ञशब्दः परमात्मेति प्रयुज्येते तत्र सत्त्वक्षेत्रज्ञशब्दयोरंतःकरणशारीरपरतया प्रसिद्ध
त्वात्तत्रैव च व्याख्यानत्वात् इदं तत्सत्त्वं येन स्वप्नं पश्यत्यथ योयं शारीर उपद्रष्टा स क्षेत्रज्ञस्तमतौ वेत्तौ सत्त्वक्षेत्रज्ञाविति
नाप्यस्यापि अयं पक्षः सर्वथा पक्षं भजते न ह्यत्र शारीरः क्षेत्रज्ञः कर्तृत्वभोक्तृत्वादिना संसारधर्मेणोपेतो विवक्ष्यते
कथं तर्हि सर्वसंसारधर्मातीतो ब्रह्मस्वभावश्चैतन्यमात्रस्वरूपोऽनश्नन्नन्योऽभिचाकशीत्यनश्नन्नन्योऽभिपश्यतीत्यद्य
तिवचनात् तत्त्वमसि क्षेत्रज्ञं चापि मां विद्धीत्यादिश्रुति

यमर्थो युक्त इति शेषः तावता मंत्रव्याख्यामंत्रेणाप्येवमेव जीवस्य ब्रह्मत्वोक्तावेव न हि जीवो बुद्धिभिन्न इति विवेकमात्रेणो
पसंहारो युक्तः भेदस्यानुवादभ्रांतिमात्रेण फलस्याचेतिभावः अविद्याविद्रुषि किमपि स्वकार्यं नारभते न संपादयतीत्यत्र ना
शिनाशस्यापि वदन्यत्वादित्यर्थः अविद्यानागच्छतीति वार्थः जीवस्य ब्रह्मत्वपरमिदं वाक्यमिति यतः शंकते कथमिति

पु॰ भा॰
१९

बुद्धेर्भोक्तृत्वोक्तावतात्पर्यान्तत्र युक्तिं चिंतयामनःस्वेदनीयमित्याह उच्यत इति तदर्थं ब्रह्मत्वबोधनार्थं भोक्तृत्वमुपाधिमत्
केनिदिपतीत्यर्थः वस्तुतो जीवस्याभोक्तृत्वे भोक्तृत्वधीः कथमित्यत आह स्फंहीति चितादात्म्येन कल्पिताबुद्धिः सत्त्वादि

सृतिभ्यश्च तावताच वियोपसंहारदर्शनमेवमेवाकल्पतेतावेतौ सत्त्वदेहज्ञौ नह वा एवंविदि किंचन रज आध्यैस
तरत्यादिकथं पुनरस्मिन्नदेतयोरन्यः पिप्पलं स्वाद्वत्तीत्यत्र सत्त्वमित्यचेतने सत्त्वे भोक्तृत्ववचनमित्युच्यते नेयं
श्रुत्यचेतनस्य सत्त्वस्य भोक्तृत्वं वक्ष्यामीति प्रवृत्ता किं तर्हि चेतनस्य देहज्ञस्याभोक्तृत्वं ब्रह्मस्वभावतां च वक्ष्या
मीति प्रवृत्ता तदर्थं सत्त्वादिविक्रियावति सत्त्वे भोक्तृत्वमध्यारोपयति इदं हि कर्तृत्वं भोक्तृत्वं सत्त्वदेहज्ञयो
रितरेतरस्वभावाविवेककृतं कल्प्यते परमार्थतस्तु नान्यतरस्यापि संभवत्यचेतनत्वात्सत्त्वस्याविक्रिय
त्वाच्च देहज्ञस्याविद्याप्रत्युपस्थापितस्वभावत्वाच्च सत्त्वस्य सुतरां न संभवति ॥

रूपेणापरिणामते बुद्ध्याविवेकाच्चिदात्मनः सत्त्वादिरूपप्रवृत्तिव्यक्तचैतन्यवत्त्वं भोक्तृत्वं भवतीत्यर्थः ॥ ॥

१९

भोक्तृत्वमाविषयकं नवस्तुतइत्यत्रमानमाह तयांचेति यत्राविद्याकालेचेतनंसंभिन्नमिवभवतितदाद्रष्टृत्वादिकंनवस्तुनिज्ञातेइत्यर्थः
तस्माद्दृतेपिबंतावितिवाक्यमेवगुहाधिकरणविषयइतिस्थितं अंतरउपपत्तेः उपकोशलविद्यावाक्यमुदाहरति यइति तद्दितिस्था
नमसंगित्वेनब्रह्मणोनुरूपयतोस्मिन्नृदितंवर्त्मनीपक्ष्माणीएवगच्छतीत्यर्थः दर्शनस्यलौकिकत्वशास्त्रीयत्वाभ्यांसंशयमाह ता

तथाचश्रुतिः यत्रवाअन्यदिवस्यात्तत्रान्योन्यत्पश्येदित्यादिनास्वप्नसुषुप्त्यादिव्यवहारवदविद्याविषयएवकर्तृत्वादिव्य-
हारंदर्शयति यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादिनाचविवेकिनः कर्तृत्वादिव्यवहारंवारयति अंतरउपपत्तेः
१३ यएषोक्षिणिपुरुषोदृश्यत एषआत्मेतिहोवाच एतदमृतमभयमेतद्ब्रह्मेति तद्यद्यप्यस्मिन्सर्पिर्वोदकंवासिंचति
वर्त्मनीएवगच्छतीत्यादिश्रूयते तत्रसंशयः किमयंप्रतिबिंबात्माद्यधिकरणोनिर्दिश्यते अथवाविज्ञानात्माउतदेवता-
त्मेंद्रियस्याधिष्ठातायेवेश्वरइतिकिंतावत्प्राप्तं छायात्मापुरुषप्रतिरूपइतिकुतः तस्यदृश्यमानत्वप्रसिद्धेर्यएषोक्षिणिपुरु-
षोदृश्यतइतिप्रसिद्धवदुपदेशाद्विज्ञानात्मनोवायंनिर्देशइति ॥

त्रेति पूर्वत्रपिबंतावितिप्रथमश्रुतचेतनत्वानुसारेणचरमश्रुतगुहाप्रवेशादयोनीतास्तद्वदिहापिदृश्यतइति चाक्षुषत्वानुसा-
रेणामृतत्वादयोध्यानार्थंकल्पितत्वेननेयाइतिदृष्टांतत्वेनपूर्वपक्षयति छायात्मेति पूर्वपक्षेप्रतिबिंबोपास्तिः सिद्धांतेब्रह्मो

प्र॰ भा॰
२२१

प्राप्तिरितिफलं प्रसिद्धवति दिवाकरवत्त्वेनेत्यर्थः संभावनामात्रेणापद्यतेत्यमाह वितानात्मन इत्यादिना मनो ब्रह्मेतिवदे
तद्ब्रह्मेतीतीतिवाक्यस्येतिपदस्य शिरस्कत्वात् न स्वार्थपरत्वमिति पूर्वपक्षः मनो ब्रह्मेत्युपासीतेत्यत्र इतिपदस्य प्रत्ययपरता

पुरुषं सहितं चतुष्पाद्रूपं परं पुरुषं प्रकृत्याक्षिसंनिहितो भवत्यात्मग्राह्यस्यास्मिन्पदे तु कूलो भवत्यादित्यपुरुषो वा चक्षुषो
नुग्राहकः प्रतीयते य एषोऽस्मिन्मण्डले य एषोऽक्षिण्यन्तः प्रतिष्ठित इति श्रुतेः अमृतत्वादीनां च देवतात्मन्यपि कथंचित्संभवात्तेश्वरः
स्यान्यविशेषनिर्देशादित्येवं प्राप्ते ब्रूमः परमेश्वर एवाक्षिण्यभ्यन्तरः पुरुष इहोपदिश्य इति कस्मादुपपद्यते हि परमेश्व
रे गुणजातमिहोपदिश्यमानमात्मत्वं तावन्मुख्यया वृत्त्या परमेश्वर उपपद्यते स आत्मा तत्त्वमसीति श्रुतेरमृत
त्वाभयत्वे च तस्मिन्नसकृच्छ्रुतौ श्रूयेते तथा परमेश्वरानुरूपमेतदक्षिस्थानं सर्वलेपरहितमुपदिष्टं तद्यद्यप्य
यथाहि परमेश्वरः सर्वदोषैरलिप्तोऽपहतपाप्मादिश्रवणात् तथाक्षिस्थानं सर्वलेपरहितमुपदिष्टं तद्यद्यप्यस्मि
न्सर्पिर्वोदकं वा सिंचति वर्त्मनी एव गच्छतीति श्रुतेः ॥ ॥ ॥

दिहच ब्रह्मेत्युक्ते वा चैतन्य नन्वये नेति पदस्योक्तिसंबंधिनोऽर्थपरत्वोऽहैष्वप्यमिति सिद्धांत इति परमेश्वर एवेति ॥ श्रीरामा
यनमः

बहुप्रमाणसंवादस्तात्पर्यानुग्राहक इति न्यायाद्गृहीताभ्यामात्मब्रह्मश्रुतिभ्यां दर्शनस्य लिंगं बाध्यमित्याह संयद्वाम इति वामा-
नि कर्मफलान्येतमभि पुरुषमभिलक्ष्य संयंति गच्छंति एतं सर्वफलोदयहेतुरित्यर्थः लोकानां फलदाताप्ययमेवेत्याह वामनीरि-
ति नयति फलानि लोकान्प्रापयतीत्यर्थः भामानि भानानि नयत्ययमित्याह भामनीरिति सर्वार्थप्रकाशक इत्यर्थः स्थान

संयद्वामादिगुणोपदेशश्च तस्मिन्नवकल्पते संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभिसंयंति एष उ एव वा-
मनीः एष हि सर्वाणि वामानि नयति एष उ एव भामनीः एष हि सर्वेषु लोकेषु भातीति च अत उपपत्तेरंतरः
परमेश्वरः स्थानादिव्यपदेशाच्च १४ कथं पुनराकाशवत्सर्वगतस्य ब्रह्मणोऽल्पं स्थानमुपपद्यते इत्यत्रोच्यते
भवेदेषानवक्लृप्तिः यद्येतदेवैकं स्थानमस्य निर्दिष्टं भवेत् संति ह्यन्यान्यपि पृथिव्यादीनि स्थानान्यस्य निर्दिष्टानि
यः पृथिव्यां तिष्ठन्नित्यादिना तेषु हि चक्षुरपि निर्दिष्टं यश्चक्षुषि तिष्ठन्नित्यादि स्थानादिव्यपदेश इत्यादिग्रहणेन
तद्दर्शयति न केवलं स्थानमेवैकमनुचितं ब्रह्मणो निर्दिश्यमानं दृश्यते किं तर्हि नामरूपमित्येवंजातीयक-
मप्यनामरूपस्य ब्रह्मणोऽनुचितं निर्दिश्यमा-

नामरूपाणां ध्यानार्थं कृत्स्नत्वं तेष्वप्युपदेशादिति स्थानत्वोक्तिरत्र न दोषः इति
सूत्रयोजना अनवक्लृप्तिः अक्रमकल्पना तदा भवेद्यद्येकमेव निर्दिष्टं भवेदित्यन्वयः ननु अनुचितत्वात्कृत्स्नोक्तिः समाधानमि-
त्याशंक्य युक्तिमाह निर्गुणमपीति प्रकरणादपि ब्रह्मग्राह्यमित्याह सर्वविशिष्टेति ध्यानार्थभेदकल्पनया ॥ ॥

सुखगुणविशिष्टस्य ब्रह्मणः प्रकृतस्य य एष इति सर्वनाम्नाभिधानादेतदः परमात्मेति सूत्रार्थः नन्वुपकरणात्मत्वेन दृश्यत्व
लिंगेनोपस्थापितः छायात्मा सर्वनामार्थ इत्यत आह आचार्यस्त्विति उपकोसलो नाम कश्चिद्ब्रह्मचारी जाबालस्याचार्यस्या-
ग्नीन्द्वादश वत्सरान्परिचचार तमनुपदिश्यैव प्रोषितं गते जाबाले गार्हपत्याद्यग्निभिर्दयया प्राणो ब्रह्मेत्यात्मविद्यामुपदिश्योक्तं

तेनस्योविदितिनामसद्विशाएषसमक्कीत्यादि निर्गुणमपि सद्ब्रह्म नामरूपगतैर्गुणैः सगुणमुपासनार्थं तत्र तत्रोपदिश्यत इत्ये-
तदप्युक्तमेव सर्वगतस्यापि ब्रह्मण उपलब्ध्यर्थं स्थानविशेषो न विरुध्यते शालग्राम इव विष्णोरित्येतदप्युक्तमेव सु-
खविशिष्टाभिधानादेव च ॥ अपि चैतद्वाक्यं विवदितव्यं किं ब्रह्मास्मिन्वाक्येऽभिधीयते न वेति सुखविशिष्टाभिधा-
नादेव ब्रह्मत्वं सिद्धं सुखविशिष्टं हि ब्रह्म यद्वाक्योपक्रमे प्रकीर्तितं प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति तदेवेहाभिहितं प्रकृ-
तपरिग्रहस्य न्याय्यत्वादाचार्यस्तु ते गतिं वक्तेति च गतिमात्राभिधानप्रतिज्ञानात्कथं पुनर्वाक्योपक्रमे सुखवि-
शिष्टं ब्रह्म प्रतिज्ञायत इति ॥

आचार्यस्त्विति तत्त्वमात्मविद्याफलप्राप्तये मार्गमर्चिरादिकं वदिष्यतीत्यर्थः यस्मादाचार्येण गत्युपदेशो नियुक्तोऽर्चिरादि-
कां गतिमुक्तां तया चाग्निभिरुक्तात्मविद्यावाक्यस्य गतिवाक्येनैकवाक्यता वाच्या सा च सर्वनाम्ना प्रकृतात्मग्रहे निर्वहती-
त्येकवाक्यतानिर्वाहकं प्रकरणं वाक्यभेदकाल्लिंगाद्बलवदिति भावः ॥

श्रुतिर्व्याचष्टे उच्यत इति प्राणः सूत्रात्मा हृद्यत्वाद्ब्रह्मेति यत् तज्जानामि कं विषयसुखं खं च भूताकाशं ब्रह्मत्वेन तान्नो
न शक्नोमीत्यर्थः एवं कथंभूतं यत्कं तदेव खमिति सुखे न विशेषितस्य भूतत्वनिरासः तथा कं कथंभूतं तदेव कमिति
विभुत्वेन विशेषितस्य कस्य जन्यत्वनिरास इति व्यतिरेकस्त्वविनाह तत्र खमित्यादिना आत्मविद्येति श्रुतिर्विरोधात्मती

उच्यते प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति एतदग्नीनां वचनं श्रुत्वोपकोसल उवाच विजानाम्यहं यत्प्राणो ब्रह्म कं च खं
च न तु विजानामीति तत्रेदं प्रतिवचनं यद्वाव कं तदेव खं यदेव खं तदेव कमिति तत्र खंशब्दो भूताकाशे निरू
ढो लोके यदि तस्य विशेषणत्वेन कंशब्दः सुखवाची नोपादीयेत तथा सति केवले भूताकाशे ब्रह्मशब्दो नामा
दिष्विव प्रतीकाभिप्रायेण प्रयुक्त इति प्रतीतिः स्यात् तथा कंशब्दस्य विषयेन्द्रियसंपर्कजनिते सामये सुखे प्रसिद्ध
त्वाद्यदि तस्य खंशब्दो विशेषणत्वेन नोपादीयेत लौकिकं सुखं ब्रह्मेति प्रतीतिः स्यादितरेतरविशेषितौ तु कंखंश
ब्दौ सुखात्मकं ब्रह्म गमयतः तत्र द्वितीये ब्रह्मशब्दे उपादीयमाने कं १०

कथ्यानमन्त्रानिष्टमिति भावः सामर्थ्य इति श्रम
यो दोषः साधनप्राप्तत्वानित्यत्वादिः तत्सहितत इत्यर्थः प्रत्येकग्रहणे दोषमुक्त्वा द्वयोर्ग्रहणे फलितमाह इतरेतरेति
विशेषतार्थकत्वादित्यर्थः नन्वेकं ब्रह्मेत्येवास्तु ध्येयं चेद्ब्रह्मपदान्तरं किमर्थमित्यत आह तत्रेति विशेषणत्वेन खस्य भूतत्वव्या
वर्तकत्वेनेत्यर्थः ब्रह्मशब्दः शिरो ययोस्तत्त्वमिति विग्रहः अध्येयत्वे को दोषस्तत्राह इष्टं हीति मार्गोक्तास्मरण ॥ ॥

विद्यात्वावगमादितिभावः आत्मविद्यापदेनोपसंहारादपि प्रकृतं ब्रह्मेत्याह प्रत्येकं चेति पृथिव्यग्निरन्नमादित्य इति मम च
तत्त्वमनन्तवो विभूतिरिति गार्हपत्य उपदिदेश आपो दिशो नक्षत्राणि चंद्रमा इति अन्वाहार्यपचन उवाच प्राण आकाशो द्यौ

प्र॰ भा॰
११२
113

ब्रह्मेत्युपकोसलमनेकं शुद्धस्य विशेषणत्वेनैवोपयुक्तत्वात्स्वरूपस्य गुणस्याध्येयत्वं स्यात्तन्मा भूदित्युभयोः कं खं च
द्वयोर्ब्रह्मणि स्थितत्वं कं ब्रह्म खं ब्रह्मेति इष्टं हि स्वरूपस्यापि गुणस्य गुणिब्रह्मोपयत्वं तदेवं वाक्योपक्रमे स्वरूपविशिष्टं ब्रह्मो
पदिष्टं प्रत्येकं गार्हपत्यादयोऽग्नयः स्वं स्वं महिमानमुपदिदिशुः एषा सोम्य तेऽस्मद्विद्यात्मविद्या चेत्युपसंहरन्तः
पूर्वं च ब्रह्म निर्दिष्टमिति ज्ञापयन्त्याचार्यस्तु ते गतिं वक्तेति च गतिमात्राभिधानप्रतिज्ञानमर्थान्तरविवक्षां वारयति
यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत इति चाक्षिस्थानं पुरुषं विजानतः पापेना
नुपघातं ब्रुवन्नक्षिस्थानस्य पुरुषस्य ब्रह्मत्वं दर्शयति तस्मात्प्रकृतस्यैव ब्रह्मणोऽक्षिस्थानतां संयद्वामगुणं च
चोक्त्वार्चिरादिकां तद्विदो गतिं वक्ष्यामीति गतिमुपक्रमते य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचेति
श्रुतोपनिषत्कस्य गत्यभिधानाच्च ॥ ॥

विद्यादिति स्वमहिमानमाह वनीयो जनानां गाद्वेति विभागः इयमस्मा
कमग्नीनां विद्या प्रत्येकमुक्ता आत्मविद्या तु पूर्वमस्माभिर्मिलित्वा प्राणो ब्रह्मेत्युक्तेत्यर्थः उच्यतामग्निभिर्ब्रह्मविद्या यात्मा
गुरुणोच्यतां वक्तृभेदादिति तत्राह आचार्यस्त्विति एकवाक्यतानिश्चयाद्वक्तृभेदेऽपि नार्थभेद इत्यर्थः ॥ ॥

११२

श्रुताश्रुत्विताउपनिषद्दहस्यंसगणाब्रह्मलोयामनंयेनतस्ययागतिः श्रुतोस्मृतौचप्रसिद्धातस्याश्रुन्नाभिधानाल्लिंगादितिसू
त्रार्थमाह इतश्चेति यस्माद्दृश्यतेततस्मादित्यन्वयः अथैति देहपातानंतरमित्यर्थः स्वधर्मस्तपोब्रह्मचर्यश्रद्धाविद्याभिरा
त्मानंध्यात्वातयाध्यानविद्यायोत्तरंदेवयानमार्गप्राप्यतेनोत्तरेणायथादित्यद्वारामसगणाब्रह्मस्थानंगच्छति एतद्धैतमंलिंग

इतश्चाप्तिस्थानः पुरुषः परमेश्वरोयस्मात्तश्रुतोपनिषत्कस्यश्रुताहस्यविज्ञानस्यब्रह्मविदोयागतिर्देवयानाख्या
ख्याप्रसिद्धाश्रुताथयोत्तरेणातपसाब्रह्मचर्येणाश्रद्धयाविद्ययात्मानमन्विष्यादित्यमभिजायंतएतद्वैप्राणानामाय
तनमेतत्परायणमेतस्मान्नपुनरावर्त्तंतइतिस्मृतावप्यग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणंतत्रप्रयागच्छंति
ब्रह्मब्रह्मविदोजनाइतिमेवेदाविपुरुषविदोभिधीयमानाद्दृश्यते अथयदुचैवास्मिञ्छव्यंकर्मकुर्वंतियदिचनार्चि
षमेवाभिसंभवंतीत्युपक्रम्याश्रादित्याच्चंद्रमसोविद्युतंतत्पुरुषोऽमानवः सएनान्ब्रह्मगमयत्येषदेवपथो
ब्रह्मपश्चएतेनप्रतिपद्यमाना ॥ ॥
थ

दमृतमभयमेत
३

ब्रह्मप्राणानांव्यष्टिसमष्टिरूपाणामायतनंलिंगात्मकहिरण्यगर्भरू
पंवस्तुतस्यैतदमृतादिरूपंनिर्गुणंमवीधिष्ठानमतः कार्यंब्रह्मप्राप्यतत्स्वरूपनिर्गुणंज्ञात्वामुच्यतेइत्यर्थः अग्निर्देवज्यो
तिर्देवताएवमहरादयादेवताएवताएवस्मृताउक्ताः अस्मिन्नुपासकेस्तेसंतिपदद्विपत्रादयः प्राकृषशवसंस्कारादि

शां॰ भा॰
११४

केऽर्वंति यदि च नऽर्वंत्तु भयथाप्युपास्ति महिम्नार्चिरादिदेवावक्रमेणागच्छति अर्चिषमग्निं ततोऽहरन्हः शुक्लपक्षं ततउत्तरायणं त
स्मात्संवत्सरं ततो देवलोकं ततो वायुं वायोरादित्यं ततश्चन्द्रं चंद्राद्विद्युतं गत्वा तत्र विद्युल्लोके स्थितानुपासकान्मानवः पुरुषो ब्रह्म
लोकादागत्य कार्यं ब्रह्मलोकं प्रापयति एषोऽर्चिरादिभिर्देवैर्विशिष्टो देवपथः गंतव्येन ब्रह्मणा योगाद्ब्रह्मपथश्चैतत्पतेन कार्यं

११५

नाऽऽमं मानवमावर्तं नावर्तंते इति तदिह ब्रह्मविद्विषयया प्रसिद्ध्या गत्यादिस्थानस्य ब्रह्मत्वं निश्चीयते अनवस्थि
तेरसंभवाच्चनेतरः ॥ १७ यत्तु नरकं छायात्मा विज्ञानात्मा देवतात्मा वास्यादादिस्थानत्वमुच्यते न छायात्मादिरि
तरद्ग्रहणमर्हतीति कस्मादनवस्थितेः न तावच्छायात्मनश्चक्षुषि नित्यमवस्थानं भवति यदैव हि कश्चित्पुरुषा
श्चक्षुरासीदति तदा चक्षुषि पुरुषच्छायादृश्यते अपगते तस्मिन्न दृश्यते ॥

ब्रह्म प्रतिपद्यमाना उपासका इमं मानवं मनोः सर्गमावर्तं जन्ममरणावृत्तियुक्तं नावर्तंते नागच्छंतीत्यर्थः चक्षुरासीदती
ति उपगच्छतीत्यर्थः अनवस्थितस्योपास्यत्वं सदा नास्तीतीति भावः ॥

११४

किंचात्मवत्यानात्स्वातिशयउपास्यः नचतस्यमचक्षुषादर्शनंभवतीत्याह यएषइति अक्ष्णतर्द्दिग्प्रदेशेद्दृश्यमानस्योपास्तिरित्यतआ
ह तवेति कल्पनागौरवादित्यर्थः युक्तिसिद्धानवस्थितत्वेश्रुतिमाह असेति छायाकारस्यविंवस्यनाशमदर्शनमनुसरत्येष
छायात्मानश्यतीत्यर्थः जीवंनिरस्यति तथेति ज्ञातायस्याप्यहमित्यविशेषेणजीवस्याभिव्यंजिकेअन्तरेवस्थानमित्युक्तं।

यएषोक्षिणिपुरुषइतिचश्रुतिः संनिधानात्स्वचक्षुषिदृश्यमानंपुरुषमुपास्यत्वेनोपदिशति नचउपासनाका
लेछायाकरंकंचित्पुरुषंचक्षुः समीपेसंनिधाप्योपास्तइतियुक्तंकल्पयितुमस्यैवशरीरस्यनाशमन्वेषनश्यतीति
चश्रुतिः छायात्मनोनवस्थितत्वंदर्शयत्यसंभवाच्चतस्मिन्नमृतत्वादीनांगुणानांनछायात्मनिप्रतीतिः तथावि
ज्ञानात्मनोपिमायारणक्लृप्तशरीरेंद्रियसंबंधेसति नचक्षुषैवावस्थितत्वंवक्तुंशक्यंब्रह्मणस्तव्यापिनोदृष्टा
उपलब्धार्थोल्लृदयादिदेशविशेषसंबंधः समानश्चविज्ञानात्मन्यप्यमृतत्वादीनांगुणानामसंभवोययपिविज्ञाना
त्मापरमात्मनोनन्य एवतथाप्यविद्याकामकर्मकृततत्स्मिन्मर्त्यत्वमध्यारोपितंभयंचेत्यमृतत्वाभयत्वेनोपपद्ये

मित्यर्थः दृष्टइति श्रुताविति शेषः नतुचक्षुः सूर्योजायतेसूर्योस्तमेतीतिचक्षुवंश्रमरादेवाइतिप्रसिद्धिबाधितमित्याशंक्या
ह अमरत्वमपीति भीषाभयेनास्मादीश्वराद्वायुश्चलतीति अग्निश्चेंद्रश्चस्वस्वकार्यंकुरुतः उक्तोपिचपापंचमोमृत्युः समासायु
षांनिकटीभवतीत्यर्थः ईश्वरपदेदृश्यतइत्यप्युक्तंतत्राह अस्मिन्निति दर्शनमनुभवः ॥

अस्मिन्निति दर्शनमनुभवः तस्य शास्त्रेऽक्त तस्य शास्त्रमेव करणं कल्पमं निधानात तथा च शास्त्रकरणको विद्वदनुभव उपा

यद्यामृतत्वादयश्च तस्मिंस्तेनैश्वर्यादनुपपन्ना एव देवतात्मनस्तु रश्मिभिरेषोऽस्मिन्प्रतिष्ठित इति श्रुतेः
यद्यपि च तत्त्वबद्धस्यानंत्यात्तथाप्यात्मत्वं तावन्न संभवति परागन्धत्वादमृतत्वादयोऽपि न संभवंत्यप्र
तिप्रलयश्रवणादमृतत्वमपि देवानां चिरकालावस्थानापेक्षयैश्वर्यमपि परमेश्वरायत्तं न स्वाभाविकं भी
षास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति मंत्रवर्णात तस्मात्परमे
श्वरस्यैवायममृतस्थाने प्रत्ययतत्वः अस्मिंश्च पदे तदृष्यश्च इति प्रसिद्धवदुपादानं शास्त्रायापेक्षं विद्वद्विषयं प्रो
रोचनार्थमिति सिद्धावेयं अंतर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥

सन्नात्मतया ईश्वर उच्यत इत्यर्थः तस्मादुपकोसलविद्यावाक्यमुपास्येऽब्रह्मणि समन्वितमिति सिद्धं अंतर्याम्यधिदैवादिषु तद्धर्मव्य
पदेशात् ॥

बृहदारण्यकवाक्यमुदाहरति यइति अंतर्यामिब्राह्मणेप्रतीयमानार्थमाह अत्रेति यः पृथिव्यामित्यादिनादेवताः पृथिव्यायाअधि
ष्ठातृत्वमयितान्यायेनतथाचयः सर्वेषुलोकेष्वित्यपिलोकंयः सर्वेषुवेदेष्वित्यपिवेदंयः सर्वेषुयज्ञेष्वित्यपियज्ञंयः सर्वेषुभूतेष्वि
त्यपिभूतंयः प्राणेतिष्ठन्नित्यादिनाआत्मानीतंतमध्यात्मंचेतिविभागः अशरीरस्यनियंतृत्वसंभवासंभवाभ्यांशंयः पूर्वत्रेश्वर

यइमंचलोकंपरंचलोकंसर्वाणिचभूतानियोंतरोयमयतीत्युपक्रम्यश्रूयते यः पृथिव्यांतिष्ठन्पृथिव्याअंतरोयंपृ
थिवीनवेदयस्यपृथिवीशरीरंयः पृथिवीमंतरोयमयत्येषतआत्मांतर्याम्यमृतइत्यायत्राधिदैवतमधिलोकमधी
यवेदमधियज्ञमधिभूतमध्यात्मंचकश्चिदंतरावस्थितोयमयितांतर्यामीतिश्रूयते सकिमधिदैवाद्यभिमानीदेवा-
तात्मावाकश्चित्किंवाप्राप्ताणिमाद्यैश्वर्यः कश्चिद्योगीकिंवापरमात्माकिंवार्थांतरंकिंचिदितिअपूर्वसंज्ञादर्शनात्संश
यः किंतावत्प्रतिभातिसंज्ञायाअप्रसिद्धत्वात्संज्ञयाअप्रसिद्धेनार्थांतरेणकेनचिद्भवितव्यमिति अथवात्मानि
रूपितमर्थांतरंप्राकाममस्तीत्यभ्युपगंतमंतर्यामिप्राहस्यांतर्यमनयोगेनप्रवृत्तोनात्यंतमप्रसिद्धः तस्मात्पृथिव्याद्यभि

स्यानित्स्थानत्वसिद्धयेपृथिव्यादिस्थाननिर्देशोदृष्टांतउक्तस्तस्यदृष्टांतत्वाकस्येश्वरपरत्वमत्रादित्यस्समाप्यते इत्यादेपसंगतिः अ
तः पूर्वफलेनास्यफलवत्वमवांतरफलंतु पूर्वपक्षेजीवस्यैरोपाधिः सिद्धांतेप्रत्यग्ब्रह्मज्ञानमितिमंतव्यंस्वयमे ॥

वारुचिंवदस्यवांतरमाह अथेवेति अनिश्चितार्थफलाभावेनाफलस्यवेदार्थत्वायोगादितिभावः तथाचश्रूयतेदेवः यस्यदेवस्या
यतनंशरीरंलोकातेनेनेतिलोकस्यवक्तुः ज्योतिः सर्वार्थप्रकाशकंमनइत्यर्थः उपाक्रमादिनांतर्याम्यैकानिश्चयादनेकदेवपदो

कश्चिद्देवोंतर्यामीस्यात्तथाचश्रूयतेपृथिव्येवयस्यायतनमग्निर्लोकोमनोज्योतिरित्यादिसचकार्यकरणवत्त्वात्पृथिव्या
दीनंतास्तिष्ठन्यमयतीतियुक्तंदेवतात्मनोयमयितृत्वंयोगिनोवाकस्यचित्सिद्धस्यसर्वानुप्रवेशेनयमयितृत्वंस्यात्त्वात्र
परमात्माप्रतीयतेअकार्यकरणत्वादित्येवंप्राप्ते इदमुच्यतेयोंतर्याम्यधिदैवादिषुश्रूयतेसपरमात्मैवस्यान्नान्या
इतिकुतस्तद्धर्मव्यपदेशात्तस्यहिपरमात्मनो धर्माइहनिर्दिश्यमानादृश्यंतेपृथिव्यादितावदधिदैवादिभेदभिन्नं
समस्तंविकारजातंअंतस्तिष्ठन्यमयतीतिपरमात्मनोयमयितृत्वंधर्मउपपद्यतेसर्वविकारकारणत्वेसतिसर्वश
क्त्युपपत्तेः एषतआत्मांतर्याम्यमृतइत्यात्मत्वामृतत्वेमुख्येपरमात्मनउपपद्येते ॥

नपुनःकश्चिदित्याह योगिनोवेति आगंतकसिद्धस्यांतर्यामित्वेसिद्धसाधनकल्पनागौरवान्नित्यसिद्धएवांतर्यामीतिसि
द्धांतइति एवंप्राप्तइति

देवतानिराम्रेहेत्वंतरमाह यः पृथिवीति ईश्वरेणनियंतान्यशरीरत्वाद्घटवदित्युक्तं निरस्यते नैषदोषइति नियमातिरिक्तशरी
रस्यान्यत्वं दाहेतः शरीरासंबंधित्वं वा आद्येस्वदेहनियंतरिजीवेव्यभिचारः द्वितीयस्त्वसिद्धः ईश्वरस्यस्वाविद्योपार्जितसर्वसंबंधित्व

यः पृथिवीन्नवेदेतिच पृथिवीदेवतायाअविज्ञेयमंतर्यामिणं ब्रुवन्देवतात्मनोऽन्यमंतर्यामिणं दर्शयति पृथिवीदेव
ताऽहमस्मिपृथिवीत्यात्मानं विजानीयात तथाहृष्टेऽक्षतइति व्यपदेशोरूपादिविहीनत्वात्परमात्मनउपपद्यतेय
त्वकार्यकारणस्यपरमात्मनोयमयितृत्वंनोपपद्यतइति नैषदोषः यान्नियच्छति तत्कार्यकरणैरेव तस्यकार्यक
रणवत्त्वोपपत्तेः तस्याप्यन्योनियंतेत्यनवस्थादोषश्चनसंभवति भेदभावाद्भेदे हि सत्यनवस्थादोषोपपत्तिः
तस्मात्परमात्मैवांतर्यामी नचस्मार्तमतद्धर्माभिलापात् १८ रूपादेतद्दृष्टत्वादयोधर्माः सांख्यस्मृतिकल्पितस्य
प्रधानस्याप्युपपद्यंते रूपादिहीनतयातस्यैतैरभ्युपगमात्प्रतर्क्यमविज्ञेयंप्रसुप्तमिवसर्वतइति हि स्मरंति तस्यापि
नियंतृत्वं सर्वविकारकारणत्वादुपपद्यते तस्मात्प्रधानमंतर्यामिशब्दं स्यादीतिचेन्न ।

दित्याह यान्नियच्छतीति शरीरेणनियंतेति लोकदृष्टिमनुसृत्यैतदुक्तं वस्तुतस्त्वचेतनसान्निध्याज्जडस्यव्यापारेणनियमनं तच्छक्तिम
त्त्वंतन्नियंतृत्वं तच्चाचिंत्यमायाशक्तेश्चिदात्मनः शरीरंविनैवोपपन्नं ननुदेहनियंताजीवस्तस्मान्योऽनियंताचेत ॥ ॥

स्याप्यन्यस्तत्वनवस्थेत्यत आह तस्यापीति निरंकुशं सर्वनियंतृत्वमीश्वरस्य श्रुतं तेन तस्य नियंत्रंतरानुमाने श्रुतिबाधः इतिनानव
स्थेत्यर्थः यद्वाईश्वरात्मेदकल्पनया जीवस्य नियंतृत्वोक्तेः सत्यभेदाभावान्नानवस्थेत्यर्थः प्रधानं महदादिक्रमेण कथं प्रवर्ततेइ
तितर्कस्याविषयत्वादाह अप्रतर्क्यमिति रूपादिहीनत्वादविज्ञेयं सर्वतो दिक्षु प्रसुप्तमिति श्रुतिजडत्वादित्यर्थः अतदप्रथा

शब्दमित्यत्र निराकृतमपि सत्प्रधानमिदानीं दृष्टत्वादिव्यपदेशसंभवेन पुनराशंक्यते तत उत्तरमुच्यते न च स्मार्तं प्रधा-
नमंतर्यामिशब्दं भवितुमर्हति कस्मादतद्धर्माभिलापात् यद्यप्यदृष्टत्वादिव्यपदेशः प्रधानस्य संभवति तथा-
पि न द्रष्टृत्वादिव्यपदेशः संभवति प्रधानस्याचेतनत्वेन तैरभ्युपगमात् अदृष्टो द्रष्टा श्रुतः श्रोता मतो मंता विज्ञातो विज्ञात
इति हि वाक्यशेष इह भवत्यात्मत्वमपि न प्रधानस्योपपद्यते यदि प्रधानमात्मत्वद्रष्टृत्वाद्यसंभवान्नांतर्याम्यभ्युपगम्य-
ते शारीरस्तर्हि अंतर्यामी भवतु शारीरो हि चेतनत्वात् द्रष्टा श्रोता मंता विज्ञाता च भवत्यात्मा च प्रत्यक्त्वात् संभवत्यस्य तस्य
धर्माधर्मफलोपभोगोपपत्तेः अदृष्टत्वादयश्च धर्माः शारीरस्य प्रसिद्धाः दर्शनादिक्रियायाः ॥ ॥ ॥

नं चेतनं तस्य धर्माणामभिधानादित्यर्थः उत्तरसूत्रनिरस्यांशंकामाह यदि प्रधानमित्यादिना अमृतश्चेति विनाशिनो देहां
तरभोगानुपपत्तेरित्यर्थः ॥ ॥ ॥ ॥

यथा देवदत्तकर्तृकगमनक्रियायाः ग्रामः कर्म न देवदत्तस्य तथात्मकर्तृकदर्शनादिक्रियायाः अनात्मा विषयः नत्वा-
त्मा क्रियायाः कर्तृविषयत्वायोगादित्याह कर्त्तरीति क्रियायां गुणः कर्त्ता प्रधानं कर्म तत्रैकस्यां क्रियायामेकस्य गु-

कर्त्तरि प्रवृत्तिविरोधात् न द्रष्टेर्द्रष्टारं पश्येदित्यादिश्रुतिभ्यश्च तस्य च कार्यकरणासंघातमंतर्यमयितृत्वं शीलं भोक्तृ-
त्वात् तस्माच्छारीरोंतर्याम्यत उत्तरं पठति शारीरश्चोभयेपि हि भेदेनैनमधीयते २० नेति पूर्वसूत्रादनुवर्तते शारीर-
श्च नांतर्यामीष्यते कस्माद्यद्यपि द्रष्टृत्वादयो धर्मास्तस्य संभवंति तथापि घटाकाशवदुपाधिपरिच्छिन्नत्वान्न कात्-
र्त्स्न्येन पृथ्व्यादिष्वंतरवस्थातुं नियंतुं च शक्नोति अपि चोभयेपि हि शाखिनः काण्वा माध्यंदिनाश्चांतर्यामिणो भे-
देनैनं शारीरं पृथिव्यादिवदधिष्ठानत्वेन चाधीयते यो विज्ञाने तिष्ठन्निति काण्वाः य आत्मनि तिष्ठन्निति माध्यंदिना

णत्वप्रधानत्वयोर्विरोधान्न कर्तुः कर्मत्वमित्यर्थः द्रष्टृर्द्रष्टारमात्मानं तया द्रष्टा न विषयीकुर्यादित्यादिश्रुतेभ्यश्चाद्रष्टृत्वादि-
श्रुतेश्चाद्रष्टृत्वादिधर्मः शारीरस्येत्याह नेति अपिशब्दसूचितं हेतुमुक्त्वा कंठोक्तं हेतुमाह अपि चोभयेपीति भेदेनेति सूत्रा-
ज्ञातात्विकभेदभ्रांतिं निरसितुं शंकते कथमिति ॥

शा॰भा॰
११८

नन्वेवैकोभोक्ताजीवईश्वरस्त्वभोक्तेतिनविरोधइतिशंकते कापुनरितितयोर्भेदः श्रुतिविरुद्धइतिपूर्ववाद्याह नान्यइतिपदश्रु
त्यर्थमाह अत्रेति श्रुतेरर्थांतरमाशंक्यनिषेधयति नियंत्रंतरेत्यादिना नकेवलमप्रसक्तप्रतिषेधः किंतु विशेषेणद्रष्टंतरनिषे

११४

धिश्चास्मिन्नन्यावत्वादेवमवत्यात्मशब्दः शारीरस्य वाचकः योविज्ञानेतिष्ठन्नित्यस्मिन्नपिपाठेविज्ञानशब्देन शारीरउच्य
ते विज्ञानमयोहिशारीरइतितस्माच्छारीरादन्यईश्वरोंऽतर्यामीतिसिद्धं कथंपुनरेकस्मिन्देहेद्वौद्रष्टारावुपपद्यतेयश्चा
यमीश्वरोंऽतर्यामीयश्चायमितरः शारीरः कापुनरिहानुपपत्तिर्नान्योतोस्तिद्रष्टेत्यादिश्रुतिवचनंविरुध्येतात्रहिप्रकृ
तादंतर्यामिणोन्यंद्रष्टारंश्रोतारंविज्ञातारंचात्मानंप्रतिनियंत्रंतरप्रतिषेधतिनियंत्रंतरप्रतिषेधार्थमेतद्वचनमि
तिचेन्ननियंत्रंतराप्रसंगादविशेषश्रवणाच्चात्रोच्यते अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्तोयंशारीरां
तर्यामिणोर्भेदव्यपदेशोनपारमार्थिकः ॥

यश्रुतेरेवंतर्याम्यंतरनिषेधार्थत्वेबाधकमित्याह अविशेषेति तस्माद्यआत्मनितिष्ठन्नितिश्रुतौचद्रष्टृभेदोक्तिरयुक्तानान्य
इतिवाक्यशेषेभेदनिरासादितिप्राप्तेभेदउपाधिकल्पितः श्रुतिसूत्राभ्यामनूद्यतइतिसमाधत्ते अत्रोच्यतइति ॥ ॥

११८

भेदः सत्यः किं न स्यादत आह एको हीति गौरवेणाद्वयोर्द्वयोर्धीगोचरत्वासंभवादेकपतङ्गोचरः तदगोचरस्य चद्वदन्नामत्वात्रात्म
त्वात्रात्मभेदः सत्य इत्यर्थः ततश्चेति कल्पितभेदांगीकारे छेदापेक्षं सर्वमुपपन्नमित्यर्थः तस्मादन्तर्यामिब्राह्मणं चैव ब्रह्मणि समा
न्वितमिति सिद्धं अदृश्यत्वादिगुणको धर्मोक्तेः मुंडकवाक्यमुदाहरति अथेति कर्मविद्यारूपापरविद्योक्तानन्तरं यया निर्गुणं ब्रह्मा

एको हि प्रत्यगात्मा भवति न द्वौ प्रत्यगात्मानौ संभवतः एकस्यैव तु भेदव्यवहार उपाधिकृतो यथा घटाकाशो महाका
श इति ततश्च ज्ञातृज्ञेयादिभेदश्रुतयः प्रत्यक्षादीनि च प्रमाणानि संसारानुभवो विधिप्रतिषेधशास्त्रं चेति सर्वमेतदु
पपद्यते तथा च श्रुतिः यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यविद्याविषये सर्वं व्यवहारं दर्शयति यत्र त्वस्य स
र्वमात्मैवाभूत्तत्केन कं पश्येदिति विद्याविषये सर्वं व्यवहारं वारयति अदृश्यत्वादिगुणको धर्मोक्तेः २१ अथ प
रा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सु
सूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः इति श्रूयते तत्र संशयः किमयमदृश्यत्वादिगुणको भूतयोनिः प्रधा

यति परा सोच्यते तामेव विषयोक्त्या निर्दिशति यत्तदिति अद्रेश्यं ज्ञानेन्द्रियैः अग्राह्यं कर्मेन्द्रियैः अगोत्रं वंशः वर्णो ब्राह्म
णत्वादिजातिः चक्षुःश्रोत्रशून्यमचक्षुःश्रोत्रं पाणिपादशून्यमपाणिपादं ज्ञानकर्मेन्द्रियविकलमित्यर्थः विभुं प्रभुं सत्त्व
त्मे उद्देयत्वात्

शा॰भा॰
११५

नित्याभ्यां पदाभ्यां नाशायतनयोर्निरासः भूतानां योनिं प्रकृतिं यत्पश्यंति धीराः पंडिताः तददृश्यत्वं तद्विद्यापरेत्यन्वयः अदृश्यत्वा-
दिगुणानां ब्रह्मप्रधानसाधारणत्वात्संशयः पूर्ववद्द्रष्टृत्वादीनां चेतनधर्माणामत्राश्रुतेरस्तु प्रधानमिति प्रत्युदाहरणेन पूर्वो

शारीरश्चाहोस्वित्परमेश्वर इति तत्र प्रधानमचेतनं भूतयोनिरिति युक्तमचेतनानामेव तस्य दृष्टांतत्वेनोपादानाद्यथो-
र्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवंति यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह
विश्वमिति ननूर्णनाभिः पुरुषश्च चेतनाविह दृष्टांतत्वेनोपात्तौ नेति ब्रूमो न हि केवलस्य चेतनस्य तत्र सूत्रयो-
नित्वं केशलोमयोनित्वं वास्ति चेतनाधिष्ठितं ह्यचेतनमूर्णनाभिशरीरं सूत्रस्य योनिः पुरुषशरीरं केशलोम्नामिति
प्रसिद्धमपि च पूर्वत्राऽदृष्टत्वाद्यभिलापसंभवेऽपि द्रष्टृत्वाद्यभिलापासंभवान्न प्रधानमभ्युपगतमिह त्वद्रेश्यत्वादयो
धर्माः प्रधाने संभवंति न चात्र विरुध्यमानो धर्मः कश्चिदभिलप्यते ॥

पतयति तत्रेति पूर्वपक्षप्रधानाद्युपास्तिः सिद्धांते निर्गुणधीरिति फलं ऊर्णनाभिर्लूताकीटः तंतून्स्वदेहात्सृजत्युपसंह-
रति चेत्यर्थः सतो जीवतः ननु सर्वैर्निरस्तं प्रधानं कथमुत्थाप्यते तत्राह अपि चेति ॥

११६

अत्र प्रधाने विरुध्यमानोऽसंभावितो वाक्यशेषः अत इति शंकते ननु य इति पंचमंत्रान्तरश्रुताद्भूतप्रकृतेः प्रत्य-
भिज्ञानात्त्वयमांतरश्रुष्टो ऽक्षस्य जगन्निमित्तेश्वरस्य सर्वज्ञत्वादिकमित्याह संदिग्धेन वाक्यशेषादिति न्यायेन सिद्धांत

नन्वसर्वज्ञः सर्वविदित्ययं वाक्यशेषोऽचेतने प्रधाने न संभवति कथं प्रधानं भूतयोनिः प्रतिज्ञायते इत्यत्रो-
च्यते यया तदक्षरमधिगम्यते यत्तदद्रेश्यमित्यत्र श्रुतेनादृश्यत्वादिगुणकं भूतयोनिं श्रावयित्वा पुनरं-
ते श्रावयिष्यत्यक्षरात्परतः पर इति तत्रयः परोक्षरात् अतः स सर्वज्ञः सर्वविच्च भविष्यति प्रधानमेव
त्वक्षरशब्दनिर्दिष्टं भूतयोनिः यदा तु योनिशब्दो निमित्तवाचो तदा शारीरोपि भूतयोनिः स्याद्धर्माधर्माभ्यां
भूतजातस्योपार्जनादित्येवं प्राप्तेऽभिधीयते योयमदृश्यत्वादिगुणको भूतयोनिः स परमेश्वर एव स्या-
न्नान्य इति कथमेतदवगम्यते धर्मोक्तेः परमेश्वरस्य धर्मा इहोच्यमानादृश्यंते ॥

यति एवं प्राप्त इति चेतनाचेतनत्वेन संदिग्धे भूतयोनौ यः सर्वज्ञ इति वाक्यशेषादीश्वरत्वनिर्णय इत्युक्तं वाक्य-
शेषे भूतयोनेः प्रत्यभिज्ञापकाभावादिति शंकते ॥

ब्रा॰भा॰
१२॰

120

तन्विति जनिकर्तुः प्रकृतिरिति सूत्रेण प्रकृतेरपादानसंज्ञायां पंचमीस्मरणादक्षरात्संभवतीति प्रकृतित्वेनोक्तादक्षरस्य भूत
योनेर्वाक्यशेषात्तस्मादिति प्रकृतित्वलिंगेन प्रत्यभिज्ञानमस्तीति समाधत्ते अत्रोच्यत इति एतत्कार्यं ब्रह्मसूत्रात्मकं ना

यः सर्वज्ञः सर्वविदिति न हि प्रधानस्याचेतनस्य शारीरस्य चोपाधिपरिच्छिन्नदृष्टेः सर्वज्ञत्वं सर्ववित्त्वं वा संभव
तीत्यन्वयादक्षराद्वा निर्दिष्टाद्भूतयोनेः परस्यैवैतत्सर्वज्ञत्वं सर्ववित्त्वं च न भूतयोनिविषयमित्युक्तमत्रोच्यते नै
वं संभवति यत्कारणमक्षरात्संभवतीह विश्वमिति प्रकृतं भूतयोनिं जायमानप्रकृतित्वेन निर्दिश्यानंतरमपि
जायमानप्रकृतित्वेनैव सर्वज्ञं निर्दिशति यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नाम रूपमन्नं
च जायत इति तस्मान्निर्देशसाम्येन प्रत्यभिज्ञायमानत्वात्प्रकृतस्यैवाक्षरस्य भूतयोनेः सर्वज्ञत्वं सर्ववित्त्वं च
धर्म उच्यत इति गम्यते अक्षरात्परतः पर इत्यत्रापि न प्रकृताद्भूतयोनेरक्षरात्परः कश्चिदभिधीयते कथमेतद
वगम्यते ॥

मन्नरूपं स्थूलं ततोन्नं व्रीह्यादीत्यर्थः यदुक्तं पंचम्यंतादक्षरस्य प्रकृत्या भूतयोनेः प्रत्यभिज्ञानादचेतनत्वमिति तत्राह अक्ष
रात्पर इति ॥ १२॰

नायमत्र शब्दो भूतयोनिं परामृशतीति परविद्याधिगम्यत्वेनोक्तस्याक्षरस्य भूतयोनेरक्षरं पुरुषं वेदेत्यक्षरश्रुतत्वाच्चेयत्न
लिंगवत्वात्पूर्वमेव ब्रह्मत्वेन परामर्शादित्याह येनेति येन ज्ञानेनाक्षरं भूतयोनिं सर्वज्ञं पुरुषं वेद तां ब्रह्मविद्यां यो
ग्याय शिष्याय प्रब्रूयादित्युपक्रम्य अप्राणो ह्यमनः शुभ्रो ह्यक्षरात्परतः पर इत्युच्यमानः परो भूतयोनिरिति गम्यत इ।

येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामिति प्रकृतस्यैवाक्षरस्य भूतयोनेरदृश्यत्वादिगुणकस्य वक्तव्यत्वेन प्रतिज्ञातत्वात् कथं तर्हि अक्षरात्परतः पर इति व्यपदिश्यत इत्युत्तरसूत्रे तद्वक्ष्यामोपि चात्र द्वे विद्ये वेदितव्ये उक्ते परा चापरा चेति तत्रापरामृग्वेदादिलक्षणां विद्यामुक्त्वाब्रवीत् अथ परा यया तदक्षरमधिगम्यते। इत्यादि तत्र परस्या विद्याया विषयत्वेनाक्षरं श्रुतं यदि पुनः परमेश्वरादन्यदृश्यत्वादिगुणकमक्षरं परि। कल्प्येत नेयं परा विद्या स्यात् परापरविभागो ह्ययं विद्ययोरभ्युदयनिःश्रेयसफलतया कल्प्यते न च प्रधान विद्या निःश्रेयसफला केनचिदभ्युपगम्यते तिस्रश्च विद्याः प्रतिज्ञा।

त्यार्थः तर्हि पंचम्यंतात्क्षरशब्दार्थः क इत्याशंक्याज्ञानमिति व्यपदिश्यत इत्याह कथमिति परविद्येति समाख्याता-द्विषयस्य ब्रह्मत्वमित्याह अपि चेति ननु प्रधानविद्यापि कारणविषयत्वात्परेत्यत आह परापरविभागो हीति अनिष्टफलत्वेनापरविद्यां निर्दिश्यानुत्तमर्थेन ब्रह्मविद्यां प्रोवाचेति ॥

मु॰भा॰
१२१
121

वाक्यशेषोक्तेरित्यर्थः अस्तु प्रधानविद्यापि मुक्तिफलत्वेन परेत्यत आह नचेति ननु यः सर्वज्ञ इत्यग्रे परा विद्याविषय उक्त
तेऽद्रेश्यवाक्येन न प्रधानविद्योच्यत इत्यत आह तिसृष्वेति इतश्च भूतयोनेर्ब्रह्मत्वमित्याह कस्मिन्निति अचेतनमा
त्रस्यैकायतनस्योपादानं तज्ज्ञानात्कार्यज्ञानेपि तदकार्याणामात्मनां न भवति एवं जीवे ज्ञाते तदकार्यस्य भोग्यस्य ज्ञा

येऽस्मिन्त्वचेतनाद्भूतयोनेः परस्य परमात्मनः प्रतिपाद्यमानत्वात् द्वेयवतविद्ये वेदितव्येऽह निर्दिष्टे का-
स्मिंनु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति चैकविज्ञानेन सर्वज्ञानापेक्षणं सर्वात्मके ब्रह्मणि विव-
क्ष्यमाण एव कल्पते नाचेतनमात्रैकायतने प्रधाने भोग्यव्यतिरिक्ते वा भोक्तरि अपि च स ब्रह्मविद्यां सर्व-
विद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहेति ब्रह्मविद्यां प्राधान्येनोपक्रम्य परापरविभागेन परां विद्यामक्ष-
राधिगमनीं दर्शयंस्तस्या ब्रह्मविद्यात्वं दर्शयति साच ब्रह्मविद्यासमाख्या तदधिगम्यस्य ब्रह्मत्वे बाधितास्या-

१२१

नं न भवतीत्यर्थः ब्रह्मविद्याशब्दाच्च भूतयोनिर्ब्रह्मेत्याह अपि चेति स ब्रह्मविद्यां सर्वविद्यानां प्रतिष्ठां समासिम्भू
मिं ब्रह्मविद्यामुवाच ब्रह्मणि सर्वविद्यानां विद्याफलानां चान्तर्भावाद्ब्रह्मविद्या सर्वविद्याप्रतिष्ठा ॥

ननु परविद्याप्रकरणे किमर्थमुक्तेत्यत आह प्लवेति प्लवंते गच्छंतीति प्लवाः विनाशिनः अदृढा नित्यफलसंपादना-
शक्ताः षोडशर्त्विजः पत्नी यजमानश्चेत्यष्टादश एतेनाम निमित्तेन निमित्तेन निरूप्यंत इति यज्ञरूपाः तथाहि ऋत्विजा
याजयंतीति यष्टुं कारयंतीत्यृत्विजः यजत इति यजमानः पत्युर्नो यज्ञसंयोगे इति सूत्रेण पतिशब्दस्य नकारांतादेशो यज्ञ

अथ पराङ्ख्वेदादिलक्षणा कर्मविद्या ब्रह्मविद्योपक्रमऽपन्यस्यते ब्रह्मविद्याप्रशंसायै प्लवा ह्येते अदृढा यज्ञरूपा अ-
ष्टादशोक्तमवरं येषु कर्म एतच्छ्रेयो येभिनंदंति मूढा जरामृत्युं ते पुनरेवापियंतीत्येवमादिनिंदावचनान्निर्वि-
ण्णाय परां विद्यां ततो विरक्तस्य परविद्याधिकारं दर्शयति परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्ना-
स्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति यत्तु कर्मचेतनानां पृ-
थिव्यादीनां दृष्टांतत्वेनोपादानाद्दार्ष्टांतिकेनाप्यचेतनेनैव भूतयोनिना भवितव्यमिति तदयुक्तं न हि दृष्टां-
तदार्ष्टांतिकयोरत्यंतसाम्येन भवितव्यमिति नियमोस्ति अपि च स्थूलाः पृथिव्यादयो दृष्टांतत्वेनोपात्ता ॥

संबंधे विहित इति पत्नी एवमृत्विगादिनाम प्रवृत्तिनिमित्तं यज्ञरूपाः येष्ववरमनित्यफलकं कर्म उक्तमुक्तं एतदेव का-
र्मश्रेयो नान्यदात्मज्ञानमिति ये मूढास्तुष्यंति ते पुनः पुनर्जन्ममरणमाप्नुवंतीत्यर्थः तद्विज्ञानार्थं ब्रह्मज्ञानार्थं गुरुम-
भिगच्छेदेवेति नियमः ब्रह्मनिष्ठ

शा॰ भा॰
१२२

स्याध्यनधीनवेदस्यग्रहणत्वं वारयति श्रोत्रमिति कार्यमुपादानाभिन्नमित्यंशे दृष्टांतः सर्वस्यामेतवाप्यनिष्टापत्तेर्वि-
त्याह अपि च स्थूला इति विशेषणान्न जीवो भेदोक्तेर्न प्रधानमिति हेतुद्वयं विभज्य व्याचष्टे विशिनष्टि हीत्यादिना दि-

122

इति न स्थूल एव दार्ष्टांतिको भूतयोनिरभ्युपगम्यते तस्माददृश्यत्वादिगुणको भूतयोनिः परमेश्वरः विशेषणभे
दव्यपदेशाभ्यां च नेतरौ २२ इतश्च परमेश्वर एव भूतयोनिर्नेतरौ शारीरः प्रधानं वा कस्माद्विशेषणभेदव्यप
देशाभ्यां विशिनष्टि हि प्रकृतं भूतयोनिं शारीराद्विलक्षणत्वेन दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्यजः अ
प्राणो ह्यमनाः शुभ्र इति न ह्येतद्दिव्यत्वादिविशेषणमविद्याप्रत्युपस्थापितनामरूपपरिच्छेदाभिमानिनः
तद्धर्मान्स्वात्मनि कल्पयतः शारीरस्योपपद्यते तस्मात्साक्षादौपनिषदः पुरुष इहोच्यते तथा प्रधानादपि प्र
कृतं भूतयोनिं भेदेन व्यपदिशत्यक्षरात्परतः पर इति ॥ ॥

द्योद्योतनात्मकः स्वयंज्योतिरमूर्तः पूर्णः पुरुषः
पुरीशयः प्रत्यगात्मा वाह्यं स्थूलमाभ्यंतरं सकारणं सूक्ष्मं ताभ्यां सहाधिष्ठानत्वेन तिष्ठतीति सबाह्याभ्यंतरः हि तयोः श्रु
तिषु प्रसिद्ध इत्यर्थः अविद्याकृतं नामरूपात्मकं शरीरं तेन परिच्छेदोस्त्यत्वं तस्य शारीरस्य धर्मा जाड्यमूर्तत्वादीनित्यर्थः ॥

१२२

नन्वक्षरशब्देन प्रधानोक्त्यवगाहूतं प्रधानस्य प्रतिज्ञातं वाध्येत तत्राह अक्षरमव्याकृतमिति अश्नोति व्याप्नोति स्वविकारजाता-
मित्यक्षरमव्याकृतमकृतमनादीति यावन्नामरूपयोर्बीजमीश्वरस्तस्य शक्तिरूपं परतं तत्त्वाडुपादानमपि शक्तिरित्युक्तं भू-
तानां सूक्ष्मः संस्कारायतनं तत्र तद्रूपस्थूलमीश्वरस्य चिन्मात्रः आश्रयो यस्य तत्तथा तस्यैव चिन्मात्रस्य जीवेश्वरभेदोपाधिभूत
पतीश्वरस्याश्रयो विषयो यस्येति तेन नाजीववादिनं व्याख्यातं तज्ज्ञास्यवद्भिर्भूतं एतस्मिन्नक्षरे आकाश ओतश्च प्रोत

अक्षरमव्याकृतं नामरूपबीजशक्तिरूपं भूतसूक्ष्ममीश्वराश्रयं तस्यैवोपाधिभूतं सर्वस्माद्विकारात्परो योः विक-
रस्तस्मात्परतः पर इति भेदेन व्यपदेशात्परमात्मानमिह विवक्षितं दर्शयति नात्र प्रधानं नाम किंचित्स्वतंत्रं त-
त्त्वमभ्युपगम्य तस्माद्भेदव्यपदेश उच्यते किं तर्हि यदि प्रधानमपि कल्प्यमानं श्रुत्यविरोधेनाव्याकृतादिशब्दवा-
च्यं भूतसूक्ष्मं परिकल्प्येत कल्प्यतां तस्माद्भेदव्यपदेशात्परमेश्वरो भूतयोनिरित्येतदिह प्रतिपाद्यते अत आह परमे-
श्वरो भूतयोनिः रूपोपन्यासाच्च २२ अपि चाक्षरात्परतः पर इत्यस्यानन्तरमेतस्माज्जायते

भावेनाव्याकृतस्य चिदाश्रयत्वश्रुतेः आश्रयपदलक्षणाया निर्मूलत्वाच्चिदभिन्नमूलप्रकृतेर्भेदे किंचिन्मानमस्ति नचेन्द्रो
मायाभिरिति श्रुतिर्मायानामैकाभिन्नत्वाद्यनेकश्रुतिबलेन लाघवतर्कसहायेन तस्याः श्रुतेर्बुद्धिभेदेन मायाभेदा-
नुवादित्वात् तदुक्तं सर्वेश्वराचार्यैः सत्त्वविद्याभेदोऽत्र मनागपि न विवक्षितः इति सांख्ययोगाचार्यैः पुराणेतिहासका-
रैश्चाव्यक्तमूलप्रकृत्यैक्यं वदंति नन्वविद्यैक्ये बंधमुक्तिव्यवस्था कथं न च व्यवस्था नास्तीति वाच्यं ॥

श्रवणेऽप्रवृत्त्यादिबाधापातादिति चेन्न मतेयेषामविद्यानानात्वमिच्छंति तैरपि परिणामित्वेन सांशत्वमविद्याया अंगीकार्यं तथा
याचानर्थात्मिकस्वीयसंघातात्मना परिणताविद्यांशोपहितजीवभेदाद्बंधव्यवस्था सिध्यति यस्य त्वात्मज्ञानमंतःकरणे जायते
तस्यांतःकरणपरिणामप्रज्ञानांशनाशो मुक्तिरिति एवं च श्रोतःस्वरूपानंदप्राप्तिः श्रवणादौ प्रवृत्तिर्विद्वदनुभवो जीवन्मु
क्तिशास्त्रं चेति सर्वमबाधितं भवति न चैवं नानाजीवपक्षाद्विशेषः मूलप्रकृतेर्नानात्वाभावादित्यलं परत्वे हेतुः अ

प्राण इति प्राणप्रभृतीनां पृथिवीपर्यंतानां तत्त्वानां सर्गमुक्त्वा तस्यैवंभूतयोनेः सर्वविकारात्मकं रूपमुपन्यस्य
मानं पश्यामोऽग्निर्मूर्द्धा चक्षुषी चंद्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथि
वी ह्येष सर्वभूतांतरात्मेति तच्च परमेश्वरस्यैवोचितं सर्वविकारकारणत्वान्न शारीरस्य ॥ ॥

विकार इति ननु स्वतंत्रप्रकृतेः प्रधानाद्भेद उपदेश उक्तस्तत्र कथमज्ञानाद्भेदोक्तिर्व्याख्यायते तत्राह नात्रेति कार्या
त्मना प्रधीयते इति प्रधानं अज्ञानमेव ततोऽन्यस्याप्रामाणिकत्वादित्यर्थः अतोऽज्ञानमेवंभूतयोनिरिति पूर्वपक्षं कृत्वा
निरस्यते तन्निरासेनार्थात्सांख्यकल्पितप्रधाननिरास इति मंतव्यं सूत्रकृन्मतेनादौ सूत्रं व्याचष्टे अपि चेत्यादिना प्राणो
मनः सर्वेंद्रियाणि च खं वायुर्ज्योतिरापः पृथिवीति श्रुतेः अग्निर्द्युलोकः असौ वाव लोको गौतमाग्निरिति श्रुतेः विवृता
वेदाः वागस्य त्वचः पद्भ्यां पादावित्यर्थः यस्येदं रूपमस्य एष सर्वप्राणिनामंतरात्मेत्यर्थः ॥

ननु महिम्न इति अल्पशक्तेरित्यर्थः यथा कश्चिद्दलवित्तमसमर्वात्मत्वप्रकटनार्थमहमन्नमिति साम गायति न तत्र ता-
दिकमात्मनो विवर्तते अफलत्वात्तथेदमपीत्याह अहमन्नमिति हृतिकृत्स्नात्म्योह्लषयति अन्ये पुनरिति एवं सर्वभू-
तान्तरात्मास्फूर्त्यात्माप तस्माद्भूतयोनेर्जायते इतिश्रुत्यन्वयेन हिरण्यगर्भस्यात्र जायमानत्वेनोपन्यासादित्यर्थः निरदि-

ननु महिम्नो नापि प्रधानस्यायं रूपोपन्यासः संभवति सर्वभूतान्तरात्मत्वासंभवात् तस्मात्परमेश्वर एव भू-
तयोनिः नेतराविति गम्यते कथं पुनर्भूतयोनेरयं रूपोपन्यास इति गम्यते प्रकरणादेष इति च प्रकृतानुकर्ष-
णाद्भूतयोनिं हि प्रकृत्येतस्माज्जायते प्राण एष सर्वभूतान्तरात्मेति वचनं भूतयोनिविषयमेव भवति कथोपा-
ध्याये प्रकृते तस्मादपीश्वर एव वेदे वेदाङ्गपारग इति वचनमुपाध्यायविषयं भवति तद्वत्कथं पुनस्तद्रूपत्वादिग्र-
ते णाकस्य भूतयोनेर्विग्रहवद्रूपं संभवति सर्वात्मत्वविवक्षयेदमुच्यते नतु विग्रहवत्त्वविवक्षयेत्यदोषः अ-
हमन्नमहमन्नाद इत्यादिवत् अन्ये पुनर्मन्यन्ते नायं भूतयोने रूपोपन्यासः जायमानत्वेनोपन्यासात् एत-
स्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीति ॥

त्यर्थः अग्निर्द्युलोकः यस्य समिद्रूपः सूर्यः सोपि द्युलोकाग्निस्तस्माज्जायत इत्यर्थः तस्मादित्य एव समिदिति श्रुत्यंतरात्
अतो मध्येपि सृष्टिरेव वाच्या न रूपमिति भावः यदुक्तमग्निर्मूर्द्धेत्यत्र भूतयोनेः सर्वात्मत्वं विवक्षितमिति तन्न ॥ ॥

त्याह सर्वात्मत्वमपीत्यर्थः ननु हिरण्यगर्भस्य जन्मान्यत्रानुक्तं कथमत्र वक्तव्यं तत्राह श्रुतीति अग्रे समवर्त्तत जातः सा
न्भूतग्रामस्यैकः पतिरीश्वरः प्रसादादभवत्स सूत्रात्मा यामिमां पृथिवीं च स्थूलं सर्वमधारयत् कशाहूस्य प्रजापतिं संज्ञा

पु॰ भा॰
१२४

दिपूर्वं प्राणादिपृथिव्यंतं तत्त्वजातं जायमानं निर्दिदिव उत्तरत्रापि च तस्मादग्निः समिधो यस्य सूर्य इत्येवमादि
श्रुतस्य सर्वा जोषधयो साक्षेत्येवमंतं जायमानत्वेनैव निर्दिष्टं पुनरिहैव कथमकस्मादंतरालेभूत योने हूयमु
पन्यस्येत् सर्वात्मत्वमपि सृष्टिं परिसमाप्योपदेक्ष्यति पुरुष एवेदं विश्वं कर्मेत्यादिना श्रुतिस्य त्योम्यंत्रैला।
काशरीरस्य प्रजापतेर्जन्म निर्दिश्यमानमुपलभामहे हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आ
सीत् स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम समवर्त्ततेत्यजायत इत्यर्थः तथा स वै शरीरी प्रथ
मः स वै पुरुष उच्यते आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत इति ॥ ॥ ॥ ॥

त्वे सर्वनामत्वाभावेन स्माङ्गत्ययोगादेकारलोपे नैकस्मै देवाय प्राणात्मने हविषा विधेम परिचरेमेति व्याख्येयं कतम
एको देव इति प्राण इति श्रुतेः यद्वा यस्मादयं जातस्तस्मा एकस्मै देवायेत्यर्थः एको देवः सर्वभूतेषु गूढ इति श्रुतं

१२४

ननु तस्य भूतान्तरात्मत्वं कथं तत्राह विकारेति पूर्वकल्पे प्रकृष्टोपासनाकर्मसमुच्चयानुष्ठानादस्मिन्कल्पे सर्वप्राणिसृष्टि
निदानं व्यापकं सर्वप्राण्यन्तर्गतं ज्ञानकर्मेन्द्रियप्राणात्मकं समष्टिलिङ्गशरीरं जायते तद्रूपस्य सूत्रात्मनः सर्वभूतान्तरात्म
त्वं युक्तमित्यर्थः स्वपक्षे तत्रार्थमाह अस्मिन्पक्ष इति कर्मसफलं श्रौतस्मार्तादिकं तपश्च पुरुष एवेति सर्वान्तरत्वद्रूपो
पन्यासाच्च भूतयोनौ ज्ञेये वाक्यं समन्वितमित्यर्थः वैश्वानरः छान्दोग्यश्रुता दर्शिता इति को न इति प्राचीनशालसत्ययज्ञेन्द्र

विकारपुरुषस्यापि सर्वभूतान्तरात्मत्वं संभवति प्राणात्मना सर्वभूतानामध्यात्ममवस्थानात् अस्मिन्पक्षे पु
रुष एवेदं विश्वं कर्मेत्यादि सर्वरूपोपन्यासः परमेश्वरप्रतिपत्तिहेतुरिति विद्यारण्यः वैश्वानरः साधारणशब्दवि
शेषात् २४ को न आत्मा किं ब्रह्मेति आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीति होपक्रम्य द्युसूर्य
वाय्वाकाशवारिपृथिवीनां सुतेजस्त्वादिगुणयोगमेकैकोपासननिन्दया मूर्धादिभावमुपदिश्य आम्नायते
यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नम
त्तीति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मू

द्युम्नजनबुडिला मिलित्वा मीमांसां चक्रुः को न आत्मा किं ब्रह्मेति आत्मेव ब्र
ह्मेति ज्ञापनार्थं पदद्वयं ते पञ्चापि निश्चयार्थमुद्दालकमाजग्मुः सोपि सम्यक् न वेदेति तेनोद्दालकेन सह षडप्यश्वप
तिं कैकेयं राजानमागत्योचुः आत्मानमिति अध्येषि स्मरसि तमेव नो ब्रूहीति राजा तेषां प्रीतिनिरासार्थं तान्प्रत्येक
मपृच्छत् कं त्वमात्मानमुपास्स इति ते च प्राचीनशालादयः क्रमेण प्रत्येकमूचुः दिवमेवाहं ॥ ॥ ॥

दिवमेवाहं वैश्वानरं वेद्मि आदित्यमेवाहं वेद्मि वायुमेवाकाशमेवापएव पृथिवीमेवाहं वेद्मीति ततो राजा युष्मत्सूर्यादीनां षण्णां
यथाक्रमेण सुतेजस्त्वविश्वरूपत्वपृथग्वर्त्मात्मत्वबहुलत्वरयिपत्वप्रतिष्ठात्वगुणान्विधाय भवंतो यादेमामष्टष्णा युष्मत्सूर्यादि
षु भगवतो वैश्वानरस्यांगेष्वेव प्रत्येकं वैश्वानरत्वदृष्ट्यो भवेयुस्तदा क्रमेण मूर्धपातांधत्वप्राणोत्क्रमणादेहविशीर्णत्ववस्ति
भेदपादशोषा भवंतां स्युरिति प्रत्येकोपासनं निंदित्वा सुतेजस्त्वगुणलोकोस्यात्मनो वैश्वानरस्य मूर्द्धा विश्वरूपत्वगुणकः सूर्यो।

ईश्वस्तेतरात्मस्वत्वविश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो वस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि
बर्हिर्हृदयं गार्हपत्यो मनोन्वाहार्यपचन आस्यमाहवनीय इत्यादि तत्र संशयः किं वैश्वानरशब्देन जाठरोग्निरु
पदिश्यत उत भूताग्निरथ तदभिमानिनी देवता अथवा शारीर आहोस्वित्परमेश्वर इति किं पुनरत्र संशयकार
णं वैश्वानर जाठर इति भूताग्निदेवतानां साधारणशब्दप्रयोगादात्मेति च शारीरपरमेश्वरयोस्तत्र कस्योपादा
नं न्याय्यं कस्य वा हानमिति भवति संशयः

यस्य चक्षुरित्येवं युष्मत्सूर्यादीनां मूर्धादिभावमुपदिशन्समस्तवैश्वानरध्यानवि
धिरात्मा यत इति यस्तित्वमिति अभिमुखेनायरोत्तत या विश्वं मिमीते जानातीत्यभिविमानः तं सर्वज्ञं सतदुपासकः सर्वत्र
भोगं भुंक्ते इत्यर्थः लोकाभूरादयो भूतानि शरीराण्यात्मनो जीवा इति भेदः सुष्ठु तेजः कांतिर्यस्य द्युलोकस्य सुतेजाः
विश्वानि रूपाणि अस्य सूर्यस्य एष शुक्ल एष नील इति श्रुतेः पृथक् नानाविधं वर्त्मगमनमात्मा स्वभा ॥ ॥ ॥

125

वोपस्य वायोः सन्तानागतित्वगुणकोस्य प्राणः बहुलत्वं व्यापित्वं तद्गुणस्याकाशोस्य संदेहो देहो दिहसमधनं रयित्वं धनत्वं तद्गुणस्यापो

यस्य वस्तिर्मूत्रस्थानं प्रतिष्ठात्वगुणा पृथिवी तस्य पादौ तस्य होमाधारत्वं संपादयति अथ एवेत्यादिना पूर्वमुपक्रमस्यादृष्टा

त्वादिसाधारणधर्मस्य वाक्यशेषस्य सर्वज्ञत्वादिलिंगेन ब्रह्मनिष्ठत्वमुक्तं तद्वदत्राप्युपक्रमस्य साधारणवैश्वानरशब्दस्य वाक्य

शेषस्य होमाधारत्वलिंगेन जाठरनिष्ठत्वमिति दृष्टांतेन पूर्वपक्षयति किं तावदित्यादि पूर्वोत्तरपक्षयोः जाठरब्रह्मणोर्ध्या

किं तावत्प्राप्तं जाठरोग्निरिति कुतस्तत्र हि विशेषेण क्वचित्प्रयोगो दृश्यते अयमग्निर्वैश्वानरो योयमंतः पुरुषे

येनेदमन्नं पच्यते यदिदमद्यत इत्यादौ अग्निमात्रं वा स्यात् सामान्येनापि प्रयोगदर्शनात् विश्वस्मा अग्निं भु

वनाय देवा वैश्वानरं केतुमह्नामकृण्वन्नित्यादौ अग्निशरीरा वा देवता स्यात् तस्यामपि प्रयोगदर्शनात्

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीरित्येवमाद्यायाः श्रुतेर्देवतायामैश्वर्याद्युपेतायां संभ

वादयात्मशब्दसामानाधिकरण्यात् उपक्रमे च को न आत्मा किं ब्रह्मेति केवलात्मशब्दप्रयोगादात्मश

तेफलं यदद्यते तदन्नं येन पच्यते सोयं पुरुषे शरीरांतरग्नीत्यर्थः पक्वांतरमाद अग्निमात्रं वेति विश्वस्मै भुवनाय वै

श्वानरमग्निमह्नां केतुं चिह्नं सूर्यं देवा अकृण्वन् कृतवंतः सूर्योदये दिनव्यवहारादित्यर्थः स्याहे वैश्वानरस्य त्वनुषंगः

हि यस्मात् कं सुखप्रदो भुवनानां राजा वैश्वानरो अभिमुख्येनाश्रीयते अभिश्रीरीश्वरः तस्मात्तस्य वैश्वानरस्य सुमतौ वयं

स्याम तस्यास्म

प्रा॰भा॰
१२८

हिषयाशुभमतिर्भवतीत्यर्थः पदत्रयेणप्रकृचिंवदन्कल्पांतरमाह अथेत्यादिना आत्मावैश्वानरइतिश्रुतेरित्यर्थः के
वलत्वंवैश्वानरशब्दस्यत्वंअत्रजाठरोवैश्वानरइतिमुख्यमुख्यपदतः प्राणाग्निहोत्रहोमाधारत्वलिंगात्तत्स्यदेहव्यापि
त्वादात्मत्वंश्रुत्यामूर्द्धत्वादिकल्पनयाहृदत्वाद्बलत्वमितिध्येयंसिद्धंतयति ततइदमिति साधारणश्रुत्योरुपक्रम

हूः परिणोयइत्युच्यतेतथापिशारीरआत्मास्यात् तस्यभोक्तृत्वेनवैश्वानरसंनिकर्षात्प्रादेशमात्रमितिचवि
शेषणस्यनासित्तुपाधिपरिच्छिन्नसंभवात्तस्मान्नेश्वरोवैश्वानरइत्येवंप्राप्ते ततइदमुच्यते वैश्वानरः परमा
त्माभवितुमर्हतीति कुतः साधारणशब्दविशेषात् साधारणशब्दयोर्विशेषः साधारणशब्दविशेषः यद्य
प्येतावुभावप्यात्मवैश्वानरशब्दौसाधारणशब्दौवैश्वानरशब्दस्तत्रयस्यसाधारणः आत्माशब्दश्चद्वयस्यत
थापिविशेषोदृश्यते येनपरमेश्वरत्वंतयोरभ्युपगम्यते तस्यहवाएतस्यात्मनोवैश्वानरस्यमूर्द्धैवसुतेजा ॥
इत्यादि अत्रहिपरमेश्वरएवद्युमूर्द्धत्वादिविशिष्टोवस्थांतरगतः प्रत्यगात्मत्वेनोपन्यस्तआध्यानायेतिग

म्ययोर्विशेषात्प्रथमश्रुतमुख्यंत्रैलोक्यशरीरलिंगमस्मिवन्मिकेश्वरपरत्वंयुक्तं नचरमश्रुतकल्पितहोमाधारत्वा
लिंगेनजाठरपरत्वमित्यर्थः ननुनिर्विशेषस्यकुतोविशेषइत्यतआह अत्रहीति अवस्थांतरगतः त्रैलोक्यात्म

१२८

जाठरस्यापि ध्यानार्थं विशेषकल्पनेति चेन्न अप्रमितकल्पनापत्तेः ईश्वरस्यतूपादानत्वादिविशेषः सन्नेव ध्यानार्थमुच्यतामि
त्याह कारणत्वादिति लिंगांतराण्याह सर्वेष्वित्यादिना यथाग्नौ वितितमिषीकातूलं दह्यते एवं हास्य विडषश्च

कारणत्वात्कारणस्य हि सर्वाभिः कार्यगताभिरवस्थाभिर्वत्त्वात् द्युलोकाद्यवयवत्वमुपपद्यते सर्वेषु लोकेषु
सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्तीति च सर्वलोकाद्याश्रयं फलं श्रूयमाणं परमकारणपरिग्रहे संभवति एवं
हास्य सर्वे पाप्मानः प्रदूयन्त इति तद्विदः सर्वपापप्रदाहश्रवणं को न आत्मा किं ब्रह्मेति चात्मब्रह्मशब्दाभ्या
मुपक्रम इत्येवमेतानि ब्रह्मलिंगानि परमेश्वरमेव गमयंति तस्मात्परमेश्वर एव वैश्वानरः स्मर्यमानं स्यादि
ति २५ इतश्च परमेश्वर एव वैश्वानरः यस्मात्परमेश्वरस्यैवाग्निरास्यं द्युमूर्द्धेतीदृशं त्रैलोक्यात्मकं रूपं स्मर्यते य
स्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ क्षितिः सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नम इति च तत्स्मर्यमाणं रूपं
मूलभूतां श्रुतिमनुमापयदस्य वैश्वानरशब्दस्य परमेश्वरपरत्वेऽनुमानं लिंगं गमकं स्यादित्यर्थः इति शब्दो हेत्वर्थो
यस्मादिदं गमकं तस्मादपि वैश्वानरः परमात्मैवेत्यर्थः यद्यपि स्तुतिरियं तस्मै लोकात्मने नम इति ॥

त्वर्थः नन्वस्मदारोपेणापि स्तुतिसंभवान्न मूलश्रुत्यपेक्षेत्याशंक्याह यद्यपि स्तुतिरिति तथापीति पदमर्थतः पठति ॥

स्तुतित्वमप्यौति प्रमूर्द्धैवत्यादिरूपेण स्तुतिर्नरमात्रेण कर्तुमशक्या विनाभ्युक्तिमित्यर्थः सर्वात्मरूपेण स्तुतिसंभवात्तास
दात्रोपरतिभावः शब्दादीनां गतिं वक्तमुक्तसिद्धांतमाक्षिप्य समाधत्ते शब्दादिभ्य इति स एषोऽग्निर्वैश्वानर इत्यग्निरहस्ये

स्तुतित्वमपि नाम्नि मूलभूते वेदवाक्ये समन्वयीदृशेन रूपेण संभवति यां मूर्द्धानं यस्य विप्रा वदंति खं वै नाभिं
चंद्रसूर्यौ च नेत्रे दिशः श्रोत्रे विद्धि पादौ क्षितिं च सोऽचिंत्यात्मा सर्वभूतप्रणेता एवंजातीयका च स्मृतिरिहोदाहृ
तव्या शब्दादिभ्योंतः प्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते २८ अत्राह न प
रमेश्वरो वैश्वानरो भवितुमर्हति कुतः शब्दादिभ्योंतः प्रतिष्ठानाच्च शब्दस्तावद्वैश्वानरशब्दो न परमेश्वरे सं
भवति अर्थांतरे रूढत्वात् तथाग्निशब्दः स एषोऽग्निर्वैश्वानर इत्यादिशब्दा हृदयं गार्हपत्य इत्याद्यग्नित्रेता
प्रकल्पनं तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयमित्यादिना च प्राणाहुत्यधिकरणतासंकीर्तनमेतेभ्यो जाठरो
वैश्वानरः प्रत्येतव्यः ॥ ॥ ॥

वैश्वानरविद्यायां श्रुतोऽग्निशब्दः ईश्वरे न संभवतीत्यन्वयः सूत्रस्यादिशब्दा
र्थमाह आदिशब्दादिति भक्तमंत्रहोमसाधनं तेन प्राणाग्निहोत्रं कार्यमित्यर्थः

वाजसनेयिनामग्निरहस्ये सप्रपंचो वैश्वानरविद्यामुक्त्वा स हैतमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेद स सर्वत्रा-
न्नमत्तीत्युक्तं देहोऽन्तस्थत्वं जाठरे संभवति प्रसिद्धेरित्याह तथेति अत्र सूत्रे आदिपदेनैवान्तः प्रतिष्ठानस्याग्रहे संभवति
पृथगुक्तिः साधारणलिंगत्वद्योतनार्था शब्दादिदमपि जाठरं गमयतीत्यभ्युच्चयः यद्यपि द्युमूर्द्धत्वादिविशेषसद्भाप

तथान्तःप्रतिष्ठानमपि श्रूयते पुरुषेऽन्तः प्रतिष्ठितं वेदेति तच्च जाठरे संभवति यदप्युक्तं मूर्द्धैव सुतेजा इत्यादेर्विशे-
षाकारणादिति परमात्मा वैश्वानर इत्यत्र ब्रूमः कुतो ह्येष निर्णयो यदुभयथापि विशेषप्रतिभाने सति परमेश्व-
रविषयपदविशेषस्याश्रयणीयो न जाठरविषय इति अथवा भूताग्निरन्तर्बहिश्चावतिष्ठमानस्यैष निर्देशो भवि-
ष्यति तस्यापि हि द्युलोकादिसंबन्धो मन्त्रवर्णादवगम्यते यो भानुना पृथिवीं याममेमामाततान रोदसी अन्तरि-
क्षमित्यादौ अथवा तच्छरीराया देवताया ऐश्वर्ययोगात् द्युलोकाद्यवयवत्वं भविष्यतीति तस्मान्न परमेश्वरो वैश्वा-
नर इत्यत्रोच्यते न तथा दृष्ट्युपदेशादिति ॥

तथापीतोमायारत्वादि जाठरपदद्वयातीतिभानं समं तथापि परमेश्वरो विशेषो जाठरे न संभवतीति बलवानित्यत आ-
ह अथवेति एवं द्युमूर्द्धत्वादिनिर्देश इत्यर्थः इमां पृथिवीं याममपि ते एवं वा ॥

वापृथिव्योरोदसीतयोर्मध्यमंतरिक्षंचयोभूताग्निर्भानुरूपेणाततानव्याप्तवान्स्थानव्य इत्यर्थः जडमात्रस्यनध्येयत्वमित्य
शा. भा. तआह अथवेति परमेश्वरदृष्ट्योपास्यजाठराग्निप्रतीकवाचकाभ्यामग्निवैश्वानरशब्दाभ्यांद्युमूर्द्धत्वादिमानीश्वरोल
१२८

128

नशब्दादिभ्यः कारणेभ्यः परमेश्वरस्यप्रत्याख्यानंयुक्तं कुतः तथाजाठरापरित्यागेनदृष्ट्युपदेशात्परमेश्वरद
ष्टिर्जाठरेवैश्वानरइत्युपदिश्यते मनोब्रह्मेत्युपासीतेत्यादिवत् अथवाजाठरवैश्वानरोपाधिः परमेश्वरइहद्र
ष्टव्यत्वेनोपदिश्यते मनोमयः प्राणशरीरोभारूपइत्यादिवत् यदिचेहपरमेश्वरोनविवक्ष्येत केवलवजाठ
रोग्निर्विवक्ष्येत ततोमूर्द्धैवसुतेजाइत्यादेर्विशेषस्यासंभवएवस्यात् यथातुदेवताभूताग्निव्यपाश्रयेणाप्य
यंविशेषउपपादयितुंनशक्यते तथोत्तरसूत्रेवक्ष्यामः ॥

द्यइत्युक्ताकल्पांतरमाह अथवाजाठरइति अस्मिन्पक्षेप्राधान्येनेश्वरोपास्यतापूर्वत्रगुणतेतिभेदः उपाधिवाचि १२८
भ्यांपदाभ्यामुपहितोलक्ष्यइत्यर्थः लक्षणाबीजसंभवंव्याचष्टे यदिचेति ॥ ॥ ॥

पुरुषमपीत्यादि सूत्रशेषं व्याचष्टे यदि च केवल इति ईश्वरप्रतीकत्वोपाधित्वमूत्यस्त्यर्थो विवक्षितो न तदेति शेषः यथः पु
रुषः श्रुतिः स एषोऽग्निर्वैश्वानरः श्रुतिजाठरोपाधिक इति स्कृत्यर्थः यो वेद स सर्वत्र भुंक्ते इत्यर्थः पुरुषत्वं श्रुतिस्मृत्ये चेतन
स्य जाठरस्य नेत्याशंक्य पाठांतरे पुरुषविधत्वं देहाकारत्वं तस्य नेत्याह येनेति ननु जाठरस्यापि देहव्यापित्वात् तद्विधत्वं

यदि च केवल एव जाठरो विवक्षितः तत् पुरुषेऽन्तः प्रतिष्ठितत्वं केवलं तस्य स्यात् ननु पुरुषत्वं पुरुषमपि चैनमधीय
ते वाजसनेयिनः स एषोऽग्निर्वैश्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं
वेदेति परमेश्वरस्य तु सर्वात्मत्वात् पुरुषत्वं पुरुषेऽन्तः प्रतिष्ठितत्वं चोभयमुपपद्यते येन पुरुषविधमपि चैनमा
धीयन्त इति सूत्रावयवं पठंति तेषामेषोऽर्थः केवलजाठरपरिग्रहे पुरुषेऽन्तः प्रतिष्ठितत्वं केवलं स्यात् न पुरु
षविधत्वं पुरुषविधमपि चैनमधीयते वाजसनेयिनः पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेदेति पुरुषविधत्वं
च प्रकरणाद्यदधिदैवतं द्युमूर्धत्वादि पृथिवीप्रतिष्ठितत्वांतं तत्परिगृह्यते अत एव न देवता भूतं च ॥ २८ ॥

२ यच्चाध्यात्मं प्रसिद्धं मूर्धत्वादि चिबुकप्रतिष्ठि १ २

स्यादित्यत आह पुरुषविधत्वं च प्रकरणादिति न देहव्यापित्वं
पुरुषविधत्वं किंतु विराड्देहाकारमधिदैवं पुरुषविधत्वमध्यात्मं चोपासकमूर्धादिचिबुकांतेष्वंगेषु संपन्नत्वमीश्व
रस्य पुरुषविधत्वमित्यर्थः ईश्वरस्यांगेषु संपत्तिर्वक्ष्यते एवं जाठरं निरस्य पतद्वयं निरस्यति ॥ ॥ ॥

अतएवेति सूत्रं व्याचष्टे यत्त्वनरित्यादिना द्युमूर्द्धत्वादिः सर्वलोकफलभाक्त्वं सर्वपाप्मदाहः आत्मब्रह्मशब्दोपक्रमः उक्त हे
तवस्तानेव स्मारयति नहि भूताग्निरित्यादिना यो भानुनेति मंत्रेणास्य रहस्यामहिमोक्त इति भावः एवमग्निवैश्वानरशब्दादी

ब्र.भा.
भा.टी.
१२९

129

यत्तूक्तं भूताग्नेरपि मंत्रवर्णाद्युलोकादिसंबंधदर्शनान्मूर्द्धैव सुतेजा इत्याद्यवयवकल्पनं तस्यैव भविष्यती-
ति तच्छरीराया देवताया वा ऐश्वर्ययोगादिति तत्परिहर्तव्यमत्रोच्यते अतएवोक्तेभ्यो हेतुभ्यो न देवता वैश्वानरः
तथा भूताग्निरपि न वैश्वानरः नहि भूताग्नेरौष्ण्यप्रकाशमात्रात्मकस्य द्युमूर्द्धत्वादिकल्पनोपपद्यते विकारस्य वि
कारांतरात्मत्वासंभवात् तथा देवतायाः सत्यप्यैश्वर्ययोगे न द्युमूर्द्धत्वादिकल्पना संभवत्यकारणत्वात्परमेश्वरा
धीनैश्वर्यत्वात् आत्मशब्दासंभवश्च सर्वेष्वेषु पक्षेषु स्थित एव साक्षादप्यविरोधं जैमिनिः २८ एवं जाठराग्निप्र
तीको जाठराग्न्युपाधिको वा परमेश्वर उपास्य इत्युक्तमंतः प्रतिष्ठितत्वाद्यनुरोधेन इदानीं तु ॥ ॥ ॥

न
स्थलत्वकादित्युक्तमधुना प्रतीकोपाधिपरित्यागे(न)विराट् पुरुषाकारस्य भगवतो वैश्वानरस्याध्यात्ममूर्द्धादिचिबुकांतेषं
गेषु संपाद्योपास्यत्वांगीकारेऽपि न शब्दादिविरोधः शब्दयोरीश्वरे योगरूढत्वात् मुख्यत्वादंतःस्थत्वादीनां च तत्र संभवादित्याह

साक्षात्तदस्यार्थमाह विनैवेति जाठराग्निसंबंधं विनैव साक्षादुपास्यत्वेपि शब्दाद्यविरोधं जैमिनिर्मन्यतइत्यर्थः इदमेतस्यत्वा
मुदस्यतद्रूपं नोच्येत किंत्वनवादिदिशिरस्त्वं नामवयवसमुदायात्मकपुरुषशरीरे मूर्द्धादिचिबुकांतांगानि हृदयेशात्वावत्य
तिरिक्तानि तेषु संपन्नो वैश्वानरः पुरुषेंतः प्रतिष्ठितइत्युच्यते अतो यथाशाखस्थस्य पादिणो हृत्तांतस्थत्वं तथा वैश्वान

विनैव प्रतीकोपाधिकल्पनाभ्यां साक्षादपि परमेश्वरोपासनपरिग्रहे न कश्चिद्विरोध इति जैमिनिराचार्यो मन्यते
ननु जाठराग्न्यपरिग्रहे अंतःप्रतिष्ठितत्ववचनं शब्दादीनि च कारणानि विरुध्येरन्निति अत्रोच्यते अंतःप्रतिष्ठि
तत्ववचनं तावन्न विरुध्यते नहीह पुरुषविधं पुरुषेंतः प्रतिष्ठितं वेदेति जाठराग्न्यभिप्रायेणेदमुच्यते तस्या
प्रकृतत्वादसंशब्दितत्वाच्च कथं तर्हि यत्प्रकृतं मूर्द्धादिचिबुकांतेषु पुरुषविधत्वं कल्पितं तदभिप्रायेणेदमुच्य
ते पुरुषविधं पुरुषेंतः प्रतिष्ठितं वेदेति यथा वृक्षे शाखां प्रतिष्ठितां पश्यतीति तद्वत् अथवा यः प्रकृतः परमात्
माध्यात्ममधिदैवतं च पुरुषविधत्वोपाधिः तस्य यत्केवलं साक्षिरूपं तदभिप्रायेणेदमुच्यते पुरुषेंतः प्रति
ष्ठितं वेदेति निश्चिते च पूर्वापरालोचनवशेन परमात्मपरिग्रहे तद्विषय एव वैश्वानरशब्दः केनचिद्योगेन व
र्तिष्यते विश्वश्चायं

रस्य पुरुषांतःस्थत्वमित्याह नहीह पुरुषविधमित्या दिना अग्न्यादिशब्दोप्येवं वाचित्वं जाठराग्निव
संशब्दितत्वं अत्रेत्यस्य पुरुषावयवेषु संपादनात्पुरुषविधत्वं तस्यत्वं चेत्यर्थः पक्षांतरमाह अथवेति पुरुष
विधं सर्वं वदं तस्य त्वं माध्यस्थं साक्षित्वमित्यर्थः एवमेतस्य ॥ ॥ ॥ ॥ ॥

त्वमीश्वरे व्याख्याय शब्दादीनि व्याचष्टे निश्चितेचेति विश्वश्चायं नरो जीवश्च सर्वात्मत्वात् विश्वेषां विकाराणां वा नरः कर्ता
विश्वे सर्वे नरा जीवा यस्यात्मत्वेन नियम्यत्वेन वा सन्तीति विश्वानरः रक्षएव राक्षसइतिवत्स्वार्थे प्रत्ययः नरेसंज्ञायामिति
पूर्वपदस्य दीर्घता अगिधातोर्गत्यर्थस्य निप्रत्ययान्तस्य रूपमग्निरिति अगयति गमयत्यग्रं कर्मफलं प्रापयतीत्यग्निर्

नरश्चेति विश्वेषां वायं नरो विश्वे वा नरा अस्येति विश्वानरः परमात्मा सर्वात्मत्वात् विश्वानर एव वैश्वानरः तद्धि-
तोनन्यार्थो राक्षसवायसादिवत् अग्निशब्दोप्यग्रणीत्वादियोगाश्रयणेन परमात्मविषय एव भविष्यति गार्ह-
पत्यादिकल्पनं प्राणाहुत्यधिकरणत्वं च परमात्मनोपि सर्वात्मत्वादुपपद्यते कथं पुनः परमेश्वरपरिग्रहे प्रादेश-
मात्रश्रुतिरुपपद्यत इति तां व्याख्यातुमारभते अभिव्यक्तेरित्याश्मरथ्यः २९ अतिमात्रस्यापि परमेश्वरस्य प्रा-
देशमात्रत्वमभिव्यक्तिनिमित्तं स्यात् अभिव्यज्यते किल प्रादेशमात्रपरिमाणः परमेश्वर उपासकानां कृते प्रदे-
शेषु वा हृदयादिषूपलब्धिस्थानेषु विशेषेणाभिव्यज्यते अतः परमेश्वरोपि प्रादेशमात्र इत्यभिव्यक्तेरुप- ॥
पद्यत इत्याश्मरथ्य आचार्यो मन्यते ॥२८॥

गुणी रुक्मः अभितो गत इति वाग्निः वैश्वानरोपासकस्यातिथिभोजनात्पूर्वं प्राणा-
ग्निहोत्रं विधीयते गात्वेन विहितं तदर्थमग्निहोत्रेतादिकल्पनं प्रधानाविरोधेन नेतव्यमित्याह गार्हपत्येति सर्वत्रांपरिमाणा-
मतिक्रान्तोतिमात्रं तस्यापि विभोरित्यर्थः उपासकानां कृते अनुग्रहाय प्रादेशमात्रोभिव्यज्यते प्रदेशेषु वाभीयते अभिव्यज्यत इति

मतांतरमाह अनुस्मृतेरिति प्रादेशेनमनसामितः प्रादेशमात्र इत्यर्थः यथाकथंचिदिति मनस्थंप्रादेशमात्रत्वंस्मरतिद्वारास्यर्थ्य
माणोकल्पितंश्रुतेरालंबनमित्यर्थः सूत्रस्यार्थांतरमाह प्रादेशेति संप्रतिश्रुत्युक्तांप्रादेशमात्रश्रुतेरीतिमाह संपत्तेरिति
ब्राह्मणंपठति प्रादेशमात्रमिवेति अपरिच्छिन्नमपीश्वरंप्रादेशमात्रत्वेनसंपाद्यकल्पितंसम्यग्विदितवंतोदेवास्तमेवेश्वरमा

अनुस्मृतेर्बादरिः २९ प्रादेशमात्रहृदयप्रतिष्ठेनवायंमनसानुस्मर्यतेतेनप्रादेशमात्र इत्युच्यते यथाप्रस्थमितायवाः प्रा
स्थ्या इत्युच्यंतेतद्वत् यद्यपिचयवेषुस्वगतमेवपरिमाणंप्रस्थसंबंधाद्व्यज्यते नचेहपरमेश्वरगतंकिंचित्परिमाण
मस्तियद्धृदयसंबंधाद्व्यज्यते तथापिप्रयुक्तायाःप्रादेशमात्रश्रुतेःसंभवति यथाकथंचिदनुस्मरणमालंबनमिष्य
ते प्रादेशमात्रत्वेनवायमप्रादेशमात्रोनुस्मरणीयः प्रादेशमात्रश्रुत्यर्थवत्तायैएवमनुस्मृतिनिमि
त्तापरमेश्वरेप्रादेशमात्रश्रुतिरितिबादरिराचार्योमन्यते संपत्तेरितिजैमिनिस्त
थाहिदर्शयति ३० संपत्तिनिमित्ता
वास्यात् ॥

भिप्रपन्नकेनसंपन्नाः प्राप्तवंतोहवैपूर्वकालेततोवोयुष्मभ्यंतमद्यप्रभृतीनयंवैवान्वक्ष्यामि यथाप्रादेशमात्रंप्रादेशपरिमाण
मनतिक्रम्यमूर्द्धायध्यात्मंगेषुवैश्वानरंसंपादयिष्यामीतिप्राचीनशालादीन्प्रतिराजाप्रतिज्ञायस्वकीयमूर्द्धानमुपदिशन्कर
णादर्शयन्नुवाच एषवैमेमूर्द्धाभूरादींल्लोकानतीत्यउपरितिष्ठतीत्यतिष्ठासोद्युलोकोवैश्वानरः तस्यमूर्द्धेतियावत् ॥

अध्यात्ममूर्द्धभेदेनाधिदैवमूर्द्धसंपाद्य ध्येयइत्यर्थः एवं च त्वादिष्टहननीयं स्वकीयचक्षुषी दर्शयन्नेष वै सुतेजाः सूर्यो वैश्वा
नरस्य चक्षुरित्युवाच नासिकापदेन तन्निष्ठः प्राणो लक्ष्यते तस्मिन्नाध्यात्मिकप्राणेऽधिदैवप्राणस्य वायोर्दृष्टिमाह नासि

प्रादेशमात्रश्रुतिः इतनयादिमिमानप्रकरणं वा उभमनेयिब्राह्मणांद्युप्रभृतीन्पृथिवीपर्यन्तान् त्रैलोक्यात्मनो वैश्वान
रस्यावयवानध्यात्ममूर्द्धप्रभृतेश्चिबुकपर्यन्तेषु देहावयवेषु संपादयन् प्रादेशमात्रसंपत्तिं परमेश्वरस्य दर्शया
ति प्रादेशमात्रमिव ह वै देवाः सुविदिता अभिसंपन्नास्तथा तु व एतान्वक्ष्यामि यथा प्रादेशमात्रमेवाभिसंपादयिष्या
मीति स होवाच मूर्द्धानमुपदिशन्नुवाचैष वा अतिष्ठा वैश्वानर इति वैश्वानर इति च चक्षुषी उपदिशन्नुवाचैष वै सु
तेजा वैश्वानर इति नासिके उपदिशन्नुवाचैष पृथग्वर्त्मात्मा वैश्वानर इति चिबुकमुपदिशन्नुवाचैष प्रतिष्ठा वै
श्वानर इति चिबुकमित्यधरं मुखफलकमुच्यते ॥

केऽइति अत्र सर्वत्र वैश्वानरशब्दः स्वस्तंभपरः मुखस्थं मुखं तस्मिन्नेवं बहुलाकाशदृष्टिः मुखस्थलालादूपास्वप्नादिषिशा
लितं तदीयवस्तिस्थोदकदृष्टिः चिबुके प्रतिष्ठापादद्वयपृथिवीदृष्टव्या ॥ ६३।

तत्पुरुषाणां वैषम्येण विषययोर्भेदात् अग्निरहस्ये कृतस्तु समीरणाच्छांदोग्यस्य प्रादेशमात्रश्रुतिः कथं व्याख्येयेत्याशंक्याह यद्यपीत्यादिना
पर्णाबलात्त्वैषम्येण बहुतरप्रत्यभिज्ञाभिः सिद्धे विधेयकत्वं न हीयते शाखाभेदेपि सर्वशाखाप्रत्ययमानत्वं वैश्वानरोपासनस्य एकमि-
ति न्यायस्य वक्तव्यमाणत्वाच्च अतिष्ठात्वगुणाच्छांदोग्यपञ्चमप्रपाठके तृतीयः विश्वरूपत्वगुणाच्च वाजिभिर्ग्रहीतस्तथा च द्युसूर्ययोः स्वतेज

यद्यपि वाजसनेयिके द्योरतिष्ठात्वगुणः समाम्नायते आदित्यस्य सुतेजस्त्वगुणः छांदोग्ये पुनर्द्योः सुतेजस्त्वगुणः समा-
म्नायते आदित्यस्य विश्वरूपत्वगुणस्तथापि नैतावता विशेषेण किंचिद्धीयते प्रादेशमात्रश्रुतेरविशेषात् सर्वशाखा-
प्रत्ययत्वाच्च संपत्तिनिमित्तां प्रादेशमात्रश्रुतिं युक्ततरां जैमिनिराचार्यो मन्यते आमनन्ति चैनमस्मिन् ३२ आमनं-
ति चैनं परमेश्वरमस्मिन्मूर्धचिबुकांतराले जाबालाः य एषोऽनंतोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति सोऽविमुक्तः क-
स्मिन्प्रतिष्ठित इति वरणायां नास्यां च मध्ये प्रतिष्ठित इति का वै वरणा का च नासीति तत्र सैव नासिका वरणा
नासीति निरुच्य सर्वाणींद्रियकृतानि पापानि वारयति सा वरणा सर्वाणींद्रियकृतानि पापा ॥ ॥ ॥

तस्मादतिष्ठात्वविश्वरूपत्वयोर्व्यवस्था यद्वा शाखाभेदेन गुणव्यवस्था तत्र न विद्याभेद इति भावः प्रादेशत्वस्य संपत्तिप्रयुक्त-
त्वे श्रुत्यंतरं संवादयति आमनन्तीति य एषोऽनंतोऽपरिच्छिन्नोऽव्यक्तो दुर्विज्ञेयस्तं कथं जानीयामित्यत्रिप्रश्ने याज्ञवल्क्यस्योत्त-
रं सोऽविमुक्ते कामादिभिर्बद्धे जीवे भेदकल्पनया प्रतिष्ठित उपास्यः पुनरत्रिप्रश्नः स इत्युत्तरं वरणायामिति ॥ ॥

एवंप्राप्तेतेद्देशेपिज्ञेये तत्रचश्रुतौइमामेवभ्रुमध्यदितांनासिकांनिरुच्येतिभाष्ययोजना सर्वानिंद्रियकृतान्दोषान्वारयतीति
वरणाभ्रुःसर्वान्दोषान्नाशयतीतिनासिकेतिनिर्वचनं नासाभ्रुवोर्जीवद्वारत्वेस्वरस्थानत्वध्यानात्पापवारकत्वमितिमंतव्यं
तयोर्मध्येपिविशिष्यजीवस्थानंपृच्छति कतमदितिभ्रुवोरित्युत्तरंप्राणस्येतिपाठेपिघ्राणस्येत्यर्थः सएषसंधिर्द्युलो
कस्यस्वर्गस्यपरस्यचब्रह्मलोकस्यसंधित्वेनध्येयइत्याह सएषइति आभिमुख्येनाहंब्रह्मेत्यभिविमीयतेज्ञायतेइत्यो

यानिनाशयतिसानासीति पुनरामनंति कतमच्चास्यस्थानंभवतीतिभ्रुवोर्घ्राणस्यचयःसंधिःसएषद्युलोक
स्यपरस्यचसंधिर्भवतीतितस्मादुपपन्नापरमेश्वरेप्रादेशमात्रश्रुतिः अभिविमानश्रुतिः प्रत्यगात्मत्वाभिप्राया
प्रत्यगात्मतयासर्वैःप्राणिभिरभिविमीयतइत्यभिविमानः अभिगतोवायंप्रत्यगात्मत्वाद्विमानश्चमानवि
योगादित्यभिविमानोभिविमिमीतेवासर्वंजगत्कारणत्वादित्यभिविमानस्तस्मात्परमेश्वरोवैश्वानरइतिसिद्धं
इतिश्रीमच्छंकरभगवत्पादकृतौशारीरकमीमांसाभाष्येप्रथमाध्यायस्यद्वितीयःपादः २ ॥ ० ॥

भिविमानःप्रत्यगात्माअभिगतश्चासौविमानश्चसर्वस्वरूपत्वेप्यानंत्यान्मानमत्रपरिमाणमभिविमीतेनिर्मिमीतेतस्मा
द्वैश्वानरवाक्यमुपास्यब्रह्मणोसमन्वितमितिसिद्धं ॥ ० ॥ इतिश्रीमच्छारीरकव्याख्यायांभाष्यरत्नप्रभायांप्रथमाध्या
यस्यद्वितीयःपादः ॥२॥ श्रीरामायनमोनमः ॥ २ ॥ श्रीबालकृष्णायनमः संवत् १८ ९९ ॥

[illegible]णायनमः ॐ द्युभ्वोतममपदमतरसीद्धाणीयंश्रीराममस्त्र हिंभांतमधीशितारं दंप्रतिवेयमखिलस्य च शासितारं ज्योतिर्न
प्रश्नो [illegible] मजेह । एवं हि विद्रुलानाप्रायणस विशेषवाणां समन्वयाद्वितीयपादे दर्शितः अधुना योगिकपदघट
[illegible] अनानां वाक्यानां समन्वयक्तं तृतीयपाद आरभ अतोत्राधिकरणानामन्त्यध्यायपादसंगत यत्र एवंमुपक्रम
[illegible] प्रधानादेर्व्यवस्थितिहेतुत्वत्वाधिकरणसंगतिः [illegible] प्रधानायुपास्तिः सिद्धांते निर्विशेषब्रह्मधीरिति फलंमु
[illegible] मद्वाहुरतिदंमिति यस्मिल्लोक [illegible] प्राणैश्च सर्वैः तह मनः सर्वं लोक [illegible] नकल्पितं ततः
दपवादेन तमेवाधिष्ठानात्मानमन्यगामिनं ज्ञानं यस्मवणादिनाभ्यन्तमात्मवाचो विमुंचथ विशेषेणनिः शेषं त्यजत एषवाग्निमो

चे२

द्युभ्वाद्यायतनं स्वशब्दात् । १ इदं श्रूयते यस्मिन्द्यौः पृथिवी चांतरिक्षमोतं मनः सहप्राणैश्च सर्वैः तमेवैकं जानथ आ
त्मानमन्यावाचो विमुंचथ अमृतस्यैष सेतुरिति अत्र यदेतत्पृथक्त्वानामोतत्वंवचनादायतनं किंचिदवगम्यते तत्किं परं
ब्रह्मस्यादाहो स्विदर्थांतरमिति संदेहाते नत्रार्थांतरं किमप्यायतनं स्यादिति प्राप्तं कस्मात् अमृतस्यैष सेतुरिति श्रवणा
त् पारवान्हि लोके सेतुः न च परस्य ब्रह्मणः पारवत्वाभ्युपगमनं तमपार इति श्रवणात् अर्थांतरे चायतनेपरि
हमाणे स्मृतिप्रसिद्धं प्रधानं परिग्रहीतव्यं तस्य कारणत्वादायतनत्वोपपत्तेः श्रुतिप्रसिद्धो वा यु वा वायुर्वेगौ
तमतस्य सूत्रेवायुनावै गौतमसूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवंतीति वायोरपि विधार
णत्वश्रवणात् ॥

[illegible] सर्वज्ञत्वमसाक्षात्कार [illegible] मोक्षमार्गावारदुर्वार संसारवारधेः पर पार [illegible] तः प्रापक [illegible] स्मृतिमुमुक्ष
मुपदि [illegible] धर्मस्य द [illegible] नात्तप्रायमाह [illegible] तिषष्ठाब्रह्मणोमि
तत्वे [illegible] द्युभ्वाद्यायतनं [illegible] ब्रह्मणोमि
भेद [illegible] श्रवणात्स्य [illegible] णात्मेतरिति श्रवणाच्चेत्यर्थः तत्र
गौण [illegible] विना [illegible] तकालतः अपार [illegible] विषम [illegible] ततो ग्रहणसंभवात
[illegible] गौतमगौ [illegible] नत मुख्यस्या [illegible] तानीश्वर इति भावः यथा १०
[illegible] तिस्कृत

यत्तु प्रमेयपी तेरेन्न

ननु तत्रैव मेयाविद्यते लिङ्गस्य मूर्धादिरूपस्य यत्रानुक्तलोकं छांदोग्यस्य प्र ... ... मानं पकृ मिति न्यायं स्पष्टयति मामिति ।
त्यवदुपस्तेवकृत स्य भिन्नासिद्धे विषे न दीयते शाख्या भेदपि सव ... वीति ... ... सौत्रलक्षणे प्राप्नोति स्यकृ पत्नशेषो वू
व श्रुतिस्वास्य प्राच्छांदोग्यपरं दृष्टव्यः विश्वरूप तत्रापि श्वाजिभि ग्रीष्मालेपाच पुराये ... ... सेवादुत्ति आमनन्तीति यपवनेनापिसं
स्या ... ... भेदेन ... ... व्यस्याल ... भेद इति भावः मादृ ... ... सेवादुत्ति ... विमर्दे जीवेभेदकल्पनया प्रतिष्ठितत्वात् ।
... तो ... ... दुर्विज्ञेयं लकं यज्ञानो या ... वि ... पास्तवल्क्यो मानार मंत्रे स्वरात्रिज्ञेनेकामाधिरिभिर्वर्द्धे जीवेभेदकल्पनया प्रतिष्ठितत्वात् ।

यदपि वाजसनेयिके द्यौरेतिसुतेजाः इत्यादिना अध्यात्मस्य समान्नायेते आदित्य सुतेजस्त्वगुणं छान्दोग्ये पुनर्द्यौः सुतेजस्त्वगुणत्वं समान्नायेते आ
... विस्य रूपत्व गुणस्य ... ... विशेषणं किंचिद्दोषते श्रादे यामात्रं श्रुते विशेषो न वा त्यं वर्णलोपत्वात्च तत्प
निमित्तम् प्रादेशमात्र श्रुति युक्तमपि जैमिनिराचार्यो मन्यते आमनन्ति चैनमस्मिन् ॥ ३२ ॥ आमनन्ति चैनमस्मिन्नेव ... ...
... ... य एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति सोऽविमुक्तः कस्मिन्प्रतिष्ठित इति वरणायां नास्यां च मध्ये प्रति
ष्ठित इति का वै वरणा का च नासीति तत्र चेमामेव नासिकां वरणा नासीति निरुच्य सर्वाणीन्द्रियकृतानि पापानि वारयतीति सा व
रणा सर्वाणीन्द्रियकृतानि पापानि नाशयतीति सा नासीति पुनरामनन्ति कतमच्चास्य स्थानं भवतीति भ्रुवोर्घ्राणस्य च यः संधिः स ए
ष द्युलोकस्य परस्य च संधिर्भवतीति तस्मादुपपन्ना परमेश्वरे प्रादेशमात्रश्रुतिः अभिविमानश्रुतिः प्रत्यगात्मतयाभिप्राया
प्रत्यगात्मतया सर्वैः प्राणिभिरभिविमीयत इत्यभिविमानः अभिगतो वायं प्रत्यगात्मत्वाद्विमानश्च मानवियोगादित्य
विमानोऽभिविमिमीते वा सर्वं जगत्कारणत्वादित्यभिमानस्तस्मात्परमेश्वरो वैश्वानर इति सिद्धम् इति श्रीमच्छंकरभग
वत्पादकृतौ शारीरकमीमांसाभाष्ये प्रथमाध्यायस्य द्वितीयः पादः ॥ २ ॥

पुनरपि प्रश्नः सह तत्सुतं वरणायामिति एवं प्रश्नोत्तरे श्रूयेते तत्र च यो ... मामेव ... ... नासिकां निरुच्य तिभाष्ययोजना सर्वा
णीन्द्रियकृतानि पापानि वारयतीति वरणा ... सर्वाण्ये ... नाशयतीति नाशीति नासिकेति निर्वचनेन नासा ... ... जीव ... स्थानत्वं ... ।
नाशया ... ... मितिमनत्वा तयोर्मध्ये ... जीवस्य स्थानात् ... कतमदिति भ्रुवो ... तरप्राणस्येति यादे ... ... ।
द्युः ... ... लोकस्य ... पास्य च ब्रह्मलोकस्य संधि ... ... यन्त्याह सएषइति आभिमुख्येनाहमस्मीत्यभिविमीयते ...
... ... भिविमानः प्रत्यगात्मत्वाद्विमानत्वात्सर्वस्य सत्यात्मानमत्र यद्विमाणमभिविमीते निर्मिमीते तस्मा
... वाक्यानुयायित्वं ब्रह्मणि समन्वितमिति सिद्धम् इति श्रीमच्छारीरकव्याख्यायां भाष्यरत्नप्रभायां प्रथमाध्यायस्य द्वितीयः पादः २

प्रश्न [illegible] क्रमेणापृष्ठति तज्जाता वदिति हे सत्योमप युद्दतवरंत्वं स्वर्गं हेतुमग्निं प्रस्थ स्मिमेते मन्ये देदाह त्योक्तिन वेति तेश्यो स्तथाप
नहाव्यतन्न [illegible] ध जानीयामित्यर्थः क्रमेणोत्तरत्रयमाह प्रतिवचनमपीति लोकहेतु विराडात्म नोपास्यत्वाल्लोकादिं स्वर्गं तोणि
[illegible] नचिकेतसेया स्वरूपतो यावतीः संख्यातः यथा क्रमेणाग्निश्चीयते तत्सर्वमवाच तस्यैः हंतेदानीं प्रब्रवक्ष्यामी
[illegible] नजी वमस्याय वहितमेपि यया च मरणामित्यादि वाक्यं जीवविषयमतो योग्यत्वादित्यर्थः वाक्यार्थस्तु आत्मा मरणा
[illegible] यथाभवति तथा वक्ष्यामीति प्रतिज्ञातमाह योनिमिति चराचरदेहप्राप्तौ निमित्तमाह यथेति श्रुतं तदुपासनं तत्रे [illegible]

[illegible] तत्र ता क्लस तत्र मग्निस्वर्ग्यमध्येषि म्यो प्रवृत्तिते श्रद्धा मा यमग्निमग्नि विषयः प्रश्नः येयं प्रेते विचिकित्सा मनुष्येस्ती त्येके नाय
मस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय इति जीवविषयः प्रश्नः अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृता
त् अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति परमात्मविषयः प्रतिवचनमपि लोकादिमग्निं तमुवाच तस्मै या इष्टका
यावतीर्वा यथा वाग्निविषये हंत त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनं यथा च मरणं प्राप्य आत्मा भवति गौतम योनिमन्ये प्रप
द्यंते शरीरत्वाय देहिनः स्थाणुमन्येनुसंयंति यथाकर्म यथाश्रुतमिति मरणस्तज्जीवविषयं न जायते म्रियते वा विपश्चिदि
त्यादि वहु प्रपंचं परमात्मविषयेनैव प्रधानविषयः प्रश्नोत्य दृष्टत्वान्नाम यस्मान्नीयेषतस्येति अत्राह योयमात्मविष
यः प्रश्नो येयं प्रेते विचिकित्सा मनुष्ये इति किं स एवायमन्यत्र धर्मादित्यत्राथ धर्मादितिपुनरनुकृष्यते किंवा ततो न्योयम
पूर्वः प्रश्न आप्यात इति किंचातः स एवायं प्रश्नः पुनरनुकृष्यत इति यद्युच्यते तयोरात्मविषययोः प्रश्नयोरेकतापत्तेरग्नि
विषयश्चात्मविषयश्च द्वावेव प्रश्नाविति ततो न वक्तव्यं त्रयाणां प्रश्नप्रत्युत्तराविति अथान्योयमपूर्वः प्रश्नः उत्थाप्यते
[illegible] एवं वर प्रदानव्यतिरेकेण प्रश्नकल्पनायामदोषः एवमप्यात्मव्यतिरेकेण प्रधानोपन्यासकल्पनास्मि
न्नदोषः स्यात् [illegible] एव वरमिति वरप्रदानव्यतिरेकेण प्रश्नं विचिकित्स्यामः वाक्योपक्रमसामर्थ्यात् नचिकेतसे
प्रश्ना [illegible] सवाक्रूपवाक्यमहतिमनुप्रश्नाः कवयो नमालवहते मृत्युः किलनचिकेतसमपि त्रीन्वरान्पित्राय
कायोयत उत्थाप्य वरत्रयमनेनोपन्यासः प्रश्नत्रयं तः अतो न प्रधानमत्र तामेति योजना उक्तार्थं एवमादि पदित्रपेहेति एव
मर्थः द्वौ प्रश्नौ वे तिरसदृशोऽपनेति पृच्छति किं चातः इति सम्यक्त्वो तेषिः अत्र प्रवदति एतस्मिन्नर्थे प्रश्नैकत्वेनाप्राप्तिः भेदप्र
धान स्यश्रौतत्वसिद्धिमिति एवमाशंकाह सप्तवेनापि विना प्रश्ने कापतमाहात्मसि होत्याह अत्रोच्यत इति येन प्रधानमसिद्धिः स्यादिति

॥ [illegible]य नमः ॐ द्युभ्वोतमभमयदमत्तारसीद्गाणीयं श्रीरामभट्टद्विभांतमधीशानाय ॥ अथ त्रिविधमखिलस्य वृत्तासितारं ज्योतिर्वे-
[illegible] दमधिकरणं भजेहं । एवं हि द्विबहुलानामीयणां सविशेषवाचिनां समन्वयो द्वितीयपादे दर्शितः अधुना यौगिकपदबहु-
लानामनिर्दिष्टविशेषाणां नानावाक्यानां समन्वयः अस्मिंस्तृतीयपाद आरभ्यते अतोऽधिकरणानामन्यथा पादसंगतयः तत्र पूर्वमुपक्रम-
[illegible] वाक्यशेषस्य पूर्वपक्षत्वादिना ब्रह्मपरत्वमुक्तं तद्वदुपक्रमस्य साधारणत्वेन तत्वाक्यशेषस्य सेतुश्रुत्या बल-
[illegible] प्रधानादौ व्यवस्थितिः इति दृष्टान्तलक्षणाधिकरणसंगतिः पूर्वपक्षे प्रधानाद्युपास्तिः सिद्धान्ते निर्विशेषब्रह्मधीरिति फलं मु-
[illegible]को मृत्वा हरति इदमिति यस्मिंल्लोकस्यात्मा विराट् प्राणैः सर्वैः सह मनः सूत्रं तत्र कचकारादव्याकृतेन कारणमेतत्कल्पितं ततः
द्युवादेनात्मेवात्मेशानामात्मानमन्यगामिनं जानथ एवमवणादिना अन्या नात्मवाचो विमुंचथ विशेषेणानिःशेषं त्यजत एष वाग्विमो-

द्युभ्वाद्यायतनं स्वशब्दात् १ इदं श्रूयते यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः तमेवैकं जानथ आत्मा-
नमन्या वाचो विमुञ्चथामृतस्यैष सेतुरिति अत्र यदेतद् द्युप्रभृतीनामोतत्ववचनादायतनं किंचिदवगम्यते तत्किं परं
ब्रह्म स्यादाहोस्विदर्थान्तरमिति संदेहे तत्रार्थान्तरं किमप्यायतनं स्यादिति प्राप्तम् कस्मात् अमृतस्यैष सेतुरिति श्रवणा-
त् पारवान्हि लोके सेतुः न च परस्य ब्रह्मणः पारवत्त्वमभ्युपगन्तुमनन्तमपारमिति श्रवणात् अर्थान्तरे चायतने परिगृ-
ह्यमाणे स्मृतिप्रसिद्धं प्रधानं परिग्रहीतव्यं तस्य कारणत्वादायतनत्वोपपत्तेः श्रुतिप्रसिद्धो वा वायुः स्यात् वायुर्वै गौ-
तम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्तीति वायोरपि विधार-
णत्वश्रवणात् ॥

[illegible] सर्वं [illegible] सामान्यात्कामेश्वरनस्य मोक्षस्यामारापारस्तुर्वीरसंसारवारधेः परपारस्यामेततुरिव सेतुः प्रापकत्वात् [illegible] त्वात् श्रुतिर्मुमुक्षु-
[illegible] सारधर्मस्य दर्शनात् स्यात् [illegible] तिषष्ठा ब्रह्मणोभि-
[illegible] नत्वादेव [illegible] द्युभ्वाद्यायतनम् [illegible] इह [illegible] णात्सेतुरिति श्रवणाच्चेत्यर्थः तच
भेद [illegible] श्रवणात् [illegible] सेतुश्रवणात् [illegible] जकालतः अपार [illegible] विधारकत्वमात्रेण ग्रहणं संभवान्
[illegible] विना [illegible] नैव कश्चि [illegible] नत्वमुख्यस्य [illegible] गुणवानीश्वर इति भावः यथा
[illegible] गौतमस्तमात्रं हि [illegible] तुल्यविषय [illegible] भवतीति स्फु[illegible]

ननु प्रसिद्धैवमस्तेन विद्यते [illegible] आदिरस्य श्रुत्यनुसारेण छांदोग्यस्य प्र[illegible]त्रश्रुतिः क[illegible]काह यद्यपीत्यादिना
त्यादेर्मस्ते वटुत्वं वक्तुमस्त्यभिज्ञा सिद्धा विशेषो न दोषायेत्यर्थः स्याभेदोपि सर्व[illegible]सप्रतीयमाननेन[illegible]ासनं तत्कृतमिति न्यायस्यैवत्र मानत्वं
वे अभिलाषगुणाश्छांदोग्येऽप्यप्रहातव्यः विश्वरूपत्वगुणस्य वाजिभि[illegible]ग्रीहात्तत्वाच्च गुणस्य[illegible]तेजस्त्वसमस्तीति ज्ञात्वा विश्वरूपत्वपठो वा
स्या घटापामवाभेदेन गुणान्वयस्यान्यत्र विधाभेद इति भावः माद्[illegible]स्य तप[illegible]सेवादेति आमनन्तीति य एषोऽनन्तोऽपरिच्छि
न्नोऽव्यक्तो दुर्विज्ञेयः स कथं जानीयामित्यत्रिप्रश्ने याज्ञवल्क्यस्यानंतरं [illegible]काभारिभिर्वं द्वै जीवेभेदकल्पनया प्रतिष्ठितउपास्यः

यद्यपि वाजसनेयके द्यौरतिष्ठत्वगुणा समाम्नायते आदित्यश्च सुतेजस्त्वगुणश्छांदोग्ये पुनर्द्यौः सुतेजस्त्वगुणा समाम्नायते आ
दित्यश्च विश्वरूपत्वगुणस्तथापि नैतावता विशेषेण किंचिद्धीयते प्रादेशमात्रश्रुतेरविशेषात्सर्वशाखाप्रत्ययत्वाच्च संपत्ति
निमित्तां प्रादेशमात्रश्रुतिं युक्ततरां जैमिनिराचार्यो मन्यते ॥ आमनंति चैनमस्मिन् ॥ ३२ ॥ आमनंति चैनमस्मिन्मूर्धचुबुकयो
रंतराले जाबालाः य एषोऽनंतोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति सोऽविमुक्तः कस्मिन्प्रतिष्ठित इति वरणायां नास्यां च मध्ये प्रति
ष्ठित इति कतमा वरणा कतमा नासीति तत्र चेमामेव नासिकां वरणा नासीति निरुच्य सर्वाणीन्द्रियकृतानि पापानि वारयतीति साव
रणा सर्वाणीन्द्रियकृतानि पापानि नाशयतीति सा नासीति पुनरप्यामनंति कतमच्चास्य स्थानं भवतीति भ्रुवोर्घ्राणस्य च यः संधिः स ए
ष द्युलोकस्य परस्य च संधिर्भवतीति तस्मादुपपन्ना परमेश्वरे प्रादेशमात्रश्रुतिः अभिविमानश्रुतिः प्रत्यगात्मत्वाभिप्राया
प्रत्यगात्मतया सर्वैः प्राणिभिरभिविमीयत इत्यभिविमानः अभिगतो वायं प्रत्यगात्मत्वाद्विमानश्च मानवियोगादित्य
विमानोभिविमिमीते वा सर्वं जगत्कारणत्वादित्यभिमानस्तस्मात्परमेश्वरो वैश्वानर इति सिद्धं ॥ इति श्रीमच्छंकरभग
वत्पादकृतौ शारीरकमीमांसाभाष्ये प्रथमाध्यायस्य द्वितीयः पादः २ ॥

यति ५

पुनरत्रिप्रश्नः स तु कुत्र तं वरणायामिति एवं प्रश्नोत्तरे प्रपञ्चे तत्र च भूतेः इमामेव भ्रूमध्यवर्तिनीं नासिकां निरुच्येति भाष्ययोजना सर्वा
णीन्द्रियकृतानि पापानि वारयतीति वरणा भ्रूः सर्वाणि पापानि नाशयतीति नासी नासिकेति निर्वचनेन नासाभ्रुवोर्जीवस्थानत्वं स्थानत्वध्या
नार्थमुक्तमिति मन्तव्यं तयोर्मध्ये विशिष्य जीवस्य स्थानं पृच्छति कतमदिति भ्रुवोरित्युत्तरं घ्राणस्येति पाठे घ्राणस्येत्य
र्थः [illegible]लोकस्य स्वर्गस्य परस्य च ब्रह्मलोकस्य संधित्वेन ध्येयत्वमाह स एष इति अभिगतश्चेतनत्वे प्रत्यगभिविज्ञायते स
[illegible]त्यभिविमानः प्रमया मानेन अभिगतश्चासौ विमानश्च स विश्वरूपत्वेन सत्यानन्तज्ञानमत्र परिमाणमभिविमीते निर्मिमीते. तस्मा
[illegible]वाक्यमुपास्ये ब्रह्मणि समन्वितमिति सिद्धं इति श्रीमच्छारीरकव्याख्यायां भाष्यरत्नप्रभायां प्रथमाध्यायस्य द्वितीयः पादः २

ग्रा० भा०
प्र० च०

असंसारित्वं निराकरणपरा लक्ष्यते तथा मध्येऽपि यथोपक्रममेवोपसंहरति स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणे
षु इति योऽयं विज्ञानमयः प्राणेषु संसारी लक्ष्यते स वा एष महानज आत्मा परमेश्वर एवास्माभिः प्रतिपादित इत्यर्थः यस्तु
मध्ये बुद्धान्ताद्यवस्थोपन्यासः सोऽसंसारिस्वरूपविवक्षयैव न संसारित्वविवक्षया प्रश्नोत्तराभ्यामसंसारित्वं गम्यते यदत्रा
न्वागतं तेन भवत्यसंगो ह्ययं पुरुष इति पदे पदे प्रतिवक्ति अनन्वागतं पुण्येन
तस्यादसंसारिस्वरूपप्रतिपादनपरमेवैतद्वाक्यमित्यवगन्तव्यम् यद्यस्मिन्नाकोपन्यासः ध्यायतीव
नन्वागतं पापेन तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवतीति च तस्मादसंसारिस्वरूपप्रतिपादनपरमेवैतद्वाक्यमित्यवगन्त
स उपसंहारेऽपि स वा एष महानज आत्मा इत्यादि स एषोऽसंसारिस्वरूपप्रतिपादनपरः सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिरित्येवंजातीयकोऽसंसा
रिस्वरूपप्रतिपादनपराः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानित्येवंजातीयकोऽसंसारिस्वभावप्रतिषेधनात्
असंसारी परमेश्वर इहोक्त इत्यवगम्यते इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छंकरभगवत्पादकृतौ प्रथमाध्यायस्य तृ

दर्शितं यत् भवतीति चेति यदुक्तं तस्मात्समानतेति योजना तेनानवस्थाधर्मेणानन्वागतोऽस्पृष्टो भवति असंगत्वात् सुभावा
नवेषुदाहरणाभ्यामस्पृष्टो भवति हि यस्मात्तदा सुषुप्तौ सर्वशोकातीतः तस्माद्धृदयस्यैव सर्वशोका इति श्रुत्यर्थः वाक्यस्य ब्रह्म
परत्वे हेत्वन्तरमाह पत्यादीति स एव व्याचष्टे इति वशी स्वतन्त्रो परापराधीन इति यावत् ईशानो नियमनशक्तिमानुच्यते कार्य
स्वामी अधिपतिः तस्माज्ज्योतिरात्मपद्यौक्यपरास्त्वायमसमन्वय इति सिद्धं इति श्रीमच्छारीरकमीमांसाभाष्यरत्नप्रभायां प्रथमाध्या

५।

वा.भा.
प्र.३
१२

वाक्यान्वय [illegible] अव्यक्ते शमनंतं पंचमनाधारं च कारणं वेदितव्यं प्रियं वेदे प्रकृतिं पुरुषं परं १ अस्मिन्पादे धिकरणत्रयमेवानन्यथि
प्रधान [illegible] मन्वय इति ब्रह्मेति तदप्राकृत्वेन प्रधानस्य वैदिकशब्दस्मत्वेन सपथं इत्यस्यधिकारेणगतिसामान्यमपाद्य
विषये [illegible] गतिवेदान्तानां गतिसामान्य प्रपवितं अधुना प्रधानस्याशब्दत्वमसिद्धमित्याशंक्य निरूप्यते इत्याह तपमागतिः
[illegible] न ब्रह्मणि वेदान्तानां समन्वयो दृढीकृतो भवतीत्यध्यायसंगतिरप्यधिकरणत्रयस्य ज्ञेया अत्राव्यक्तपदविषयः
[illegible] नपरं शरीरकृपाशरीरपरं वेति संस्कृतिप्रकरणाभ्यां संशये एवं मप्रसिद्धं ब्रह्म परत्वं पयावण्णाध्यायस्य दर्शितं तद्वदव्यक्तपद

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च १ ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मणो लक्षणमुक्तं सन्मा
प्रस्याप्रतपति लक्षणं प्रधानस्यापि समानमित्याशंक्य तदशब्दत्वेन निराकृतमीक्षतेर्नाशब्दमिति गतिसामान्यं च वेदान्ते
वाक्यानां ब्रह्मकारणवादं प्रति विधेयते न प्रधानकारणवादं प्रतीति प्रपंचितं गतेन ग्रंथेन इदानीमव शिष्यमाशंक्यते
प्रकृते प्रधानस्याशब्दत्वं तदसिद्धं कासुचिच्छाखाप्रधानसमर्पणाभासानां शब्दानां श्रूयमाणत्वादतः प्रधानस्य कारणत्वं वेद
सिद्धमेव महद्भिः परमर्षिभिः कपिलप्रभृतिभिः परिगृहीतमिति प्रसज्यते तद्यावत्तेषां शब्दानामन्यपरत्वं न प्रतिपाद्यते ता
वत्सर्वज्ञं ब्रह्म जगतः कारणमिति प्रतिपादितमप्याकुली भवेत अतस्तेषामन्यपरत्वं दर्शयितुं परः संदर्भः प्रवर्तते १
आनुमानिकमप्यनुमाननिरूपितमपि प्रधानमेकेषां शाखिनां शब्दवदुपलभ्यते काठके हि पठ्यते महतः परमव्यक्तं १
मव्यक्तात्पुरुषः पर इति तत्र य एव यन्नामानो यत्क्रमाश्च महदव्यक्तपुरुषाः स्मृतिप्रसिद्धास्त एवेह प्रत्यभिज्ञायंते तत्राव्यक्त
मिति [illegible] प्रसिद्धेः शब्दादिहीनत्वाच्च न व्यक्तमव्यक्तमिति व्युत्पत्तिसंभवात् स्मृतिप्रसिद्धं प्रधानमभिधीयते तस्य शब्दव
त्वात् [illegible] प्रत्येतदेव च जगतः कारणं श्रुतिस्मृतिन्यायप्रसिद्धिभ्य इति चेत् नैतदेवं नह्येतत्काठकवाक्यं स्मृतिप्रसिद्धयो

महत्त्वमव्यक्तमिति पर्दं पश्यति आनुमानिकमिति अपि शब्दाद्ब्रह्मणोंगीकारेणापि शब्दत्वादेपरि इति सूचयति तथा
च ब्रह्म प्रधानयोर्विकल्पे कारणत्वाद्ब्रह्मण्येव वेदान्तानां समन्वय इति नियमासिद्धिः फले सिद्धान्ते नियमसिद्धिरिति विवेकः प
द विचारत्वाच्छिरसि [illegible] मेतत्पादसंगतिर्वा ध्यासान्ते महतः परमव्यक्तमिति शब्दः प्रधानपरः प्रावल्यस्पर्शादिमत्त्वेन योगस्य
संभवाद्रित्याह शास्त्रीति प्रधानस्य वैदिकशब्दवाच्यत्वेकान्तातिरिच्यत आह तदेवेति अजामेकामित्याद्यास्तिर्हि
तः प्रकृतिरिच्यते स्मार्तस्मृतिः यदल्पं तत्तदुपादानकमिति न्यायः तत्त्वाद्ब्रह्मैव कारणमिति तत्रातिरिभावः सूत्रे
तस्य पक्षवर्णितं हानयतिनेन नेति प्रधानं वैदिकं तस्य तत्तात्पर्याभावं हेतुमाह नहीति ॥ ॥ ॥

१२ २१ २२ २४ २५ २६

रे
अनुमानिकाधिकरणम्

ननु प्रधानस्यात्र प्रत्यभिज्ञानाद्वैदिकत्वमित्यत आह नैतदेवेति ननु पाठक्रमप्रत्यभिज्ञा यामर्थ्योपि प्रत्यभिज्ञायत इत्याशंक्य यौगिकाव्यक्त
दत्तमिति यामके नार्थविशेषधीरित्याह स चेति रूढ्या तद्धीरित्याशंक्य रूढिः किं लौकिकी स्मार्ती वा नाद्य इत्याह नचेति द्वितीयं प्रत्या
ह यात्विति पुरुषसंकेतानानादिवत्सुनिर्णायहेतुः पुंमतैर्विचित्रत्वादित्यर्थः यत उक्तं तं क्रमप्रत्यभिज्ञयोः क्रमिकार्थः स्मार्त एवे
ति तत्राह नचक्रमेति स्यान्मद्रूपप्रत्यभिज्ञानप्रकृयायानमतीत्यनव्ययानज्ञातोऽयमत्याश्रेतानातद्रूपस्य तद्रूपविरुद्धस्य प्रत्यभिज्ञाने स
तीत्यर्थः एवं ज्ञातरूपार्थरूपस्य थानेन तद्विरुद्धज्ञाने सति तस्य धीर्नास्तीत्यत्र दृष्टांतमाह नहीति प्रकृतेनास्ति विरुद्धज्ञानमित्याशंक्याप्र
करणाच्छेषाच्चैतन्नक्षीत्याह प्रकरणेति शारीरमेव रूपके णरथसादृश्येन विन्यस्तं शरीरं रूपकविन्यस्तं तस्य एवं वाक्य आत्मबुद्ध्यो

नह्यत्र यथा स्मृतौ प्रसिद्धं स्वतंत्रं कारणं त्रिगुणं प्रधानं तादृशं प्रत्यभिज्ञायते शब्दमात्रं ह्यत्राव्यक्तमिति प्रत्यभिज्ञायते स
च शब्दो न यौगिकत्वादन्यस्मिन्नपि सूक्ष्मे सुदुर्लक्ष्ये च प्रयुज्यते नचायं कस्मिंश्चिद्रूढः या तु प्रधानवादिनां रूढिः सा ते
षामेव पारिभाषिकी सती न वेदार्थनिरूपणे कारणभावं प्रतिपद्यते न च क्रममात्रसामान्यात्समानार्थप्रतिपत्तिर्भवत्यसति
तद्रूपप्रत्यभिज्ञाने न ह्यश्वस्थाने गां पश्यन्नश्वोयमित्यमूढोऽध्यवस्यति प्रकरणनिरूपणायां चात्र न परपरिकल्पितं प्रधानं
प्रतीयते शरीररूपकविन्यस्तगृहीतेः शरीरं ह्यत्र रथरूपकविन्यस्तमव्यक्तशब्देन परिगृह्यते कुतः प्रकरणात्परिशेषा
च्च तथा ह्यनंतरातीतो ग्रंथ आत्मशरीरादीनां रथिरथादिरूपकक्लृप्तिं दर्शयति आत्मानं रथिनं विद्धि शरीरं रथमेव तु बुद्धिं तु
सारथिं विद्धि मनः प्रग्रहमेव च इंद्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति तैश्चेंद्रि
यादिभिरसंयतैः संसारमधिगच्छति संयतैस्त्वध्वनः पारं तद्विष्णोः परमं पदमाप्नोतीति दर्शयित्वा किं तदध्वनः पारं विष्णोः प
रमं पदमित्यस्यामाकांक्षायां तेभ्य एव प्रकृतेभ्य इंद्रियादिभ्यः परत्वेन परमात्मानमध्वनः पारं विष्णोः परमं पदं दर्शयति इंद्रि
येभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न

गृहीतेः ॥

शरीररूपकविन्यस्त

[illegible] न पठितस्यात्राप्यमध्यस्येनाव्यक्तपाठेन ग्रहणान्न प्रधानस्य वैदिकत्वमिति सूत्रार्थः स्मार्तक्रमः किमिति त्यक्तव्य इत्याशंक्याश्रो
[illegible] णात्पुनर्ग्रहणाबलवत्त्वादित्याह कुत इत्यादिना तदुभयं विवृणोति तथाहीति रूपकक्लृप्तिः सादृश्यकल्पना प्रग्रहो ॥
[illegible] रश्मिर्यदि विवेकी न तदा मनसैंद्रियहयान्विषमविषयमार्गे दाकर्षंति यदा विवेकी तदा मनोरश्मिबद्धास्सन्मार्गवर्त
यंतृहितं [illegible] प्रहत्वं प्रकृतेषु हयेषु गोचरान्मार्गान् तस्मिन्रथे मनोयोगसंभवात्किं रथ्यादिनेत्यत आह आत्मेति आत्मा देहः
[illegible] नया भोक्तृत्वं न स्वतोऽसंगत्वादित्यर्थः अध्वनः रथ्यादिभिर्गंतव्यं वदन्नाकांक्षायामेवं क्रमेतरवाक्यमादत्ते इंद्रि

दृष्टि

आ२

ना२

शां०भा०
प्र०ख०
१०६

अव्यक्तमप्रमाणत्वेऽप्यव्यक्तरूपदेन प्रधानं गृह्यतामित्यत आह तत्रापि वेति एवं प्रकारेण शोधयन्त्या श्रुतेः परिशेषतां ज्ञापयति तत्रेन्द्रियेत्यादिना । वेदेर्थे रसेन श्रुतिः प्राकारेण पथ्यतत्वमुपपादयति अर्थाश्चेति एवं हि पुरुषस्यैव प्रतीतिप्रहाइन्द्रियाणि नैवाग्रहत्वे विषयाधीने अस्त विकल्पकत्वात्तेभ्यः अशक्तिविषयात्तत्तद्वारेणापेक्षत्वत्वेऽपि स्यात्सर्वेषां परत्वमिति भावः स देवमनःप्रवृत्तिबुद्धिः महानित्याह अपचेति मननशक्तिर्व्यापिनी भाविनिश्चयः अत्रात्माभोग्यवर्गाश्रयः तात्कालिकनिश्चयः

तत्र एवं इन्द्रियादयः सर्वसंसारपल्लवकल्पना यामस्त्यादिभावेन प्रकृतास्ते एवेह परिगृह्यन्ते प्रकृतहानाप्रकृतप्रक्रियापरिहाराय तत्रेन्द्रियादयः मनोबुद्धिपर्यन्तास्सर्वे एव समानग्राह्या एव अर्थाः ये शब्दादयो विषयाः इन्द्रियरूपरथोपरत्वेन निर्दिष्टास्तेषामिन्द्रियेभ्यः परत्वमिन्द्रियाणां ग्रहत्वं विषयाणामतिग्रहत्वमिति श्रुतिप्रसिद्धं विषयेभ्यश्च मनसः परत्वं मनोमूलत्वाद्विषयेन्द्रियव्यवहारस्य मनसस्तु परा बुद्धिः बुद्धिर्ह्यात्मभोग्यजाते भोक्तारस्वयमर्पयति बुद्धेरात्मा महान्परो यः स आत्मा नरथिनेति हीतिरथिनेनोपक्षिप्तः आत्मशब्दाद्भोक्तृस्वभावोपकरणान्तरत्वोपपत्तेः महत्त्वं चास्य स्वामित्वादुपपन्नमथवा मनो महानिति प्रथमजं बुद्धिः ख्यातिरीश्वरः प्रज्ञा संवित्तिः स्मृतिरित्यादिपर्यायैः तदिति स्मृतिः योऽत्र प्राणविधातिसर्वप्रोवेदास्य प्रहिणोति तस्मै इति श्रुतेः पासप्रथमजस्य हिरण्यगर्भस्य बुद्धिः सा सर्वासां बुद्धीनां परा प्रतिष्ठा सेह महानात्मेत्युच्यते सा च सर्वबुद्धिप्रहणेनैव गृहीता सती सदृशाविह विशेषणादुपदिश्यते तस्याश्च प्यस्मदीयाभ्यो बुद्धिभ्यः परत्वोपपत्तेः एतस्मिंस्तु पक्षे परमात्मविषयेनैव परेण पुरुषग्रहणेन रथिन आत्मनो ग्रहणं द्रष्टव्यं परमात्मविज्ञानात्मनोर्भेदाभावात् तदेवं शरीरमेवैकं परिशिष्यते इतराणीन्द्रियादीनि प्रकृतान्येव परमपदं दर्शयितुं समनन्तरमनुक्रान्तानि परिशिष्यमाणेनेहानेनान्यक्तपदेन परिशिष्यमाणं प्रकृतं शरीरं दर्शयतीति गम्यते ॥ परमार्थतः३ ॥

पु२

कीर्तिशक्तिः नियमनशक्तिः त्रैकाल्यनिश्चयः ते विदभिव्यंजिका विदध्यत्ताऽतीतसर्वार्थग्राहिणी समष्टिबुद्धिरित्यर्थः हिरण्यगर्भस्येयं बुद्धिरस्मीत्यत्र श्रुतिमाह यस्तिनन्वप्रकृता सा कथमुच्यते तद्भावेन च प्रथमेन तत्किमपराद्धमित्यत आह सा चेति हिरण्यगर्भस्य व्यष्टिबुद्धाभेदेनोक्तावतो भेदेनैव परत्वं च्यान इत्यर्थः तर्हि रथिनो द्वौ परिशिष्टौ स्यातामेवेत्याह एतस्मिन्निति अतो रथ एव परिशिष्यत इत्याह तदेवमिति तेषु पूर्वोक्तेषु पदार्थेष्वित्यर्थः परिशेषस्य फलमाह इतराणीति वेदोपमेवेति शेषः द

किंच ब्रह्मात्मैकत्वपरे ग्रंथे भेदवादिना प्रधानस्यावकाशो नास्तीत्याह शरीरेत्यादिना भोगो वेदना काठकग्रंथस्यैकवाताय

तद्दमय्य

शरीरेन्द्रियमनोबुद्धिविषयवेदनासंयुक्तस्य ह्यविद्यावतो भोक्तुः शरीरादीनां रथादिरूपकल्पनया संसारमो।
क्षगतिनिरूपणेन प्रत्यगात्मब्रह्मावगतिरिह विवक्षिता तथा चैष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते त्व।
ग्र्यया बुद्ध्या सूक्ष्मदर्शिभिरिति वैष्णवस्य परमस्य पदस्य दुरवगमत्वमुक्त्वा तदवगमार्थं योगं दर्शयति।
यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनीति एतदुक्तं भव।
ति वाचं मनसि संयच्छेत् वागादिबाह्येन्द्रियव्यापारमुत्सृज्य मनोमात्रेणावतिष्ठेत मनोऽपि विषयविकल्पा
भिमुखं विकल्पदोषदर्शनेन ज्ञानशब्दोदितायां बुद्धावध्यवसायस्वभावायां धारयेत् तामपि बुद्धिं महत्यात्म
नि भोक्तर्यग्र्यायां वा बुद्धौ सूक्ष्मतापादनेन नियच्छेत् महान्तं त्वात्मानं शान्ते आत्मनि प्रकरणवति परस्मिन्पुरुषे परस्यां काष्ठा
यां प्रतिष्ठापयेदिति तदेवं पूर्वापरालोचनायां नास्त्यत्र परपरिकल्पितस्य प्रधानस्यावकाशः

द्दश्यते२

येन गूढत्वेऽप्यज्ञानहेतयो योगविधयो लिंगानि संतीत्याह तथा चैवेत्यादिना अप्राप्तसमाधिपरिपाकस्य वागित्यत्र द्वितीयालोप।
छान्दसो मनसीति दैर्घ्यं च

शा. भा.
प्र. ४.

शंकोत्तरत्वेन सूत्रं व्याचष्टे उक्तमेतदित्यादिना कार्यकारणयोरभेदात् स्थूलप्रकृतिवाचकाव्यक्तशब्देन विकारो लक्ष्यत इत्यर्थः
गोभिर्गोविकारैः पयोभिः मत्सरं सोमं श्रीणीत मिश्रितं कुर्यादिति यावत् श्रीञ् पाके इति धातोर्लोटि मध्यमपुरुषबहुवचन
मेतत् [illegible] कालकार्यस्याव्यक्तशब्दयोग्यत्वमानमाह श्रुतिश्चेति तर्हि प्रागवस्थायामिदं जगद् अव्याकृतमासीद् किलेत्य
र्थः [illegible] शक्तिः संस्कारात्मत्वं व्यवस्थमपसिद्धान्तशंकोत्तरत्वेन सूत्रं व्याचष्टे अत्राहेत्यादिना तर्हि नेदं स्वतन्त्रं सूक्ष्मशक्तिन

सूक्ष्मं तु तदर्हत्वात् उक्तमेतत् प्रकरणपरिशेषाभ्यां शरीरमव्यक्तशब्दं न प्रधानमिति इदमिदानीमाशंक्यते कथमव्यक्त
शब्दार्हत्वं शरीरस्य यावता स्थूलत्वात् स्पष्टतरमिदं शरीरं व्यक्तशब्दार्हं स्पष्टवचनस्त्वव्यक्तशब्द इति अत उत्तरमु
च्यते सूक्ष्मं त्विह कारणात्मना शरीरं विवक्ष्यते सूक्ष्मस्याव्यक्तशब्दार्हत्वात् यद्यपि स्थूलमिदं शरीरं न स्वयमव्य
क्तशब्दमर्हति तथापि तस्य त्वारंभकं भूतसूक्ष्ममव्यक्तशब्दमर्हतीति प्रकृतिशब्दश्च विकारे दृष्टः यथा गोभिः श्री
णीत मत्सरमिति श्रुतिश्च तद्धेदं तर्ह्यव्याकृतमासीदिति इदमेव व्याकृतनामरूपविभिन्नं जगत् प्रागवस्थायां परित्य
क्तव्याकृतनामरूपं बीजशक्त्यवस्थमव्यक्तशब्दयोग्यं दर्शयति तदधीनत्वादर्थवत् ३ अत्राह यदि जगदिदम
नभिव्यक्तनामरूपं बीजात्मकं प्रागवस्थमव्यक्तशब्दार्हमभ्युपगम्येत तदात्मना च शरीरस्याप्यव्यक्तशब्दार्हत्वं प्र
तिज्ञायेत स एव तर्हि प्रधानकारणवाद एवं सत्यापद्येत अस्यैव जगतः प्रागवस्थायाः प्रधानत्वेनाभ्युपगमादिति अत्रो
च्यते यदि वयं स्वतंत्रां कांचित् प्रागवस्थां जगतः कारणत्वेनाभ्युपगच्छेम प्रसंजयेम तदा प्रधानकारणवादं परमेश्वरा
धीना त्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते न स्वतंत्रा सा चावश्याभ्युपगंतव्या अर्थवती हि सा न हि तां विना
परमेश्वरस्य स्रष्टृत्वं सिध्यति शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः मुक्तानां च पुनरनुत्पत्तिः विद्यया तस्या बीजशक्तेर्दा
हात् अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी ॥ ॥

प्रागवस्थाभ्युपगमे सति [illegible] कल्पितात्तत्त्रिपक्षेत्यंगीकारात् सिद्धान्तहानिरित्याह अत्रोच्यत इत्यादिना कूटस्थस्य ब्रह्मणः स्रष्टृत्वसि
ध्यर्थं न विद्यासाक्षीकार्यं तु [illegible] बंधमुक्तिव्यवस्थार्थमपि साक्षीकार्यमित्याह मुक्तानामिति यत्राशान्तशक्तिः साक्षीकार्यं तां विनैव ब्रह्मत्वम
क्तानां पुनर्बंधापत्तिरित्यर्थः तस्याः परकल्पिततत्त्वात् प्रधानाद्भेदलक्षणमाह अविद्येत्यादिना मायामयीश्रमि
इ मायोपमिताऽलीका मायाविनो मायावत्परतंत्रेत्यर्थः ॥ ॥ ॥ ॥

३

जीवभेदोपाधित्वेनाधिकस्यास्त्यैकार्येत्याह महानात्मा बुद्धेरिति बुद्ध्याद्युपाधिभेदाज्जीवा इति बहुत्विर विद्यायां स्मृतिमप्याह तदेतदिति
आकाशादेरुत्पाद्यकाद्यः शान्तिप्रनाताभावाद् हरं विचि ब्रह्मादित्वान्मायेति भेददृष्टानीमविद्याया ब्रह्मभेदान्तत्वाभ्यामनिर्वाच्यत्वेना
व्यक्तशब्दार्हत्वमाह अव्यक्तमिति तस्य महतः परत्वं कथमित्यतआह तदिदमिति महाबुद्धिमहान्तदात्मतत्त्वात्परत्वमित्यन्व
यः प्रति विवस्योपाधिपरंपरात्वाद्युपाधेः प्रतिविंबात्परत्वमाह यदात्विति हेतुस्फुटयति अविद्येति अव्यक्तस्य परत्वेपि शरीर

२५

महाकारणत्वेनास्य स्वरूपप्रतिबोधरहिताः घोरतेसंसारिणोजीवाः तदेतदव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टं एतस्मिन्नुखल्व
लवेक्षरे गार्ग्याकाशश्चोतश्च प्रोतश्चेति श्रुतेः क्वचिदक्षरशब्दोदितमक्षरात्परतः परइति श्रुतेः क्वचिन्मायेतिस्मृति तेनमाया
तुप्रकृतिं विद्यान्मायिनंतुमहेश्वरमिति मंत्रवर्णात् अव्यक्ताहि सामाया तत्त्वान्यत्वनिरूपणास्याकृ[illegible]त्वात्तदिदंमहतः पर
मव्यक्तप्रभवत्वान्महतः यदाहैरण्यगर्भंबुद्धिर्महान् यदातुजीवोमहांस्तदाप्यव्यक्ताधीनत्वाज्जीवभावस्य महतः परम
व्यक्तमित्युक्तमविद्याद्यविद्यावत्त्वेनैवजीवस्सर्वः संसारव्यवहारः संततोनुवर्तते तच्चाव्यक्तगतंमहतः परत्वमभेदोप
चारात्तद्विकारे शरीरेपरिकल्प्यते सत्यपि शरीरवदिन्द्रियादीनां तद्विकारत्वाविशेषे शरीरस्यैवाभेदोपचारादव्यक्तशब्दे
नग्रहणमिन्द्रियादीनांस्वशब्देरेवग्रहीतत्वात्परिशिष्टत्वाच्च शरीरस्य अन्येतुवर्णयंतिद्विविधंहि शरीरं स्थूलंसूक्ष्मं
चस्थूलंयदिदंदृश्यमुपलभ्यते सूक्ष्मं यदुत्तरत्रवक्ष्यते तदन्तरप्रतिपत्तौरंहतिसंपरिष्वक्तः प्रश्ननिरूपणाभ्यामिति तच्चाभ

५८ यमपिशरीरमविशेषात्पूर्वत्ररथत्वेनकीर्तितमिह तु सूक्ष्ममव्यक्तशब्देनपरिगृह्यते सूक्ष्मस्याव्यक्तशब्दार्हत्वात् तद्धी
नत्वाच्चबंधमोक्षव्यवहारस्यजीवात्तस्यपरत्वं यथार्थाधीनत्वादिन्द्रियव्यापारस्येन्द्रियेभ्यः परत्वमर्थानामिति तैस्तुनैत
दव्यक्तविशेषेण शरीरं हि यस्य पूर्वत्ररथत्वेनसंकीर्तितत्वात्समानयाः प्रकृतत्वपरिशिष्टत्वयाः कथंसूक्ष्ममेवशरीरमिह

व्यक्तिमानेनदाह तच्चेति नन्विन्द्रियादीनामप्यव्यक्ताभेदादव्यक्तत्वं पक्षवच्चकिमितिनोच्यते तत्राह सत्यपीति सूत्रं द्वयस्यत्रिहेतुद्वा।
व्यालक्षणमपेक्षत इति अन्येत्विति पंचीकृतमहाभूतानांसूक्ष्मावयवाः स्थूलदेहारंभकाः सूक्ष्मशरीरंप्रतिजीवलिंगस्याश्रयत्वेन
निर्दिष्टमस्मिन्वक्ष्यते देहान्तरप्राप्तौतेन युक्तो गच्छति परलोकमित्यर्थः कथंतस्य महतोजीवात्परत्वमित्याशंक्याह तद्धीनत्वाच्चे
त्यादिवाचयेदः मरधीनत्वाच्चेति अर्थवदिति सूत्रस्य दृष्टान्तमाह यथेति तद्व्याख्यानेन दूषयति तैरिति ॥ ॥

ब्र० भा०
प्र० द०
२०६

अव्यक्तपदस्य स्थूलात्मकशरीरपरत्वे तदपि स्थूलं त्यज्यतामिति शंकते आम्नातस्येति एकार्थबोधकानां वाक्यानामिथ आकांक्षयैकवाक्यत्वं वक्तव्यमेकवाक्यतापन्नानां तेषां सम्भूयार्थबोधकत्वमिति तावत्सिद्धं तथा तेषां बोधकत्वमेति तात्पर्यं विना प्यर्थधीः किं न स्यादित्यत आह नहीति शरीरपदं वाक्यस्य स्थूलशरीरपरत्वे तस्य हानिः प्रसज्येत तस्मात् सूक्ष्मस्याव्यक्तपदेन ग्रहणमनायासेन स्यादित्यर्थः अस्तु एकवाक्यता तत्राह नत्विति आकांक्षया वाक्यैकवाक्यत्वे सति प्रकृतशरीरस्य सम्बन्धिपदेन ग्राह्यमाकांक्षायाः तुल्यत्वादिति भावः अनात्मनिस्पृहः श्रुतिः तदर्थं सूक्ष्ममेवाकांक्षितत्र ग्राह्यं तस्य सूक्ष्मत्वेनात्माभेदेन ग्रहीतस्य दुःशोधत्वात् स्थूलस्य दृष्ट

आम्नातस्यार्थं प्रतिपत्तुमशक्यत्वादनाम्नातं पूर्वं नयोगात् आम्नाते चाव्यक्तपदं सूक्ष्ममेव प्रतिपादयितुं शक्नोतीति नेतराद्यत्वाद् नस्येति चेन्नैकवाक्यताधीनत्वादर्थप्रतिपत्तेः नहीमे पूर्वोत्तरे आम्नाते एकवाक्यतामनापद्यमाने किञ्चिदर्थं प्रतिपादयतः प्रकृतहानाप्रकृतप्रक्रियाप्रसंगात् न चाकांक्षामन्तरेणैकवाक्यताप्रतिपत्तिरस्ति तत्राविशिष्टायां शरीरस्य ग्राह्यत्वाकांक्षायां यथाकांक्षं सम्बन्धेऽनभ्युपगम्यमाने एकवाक्यतैव बाधिता भवति कुत आम्नातार्थस्य प्रतिपत्तिः न चैवं मन्तव्यं दुःशोधत्वात् सूक्ष्मस्यैव शरीरस्येह ग्रहणं स्थूलस्य तु दृष्टबीभत्सतया सुशोधत्वात् अग्रहणमिति नेवे दुःशोधत्वे कस्यचित् विवक्षितत्वे तेन तत्र शोधने विधायकं किञ्चिदाख्यातमस्ति अनन्तरनिर्दिष्टत्वात्तु किं तद्विष्णोः परमं पदमिति तदिह विवक्ष्यते न प्राहि इदमस्मात्परमिदमस्मात्पुरुषात्परं किञ्चिदित्यादि सर्वं प्रापितानुमानिकनिराकरणपरत्वेन प्रत्याख्यानान्न किञ्चिच्छिद्यते तेषां त्वावचनाच्च ७ ज्ञेयत्वेन च सांख्यैः प्रधानं स्मर्यते गुणपुरुषान्तरज्ञानात् कैवल्यमिति वदद्भिः नहि गुणस्वरूपमज्ञात्वा गुणेभ्यः पुरुषस्यान्तरं शक्यं ज्ञातुमिति ॥ ॥

दौर्गन्ध्यादिना लज्जास्पदत्वेन तथैव वैराग्ययोः सुलभत्वादिति शंकते दृष्टबीभत्सा दृष्टा यस्मिंस्तस्य भावस्तत्त्वमित्यर्थः दृश्यपतिपन्नशरीरे वैराग्यादयो दृश्यन्ते दृष्टत्वेन प्रतिभावात् किं त्वेवं पदं विवक्षितमिति तदर्शनार्थं प्रकृते स्थूलमेवाव्यक्तपदेन ग्राह्यमिति भावः किं च सूक्ष्मस्यालिंगात्तः प्रतितनुत्वात् ग्रहणेनैव ग्रहणान्न पृथगव्यक्तशरीरपदाभ्यां ग्रहीतव्यत्वेनतराद्यर्थत्वं ज्ञेयत्वेति सत्त्वादिगुणरूपान्यथा नास्य स्यान्तरं भेदत्वं ज्ञानादित्यर्थः नहि शक्यमिति च वदद्भिः प्रधानं ज्ञेयत्वेन स्मर्यं

२०६

ननु द्वितीये वृत्तो जीवविषयात् तत्त्वज्ञानात् शोकमोहनिवृत्तिर्न संभवेत् । इत्यत आह । येषामिति । येते अनुपक्रान्तस्त्रीपत्नीपुत्रकलत्रादि लिङ्गाज्जीवात्मविषये वक्तव्ये तत्रीयो वत्स उत्तरार्थः
श्रुतवाक्योपक्रमे समाने प्रश्ने इत्यादि तेनेति । मरणधर्मत्वे सति लिङ्गाभ्याम् एवाप्याजीवेश्वरयोर्भेदात्प्रश्नभेदसिद्धेर्वाक्यबाधो युक्त इति शोकाते
नान्तिरित्यादिना ... प्रश्नभेदः । किं तु प्रश्नवाक्ययोः साहश्यभावादयोत्याह । प्रश्नस्यैकत्वे भेदोसिद्ध इति पर
हरेति नेत्यादिना । किं च यः प्रश्नोजन्मादिनिषेधेन जीवस्वरूपं वदत्यन्ययोर्वैकत्वं च तत्राह । इहचान्येषु तन्निषेधवाक्यजीवात्मक्षरसिद्धे तस्मात्
ह सतीति भावी ... जीवस्य जन्मादिनिषेधेन स्वरूपमुक्तमित्यर्थः । किं च जीवो व्रत्याभिन्नः मो तत्र हे तु तत्त्वान विषयत्वाद्वृत्रादि

... मेव वृत्तजीवस्तिलिङ्गात् । नत्रयच्चान्यत्रधर्मादित्यन्योपमहुर्वैः प्रश्न इत्यादाय तत्र तत्र व प्रदानव्यतिरेकेणापि प्रश्नकल्पना
द्वा ... प्रश्नस्य भेदात् पूर्वोयं प्रश्नो भवितुमर्हतीति सर्वाद्यमप्रश्नो जीवविषयः । येयं प्रेते मनुष्ये अस्ति नास्तीति विवित्साभिधाना जीवस्य
धर्माद्यो चवनात्कान्यत्रधर्मादिति प्रश्नमर्हति मा तत्स्व धर्मा धुती न तवादन्यत्रधर्मादिति प्रश्नमर्हति प्रश्नैक्याय वनसमाना लत्वात् पूर्वस्या
स्तिनास्तित्व विषयत्वादुत्तरस्य धर्माद्यतीतवस्तुविषयत्वाच्च समाप्त्यभिज्ञानाभावात्प्रश्नभेदः । न एवं सेयोत्तरस्यानुकर्षणमिति चेत् न जी
वप्राज्ञयोरेकत्वाभ्युपगमात् । भवेत्प्रश्नभेदात्प्रश्नभेदो यद्यन्यो जीवः प्राज्ञात्स्यात् न त्वन्यत्वमस्ति तत्त्वमसीत्यादिश्रुतिभ्यः इह
चान्यत्रधर्मादित्यस्य प्रश्नस्य प्रतिवचनं न जायते म्रियते वा विपश्चिदिति जन्ममरणप्रतिषेधेन प्रतिपाद्यमाने शरीरपरमेश्वरयोरभे
दं दर्शयति सतिहि प्रसंगे प्रतिषेधो भागी भवति प्रसंगश्च जन्ममरणयोः शरीरसंस्पर्शाच्छरीरस्य भवति न परमेश्वरस्य तथा स्वप्नांतं जा
गरितांतं चोभौ येनानुपश्यति महान्तं विभुमात्मानं मत्वा धीरो न शोचतीति स्वप्नजागरितदृशो जीवस्यैव महत्त्वविशेषणस्य मनने न शोक
विच्छेदं दर्शयन् प्राज्ञादन्यो जीव इति दर्शयति प्रत्त विचित्तात्मा हि शोकविच्छेद इति वेदान्तसिद्धान्तः तथा यदेवेह तदमुत्र यदमुत्र तदन्विह
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति जीवप्राज्ञभेददृष्टिमपवदति तथा जीवविषयस्यास्तित्वनास्तित्वप्रश्नस्यानंतरं ॥ ॥ ॥

वदत्याह । तथा स्वप्नेति स्वप्नेनो वस्थायेन साक्षिणा प्रमाता पश्यति तमात्मानमिति संबंधः हेतोरप्रयोजकत्वमाशंक्य तमेव विविदिषेत्यादिश्रु
ति विरोधमाह । प्रत्तेति । किं चाभेदमुक्त्वा भेदस्य निन्दितत्वाद्भेद एव सम्यगित्याह । तथेति । इहदेहे यच्चैतन्यं तदेवामुत्र स्वर्गादौ एव मि
हाखण्डैकरसे वस्तुनि यो नानात्वमिव प्राभेदं पश्यति स भेददर्शी मरणात्मरणं प्राप्नोति संसारभयान्न मुच्यत इत्यर्थः किं च जीवप्रश्नानं
नंतरं दुर्दर्शमिति यदुत्तरमुवाच तेनाप्युत्तरेणाभेदोगम्यत इति संबंधः ॥

मध्यमयोः प्रश्नस्यापि लिंगेन स्पष्टत्वाज्जीवस्य दौर्लभ्यव्योतनायै दुं स्तन सिद्धिरित्याह अन्यं वरमित्यादिना पुत्रादिकं हुत्वा वायेत्तु तेपि विषयां
[illegible] ललनात्त स्मा नचिकेत वृणीत इति यवृणात्तदा सत्त प्रायमो न्यच्छ्रेयान्य दुत वेभ्य इति भोगाय वर्गयो र्विलक्षणं
प्रतिज्ञाय [illegible] विपरीते विषूची अविद्याया च विद्येति दोरोत्तया नित्ययोः प्रेयः प्रेयतत्स्वर्गादि कं विषूची विरुद्ध फल विपाक मविद्या विद्या
[illegible] विद्याभीप्सिनं विद्यार्थे नत्वा मन्ये यतस्त्वां नाव हवाप्यकामाः पुत्रादयो मया दीयमाना दुर्लभा अपि नालोलुपंते लोभयंते

अन्यं तं नचिकेतो वृणीष्वेत्यारभ्य मरत्तु नो ते त्वे काम्ये: मलोभ्यमानोपि नचिकेता पदानचचाल तदेनं स्तुवन्नभ्युदयति श्रेयसि वि
भाग प्रदर्शनेन विद्याविद्याविभाग प्रदर्शनेन च विद्याभीप्सितं नचिकेतसं मन्ये न त्वा कामा बहवो लोलुपंत इति प्रशस्य प्रश्न मपि
न दीयं प्रशस्य मन्यदुवाच तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोको जहा
ति तिते नापि जीवमात्रयोः भेदे एव हविवतित इति गम्यते यत्तु अनिमित्ताच मधशीमा महतो मृत्योः प्रमुच्यत इति नचिकेता यदेत वि
दाय प्रशंसाने नत्र मत्त मेव प्रश्न मनुपातिपेन अस्यान्न एवस्य सर्वाम्प्रशामा मसाविताया न साधेयमेते इत्यामे वप्रश्न स्पेत दनु का पूर्णम
न्यत्र धर्मादिति यत्तु प्रश्न छायात्रेललप्रापत्तु केन न तत्र दूषणान्तरीयस्य विशेषस्य पुनः पृच्छमान त्वात् सर्वत्र हि देहादि व्यतिरिक्त
त्मा मन्तोवित्तं प्रकृत्य तत्र ते वतं त्मैवाम्सा रितं एष्टोतं इति यावद्वाविद्यानि वर्त्तते ता वह मदादिगोचर त्वं जीवस्य जीवत्व चनिव
तते न हि तोरु माज्ञ एव तत्त्व ममीति श्रुत्या प्रत्यापयते न चाविद्यावत्ते तरपगमे च वस्तुनः कश्चिद्विशेषोस्ति यथा कश्चित्तमसि
पतिता [illegible] मन्यमानस्त ताभी तो वेपमानः पलायते तं चापरो ब्रूयान्माभैषीः नायमहिः रज्जुरेवेति स च तदुपश्रुत्याहिकृ
तं भयमुत्सृज्य वेपथु पलायने च नत्त हि बुद्धिकाले तत्पगमकाले च वस्तुनः कश्चिद्विशेषः स्यात् तथैवैतदपि द्रष्टव्यं तत
[illegible] मापि भवत्य सितत्प्रश्नस्य मतिवेचनं सर्वं त्वविद्या कल्पितजीवमात्र भेदोपत्ते पायोज्यतव्या एकत्वपिसा
[illegible] स्यायाव्यतिरिक्तासितं मात्रावि विकिल्सनात्क [illegible] तमसार स्वभाववाद नाद्दूवर्षपर्याय जीवावि

कृतत्वं तदनिम [illegible] यावद्विकेतः प्रदेति स्तुवन्निवयन्नर्थः इयंप्रशंसा प्रश्नभेद प्रलेन न घटत इत्याह यत्वथेति यत्पृष्टे
तत्तु तेलव्वा [illegible] वोत्थापूर्थेत देनव मरेस्तु तिः कृता स्यादित्यर्थः तस्मादिति प्रश्नभेदाभावादित्यर्थः प्रश्नवाक्य वा
क्योः साहूपाभावात्प्रश्न भेद दुस्तुतो निराधाति यत्त्वित्यादिना धर्माद्याश्रयस्य जीवस्य वृत्तान्तकथमित्यत आह यावदिति अविद्यानाशनेन रवे
दान्तवेदान्तत कमनित्य वस्या दिस्य माह नचाविद्यावत्त इति जीवस्य ससत्स्वभावे के व द्वन्द्व मस्यपद तनं तज्जीवमस्यापि भवतीति लाभे

कल्पितभेदस्य स्वभेदकल्पनेत्याह तत्स्येति परमात्मनः सकाशात्प्रधानस्यैव वैषम्यमनात्मत्वेन तत्तनीयवत्तं न भौवा योगादिति भावः श्रो
तो व्यक्तशब्दो न सांख्यसाधारण[illegible]गोचरः वैदिकशब्दत्वान्महच्छब्दवदित्याह महद्वच्चेति सूत्रं व्याचष्टे यथेत्यादिना न चाका
शादिशब्दे व्यभिचारः आकाशादेर्वैदिकत्वेन साधारण्येन सांख्यसाधारणत्वासिद्धेः साध्यस्यापि सत्त्वादिति मंतव्यं सत्तामात्रे सत्त्वप्रधानप्रकृ
तेराद्यपरिणामे[illegible]त्यर्थः आत्मा महानित्यात्मशब्दप्रयोगात्तं मत्वा न शोचति तमसः परस्तादित्यादिना शोकान्यय
तमःपारत्वादिश्रु[illegible]ः सांख्यतत्त्वनामिधत्ते इति संबंधः अधिकरणार्थमुपसंहरति [illegible]ः अतश्चेति चमसवद्विशेषा
त अजामपदं [illegible] तत्किं प्रधानपरं मायापरं वेति हृष्ट्वा संभवात्संशये पूर्वं त्राव्यक्तशब्दमात्रेण प्रधानस्याप्रतिभितत्वात्तामसध्यत्ति

महत्तवेर

ततश्च पूर्वाक्षि[illegible]जीव परमात्मकल्पना प्रधानकल्पनायाः नवर प्रधानं तत्प्रश्नोत्तरप्रतिवचनमिति वैषम्यं महद्वच्च ७ पा
यामहच्छब्दः सांख्यैः सत्तामात्रेपि प्रथमजे प्रयुक्तो न तथैव वैदिकेपि प्रयोगोभिधत्ते बुद्धेरात्मा महान्परः महांतं विभुमात्मानं
वेदाहमेतं पुरुषं महांतमित्येव मात्मशब्दप्रयोगादिभ्यो हेतुभ्यः तथाव्यक्तशब्दोपि न वैदिके प्रयोगे प्रधानमभि
धातुमर्हति अतश्चानात्मानमानिकस्य शब्दवत्त्वे चमसवद्विशेषात् ८ पूर्वत्रापि प्रधानशब्दस्य प्रधानस्यासिद्धे
मित्याह कस्मान्मंत्रवर्णात् अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोनुशेते जहा
त्येनां भुक्तभोगामजोन्य इति अत्र हि मंत्रे लोहितशुक्लकृष्णशब्दैः रजःसत्त्वतमांस्यभिधीयंते लोहितं रजः रंजनात्मकत्वात्
शुक्लं सत्त्वं प्रकाशात्मकत्वात् कृष्णं तमः आवरणात्मकत्वात् तेषां साम्यावस्थावयवधर्मैर्व्यपदिश्यते लोहितशुक्लकृष्णेति
ति न जायत इति अजा सा मूलप्रकृतिरित्यभ्युपगमात् ननु अजाशब्दः छागायां रूढः वाढं सा तु रूढिरिह नाश्रयितुं शक्या विद्या
प्रकरणात् सा च बह्वीः प्रजास्त्रैगुण्यान्विता जनयति तां प्रकृतिमजः एकः पुरुषः जुषमाणः प्रीयमाणः सेवमानो वानुशेते

श्वे२

गुणान्नाविलिंगोपि तादृजापदात्यन्यभिज्ञालीतिमत्युदाहरणेन एवं पत्यपति पुनरपीति फलं एवं पत्ते ब्रह्मणि समन्वयासिद्धिः सिद्धांतेत
[illegible]विति एवं वदहण्व्यं रागादेरुक्तादिगुणयोगाल्लोहितादिशब्दैः रज आदिगुणलाभेपि कथं प्रधानलाभः तत्राह तेषामिति अवयवाः
प्रधान[illegible]पत्लेषां धर्मा रंजकत्वादयः तैर्निमित्तैर्लोहितादिशब्दैः प्रधानमुच्यत इत्यर्थः गुणाभेदात् प्रधानलाभ इति भावः तत्राजा
शब्दयोगमपि [illegible] रूढियोगमपहरतीति न्यायेन शक्ते तन्निवृत्ति रूढ्यसंभवाद्योग आश्रयणीय इत्याह वाढमिति प्रजाशब्दितस्य
प्रकृतिरूप[illegible]दिलिंगाभ्यामपि प्रधानप्रत्यभिज्ञेत्याह सा चेत्यादिना प्रजायंत इति प्रजाः महदादयः त्रैगुण्यं सुखदुःखमोहाः ॥

८२

सां०भा० अनुशय... दुःखेनेति तामेवं विषयेति अविवेकेनेत्यर्थः विषयधीः भोगः गुणाभिन्नात्मख्यातिरपवर्गः सिद्धान्तयति एवं प्राप्त इति
प्र० मायादावविद्याधारणान्ते वा द्वैधापर्यग्रहोनयुक्तः विशेषग्रहहेतुः प्रकरणादेरभावादिति हेतुं व्याख्याय दृष्टान्तं व्याचष्टे चमस
२०४ वदिति सर्ववेदान्तगिरिगुहाद्वापि उत्तरत्र व्याख्यास्यामाह तत्त्वविदमिति चतुर्विधस्येति जरायुजाण्डजस्वेदजोद्भिज्जरूपस्येत्य

तामेव विषयासक्तेनोपगम्य सुखी दुःखी मूढोऽहमित्यविवेकतयानुसरति अन्यः पुनः अजः पुरुषः उत्पन्नविवेकज्ञानो
विरक्तो जहाति एनां प्रकृतिं भुक्तभोगां कृतभोगापवर्गां परित्यजतीति मुच्यत इत्यर्थः तस्माच्छ्रुतिमूलैव प्रधानादिकल्पना
कापिलानामिति एवं प्राप्ते ब्रूमः नानेन मन्त्रेण श्रुतिमत्त्वं सांख्यवादस्य शक्यमाश्रयितुं न ह्ययं मन्त्रः स्वातन्त्र्येण कंचि
दपि वादं समर्थयितुमुत्सहते सर्वत्रापि यया कयाचित्कल्पनया अजात्वादिसम्पादनोपपत्तेः सांख्यवाद एवेहाभिप्रेत इ
ति विशेषावधारणकारणाभावात् चमसवत् यथा ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इत्यस्मिन्मन्त्रे स्वातन्त्र्येणायं नामासौ चम
सोऽभिप्रेत इति न शक्यते निरूपयितुं सर्वत्रापि यथाकथंचिदर्वाग्बिलत्वादिकल्पनोपपत्तेः एवमिहाप्यविशेषोऽजामे
कामित्यस्य मन्त्रस्य नास्मिन्मन्त्रे प्रधानमेवाजाभिप्रेतेति शक्यते नियन्तुं तत्र त्विदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न
इति वाक्यशेषाच्चमसविशेषप्रतिपत्तिर्भवति इह पुनः केयमजा प्रतिपत्तव्येत्यत्र ब्रूमः ज्योतिरुपक्रमा तु तथा ह्य
धीयत एके ॥९॥ परमेश्वरादुत्पन्ना ज्योतिःप्रमुखा तेजोऽबन्नलक्षणा चतुर्विधस्य भूतग्रामस्य प्रकृतिभूतेयमजा प्रतिप
त्तव्या तुशब्दोऽवधारणार्थः भूतत्रयलक्षणैवेयमजा विज्ञेया न गुणत्रयलक्षणा कस्मात् तथा ह्येके शाखिनस्तेजो
ऽबन्नानां परमेश्वरादुत्पत्तिमाम्नाय तेषामेव रोहितादिरूपतामामनन्ति यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृ
ष्णं तदन्नस्येति तान्येवेह तेजोऽबन्नानि प्रत्यभिज्ञायन्ते रोहितादिशब्दसामान्यात् रोहितादीनां च शब्दानां रूपविशे
षेषु मुख्यत्वात् भाक्तत्वाच्च गुणविषयत्वस्य असंदिग्धेन च संदिग्धस्य निगमनं न्याय्यं मन्यन्ते ॥

र्थः सत्त्वरजस्तमोगुणात्मकत्वेनाग्राह्येति शंकते कस्मादिति श्रुतेः अत्यंतराऽर्थग्रहोपक्रमः साजात्यानुत्थानपेक्षत्वाच्चेत्याह तथा हीति
शाखिनश्छान्दोगाः किं च लोहितादिशब्दैः पित्र्यलक्षणान्यान्यथा श्रवणात् न तु रंजनीयत्वादिगुणव्यवहितार्थत्वादि गुणल
क्षणेत्याह रोहितादीनां चेति ननु शाखान्तरेण शाखान्तरस्य मन्त्रस्य निर्णयः कथमित्यत आह असंदिग्धेनेति सर्वशाखाप्रत्ययन्याया

२०४

यच्चापणाख्यां तत्र वाक्यात्प्रधानग्रहणं ये हा पि स्वे तान्य नतोपनिषत्सिमाया प्रकरणं तत् तद्दर्शयाह तद्येति सत्सौ देवीकिंसत्त्वा येब्रह्मेति विमृष्य तेन
ब्रह्म वादिनो ध्याना नाख्ययो तेन पश्यन्नात्मानमनुप्रविष्टाः सन्तः तत्रैव देवस्यात्मभूतामैक्यो नाध्यस्तां शक्तिं पतेत्रोमायां सत्वादिगुणवृत्तीभ्य
णः सदा यन्न पश्य न्निलीनस्वं [illegible] यापकत्वे पितद्दृष्टानां जीवोपाधीनां तत्तत्संघातयोनी नामविद्याख्यानां भेदादिभिः साख्याक्षत्रे नभिव्यक्त
नामरूपयस्यो मायनेनन्तदेदं तर्ह्यव्याकृतमासीदिति श्रुत्यन्तरप्रसिद्धरूपा तस्याः शक्तोव्यक्ताव्यक्तकार्यलिंगकानुमानं सूचयति ना
मेति मायायाचेहि [illegible] कपमित्याह तस्याइति विषयः आश्रयएवं प्रकरणबलान्मायेवाजेति भाष्यहमन्तेक्कां दायश्ल
तयेहामिश्र [illegible] नोवदंतिकिंकारणं ब्रह्मेत्युपक्रम्य ते ध्यानयोगानुगतात्र्यपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढामिति पाश्चे
सर्वा [illegible] समस्तजगद्विधायिन्यावाक्यापक्रमेवगमाहाकयेषत्वमायांतु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति योयो
नियोनिमधितिष्ठत्येकइति च तस्याएवावगमात्स्वतंत्राकाचित्प्रकृतिः प्रधानं नामाम्नायमत्रेणाम्नायत इति पाकतेवकंप्र
करणान्तस्थेवैदेवी शक्तिरव्याकृतनामरूपानामरूपयोः प्रागवस्थानेनापिमंत्रेणाम्नायत इत्युच्यते तस्याश्च स्वविकारविषये
णत्रिरूपेणत्रैरूप्यमुक्तं कथंपुनस्तेजोवन्नात्मनात्रैरूप्येणत्रिरूपाजाप्रतिपत्तं शक्यते यावतानतावत्तेजोवन्नेष्वजाकृतिरस्ति तवतेजोवन्नानांजातिश्रवणादजातितिनिमित्तोप्यजाशब्दःसंभवतीति अतउत्तरंपठति कल्पनोपदेशाच्चमध्वादि
वदविरोधः १० नायमजाकृतिनिमित्तोजाशब्दोनापियौगिकः किंतर्हि कल्पनोपदेशोयमजारूपकक्लृप्तिस्तेजोवन्न
लक्षणायाश्चराचरयोनेः कल्प्यते यथाहि लोके यदृच्छयाकाचिदजारोहितशुक्लकृष्णवर्णा स्यात् बहुबर्करासरूप
बर्करा वैनां चकाचिदजा जुषमाणानुशयीत काचिच्चैनां भुक्तभोगां जह्यादेवमियमपि तेजोवन्नलक्षणाभूतप्रकृतिस्त्रिवर्णाबहु
रूपं चराचरलक्षणं विकारंजनयति अविदुषा च क्षेत्रज्ञेनोपभुज्यते विदुषा च परित्यज्यत इति न चेदमाशंकितव्यमेकः
क्षेत्रज्ञोनुशेतेन्योजहातीत्यतः क्षेत्रज्ञभेदः पारमार्थिकः परेषामिष्टः प्राप्नोतीति नहीयं क्षेत्रज्ञभेदप्रतिपिपादयिषाकिंतु ब
न्धमोक्षव्यवस्थाप्रतिपिपादयिषा त्वेषा प्रसिद्धं तु भेदमनूद्य बन्धमोक्षव्यवस्था प्रतिपाद्यते
याते तेजोवन्नलक्षणावांतरप्रकृतिरजेति सत्त्वकल्पनेतेनोतरस्य व्यावर्त्यं शंकते कथमिति किं तेजोवन्नेष्वजाशब्दोरूढः नजायतइति यौगिको
वानायदत्त यजात्वजातेरसत्वादित्याह यावतेति यत इत्यर्थः अतो न रूढ इति शेषः नद्वितीय इत्याह नचेति जातिर्जन्म अजातिरजन्म सो
सिद्धाजाहाद स्यकल्पनयातेजोवन्नानामजात्वोपदेशाद्दोषोयं पाच्च इति परिहरतिकल्पनेति अनियमोयदृच्छावर्कराबानपस्तुःयः
उक्तो [illegible] प्रधानवाद प्रत्यभिज्ञेति तन्नेत्याह नचेदमिति व्यवस्थार्थोभेदोप्यर्थात्प्रतिपाद्यते इत्याह प्रसिद्धन्विति ॥ ॥

सा.भा.
प्र.ब.
११०

तत्पदं प्रसिद्धं इत्यत आह मेदस्त्विति कल्पनोपदेशोदृष्टांतेऽप्याचष्टे मध्विति तद्वयोगस्य लक्ष्यमतित्वात्तेन प्रधानग्रहोऽन्याय्य इतिवा
च्य कठश्रुतौ पदार्थानपेक्षायोगात् तत्राश्रितगुणलक्षणापर्यावलोचनया स्पष्टमद्वणमहमोहित्वि तदाश्रितामवति तथा वेराहिनादिशब्द समभिव्याहारानुप
हीतमप्यह शाश्रितयोगगुणक्षत्याप्रधाने योगवाधित्वावा तत्प्रकृतिशब्दा सकृ न प्रामाण्यमध्वादि शब्दैः प्रसिद्धमध्वाद्याश्रितगुणल
क्षणास्याशिदत्यादृयोगरूढेनेतन्हुत तस्मादजाशब्दः प्रधानमिति सिद्धं न संख्योपसंग्रहादपीति पंचजनशब्दः सांख्यतत्वपरोऽन्यपरो वेतिया
गरूढोऽनिश्चयात्संशये पूर्वपक्षानन्तविद्याधिकारेऽपि गायत्र्या ताम्यर्याभावादजापदे रूढित्यागलक्षणा पंचमनुष्येषु तात्पर्याभावाज्जन

मेदस्तूपाधिनिमित्तः मिथ्याज्ञानकल्पितो न पारमार्थिकः एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मेत्यादि श्रुतिभ्यः ।
मध्वादिवत् यथादित्यस्यामधुनो मधुत्ववाचस्याधेनोर्धेनुत्व द्युलोकादीनां चानाग्नीनामग्नित्वमित्येवंजातीयकं कल्प्यते ए
वमिदमनजाया अजात्वकल्पनमित्यर्थः तस्मादविरोधस्तेनाजाव्वनेषु जाशब्दप्रयोगस्य न संख्योपसंग्रहादपि नानाभा
वादतिरेकाच्च ॥ ११ ॥ एवं परिहृतेऽप्यजामंत्रे पुनरन्यस्मान्मंत्रात्सांख्यः प्रत्यवतिष्ठते यस्मिन्पंचपंचजना आकाशश्च प्रति
ष्ठितः तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् इत्यस्मिन्मंत्रे पंचपंचजना इति पंचसंख्याविषयापरा पंचसंख्या
श्रूयते पंचशब्दद्वयदर्शनात् एते पंच पंचकाः पंचविंशतिः संपद्यन्ते तया पंचविंशतिसंख्यया यावन्तः संख्येया आकांक्ष्यन्ते
तावन्त्येव च तत्वानि सांख्यैः संख्यायन्ते मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकश्च विकारो न प्रकृ
तिर्न विकृतिः पुरुष इति तया श्रुतिसिद्धया पंचविंशतिसंख्यया तेषां स्मृतिप्रसिद्धानां पंचविंशतितत्वानामुपसंग्रहाच्छ्रुतिम
त्वमेव प्रधानादीनां ततो नैमः न संख्योपसंग्रहादपि प्रधानादीनां श्रुतित्वं प्रत्याशा कर्तव्या कस्मात् नानाभावात् नाना ह्ये

नारी २

तानि ... पंचविंशतितत्वानि नैषां पंचशः पंचशः साधारणो धर्मोऽस्ति येन पंचविंशतेरन्तराले ... पंचसंख्ये निविशेरन्
न ह्येकनिबन्धनमन्तरेण नानाभूतेषु द्वित्वादिकाः संख्या निविशन्ते अथोच्येत पंचविंशतिसंख्यैवेयमवयवद्वारेण लक्ष्यते यथा पंच सप्त च वर्षाणि न ववर्ष शतक्रतुरिति द्वादशवार्षिकीमनावृष्टिं कथयन्ति तद्वत्
... तत्वविशिष्टेषु पंचजनेषु पुनः पंचत्वान्वयादस्य च विंशतिसंख्याप्रतीतिर्विलम्बनात् कल्प्यते संख्याया
धर्म्याकांक्षाया ... तयेति जगतो मूलभूता प्रकृतिस्त्रिगुणात्मकं प्रधानमनादित्वादविकृतिः कस्यचित्कार्यं न भवतीत्यर्थः
महदहंकारपंचतन्मात्राणि प्रकृतयश्च ता विकृतयश्च महान्प्रधानस्य विकृतिरहंकारस्य प्रकृतिः अहंकारो महतः पंचतन्मात्राणां शब्दादीनां प्रकृतिः सात्विक एकादशेन्द्रि
याणां पंचतन्मात्राणि पंचानां स्थूलभूतानामाकाशादीनां प्रकृतयः पंचस्थूलान्येकादशेन्द्रियाणि चेति षोडशसंख्याको गणो विका
र एव न प्रकृतिः तत्वान्तरोपादानत्वाभावात् पुरुषस्तूदासीन इति सांख्यकारिकार्थः संख्यया तत्वानामुपसंग्रहात्प्राप्तवत्वमिति प्राप्ते

५ सांख्यतत्वग्रहणे इत्याशंक्य ५

१०१०

नानात्वमिष्टमित्यत आह नैकमिति पंचसु पंचत्वं साधारणोनेकः पंचका सामान्यतस्य धर्मस्याभावो नानात्वं विवक्षितमित्यर्थः यद्यपि ता
नकर्मेन्द्रियेषु दशसु ज्ञानेकरणानि कत्वमेकाणत्वं च पंचकत्वेपि पंचतन्मात्रासु पंचसु स्थूलप्रकृतित्वं चं पश्यापि पलसिन्निनत्वम न
ज्ञाकाशस्य च [illegible] केः मनसा तु समाम हद हकाराः पंचकत्वे व्याःमन स्रवानामिमनानि पंचास्मिन्नं चकहुपेमिपोन्हतेन तु पंचक
त्वान्नतेधर्मो नानात्वे [illegible] त्यत आह येनेति धर्मेणेत्यर्थः तदेव स्फुटयति नहीति महत्संख्यायामन्तर संख्याः प्रविशन्ति।
यथा [illegible] पंचपाणिवसवश्चेति सम दशेत्यत्र पंचित्यादिकमादाय हित्वादयः प्रविशन्ति नान्यथेत्यर्थः पंचशब्दुहृयेन
[illegible] तद्व्याप्या महत्तेस्त्वव लक्ष्यते यदि तत्र हष्टान्तं शंकते अयेति तत्र ख्यायस्य बहूनामण्व्याह तत्रानपुच्छेति प
[illegible] पंचजनाः प्राहु यो तमासमभीकृत्य पंचविंशति संख्या प्रतीतिरिति समासतेन स्र यात्र नन्वतीति रित्याह प
[illegible] भाषिकेनेति अयमर्थः अस्मिन्मन्त्रे प्रथमः पंचशब्द आद्युदात्तः द्वितीयः सर्वानुदात्तः जनशब्दस्यातो दात्तः तथा
[illegible] पंचशब्दयोः समासविनात्यस्याकारस्यो दात्तत्वं एवं घामनुदात्तत्वं चयद्यन्ते समासस्येति सूत्रेण समासस्यान्तोदात्तत्व विधानादत्र

पंचमा। नैषां पंच जनाः साधारणो धर्मोस्ति येन पंचविंशति रंतराले प्रतः पंच पंच संख्या निविशेरन्नत्रैक निबंधनमंतरेणानानां भूतेषु
द्वित्वादिकाः संख्या निविशन्ते अपरान्यतः पंचविंशति संख्ये वे पत्स्वयद्भेशाः लक्ष्यन्ते यथा पंचसप्तच वर्षाणि न ववर्ष पा
तक्रतुरिति द्वादशवार्षिकीमनावृष्टिं कथयं तितत्वदिति तदपि ने पद्यते अयमेवास्मिन्य तदोषा यत्प्रयणा अपयपा।
स्मात परश्चात्र पंचशब्दो जनशब्देन तमस्तः पंचजना इति भाषिकेण स्वरेणैकपदत्वनिश्चयात् ॥ ॥

४ दात्तमनेक्ष

दात्ते पद मेकव र्जमिति च सूत्रेणायस्मिन्पदे उदात्तः स्वरितो वा यस्य विधीयते तमेकं वर्जयित्वा वशिष्टं तत्पदमनुदात्तं भवतीति विधानात्
तु पर्वमात्रिकानात्र स्वरेणैकपदत्वनिश्चयः भाषिकाख्ये तु पात पथब्राह्मण स्वरे या पकागये स्वरे तेनोदात्तो वेतिसूत्रेणा यो
मे वद् शायामनुदात्तः स्वरितो वात ब्राह्मणे दृश्यायामुदात्तो भवतीति अपवादः आश्रितः तथा चात्रादाकारा स्ववेषामनुदात्ता
नामुदात्तत्वं ब्राह्मणे विस्पष्टाया अमेकदात्तमनन्तमिति सूत्रेणानुदात्तद्वयामुदात्तस्थाने तस्य परत्वमतयोः चापप्रमाणस्यानुदात्तत्वं विहितं
तथाचात्र न काराद् परि नव आकार आकाशस्येत्येते न श्रिर्द्धयोः पदयोः सिद्धोत्तो दात्तस्वरो भाषिक इतिव्याख्यातत्वाद्व्याख्याने कस्य तत्र
कौत्स्यित अत्रान्त्यते हि समानाः ताः पंचजना प्रादुर्भयो यतः इति पाठक प्रसिद्धिरसिद्धेति तथा च पंचजना इति मात्रिकेना तो दात्तः स्वरः
पंचजना इमे तानुदात्ता ब्राह्मण स्वर इति विभागः उभयथाप्येकपदसमासत्व सिद्धिरिति ॥ ॥

माषोनन्ते [illegible] पमंतोनुदात्तस्वरः भाषिकः तेन ब्राह्मणस्वरेणैकपदत्वं निश्चीयत इति प्रकृतार्थ कारेलपाठकार्य ॥ ओदर

रा॰भा॰
प्र॰च॰
१११

...येषामाह येकेकपदत्वमित्याह प्रयोगांतरे चेति आस्य त्वात्तां पंचजनानां देवविशेषाणां पंचाप्यर्थ्रीयग्रहणमीत्या न्यग्रहणं
...ग्रहणं ...नीकेर्माणां यत्र वदेवास्य तत्र गां तत्र देवथ श्रेमिहामत्र भोगाधारत्तेसमतस्मा वकल्पार्थमिति पत्तेमानोक्तिः आस्तु समा
...समस्त ...मित्यत आह समस्तत्वाद्वेति आहेतिवीप्सा तदभावे पंचकदुयाग्रहणात्पंच च विशति तत्त्व प्रतीतिरेमि हृति भावः
...केषेकं पंचकानां पंचकद्वितीयमिति पंचकद्वय तस्य पंच पंचेति ग्रहणं नेत्यत्र तात्पर्यः किंचासमासपक्षेपि किं प्राठहृयो
...त्वयोः परस्परान्वयः किंवानयोः सुहृजनेरन्वयः अपञ्चाप चत्वविशिष्टे जनेर पदस्य पंचत्वसान्वयः नाद्य इत्याह नवपंच
...भावप्रतिविशेषणमनन्वयः अनन्वयेहेतुमाह उपसर्जनत्वेति अप्रधानानां सर्वथा प्रधानेनैव विशेषणाणेवान्वयावाच्यः गुणानां
...परस्परान्वये वाक्यभेदापातादित्यर्थः द्वितीये दूषणं संख्याप्रतीतिः स्यात् नवपंचविंशतिसंख्याप्रतीतिः तृतीयमस्यापपत्ति न

र्त्तौ ते॥ प्रयोगानंतरेवं पंचानां त्वा पंचजनानां मित्येकपदे केस्यैर्थैक विभक्तित्वावगमात् समस्तत्वा चेनवीप्सा पंच पंचेति
...पंचकद्वयग्रहणं पंच पंचेति नवपंचसंख्यायाएकस्याः पंचसंख्यापरया विशेषणं पंच पंचकाऽति उपसर्जनस्य विशेषणे
...नासंभवात् नत्वा पत्र पंच संख्याकाजनाएव पुनः पंचसंख्यया विशेष्यमाणाः पंचविंशतिः प्रत्येष्यंते यथा पंच पंच पल्ल्य
इति पंच विंशति प्रत्ययप्रतीयते तद्वत् नेति क्रमः युक्तं पत्त्य चपल्ली पावस्य समाहाराभिप्रायत्वात्कृतीति संख्याभेदाकांक्षायां
पंच पंच पल्ल्य इति विशेषणं इहतु पंचजना इत्यादित एव भेदापाद्यानात्कृतीति अससंख्याभेदाकांक्षायां पंच पंच जना इति विशे
षणं भवेत् भवदपि द्विविशेषणं पंचसंख्यायाएव भवेत् तत्र वाक्योदोषः तस्मात्पंच पंच जना इति न पंचविंशतिर्नत्वाभि
प्राय अतिरेकाद्व नव पंचविंशति तत्त्वाभिप्राय १२ अतिरेको हि भवत्यात्मकाशाभ्यां पंचविंशतिसंख्यायाः आत्मानावदि
ह प्रतिष्ठात्वाधारत्वेन निर्दिष्टः यस्मिन्निति ममौतस्यैव तस्य तमेव मन्य आत्मानमित्यात्मत्वानुकर्षणात् आत्माव
वैतनः प... पंच विंशतानावेतर्गत पंचविंशति न तस्येवाधारत्वमाधेयत्वं युज्यते अर्थांतरयपि ग्रहत्तुत्व संख्यातिरेकः सिद्धो

न्विति ... पंचत्वां तत्रान्वये तिविशेषणीभूत पंचत्वेविपंचत्वान्वयात्पंचविंशतित्वप्रतीतिरित्यर्थः द्रष्टांतवैषम्यमप
रिहरति ... नामसत्वानां समाहार इत्यत्र संख्या एव द्विगुरिति समासोविहितः नतो द्विगोरिति सूत्रेण ङीपो विधा
नान्नाहरे ... केतीन्याकांक्षायां सत्यां पंचेति पदांतरान्वयोयुक्तः पंचजना इत्यत्रैवं तत्वाभावेन समाहारस्याप्र
तीतेः ... संख्याकांक्षायां समत्वात्पंचेति पदांतरं नान्वेति साकांक्षत्वाभावेनुत्वादनन्वयस्येत्यर्थः भेदो विं
शेषणे ननु जनानां ... विशिष्ट द्विशेषणीभूतपंचत्वानिकृतीत्याकांक्षायां पंचत्वांतरं विशेषणं भवतित्याशंकते भवदपी
ति नोपसर्जनस्योपसर्जनांतरेणान्वयः किंतु प्रधानेनैवेति नोपसर्जनस्य विशेषणेयुक्तम् इति परिहरति तत्र चेति एवं नानाभावादि
तिव्याख्यायांतिरेकाद्वेति व्याचष्टे अतिरेकाद्वेत्यादिना अतिरेकः आधिक्यं जनसाहितं पंचविंशति नवेषामात्मानं तर्भूतानवा नायुइ

८२

२०२२

तथाकाशोपि विकल्पयितव्य इति तथेति उक्तो दोषः संख्याधिक्यं पंचविंशतितत्त्वात्मा आकाशो चेति सप्तविंशतिसंख्या स्यादित्यर्थः न च।
मतांतरं जगत्सम्मतं शास्त्र [illegible] तथा सेत्स्यतीत्याह आकाशस्य पृथगुक्तिर्वृथा यस्मिन्नित्यात्मनि तत्त्वानां प्रतिष्ठोक्तिविरोधात्तन्मते स्वतं
त्रप्रधानस्य [illegible] तीति वाक्यशेषविरोधाच्च न तत्सत्त्वहेतुत्वादित्याह किं च पंचविंशतिसंख्याप्रतीतावपि न सांख्यतत्त्वा
नां ग्रहणमित्याह [illegible] जनशब्दानन्वयाद्ध्रुवः उत सांख्येतिकथमित्यर्थः नाद्य इत्याह न हीति न द्वितीय इत्याह अर्थांतरे सि
द्धे तत्र [illegible] वाक्यमिति [illegible] तिसृच च तेजनास्वेति कर्मधारयादि समासांतरात्संज्ञा समासस्यास्योक्तत्वाद्ध्रुवत्वं न
तद्विशेष [illegible] त्वाविनः संख्यावाचिनः शब्दाः संज्ञायां गम्यमानायां सर्वत्रैव तेन नोत्तरपदे न समस्यंते यथा सप्तर्षयः दक्षिणाग्निः समस्त्र।

कथमिति

तथाकाश [illegible] प्रतिष्ठित इत्याकाशस्यापि पंचविंशतावंतर्गतस्य पृथगुपादानान्नायं अर्थांतरपरिग्रहे चोक्तं दूषणं कथं
च संख्यामात्रप्रवणस्य तत्त्वानां पंचविंशतितत्त्वानामनुपसंग्रहः प्रतीयते जनशब्दस्य तत्त्वेष्वरूढत्वात् अर्थांतरोपसंग्रह
विसंख्योपपत्तेः कथं तर्हि पंच पंचजना इत्युच्यते दिक्संख्ये संज्ञायामिति विशेषस्मरणात् संज्ञायामेव पंचशब्दस्य जनश
ब्देन समासः तत्र रूढत्वाभिप्रायेणैव केचित्पंचजना नाम विवक्ष्यंते न संख्यातत्त्वाभिप्रायेण तेन कतीत्यपेक्षायां पुनः
[illegible] पंचेति प्रयुज्यते पंचजना नाम केचित्ते च पंचैवेत्यर्थः सप्तर्षयः सप्तेति यथा के पुनस्ते पंचजना नामेति तत्
द्रुच्यते प्राणादयो वाक्यशेषात् १३ यस्मिन्पंच पंचजना इत्यनंतरस्मिन्मंत्रे ब्रह्मस्वरूपनिरूपणाय प्राणादयः पंच निर्दि
ष्टाः प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुरिति तच्च वाक्यशेषगतानां संनिधाना
त्पंचजनाः विवक्ष्यंते कथं पुनः प्राणादिषु जनशब्दप्रयोगः तत्त्वेषु वा कथं जनशब्दप्रयोगः समाने तु प्रसिद्ध्यतिक्रमे वा

नपंचर्

क्यशेषवशात्प्राणादयः परिग्रहीतव्या भवंति जनसंबंधाच्च प्राणादयो जनशब्दभाजो भवंति जनवचनश्च पुरुषशब्दः प्रा
णेषु प्रयुक्तः ते वा एते पंच ब्रह्मपुरुषा इत्यत्र प्राणो हि पिता प्राणो माता इत्यादि च ब्राह्मणं ॥

पंचः

यस्मिन्नित्यादि अयं च समासस्तत्पुरुषभेदः पंचजनशब्दस्य संज्ञात्वमुक्त्वा संज्ञि
कथनार्थं सूत्रमादत्ते के पुनस्त इति श्रुतेरुत्तरवाक्यो [illegible] यः ये प्राणादिश्रुतेः केन तस्मात्प्राणादीनामात्मानं विदुस्ते ब्रह्म विदुरित्यर्थः पंचजनश
ब्दस्य प्राणादिषु कथमात्मप्रयोग इति शंकते कथं पुनरिति यथा तत्त्वेषु जनशब्दस्य लक्षणया प्रयोगस्तथात्र प्राणादिषु पंचज
नशब्दस्य [illegible] लक्षणयेत्याह तत्त्वेष्विति तर्हि रूढातिक्रमस्य समानत्वात्तत्त्वान्येव ग्राह्याणीत्यत आह समानेऽपीति संनिहितसजातीयान
[illegible] पूर्वत्र ग्राह्याः तत्त्वानि हि न विजातीयसापेक्षत्वात् स्यादित्यर्थः लक्षणाबीजं संबंधमाह जनेति जनः पंचजन इत्यनू
[illegible] येत्यादि पाठ्यं वचनपंचजनशब्दस्य प्राणादिलक्षकत्वमुक्तमित्याह जनवचनश्चेति ॥ ॥ ॥

शा.भ.
प्र.३.
११२

[illegible] तिजनाः महदादयः जनकत्वाज्जनः प्रधानमिति योगसंभवे किमिति रूढिमाश्रित्य लक्षणाश्रयणमित्यत आह समासेति।
[illegible] प्राद् स्ववर्णितमुदायस्य वृत्ते रूढिरेव पंचजनशब्दस्य रूढिरेव तावत् पंचपाञ्चालिकायोग इत्यर्थः एवं कालिकप्रयोगाभा।
[illegible] ति पंचेति कपालमिति स्पष्टतामतः पंचजना इत्यस्य कोणादौ प्रयोगाभाववत् भावमङ्गीकृत्याप्याह शाक्वेति जनसंबधा
[illegible] रेषु पंचजनशब्दस्य रूढिमाश्रित्य प्राणादिषु लक्षणा क्रा इह तत्प्रौढिवादेन प्राणादिषु रूढिरुच्यते इति मतस्यसंग्रहीते
[illegible] प्रसिद्धेरस्यादित्वा उद्भिदा यजेत पशुकाम इत्यत्रोद्भित्त्वं विधेयगुणार्थकं कर्मनामधेयं वेति संशये खनित्रादौ उद्भित्त्वं सप्र
सिद्धेर्यागनामत्वप्रसिद्धिविरोधाज्ज्योतिष्टोमे गुणविधिरिति प्राप्ते सिद्धान्तः यजेत यागेन इष्टं भावयेदित्यर्थः तत्रश्चोद्भिदेत्यप्रसिद्धस्य
रतो यागस्य यागेनेत्यनेन प्रसिद्धार्थकेन सामानाधिकरण्येन तन्नामत्वं निश्चीयते उद्भिनत्ति पशून्साधयतीति प्रसिद्धेरविरोधाद।

समासबलाच्च समुदायस्य रूढत्वमविरुद्धं कथं पुनरसति प्रयत्ने प्रयोगे रूढिः शाकाश्रयित्वं शाकोद्भिदादिवदित्याह।
प्रसिद्धार्थस्य सन्निधावेवाप्रसिद्धार्थः शब्दः प्रयुज्यमानः समभिव्याहारात्तद्विषयोऽनिश्चयते यथोद्भिदा यजेत यवपिष्ठिर्नति
वेदिकेरोतीति तथायमपि पंचजनशब्दः समासान्वाख्यानादेव गतसंज्ञाभावः तस्याकांक्षावाक्यशेषसमभिव्या
हृतेषु प्राणादिषु वर्तिष्यते केचित्तु देवाः पितरो गंधर्वासुररक्षांसि च पंचजना व्याख्याताः अन्ये तु चत्वारो वर्णा
निषादपंचमाः परिगृहीताः क्वचिच्च यत्पांचजन्यया विशेति प्रजापरः प्रयोगः पंचजनशब्दस्य दृश्यते तत्परिग्रहे
पीह न कश्चिद्विरोधः आचार्येण तु न पंचविंशतेस्तत्त्वानामिह प्रतीतिरस्तीत्येवं पर्यायप्राणादयो वाक्यशेषादिति जना

८ ॥ ता

प्रकृतस्योतिसोः [illegible] णाविध्ययोगात् द्विधो वोद्भिदाख्यगुणवता यागेनेति मत्वर्थसंबंधलक्षणाप्रसंगाच्चेति कर्मनामैवोद्भित्
द तथा किंच [illegible] सिद्धार्थके वेदन योग्यार्थकशब्दसमभिव्याहाराद्दाहविशेषार्थप्रयाद्वार्थः करोतीति समभिव्याहाराद्वेद
दिशब्दार्थः [illegible] लविशेष इति गम्यते तथा प्रसिद्धार्थकप्राणादिशब्दसमभिव्याहारात्पंचजनशब्दः प्राणा
यन्यर्थक इ [illegible] ः एकदेशिनां मतद्वयमाह केचिदित्यादिना गंधर्वाश्च अप्सरश्च जातौ निषादः पंचमः पंचजनशब्दस्यार्थो
तस्माह क्वचिदिति पांचजन्याया प्रजाया विशतीति विदन्त्या पुरुषपरत्वं यदि इष्टाहानार्थं वो पासन्ष्टा इति यत्तपुंके बोधा तिरके णं
द्रष्टृणां नानापाठादिति स्तुवन्तः अन्तरेण प्रजामात्रग्रहे पिन विरोध इत्यर्थः स्वव्याख्याभाष्याशंकाह आचार्यस्त्विति अतः सांख्यत
त्वातिरिक्तापत्तिः किं चिन्त्यस्तया पंचजनशब्दव्याख्यायामविरोध इति भावः ॥ राम ॥ ॥

अ२

शंकोत्तरत्वेन सर्वं ब्रह्मेति भवेयुरिति ज्योतिषां सूर्यादीनां ज्योतिर्ब्रह्म देवा उपासत इत्यर्थः न त्विदं वक्ष्यं न ज्योतिः पदोक्तं सूर्यादिकं ज्योतिः
प्राणादिभूयेषु [illegible] तत्काण्वानां पंचजनश्रवणाद्यत्र यत्ते नास्येषामिति विकल्पान युक्त इति शंकते कथं पुनरिति आकांक्षाविशेषाद्धि क
ल्प्यापत्तेः [illegible] यावता द्वे षोडशिनं गृह्णाति न गृह्णातीति वाक्यभेदाद्धि कल्प्यते इह च्छाखाभेदेनान्न पाठापाठाभ्यां
ज्योतिषु [illegible] यायां विकल्पो युक्तः न वस्तुनीति वस्त्वन्यत्रापि शाखाभेदेन सान्नज्योतिः सहिता वा प्राणादयो
यत्र [illegible] मेति ध्यानक्रियायां विकल्पपतिरित्यनुवर्तते प्रधानस्याशब्दत्वमपसंहरति तदेवमितिनः
[illegible] व जगत्कारणमित्यत आह स्तीति कारणत्वेनेति सर्वग्रंथे नास्ति गतिं वक्ष्यमाणमनुवदति प्रतिपादि
तमिति [illegible] प्रधानस्याश्रौतत्वाज्जगत्कारणत्वलक्षणे न ब्रह्मण एव बुद्धिस्थतान्नास्मिन्नेव बुद्धिस्थे निर्विशेषब्रह्म।
भवेयुस्ता वा प्राणादयः पंचजना माध्यंदिनानां येन प्राणादिष्वामनेति काण्वानां तु कथं प्राणादयः पंचजना भवेयुर्येन प्राणादिष
नाम तदीति अन्नवर्जं पठति ज्योतिषैकेषामसत्यन्न १७ असत्यपि काण्वानामन्ने ज्योतिषा तेषां पंचसंख्यापूर्येत ते पि हि यस्मि
न्नेव पंचजना इत्यत्र सर्वस्मिन्नेव ब्रह्मस्वरूपनिरूपणाय ज्योतिरधीयते तदेवाज्योतिरिति कथं पुनरुभयेषामपि तुल्य
वदिदं ज्योतिः पठ्यमानं समानमन्त्रगतप्राप्तसंख्यापाके पाठित इत्य तत्केषांचिदिति अपेक्षाभेदादित्याह माध्यंदिनानां हि स
मानमंत्रपठितप्राणादिपंचजनलाभान्नास्मिन्मंत्रे पठितज्योतिषोऽपेक्षा भवति तदलाभात्तु काण्वानां भवत्यपेक्षा अपेक्षा।
भेदाच्च समानेऽपि मंत्रे ज्योतिषो ग्रहणाग्रहणे यथा समानेऽपि तिरात्रे वचनभेदात् षोडशिनो ग्रहणाग्रहणे इह तदेवं तावत्
श्रुतिप्रसिद्धिः कारणत्वप्रधानविषया नास्तीत्याय प्रसिद्धीनं परिहृत्य इदानीं ते कारणत्वेन चाकाशादिषु पपावपरिहृ
तेः १५ प्रतिपादितं ब्रह्मणो लक्षणं प्रतिपादितं ब्रह्मविषयं गतिसामान्यं वेदान्तवाक्यानां प्रतिपादितं च प्रधानस्याश
ब्दत्वं तदेवं समपरमाशंकाते तज्जन्मादिकारणत्वं ब्रह्मविषयं गतिसामान्यं वेदान्तवाक्यानां प्रतिपन्नं शंकाकस्माद्धि गानेदपा
[illegible] वेदान्तानां समन्वय इति साधितं सर्वज्ञत्वं सर्वशक्तिमत्वं ब्रह्मलक्षणं समन्वयाधोर सिद्धिरेव श्रुतीनां [illegible] विरोधदर्शनादित्याक्षेपसंगत्या नास्य संग
[illegible] न चाविरोधचिंतायाः द्वितीयाध्याये संगतिर्नास्ति तथा प्रतिवाच्य सिद्धे समन्वये स्यादिमानांतरविरोधनिरासस्य द्वितीयाध्या
[illegible] दत्वाच्च जगत्कारणवादिस्मृतीनां नामिथो विरोधाद्धाच्यापि निश्चयेन लक्ष्यसमन्वयासिद्धौ प्रामाण्यान्तरसाधकाविरोधचिंताया
[illegible] न चवक्ष्ये श्रुतीनामप्यविरोधान्वेव चिंतनीयः इति वाच्यं समन्वयाहि न तस्य विरोधस्यवाभावाल्लिमर्थं तर्हि द्वितीये
[illegible] बुद्धिसमाधानाय्यमितिप्रसंगः अद्रृत सम्यक् शांवाक्यार्थे समन्वयतानाय नत्यदार्थे श्रुतिविरोधः परिहृयते पपाशित्वं।
[illegible] विरोधाच्च परिहरत्येवः न पापि प्रयत्नस्तत्रैवं ध मिथ्यात्वं तच्चनादविरोधा सिद्धः प्रपचस्तु स्थूलबुद्धिसमाधानप्रसंगेनम

तिप्रांज्यो२

रा१

विषयत्वेति समन्वयासमन्वयः

[illegible]गत्काणस्य तयोर्विषयालाः किंच्र स्यामिमात्रं न वेति संशयेन ज्योतिषोः संख्याहृष्टिक्रियायां विकल्पेपि कारणे वलन्यसद्भासः
[illegible]कारण मित्यादिविकल्पासंभवाद् प्रमाणमिति प्रत्युदाहरणं एवं पक्षपञ्चक्रायविषयविश्वाणोति प्रतिवेदांतमित्यादिना वेदांताः
[illegible]धत्वात् श्रुत्यध्यायसंगतिः असदादिपदानां सत्कारणे समन्वयोक्तेः पादसंगतिः एवं पते समन्वयासिद्धेः फलसिद्धि
[illegible]तमितिविवेकः क्रमाक्रमाभ्यां सृष्टिविरोधं तावद्दर्शयति तथाहि क्वचिन्नित्यादिना स परमात्मा लोकानसृजत अंभोम पू
री[illegible]स्वर्गलोकोंभः शब्दार्थः सूर्यरश्मिव्याप्तोंतरिक्षलोको मरीचयः मरो मर्त्यलोकः अब्बहुलः पाताललोका आपः श
श्रुत्यर्थः सृष्टिविरोधमुक्त्वा कारणविरोधमाह तथेति असदनभिव्यक्तनामरूपात्मकं कारणं ततः कारणात्सदभिव्यक्तं।

प्रतिवेदांतं दृश्यमानासु सृष्टिरूपलभ्यते क्रमादिवैविध्यात् तथाहि क्वचिदात्मन आकाशः संभूत इत्यादिका सृष्टिराम्नायते
क्वचित्तेजआदिका तत्तेजोऽसृजतेति क्वचित्प्राणआदिका स प्राणमसृजत प्राणाच्छ्रद्धामिति क्वचिदक्रमेव लोकानामुत्प
त्तिराम्नायते स इमांल्लोकानसृजत अंभो मरीचीर्मरमापइति तथा क्वचिदसत्पूर्विका सृष्टिः पठ्यते असद्वा इदमग्र आ
सीत् ततो वै सदजायतेति असदेवेदमग्र आसीत्तत्सदासीत्तत्समभवदिति च क्वचित्सद्वादनिराकरणेन सत्पूर्विका प्रक्रि
या प्रतिज्ञायते तद्धैक आहुरसदेवेदमग्र आसीदित्युपक्रम्य कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जाये
तेति सत्त्वेव सोम्येदमग्र आसीदिति क्वचित्स्वयंकर्तृकैव व्याक्रिया जगतो निगद्यते तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपा
भ्यामेव व्याक्रियतेति एवमनेकधा विप्रतिपत्तेर्वस्तुनि च विकल्पस्यानुपपत्तेर्न वेदान्तवाक्यानां जगत्कारणावधारण
परतान्याय्या स्मृतिन्यायप्रसिद्धिभ्यां तु कारणान्तरपरिग्रहो न्याय्य इति एवं प्राप्ते ब्रूमः सत्यपि प्रतिवेदान्तं सृज्यमानेष्वा
[illegible]क्रमादिद्वारके विगाने न स्रष्टरि किंचिद्विगानमस्ति कुतः यथाव्यपदिष्टोक्तेः यथाभूतो ह्येकस्मिन्वेदान्ते॥
द तथाविधि[illegible]
दिशब्दार्थः [illegible] असदेवेति किंत्वन्यमेवनेत्याह तत्सदिति अबाधितं ब्रह्मैवासीदित्यर्थः तद्व्याख्यानं नास्तितेज
[illegible] सर्व प्रक्रियास्तृष्टिः न तत्र कारणे एकवाक्यता सा तेषां मतं श्रुतिरेव दूषयति कुत इति कथं पूर्व
[illegible]माह [illegible] तदिदं जगद्धकिल तर्हि प्राक्कालेऽव्याकृतं कारणात्मकमासीत् श्रुतीनां
विरोधमपनेतुमाह एवमिति किं तत्र न्याय्यमित्यपेक्षायामानान्तरसिद्धं प्रधानं लक्षणं वेदान्तानां तात्पर्यमित्याह स्मृती
ति तत्र सृष्टौ विरोधं अंगीकृत्य स्रष्टरि विरोधं परिहरति सत्यपीति आकाशादिषु ब्रह्मणः कारणत्वे विरोधो नैवास्तीति प्रतिज्ञा।

स्यापुरस्तादाह [illegible] सर्वज्ञत्वादि कारणस्य सर्वज्ञत्वादिकं प्रतिवेदान्तं हि दृश्यते इत्याह तथेत्यादिना तद्विषयेण ब्रह्मविषयेणेत्युक्तं स
त्याति [illegible] तस्माद्वा एतस्मादात्मन इति प्रसंगात्तत्त्वस्य स्वरूपस्य कामानुपास्थितिका
[illegible] सर्वज्ञत्वादिके कारणस्य तत्पाद्(?) [illegible] दृश्यते इत्याह तदन्यपलक्षणमिति मिथस्स्यापा
[illegible] कारणेनास्ति विप्रतिपत्तिरिति भावः तथापि कार्ये विरोधात् कारणेऽपि विरोधः स्यादित्याश
ङ्क्येति [illegible]

नाथ

सर्वज्ञः सर्वेश्वरः सर्वात्मैकोऽद्वितीय इत्याकारकत्वेन व्यपदिश्यः तथाभूत एव वेदान्तान्तरेष्वपि व्यपदिश्यते तथा सत्यं ज्ञानमनन्तं
ब्रह्मेति अत्र ज्ञानमनन्तं तथावेनपरेण च तद्विषयेण कामयितृत्ववचनेन चेतनं ब्रह्मस्वरूपं परप्रयोज्यत्वेन स्वरूपं कारणं
[illegible]वीत तद्विषयेणावपरेणात्म शब्देन परीतादिकोशपरंपरयान्तरप्रवेशनेन सर्वेषामन्तरात्मानं निराधारयत व
ह स्यां प्रजायेयेति चास्मिविषयेण बहुभवनानुसन्धानेन सृज्यमानानां विकाराणां स्रष्टुरभेदमभाषत तथेदं सर्वमसृजत
यदिदं किंचेति समस्तजगत्सृष्टिनिर्देशेन प्राकृतं द्वितीयं स्रष्टारमाचष्टे तदन्यपलक्षणं ब्रह्म कारणत्वेन विज्ञा
तं तल्लक्षणमेवान्यत्रापि विज्ञायते सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजो
ऽसृजतेति तथात्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ईक्षत लोकान्नु सृजा इति चैवंजातीयकस्य कारणस्व
रूपनिरूपणपरस्य वाक्यजातस्य प्रतिवेदान्तमविगीतार्थत्वात् कार्यविषयं तु विज्ञानं दृश्यते क्वचिदाकाशादिकास्सृष्टिः
क्वचित्तेजआदिकेत्येवंजातीयकं न च कार्यविषयेण विगानेन कारणमपि ब्रह्म सर्ववेदान्तेष्वविगीतमधिगम्यमानमवि
वक्षितं भवितुमर्हतीति शक्यते वक्तुं अतिप्रसंगात्समाधास्यति चाचार्यः कार्यविषयमपि विगानं न विगतं श्रुतेरि
त्याभ्यन्भवेदपि कार्यस्य विगीतत्वमप्रतिपाद्यत्वान्न ह्ययं सृष्ट्यादिप्रपंचः प्रतिपिपादयिषितः नहि तत्प्रतिबद्धः क
श्चित्पुरुषार्थो दृश्यते श्रूयते वा ॥

निर्धारयति कार्यविषयं त्वित्यादिना सर्वसृष्टीनां प्रत्येकमन्यथात्वेन तोहमिति अन्यभिज्ञायमाने दृष्टेऽपि नानात्वं प्रस
[illegible]ह अतिप्रसंगादिति सृष्टिविरोधमंगीकृत्य सृष्टिविरोधमुक्त्वा अधुनांगीकारं त्यजति समाधास्यतीति किमर्थं न
[illegible] सृष्टिमन्यथावदतीत्याशंकायां सृष्टावतात्पर्यज्ञापनायेत्याह भवेदित्यादिना अतात्पर्यार्थे विरोधेन दोषायेत्यर्थं साधयति नहीति

शा.भा.
छ.उ.
१२६

प्रातिवद्वाक्यवाक्यशेषत्वे सृष्टिवाक्यानामर्थवत्त्वसंभवात्तस्यार्थस्य एककालेकत्वं वाक्यभेदापत्तेरित्याह नचकल्पयितुमिति न्या
यादेकवाक्यत्वे सिद्धे श्रुतिरपि दर्शयतीत्याह दर्शयति चेति श्रुतेर्गगनकार्यत्वलिङ्गेन कारणब्रह्मज्ञानार्थत्वं सृष्टिश्रुतीनामन्यथा का
रणस्याद्वैतत्वज्ञानफलान्तरमाह स्मृतावपीति एवं निष्फलायामन्यार्थायां सृष्टौ नान्यथाभावाद्विरोधान्न दोष इत्युक्त्वा ह संमन
निमाह तथा चेति अन्यथान्यथेत्येवीसा इदमेवाग्रेवतारयन्ब्रह्मणो जन्मने अतस्तदन्यथात्वे पि ब्रह्मणो न भेदः ज्ञेये न विगा

न उक्तत्वापित्तेर्णात्ते उपक्रमोपसंहाराभ्यां तत्र तत्र ब्रह्मविषयैर्वाक्यैः साकमेकवाक्यतायां गम्यमानत्वात् दर्शयति
चेत्स्पष्टादिप्रपंचस्य ब्रह्मप्रतिपत्त्यर्थतामनेन सोम्य शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेज
से पावत्संप्रदायविदो वदन्तीति मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा उपायः सोवताराय नास्ति भेदः कथंचने
ति ब्रह्मप्रतिपत्तिसंबद्धत्व फले श्रूयते ब्रह्मविदाप्नोति परं तरति शोकमात्मवित् तमेव विदित्वाति मृत्युमेतीति प्र
त्यक्तावगमे वेदफले तत्त्वमसीत्यसंसारी आत्मप्रतिपत्तौ सत्यां संसारीत्वव्याहतेः यत्पुनः कारणविषयं विज्ञानं द
र्शितं सदेव सोम्येदमग्र आसीदित्यादि तत्र विरहितेव्यमत्रोच्यते समाकर्षात् १६ असद्वा इदमग्र आसीदिति नात्रास
द्वाषद्वैतास्तित्वलक्षणब्रह्मात्रमयादिकोशपरंपरया प्रत्यगात्मानं निर्धार्य सोकामयतेति तमेव प्रकृतं समाक
ष्य सप्रपंचां सृष्टिं तस्मात्स्थापयित्वा तत्सत्यमित्याचक्षत इति चोपसंहृत्य तदप्येष श्लोको भवतीति तस्मिन्नेव प्र
कृते श्लोकमिममुदाहरत्यसद्वा इदमग्र आसीदिति यदि त्वसन्निरात्मकमस्मिन् श्लोकेभिप्रेयेत ततोन्यसमा
कर्षेणान्यस्योदाहरणादसंबद्धवाक्यमापद्येत ॥

नमित्यर्थः ब्रह्मज्ञानस्य सृष्टिबोधकत्वमुक्तं तन्निर्वाहाय तस्य फलमाह ब्रह्मेति मृत्युमत्येतीत्यन्वयः एवं सृष्टिद्वारकं विरो
धमन्तरेण साधायकारणस्य सदसत्त्वादिना साक्षात्कृतविरोधनिरासार्थं सूत्रमादत्ते यत्पुनरिति यतोस्तित्वलक्षणं ब्रह्म निर्धा
र्यतस्मिन्नेव श्लोकमुदाहरति अतो न श्लोके निरात्मकं मतं त्वस्माध्यतेदमिति योजनात् तत्र तदात्मनि श्लोकोमन्त्रोभवति ॥ राम॥

महात्म्यसमाकर्षादित्वोद्धियार्थकासत्यदेनब्रह्मलक्षणत्वादित्याह तस्मादिति । न च प्रधानमेव लक्ष्यतामिति वाच्यं चेतनार्थकब्रह्मादिश
ब्दानामनेकेषां लक्षणागौरवादिति भावः निमित्तविभुत्वोपलक्षयोजनत्वाच्छान्दोग्यादौ योजयति एषैवेति सदेकार्थकतत्त्वदेन पूर्वोक्ता
र्थतः समाकर्षात्ब्रह्मत्वत्वमित्यर्थः तत्त्वमस्यादिलक्षणानयुक्ताश्रुतिभिरेव स्वमतभेदेनोदितानुपपत्तिहोमवद्विकल्पस्यादर्शितत्वादित्य
तआह नैतदेवमिति एकैवार्थविलक्षणत्वं नाभवति किं त्वनादिसंसारचक्रस्य वेदवाक्यात्यर्थः अन्यनिरासेन श्रुतिभिः सद्वादस्यैवेष्ट
त्वानांविरोधश्रुतीनिविरोधं वलक्षणाया युक्तेति भावः एवं कोऽकिविदकर्तृकाः सर्वैः कथितेति तदेवाह नतेदमिति अध्यक्षः कर्ता ॥

कार्यानुप्रवेशोऽत्र समाकर्षान्निरवयव ।१४।

तस्मान्नामरूपव्याकृतवस्तुविषयः प्रायेणासच्छब्दः प्रसिद्ध इति तद्व्याकरणाभावापेक्षया प्राप्यते सदेवेदमसदिवासीदित्यु
पचर्यते एवैवासदेवेदमग्र आसीदित्यत्रापि योजना तत्सदासीदिति समाकर्षेण इदन्ताभावाभ्युपगमेहि तत्सदासीदिति किं
समाकर्षेण तदेवेदं कस्मादाह असदेवेदमग्र आसीदित्यत्रापि तच्छब्दस्य तदभिप्रायेण यमेकोपमतोपन्यासः किं मायामिव वस्तु
निविकल्पमसंभवात् तस्माच्छ्रुतिपरिगृहीतेन सत्त्वदशायामेवायं सदसतिपरिकल्पितस्यासत्त्वस्य योपन्यस्य निरासइति दृष्ट
व्यं तद्धेदं तर्ह्यव्याकृतमासीदित्यत्रापि न निरध्यक्षस्य जगतो व्याकरणं कथ्यते स एष इह प्रविष्ट आनखाग्रेभ्य इत्यध्यक्षस्य व्याकृत
कार्यानुप्रवेशित्वेन समाकर्षात् निरध्यक्षे व्याकरणाभ्युपगमे ह्यनन्तरेण प्रकृतावलंबिनाऽस इत्यनेन सर्वनाम्नाऽकः कार्यानुप्रवेशित्वे
न समाकृष्येत चेतनस्य चायमात्मनः शरीरेऽनुप्रवेशः श्रूयते प्रविष्टस्य चेतनत्वश्रवणात् पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वानो
मन इति अपि च यादृशमिदमद्यत्वे नामरूपाभ्यां व्याक्रियमाणं जगत् साध्यक्षं व्याक्रियते एवमादिसर्गेऽपीति गम्यते दृष्टविप
रीतकल्पनानुपपत्तेः श्रुत्यन्तरमपि अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति साध्यक्षतामेव जगतो व्याक्रियायां दर्शयति
व्याक्रियतइत्यपि कर्मकर्तरि लकारः सत्येव परमेश्वरे व्याकर्तरि सौकार्यमपेक्ष्य द्रष्टव्यः यथा लूयते केदारः स्वयमेवेति स
त्येव पूर्णके लवितरि यद्वा कर्मण्येव लकारः अर्थादाक्षिप्तकर्तारमपेक्ष्य द्रष्टव्यः यथा गम्यते ग्राम इति जगद्वाचित्वा
त् १० कौषीतकिब्राह्मणे बालाकिअजातशत्रुसंवादे श्रूयते यो वै बालाके एतेषां पुरुषाणां कर्ता ॥ ॥

पूर्णनाम्निविषये अरुणी कोष्योवार्णीणां केदारच्छेदकः । ति प्यः २

नन्वकर्मभावपदवयामसमस्तेऽत्स्यनन्तरमाह चेतनस्य चापमिति च यद्वा ईक्षा श्रोत्रं श्रोता मनो मंतेत्युच्यते इत्यर्थः आयकार्यस्य कर्तृत्वं
कार्यत्वात्तु द्रष्टव्यमित्याह अपि चेति अपत्ते दृष्टान्ते ननु कर्मकारकाद्यस्य कर्तुः सत्त्वे कर्मण एव कर्तृत्वाविलक्षणे विरुद्धमित्यत आह
व्याक्रियत इति अनायासेन सिद्धिमपेक्ष्य कर्मणः कर्तृत्वमुपचर्यत इत्यर्थः व्याक्रियते जगत्स्वयमेव निष्पन्नमिति व्याख्यापकेन चि
द्व्याकृतमिति व्याचष्टे यद्वेति अतः श्रुतीनामविरोधात्कारणाद्वारा समन्वय इति सिद्धं जगद्वाचित्वात् विषयमाह कौषीतकीति
बालाकायाजातशत्रवे बालाकि ब्राह्मणे प्रतिजज्ञो वाच यो वा इति ॥ क्रमसंख्या ॥ राम ॥ राम ॥

ना२

...तत्वादित्यादीनां कर्ता किंतु सर्वस्य जगतः इत्याह यस्येति एतज्जगद्यस्य कर्म क्रियते इति व्युत्पत्त्या कार्यमित्यर्थः कर्मेति पाव
...[illegible] न पाय माह नवेति पूर्व चैक वाक्यस्य सदृष्टे शब्दबलादसच्छेदानीतः इहतु वाक्यभेदाद्ब्रह्म ने वाणीति लौकिवाक्
...[illegible] न प्राणादि शब्देन प्राणादिशब्दो ब्रह्म परत्वेन नेतुं न शक्य इति प्रत्युदाहरणेन पूर्वपक्षमाह किंतावदिति पूर्वपक्षवाक्य।
...[illegible] परत्वाद् ब्रह्माणि समन्वयासिद्धिः सिद्धान्ते तु समन्वयसिद्धिरिति फलं अथ यमुष्मोद्देशेति ष्णः अत्र पुरुषकर्तृत्व
...कर्मकयमिति तत्राह ये चैतदिति स्त्रात्मक प्राणस्य विकाराः सूर्यादय इत्यत्र मानमाह कतम इति यस्य महिमानः सर्वदेवा इति

यस्य वैतत्कर्म स वै वेदितव्य इति तत्र किं जीवो वेदितव्यत्वेनोपदिश्यते उत मुख्यः प्राण उत परमात्मेति विषयः किंतावत्प्रा
ते प्राण इति कुतः यस्य चैतत्कर्मेति श्रवणात् परिस्पन्दलक्षणस्य च कर्मणः प्राणाश्रयत्वात् वाक्यशेषे चाथास्मिन्प्राण एव
कधा भवतीति प्राणशब्ददर्शनात् प्राणशब्दस्य च मुख्ये प्राणे प्रसिद्धत्वात् ये चैते पुरस्ताद्बालाकिनादित्ये पुरुषश्चन्द्रमसि पुरु
ष इत्येवमादयः पुरुषा निर्दिष्टाः तेषामपि भवति प्राणः कर्ता प्राणावस्थाविशेषत्वादादित्यादिदेवतात्मनां कतम एको देव
इति प्राण इति सब्रह्मेत्याचक्षत इति श्रुत्यन्तरप्रसिद्धेः जीवो वायमिह वेदितव्यतयोपदिश्यते तस्यापि धर्माधर्मलक्ष
णं कर्म शक्यते आवयितुं यस्य वैतत्कर्मेति सोपि भोक्तृत्वाद्भोगोपकरणभूतानामेतेषां पुरुषाणां कर्तोपपद्यते वाक्य
शेषे च जीवलिङ्गमवगम्यते यत्कारणं वेदितव्यतयोपन्यस्तस्य पुरुषाणां कर्तुर्वेदनायोपेतं बालाकिं प्रति बुबोधयि
षुरजातशत्रुः सुप्तं पुरुषमामन्त्र्यामन्त्रणशब्दाश्रवणात्प्राणादीनामभोक्तृत्वं प्रतिबोध्य यष्टिघातोत्थापनात्[illegible]
[illegible] प्राणादिव्यतिरिक्तं जीवं भोक्तारं प्रतिबोधयति तथा परस्तादपि जीवलिङ्गमवगम्य
ते तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा स्वाः श्रेष्ठिनं भुञ्जन्त्येवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते एवमेवैत आत्मान एतमात्मानं भुञ्ज
न्तीति प्राणभृत्त्वाच्च [illegible] जीवस्योपपन्नं प्राणशब्दत्वं तस्माज्जीवमुख्यप्राणयोरन्यतर इह ग्रहणीयः न परमेश्वरः तल्लिङ्गान =
वगमादिति एवं प्राप्ते ब्रूमः परमेश्वर एवायमेतेषां पुरुषाणां कर्ता स्यात् कस्मात् उपक्रमसामर्थ्यात् इह हि बालाकिरजातशत्रु ८
णा सह ब्रह्मवाणीति संवदितुमुपचक्रमे स च कतिचिदादित्याद्यधिकरणान्पुरुषानमुख्यब्रह्मदृष्टिभाजोऽवोचत्तं स वै ॥
[illegible] वा खलु मा संवदिष्ठा ब्रह्म ते ब्रवाणीति मुख्यब्रह्मवादितयापोद्यैतत्कर्तारमन्यं वेदितव्यतयोपचि

क्षेपकं वाक्ये दर्शितं अतः सर्वे देवात्मकत्वात्स प्राणो ब्रह्म ननु तदुक्तं यस्यैव वेदयन्त्यादिरित्यर्थः एवं पक्षान्तरमाह जीवो वेति एतत्कारणेत्य
स्य [illegible] जीवं बोधयति तस्मादस्मिन्नपि जीवलिङ्गमिति योजना तेषां पुरुषस्य समाजगमनत्वः तद्राजा हेम्न इत्यादयः सोमराजा
दित्यादि सम्बोधने बोधनानभिज्ञत्वात्प्राणादेः तत्त्वमुक्ताप्यथात एतोप्यजीवं बोधितवानित्यर्थः श्रेष्ठी प्रधानः स्वैर्भृ
त्यैर्ज्ञातिभिरुपादिते भुङ्क्ते स्वा ज्ञातयः तदुपजीवन्ति एवं जीवोऽप्यादित्यादिभिः प्रकाशादिना भोगोपकरणैर्भुङ्क्ते च तत्र वर्गहणा
नादिना जीवमुपजीवन्तीत्युक्ते भोक्तृत्वं जीवलिङ्गे न च प्राणस्यैवैकथा भवतीति श्रुतेः प्राणशब्दो जीवे कथमित्यत आह प्राणभृ

घा२

मनचवा लौकिकं ब्रह्मत्वं भ्रांत्याभ्युपेत्य लिंगाद्रूपान्पुरुषानकारात्तानिरस्तस्तौ सिध्यतः तदुक्तं ब्रह्म षेयुत्कारात्तोच्यमानं ब्रह्मैवेति वक्तव्य
मन्यमानो नोपि मृषावादित्वप्रसंगादित्याह यो वै बालाक इति वेदितव्योपेत्यर्थः मत्यपुरुषकर्तृत्वं ब्रह्मण एव लिंगं प्राणो जीवो वा स्तद्वि प
मात्वेनाक्षातत्त्वादित्याह कर्तेत्यत्र चेति यदुक्तं बलाकेनादृष्टो यो वाचकः कर्मशब्दः प्राणो जीवो वा तत्पस्यापकरोति तत्रेत्याह यस्य ति अने।
कार्थकत्वाकृत्वादन्यार्थस्य अक्षराणि पदद्वयात्मकप्रसंग्रहणे पदद्वयारंतत्वात्कस्य ग्रहणमिति संशये पुरुषकर्तृपद
मानि ध्यावर्तते [illegible] मत्र ग्रहणमित्यर्थः एतत्कर्मेति प्रकृतपरामर्शी पुरुषाः पूर्वोक्ताः कर्मशब्देन निर्दिश्यंतामित्य तत्र्या
हृ नादित्ते [illegible] नहत्या यानान्तरूपाणां नपुंसकैकवचनपरामर्शायोगाच्चेत्यर्थः ननु पुरुषोत्पादकस्यकर्तृत्व्यापारः कोन्यस्तदुत्पादने

यदि सो प्यमुख्यब्रह्मदृष्टिभाक्स्यादुपक्रमो वाध्येत तस्मात्परमेश्वर एवायं भवितुमर्हतीति कर्तृत्वं चैतेषां पुरुषाणां न परमेश्व
रादन्यस्यास्त्यनेन प्राणादेः कल्प्यते यस्य वैतत्कर्मेत्यपिनापरिस्पन्दलक्षणस्य वाकर्मणो निर्देशः न यौरन्यतरस्याप्यप्रकृतत्वा
त् असंशब्दितत्वाच्च नापि पुरुषाणामयं निर्देशः एतेषां पुरुषाणां कर्तेत्येव तेषां निर्दिष्टत्वात् लिंगवचनविगानाच्च नापि
पुरुषविषयस्य करोतेरर्थस्य क्रियाफलस्य वायं निर्देशः कर्तृशब्देनैव तयोरुपात्तत्वात्पारिशेष्यात्प्रत्यक्षसन्निहितं जग
त्सर्वमनेनैतच्छब्देन निर्दिश्यते क्रियत इति च जगत्कर्म ननु जगदप्यप्रकृतमसंशब्दितं च सत्यमेतत् तथाप्यसति विशे
षोपादाने साधारणेनार्थेन सन्निधानेन संनिहितवस्तुमात्रस्यायं निर्देशोऽतिगम्यते न विशिष्टस्य कस्यचित् विशेषसन्निधाना
भावात् पूर्वत्र च जगदेकदेशभूतानां पुरुषाणां [illegible] विशेषोपादानादविशेषितं जगदेवेहोपा
दीयत इति गम्यते एतदुक्तं भवति य एतेषां पुरुषाणां जगदेकदेशभूतानां कर्ता किमनेन विशेषेण यस्य कृत्स्नमेव जग
द्विशेषितं कर्मेति वाशब्द एकदेशावच्छिन्नकर्तृत्वव्यावृत्त्यर्थः ये बालाकिना ब्रह्मत्वाभिमताः पुरुषाः कीर्तितास्तेषा
मब्रह्मत्वख्यापनाय विशेषोपादानं एवं ब्राह्मणपरिव्राजकन्यायेन सामान्यविशेषाभ्यां जगतः कर्ता वेदितव्यतयोपदि

तस्य फलेषु रूप जन्मनंतरं तु न स्वावीकर्मशब्दोऽस्त्वित्यत आह नापीति कर्तृशब्देनेति क्रियाफलाभ्यां विनाकर्तृत्वायोगात्कर्तृशब्देने
व तयोर्ग्रहणमित्यर्थः जगतोऽप्रकरणपरपदेन तत्स्तदुक्तमंगीकरोति सत्यमिति प्रकरणादिकं सर्वनाम्नः संकोचकं तस्मि
न्नसति संनिहितमात्रेण बुद्धिस्थं सर्वमेव गृह्णाति संकोचकाभावात्सर्वार्थकेन सर्वनाम्ना बुद्धिस्थस्य कार्यमात्रस्य कर्मशब्दो वाचक इ
त्याह तथापीति किंच जगदेशोक्त्या जगत्प्रकृतमित्याह पूर्वत्रेति जगदेकदेशपुरुषाणामपि ग्रहणात्तस्य गतिर्व्यर्थ इत्यत आह एतदु
क्तमिति तत्रैवेति तत्र इति वाचः पुरुषमात्रनिरूपिते कर्तृत्वमिति न्यायात् [illegible] ब्राह्मणभोजनन्यायपरिव्राजका
[illegible] ब्राह्मणशब्दः परिव्राजकोन्यविषयः तथात्र कर्मशब्दः पुरुषान्यजगद्वाचीत्याह एवमिति ॥ राम ॥

अस्य परमात्मानं विदितव्यः परमेश्वरस्य कि मायात मिल त आह। परमेश्वर इति सिद्धांतमुक्त्वा पूर्वपक्षबीजमनुवदति जीवमुख्यप्राणलिंगादिति इत्यनेन वाक्यस्य त्रिविधमिति अस्मिन्नुगामित्वं आपि प्रत्ययनिमित्तत्वस्य एतन्मनिमित्तमिति भेदः समवर्तय कर्मपदस्य चेतनत्वेन समर्थ्यते अक्षितिस्यादिति शांकेत न तत्त्वमिति कर्मपदसमर्थ्या एवं पञ्चप्राणो तन्निरासार्थमस्यार्थमा पूर्वस्माह नेत्यादिना प्राणशब्दजीवलिंगयोगातिमाह प्राणशब्दोऽपीति मनोजीवः लिंगेन ब्रह्मैव वक्ष्यते इदमेकं इत्यनीत
परमेश्वरः सर्वजगतः कर्ता सर्ववेदान्तेषु अवधारितः जीवमुख्यप्राणलिंगान्नेति चेत्तद्व्याख्यातं १९ अथ यदुक्तं वाक्यशेष गतात् जीवलिंगान्मुख्यप्राणलिंगाच्च तयोरेवात्र ग्रहणं न्याय्यं न परमेश्वरस्येति तत्परिहर्तव्यं अत्रोच्यते परिहृत तेवैतदुपासात्रैविध्यात् आश्रितत्वादिह तद्योगादित्यत्रत्रिविधं ह्यत्रोपासनमेवं सति प्रसज्येत जीवोपासनं मुख्यप्राणोपासनं ब्रह्मोपासनं चेति न चैतन्न्याय्यमुपक्रमोपसंहाराभ्यां हि ब्रह्मविषयत्वमस्य वाक्यस्यावगम्यते तत्रोपक्रमस्तावद्ब्रह्मविषय
त्वेदर्शितं उपसंहारस्यापि निरतिशयफलश्रवणाद्ब्रह्मविषयत्वं दृश्यते सर्वान्पाप्मनोपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वा
राज्यं आधिपत्यं पर्येति य एवं वेदेति नन्वेवं सति प्रतर्दनवाक्यनिर्णयेनैवेदमपि वाक्यं निर्णीयेत तेन निर्णीयते यस्य वैतत्कर्म
त्यस्य ब्रह्मविषयत्वेन तत्रानिर्द्धारितत्वात् तस्मादत्र जीवमुख्यप्राणशंका पुनरुत्पद्यमाना निवर्त्यते प्राणशब्दोऽपि
ब्रह्मविषयो दृष्टः प्राणबंधनं हि सोम्यमन इत्यत्र जीवलिंगमप्युपक्रमोपसंहारयोर्ब्रह्मविषयत्वादभेदाभिप्रायेण यो
जयितव्यं अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके २० अपि चनैवात्र विवदितव्यं जीवप्रधानं वेदं वाक्यं स्या
द्ब्रह्मप्रधानं वेति यतोऽन्यार्थं जीवपरामर्शं ब्रह्मप्रतिपत्त्यर्थमस्मिन्वाक्ये जैमिनिराचार्यो मन्यते कस्मात् प्रश्नव्याख्यानाभ्यां प्रश्नस्तावत्स यपुरुषबोधनेन प्राणनामादिव्यतिरिक्ते जीवे प्रतिबोधिते पुनर्जीवव्यतिरिक्तविषयो दृश्यते क्वैष एतद्बा
लाके पुरुषो शयिष्ट क्व वा एतदभूत्कुत एतदागादिति प्रतिवचनमपि यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण
एवैकधा भवति तस्मादेतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका इति च॥ ॥

लिंगेन जीवो विज्ञानाद्ब्रह्म प्रश्नादन्यस्त्याह अन्यार्थमिति जीवपरामर्शस्य जीवाधिकरणब्रह्मज्ञानार्थत्वे प्रश्नमाह क्वैष इति हे बाला
क एतच्छयनं विशेषभावाज्ञानरूपं यथास्यात्तथैव पुरुषः क्वाशयिष्ट कस्मिन्नधिकरणे शयनं कृतवानित्यर्थः एकीभावाय
ज्ञानार्थं एकमिति क्व वा इति एतद्भवनमीकीभावरूपं यथास्यात्तथा पुरुषः क्वाभूत्सुप्तः के नेकं प्राप्नोतीति यावत् उत्थाना
पत्तं च कृतवानिति कुत इति एतदागमनमेकस्य भवनं यथास्यात्तथा पुरुषः कुत आगत इत्यर्थः प्रश्नमुक्त्वा व्याख्यानमाह प्रतिवचनमिति प्राय

इत्येव प्राणोक्तेः अस्त्वेवं प्राणविषयत्वमत आह सुषुप्तिकाले चेति सुषुप्ते न तु जीवैक्याभावात् प्राणस्य ब्रह्मेत्यर्थः जीवोक्तेरन्यार्थत्वमु
पपादयति तस्मादिति निःसंबोधता विशेषधीशून्यता स्वच्छता विद्योपमलशून्यता भेदभ्रान्तिशून्यता स्वरूपमेकमाह उपाधी
ति प्रश्नव्याख्यानयोर्ब्रह्मविषयत्वे प्राप्ते वाक्यान्तरं संवादमाह अपि चैवमेके शाखिन इति ननु तत्र का प्राणः सुषुप्तिस्थानमुक्तं न ब्रह्मे
त्यत आह आकाशो हि नामरूपयोर्निर्वहिता आत्मनन्यत्वाच्चाकाशो ब्रह्मेत्याह सर्वं इति एवं जीवनिरासार्थकत्वेन सूत्रं व्याख्या

सुषुप्तिकाले च परेण ब्रह्मणा जीव एकतां गच्छति परस्माच्च ब्रह्मणः प्राणादिकं जगज्जायत इति वेदान्तमर्यादा तस्माद्यत्रा
स्य जीवस्य निःसंबोधता स्वच्छतारूपः स्वापरूपाधिजनितविशेषविज्ञानरहितं स्वरूपं यतस्तद्रूपं रूपमागमनं सोऽयमपर
मात्मा वेदितव्यतया श्रावित इति गम्यते अपि चैवमेके शाखिनो वाजसनेयिनोऽस्मिन्नेव बालाक्यजातशत्रुसंवादे स्प
ष्टं विज्ञानमयशब्देन जीवमात्मानं प्रतिबोधितं परमात्मानमामनन्ति य एष विज्ञानमयः पुरुषः क्वैष तदाभूत् कुत
एतदागादिति प्रश्ने प्रतिवचनेऽपि य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेत इति आकाशशब्दश्च परमात्मनि प्रयुक्तो दह
रोऽस्मिन्नन्तराकाश इत्यत्र सर्व एत आत्मनो व्युच्चरन्तीति चोपाधिमतामात्मनामन्यतो व्युच्चरणमामनन्तः परमात्मा
नमेव कारणत्वेनामनन्तीति गम्यते प्राणनिराकरणस्यापि सुषुप्तपुरुषोत्थापनेन प्राणादिव्यतिरिक्तोपदेशो भव
यः वाक्यान्वयात् २२ बृहदारण्यके मैत्रेयीब्राह्मणेऽधीयते न वा अरे पत्युः कामाय प क्रमेण न वा अरे सर्वस्य कामाय
सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो
वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमिति तत्रैतद्विचिकित्स्यते किं विज्ञानात्मैवायं द्रष्टव्यश्रोत
व्यत्वादिरूपेणोपदिश्यते आहोस्वित्परमात्मेति कुतः पुनरेषा विचिकित्सा प्रियसंसूचितेनात्मना भोक्त्रोपक्रमा
द्विज्ञानात्मोपदेश इति प्रतिभाति तथात्मविज्ञानेन सर्वविज्ञानोपदेशात् परमात्मोपदेश इति ॥ प ॥

नमी२

प्राणनिरासपरत्वेनापि व्याचष्टे प्राणेति अस्मिन्वाक्ये प्राणोपदेशो ब्रह्मज्ञानार्थं मन्यते जैमिनिः इत्युक्ते प्रश्नव्याख्यानाभ्यां
[illegible] ब्रह्मपरत्वावगमादपि चैके शाखिनः एवमेव प्राणातिरिक्तं जीवात्मानमनन्तः प्राणस्य वाक्यार्थत्वं वारयन्तीति सूत्रयो
[illegible] जीवोपदेशः प्राणनिराकरणस्याप्युपपत्तेरिति भावार्थः तस्मादिदं वाक्यं ब्रह्मणि समन्वितमिति सि
[illegible] वाक्यान्वयात् विषयवाक्यमाह बृहदिति पत्यादेरात्मशेषत्वेन प्रियत्वादात्मैव सर्वशेषी प्रियतमोऽतोऽन्यदिदं सर्वं
[illegible] नार्थं श्रवणादिकं कार्यमित्यर्थः प्रियसंसूचितेनेति पतिजायादिभिः प्रियैर्भोग्यैर्जीवस्तयानुमितेन

॥ श्री दि

श्री श्री२

प्र.आ.श्री
प्र.पं.
१६७

पृष्ठं ब्रह्मविद्यावत्त्वमवलाद्बाकस्य ब्रह्मपर्यन्तं तत्याज्जीवोपक्रमादस्य वाक्यस्य जीवपरत्वमिति द्वंतिन पूर्वपक्षयति किं तावदिति ए
वेदोक्तस्य जीवो पाधिपरत्वं मिद्धान्ते तेषु पत्त्वगब्रह्मानि समन्वय श्रुति फले इदं प्रन्यक्षमद्वदपीति छिन्नभूतेमन्यमनेतेनित्यमपरत्वं वा
नेविवेकानं पुनस्तेष्व कार्यकारणात्मना ताद्रूमानेष्वःभूतेष्वःसाम्यतो त्यागभूतोपाधिकेनत्मानुभूयतान्यभनानि लीयमाना न्यनुप
श्यन्नुपश्यति औपाधिकमरणानेनरूपं विशेषणीभीत्तीति श्रुत्यर्थः विज्ञातारं विज्ञानकर्तारं भोक्तुं विज्ञाते भोगस्ता तमित्युपचारः

नो४ नातं५ दृ१

किं तावन्नामसे विज्ञानात्मोपदेशश्रुतिरुत्कस्मात् उपक्रमसामर्थ्यात् पतेनायापुत्र वित्तादिकं हि भोगभूतेसर्वं जायात्मार्थेन
योग्यि प्रेयमवतिप्रियमेत्वं वित्तमौत्रात्मात्मानेनमुपक्रम्यानेत्तमिदमात्मनोदर्शनायुपदिश्यमानेवात्मान्यस्यात्मनः स्यात्मने पी
दमेवेदं तमनेनममपारं विज्ञानेनचुनपश्वे तेभ्याभूतेभ्यः समुत्थायतान्येवानुविनश्यतिन प्रेत्यसंज्ञास्तीति प्रक्रुतस्यैवमहतोभ
नस्यद्रष्टव्य स्यभूतेभ्यः समुत्थानं विज्ञात्मभावे नवुवन्विज्ञानमनुपश्वेदं द्रष्टव्यत्वं दर्शयतिन तु याचिज्ञातारमरेकेनविजानीया
दितिकर्तृवचनेन शब्देनोपसंहरन्विज्ञानात्मानमेवोपदिष्टं दर्शयति तस्मादात्मविज्ञाने न सर्वविज्ञानवचनं भोक्तृकर्थत्वात्
कर्मजातस्योपचारिकं द्रष्टव्यमिति एवं प्राप्तेब्रूमः परमात्मोपदेशएवायं कस्मात् वाक्यान्वयात् वाक्यं हि दं पौर्वापर्येण
वेक्ष्यमाणं परमात्मानं प्रत्यन्वितावयवं लक्ष्यते [illegible]क यमिति तत्रुपपाद्यते अमृतत्वस्य तु नाशास्ति वित्तेनेतिया ज्ञव
ल्क्याद्रुपश्रुतायेनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति अमृतत्वमाशुंसमानायामैत्रेय्या
यात्मविज्ञानमुपदिशति न चान्यत्र परमात्मविज्ञानादमृतत्वमस्तीति श्रुतिस्मृतिवादा वदन्ति तथा चात्मविज्ञा
नेन सर्वविज्ञानमुच्यमानं नान्यत्र परमकारणविज्ञानान्मुख्यमवकल्पते न चैतदौपचारिकमाश्रयितुं शक्यं य
त्कारणमात्मविज्ञानेन सर्वं विज्ञानं प्रतिज्ञायानन्तरेण ग्रन्थेन तदेवोपपादयति ब्रह्म तं परादाद्योन्यत्रात्मनो ब्रह्म
वेदेत्यादिना भेददृष्टिमपोद्य इदं सर्वं यदयमात्मेति च सर्वस्य वस्तुजातस्यात्माव्यतिरेकमवतार
वेदेत्यादिना [illegible] ब्रह्मक्षत्रादिकं जगदात्मनोन्यत्र स्वातन्त्र्येण लब्धसद्भावं पश्यति तं मिथ्यादर्शिनं तदेव मिथ्या
दृष्टं ब्रह्मक्षत्रादिकं जगत्परा करोतीति भेददृष्टिमपोद्य इदं सर्वं यदयमात्मेति सर्वस्य वस्तुजातस्यात्माव्यतिरेकमवतार

यति दुन्दुभ्यादिदृष्टान्तैश्च तमेवाव्यतिरेकं द्रढयति अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिना च प्रकृतस्यात्मनो नामरूपकर्मप्रपञ्चकारणतां व्याचक्षाणः परमात्मानमेनं गमयति तथैवैकायनप्रक्रियायामपि सविषयस्य सेन्द्रियस्य सान्तःकरणस्य प्रपञ्चस्यैकायनमनन्तरमबाह्यं कृत्स्नं प्रज्ञानघनं व्याचक्षाणः परमात्मानमेनं गमयतीति तस्मात्परमात्मन एवायमुपदेश इति गम्यते
वताक्त्य यौवगमाद्ब्रह्मप्रमापकत्वमिति सिद्धान्तयति एवमिति नहि
तेन तस्माद्भेदकमेणात्वार्थः मेदनिरासपूर्वकममेदं साधनेनेव विज्ञानात्सर्वविज्ञानसमर्थनादौपचारिकत्वेनपुक्तमित्याह
नचैतदौपचारिकमित्यादिना पराकरोतीति श्रेयोमार्गादुत्पादयति यथाद्रृष्टिमिर्वा द्वीणावादसामान्यग्रहणेनैव स्वरा मागणोस
दवांतरविशेषाः कृतिग्रहणग्राहा रजतवत्सामान्येन कल्पितास्तेनोन भिद्यते एवमात्ममानभासं सर्वमात्ममात्रमिति निश्चित

नि४

एवमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अनुपपत्त्या द्रष्टव्यनिश्चयासर्वं खल्विदं लिंगाद्यदीत्याह आत्मनस्तरतीति अस्येदादिकं नाम रूपं
नामितिकर्म अयं च लोकः परश्च लोक इति रूपं किं च सर्वेषां वेदानां वागेकायनमिति खिडिकया सर्वप्रपंचस्य मुख्यल
याधारत्वमात्मनो ब्रह्मत्वे लिंगमित्याह तद्वेदेकायनमिति जीवब्रह्मणोर्भेदाभेदसत्त्वादभेदांशेन जीवोपक्रमणं प्रतिज्ञासाध

न सर्वविज्ञानं

आस्य मन्त्रिस्य तस्य निश्वसितमेतदृग्वेद इत्यादिना प्रकृतस्यात्मनो नामरूपकर्मप्रपंचकारणतां व्याचष्टेः परमा
त्मा न भेदेन गमयति तद्वेदेकायनप्रक्रियायामपि सविषयस्य सेन्द्रियस्यान्तःकरणस्य प्रपंचस्यैकायनमनेन एवा
द्येकं न स्याज्ज्ञानेन व्याचष्टेः परमात्मानमेव तेन गमयति तस्मात्परमात्मानमेवायं दर्शनात्परमात्मानमगमयति य
स्मिन्नुक्ते श्रियमेतदुचितापक्रमाद्विज्ञानात्मनमेवायं दर्शनात्परमात्मेत्याश्मरथ्यः प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः २०
आस्य च प्रतिज्ञायामात्मनि विज्ञाते सर्वमिदं विज्ञातं भवतीह सर्वं यदयमात्मेति च तस्याः प्रतिज्ञायाः सिद्धिः सूचयत्येतल्लि
गं यद्विप्रसरितस्यात्मनो द्रष्टव्यत्वादि संकीर्तनं यदि हि विज्ञानात्मा परमात्मनोऽन्यः स्यात्ततः परमात्मविज्ञानेऽपि वि
ज्ञानात्मविज्ञातं स्यात्कविज्ञाते यस्य प्रतिज्ञा तदर्थं येन तस्मात्प्रतिज्ञासिद्ध्यर्थं विज्ञानात्मपरमात्मनोरभेदांशेनोपक्रम
णमित्याश्मरथ्य आचार्यो मन्यते उत्क्रमिष्यत एवंभावादित्यौडुलोमिः २१ विज्ञानात्मन एवदेहेन्द्रियमनोबुद्धिसं
घातोपाधिसंपर्कात्कलुषीभूतस्य ज्ञानध्यानादिसाधनानुष्ठानात्संप्रसन्नस्य देहादिसंघातादुत्क्रमिष्यतः परमा
त्मैक्योपपत्तेरिदमभेदेनोपक्रमणमित्यौडुलोमिराचार्यो मन्यते श्रुतिश्चैवं भवति एष संप्रसादोऽस्माच्छरीरा
त्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति क्वचिच्च जीवाश्रयमपि नामरूपं नदीनिदर्श
नेन ज्ञापयति यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परा
त्परं पुरुषमुपैति दिव्यमिति यथा लोके नद्यः स्वाश्रयमेव नामरूपं विहाय समुद्रमुपयन्ति एवं जीवो
पि स्वाश्रयमेव नामरूपं विहाय परं पुरुषमुपैतीति मन्त्रार्थः प्रतीयते दृष्टान्तदार्ष्टान्तिकयोस्तुल्यत्वाय ॥

[illegible]मित्याश्मरथ्यमतं सत्यं संसारदशायां भेद एवं मुक्तावेवाभेद इत्यौडुलोमिमतं तत्र प्रमाणमाह श्रुतिश्चेति समुत्था
[illegible]ति ननु संसारस्यौपाधिकत्वात्सर्वदैवाभेद इत्याशंकां दृष्टान्तबलेन संसारस्य स्वाभाविकत्वमित्याह क्वचि
च्छ्रुत्या [illegible]यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहायेति नदीनिदर्शनेन व्याचष्टे यथा लोक इति ॥ राम

[illegible] वस्थितेरिति अत्यन्ताभेदज्ञापनार्थं जीवस्य ब्रह्मत्वकथनाद् योऽत्र ब्रह्म परमात्मा उक्त इत्यर्थः एतेन जीवलिंगान्नो ब्रह्म
[illegible] नार्थमिदमधिकरणं न भवति प्रतर्दनाधिकरणे काप्यनन्तत्वाज्ञापि जीवानुवादेन ब्रह्मप्रतिपादनार्थं स्तभुत्क्रान्त्योरित्यत्र
गत्वादतो व्यर्थमिदमधिकरणमिति निरस्तं जीवो द्वैतेन ब्रह्मत्वप्रतिपादनेऽभेदोपयावश्यक इति भेदाभेदपक्षाप्रामोऽकल्पितभेदे
नोद्देश्यत्वादिके सति तात्त्यन्ताभेदज्ञापनायमस्यारंभात् ज्ञापने चात्र लिंगमात्मपात्वेनापक्रान्तस्य धर्मिणो ब्रह्मणो धर्मान्तरस्य ग्र
हणाविनैव ब्रह्मत्वैकपदेन भेदाभेदवर्थमिह यग्रहः स्यादिति मन्तव्यं धीरः सर्वज्ञः सर्वाणि रूपाणि कार्याणि विचित्य सृष्ट्वा तेषां ना
मानि च कृत्वा तेषु बुद्ध्यादिषु प्रविश्याभिवदनादिकं कुर्वन्यो वर्तते तं विद्वानिह वा मृतो भवतीति मन्त्रोऽपि जीवपरयोरैक्यं दर्शय

नर

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥ अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानादुपपन्नमिदमभेदेनोपक्र
मणमिति काशकृत्स्न आचार्यो मन्यते तथा च ब्राह्मणमनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति एवं जा
तीयकं परस्यैवात्मनो जीवभावेनावस्थानं दर्शयति मन्त्रवर्णश्च सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवद
न्यदास्ते इत्येवंजातीयकः न च तेजःप्रभृतीनां सृष्टौ जीवस्य पृथक्सृष्टिः श्रुता येन परस्मादात्मनोऽन्यस्तद्विकारो जी
वः स्यात् काशकृत्स्नस्याविकृतः परमेश्वरो जीवो नान्य इति मतम् आश्मरथ्यस्य तु यद्यपि जीवस्य परस्मादनन्यत्वमभि
प्रेतं तथापि प्रतिज्ञासिद्धेरिति सापेक्षत्वाभिधानात्कार्यकारणभावः कियानप्यभिप्रेत इति गम्यते औडुलोमिपक्षे
पुनः स्पष्टमेवावस्थान्तरापेक्षौ भेदाभेदौ गम्येते तत्र काशकृत्स्नीयं मतं श्रुत्यनुसारीति गम्यते प्रतिपिपादयिषितार्थानुसा
रात् तत्त्वमसीत्यादिश्रुतिभ्यः एवं च सति तज्ज्ञानादमृतत्वमवकल्पते विकारात्मकत्वे हि जीवस्याभ्युपगम्यमाने विकार
स्य प्रकृतिसंबन्धे प्रलयप्रसंगात्तज्ज्ञानादमृतत्वमवकल्पेत अतश्च स्वाश्रयस्य नामरूपस्यासंभवात् उपाध्याश्रयना
मरूपो जीव उपचर्यते अत एवोत्पत्तिरपि जीवस्याग्नेर्विस्फुलिंगोदाहरणेन आव्यमाणोपाध्याश्रयैव वेदितव्या

भेदा ५   नर

तीत्याह मन्त्रेति जीवस्य ब्रह्मविकारत्वानैक्यमित्यत आह न च तेज इति मतत्रयं विभज्य दर्शयति काशकृत्स्नादिना कियानपीति आ
भेदवद्भेदोऽपीत्यर्थः तत्रान्त्यस्य मतस्योपादेयत्वमाह तत्र काशेति तात्पर्यवद्ब्रह्मइतिवचनत्वमस्यादिवाकेभ्यः परापरयोरत्यन्ताभे
दः प्रतिपाद्यितुमिष्टोऽर्थः तदनुसारित्वादित्यर्थः ज्ञानान्मुक्तिश्रुत्यन्यथानुपपत्त्याप्ययमेव पक्ष आदेय इत्याह एवं चेति अ
त्यन्ताभेदे सतीत्यर्थः कल्पितस्य भेदस्य ज्ञानान्निवृत्तिः संभवति न सत्यस्य तस्यापि दृष्टत्वमयं दृक्नदीदृष्टान्तात्संसारः स्वाभाविक इति
तत्त्याह अत एवेति अनामरूपब्रह्मत्वाज्जीवस्येत्यर्थः इत्युत्पत्तिश्रुत्या जीवस्य ब्रह्मणा भेदाभेदावित्यत आह अत एवेति उत्पत्तेः स्वा

अत्र पूर्वपक्षे वेदोजनयस्तमे जीवेनोपक्रमः परस्यैव समन्त्यानमनुत्या जीवाभेदाभिदानं विज्ञातम्प्राप्त इति तत्राद्ये जीवे विरसत्वानिरस्तं से
प्रतिष्ठितोयं मन्त्रपूर्वपैवनिराचष्टे परपुक्रमिन्याहिना आत्मविज्ञानात्सर्वविज्ञाने यत्प्रतिज्ञाते तत्र हेतुरिदं सर्वं यदयमात्मेत्यव्या
तिरेकउक्तस्त्प्रतिपादनात्तदेवप्रतिज्ञातमुपपादितमितियोजना एकस्मात्प्रसवो यस्य एकस्मिन्प्रलयो यस्य तद्धोरित्यर्थः समु वा३
त्थानसमभेदाभिधानमिति यावत तन्मना प्रातुक्रोनाभेदइत्यादिप्यपरिहरति नन्वित्यादिना भूतस्य संज्ञानास्तीति वाक्ये चैवमांमो

परस्य प्रकृतस्यैव महतो भूतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थाने विज्ञानाम भावेन दर्शयन्विज्ञानात्मन एवेदं द्रष्टव्यत्वं दर्शय
तीति तत्रापीयमेव विरसत्वीयोजयितव्या प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः इदमत्र प्रतिज्ञातमात्मनि विदिते सर्वं विदितं भव
तीदं सर्वं यदयमात्मेति च उपपादितं च सर्वस्य नामरूपकर्मप्रपंचस्यैकप्रसवत्वादेकप्रलयत्वाच्च दुंदुभ्यादिदृष्टांतैश्च का
र्यकारणयोरव्यतिरेकप्रतिपादनात् तस्या एव प्रतिज्ञायाः सिद्धिसूचयत्येतल्लिंगं यन्महतो भूतस्य भूतेभ्यः समुत्थान
विज्ञानात्मभावेन कथितमित्याश्मरथ्य आचार्यो मन्यते अभेदे हि सत्येकविज्ञानेन सर्वप्रतिज्ञातमवकल्पत इति उत्क्रमिष्य
त एवंभावादित्यौडुलोमिः उत्क्रमिष्यतो विज्ञानात्मनो ज्ञानध्यानादिसामर्थ्यात्संप्रसन्नस्य परेणात्मनैक्यसंभवादिदम
भेदाभिधानमित्यौडुलोमिराचार्यो मन्यते अवस्थितेरिति काशकृत्स्नः अस्यैव परमात्मनोऽनेनापि विज्ञानभावेनावस्था
नादुपपन्नमिदमभेदाभिधानमिति काशकृत्स्न आचार्यो मन्यते ननूच्छेदाभिदानमेतत् एतेभ्यो भूतेभ्यः समुत्थाय तान्ये
वानुविनश्यति न प्रेत्य संज्ञास्तीति कथमेतदभेदाभिदाने नैव दोषः विशेषविज्ञानविनाशाभिप्रायमेतद्धि नाशाभिधा
नेनात्मोच्छेदाभिप्रायं अत्रैव मा भगवानमूमुहत् न प्रेत्य संज्ञास्तीति पर्यनुयुज्य स्वयमेव श्रुत्यार्थान्तरस्य दर्शितत्वात् नवा अरे
हं मोहं ब्रवीमि विनाशी वा अरेयमात्मानुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवतीति एतदुक्तं भवति कूटस्थनित्य एवायं विज्ञानघन आ
त्मा नास्योच्छेदप्रसंगोस्ति मात्राभिस्त्वस्य भूतेंद्रियलक्षणाभिरविद्याकृताभिः संसर्गो विद्यया भवति संसर्गाभावे च तत्कृत
तस्य विशेषविज्ञानस्याभावान्न प्रेत्य संज्ञास्तीत्युक्तमिति पदयुक्तं विज्ञातारमरेकेन विजानीयादिति कर्तृवचनेन शब्देनोप
सेहत्त्वाविज्ञानात्मन एवेदं द्रष्टव्यत्वमिति तदपि काशकृत्स्नीयेनैव दर्शनेन परिहरणीयं॥ ॥ ॥

हितवानसिज्ञानरूपस्यात्मनो ज्ञानाभावेनापाप्रसंगादिति सूत्रेयेयाक्रोमनिराह नवा अरे इति मोहं मोहकं वाक्यं अविनाशीनाशोह
तुमस्त्वः अतउच्छित्तिधर्मानाशावात्रभवतीत्यनुच्छित्तिधर्मेत्यर्थः हतीयंवीजंततो येते विनिरसनीयमित्याह यदपीत्यादिना
आपमेतद्रूपेपिसत्यभेदागीकारात्केनेत्यादेपेनपुक्तः काशकृत्स्नस्यमतेतत्त्वन्त्यताभेदाद्धिज्ञानस्य कारकाभावात्सयुक्तइति
क्रान्त्या [illegible] त्वात्तत्मतेमतः कल्पितविज्ञातृत्वं नु क्षेत्रज्ञात्मनिभेजएवगत्योक्तमितिपरिहरणीयमित्यर्थः ॥

किंच सर्वोऽपि संसर्पालोचनया वाक्यस्य मुक्तात्मपरत्वावगमाद्धि ज्ञानत्वं कल्पितमेवान्यथा तु श्रुतिनतलिंगेन जीवपरत्वमित्याह।
अपि चेति अपि च शब्द पक्षे तदुक्ता पाकान्तरत्व पक्षे सम्वादे यत्वोः किं बीजं तदाह दर्शितमिति अतश्च श्रुतिमत्वाच्च पुनरपि स्मृतिसंमतिम
तमाह स देवेत्यादिना हेतूनां भेदो न पारमार्थिक इति प्रतिज्ञापाः तेव्यथः भेदाभेदपक्षे जीवस्य जन्मादिविकारवत्वात्तन्निषेधो न स्या
दित्याह सत्यापवदति भेदस्य सत्यत्वे तत्प्रमाणवाधितं दृव्रह्मेति निर्वाधं ज्ञानेन स्यादित्याह अन्यथा चेति अभेदस्यापि सत्वाभ्युपगमे

अपि च यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादिभ्योऽविद्याविषये तस्यैव दर्शनादिलक्षणां विशेषविज्ञाने प्रपंचा
यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना विद्याविषये तस्यैव दर्शनादिलक्षणस्य विशेषविज्ञानस्याभाव
मभिदधाति पुनश्च विषयाभावेऽप्यात्मानं विजानीयादित्याशंक्य विज्ञातारमरे केन विजानीयादित्याह ततश्च विशेष
विज्ञानाभावोपपादनपरत्वाद्वाक्यस्य विज्ञानधातुरेव केवलः सन्भूतपूर्वगत्या कर्तृवचनेन तृचा निर्दिष्ट इति गम्यते द
र्शितं तु पुरस्तात्पाकन्नीयस्य पक्षस्य श्रुतिमत्वं अतश्च विज्ञानात्मपरमात्मनोरविद्याप्रत्युपस्थापितनामरूपरचि
तदेहाद्युपाधिनिमित्तो भेदो न पारमार्थिक इत्येषोऽर्थः सर्वैर्वेदान्तवादिभिरभ्युपगन्तव्यः सदेव सोम्येदमग्र आसी
देकमेवाद्वितीयं आत्मैवेदं सर्वं ब्रह्मैवेदं सर्वं इदं सर्वं यदयमात्मा नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता इत्येवंरूपा
भ्यः श्रुतिभ्यः स्मृतिभ्यश्च वासुदेवः सर्वमिति क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वर
मित्येवंरूपाभ्यः भेददर्शनापवादाच्च अन्योऽसावन्योऽहमस्मीति न स वेद मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्येवं
जातीयकात् स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्मेति च सर्वविक्रियाप्रतिषेधात् अन्यथा च मुमु
क्षूणां निरपवादविज्ञानानुपपत्तेः सुनिश्चितार्थानुपपत्तेश्च निरपवादं हि विज्ञानं सर्वाकांक्षानिवर्तकमात्मविष
यमिष्यते वेदान्तविज्ञानसुनिश्चितार्था इति च श्रुतेः तत्र को मोहः कः शोक एकत्वमनुपश्यत इति च स्थितप्रज्ञल
क्षणस्मृतेश्च स्थिते च क्षेत्रज्ञपरमात्मैकत्वविषये सम्यग्दर्शने क्षेत्रज्ञः परमात्मेति नाममात्रभेदात् क्षेत्रज्ञोऽयं परमात्मनो भि
न्नः परमात्मायं क्षेत्रज्ञाद्भिन्न इत्येवंजातीयक आत्मभेदविषयो निर्बन्धो निरर्थकः ॥ ॥

त्याशंक्याभेदाभेदयोर्विरोधात्संशयः स्यादित्याह सुनिश्चितेति मास्तु निर्वाधज्ञानमित्यत आह निरपवादमिति अ
हं ब्रह्मेत्यवाधितनिश्चयस्यैव शोकादिनिवर्तकत्वमित्यत्र स्मृतिमप्याह स्थितेति आत्यन्तिकैकत्वे हि प्रज्ञा प्रतिष्ठिता
भवति न भेदाभेदयोरिति भावः नन्वनेन जीवपरमात्मनोरत्यन्ताभिन्नत्वमपर्यायनामवत्त्वात्सिद्धं भवेदित्यत आह स्थिते चेति ॥ ॥

कथं तर्हि परस्यात्मनो भेद इत्याशंक्य जीवत्वेश्वरत्वादिनिमित्तभेदादित्याह एको हीति किं चाविद्यातत्कार्यबुद्धिरूपायां गुहायां स्थितो जीवो
भवति तस्मात्सत्यं ब्रह्म निहितमिति श्रुतेः स्यादेतत् जीव एव ब्रह्मेत्याह नहीति कश्चिद्देवेक्षामिति जीवस्यानादित्वादित्यर्थः । नन्वेवमस्य
गुहायां ह्योः किं तस्मात् नामित्वमाह नचेति तत्सृष्ट्वा तदेवानुप्रवेशेन जीवत्वात्तद्भेदः ननु तयोरभेदे जीवस्य सर्वश्रुतिमानाद् दुःखस्यापि स्यादितः
स्य एकत्वात् एकत्वाभ्यां नयोर्भेद इति चेन्न दर्पणे प्रतिबिम्बस्य स्फुरणे बिम्बस्यास्फुरणवत् कल्पितभेदेन विरुद्धधर्मव्यवस्थोपप
त्तेः सत्यभेदे दोषमाह यदीति सोऽयमितिवत् तत्त्वमसीत्यादिवाक्येन सामानाधिकरण्याद् इत्युक्ताभेदो वेदान्तार्थो
न स्यात् ... तस्य बाधो न युक्त इत्यर्थः किं च भेदाभेदवादिनो ज्ञानकर्मभ्यां कृतकत्वेन कल्प्यं तत्र नित्यत्वदोषः
यदुक्तं न पिनित्यमिति तच्च युक्तिर्याः साध्यं तदनित्यमिति न्यायबाधितं मुक्ते कृतत्वे ध्वंसस्य ज्ञानसाध्यत्वान्नित्यत्वमात्मनो मात्र
त्वाच्च नानित्यत्वदोष इति भावः तस्मादेवं यो ब्रह्मणि प्रत्यग्ब्रह्मणि समन्वितमिति सिद्धं प्रकृतस्येति लक्षणस्य संगतिं वक्तु
५४

एको ह्ययमात्मा नानाभावेन बहुधाभिधीयत इति नहि सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायामिति कश्चिदेवे
कोऽगुहायामधिगन्तुं तद्वै न च ब्रह्मणोऽन्यो गुहायां निहितोऽस्ति तत्सृष्ट्वा तदेवानुप्राविशदिति स्रष्टुरेव प्रवेशश्रवणा
त् येन निर्विधं कुर्वन्ति ते वेदान्ता ... बाधमानाः श्रेयोद्वारं सम्यग्दर्शनमेव बाधन्ते कृतकमनित्यं च मोक्षं कल्पयन्ति न्या
व यतश्च न संगच्छन्ते इति ॥ ... ब्रह्मप्रतिज्ञानं ... तान्न परोधान्ते २१ यथाभ्युदयहेतुत्वाद् धर्मो जिज्ञास्यः एवं निःश्रेयसहेतुत्वाद् ब्र स्प४
ह्मजिज्ञास्यमित्युक्तं ब्रह्मणो लक्षणं च जन्माद्यस्य यत इति लक्षितं तत्त्वलक्षणं घटरुचकादीनां मृत्सुवर्णादिवत् प्रकृतित्वे
कुलालसुवर्णकारादिवन्निमित्तत्वे च समानमित्यतो भवति विमर्शः किमात्मकं पुनर्ब्रह्मणः कारणत्वं स्यादिति तत्र
निमित्तकारणमेव तावत्केवलं स्यादिति प्रतिभाति कस्मात् ईक्षापूर्वकं हि ब्रह्मणः कर्तृत्वमवगम्यते स ईक्षां चक्रे प्राण
मसृजतेत्यादिश्रुतिभ्यः ईक्षापूर्वकं च कर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु दृष्टं ॥

वृत्तं संगमयति यथेति तत्र हि ब्रह्मणो बुद्धिस्थत्वात् सामान्यतो जगत्कारणत्वं लक्षणसूत्रेण बुद्धिस्थे ब्रह्मणि कृत्स्नवेदान्तसम
न्वयं प्रतिपाद्य तत्कारणत्वे किं कर्तृत्वमात्रमुत प्रकृतित्वं कर्तृत्वोभयरूपमिति विशेषजिज्ञासायामिदमारभ्यते तत्र यावत्सामान्यज्ञा
नस्य विशेषचिन्ताहेतुत्वात् तेन तास्य संगतिः यद्यपि तदनन्तरमस्य युक्तं तथापि निश्चितानां ... वेदान्तैः कर्तृमात्रेश्वरमतनिरासः सकारे
तिहासप्रत्ययं तेरविलिखितलक्षणसूत्रसाध्यायादिसंगतिः एवं च सर्वविज्ञानप्रतिज्ञायाः मुख्यत्वाद् बहुस्यां प्रजायेयेति ... निरस्तं तद
युक्तं ... उपादानयोर्भेदेन प्रतिज्ञायाः गौणत्वादित्याक्षिपति तत्र निमित्तेत्यादिना पूर्वोत्तरपक्षयोर्द्वैताद्वैतसिद्धिः फलं ईक्षापू
र्वकेतीक्षणस्य कर्तृत्वे निश्चिते तथा च ब्रह्मणः प्रकृतिः कर्तृत्वायोगात् कर्ता स न प्रकृतिर्यथा घटकर्ता कुलाल इत्यर्थः

…कर्तु उपादानं कार्यत्वाद्घटवदित्याह अनेकेति ब्रह्मणो उपादानमीश्वरत्वाद्राजादिवदित्याह ईश्वरेति जगतो ब्रह्मप्रकृतिकं
…कारणत्वात् यदित्थं तत्तथा कुलालवित्लक्षणवद्घटवदित्याह कार्यं चेति निष्कलं निरवयवं निष्क्रियमचलं शान्तमपरि
…निरवद्यमिरसमस्तदोषतत्र हेतुः निरञ्जनमिति अञ्जनतुल्यतमः शून्यमित्यर्थः तर्हि जगतः सदृशोपादानं किं
…तत्राह पारिशेष्यादिति ब्रह्मनिषेधे प्रधानं परिशिष्यत इत्यभिमानतः सिद्धान्तयति प्रकृतिश्चेति चकारान्निमित्तत्व

अनेककारकपूर्विका च क्रियाफलसिद्धिर्लोके दृष्टा स च न्याय आदिकर्तर्यपि युक्तः संक्रमयितुं ईश्वरत्वप्रसि
द्धेश्वेश्वराणां हि राजवैवस्वतादीनां निमित्तकारणत्वमेव केवलं प्रतीयते तद्वत्परमेश्वरस्यापि निमित्तकारण
त्वमेव युक्तं प्रतिपत्तुं कार्यं चेदं जगत्सावयवमचेतनमशुद्धं च दृश्यते कारणेनापि तस्य तादृशेनैव भवितव्यं
कार्यकारणयोः सारूप्यदर्शनात् ब्रह्म च नैवं लक्षणमवगम्यते निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनमित्या
दिश्रुतिभ्यः पारिशेष्याद्ब्रह्मणोऽन्यदुपादानकारणमशुद्ध्यादिगुणकं स्मृतिप्रसिद्धमभ्युपगन्तव्यं निमित्तका
रणं च न केवलं निमित्तकारणमेव कस्मात् प्रतिज्ञादृष्टान्तानुपरोधात् एवं प्रतिज्ञादृष्टान्तौ श्रुतौ नोपरुध्येते प्र
तिज्ञा तावत् उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति तत्र चैकेन वि
ज्ञातेन सर्वमन्यदविज्ञातमपि विज्ञातं भवतीति प्रतीयते तच्चोपादानकारणविज्ञाने सर्वविज्ञानं संभवत्युपा
दानकारणाव्यतिरेकात्कार्यस्य निमित्तकारणाव्यतिरेकस्तु कार्यस्य नास्ति लोके तक्ष्णः प्रासादव्यतिरेकदर्शनात् दृ
ष्टान्तोऽपि यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि
त्युपादानकारणगोचर एवाम्नायते तथैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यादेकेन नखनिकृन्तनेन सर्वं
कार्ष्णायसं विज्ञातं स्यादिति च तथान्यत्रापि कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति प्रतिज्ञाय यथा
पृथिव्यामोषधयः संभवन्तीति दृष्टान्तः ॥

प्र॰ः एवमुभयरूपे कारणत्वे तयोरन्यतरो भवतीत्याह एवमिति कर्तृज्ञानादपि सर्वकार्यज्ञानं किं न स्यादित्यत आह निमित्तका
रणाव्यतिरेकस्त्विति स्वदृष्टान्ताः उपादानानां दृष्टान्तत्वाद्दार्ष्टान्तिकस्य ब्रह्मण उपादानत्वमवगम्यत इत्याह दृष्टान्तोऽपीति वाचारम्भणं ना
मधेयं विकारो न वस्तुतोऽस्तीति सत्यकारणज्ञानाद्विकारज्ञानं युक्तमित्यर्थः गतिसामान्यार्थं मुण्डकेऽपि प्रतिज्ञादृष्टान्तावाह तथान्यत्रा

वेददारण्यके पितावाह तथात्मनोपि ब्रह्मः स्फुरतीत्यनुगतस्फुरणं प्रकृतित्वादतिरेकेण विकारा न संतीति सोयमर्थो यथास्फुटः स्यात
था दृष्टांतः सदृश्यते हन्यमानदुंदुभिजन्याच्छब्दसामान्याद्ग्राह्याद्विशेषशब्दास्सामान्यग्रहणातिरेकेण एव यथा ग्रहीतव्या तानश्वा
न्कुर्यात् सामान्यस्य तु ग्रहणेन दुंदुभ्याघातजशब्दविशेषोपि गृहीतो भवति तस्य वा ग्रहणेन तद्वांतरशब्दोपि गृहीतो भवति अतः श्रा
वसामान्यग्रहणग्राह्याविशेषाश्शामान्ये कल्पिताः तद्वदात्मभानभास्या घटादयः आत्मविकल्पिता इत्यर्थः प्रतिज्ञादृष्टांतानु
रोधालिंगाद् ब्रह्मणः प्रकृतित्वमुक्त्वा पंचमीं श्रुत्याप्याह यत इति यतो वा इत्यत्र श्रुतौ यत इति पंचमी प्रकृतौ दृष्टेत्यन्वयः ज

तथात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमिति प्रतिज्ञास्य यथा दुंदुभेर्हन्यमानस्य न बाह्यान्छब्दाञ्छक्नुयाद्ग्रह
णाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघातस्य वा शब्दो गृहीत इति दृष्टांतः एवं यथासंभवं प्रतिज्ञादृष्टांतौ प्रकृतित्वप्रसाधनौ प्रत्येतव्यौ य
तः इत्यपि पंचमी प्रकृतौ गम्यते यथा हि लोके मृत्सुवर्णादिकमुपादानकारणं कुलालसुवर्णकारादीनधिष्ठातॄनपेक्ष्य प्र
वर्तते नैवं ब्रह्मण उपादानकारणस्य सतोन्योधिष्ठातापेक्ष्योस्ति प्रागुत्पत्तेरेकमेवाद्वितीयमित्यवधारणात् अधिष्ठात्रंतराभावोपि
प्रतिज्ञादृष्टांतानुरोधादेवोदितो वेदितव्यः अधिष्ठातरि ह्युपादानादन्यस्मिन्नभ्युपगम्यमाने पुनरप्येकविज्ञानेन सर्वविज्ञानस्यासंभवा
त् प्रतिज्ञादृष्टांतोपरोध एव स्यात् तस्मादधिष्ठात्रंतराभावादात्मनः कर्तृत्वमुपादानांतराभावाच्च प्रकृतित्वं अभिध्यो
पदेशाच्च २४ अभिध्योपदेशश्चात्मनः कर्तृत्वप्रकृतित्वे गमयति सोकामयत बहु स्यां प्रजायेयेति तदैक्षत बहु स्यां प्रजायेये
ति च तत्राभिध्यानपूर्विकायाः स्वातंत्र्यप्रवृत्तेः कर्तेति गम्यते बहु स्याम्॥ यतो वा इमानि भूतानि जायंते इत्यत्र जनिकर्तुः प्रकृतिरिति विशेष
स्मरणात् प्रकृतित्वं तत्रापि ध्रुवमपायेऽपादानमित्यपादानत्वाद्वा पंचमी॥ मिति प्रत्यगात्मविषयत्वात् बहुभवनाभिध्यान
स्य प्रकृतिरित्यपि गम्यते साक्षाच्चोभयाम्नानात् २५ प्रकृतित्वस्यायमभ्युच्चयः इतश्च प्रकृतिर्ब्रह्म यत्कारणं साक्षाद्ब्रह्मैव कारण
मुपादायोभौ प्रभवप्रलयावाम्नायेते सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते आकाशं प्रत्यस्तं यंतीति यद्धि यस्मात्प्रभ
वति यस्मिंश्च प्रलीयते तत्तस्योपादानं प्रसिद्धं यथा व्रीहियवादीनां पृथिवी साक्षादिति चोपादानांतरानुपादानं दर्शयति आका
शादेवेति प्रत्यस्तमयश्च नोपादानादन्यत्र कार्यस्य दृष्टः आत्मकृतेः परिणामात् २६ इतश्च प्रकृतिर्ब्रह्म यत्कारणं ब्रह्मप्रक्रियायां तदात्मा

निकुर्वीजोपमानस्य कार्यस्य प्रकृतिरुपादानसंज्ञिका भवतीति सूत्रार्थः संज्ञायाः फलमपादाने पंचमीति सूत्रात् प्रकृतौ पंचमीलाभः
[illegible] णः प्रकृतित्वं साधयित्वा कर्तृत्वं साधयति निमित्तत्वमिति ब्रह्मणस्तु अतिरिक्तकर्त्रपेक्षा प्रकृतित्वात् मृदादिवदित्यनुमानानामाग
[illegible] माह प्रागुत्पत्तेरिति जगत्कर्तृत्वे ब्रह्मान्यत्राधिष्ठातृत्वे योजयति अधिष्ठातरीति एकस्योभयरूपकारणत्वमविरुद्धमिति सूत्रचतुः
[illegible] धयति अतश्चेत्यादिना अभिध्यानरूपसंकल्पः अभ्युच्चयो हेत्वंतरं आकाशादेवेत्येवकारस्य चितमुपादानांतरानुपादानम
[illegible] दिति पदेन सूत्रकारो दर्शयतीति योजना आत्मसमवायिनी कृतिरात्मकृतिः सैव कस्मात्मनः कृतिं प्रति विषयत्वमास्थायते

ब्रा. भा.
प्र. वे.
२२१

ननु कृतेरन्यथः सिद्धेर्भवति विषयत्वस्य साध्यत्वमित्यत आह सोऽभयं विरुद्धमित्याशंक्यते कथं पुनरिति यथास्वदः साध्यपरिणामाभेदेन कृतिविष-
यत्वं तद्वदात्मनश्चेत्याह परिणामादिति आत्मानमिति विरोधस्तिशेषः सिद्धस्यापि साध्यत्वे दृष्टान्तमाह विकारात्मनेति ननु ब्रह्मण
आत्मानमिति द्वितीययुक्ता कार्यात्मना साध्यत्वमुक्तं प्रकृतित्वं कर्तृत्वस्यास्त्वित्यत आह स्वयमिति चेति ब्रह्मणः कृतिकर्मत्वा
पत्तिर्नात्ये परिणामादिति पदव्याख्यायान्यथापि व्याचष्टे पृथक्त्वमिति स्रष्टुरुत्पत्तिवद्ब्रह्मसद्भाव्यत्वेऽपि परिणामसामानाधि
करण्यश्रुतेः ब्रह्मणः प्रकृतित्वमित्यर्थः सत्यत्वं तद्भक्तत्वमन्यत्सत्यत्वे नहि पनितितृक्ते वक्तव्यवशादि अनिर्वचनीयस्य वाक्यकथं
तद्रूपाधिकरणवैमाहात्म्याभवदित्यर्थः अत्र सत्त्वे परिणामपक्षे कार्यमात्रे परः ननु सत्यकार्यात्मपरिणामपरः नहि तन्मात्रमिति विव

कथं पुनः पूर्वसिद्धस्य सतः कर्तृत्वेन व्यवस्थितस्य क्रियमाणत्वं शक्यं संपादयितुं परिणामादिति ब्रूमः पूर्वसिद्धोऽपि हि
सन्नात्माविशेषेण विकारात्मना परिणमयामास आत्मानमिति विकारात्मना च परिणामोऽसदादिषु प्रकृतिषु उपलब्धः
स्वयमिति च विशेषणात् निमित्तान्तरानपेक्षत्वमपि प्रतीयते परिणामादिति वा पृथक्सूत्रं तस्यायमर्थः इतश्च प्रकृ
तिर्ब्रह्म यत्कारणं ब्रह्मण एव विकारात्मना परिणामः सामानाधिकरण्येनाम्नायते सच्च त्यच्चाभवन्निरुक्तं चानिरुक्तं
चेत्यादिनेति योनिश्च हि गीयते २७ इतश्च प्रकृतिर्ब्रह्म यत्कारणं ब्रह्म योनिरित्यपि पठ्यते वेदान्तेषु कर्तारमीशं पुरुषं
ब्रह्मयोनिमिति यद्भूतयोनिं परिपश्यन्ति धीरा इति च योनिशब्दश्च प्रकृतिवचनः समधिगतो लोके पृथिवी योनिरोष
धिवनस्पतीनामिति स्त्रीयोनेरप्यस्त्येवावयवद्वारेण गर्भं प्रत्युपादानकारणत्वं क्वचित्स्थानवचनोऽपि योनिशब्दो दृ
ष्टः योनिष्ट इन्द्र निषदे अकारीति वाक्यशेषात्तु प्रकृतिवचनता परिगृह्यते यथोर्णनाभिः सृजते गृह्णते चेत्येवं जातीयकात् एवं प्रकृ
तित्वं ब्रह्मणः प्रसिद्धं यत्पुनरिदमुक्तं ईक्षापूर्वककर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु लोके दृष्टं नोपादानेष्वित्यादि
तत्प्रत्युच्यते न लोकवदिह भवितव्यं नह्ययमनुमानगम्योऽर्थः शब्दगम्यत्वात्तस्यार्थस्य यथाशब्दमिह भवितव्यं शब्दश्च

तेवाह स्वयं कृतमात्रत्वात् योनिशब्दाच्च प्रकृतित्वमित्याह योनिश्चेति कर्तारं क्रियायाः क्रिमेनतमीशं नियंतारं पुरुषं प्रत्यञ्चं ब्रह्म एवं
योनि [illegible] नेनपश्यन्तीत्यर्थः ननु नापादाने पितृस्त्री योनेर्योनिशब्दं दृष्टमित्यत आह स्त्रीयोनेरिति योनिर्मवयव शब्दार्थः
योनिया [illegible] स्थानमप्यर्थो भवति सोऽत्र भक्त्यान्यादि वाक्येन ग्राह्यः उर्णनाभ्यादि प्रकृत दृष्टान्तवाक्यशेषविरोधादित्याह क्वचि
दिति हे इन्द्र ते तव निषदे उपवेशनाय योनिः स्थानं मया अकारि कृतमित्यर्थः एवं पक्षोक्तानि मानानि अनुमानागमबाधमाह
यत्पुनरित्यादिना ननु नमानस्य श्रुत्यनपेक्षत्वान्नतयावाध इत्यत आह नहीति जगत्कर्तापि चः श्रुत्यैव सिध्यति यत्कृतिः साधा
रणस्य नित्याभिविरोधनेन नित्यकृतिमतोऽनुमानाभिमवादतः श्रौतमीश्वरं पक्षीकृत्यानुपादानत्वसाधने भवत्येवोपजीव्ययाप्रके

पङ्कं विलक्षणत्वात् कुशलो न जगदुपादानत्वमिति तत्राह पुनश्चेति न विलक्षणत्वादित्यारभ्य सूत्रार्थः अनुभयरूपं कारणत्वं ब्र
ह्मणो लक्षणमिति सिद्धं एतेन सर्वे व्याख्याताः अस्मिन्नधिकरणे स्वनान्यर्थं वक्तुं वृत्तमनुवदति ईक्षतेरिति प्रधानवादस्य प्रा
धान्येन निराकरणमुक्तं तेनाह तस्य हीत्यादिना तर्कपदवाच्चिव्यादपेक्षणीयाद्वैवल्यत्वादित्यत आह तेपित्विति निर्मूलत्वेके
ति पक्षान्तरमत्राह तेषामिति तथाहि छान्दोग्ये जगत्कारणत्वज्ञापनार्थं पिता पुत्रमुवाच आसीद्वदधानानां मध्य एकोऽभिधी
तिभिन्नाम भगवत्स्तुः वा वपुरुषः पुनः पित्रा किमत्र पश्यसीत्युक्ते न किंचन भगवत्स्याह तत्रापि प्राणिमानेन यपश्यसीत्युक्ते तथावन

पुनश्चेतन्सर्वं विस्तरेण प्रतिवक्ष्यामः एतेन सर्वे व्याख्याता व्याख्याताः २८ ईक्षतेर्नाशब्दमित्यारभ्य प्रधानका
रणवादः सूत्रैरेव पुनः पुनराशंक्य निराकृतः तस्य हि पक्षस्योपोद्बलकानि कानिचिल्लिंगाभासानि वेदान्तेष्वापात
न प्रतिभांतीति स च कार्यकारणानन्यत्वाभ्युपगमात्प्रत्यासन्नो वेदान्तवादस्य देवलप्रभृतिभिश्च केश्चिद्धर्मसूत्र
कारैः स्वग्रंथेष्वाश्रितः तेन तत्प्रतिषेधे यत्नोतीवकृतो नाण्वादिकारणप्रतिषेधे तेपि तु ब्रह्मकारणवादपक्षस्य प्र
तिपक्षत्वात्प्रतिषेधव्याः तेषामप्युपोद्बलकं वैदिकं किंचिल्लिंगमापातेन मंदमतीन्प्रतिभायादित्यतः प्रधानम
ल्लनिबर्हणन्यायेनातिदिशति एतेन प्रधानकारणवादप्रतिषेधन्यायकलापेन सर्वे अण्वादिकारणवादा अपि प्रतिषि
द्धतया व्याख्याता वेदितव्याः तेषामपि प्रधानवदशब्दत्वाच्छ्रुतिविरोधित्वाच्चेति व्याख्याता व्याख्याता इति पादा
भ्यासोध्यायपरिसमाप्तिं द्योतयति ॥ इति श्रीशारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ प्रथमस्याध्या
यस्य चतुर्थः पादः प्रथमोध्यायश्च १ ॥ ॥ राम ॥

किंचन पश्यतां च्छून्यस्वभाववादे प्रतीयेते अणुशब्दस्य परमाणुवाद इति एवमसदेवेदमग्र आसीदणोरणीयानित्यादि लिं
गदृष्ट्वा अत्राणुवादिवादः श्रौतात्मेति संशयः सति असदाद्यादिशब्दबलाच्छ्रौता इति प्राप्ते निदिशति एतेनेति अस्याति
देशत्वान्न पृथक्संगत्याद्यपेक्षा न किंचनादिसच्छब्दयोः प्रत्यक्षायोग्यवस्तुपरत्वादणुशब्दस्य तन्माभिप्रायत्वादशब्दत्वं तेषां वा
दानां प्रधानवादवदश्रौतत्वं ब्रह्मकारणश्रुतिबाधितत्वं च तस्माद्ब्रह्मैव परमकारणं तस्मिन्नेव सर्वेषां वेदान्तानां समन्वय इति
सिद्धं ॥ इति श्री परमहंसपरिव्राजकाचार्य श्रीगोविंदानंदभगवत्कृतौ शारीरमीमांसाव्याख्यायां भाष्यरत्नप्रभायां प्रथमस्याध्याय

शा भा स्वचतुर्थः पादः अध्यायश्च समाप्तः शुभमस्तु सर्वजगताम् ॥

प्र॰ वे॰

१३२

A. no. 132

132

१३२